॥श्रीकाशीजीमेमहल्लाघुघुरानासामाकीगलीश्रीयुतबाबूहरखचंदजीकेवाडेमेदुर्गाप्र॥
॥सादकटारेकेगणेशयंत्रालयमेसिद्धांतकौमुदीतत्वबोधिनीटीकासंयुक्तछापीगईलिखाम॥
॥हेसपांडेनेछापनेवालागोपालजिसेलेनाहोयसोचांदनीचौकमेकुंजगलीकेपच्छिमफाटक
॥केपासदुर्गाप्रसादपोथीवालेकीदुकानमेमिलैगी॥

सु॰ कौ॰ सि॰ टी॰ त॰ १

श्रीगणेशाय नमः॥ श्रीगुरुभ्यो नमः॥ नत्वा गजाननं देवं शारदां च गुरून्निजान्। बालानां बोधकर्त्रीयं लिख्यते तत्त्वबोधिनी १ नत्वा विश्वेश्वरं सांबं कृत्वा च गुरुवंदनं [illegible] टीका [illegible] तत्त्वबोधिनी १ विघ्नविघातायकृतं मंगलं शिष्यशिक्षायै निबध्नन् चिकीर्षितं प्रतिजानीते॥ मुनित्रयमित्यादिना। त्रयोऽवयवा यस्य तत्त्रयं [illegible] वोधि [illegible] पचा। मंतारो वेदशास्त्रार्थतत्त्वावगंतारो मुनयः मनेरुच्चेत्यौणादिकसूत्रेण मनेरत उकारो मुनिः पर इन्प्रत्ययश्च गुणस्तु नेह भवति। किदित्य [illegible] कार [illegible] णा। वेश्लेषा [illegible] नि [illegible] नत्रयं मुनित्रयं॥ ननु स्वयंभुवे नमस्कृत्येत्यत्रेवात्रापि नमः स्वस्तीत्यादिना चतुर्थी स्यादिति चेन्नैवम्। उपपदविभक्तेः कारकविभक्ति [illegible] वक्ष्यमाणत्वात् नमस्करोतीति देवानिति वद्द्वितीयायाएव युक्तत्वात्। किं च जहत्स्वार्था वृत्तिरिति पक्षे नमः शब्दस्यात्र निरर्थकत्वात्तद्योगे चतुर्थी न भवति अर्थवद्ग्रहणपरिभाषया [illegible] स्वयंभुवे नमस्कृत्येत्यत्र तु स्वयंभुवमनुकूलयितुमित्यर्थविवक्षायां क्रियार्थोपपदस्येत्यादिना चतुर्थीति मूले एव स्फुटी भविष्यति न चैवं नमः [illegible] न मः पदं व्यर्थं [illegible] हरये नमइत्यत्र तु हरिमनुकूलयितुमित्यर्थंऽविवक्षिते संबंधसामान्ये षष्ठ्यां प्राप्तायां नरपवादतया तस्यावश्यकत्वात्। न इक्रिरितिनेषांपा [illegible]

॥श्रीगणेशाय नमः॥ पाणिनये नमः॥ मुनित्रयन्नमस्कृत्य तदुक्तीः परिभाव्य च॥ वैयाकरणसिद्धान्तकौमुदीयं विरच्यते॥ १॥

न्नः [illegible] मुन्युक्तीः सूत्रवार्तिकभाष्याणीत्यर्थः तस्य मुनित्रयस्योक्ती रिति व्याख्याने पि मुनिसमुदायेन सूत्रं वार्तिकं भाष्यं च नोक्तमिति समुदायिनां मुनीनामेवोक्तीरिति वर्णयिष्यति॥ परिभाव्य विपर्यालोच्येत्यर्थः। न च परिपूर्वस्य भवते स्तिरस्कारार्थत्वात्कथमत्र ज्ञानार्थ तेति शंक्यं परीत्यस्य भावीति चुरादिणिजंतेन योगात्॥ केचिदत्र भवतिना योगमेवोपेत्याहुः परोभु [illegible] वज्ञाने इति विशेषणान्न तिरस्कारार्थत्वनियमः। मनसापरिभाव्य किंचिदित्यादिश्रीहर्षप्रयोगाच्च। अतस्त्वत्रात्र प्रयुक्तत्वदोषशंकापि नास्तीति। अन्ये तु अनादरः परिभवः परिभावस्तिरस्क्रियेति कोशात्परिपूर्वकाद्भवतेघञं तादेव तिरस्कारप्रतीतिर्नान्यस्मादित्याशंकैवात्र नास्ती त्याहुस्तन्मंदम्। परिभूय परिभवतीत्यतोपि तिरस्कारप्रतीतेः वैयाकरणेति व्याकरणमधीयते विदंति वा वैयाकरणाः तत्सिद्धांतानां कौमुदी प्रकाशिकेत्यर्थः। निदुष्टसकलजनाल्हादकत्वसाम्येन कौमुदीशब्दप्रयोगः। करिष्यमाणस्य [illegible] को मुद्यः [illegible] सन्निधापितत्वादियमित्यंगुल्यानिर्देशः। विरच्यत इति मयेति शेषः। रच प्रतियत्ने प्रतियत्नो गुणाधानं विपूर्वादस्माद्वर्तमानसामीप्ये भविष्यदर्थे वर्तमानप्रत्ययः। ॥

सूत्रेष्वेवैभुवदस्यसावज्ञानइति४

3749

उपदशेंत्यंहल्[illegible]ति उपदेशेकिम् अग्निचित् सोमसुतइतिकाशिका अत्रेत्संज्ञायांलोपः स्यात् नचतुकोवैयर्थ्यं आगत्येत्यादौचरितार्थत्वात् नचक्विपःपित्वस्यवैयर्थ्यं अग्निचि
तः पित्यादौचरितार्थत्वादितिहृदनः अंत्यंकिं मनिनोमकारस्यमाभूत् सत्यांहीत्संज्ञायामंत्यदचः परः स्यात्वेश्म सद्म सर्वधातुभ्योमनिन् हलितिकिं भूसन्नायांभविता नचप्रयो
जनाभावान्नेत्वमितिवाच्यं सत्यांनित्संज्ञायामूदितइतिइड्विकल्पापत्तेः अन्येतु विरिणोति जिरिणोतिइहधातोरंत्यस्यमाभूत्सत्यामित्संज्ञायामिदित्इतिनुमस्यादित्याहुः आद्यो
च्चारणमिति आद्योच्चारणविषयीभूतोयःशब्दस्तस्यांत्यंहलित्स्यादितिफलितोर्थः उपदेशेजनु उपदेशनमुपदेशोभावेघञ् उपदेशेकिं अभ्यआंअपः सप्तम्यर्थद्योतकोआङ्
आङोनुनासिकः [illegible]वसीत्याकारोनुनासिकः यद्यप्यत्रउञऊँइत्यत्रेवानुनासिकविधानसामर्थ्यान्नेत्वमितिसुवचंतथाप्युत्तरार्थमवश्यंकर्त्तव्यमुपदेशग्रहणंस्प[illegible]प्रतिप
त्तयेइहैवकृतं अचिकिम् मनिनोमकारस्यमाभूत् नचहलंत्यमित्यंत्यग्रहणसामर्थ्यादंत्यस्यमकारस्यनभवेदितिवाच्यं आलचइत्यत्रालचप्रत्ययादावतिप्रसंगवारणे
नतस्यचरितार्थत्वात् अनुनासिकइतिकिं ईक्षदर्शने ईक्षितःसत्यांहीत्संज्ञायांश्वीदितोनिष्ठायामितीण्नस्यात् यदप्यत्रोपजीव्यत्वादनुनासिकसंज्ञा[illegible]थमंवक्तुमुचिता

हलंत्यम्॥ उपदेशेंत्यंहलित्स्यात्॥ उपदेशआद्योच्चारणंततोण् अचइत्यादिसंज्ञासिद्धौ॥ उपदेशेऽजनुनासिकइत्॥ १।३।२॥ उपदे
शेऽनुनासिकोऽजित्संज्ञः स्यात् प्रतिज्ञानुनासिक्याः पाणिनीयाः लणसूत्रस्थावर्णेनसहोच्चार्यमाणोरेफोरलयोःसंज्ञा प्रत्याहारेष्वि

तथापिनासिकामनुगतइतियोगाश्रयणेनैवगतार्थत्वादनुनासिकसंज्ञासूत्रंमंदप्रयोजनमितिध्वनयितुंनेहोपन्यस्तं नचैवंयरोनुनासिकइत्यत्रयरःस्थानेनुनासिकग्रहणं
[illegible]दंतस्यानुनासिकशब्देपरेअनुनासिकशब्दःस्यादित्यर्थः प्रसज्येतस्वंरूपमितिपरिभाषोपस्थानात् संज्ञाकरणेतुअशब्दसंज्ञेतिनिषेधान्नायंदोषइतिवाच्यं उक्तपरिभाषाया
भाष्येप्रत्याख्यानात् उपान्मंत्रकरणे पुक्रुभांडचीवराण्णिङ् ङुमुषिः पमित्यादिनिर्देशेनस्वंरूपमितिपरिभाषायाअनुपस्थितिकल्पनात्सूत्रमतेपिदोषाभावात् [illegible]
शाश्रयणे अप्रतिपत्तिगौरवमितिचेत् अतएवनिष्प्रयोजनमित्यनुक्त्वामंदप्रयोजनमित्युक्तं प्रतिज्ञायतेइतिप्रतिज्ञा आतश्चोपसर्गेइतिकर्मण्यङ् अनुनासिकस्यभावआ
नुनासिक्यंगुणवचनब्राह्मणादिभ्यःष्यञ् प्रतिज्ञाआनुनासिक्यंयेषामितिविग्रहः केचित्तुप्रतिज्ञानंप्रतिज्ञासाअस्यास्तीतिप्रतिज्ञंअर्शआद्यच प्रतिज्ञंआनुनासिक्यमेषा
मिति विग्रहइति यद्यपिसूत्रकारकृतोनुनासिकपाठइदानींपरिभ्रष्टस्तथापिवृत्तिकारादिव्यवहारबलेनयथाकार्यंप्राक्स्थितंइत्यनुमीयतइतिभावः पाणिनीयाइति पाणि

निनाप्रोक्तं पाणिनीयं वृद्धाच्छः तदधीयते विदंति वापाणिनीयाः तदधीतेइत्यण् प्रोक्ताल्लुगिति लुक् ननु रलयोरिति नूनं टकारस्यापि मध्यगत्वाद त आह प्रत्याहारेष्विति॥ः।
अनुनासिक इत्यादौ इति आदिशब्देन पाणिनीयं कुत्सितैरङःपदांतादिति इत्यादिग्राह्यं प्रत्याहारशब्देनेति प्रत्याह्रियंते संक्षिप्यंते वर्णा यत्रेति प्रत्याहारः करणाधिकरणयोश्च
स्युटि प्राप्ते कृत्यल्युटो बहुलमिति बहुलग्रहणादधिकरणे घञ् यद्यपि योगमात्रमकारादिसंज्ञास्विति प्रसक्तं तथापि योगरूढिरिति भावः ऊकालोऽज्झ्रस्वदीर्घप्लुतः
हारः हुसोत्र पुंस्त्वं ऊं इति त्रयाणां प्रश्लेषेण निर्देश इत्याह उश्च ऊश्च ऊ३श्च वः वामिति त्रयाणां सवर्णदीर्घे कृते जसि परतो यणि वः आमि तु वां काल इव कालो यस्येति
कथनमिदं विग्रहस्तु वः कालो यस्येति बोध्यः उशब्देन स्वोच्चारणकालो लक्ष्यते अच्किम् संयोगस्य माभूत् प्रतक्ष्य प्ररक्ष्य कषयोरेकमात्रत्वेन ह्रस्वसंज्ञायां ह्रस्वस्यपिति कृतीति तु

अनुनासिक इत्यादिनिर्देशात् न ह्यत्र ककारे परे पूर्वकार्यं दृश्यते आदिरंत्येनेत्येतत्सूत्रेण कृताः संज्ञाः प्रत्याहारशब्देन व्यवह्रियंते॥ ऊका
लोऽज्झ्रस्वदीर्घप्लुतः १।२।२७॥ उश्च ऊश्च ऊ३श्च वः वां काल इव कालो यस्य सोऽच् क्रमात् ह्रस्वदीर्घप्लुतसंज्ञः स्यात् स प्रत्येकमुदात्तादिभेदेन
त्रिधा॥ उच्चैरुदात्तः १।२९ ।ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात् आये नीचैरनुदात्तः १।२।३०॥ स्यष्ट। अर्वाङ् समाहा
रः स्वरितः १।२।३१ ।उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात्॥८॥॥

त्याकार उदात्तः यच्छब्दः फिषइत्यंतोदात्तः ततः परस्य जसः सुप्त्वादनुदात्तत्वं त्यदाद्यत्वे पररूपत्वे शीभावे आद्गुणे च सति एकादेश उदात्तेनेत्येकार उदात्तः। कृस्यात् आये इति निपातात् आद्युदात्ताः।
तमंचतीति अर्वाङ् ऋत्विगादिना अंचतेः सुप्युपपदे क्विन् ऋगतौ विस्मात् तामदिपद्यर्तीत्यादिना वनिपि गुणे च निष्पन्नोऽर्वन्शब्दो धातुस्वरेणाद्युदात्तः वनिपः पित्वेनानु
दात्तत्वात् अंचतेरकारोऽपि धातुस्वरेण पित्स्वरेण वा उदात्तः उपपदमतिङिति समासे कृते समासस्येति स्वरेण तदपवादभूतेन गतिकारकोपपदात्कृदिति कृदुत्तरपदप्रकृतिस्व
रेण वा अर्वतेरकार उदात्तः वनो नलोपे सवर्णदीर्घे च कृते एकादेश उदात्तेनेत्याकार उदात्त इति अनुदात्तं पदमेकवर्जमिति शेषनिघाताद्याकारोऽनुदात्तः एतच्च संभवाभिप्रा
॥येणोक्तं वेदभाष्ये अर्वाङ् अभिमुख इति स्थितं अतंत्रमिति अविवक्षितमित्यर्थः॥८॥

सु·बु·
सि·कौ·
टी·त·
४

तुल्यास्यं किं तप्तं अत्र पकारस्य तकारे परे झरो झरीति लोपो मा भूत् प्रयत्नग्रहणं किं वाक्श्च्योतति इति शस्य लोपो न अमङणनानामिति नासिका चेति चकारो ऽनुस्वारस्ववर्गा
नुकूलं तालव्यादि समुच्चीयते एदैतोरित्यादौ तपरत्वमसंदेहार्थं न तत्कालग्रहणार्थं तेन प्लुतस्यापि संग्रहः चतुर्द्धेति निष्कर्षपक्षे तु पंचधा ऊष्मणामीषद्विवृतप्रयत्न अपगम
व स्पृष्टेषत्स्पृष्टेति एतेषामाभ्यंतरत्वं वर्णोत्पत्तिप्राग्भावित्वात् तथाहि नाभिप्रदेशात्प्रयत्नप्रेरितो वायुः प्राणो नाम ऊर्ध्वमाक्रामन्नुरःप्रभृतीनि स्थानान्याहंति ततो वर्णस्य तदभि
व्यंजकध्वनेर्वा उत्पत्तिः तत्रोत्पत्तेः प्राग्यदा जिह्वाग्रोपाग्रमध्यमूलानि तत्तद्वर्णोत्पत्तिस्थानं ताल्वादि सम्यक्स्पृष्टं शंति तदा स्पृष्टता ईषद्यदा स्पृष्टं शंति तदा ईषत्स्पृष्टता समीपावस्थानम्।

तुल्यास्यप्रयत्नं सवर्णम् ।१।१।९। ताल्वादिस्थानमाभ्यंतरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात् अकुहविसर्जनीयानां कंठः इ
चुयशानां तालु ऋटुरषाणां मूर्द्धा लृतुलसानां दंताः उपूपध्मानीयानामोष्ठौ ञमङणनानां नासिका च एदैतोः कंठतालु ओदौतोः।
कंठोष्ठं वकारस्य दंतोष्ठं जिह्वामूलीयस्य जिह्वामूलं नासिकानुस्वारस्य इति स्थानानि ॥ यत्नो द्विधा आभ्यंतरो बाह्यश्च आद्यश्चतु
र्द्धा स्पृष्टेषत्स्पृष्टविवृतसंवृतभेदात् तत्र स्पृष्टं प्रयत्नं स्पर्शानां ईषत्स्पृष्टमंतस्थानां विवृतमूष्मणां स्वराणां च ह्रस्वस्यावर्णस्य प्रयोगे
संवृतं प्रक्रियादशायां तु विवृतमेव एतच्च सूत्रकारेण ज्ञापितं तथाहि अ अ ।८।४।६८। विवृतमनूद्य संवृतोऽनेन विधीय
ते अस्य चाष्टाध्यायीं संपूर्णां प्रत्यसिद्धत्वाच्छास्त्रदृष्ट्या विवृतत्वमस्त्येव तथा च सूत्रं ॥ ९ ॥

((त्रे संवृतता दूरत्वे विवृतता अत एव इचुयशा
नां तालव्यताविशेषेपि तालुस्थानेन सह जिह्वाग्रादीनां च वर्णोच्चारणे कर्तव्ये सम्यक्स्पर्शः यकारे ईषत्स्पर्शः शकारेकारयोस्तु दूर एव स्थितिरित्याद्यनुभवं शिक्षाकारोक्तिं
चानुसृत्य विवेचनीयं विवारः संवारादयस्तु वर्णोत्पत्तेः पश्चान्मूर्द्धि प्रतिहते निवृत्ते प्राणाख्ये वायावुत्पद्यंत इति बाह्या इत्युच्यंते गलबिलस्य संकोचात्संवारः।
तस्यैव विकासाद्विवारः एतौ च संवृतविवृतरूपाभ्यामाभ्यंतराभ्यां भिन्नावेव तयोः समीपदूरावस्थानात्मकत्वादित्यवधेयं अत्र सुपामिति विभक्त्योर्लुक् आद्यो विवृतः
॥ द्वितीयस्तु संवृतस्तदाह विवृतमनूद्येति विवृतस्य स्थान इत्यर्थः विवृतत्वमस्त्येवेति तेन दंडानयनमित्यादौ सवर्णदीर्घः सिद्ध्यतीति भावः॥

राम
४

पूर्वत्रासिद्धं यद्ययं स्वतंत्रो विधिः स्यात्तर्हि त्रिपादी पूर्वं प्रत्यसिद्धेत्येव लभ्येत त्रैपादिकं तु पूर्वं प्रति परं नासिद्धं स्यात् तथा च प्रशानित्यत्र मो नो धातोरिति नत्वस्य सिद्धत्वान्नलो।
पः स्यात् नत्वविधेः संबुद्धौ चरितार्थत्वात् तथाऽनड्वानित्यत्र संयोगान्तलोपस्य सिद्धत्वान्नलोपः स्यात् नुम्विधेस्तु संबुद्धौ चरितार्थत्वात् अत आह अधिकारोऽयमिति त्रिप
द्यां विहितं कार्यमिति कार्यासिद्धिपक्षे तु अमू अमुमित्यादि न सिद्ध्येदिति भावः यथा चैतन्न सिध्यति तथाऽदःशब्दव्याख्यावसरेऽस्माभिरुपपादयिष्यते एकादशधेति य।
द्यपि भाष्ये ष्टावुक्ता उदात्तादयस्तु नोक्तास्तथापि कैयटोक्तिमनुसृत्यैकादशोक्ता इति बोध्यं खयां यमा इति बालबोधनाय बाह्यप्रयत्नाः केचित्सुगमोपायेनोपनिबद्धाः तथा

पूर्वत्रासिद्धं।८।२।१।अधिकारोऽयं तेन सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं बाह्यप्रयत्नस्त्वेकादश
धा विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति खयां यमाः खयः ᳵकᳶपौ विसर्गः शर एव च स
ते श्वासानुप्रदाना अघोषाश्च विवृण्वते। कंठमन्ये तु घोषाः स्युः संवृता नादभागिनः। अयुग्मा वर्गयमगा यणश्चाल्पासवः स्मृताः। वर्गेष्वाद्या
नां चतुर्णां पञ्चमे परे मध्ये यमो नाम पूर्वसदृशो वर्णः प्रातिशाख्ये प्रसिद्धः पलिक्क्नीः चख्ख्नतुः अग्ग्निः घ्घ्नन्तीत्यत्र क्रमेण कखगघेभ्यः परे त
त्सदृशास्ते यमाः तत्र वर्गाणां प्रथमद्वितीयाः खयः तथा तेषामेव यमाः जिह्वामूलीयोपध्मानीयौ विसर्गः शषसाश्चेत्येतेषां विवारः श्वासोऽघोषश्च अ
न्येषां तु संवारो नादो घोषश्च वर्गाणां प्रथमतृतीयपंचमाः प्रथमतृतीययमौ यवलाश्चाल्पप्राणाः अन्ये महाप्राणा इत्यर्थः बाह्यप्रयत्नाश्च यद्य
पि सवर्णसंज्ञायामनुपयुक्तास्तथाप्यांतरतम्यपरीक्षायामुपयोक्ष्यंत इति बोध्यं॥१२॥ खरो विवाराः श्वासा अघोषाश्च हशः संवारा नादा घोषाश्च व
र्गाणां प्रथमतृतीयपंचमा यणश्चाल्पप्राणाः वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणा इति एते श्वासानुप्रदाना इति श्वासप्रयत्नका इत्यर्थः विवृण्वते कंठमिति।
विवारप्रयत्ना इति भावः अन्ये [illegible] हशो हशां यमा अनुस्वारश्च नादेति नादभागिनो नादप्रयत्नवंत इत्यर्थः अयुग्मा इति प्रथमतृतीयपंचमा वर्गेष्वयुग्माः वर्गयम इति
यमगा इत्यर्थः असव इति अल्पासवोऽल्पप्राणाः पुंसि भूम्न्यसवः प्राणा इत्यमरः अनुपयुक्ता इति अन्यथा कखगघादीनां परस्परं सावर्ण्यं न स्यादिति भावः आंतरतम्यपरी।

यामिति परीक्षाचअघोषस्यमहाप्राणस्यसस्यतादृशएवथकारः घोषवतोनादवतोमहाप्राणस्यसस्यतादृशोवर्गचतुर्थइत्यादिमूलएवस्फुटीभविष्यति। ~। कादयइति लोकप्रसि
द्धपाठापेक्षमिदं चतुर्दशसूत्र्यामावसानत्वायोगात् कपाभ्यांप्रागिति एतच्चोपलक्षणं खफाभ्यांप्रागित्यपिबोध्यं अर्द्धविसर्गेति — सादृश्यमुच्चारणेनैवनेचबोध्यं ऋलवर्णा
योरिति ऋत्यकइतिप्रकृतिभावः विग्रहस्तुआचलृवर्णश्चऋलृवर्णौतयोरित्येके मनोरमायांतुआचआचरलौतौचतौवर्णौचेत्यादिस्थितं नाज्झलौ आकारसहितइतिकं
लसमयवेलास्वित्यादिनिर्देशः आकारप्रश्लेषेलिंगंयुणादिकमिति शीतलशब्देसवर्णदीर्घआदिशब्दार्थः इहअसेधदित्यादौहोढइतिढत्वेनन्यपिमु… च इणाइतिसस्यषत्व

कादयोमावसानाःस्पर्शाः यरलवाअंतस्थाः शेषसहाऊष्माणः अचःस्वराः ᳵकᳵपइतिकपाभ्यांप्रागर्द्धविसर्गसदृशौजिह्वामूलीयोपध्मा
नीयौ अंअः इत्यचःपरावनुस्वारविसर्गौइतिप्रयत्नविवेकः "ऋलृवर्णयोर्मिथःसावर्ण्यंवाच्यम् अकारहकारयोरिकारशकारयोःऋकारषकार
योर्लृकारसकारयोश्चमिथः सावर्ण्येप्राप्ते "नाज्झलौ ।।१।१।१०।आकारसहितोऽच् आच् सचहल्चेत्येतौमिथः सवर्णौनस्तः तेनदधी
त्यस्यहरतिशीतलंषष्ठंसांद्रमित्येतेषुपरेषुयणादिकंन अन्यथादीर्घादीनामिवहकारादीनामपिग्रहणकशास्त्रबलादच्त्वंस्यात् न… आ
णुदित्सवर्णस्यचाप्रत्ययः।।१।१।६९।प्रतीयतेविधीयतइतिप्रत्ययः "अविधीयमानोऽण् उदिच्चसवर्णस्यसंज्ञास्यात् अत्राणपरेणणकारेण तदे
वमइत्यष्टादशानांसंज्ञातथेकारोकारौऋकारस्त्रिंशतः एवंलृकारोपि एचोद्वादशानां एदैतोरोदौतोश्चनमिथःसावर्ण्यं ऐऔजितिसूत्रारंभसा
मर्थ्यात् तेनैचश्चतुर्विंशतेःसंज्ञास्युरितिनापादनीयं ॥५॥ मपिनेतितुनसुवचं ढत्वंप्रतितस्या — सिद्धत्वादितिदिक् अन्यथेति नाज्झलावित्यस्यानारंभे

ग्रहणकशास्त्रबलादिति अयंभावः दीर्घादीनामिवहकारादीनामप्यकारादिवाच्यत्वेभ्युपगमेत्स्यच्त्वंस्यात् प्रत्याहारेषुतद्वाच्यवाच्येनिरूढलक्षणाभ्युपगमादिति अवि
धीय — मानोऽणितितेनरुदमइराइतंइत्यत्रत्रिमात्रस्कारोनभवति उदिच्चेति इहाविधीयमानइतिनसंबध्यते उदित्करणसामर्थ्यात् तेनविधीयमानोप्युदित्सवर्णान्गृह्णात्येव
कुहोश्चुः जगाद्जगदे परेणणकारेणेति व्याख्यानतोविशेषप्रतिपत्तेः उपसर्गादृतिऋनउदित्यादौतपरकरणलिंगाच्च यदिपूर्वणस्यात्तर्हितपरत्वमित्यनर्थकंस्यात् ऋकार

स्थानसाम्येन सवर्णग्राहकत्वात् एवं च तपरत्वाद्दीर्घेण उपऋकारीयतीत्यादिवक्ष्यमाणग्रंथोपि संगच्छते एवं ऌकारोपि इति त्रिंशतः संज्ञेत्यनुषज्यते एतच्च न्यायसाम्यादुक्तं व
स्तुतो ऌकारस्य ऋकारग्राहकत्वं न कुत्राप्युपलभ्यते सूत्रारंभसामर्थ्यादिति सतितु सावर्ण्ये एकारेणैकारग्रहणादोकारेणौकारग्रहणादेओजिति सूत्रारंभो व्यर्थः स्यादिति भावः
नापादनीयमिति तेन ग्लाव्ग्लाव इत्यत्र औतोम्शसोरिति न प्रवर्त्तत इति मूलएव स्फुटीभविष्यति॥ यद्यपीति ग्रहणकशास्त्रस्याप्यनिष्पत्तेरिति भावः एतच्चाकसवर्णे दीर्घ इत्यत्र।
व्युत्पादयिष्यामः आक्षरेति आक्षराणां समाम्नाय उपदेशसूत्राणि तत्र भवा आक्षरसमाम्नायिकाः वह्रूचौ नोदात्तादिति ठञ् होढ इति न भवतीति यद्यप्याकारप्रश्लेषाभावे संयो
गांतलोपस्यैव प्राप्नोति न तु ढत्वं तस्यासिद्धत्वादतोत्र संयोगांतलोपो न भवतीति वक्तुमुचितम् तथापि कार्यकालं संज्ञापरिभाषमिति पक्षे त्रैपादिकें ऽतरंगे बहिरंगपरिभाषायाः प्रवृत्तेरं
तरंगे ढत्वे कर्तव्ये बहिरंगः संयोगांतलोपोऽसिद्ध इति मत्वेदमुक्तमित्येके अन्ये तु संज्ञापूर्वको विधिरनित्य इति लोपस्य वारणं कथंचित्कर्तुं शक्यमित्याशयेन ढत्वेनेत्युक्तमित्याहुः विश्वपा

नाञ्झलाविति निषेधो यद्यप्याक्षरसमाम्नायिकानामेव तथापि हकारस्याकारेण न सवर्णः तत्राप्याकारस्य प्रश्लिष्टत्वात् तेन विश्वपाभिरित्यत्र हो
ढ इति ढत्वं न भवति अनुनासिकाननुनासिकभेदेन यवला द्विधा तेनाननुनासिकास्ते द्वयोर्द्वयोः संज्ञा तपरस्तत्कालस्य।१।१।७०। तः परो यस्मात् स
च तात्परश्चोच्चार्यमाणसमकालस्यैव संज्ञा स्यात् तेन अत् इत् उत् इत्यादयः षण्णां षण्णां संज्ञा ऋत् इति द्वादशानां वृद्धिरादैच्।१।१।१। आदैच्च वृद्धिसंज्ञः स्या
त् अदेङ्गुणः।१।१।२। अदेङ् च गुणसंज्ञः स्यात्॥ ९॥ भिदित्यत्रेत्युपलक्षणं विश्वपाः विश्वपाभ्यामित्यादावपि न भवति होढ इत्युपलक्षणं ऐ च मा स्म भूदोजयोः इत्या
कारस्य च कारेणेतीति दिक् यदितु विश्वजमक्ष्मणामित्यत्र ईषत्स्पृष्टमित्यत ईषदित्यनुवर्त्य स्वराणां चेत्यत्र निवर्त्य ईषद्विवृतमूष्मणां विवृतं स्वराणामिति प्रयत्नभेदो व्याख्यायते तदा नाञ्झ
लाविति सूत्रं प्रत्याख्यातुं शक्यमित्याकरे स्थितं अननुनासिकास्त इति एतच्चाक्षरसमाम्नायिकाग्रहणादेव सवर्णानां संज्ञा भवंतीति भावः एवं च रेफो हकारश्च ग्रहणकप्रत्याहारांतर्गतोपि न कस्यापि
संज्ञा तत्सवर्णस्यान्यस्याभावादित्यवगन्तव्यम् स च तात्परश्चेति तेनत्रादिना उभयं विवक्षितमिति भावः वृद्धिरादैच् आच्च ऐच्चेति इतरेतरयोगद्वंद्वः सुपां सुलुगिति ङसो लुक् ह्रस्वसमा
हारद्वंद्वः न वैद्वंद्वाच्चुदषहांतात्समाहार इति टच् स्यादिति वाच्यं समासांतविधेरनित्यत्वात् तत्र प्रमाणं समासेषु वक्ष्यामः अथवा आदित्यसमस्तमेवास्तु वृद्धिशब्दः तेन तृत्यादाये
जनीयः अयमप्यादित्वेन भवत्वा चावः ऐजिति हस्तिमात्र एव तात्परत्वात् तेन कृष्णैकत्वमित्यत्र त्रिमात्रो न वृद्धिप्रदेशाः वृद्धिरेचीत्यादयः अदेङ्गुणः तपरकरणमिह सरूपार्थं तेन गोदकमि

त्यत्रत्रिमात्रेण तरतीत्यत्र त्वकारएवनतुकदाचिदाकारः नच प्रमाणान्तरानर्थेणानियमसिद्धिः परत्वे कृते एकस्याध्यर्द्धमात्रत्वात् अपरस्यार्द्धतृतीयमात्रत्वात् गुणप्रदेशास्तु अदेङ्गुणः अतो
गुणेइत्यादयः ॥ ॥ भूवादयइति भूश्चवाश्च भूवौ इति द्वंद्वः आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः आदिश्च आदिश्च आदी भूवौ आदी येषामितिविग्रहः भूप्रभृतयो वासदृशाःश
दृश्यं च क्रियावाचकत्वेनेत्यभिप्रेत्याह क्रियावाचिनइति क्रियावाचिनइति किं याःपश्यसीत्यादौ धातुत्वमाभूत् सति हि तस्मिन्नातोधातोरित्याकारलोपस्स्यादिति स्थितमनोस्थाप्यं भ्वादयइ
हि स्रक् पृथक् इत्याद्यव्ययानां शिष्यइति भावार्थेतिङ् तस्यमाभूत् स्तम्भ्वादीनां उदित्करणेन सौत्राणां धातुत्वं ज्ञाप्यते चुलुम्पादीनां बहुलमेतन्निदर्शनमिति गणसूत्रेणासंग्रहः प्राभीष्म
त् रेफविशिष्ट ग्रहणं किं ईश्वरेतोसुन्कसुनावित्यस्य व्याप्तिन्यायेनावधित्वंमाभूत् इति यदि तु प्रत्यासत्त्येव अधिरीश्वरइत्यस्य पूर्वावधित्वसिद्धिरित्युच्यते तर्हि स्पष्टप्रतिपत्त्यर्थमेवास्तु च्वा
दयः अद्रव्यार्थाः किं पशुः लिङ्गसंख्यान्वितं द्रव्यं इह तु स्यादेवलोधं नयतिपशुमन्यमानाःपशुइतिसम्यगर्थे गतिश्च उपसर्गसंज्ञायां प्रमावेशार्थश्चकारः अन्वयाच्छाकडारादिति

भूवादयोधातवः १।३।१ क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः॥ प्राग्रीश्वरान्निपाताः १।४।५६ इत्यधिकृत्य चादयोऽसत्त्वे १।४।५७ अद्रव्यार्था श्चादयोनिपातसंज्ञाः स्युः प्रादयः १।४।५८ अद्रव्यार्थाप्रादयस्तथा उपसर्गाःक्रियायोगे १।४।५९ गतिश्च १।४।६० प्रादयःक्रियायोगेउपसर्गसंज्ञास्यु र्गतिसंज्ञाश्च प्र परा अप सम अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उद् अभि प्रति परि उप एते प्रादयः नवेतिविभाषा १।१।४४ निषेधविकल्पयोर्विभाषासंज्ञास्यात्

स्यर्थापयः स्यात् त्फलंतु प्रणायमित्यादावुपसर्गादसमासइतिणत्वं गतिकारकेति कृदुत्तरपदप्रकृतिस्वरसिद्धिश्चेतिदिक् निस्निर्
दुस्दुर्इति उपसर्गस्यायतावितिनिर्दुरोर्लत्वं निलयते दुलयते निसोदुसश्चरुत्वस्यासिद्धत्वाल्लत्वाभावः निरयते दुरयते नवेतिविभाषा नेतिप्रतिषेधो वेतिविकल्पस्तदाह निषे
धविकल्पयोरिति विभाषाश्वेरित्यादिषु प्रतिषेधविकल्पावुपतिष्ठेते तत्र प्रतिषेधेनसमीकृते विषये पश्चाद्विकल्पःप्रवर्तते शुशाव शिश्वायेत्यत्राप्राप्तेविकल्पः शुशुवतुः शिश्वि
यतुरित्यादौ तु उवङ्स्वर्पीति मित्यप्राप्नावितिविवेकः अत्रेदंबोध्यं इतिशब्दः काकाक्षिन्यायेनोभाभ्यां संबध्यते सर्वपदार्थविपर्यासकृत् तेननिषेधोविकल्पश्च नवाशब्दार्थः संज्ञि
विभाषाशब्दार्थोविकल्पःसंज्ञा उभयत्रविभाषार्थंचेदंसूत्रं प्राप्तविभाषायामप्राप्तविभाषायां च नास्योपयोगः प्राप्तविभाषायां भावांशस्यसिद्धत्वेनविभाषाश्रुत्यापक्षेभवतिभावां
शमनूद्यपक्षेनभवतीत्यभावांशमात्रकरणात् अप्राप्तविभाषायां तु अभावांशस्यसिद्धत्वेनपक्षेनभवतीत्यभावांशमनूद्यपक्षेभवती भावांशमात्रकरणात् विभाषाश्वेरित्यु

वश्यकतया सामर्थ्योपस्थयात् इहशब्दस्य संज्ञाशब्दसंज्ञेति न षष्ठीसमासः कर्मकरणमित्यादिष्वर्थसंज्ञासु स्वरूपग्रहणापत्तेः किंतु शब्दशास्त्रं तत्र संज्ञा शब्दसंज्ञेति सप्तमीसमा लब्धः शब्दशास्त्रियासंज्ञेति येन विधिः विधिरित्यत्र उपसर्गे घोः किरिति कर्मणि किः त्यय येनेति करणे तृतीया न तु कर्तरि तस्याकृद्योगषष्ठ्याबाधात् न चोभयप्राप्तौ कर्मणीति नियमेन निर्वाहः कर्मण उक्तत्वेनोभयप्राप्त्यभावात् तथा चात्र करणे तृतीयैव करणं च परतंत्र कर्त्रधिष्ठितस्यैव करणत्वात् एवं चेह तृतीयया पारतंत्र्यं लक्ष्यते न च एरजित्यादेः कारादीनां पारतंत्र्यं धात्वादीनां च स्वातंत्र्यं वास्यादीनामिव तक्षादीनामिव संभवति किंतु वैवक्षिकं तेन विशेषणमप्रधानं तच्चात्मा तस्य संज्ञेति फलितं भेदितदात् विशेषणांतं दंतस्येति स्वरूपं चेति स्वरूपमित्यनुवर्तनेनैतल्लभ्यते एवं इकारांतादिकाद्रूपाच्च धातो रच्। चयः। अयः। समासप्रत्ययविधाविति कृष्णंश्रितः कृष्णश्रितः द्वितीया श्रितातीतेति तिरातास्य सपा प्रापत्तेः द्वितीयांतश्रितादिप्रकृतिकैः सुबंतैः सह समस्यतेवात्पुरुषः न तु कृष्णमुपाश्रितः नडादिभ्यः फक् नडस्य गोत्रापत्यं नाडायनः नेह सूत्रनडस्यापत्यं मित्र नाडिः अनुम तिकादित्वादुभयपदवृद्धिः॥४॥ उगिद्वर्णेति — उगिद्वर्णग्रहणं वर्जयित्वा उगिद्वर्णग्रहणवर्जं द्वितीयायां चेति णमुल् महांतमतिक्रांता अतिमहा॥

उगिद्वर्णग्रहणवर्जं विरामोऽवसानं १।४।११० वर्णानामभावोऽवसानसंज्ञः स्यात् परः सन्निकर्षः संहिता १।४।१०९ वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात् सुप्तिङंतं पदं १।४।१४ सुबंतं तिङंतं च पदसंज्ञं स्यात् ॥५॥

तीमहच्छब्दस्य गोस्त्रियादित्वेप्युपसर्जनेषिध्नारेतिभ्रं धवीपद तेरगितश्चेतु गिरंतामात् आतः स्यात् नचेह सामर्थ्यात् तदंतविधिः अस्यापत्यं इः कामह इत्यत्र च भिन्नार्थत्वात् न चैवमिञोजित्वं व्यर्थमिति वाच्यं बह्वादिभ्यश्चेत्यत्र यथायथं स्वाद्युदात्ताभ्यां चरितार्थत्वात् तथा मपिजौसमिति स्यादावेव अनजस्यात् न तु बाहिरित्यादौ अकारस्येहानर्थकत्वादिति चेन्न वर्णग्रहणे अर्थवद्ग्रहणपरिभाषाया अप्रवृत्तेः विरामोऽवसानं विरमणं विरामः भावे घञ् शब्दानुपसनमताबाहह वर्णानामिति संज्ञाप्रदेशो वावसाने इत्यादयः अभावस्यापि बुद्धिकृतं पौर्वापर्यमस्त्येव पूर्वोच्चरितप्रध्वंसिनां नित्यविभूनां वा वर्णानां यत्र विरम्यते ऽने नेति विरामः बाहुलकात्करणे घञ् यदुच्चारणोत्तरं वर्णांतरं नोच्चार्यते सोऽन्त्यवर्णः अवसानसंज्ञ इत्यर्थः अस्मिंस्तु पक्षे खरवसानयोरित्यत्रापि सप्तमी विषयेऽभिहितास्थाने खरि परे फस्य विसर्गः अवसाने च रेफस्थानिनीति सुप्तिङंतं पदं अत्रांतग्रहणं अन्यत्र संज्ञाविधौ प्र यग्रहणे तदंतग्रहणं नास्तीति ज्ञापनार्थं तेन गौरी ह्रदे द्विवचनं प्रगृह्यमिति न द्विवचनांतस्य प्रग्रहत्वं अन्यथा कुमार्यो रमा कुमार्य्यो गारमित्यत्र प्रकृतिभावः स्यात् कथं तर्हि प्रातिपदिकसंज्ञायां कृत्तद्धिताभ्यां तदंतग्रहमिति चेत् अत्राहुः कृत्तद्धितेति सूत्रे अर्थवद्ग्रहणमनुवर्तते

हलोनंतराः संयोगः लघ्वर्थमेकाक्षरायां संज्ञायां कर्तव्यायां संयोग इति महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञापनार्थं संयुज्यंतेऽस्मिन्समुदाये वर्णा इति तेनेमौ त्र समुदाये वाक्यपरिसमाप्तिर्नतु
गुणवृद्ध्यादिसंज्ञावत्प्रत्येकं तथा हि सति दृषद्भित्ती त्यत्र बकारसन्निधौ दकारस्य संयोगत्वात्संयोगांत लोपः स्यात् निर्यायादित्यत्र यकारः संयोग इति वा न्यस्य संयोगादिरित्वं
स्यात सिद्धांते त्वचोरहाभ्यामिति द्वित्वे सत्यपि तस्यासिद्धत्वादेत्वमत्र न भवति हल इति जातौ बहुवचनं जात्याख्यायामेकस्मिन्बहुवचनमिति व [illegible] पि संयोगसंज्ञा
भवतीति शिक्षेत्यादौ गुरोश्च हल इत्यप्रत्ययः सिद्ध्यति यत्र बहवो हलः संश्लिष्टा स्तत्र द्वयोर्बहूनां चाविशेषेण संज्ञेति स्थितमाकारे यदि तु बहूनामेव स्यात्तर्हि [illegible]मान्करोतीत्य
त्र मतुपसकारस्य संयोगांत लोपो न स्यादिति दिक् हलः किं तितउभ्यां अत्र तनोतेर्डउः सन्वच्चेति उ प्रत्ययः सनवद्भावाद्द्वित्वं सन्यत इतीत्वं च व्यंजनानामसामर्थ्याद्गुणा
भावः यदि त्वचोरप्यनंतरयोः संयोगसंज्ञा स्यात्तर्हि दृहसंयोगांतस्य तु कारलोपः स्यात् अनंतरा इति किं पनसं यदीह सकारमकारयोः संयोगसंज्ञा स्यात्तर्हि स्कोरिति सलो

हलोनंतराः संयोगः १।१।७ अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः ह्रस्वं लघु १।४।१० संयोगे गुरु १।४।११ संयोगे परं ह्रस्वं गुरुसंज्ञं स्यात्
दीर्घं च १।४।१२ इति संज्ञाप्रकरणम् इको गुणवृद्धी १।१।३ गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्रेक इति षष्ठ्यंतं पदमुपतिष्ठते।
अचश्च १।२।२८ ह्रस्वदीर्घप्लुतशब्दैर्यत्र अज्विधीयते तत्र अच इति षष्ठ्यंतं पदमुपतिष्ठते ॥

पः स्यात्॥ इति संज्ञाप्रकरणं इको गुणवृद्धी यत्र शास्त्रा
स्थानी न निर्दिष्टः सार्वधातुकार्धधातुकयोः सिचि वृद्धिरित्यादौ तत्रैवेयं परिभाषा प्रवर्तते नचाचो ञ्णितीत्यादौ स्थानिनिर्देशात् गुणवृद्धिशब्दाभ्यामिति एतच्च पूर्वसूत्रा
भ्यां गुणवृद्धिपदे अनुवर्त्य गुणो वृद्धिरिति ये गुणवृद्धी इति व्याख्यानयालभ्यते तेन हनत्यदादीनामः इमं दिव औत् द्यौः विधीयत इति यत्र त्वनुवादः [illegible] वृद्धिर्यस्याचामादिरित्या
दौ तत्रेक इति नोपतिष्ठते अनुवादे परिभाषाणामनुपस्थितेरिति भावः अनुवादे परिभाषाणामित्यस्यानूद्यमानविशेषणेष्वित्यर्थः अनुपस्थितौ [illegible] कालं चोदीचामातः स्था
न इत्यत्र स्फुटीकरिष्यते षष्ठ्यंतमिति सूत्रे षष्ठ्यंतस्यानुकरणान्न शब्दस्वरूपपरतया नपुंसकत्वात्सौ लुकि अत्वसंतस्येति दीर्घो नेति भावः पदमिति नच संभवति सामानाधि
करण्ये यद्गुणस्यागमस्येत्यादि क्रमेणामंवक्ष्यते मिदेर्गुणः मृजेर्वृद्धिरित्यादौ तु सामानाधिकरण्यासंभवान्मिदिमृज्यो रेतयवस्येक इति संबध्यते अचश्च [illegible] दीर्घेत्यादि एतच्च क
[illegible]लो ह्रस्वदीर्घप्लुत इति सूत्रात् ह्रस्वदीर्घप्लुत इत्यनुवर्त्य ह्रस्वो दीर्घः प्लुत इति योजनया लभ्यते ह्रस्वेत्यादि किं दिव उत् द्युभ्यां अष्टन आ विभक्तौ [illegible] अष्टाभ्य औशित्यत्र

क्तानात्वनिर्देशाज्ज्ञापकाज्जश्शसोर्विषये प्रवर्त्तमानस्याष्टन इत्यात्वस्याचः स्थानिकत्वे सतिनैतत्सिध्येदिति दिक् षष्ठ्यंतंपदमिति तच्चसतिसंभवे सामानाधिकरण्येनैवसं
बध्यतेनैवैयधिकरण्येन तेनह्रस्वोनपुंसक इत्यजंतप्रातिपदिकस्यैवह्रस्वः श्रीयं नेह सुवाक्ब्राह्मणकुलं १ शाम्यमष्टानांदीर्घइत्यत्रतुसामानाधिकरण्यासंभवात् शमादी
नामचइतिसंबध्यते तेनशाम्यतीत्यादिसिद्धम् वाक्यस्पंठः प्लुतइत्यत्रसामानाधिकरण्यसंभवेपिटेर्ग्रहणासामर्थ्यादेरवयवस्याचःप्लुतइतिव्याख्यायेते अन्यथा अलो
न्त्यस्यादेश्चेति परिभाषाभ्यामेहिकृष्णेत्यादिवाक्यांत्यस्याचः प्लुतसिद्धौकिमनेनटेर्ग्रहणेन तेनआयुष्मानेधीद्र्वर्म न इत्यादिसिद्ध्यतीतिदिक् ॥ ःः॥ आद्यंतौटकितौ
भविता आर्द्धधातुकस्येट् पाययति शाच्छासाह्वेत्यादिनायुक् पुरस्तादपवादन्यायेनस्थानेयोगत्वस्यायमपवादः प्रत्ययःपरश्चेत्यनेनतुपरत्वादयंवाध्यते तेनचरेष्टःगा
पोष्टक् इत्यादयः परासवभवंति मिदचोंत्यात्परः स्थानेयोगत्वस्यपरश्चेतिपरत्वस्याचायमपवादः यशांसिवनानि नपुंसकस्यझलचइतिनुम् रुणाद्धि रुधादिभ्यःश्नम् ननु
पूर्वयोरवदयमपिपुरस्तादपवादन्यायेनस्थानेयोगमात्रस्यापवादोस्त्विति चेन्न वाध्यसामान्यचिंतामाश्रित्यस्वविषयेप्राप्तंसर्वंवाध्यते इतीहाभ्युपगमात् अन्यथाश्नमोमिव्काः

आद्यंतौटकितौ १।१।४६ टित्कितौयस्योक्तौतस्यक्रमादाद्यंतावयवौस्तः मिदचोंत्यात्परः।१।१।४७। अचइतिनिर्द्धारणेषष्ठी अचांमध्ये
योंत्यस्तस्मात्परस्तस्यैवांतावयवोमित्स्यात् षष्ठीस्थानेयोगा १।१।४९ अनिर्द्धारितसंबंधविशेषाषष्ठीस्थानेयोगाबोध्यास्थानंचप्रसंगः।

णान्यर्थस्यात् नचश्रवणार्थएवमकारःस्यादितिवाच्यं तृणहइमितिनिर्देशात् अचांमध्ये इति सूत्रेजात्यभिप्रायेणाच इत्येकवचनमितिभावः अचांमध्यइतिकिं मुंचति
लुंपति अंत्यादचः परोमित्स्यात् इतिप्राचोव्याख्यायांनैतत्सिध्येत् शेमुचादीनामित्यत्रांत्यस्याचोऽसंभवेनमित्परिभाषाया अनुपस्थितिप्रसंगात् अन्येतुअचोन्त्यात्परोमि
त्स्यादितिव्यत्यासेनयोजयित्वाप्राचांव्याख्यानमपिकथंचित्समर्थयंते पूर्वसूत्रादंत इत्यनुवर्त्तते एकदेशस्वरितत्वप्रतिज्ञानादंतोव्याचष्ट अंतावयवइति तेनवारीणि
त्यादावङ्गस्यनांतत्वेनदीर्घः सिद्धः परादित्वेसनसिद्ध्येत् अभक्तत्वेतुवहंलिहइत्यत्रवहाभ्रेलिहइतिखशिअरुर्द्विषदितिमुम् मोनुस्वारोनस्यादपदांतत्वादितिभावः यत्तु
केचिदुक्तं अभक्तत्वेवारीणीतिदीर्घोनस्यादितितन्नदास्यिहणाश्वादिनुमर्थमिति अंगसंज्ञासूत्रस्थवार्त्तिकेनैवदूषितप्रायं षष्ठीस्थानेयोगा स्थानेनयोगोऽस्यास्तीतिविग्रहः
निपातनादेत्वं षष्ठ्याः संबधमात्रवाचित्वेपीहशास्त्रेयाषष्ठीसास्थानेयोगाबोध्या किमविशेषणेनेत्याह अनिर्द्धारितेसंबंधविशेषेति अनिर्द्धारितेतिकिं कृदुपधा-याश्च

हः शासः इत्यादौ। हलोऽन्त्यात् उपधासंनिधानेनावयवषष्ठीत्वे निर्लीनेगोहः शासइत्यादौ मा भूत्। सति हि तत्रापि स्थाने योगत्वेगोहि शासि स्थाने धातुमात्रस्योपधाया अपि स्था
नेऽऊदित्तोः स्यातामिति दिक्। स्थाने च प्रसंगः इति। न चास्य प्रसंगार्थकत्वे विवदितव्यं। दर्भाणां स्थाने शरैः॥ प्रस्तरितव्यमित्युक्ते दर्भाणामिति प्रसंग इति प्रतीतेः एवं च इको यणि
चीत्यादावि गुच्चारणप्रसक्तौ यणुच्चारणीय इत्याद्यर्थः संपद्येत॥ स्थाने सदृशतम इति॥ अर्थात्प्राप्यमाणानां तु मध्य एव। अत एव गंगोदकमित्यत्र त्रिमात्र ओकारो
नादृतः स्थाने इत्यनुवर्तमाने पुनः स्थानग्रहणादन्योपि वाक्यार्थः संमतः। तालव्यादिरूपे स्थाने योऽन्तरतमस्तत्र युक्तान्तर्यं वानिति यावत्। प्राप्यमाणानां मध्ये स्यादि
ति तदेतत्सूत्रयत्रानेकविधमिति। स्थानार्थगुणप्रमाणतश्चतुर्विधमित्यर्थः। स्थानतो यथा। दध्यत्र। तालुस्थानस्येकारस्य तालुस्थानो यकारः। अर्थतो यथा। व
तंड्युवतिः। वतंडशब्दाद्दिगंजडाद्येति गोत्रापत्ये यञ्। तस्य लुक् स्त्रियामिति लुक्। शार्ङ्गरवादित्वात् ङीन्। वतंडी चासौ युवतिश्चेति विग्रहे पोटायुवतीत्यादिना समासः
पुंवत्कर्मधारयेत्यतिदिश्यमानः पुंशब्दो वतंडापत्यवाचिनो वतंडशब्दस्य तदपत्यवाचीवातंड्यशब्दो भवति। नतु वतंडादिः॥ गुणतो यथा। वाग्घरिः। घोषवतो म

स्थानेऽन्तरतमः ॥१।१।५०॥ प्रसंगे सति सदृशतम आदेशः स्यात्। यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः। तस्मिन्निति निर्दिष्टे
पूर्वस्य ॥१।१।६६॥ सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम्॥ हकारस्य तादृश एव घकारः। प्रमाणतो यथा। अमुं

दीर्घस्य अव्यवहित

अमू अमून्। अदसोसेरित्यनेन ह्रस्वस्य ह्रस्वो दीर्घस्य दीर्घ उकारः। तमपग्रहणं किं। वाग्घरिः। झयो होऽन्यतरस्यामिति पूर्वसवर्णे क्रियमाणे महाप्राणत्वसाम्येन द्वितीयेन
वदत्वसाम्येन तृतीयश्च मा भूत्। किंतु नादवान्महाप्राणश्चतुर्थो घ एव यथा स्यादिति। तन्न चेन्न। स्थानतोऽन्यत्र प्रमाणत आन्तर्यं वानकारेणेति भावः। तस्मिन्निति। सप्तम्यन्ता
नुकरणमिदम्। इतिशब्दो नैरन्तर्यपरः। द्विर्निरूच्चारणान्निर्वचनः। अचियणित्युक्ते व्यवहितेऽपि सति प्राप्ते समव्यवहिते एवेति पूर्वस्य परस्य च प्राप्ते पूर्वस्यैवेति नियम्यते। अ
व्यवहितस्येति तु फलितार्थकथनम्। पूर्वस्यैवेति किं। इन्दुरकम्। अत्र कारस्य मा भूत्। अव्यवहितस्यैवेति किं। अग्निचिदत्र। सोमसुदत्र। व्यवधानं चात्र वर्णकृ
तमेव निषिध्यते न तु कालकृतम्। संहिताधिकारज्ञापकात्। अन्यथा निर्दिष्टग्रहणादेवा संहितायां यणाद्यप्रसंगात्। किं तेन संहिताधिकारेण। तद्व्याचष्टां वर्णा
न्तरेणेति एवं च संहिताधिकारबहिर्भूतविषयः कालव्यवाये पि संभवतीति। तेन त्रा गादिष्णूरित्यादावव ग्रहे प्यानङ्। ऋतो द्वंद्वे देवता द्वंद्वे चेत्यादिना आरप· देपर

तस्मादिति। उत्तरस्यात्‌ किं। तिङ्‌ निङ्‌ इति निघात उत्तरस्यैव यथा स्यात्‌। अग्निमीडे। नेह ईडे अग्निम्‌। अव्यवहितस्येति। एतच्च निर्दिष्टग्रहणानुवृत्त्या लभ्यते। उत्तरस्य
स्थानं उक्तं तत्‌ मनमिन्नादौ उरस्येति पूर्वसवर्णो न प्रवर्तते अलोऽन्त्यस्य। स्थाने षष्ठीनिर्दिष्टस्य उच्यते सोऽन्त्यस्याल्‌ स्थाने स्यादित्यर्थः। त्यदादीनामः। सः यः स्थाने षष्ठीति किं आर्ध
धातुकस्येट्‌ तृच्‌ वच्यकारात्पूर्वो मा भूत्‌॥ इदं च षष्ठीस्थान इत्यनुवृत्त्या लभ्यते। अल इति किं। पदस्येत्यधिकृत्य विधीयमानं वसुस्रंस्विति दत्वं पदमानडुद्भ्यामित्यादावन्त्यस्य पं
दस्य मा भूत्‌॥ ङिच्च॥ अयमपि इति अवङ्‌ स्फोटायनस्य॥ गवाग्रम्‌। अनङ्‌ सौ सखा। परस्य परि इति। तस्मादित्युत्तर— स्य आदेरिति न सूत्रितम्‌। आदेरित्यंशस्य सर्वादेश
बाधकत्वापत्तेः सिद्धान्ते तु परत्वात्सर्वादेशत्वं बाधकमित्यनुपदमेव वक्ष्यति। आदेर्बोध्यमिति। आदेरलो बोध्यमित्यर्थः। अल इति त्यनुवर्तते। अनेकाल्‌। अस्तेर्भूः। ब्रुवः
वा। ननु निर्दिश्यमानस्यादेशा भवन्त्यनेकालादेशस्य सर्वादेशत्वं सिध्यति। तत्किमनेनानेकालग्रहणेन न चालोऽन्त्यस्येत्यंतस्य स्याद्‌ इति शंक्यं। ङिच्चेत्यस्य नियमार्थ

तस्मादित्युत्तरस्य। १।१।६७। पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाऽव्यवहितस्य परस्य ज्ञेयम्‌। अलोऽन्त्यस्य १।१।५२। षष्ठीनिर्दिष्टा
ऽन्त्यस्याऽदेशः स्यात्‌॥ ङिच्च। १।१।५३। अयमप्यन्त्यस्यैव स्यात्‌। सर्वस्येत्यस्यापवादः। आदेः परस्य १।१।५४। परस्य यद्विहितं कार्यं तत्त
स्यादेर्बोध्यं। अलोऽन्त्यस्येत्यस्यापवादः। अनेकाल्शित्सर्वस्य। १।१।५५। अलोऽन्त्यसूत्रापवादः। अष्टाभ्य औशित्यादावादेः परस्येत्यत्रापि

त्वाभ्युपगमात्‌। उच्यते॥ अनेकाल्ग्रहणाभावे रामैरित्यादावैसादेशः। आदेः परस्येति भंकारस्यैव स्थाने स्यान्न तु सर्वस्य स्यात्‌ "परत्वादनेन बोध्यते०॥
नेइत्ति दिक्‌॥ शित्‌ उदाहरणं इदम इश्‌ इत इत्यादाविति आदिशब्देनातो भिस ऐस्‌ इत्यादि गृह्यते॥ परत्वादिति। अत एव आदेः परस्येति पृथक्‌ क्रियत इत्युक्तं। म
न्वनेकाल्शित्सर्वस्येत्यतः प्रागेव तस्मादित्युत्तरस्यादेरिति पठ्यतां किमनेन पृथक्‌ सूत्रकरणेन॥ न चैवं तस्मिन्निति निर्दिष्ट इत्यतो निर्दिष्टग्रहणं नात्रानुवर्त
त इति वाच्यं। तस्यापि सूत्रस्य प्राक्‌ पठनेन बाधकाभावेन निर्दिष्टग्रहणानुवृत्तिसिद्धेः। मैवं। ब्राह्मणा अष्टौ इत्यत्र अष्टाभ्यः पूर्वयोरपि जस्शसोरौशः प्रसंगात्‌ यथा
श्रुतसूत्राभ्युपगमे तु तस्य निर्देशः प्रवर्तते एवेति नायं दोषः प्रसज्यत इति। अत्र केचिन्निष्कर्षमाहुः। अनेकाल्शित्सूत्रात्प्रागेव वर्णलाघवाय तस्मादित्युत्तर
स्यादेरिति सूत्रिते परत्वात्सर्वादेशेन आदेरित्यंशस्य बाधे अवशेषादुत्तरस्येत्यंशस्यापि बाधितत्वाद्वाक्यसंस्कारपक्षे ब्राह्मण अस्‌ अष्टन्‌ अस्‌ इति स्थिते अष्टाभ्य औ

शित्यस्य दिग्योगे पञ्चमीत्वात् व्याप्तिन्यायेन अष्टनो [illegible] जश्शसोरौश् स्यात्। व्याप्तिन्यायस्तु प्राग्रीश्वरान्निपाता इति पठितेऽपि सत्यासत्तिन्यायेनाधिरीश्वर इति सू-
त्रावधिकत्वं स्यात्तथा सिद्धावीश्वरे तोसुन्कसुनाविति सूत्रावधिकत्वनिराकरणाय रेफविशिष्टग्रहणं कुर्वता सूत्रकृतैव ज्ञापितः तत्रश्च सर्वादेशो नोत्तरस्मिन्न्या-
स्याबाधनार्थं निर्दिष्टग्रहणं नानुवृत्त्यर्थं च तस्मिन्निति सूत्रात्परत्र कृते तु आदेरित्यस्य सर्वादेशबाधकत्वं स्यात्तथा चातोभिस ऐस् इत्यादेश आदेः स्यात्। अनेकाल्
सूत्रस्यासेर्भूरित्यादौ चरितार्थत्वात्॥ यथा न्यासे तूत्तरस्येत्यंशः प्रवर्तते एवेत्यष्टाभ्यः परयोरेव जश्शसोरौश् स्यान्न तु पूर्वयोः तस्मादित्युत्तरस्यादेरिति न सूत्रित-
मित्यादिमनोरमाग्रन्थस्यापि अयमेवाशयः इति। अन्ये तु यथाश्रुतसूत्रनिराकरणपरतयैव मनोरमां योजयन्ति। तद्यथा॥ न सूत्रितमित्यस्यानेकाल्शित्सूत्रात्प्राङ्-
न सूत्रितं नार्थः। आदेरित्यंशस्य सर्वादेशबाधकत्वापत्तेरित्याद्यग्रिमग्रन्थविरोधात् किं तु नष्टद्धान्तानुकूल्याय स्वरूपमिति सूत्रात्प्रागून सूत्रितमित्यर्थोऽभ्युपेयः एवं चानेका-
ल्सूत्रात्प्राक्सूत्रिते तु नास्त्येव दोष इति मनोरमाग्रन्थाशयः। एवं स्थिते निर्दिष्टग्रहणानुवृत्तिलाभाय तस्मिन्निति निर्दिष्टसूत्रात्तस्मादित्युत्तरस्यादेः परस्येत्यस्मात्प्रा-

तमितिर

स्वरितेनाधिकारः १।३।११। स्वरितत्वयुक्तं शब्दस्वरूपमधिकृतं बोध्यं॥ ॥

गेव पठनीयः अष्टनो [illegible] र्वयोरष्टाभ्यौश् स्यादित्युक्तदोषस्त्वपरिहरणीयः। तस्मादित्युत्तरस्यादेरित्यत्रादेरिति पृथग्वाक्यं तत्रोत्तरसे [illegible] वर्तते। सा च स्थाने षष्ठी
षष्ठी स्थानेऽन्तरत्यस्य प्राप्तेः। अत्र चायमर्थः। पञ्चमीनिर्देशेन यत्कार्यं तदुत्तरसंबन्धी उत्तरस्य स्थाने यद्विधीयते तदादेर्भवतीति इत्यं वाक्यभेदेन व्याख्यानाश्रयणादनं-
तरस्येतिन्यायेना [illegible] एवं सर्वादेशो न बाध्यते न [illegible] नापि इति नास्त्येव पूर्वोक्तदोषः। वाक्यभेदेन व्याख्यानं तूत्तरस्यादेरित्य [illegible] न्यासकरणेन तज्ज्ञाप्य-
ते। अन्यथा उत्तरादेरिति न सूत्रितमिति निर्देशेत्। किं च अष्टा [illegible] शित्यस्य दिग्योगपञ्चमीत्वेन पूर्वपरसाधारणतया अष्टनो गा [illegible] शसोरित्युक्ति अष्टनोगसंज्ञा
निमित्तभूतौ यौ जश्शसौ तावेव शीघ्रोपस्थितिकाविति [illegible] द्वादुत्तरयोरेव औश् स्यान्न तु पूर्वयोरिति दिक्॥ ॥ स्वरितेनाधिकारः। अनेनास्य भूतल [illegible] तृतीया। अधि-
कारो विनियोगः। कियद्दूरमधिकार इत्यत्र तु व्याख्यानमेव शरणं। यथा आ सप्तमाध्याय परिसमाप्तेरङ्गाधिकारः न तु प्रागभ्यासविकारेभ्य इत्यादि। यद्यपि स्वरित इति सप्त-
म्यन्तं स्वरिते दृष्टे [illegible] अधिकारो निवर्तते इत्यर्थः। [illegible] कथं तन्निर्णय इत्यत्र तु व्याख्यानमेव शरणं। न त्वेवं व्याख्यानादेवानुवृत्त्यननुवृत्ती सिद्धे किमनेन

सूत्रेलिंगमिति चेदत्राहुः॥ अर्थात्तु रसंग्रहायेदं सूत्रं कृतं तथाहि अधिकः कारो अधिकारः॥ अधिकं कार्यं गौणेपि शास्त्रप्रवृत्तिरित्यर्थः। तथा च गौणमुख्यन्यायो यत्र नेष्यते।
अपादानाधिकरणादौ तत्र स्तुतिः पाठ्यः। किंच। अधिकः कारः कर्तिरियं यत्पूर्वः सन् परं बाधते। तथा च नुमचिरतृज्वद्भावेभ्यो नुडित्यादिव क्ष्यमाणपूर्वविप्रतिषेधाः
सर्वे संगृहीता भवंति। तत्र स्वरितपाठे नैवगतार्थत्वादित्यादि॥ परं नित्यमिति। परं नित्यं यथा। तुदादिभ्यः शः तुदति। रुधादिभ्यः श्नम्। रुणद्धि परमपि लघूपध
गुणं बाधित्वा नित्यत्वात् शपश्नमौ। तथा। धिनवाव धिनवाम। परमपि लोपश्चास्यान्यतरस्यां म्वोरित्युकारलोपं बाधित्वा नित्यत्वादाडुत्तमस्येत्याट्। परादंतरंगं यथा
उभये देवमनुष्याः इह प्रथमचरमेति परमपि विकल्पं बाधित्वा सर्वादीनीति सर्वनामसंज्ञा विभक्तिनिमित्तत्वेनांतरंगत्वात्। तथा स्वर्वतेर्लिं श्रीति चङि ह्रस्वउपधागु
णादंतरंगत्वादुवङ्। अस्य वाचः पवादो यथा। परमप्यनेकाल्शित्सर्वस्येति सर्वादेशं बाधित्वा ङिच्चेत्यंतादेशः। रथ्या रथे॥ अस्थिदधि त्यनङ् अनित्यादंतरंगं यथा ग्रा
मणिनी कुले। नित्यमपीकोचीति नुमं बाधित्वा ह्रस्वो नपुंसके इति ह्रस्वः। कृते तु नुमि अनजंतत्वाद्ध्रस्वो न स्यात्। अंतरंगादपवादो यथा॥ इत्यादि। श्रीशः। पर्वम

परनित्यांतरंगापवादानामुत्तरोत्तरं बलीयः। असिद्धं बहिरंगमंतरंगे। अंतरंगे कार्ये कर्तव्ये बहिरंगमसिद्धं स्यात्। अकृतव्यूहाः पाणि
नीयाः। निमित्तं विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न कुर्वंतीत्यर्थः॥ इति परिभाषाप्रकरणं॥ संहितायामित्यधिकृत्य॥ ॥ ॥

पि सवर्णदीर्घं बाधित्वा अंतरंगत्वाद्राज्ञे यणि च प्राप्तेः पवादत्वात्सवर्णदीर्घः तथा उन्यौ उन्यः। सुल्वौ सुल्वः। इत्यत्रांतरंगत्वादियङुवङ् च प्राप्तेः पवादत्वाद
रनेकाच इत्योः सुपीति यणा यघनवादौ न्यत्र चरितार्थः। तर्हि परांतरंगाभ्यां बाध्यत एव तथा हि ङिच्च त्यलदन्त्यार्थं ङकारयुक्ते च न अ देशु चरितार्थत्वात्तातङ्
मप्यवर्तमिकिंतु परेणानेकाल्शित् इत्यनेन बाध्यते। जीवतात्। भवतात्। अयजे इंद्रं। ग्रामे हा। सर्वे इत्यम। अत्र अयज इ इंद्र॥ ग्राम इ इह सर्व इ इयमिति स्थिते
अंतरंगेण गुणेन सवर्णदीर्घो न बाध्यते। तस्य समानाश्रये इत्यादि। श्रीश इत्यादौ चरितार्थत्वात्। असिद्धमिति। तेन पचावेदमित्यादौ एत्वे [illegible] त्वं न। अकृतव्यू
हा इति। अकृतं कार्यं यैस्ते इत्यर्थः। एवं तर्हि सर्वस्य शास्त्रस्य वैयर्थ्यं स्यात्। अत आह। निमित्तं विनाशोन्मुखं दृष्ट्वेति। लोके सिद्धार्थकथनमेतत्। यद्वा। अस्य सर्वस्य ना
पे न तत्कथनार्थं [illegible] नतर्के नेत्यूहः। कार्ये विशिष्टोपयुक्तो विनाशोन्मुखनिमित्तकं कार्यं। अकृतो व्यूहो यैस्ते अकृतव्यूहा इति। यद्यपि कृतमपि शास्त्रं निवर्तयंतीति

परिभाषांतरं [illegible]लं च तुल्यं तथापि अकर्तव्यूहा इत्येव लघु। प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरमिति न्यायादिति भावः नकुर्वतीति यथा निषद्ध्वमित्यादौ क्सो [illegible]मंत
गतौ आगमत्वाभावादिनासंप्रसारणेन वल्लादित्वं नेष्यतीत्यर्थः॥ इति परिभाषाप्रकरणं॥ इको यणचि॥ प्रत्याहारग्रहणेषु तद्वाच्यवाच्ये निरूढलक्षणा॥ [illegible]
त्वादिष्विति च निर्देशात्॥ तेन इक्शब्देन षट्‌त्रिंशद्गृह्यन्ते। यण्शब्देन चत्वारः॥ भाव्यमानस्याणः सवर्णाग्राहकत्वादेवं चेह यणि तद्वाच्यवाच्य[illegible]नु न शक्येव।
भाव्यमानस्याणः सवर्णकत्वाभावेन यणवाच्ययकारादिवाच्यानामभावादन्तो नास्ति यथासंख्यं। न च लस्यार्थवो धातुपूर्वभाविनं शक्यार्थज्ञानम[illegible]यथासंख्यमा
स्थितिवाच्यं एवमपि तृतीयचतुर्थाभ्यां ऋकारलृकाराभ्यां प्रत्येकं त्रिंशदुपस्थितौ लृवर्णानां रेफादेशस्य ऋवर्णानां लादेशस्य च प्रसंगात्। तस्मादिह स्थाने तर[illegible]त
मइति सूत्रेणैव [illegible]स्थाभिमत्यानुपदं वक्ष्यति स्थानेन्तरतमे आंतर्यादिति। अचीति। कस्मादचि परइत्याकांक्षायां अर्थादिक इति संबध्यते। संहितायां विषयइति। इध्य
त्रेत्यादौ कार्यिनिमित्तयोर्व्यवधाने अतिशयितसंनिधिर्विवक्ष्यते तदैव यणु भवतीति भावः। अनचि च। यरोनुनासिक इति सूत्राद्यरो वेति चानुवर्तते॥ अचार हाभ्यामिति

इकोयणचि। ६।१।७७। इकः स्थाने यण् स्यादचि संहितायाम्विषये। सुधी उपास्य इति स्थिते। स्थानेन्तर आन्तर्यादिकारस्य यकारे सुध्य्
उपास्य इति स्थिते। अनचि च। ८।४।४७। अचः परस्य यरो वा द्वे स्तो न त्वचि। इति धकारस्य द्वित्वं। स्थानिवदादेशोऽनल्विधौ। १।१।५६। आदेशः
स्थानिवत्स्यान्न तु स्थान्यलाश्रयविधौ। अनेन यकारस्य स्थानिवद्भावेनाऽचूत्वमाश्रित्याऽनचि चेति द्वित्वनिषेधो नाश[illegible]विधाविति तन्नि

मूत्रादचो द्वे इति च नदारह। अचः परःस्येत्यादि॥ एवं चात्र वा ग्रहणानुवृत्तेर्नेष्टसिद्धेः त्रिप्रभृतिषु शाकटायनस्य सर्वत्र शाकल्यस्य दीर्घादाचार्याणा इति च सूत्र[illegible]धान॥
यन्नारंभणीयमिति भावः। अन्विति किं। नाद्वा त्यमित्यादौ मस्य द्वित्वं माभूत्। अनचीति यदि पर्युदासः स्यात्तदा नञिवयुक्तमन्यसदृशे तथा ह्यर्थगतिरिति न्यायादज्भिन्ने
अज्सदृशे वर्णे हलीत्यर्थः स्यात्। ततो लाघवात् हलीत्येव ब्रूयात्॥ तस्मात्प्रसज्यप्रतिषेध इति ब्रवीति न त्वचीति। एवं चावसानेपि द्वित्वं भवति। वाक्वा वाक्। स्थानिवदादे
शो। आदेशोक्तेनस्यक्तस्मरा स्थानिवद्भूतकार्यलाभः इति वतिदेशआरंभनेऽप्यसतेर्भूः। आर्धधातुके विवक्षिते। धात्वादेशो धातुवत्। तेनाचोयदित्यादिधातुप्रत्ययाः
भव्यं वभूव॥ [illegible]कः। अंगादेशोऽंगवत्। तेन इनादेः दीर्घे सभा[illegible]कना काभ्यां। कैः। आदेशग्रहणं किमर्थं। स्थानिवदित्येतावतैव [illegible]धिशब्द्महिम्ना[illegible]मात्रस्य

ष्यापीत्वदधीतेदस्युक्तेपुत्रइतिगम्यगतेइतिचेदत्राहुः। द्विविधआदेशः प्रत्यक्ष आनुमानिकश्चेति। अस्तेर्भूः। इत्यादिः। प्रत्यक्षः। तेरुरित्यादिस्त्वानुमानिकः। एकारिय
त्वहिदकारोणेकारांतस्थानी अनुमीयते। उक्तोऽणचोकारांतआदेशः। तथाचतेः स्थानेतफलितोर्थस्तत्रासत्यादेशग्रहणेप्रत्यक्षस्यैवग्रहणं। नत्वनुमानिकस्य स्यात्। आ
देशग्रहणसामर्थ्यात्तूभयपरिग्रह इति नपचत्विज्यादेशिङंतत्वात्पदसंज्ञासिद्ध्यति। नन्वेहरित्यादियथा श्रुतमेवास्तु एकदेशविकृतस्यानन्यत्वात्पदं भविष्यतीति चेन्नं।
अर्थवत्येवस्थान्यादेशभावेविश्रांतेर्वाच्यत्वान्नस्यैवप्रसंगसंभवात्। तथाहि। षष्ठीस्थानेयोगेत्युक्तंस्थानंचप्रसंगः। सचार्थवतःअर्थप्रत्ययार्थंशब्दप्रयोगात् यद्यपि
त्वेः सिजादावसंभवी इतः पापिसतिसंभवेअर्थप्रयुक्तएवप्रसंगोग्राह्यइत्यनेनैवादेशग्रहणेनज्ञाप्यते। उक्तंच। सर्वेसर्वपदादेशादाक्षीपुत्रस्यपाणिनेःएकदेशवि
कारेहिनित्यत्वंनोपपद्यते इतिपरमिहार्थवत्। पद्यतेऽनेनेतिव्युत्पत्तेः यद्यपिसर्वविकारेसुतरांनित्यत्वानुपपत्तिस्तथापीहविकारएवनास्तीतितात्पर्यमेतच्चशब्दकौस्तुभे

— अचः परस्मिन्पूर्वविधौ। १।१।५७। अल्विध्यर्थमिदम्परनिमित्तोऽजादेशः स्थानिवत्स्यात् स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्य इति
स्थानिवद्भावे प्राप्ते न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु। १।१।५८। पदस्य चरमावयवे द्विर्वचनादौ च कर्तव्ये परं नि
निमित्तोऽजादेशः स्थानिवत् इति स्थानिवद्भावनिषेधः। झलाञ्जश्झशि। ८।४।५३। इति धकारस्य दकारः॥ ((स्पष्टम्। अनल्विधाविति किं। यश्चा

लाविधिः यश्चालः परस्यविधिः यश्चालिविधिस्तत्रमाभूत्। तत्रालाविधौयथा व्यूढोरस्केन। अत्रसकारस्यस्थानिवत्वेनविसर्गवदडुत्वमाश्रित्याऽव्यवायइतिणत्वंप्राप्त
अलः परस्य यथा। द्यौ पंथाः इहहल्ङ्यादिलोपोन। अलाविधौ द्युकामः। लोपोव्योर्वलीतिलोपोननचोत्वविधिसामर्थ्याल्लोपोनभवेदितिशंक्या। द्युयानुमित्यादौ तस्यसावका
शत्वात्। अलिविधौयंजेः कंक इष्टः हशिचेत्युत्वं न। नचेहस्थानिवद्भावेनजातेष्युत्वेआद्गुणः वादेशचकृतेहलिसर्वेषामितिनित्यंलोपेनकइष्टइतिसिध्यत्येवेतिवाच्यंक
यिष्टइतिरूपांतरासिद्धिप्रसंगात्। सिद्धांतेतुकइष्टभोभगोअघोपूर्वस्यतियत्वलोपविकल्पः। कयिष्टइतिचरूपद्वयमभ्युपगम्यते। अलत्त्विहस्थान्यवेयुर्वंतद्विधौहियआ
दिलामयं अत्र चादेशोऽयवोनतुस्थान्यवयवस्तथाहदितामित्यादौहदादिभ्यइतिवलादिलक्षणइट्चसिध्यति। तदेतदाह। नतुस्थान्यलाश्रयइति। आश्रियतां चेद्रूप
याकं चान्तन्तुः धात्वैनैवेत्याहग्रहस्तेनप्रपद्यत्वत्रवलादिलक्षणइएन॥ अचः परस्मिन्पूर्वविधौ॥ अचः किं। आगत्य। वाल्पपीत्यनुनासिकलोपस्तुकिं कर्ते

एवगृह्यतेतेनराभायेत्यादौ सपिचेतिदीर्घः सिद्ध्यति तदेतदाह ३

यो ज़ुस नित्यत्वात् तु कृ। अवोभूवुरिति मूलेयद् लुङं ते षु न मा। तथा चापीप च न्नित्येनतस्सिद्धये पंचमीसमासपक्ष आश्रयणीय इति अन्ये त्वाहुः। पञ्चमीसमासपक्षस्य याज
न तेषामभाव्येवेमिदित्ताम्यथिति करस्पष्पुरास्तनत्वान्न तस्य वैयर्थ्यशंका कार्या। यद्यपि यङोऽकारस्य लोपस्य स्थानिवद्भावं विनापि एकाचउपदेशे नुदात्तादित्य
स्यविहितविशेषण आश्रयणादेव इति निषेधाप्रवृत्तौ भिदेर्यङ्लुङन्तात् चिण्मिदितेति रूपं संसाधयत्यपि माथितिक इत्यादिसिध्यर्थं सपक्षो भ्युपगन्तव्यः न च मंथितं
पण्यमस्य माथितिक इत्यत्रापि तस्य पण्यमिति ठकि इकारादेशे च कृते यस्येति चेति लोपादिसुसुक्तान्तादिति इकस्थाने प्रसज्यमानो यः कादेशः सोऽस्य लोपस्य स्थानिव
द्भावं विनैव सुपरिहरः ठस्येक इत्यत्र स्थान्यादेशयोरकार उच्चारणार्थ इत्यभ्युपगमे अल्विधित्वे न स्थानिवद्भावाप्रवृत्त्या ठस्थानिक इकादेशष्टो न भवतीति कादे
शाप्रसक्तेर्माथितिक इति रूपसिद्धौ किमनेन पंचमीसमासपक्षाश्रयणेनेति वाच्यं मथित यतेः क्विपि टिलोपलिलोपयोर्वैरूप्यकल्पनमेव मंथितं तेन चरतीति माथि
तिक इत्यत्र चरतीति ठकि तस्य कादेशसिद्धये तस्य लस्यावश्यकत्वात्। न त्वत्र स्थानिवद्भावं विनापि इकादेशापवादः कादेशः सुपरि[illegible]नायेनादेशाकल्पनात् वा
भ्रान्त्यभावः शंक्यो माथितिक इति भाष्योदाहरणस्यैवमानत्वादिति स्यादेतत् पूर्वत्वस्य सावधित्वेन सन्निहितस्यैवावधित्वमुचितं। संनिहितं चेह तत्र यः स्थानी आदेश
निमित्तं च तत्र तावत् स्थानिन अवधिः। तस्यादेशेनापहारात्। नाप्यादेशनिमित्ते। वैयाकरण इत्यत्र एकारस्यायादेशापत्तेरित्याशंक्याह। अचः पूर्वत्वेन[illegible]स्येति पू
र्वत्वमुपलक्षणं न तु विशेषणमिति भावः॥ न पदान्त॥ पदान्तादीनां चरं न कर्मषष्ठ्यन्तस्य समासः। विधिशब्दश्च भावसाधनो विधानं विधिरिति स च द्वन्द्वान्ते श्रूयमा
णत्वात् प्रत्येकं संबध्यते। वरस्य चरमावयव इति वृक्षं वेनीति वृक्षवीः। वृक्षं वातीति वृक्षवाः। तमाचक्षते वृक्षवयति ततो विच् वृक्षव् इह लोपो व्योर्वलीति वलोपो वटि
लोपस्य णिलोपस्य परत्वान्न यणत्वात्। पदान्तस्य स्थाने घि घो नेति व्याख्याने तु न पदान्तेति स्थानिवत्त्वनिषेधाद्वलोपः स्यादेवेत्यादि मनोरमायां स्थितं। द्विर्वचनादी
चेति पक्षे पप्रच्छ आदिशब्दार्थः। वरे इति तु वरे योऽजादेशः स न स्थानिवदिति व्याख्येयं सह विवक्षाभावे पि निपातनात् द्वंद्वः समस्य लुक् च। अथोदाहरणानि पदान्ते
कानि[illegible]ति[illegible] यणवादेशयोः कर्तव्ययोः अल्लोपो न स्थानिवत्॥ न चेकारौकारयोः स्थानिभूतादचः पूर्वत्वविरहादेवाल्लोपो न स्थानिवदिति वाच्यं। काका
रयोः[illegible] पदान्तं न संस्क्रियत इति पक्षे स्थानिभूतादचः पूर्वत्वस्य सत्त्वात् यद्वा गोचः गोचेत्यादावोकारस्यावङि कर्तव्ये चरत्यल्लोपो न स्थानिवदिति उदाहार्ये
वा स्थानिवत्त्वान्न च सुवन्तात् स्विजिदिति हरदत्तादिमते अन्तर्वर्तिसपापवादत्वान्न पदान्तेति निषेधः शंक्यः विधेयस्य लोपस्य ८

णिलोपो न तु नतः प्रागिति। अन्यथा कारितमित्यादौ णिलोपे कृते एकाच उपदेशे इति इण्निषेधः॥ तर्हि णिचा व्यवधानान्निषेधप्राप्तिरेव नास्तीति सेटीत्यनर्थकं सत् स्थानिवत्त्वं ज्ञापयतीति स्थितं। ननु जश्त्वविधौ यदि स्थानिवत्त्वनिषेधस्तर्हि पठयतीत्यत्रान्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वाज्जश्त्वं स्यात् मैवं। इष्टवदित्यतिदिष्टया भसंज्ञया पदसंज्ञाया बाधाज्जश्त्वाप्रवृत्तेः। चरि। जक्षतुः। जक्षुः। घसेर्लिटि अतुस् उस् च गमहनेत्युपधालोपः खरि चेति चर्त्वं प्रति न स्थानिवत्। भाष्ये तु पूर्वत्रासिद्धे न स्थानिवदित्यवष्टभ्य द्विर्वचनसवर्णानुस्वारदीर्घजश्चरः प्रत्याख्याताः। तद्रीत्या तु संलोपे धत्वे च कर्तव्ये स्थानिवत्त्वाद्वाधकं वचनमासीदिति बोध्यम्॥ अदर्शनं लोपः। अत्र दृशिर्ज्ञानसामान्यवचनो। दर्शनं ज्ञानं तदिह शब्दानुशासनप्रस्तावाच्छब्दविषयकं सत् श्रवणं संपद्यते। न च श्रोतृव्यापारस्तन्निषेधोऽश्रवणं। नन्वेवं लोपो व्योर्वलीत्यादौ वकारयकारौ न श्रोतव्याविति श्रोतृव्यापार एव निषिध्येत प्रयोक्तृव्यापार

अदर्शनं लोपः ॥ १।१।६० प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात्॥ संयोगान्तस्य लोपः ८।२।२३ संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात्। इति यलोपे प्राप्ते। यणः प्रतिषेधो वाच्यः॥ यणो मयो द्वे वाच्ये॥ मय इति पञ्चमी यण इति षष्ठीति पक्षे यकारस्यापि द्वित्वं। तदिह धकारयकारयोर्द्वित्वविकल्पाच्चत्वारि रूपाणि। एकधमेकयं द्विधं द्वियं द्विधमेकयं एकधं द्वियं सुध्युपास्यः मध्वरिः धात्रंशः लाकृतिः

उच्चारणमनिषिद्धं स्यात्। अत्राहुः॥ असति श्रवणे उच्चारणमनर्थकमेवेति सामर्थ्याच्छ्रवणनिषेधे तद्धेतुभूतमुच्चारणमपि निषिद्धं भवतीति। प्रसक्तस्येति। इह स्थाने इत्यनुवर्तनादेतल्लभ्यते। प्रसक्तस्येति किं। दधि। मध्वित्यादौ नुगागमो मा भूत्। अस्ति हि तत्र क्विपो दर्शनं तच्च लोप इति प्रसक्तः। विशेषणाभावे प्रत्ययलक्षणेन नुक् स्यादेवेति। इकः। संयोगांतस्येति। नेदं तस्येति। अलोन्त्यस्येति परिभाषयतीति भावः। यद्यपि विशेषणेन तदंतविधिर्लभ्यते संयोगस्येत्येव सूत्रयितुमुचितं तथापि प्रत्येकं संयोग इति पक्षे दृषत्करोतीत्यादौ लोपवारणाय तु संयोगांतौ यस्येति द्विवचनांतेन समासलाभार्थं अंतग्रहणमिति मनोरमायां स्थितं। संयोग इति महासंज्ञाकरणसामर्थ्याद्विकल्पे संयोगसंज्ञा न भविष्यतीति अंतग्रहणमित्यन्तं शक्यं। यणः प्रतिषेध इति वा चनिकमिदं। यद्वा वाच्यो व्याख्येयः। व्याख्या च द्वेधा झलो झलीत्यतो झल्ग्रहणमनुवर्त्य झल एव लोपो विधीयत इति। अंतरंगे लोपे कर्तव्ये बहिरंगस्य यणोऽसिद्धत्वमिति वा। न च षाष्ठीपरिभाषा त्रैपादिकमंतरंगं लोपं न पश्यती

ति वाच्यं कार्यकालपक्षाभ्युपगमात्। न च नाजानंतर्य इति निषेधः। उत्तरकालप्रवृत्ते लोपे आजानंतर्याभावात्। नद्युक्तं। संयोगांतलोपे यणः प्रतिषेधः। न वा झ
लो लोपाद्बहिरंगलक्षणत्वादिति। चत्वारि रूपाणीति। इह धकारस्य द्वित्वे जश्त्वे च कृते पूर्वत्रासिद्धीयमद्वित्वे इति जश्त्वस्यासिद्धत्वाभावेन द्धस्य भेदाभावे पुनर्दका
रद्वित्वप्रसक्तौ रूपाधिक्यमापत्तिः। अत्र केचिदाहुः। उकारात्परस्य यरो द्वित्वे कृते पुनः सुकारात्परस्य यरो द्वित्वं न भवति निमित्तभेदाभावादित्याशयेनेदमुक्तमि
ति। तिष्ठंतु दादिगले वक्ष्यत्यत्र उरदत्वस्य च परस्मिन्निति स्थानिवद्भावान्न संप्रसारणमिति वस्तोत्वेनेति समाधानग्रंथो मूलस्थो विरुध्येत। निमित्तस्य
लिंगभेदाभावादिति दिक्। अन्ये तु धकारस्य जश्त्वे कृते पूर्वत्रासिद्धीयमद्वित्वे इति जश्त्वासिद्धत्वाभावाद्दकारे पुनर्द्वित्वं भवत्येव व्यक्तिभेदात्। अत एव सं
नेत्यादौ परसवर्णे द्वित्वं भाष्यकृता उदाहृतं। षट् संत इत्यत्र सकारद्वित्वसिद्धये पूर्वत्रासिद्धीयमद्वित्वे इति मनोरमायामप्युक्तं। एवं यकारेपि द्वित्वस्य पुनः प्रवृत्तौ

बाधस्याभावः। आष्टमिकद्विर्वचनस्य स्थाने द्विर्वचनरूपत्वात् स्थान्यादेशभावाभ्युपगमे जयाश्चभेदात्। यत्तूक्तं मनोरमायामेकस्यां व्यक्तौ एकं लक्षणं सकृदेव प्रवर्तत इत्येकः पू
र्वपरयोरिति सूत्रे भाष्ये सिद्धांतितत्वात् कथं पुनर्द्वित्वप्रवृत्तिरन्यथा द्वित्वानंत्यापत्तेरित्यादि तद्बाधाननिबंधनं तत्राधानादिशास्त्रदृष्टांतेन क्वचिदेवैकस्मिन्प्रयोगे गु
णादिशास्त्रस्यानुष्ठानवत्त्वं स्यान्न प्रयोगांतर इत्याशंक्य ज्योतिष्टोमादिशास्त्रदृष्टांतेन प्रयोगांतरेपि गुणादिशास्त्रप्रवृत्तेः एवं सिद्धांतितत्वात्। न तु सकृच्छास्त्रप्र
वृत्तेः। आनंत्यापत्तिरपि प्रकृते न दोषः। सा हि अनंतकार्यसहितप्रयोगस्याशक्यत्वात् तच्छास्त्रकर्तव्यस्य परिनिष्ठितप्रयोगस्याभावात् तच्छास्त्रस्यानुष्ठापकत्वाप
त्त्या दोषः। प्रकृते तु नास्ति द्वित्वस्य वैकल्पिकत्वेन यावच्छक्ति द्वित्वप्रयोगसहितस्य परिनिष्ठितत्वेन तेनैव शास्त्रस्य कृतार्थत्वात्। लिटि धातोरिति। द्वित्वस्यानु
नित्यत्वादनंत्यापत्तेः क्वचिद्धि श्रांतौ कल्पनीयायां लाघवात्प्रथमप्रवृत्तावेव विश्रांतिर्विकल्पनार्थमभ्यासग्रहणमनर्थकं स्यात्। अत एव सर्वस्य द्वे इत्यस्यापि पुनः पु
नः प्रवृत्तिरित्याहुः। नन्वत्रैकोऽसवर्णे इति पाक्षिकल्पेन रूपांतरमस्त्विति चेन्नैवं समासे तन्निषेधात्। न च नित्यसमास एव तन्निषेध इति वाच्यं। सिन्नित्यसमासयोः
शाकलप्रतिषेध इति वार्तिकस्य नित्यग्रहणस्य भाष्ये प्रत्याख्यातत्वात्। मनोरमायां तु जश्त्वेन दकारे कृते तस्य द्वित्वेनेत्याद्याशयेन सकारद्वित्वेनाष्टौ विसर्ग
द्वित्वे नवोडशेत्युक्तं। द्विधमिति। यद्यपि धस्य जश्त्वेन दकारे धद्वयं नास्ति तथापि भूतपूर्वगतिमाश्रित्यैवमुक्तं। सुद्ध्युपास्य इति। कर्तृकरणे कृता बहुलमिति

तृतीयासमासः। नन्विह यणो वदुर्लभः सुधीशब्दस्य ध्यायतेः संप्रसारणेन निष्पन्नत्वेन संप्रसारणाच्चेति पूर्वरूपापत्तेरिति चेन्नैवं। संप्रसारणपूर्वत्वे समानाङ्गग्रह
णमिति वार्तिकोक्तेः। न चैवमपि नभूसुधियोरिति यण्निषेधः शंक्यः आङ्गत्वेन प्रत्यये परत एव तन्निषेधस्य प्रवृत्तेः। सुधीत्यनुवर्त्य सुपि परत एव यण्निषेधाच्च।
धात्रंशइति। अत्र रेफस्य द्वित्वं न द्वित्वप्रकरणे रहाभ्यामिति साक्षाच्छ्रुतेन निमित्तभावेन रेफस्य कार्यित्वबाधनात्। सुद्ध्युपास्य इत्यादौ तस्यानित्यत्वेन निमित्तत्वमि
कोनबाध्यते। तस्मादित्युत्तरस्य वा पृतुपित्रंषस इत्यादिनिर्देशात् ज्ञापकात्। तकारस्य तु द्वित्वं भवत्येव। तच्चवेत्यतो रूपद्वयं   नादिनी। स्त्री वा क्रोशः प्राये
ण प्रवर्तत इति स्त्रीलिंगमुदाहरति   पुत्रादिनीति। इहसुप्यजातौ णिनिस्ताच्छील्ये इति णिनिः। तत्परे चेति। आदिनिपः पुत्रशब्दात्परे पिपुत्रशब्दस्य न द्वित्वमित्यर्थः

नादिन्याक्रोशे पुत्रस्य ८।४।४८। पुत्रशब्दस्य न द्वित्व आदिनिशब्दे परे आक्रोशे गम्यमाने। पुत्रादिनी त्वमसि पापे। आक्रोशे किं। तत्त्वकथने द्वि
र्वचनमस्त्येवा तत्परे च। पुत्रपुत्रादिनी त्वमसि पापे। वा हतजग्धयोः। पुत्रहती। पुत्त्रहती। पुत्रजग्धी। पुत्त्रजग्धी। त्रिप्रभृतिषु शाकटायनस्य
८।४।५०। त्र्यादिषु वर्णेषु संयुक्तेषु वा द्वित्वं। इन्द्रः। इन्द्रः। राष्ट्रं। राष्ट्रं। सर्वत्र शाकल्यस्य ८।४।५१। द्वित्वन्न। अर्कः। ब्रह्मा। दीर्घादाचार्याणां। ८।
४।५२। द्वित्वन्न। दात्रं। पात्रं। अचो रहाभ्यां द्वे ८।४।४६। अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः। हर्य्यनुभवः। नह्यस्ति। हलो यमां यमि
लोपः ८।४।६४। हलः परस्य यमो लोपः स्याद्वा यमि। इति लोपपक्षे द्वित्वाभावपक्षे चैकयं रूपं तुल्यं लोपारम्भफलं तु आदित्यो देवता अस्येति आ
दित्यं हविः। यमां यमीति यथासंख्यविज्ञानान्नेह। माहात्म्यं। एचोयवायावः। ६।१।७८॥   ९ वाहतेति। द्वित्वस्य वैकल्पिकत्ववार्तिकमिदं नारंभणी
यमित्येके। अन्ये तु हतजग्धयोः परतः पुत्रशब्दस्यैवानचि चेति द्वित्वं नान्येषामित्यादि नियमसंभवात् तदर्थमारंभणीयमेवेदमित्याहुः। पुत्रहतीति पुत्रो हतो
यया सा। अस्वाङ्गपूर्वपदाद्वेति ङीष्। एवं पुत्रो जग्धो यया सा पुत्रजग्धी। अचो रहाभ्यां। अचः किं। ह्नुते इत्यादौ नकारस्य माभूत्। हलो यमां यमि। हलः किं। आर्य्यां इह
र्गुङ्वो कुर्मः। अनेन तु अचो रहाभ्यामिति लब्धस्य … मस्य च द्वित्वे कृते लोपः। मत्यङ्गात्मा। सुगण्णीशः। सन्नच्युतः। अत्राव चिचेति ङमोद्वित्वे सत्यनेनङ

विपातित इति। क्तिन्नंतत्वेनेत्यर्थः। ननु गव्यं नाव्यमित्यत्र भत्वेनापदत्वात् हल्लोपाभावेपि गव्यूतिरित्यत्र हलि सर्वेषामिति लोपः शाकल्यस्येति वा लोपः स्यादत आह। वा
न्त इत्यत्रेति। वकारो न लुप्यत इति। एवं च हलि सर्वेषामिति सूत्रे व्योरित्यनुवृत्तावपि वकारं परित्यज्य यस्य लोपः स्यादिति व्याख्यास्यमानं संगच्छते। एतच्च तत्रैव स्फु
टीकरिष्यते॥ ॥ धातोस्तन्निमित्तस्यैव। पूर्वेणासिद्धे नियमार्थमिदं। अत्र वपूर्वं सूत्रमनुवर्तते। एच इति च। तच्छब्देन यादिप्रत्ययः परामृश्यते योग्यत्वात्तत्संनि
हितोपि धातुः। न हि स्वस्यैव स्वयं निमित्तं भवति। एवकारस्त्विष्टतोवधारणार्थः। अन्यथा हि तन्निमित्तस्यैवेत्ययं यदि भवति तर्हि धातोरेवेति विपरीतनियमः संभाव्येत। तत्र

धातोस्तन्निमित्तस्यैव ६।१।८०। यादौ प्रत्यये परे धातोरेचश्चेद्वान्तादेशस्तर्हि तन्निमित्तस्यैव नान्यस्य। लव्यं। अवश्यलाव्यं। तन्निमित्तस्यैवेति किं। ओयते। औयत। क्षय्यजय्यौ शक्यार्थे ६।१।८१। यान्तादेशनिपातनार्थमिदं। क्षेतुं शक्यं क्षय्यं। जेतुं शक्यं जय्यं। शक्यार्थे किं। क्षेतुं योग्यं क्षेयं पापं। जेयम्मनः। क्रय्यस्तदर्थे ६।१।८२। तस्मै प्रकृत्यर्थायेदं तदर्थं। क्रेतारः क्रीणीयुरिति बुद्ध्या आपणे प्रसारितं क्रय्यं। क्रेयमन्यत्। क्रयणार्हमित्यर्थः॥ लोपः शाकल्यस्य ८।३।१९। अवर्णपूर्वयोः पदान्तयोर्यवयोर्वा लोपोऽशि परे। पूर्वत्रासिद्धमिति लोपस्यासिद्धत्वान्न स्वरसन्धिः। हर एहि। हरयेहि। विष्ण इह। विष्णविह। श्रिया उद्यतः। श्रियायुद्यतः। गुरा उत्कः। गुरावुत्कः। कानि सन्ति कौ स्त इत्यत्र लोपस्य स्थानिवत्त्वेन यणावादेशौ प्राप्तौ न पदान्तेति सूत्रेण पदान्तविधौ तन्निषेधान्न स्तः। एकः पूर्वपरयोः ६।१।८४। इत्यधिकृत्य॥ आद्गुणः ६।१।८७। अवर्णादचि परे पूर्वपरयोरेको गुणादेशः स्यात् संहितायां। उपेन्द्रः। रमेशः। गङ्गोदकं। अण्रपरः। ऋ इति त्रिंशतः संज्ञेत्युक्तं तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्तते। तत्रान्तरतम्यात् कृष्णर्द्धिरित्यत्रार्। तवल्कार इत्यत्राल्। अचो रहाभ्यामिति पक्षे द्वित्वं।

स्वबाह्यव्यपदेशेन स्यात्। धातोस्त्वेत् तन्निमित्तस्यापि स्यादोयत इत्यादौ तदेतत्सकलमभिप्रेत्याह। यादौ प्रत्यये परे धातोरेचश्चेद्वान्तादेश इत्यादि। लव्यमिति। लु
नातेर्ण्यत्। सार्वधातुकार्धधातुकयोरिति गुणः। अवश्यलाव्यमिति। ओरावश्यक इति ण्यत्। मयूरव्यंसकादयश्चेति समासः। लुम्पेदवश्यमः कृत्ये इति म
कारलोपः। लव्यमित्यादेः पूर्वसूत्रेणैव सिद्धे नियमसूत्रमिदं व्यर्थमित्याक्षिपति। तन्निमित्तस्यैवेति किमिति। एकदेशाक्षेपेपि सूत्रस्यैवायमाक्षेपः पर्यवसन्नः।

त्रिधमिति। यलोमयलक्ष्मणांतरे णपुनर्हलित्वे चतुर्धमिति बोध्यं॥ ॥ वृद्धिरेचि। पूर्वसूत्रादादित्यनुवर्तते। तदाह। आदेचीति। कृष्णैकत्वमिति। कृष्णेति संबोधने ए
एकपदं। एवं देवेत्यपि। इत्थं चात्र षष्ठीसमासत्वमभ्युपेत्य पूरणगुणेति निषेधमाशंक्य संज्ञाप्रमाणत्वादित्यादिनिर्देशेन गुणेन निषेधो नित्य इति केषांचित्
व्याख्यानं नात्यंतावश्यकमिति बोध्यं। एत्येधत्यूठ्सु। अत्र एचीत्यनुवर्तते। तच्च एत्येधत्योर्विशेषणं न तूठः। असंभवात्। आद्गुण इत्यत आदित्यनुवर्तते। एत्वा
नोक्ता चेष्टा। अवर्णादिजाद्योरिति। प्रष्ठौहः इति। प्रष्ठं वहतीति प्रष्ठवाट्। वहश्चेति ण्विः। ततः शसि वाह ऊठ्। गुणापवादतया अनेन वृद्धिः। प्रेदिधरित्यत्र पूर्व।

वृद्धिरेचि। ६।१।८८। आदेचि परे वृद्धिरेकादेशः स्यात्। गुणापवादः। कृष्णैकत्वं। गंगौघः। देवैश्वर्यं। कृष्णौत्कंठ्यं। एत्येधत्यूठ्सु। ६।१।८९। अवर्णादिजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात्। पररूपगुणापवादः। उपैति। उपैधते। प्रष्ठौहः। एजाद्योः किं। उपेतः। मा भवान् प्रेदिधत्। पुरस्तादपवादन्यायेनेयं वृद्धिरेङि पररूपमित्यस्यैव बाधिका न त्वोमाङोश्चेत्यस्य। तेनावैहीति वृद्धिरसाधुरेव। अक्षादूहिन्यामुपसंख्यानं॥ अक्षौहिणी सेना। स्वादीरेरिणोः। स्वैरः। स्वेनेरितुं शीलमस्येति स्वैरी। स्वैरिणी। प्रादूहोढोढ्येषैष्येषु। प्रौहः। प्रौढः। प्रौढिः। अर्थवद्ग्रहणे नानर्थकस्य ग्रहणमित्यस्येति सूत्रे राजेः पृथग्भ्राजिग्रहणान्नेन ऊढग्रहणेन क्तान्तमेव गृह्यते न तु क्तवत्वन्तस्यैकदेशः। प्रौढवान्। प्रौढिः। इष इच्छायां तुदादिः। इष गतौ दिवादिः। इष आभीक्ष्ण्ये क्र्यादिः। एषां घञि ण्यति च एषः एष्य इति रूपे। तत्र पररूपे प्राप्तेऽनेन वृद्धिः। प्रैषः। प्रैष्यः। यस्तु ईष उञ्छे। यश्च ईष गतिहिंसादर्शनेषु। तयोर्दीर्घोपधत्वात्। ईषः। ईष्यः। तत्राद्गुणे प्रेषः प्रेष्यः। ऋते च तृतीयासमासे। सुखेन ऋतः सुखार्तः। तृतीयेति किं। परमर्तः। प्रवत्सतरकम्बलवसनार्णदशानामृणे॥ प्रार्णं। वत्सतरार्णमित्यादि। ऋणस्यापनयनाय यदन्यदृणं क्रियते तेन ऋणार्णं। दशार्णं। दशार्णो देशः नदी च दशार्णा। ऋणशब्दो दुर्गभूमौ जले च॥ ९

स्यधेतर्ल्यैतस्य लुङि रूपं। न माङ्योगे इत्याडागमाभावः। पुरस्तादिति। पुरस्तादपवादा अनंतरान्विधीन्बाधंते नोत्तरानिति न्यायेनेत्यर्थः॥ अक्षादिति। आदित्यनुवर्तते। अचीति च। तेन पूर्वपरयोर्वर्णयोरेव भवति। एवमन्यत्रापूह्यं। अक्षौहिणीति। ऊहः समूहः सोऽस्त्यस्याः सा ऊहिनी। अक्षाणामूहिनीति विग्रहः। परिमाणविशेषविशिष्टा सेना। अक्षौहिणी। पूर्वपदात्संज्ञायामिति णत्वं। अक्षशब्दस्य ऊह
[illegible]नेन समासेनंतरं नौ। अक्षौहिणीत्येव भवति। न तु तत्र वृद्धिः। अंतरंगेण गुणेन बाधात्। अपवादभूतया अपि च [illegible]

पश्चात्तु शंक्यः। यद्यपवादोऽन्तरङ्गश्चाचो रहाभ्यां द्वे इत्येतत्संहितायां तरङ्गाभ्यां वाध्यत इति। स्वादीरेरिणोः। ईरेरिण्योः इति क्वाचित्कः पाठः। स्वैरी। णिनिं त्यक्त्वा तस्याः स्त्रियं रूप
भावप्रसंगात्। ईरिन् ग्रहणं स्यपदमाह। स्वेन ईरितुमिति। यदा तु ईर इति घञन्ते न स्वशब्दस्य समासे स्वादीरे इति वृद्धौ कृतायां मत्वर्थीय इनिः। यदा कर्मत
र्थीये निमित्ते तेन ईरिन्शब्देन स्वशब्दस्य समासः। तदापि तदेकदेश ईरशब्दोऽस्त्येवेति। पृथगीरिन्ग्रहणं व्यर्थं स्यादिति भावः। स्वैरीति। सुप्यजातौ णिनि
णिनिरुपपदसमासः। स्वैरिणीति। ङीप्। प्राग्भागमीरिन्शब्दमादाय वृद्धिः। केचित्तु लिंगविशिष्टपरिभाषयात्र वृद्धिरित्याहुः तन्निष्फलमिति भावः। नाम
र्थकस्येति। उपस्थितस्यार्थस्य शब्दं प्रति विशेषणत्वसंभवेत्यागायोगादिति भावः। प्रैष्य इति। एवसाहचर्यादिष्योप्यनव्ययं गृह्यते तेन एष्यत्वादिः [illegible] प
ररूपमेव न तु वृद्धिः। प्रैष्यगतः। लघूपधगुणमाशंक्याह। तयोर्दीर्घोपधत्वादिति। प्रवत्सतरेति। इह केचिद्वत्सशब्दं वत्सरशब्दं च प्रक्षिपन्ति तद्भाष्यादावदृष्ट
त्वादुपेक्ष्यं। वत्सतराणमिति। नकारमकारयोर्द्वित्वे न कल्गाद्यत्वारि रूपाणि। रेफात्परस्य तु अचो रहाभ्यामिति द्वित्वे णकारमय इति वचनात्तेरेणपुनर्द्वित्वे

उपसर्गादृति धातौ ६।१।९१। अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात्। उपार्छति।

एकणं द्विणं त्रिणमिति द्वादश। खयः शर इति सकारद्वित्वे चतुर्विंशतिः। न च हशरोचीति द्वित्वनिषेधः शंक्यः। तस्य सौत्रद्वित्वमात्रविषयत्वात्। अत एव खयः
शर इति वार्त्तिकस्य वत्सर अप्सरा इत्युदाहरणं भाष्ये दत्तं। न च वेरेस्सर प्रत्यये परतश्चर्त्वे कृते तस्यासिद्धत्वात्सस्य खयः परत्वं नेति शंक्यं पूर्वत्रासिद्धी-
यमद्वित्वे इत्युक्तेः। अत एव मनोरमायां [illegible] टकारात्परस्य सस्य द्वित्वं स्वीकृतमित्याहुरिति दिक्॥ ॥ उपसर्गादृतीति। उपसर्गात्किं। खर्च्छति। ऋति
किं। उपेतः। तपरकरणमुत्तरार्थं। इह दीर्घॠकारादेर्धातोरसंभवेन व्यावर्त्यालाभात्। धातौ किं। उपर्कारः। नन्वत्र उपेत्युपसर्ग एव न भवति। क्रियायो-
गस्योपसर्गत्वात्। उपगत ऋकार इति विगृह्य [illegible] मेव यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा इति ऋकारं प्रति अनुपस-
र्ग एव। तथा चात्र नापि धातुग्रहणे ऋकारादौ धा[illegible] विवक्षिते [illegible] त्युपसर्गाण्णधातौ [illegible] पान्नत्वत्रेति चेत्सत्यं। अत एव योगविभागेन पुनर्विधानार्थमित्य-
नुपदं वक्ष्यतीति न काप्यनुपपत्तिः॥

अन्तादिवच्च। इह एकः पूर्वपरयोरित्यनुवर्त्तते। यथासंख्यं चाश्रीयते इत्यभिप्रेत्याह। पूर्वस्यांतवदिति। स्थानिवत्सूत्रेणैव गतार्थमिदं। न चाल्विध्यर्थमिदमस्त्विति शंक्यं। अस्याप्यल्विधावनिष्टत्वात्। अन्यथा अयजे इंद्रमित्यत्र सवर्णदीर्घापत्तेः। न विसर्ग इति। एतच्च सुखार्त्त इत्यादावपि बोध्यं। सुब्धातृवि-ति। सर्वैतावयवके इत्यर्थः। सुबंतस्य धातोरसंभवात्। यद्यपि क्विप् जगत्यां वित्यादौ नांक्विपि धातुत्व सुबंतत्वं च संभवति। तथापि न ताहश पुत्र परत्व-व्यावर्त्तकत्वं प्रसिद्धं। नामधातुष्वेव तत्संभवतीति तएवेह गृह्यंत इति भावः। प्रार्षभीयतीति। प्रारीचीति वक्ष्यमाणेन द्वित्वनिषेधः। एङि पररूपं। एङः येङि त्येव सिद्धे पर ग्रहणमुत्तरार्थं। रूपग्रहणं तु स्पष्टार्थं। अभिपूर्ववदेङि परइत्येव सिद्धेः। प्रेजत इति। एजृ दीप्तौ कंपनार्थस्तु परस्मैपदी प्रेजति। मि-

अन्तादिवच्च। ६।१।८५। योयमेकादेशः सपूर्वस्यांतवत्परस्यादिवत्स्यादिति रेफस्य पदान्तत्वे। खरवसानयोर्विसर्जनीयः ८।३।१५। खरि अवसाने च रेफस्य विसर्जनीयः स्यात्पदान्ते। इति विसर्गे प्राप्ते। अन्तवद्भावेन पदान्तस्य न विसर्गः। उभयथर्क्षु कर्त्तरि चर्षिदेवतयोरित्यादि निर्देशात्। उपसर्गेणैव धातोराक्षेपे सिद्धे धातावितियोगविभागेन पुनर्वृद्धिविधानार्थं। तेन क्त्यक इति पाक्षिको पि प्रकृतिभावोऽत्र न भवति। वा सुप्यापिशलेः। ६।१।९२। अवर्णान्तादुपसर्गादृकारादौ सुब्धातौ वृद्धिर्वा स्यात्। आपिशलिग्रहणं पूजार्थं प्रार्षभीयति। प्रर्षभीयति। सावर्ण्याल्लृवर्णस्य ग्रहणं। प्राल्कारीयति प्रल्कारीयति। तपरत्वाद्दीर्घेन। उपऋकारीयति। उपर्कारीयति। एङि पररूपं ६।१।९४। आदुपसर्गादेङादौ धातौ पररूपमेकादेशः स्यात्। प्रेजते। उपोषति। इह वा सुपीत्यनुवर्त्य वाक्यभेदेन व्याख्येयम् तेन नृ एङादौ सुब्धातौ वा पेङकीयति। उपैडकीयति। एवे चानियोगे। नियोगोऽवधारणं। क्वेव भोक्ष्यसे। अनवक्लृप्तावेवशब्दः। अनियोगे किं तवैव॥

योगोऽवधारणमिति। निर्द्धारणमित्यर्थः। न त्वत्र। नावक्लृप्तौ परादृष्टः पररूपस्य गोचरः। एवं तु विषयो दृष्टो निर्णयमे यं पदाभवेदिति। अस्यार्थः। अनवक्लृप्तौ अनिश्च-यपदार्थे एवकारो दृष्टः सः पररूपस्य विषयः। यस्तु नियमे निर्द्धारणे पदादृष्टः स वृद्धिविषय इति। यत्तु नियोगे तवैव गच्छेति प्राचो ग्रंथे स्थितस्य प्रत्युदाहरणस्यानुपालव-योनियोः [illegible]ऽनेनायोगो व्यापार इति व्याप्य सानेनेषां यदेव पूर्वं ज्वलने शरीरं ममैव जन्मांतरपातकानामिति लौकिकप्रयोगाः तपस्तपः कर्मकस्यैव लङः शाकटायनस्यैव।

॥

न्यादिष्वेतन्मयीषश्चनसिध्येत् ॥ उराल्हतइति श्लोकविरोधश्चस्यात्। अवधारणमिति व्याकुर्वतांतुसर्वेष्टसिद्धिः॥ ॥ अचोंत्यादिटि। अच..........वक्षीजा
तविकवचनेनादाह। अर्थामध्यइति। शकंध्वादिष्विति। शकंध्वादिविषयेतत्सिद्ध्यनुगुणंपररूपंवाच्यमित्यर्थः। अतएवाह। तच्चटेरिति। यदितुआदि...पाधकारा
रकारस्यैवेष्येतर्हिमनीषापतंजलेरितिनसिध्येत् ॥ केचित्तुमनःपतञ्जल्व्योः पृषोदरादित्वादंत्यलोपेअकारस्यैवपररूपमाहुः शकानांदेशविशेषाणामंधुः
कूपः शकंधुः। कर्काणांराजविशेषाणामंधुः कर्कंधुः। अटतीत्यटा पचाद्यच् टाप्। कुलस्यअटाकुलटा। यदितुकुलंअटतीतिविगृह्येततदाकर्मण्यणिङीपिकु

अचोन्त्यादिटि। १।१।६४। अचांमध्येयोन्त्यःसआदिर्यस्यतट्टिसंज्ञंस्यात्। शकन्ध्वादिषुपररूपंवाच्यं। तच्चटेः। शकन्धुः। कर्कन्धुः। कुलटा।
सीमन्तःकेशवेशे। सीमान्तोन्यः। मनीषा। हलीषा। लाङ्गलीषा। पतञ्जलिः। सारङ्गःपशुपक्षिणोः। साराङ्गोन्यः। आकृतिगणोयम्। मार्त्तण्डः। ओत्वो
ष्ठयोस्समासेवा। स्थूलोतुः। स्थूलौतुः। विम्बोष्ठः। विम्बौष्ठः। समासेकिं। तवौष्ठः। ओमाङोश्च ६।१।९५। ओमिआङिचात्परेपररूपमेकादेशस्स्यात्।
शिवायोन्नमः। शिवएहि। शिवेहि। अव्यक्तानुकरणस्यातइतौ ६।१।९८। ध्वनेरनुकरणस्ययोऽच्छब्दस्तस्मादितौपरे पररूपमे
कादेशःस्यात्। पटत्इति। पटिति। एकाचोन॥ श्रदिति। नाम्रेडितस्यान्त्यस्यतुवा ६।१।९९। आम्रेडितस्यप्रागुक्तंनस्यात्। अन्त्यस्य
तुतकारमात्रस्यवास्यात्। डाचिबहुलंद्वेभवतइतिबहुलवचनाद्द्वित्वं। तस्यपरमाम्रेडितम् ८।१।२। द्विरुक्तस्यपरंरूपमाम्रेडितसं
ज्ञंस्यात्। पटत्पटेति। पटपटेति। कलान्तशब्दोन्ते ८।१।१९। परान्तेकलान्तशब्दस्युः। पटत्पटदिति॥ ९ लादीतिस्यात्। ईषिउंछे। ईषगत्यादिषु। आभ्यांगुरोश्चहल
इत्यप्रत्ययेईषा। मनसईषामनीषा। हलस्यईषाहलीषा। हलीषालांगलदंडः। पतंतःअंजलयोअस्मिन्पतंजलिः। मार्त्तंडइति। पत्रकृपेणनेनमृतंडइतिसिद्धे
तन.....त्यादिसिद्धिः। परमार्तोंडमास्यतपुनर्मार्त्तंडमाभरदित्यादिषुतुदीर्घश्छांदसइतिभावः। केचिदत्रसवर्णदीर्घमाहुः। पूर्वोक्तवैदिकप्रयोगास्तेषामनु
कूलाः। ओत्वोष्ठयोः समासेवा। अकारस्यओत्वोष्ठयोःस्वरूपेसमासेस्थितेमत्यामिदंप्रवर्त्तते। नेह। वृषलस्तोष्ठवणस्तइति। शिवेहीति। ननुशिवआइत्यत्रसव
र्णदीर्घेकृतेपश्चाद्गुणेचसिद्धमिष्टनकिमाङ्ग्रहणेन। सत्यं। पूर्वंधातुरुपसर्गेणयुज्यतेइतिदर्शनेधातूपसर्गयोःकार्यमंतरंगमितिपूर्वंगुणेकृतेवृद्धिः॥

सि॰ कौ॰
टी॰ त॰
१८

स्यात्। तस्माभूदित्याङ्ग्रहणं। अव्यक्तानुकरणस्यात इतौ। यद्यप्यतो गुण इति पूर्वसूत्रादत इत्यनुवर्त्य तोग्रहणमिह त्यक्तुं शक्यं। तथापि पूर्वसूत्रे अत इति तपरकरणं ऽकारस्य ग्रहणमिह तु प्राग्वदाधिकारपक्षाश्रयणात् अच्छब्दस्य ग्रहणमिति व्याख्यानेऽत्रक्षे शः स्यादिति पुनरत्रातो ग्रहणं कृतं। अव्यक्तशब्दं व्याचष्टे। ध्वनेरिति। अनुकरणस्येति। परिस्फुटाकारादिवर्णस्येति भावः। तस्य चानुकरणत्वं किंचित्साम्येन बोध्यं पररूपस्यास्य नित्यत्वेऽपि संहितायामविवक्षितायां तदभावादाह। पटत् इतीति। नाज्झलावित्यादि। अयं भावः। विधेयभेदे वाक्यभेदात्संभवन्त्यामेकवाक्यतायां तद्योगात् तुल्यास्यप्रयत्नमित्यस्य नाज्झलावित्यस्य चैकवाक्यत्वलाभः। अज्झलभिन्नं तुल्यास्यप्रयत्नं सवर्णमित्यर्थोऽभ्युपेयते। अज्झलभिन्नेत्यत्र परस्परनिरूपिततुल्यत्वविशिष्टास्यप्रयत्नकौ यावज्झलौ तदुभयभि

अकः सवर्णे दीर्घः। ६।१।१०१। अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात्। दैत्यारिः। श्रीशः। विष्णूदयः। अचि किं। कुमारी शेते। नाज्झलाविति सावर्ण्यनिषेधस्तु न दीर्घशकारयोः। ग्रहणकशास्त्रस्य सावर्ण्यविधिनिषेधाभ्यां प्रागनिष्पत्तेः। अकः किं। हरये। अकोऽकि दीर्घ इत्येव सुवचं। ऋति सवर्णे ऋ वा। होतृकारः। होतॄकारः। लृति सवर्णे लृ वा। होतॢकारः। होतॄकारः। पक्षे ऋकारः। सावर्ण्यात्। ऋति ऋ वा लृति लृ वेत्युभयत्रापि विधेयं वर्णद्वयं द्विमात्रं। आद्यस्य मध्ये द्वौ रेफौ तयोरेका मात्रा। अभितोऽज्भक्तेरपरा। द्वितीयस्य तु मध्ये द्वौ लकारौ। शेषं प्राग्वत्। इहोभयत्रापि ऋत्यक इति पाक्षिकः प्रकृतिभावो वक्ष्यते॥ ॥ १९

न्नत्वं विवक्षितं। तथा च यो ह्रस्वदीर्घप्लुतात्मको वर्णो येन वर्णेन ताद्रूप्येन तुल्यास्यप्रयत्नस्तदुभयं मिथः सवर्णं भवति। तथा येन हला तुल्यास्यप्रयत्नकं यद्धल् तन्मिथः सवर्णं स्यात् यं ह्रस्वदीर्घप्लुतात्मको वर्णो येन हला तुल्यास्यप्रयत्नस्तदुभयं न मिथः सवर्णमित्यर्थः फलितः। तत्र चानेन सूत्रद्वयेन सवर्णसंज्ञायां सिद्धायामणुदित्सवर्णस्येति ग्राहकशास्त्रं प्रवर्तते न तु ततः प्राक्। अतो नाज्झलावित्यनेन आक्षरसमाम्नायिकानामेव सावर्ण्यं प्रतिषिध्यते न तु सर्वेषां तेनात्र दीर्घशकारयोः सावर्ण्यमस्त्येवेति तद्वारणाय अकः सवर्णे इत्यत्राचीत्यनुवर्तनमुक्तमि ति य स्तत्प्रमाणमेवाहितमतं परिकल्प्य नाज्झलाविति सूत्रं प्रत्याख्यायते तेनेह सवर्णसूत्रे अचीति नानुवर्तनीयं। हे पिपासो इत्यादौ गुरोरनृत इत्याकारस्य प्लुते कृते नतिः अप्लुतस्य पररूपेण स्त्वेन षत्वं स्यात्। नाज्झलावित्यत्राकारप्रश्लेषेण दीर्घहकारयोः सावर्ण्याभावेऽपि प्लुताकारस्य हकारसवर्णत्वेन इण्... इत्यादौ कयन

१८

संबोधनार्थमाश्च आश्वेति द्वंद्वः तत्त्वात्सवर्णदीर्घेण दीर्घान्परत्र प्लुतोपि प्रश्लिष्यत इति क्लिष्टव्याख्यानमपि नाश्रयणीयं। विश्वपाभिरित्यादौ त्वादरस्य सक्तेः। मुरा
णामृष्य्रुणां च प्रयत्नभेदेन सावर्ण्याभावादिति सुगमोयं पंथाः। अकोकीत्येवेति। अकोऽकि दीर्घ इत्येवेत्यर्थः। सुवचमिति। यथासंख्यसंबंधेन दध्यत्रेत्यादावेवाति
प्रसंगाभावात्। ऋ इति त्रिंशतः संज्ञत्वप्रयुक्तत्वात् होतॢकार इत्यत्र ऋकारस्य ऋकारपरत्वमस्त्येवेत्यप्रसंगाभावात्। ईकार शकारयोः सावर्ण्यं तत्प्रत्ययं चेत्यनुवर्तनेनैव
नैव समाहितत्वप्रसिद्धेश्चेति भावः। ऋति ऋ वा ऌति ऌ वेति वार्तिकं सूत्रस्थेन सवर्णपदेन योजयित्वा पठति ऋति सवर्ण इत्यादि नन्वेवमकः सवर्ण इति सवर्णपदाकरणे वा
र्तिकयोः सवर्णग्रहणं कर्तव्यं सूत्रे त्वकोकीति कर्तव्यमिति विपरीतगौरवात्कथमकोकीत्येव सुवचमित्युक्तमिति चेदत्राहुः। भाष्यकारैरेतद्वार्तिकद्वयं प्रत्या
ख्यानात्तस्य च गौरवमिति। प्रत्याख्यानेतु पक्षे ऌकारान्तेषु विचारयिष्यते। वर्णद्वयं द्विमात्रमिति एतेन दीर्घपाठे ह्रस्व ऋकारो ह्रस्व ऌकारश्चैव विधीयत इति प्राचो
व्याख्यानमाकरविरुद्धमिति ध्वनितं॥ ॥ एङः पदांतादति। अयवाद्यपवादः। ङसिङसोश्चेत्यस्यारंभादस्य पदांतविषयत्वे लब्धे उत्तरार्थं पदांतादिति स्पष्टा

एङः पदान्तादति। ६।१।१०९। पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात्। हरेऽव। विष्णोऽव। सर्वत्र विभाषा गोः। ६।१।१२२। लोके वेदे
चैङन्तस्य गोरति वा प्रकृतिभावः स्यात्पदान्ते। गोअग्रम्। गोऽग्रम्। एङन्तस्य किं। चित्रग्वग्रम्। पदान्ते किं। गोः॥ ॥ ॥

प्रतिपत्तये इहैवकृतमिति मनोरमायां स्थितं। केचित्तु पदांतादित्येतदिहाप्यावश्यकमेवान्यथा पदांतादपि स्यात्। ङसिङसोश्चेति सूत्रेण सुप्संबंधिन्यति परतः पूर्व
रूपं चेत् ङसिङसोरेवातीति नियमार्थं स्यात्तत्फलं तु हरयः गुरवः इत्यत्रापि स्यात् नपरत्वात् पूर्वरूपापत्तिरित्याहुः। एङः किं। दध्यत्र। पदांतात्किं॥ चयनं लव
नं। अचिनव। अतिकिं। हरये। विष्णवे। हरे। तपरः किं। वायवायाहि। सर्वत्र विभाषा। यद्यपीह छंदसि इति न प्रकृतं तथापि यजुष्युर इत्यादिप्रक्रमात् छंदस्ये
व संभाव्येत अतः सर्वत्रेत्युक्तं। तदाह चेल्लोके वेदे चेति। इह एङ इत्यनुवर्त्य एङंतस्य गोरिति व्याख्येयं। प्रकृतिभाव इति। एतच्च प्रकृत्यांतः पादमिति सूत्रात्प्रकृत्येत्यनुवृत्त्या
लभ्यते। नांतः पादमिति पाठे तु सर्वत्र विभाषेति सूत्रेण पूर्वरूपमेव विभाषा निषिध्यत इत्यवधेयं। निषेधविकल्पे विधिविकल्पः फलित इत्याशयेन पूर्वरूप
॥ ॥ ॥मेव विकल्प्यत इति मनोरमायां स्थितं॥ ॥ ॥

अवङ्स्फोटायनस्य स्फोटायनं पारायणं यस्य सः स्फोटप्रतिपादनपरो वैय्याकरणः। तस्य स्फोटायनस्य। अत्रापि एङ्· तस्य गोरिति व्याख्येयं। अगित्येव सूत्रयितुमुचितं
विभाषानुवृत्तेः स्फोटायनग्रहणं पूजार्थं। अतीति निवृत्तमिति। अन्यथा गवेशः। गवोद्दः। इत्यादि न सिध्येदिति भावः। अचिपर इति। अत्राचीत्यनुवर्त्तते। अतीति
तु निवृत्तमित्यत्र व्याख्यानमेव शरणं। गवाग्र इति। गवां किरणानां अग्रमिवेति विग्रहः। अग्रणी दर्शनादित्य च समासांतः। वातायने रूढोयं। पुंस्त्वं लोकात्। इन्द्रे
च। आरंभसामर्थ्यान्नित्यमिदं। इदं च सूत्रं त्यक्तुं शक्यं। अन्यार्थस्वीकृतेन व्यवस्थितविभाषाश्रयणेनैव इष्टसिद्धेरित्याहुः। प्लुतप्रगृह्या इति सूत्रादव्यवहितपूर्वो
पप्रकृतिभाव इति पाठो मूलपुस्तकेषु प्रायेण दृश्यते स चापपाठ एव सर्वत्र विभाषा गोरिति प्रकृतिभावस्य प्रागेवारब्धत्वादित्येके। अन्ये तु अवङ् स्फोटाय
नस्य इन्द्रे चेति सूत्रद्वयं प्रकृतिभावप्रकरण पठितमपि तद्बहिर्भूतमित्यत्र तथैव कर्त्तव्यं। ताभ्यां तद्विधानात्। न च अवङ्सूत्रस्य प्रकृतिभावापवादत्वेनोत्सर्गापवा

अवङ्स्फोटायनस्य। ६। १। १२३। अतीति निवृत्तम्। अचिपरे एदन्तेगोरवङ् वा स्यात्। गवाग्रं। पदान्ते किं। गवि। व्यवस्थितविभाषया गवां
क्षः। इन्द्रे च ६। १। १२४। गोरवङ् स्यादिन्द्रे। गवेन्द्रः। अथ प्रकृतिवद्भावः। प्लुतप्रगृह्या अचि नित्यं ६। १। १२५। प्लुताः प्रगृह्याश्च वक्ष्यन्ते तेऽ
चि नित्यम्प्रकृत्या स्युः। एहि कृष्ण ३ अत्र गौश्चरति। हरी एतौ। नित्यमिति किं। हरी एतावित्यादावयमेव प्रकृतिभावो यथा स्यात्। इकोऽस
वर्णे इति ह्रस्वसमुच्चयो माभूत्। इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च। ६। १। १२७। पदान्ता इकोऽसवर्णेऽचि परे प्रकृत्या स्युर्ह्रस्वश्च वा। अत्र
ह्रस्वविधिसामर्थ्यादेव प्रकृतिभावे सिद्धे तदनुकर्षणार्थश्चकारो न कर्त्तव्य इति भाष्ये स्थितं। चक्रि अत्र। चक्र्यत्र। चकारोऽपवादाभावमुक्तम्
किं गौर्यौ। न समासे॥ वाप्यश्वः॥ सितिच। पार्श्वे॥ " इदरूपत्वात् तत्प्रकरणस्थत्वं सूपपादमित्यवङ आदेशानुवृत्त्यर्थं तदनंतरं पठितस्येन्द्रे चेति सूत्र
स्यापि तिवाच्यां पूर्वरूपापवादत्वस्य अवङ्सूत्रस्यैव चत्वात्। एतत्प्रकरणपाठस्य गोशब्दानुवृत्त्यर्थं तथा चरितार्थत्वात्। एवं च स्वलेख्य प्रकृतिभावप्र
करणं इहिंसत सूत्रद्वयं लिखितं तदनुकूलत्वं न सर्वत्र विभाषेति सूत्रमपि तत्रैवेति स्थितस्य गतिर्बोध्येत्याहुः। प्लुतप्रगृह्या। प्रकृतिभावं प्रति प्लुतानामसिद्धः
प्लुतेऽसिद्धे प्रकृतिभावविधिसामर्थ्यात्। अचि किं। जानु उ जानू। उञः प्रगृह्यत्वेपीह सवर्णदीर्घः। अचीत्यनुवर्तमाने पुनरचिग्रहणमादेशनिमित्ते एवा
चि प्रकृतिभावस्तेन इहाप्येकादेशः स्यादेव। जानु उ अस्य रुजति जानू अस्य रुजति। इहमयउञ इति पाक्षिके वकारे तु जान्वस्य रुजति। एहि कृष्ण ३ अत्र गौः

वेविद्धिप्लुतः आनातुकृष्णा ३ हीति ऋलृदतेन र सन्॥ वाक्यस्य टेरित्यधिकारात् ह्रस्वसमुच्चितो मा भूदिति। अयंभावः। हरी ३ एताविह्यादौ प्लुतप्रगृह्यत्वेनतस्याचः
काम्ये। च सि अचेत्यत्र त्रिक्कोसवर्ण इति। ततश्च हरी ३ एताविह्यत्र परत्वात् ह्रस्वसमुच्चितएवस्यात्। नित्यग्रहणे तु कृते तेन सामर्थ्यात् परमपिवाधइति। ऋक्यत्रे
ति। ऋहस्य ऋ इति कलापेन। ऋणकार्यकालपक्षे वहिरङ्गपरिभाषया असिद्धत्वात्। स्यान्निवद्धा वाच्या। पूर्वत्रासिद्धेनस्यान्निवदिति तु नास्ति। तस्य शेषः संयोगा
दिलोपलत्वणत्वेष्विति वक्ष्यमाणत्वात्। पार्श्वमिति। पर्शूनां समूहः। पार्श्वाणसवक्षेत्यइतिणस। ओर्गुण इत्युनसितिचेति परत्वस्य भत्वापवादत्वात्॥ ॥
ऋत्यकः। ब्रह्मऋषीति ननु ऋत्यच्येत्येव सूत्रमस्तु। इच्छतीत्यादावकोसवर्ण इत्यनेनैव प्रकृतिभावसिद्धेः। मैवं। होतृऋकार इत्यत्र प्रसङ्गात् तथा ऋत्यकम

ऋत्यकः। ६।१।१२८। ऋति परे कः प्राग्वत्। ब्रह्म ऋषिः ब्रह्मर्षिः। पदान्ता इत्येव आर्छत्। समासेप्ययं प्रकृतिभावः। सप्तऋषीणां सप्तर्षी
णां वाक्यस्य टेः प्लुत उदात्तः। ८।२।८२। इत्यधिकृत्य। प्रत्यभिवादेऽशूद्रे। ८।२।८३। अशूद्रविषये प्रत्यभिवादे यद्वाक्यं तस्य टेः प्लुतः
स्यात्। अभिवादये देवदत्तोऽहं। भो आयुष्मानेधि देवदत्त ३। स्त्रियां न। अभिवादये गार्ग्यहं। भो आयुष्मती भव गार्गि। नाम गोत्रं वा
यत्र प्रत्यभिवादवाक्यान्ते प्रयुज्यते तत्रैव प्लुत इष्यते। नेह आयुष्मानेधि भो। राजन्यविशांवेति वाच्यं॥ आयुष्मानेधि भो। आयुष्मानेधीन्द्रवर्मन्
आयुष्मानेधीन्द्रपालित ३। दूराद्धूते च। ८।२।८४। दूरात्संबोधने यद्वाक्यं तस्य टेः प्लुतः स्यात्। सक्तून्पिव देवदत्त ३ है हे प्रयोगे है हयोः। ८।२।८५।
एतयोः प्रयोगे दूराद्धूते यद्वाक्यं तत्र हैहयोरेव प्लुतः स्यात्। है ३ राम। राम है ३॥ १ कृग्रहणस्यावश्यकत्वात्। एतेनाकोसवर्णइत्यकः प्रवमत्रमस्त्वि
तिशंकायानिरवकाश एव। उक्तदोषात्। ऋतेः। सप्तऋषीणामित्यत्रैन समासइतिनिषेधापत्तेश्च। नसमासइतिनिषेधवार्तिकं हि इकोसवर्णइति सूत्रे एव
न तु ऋत्यकइत्यत्रेतिसिद्धान्तः। अतएवाह समासेप्ययमिति। एवं च ऋलृवर्णयोरिति पूर्वोक्तोनिर्देशः संगच्छते। प्रत्यभिवादे इह प्रत्यभिवादशब्देन आशीर्वच
नमुच्यते। अशूद्रकि। अभिवादयन्तु पञ्चमो हं। भो आयुष्मानेधि तुष जक। आयुष्मानधीति। असतः सेर्हिः। घ्वसोरिति एत्वं। हुझल्भ्यो हेर्धिः। श्रमोरल्लोपः। ना
मगोत्रं वेति। गोत्रस्योदाहरणं। अभिवा ये गार्ग्योहं। भो आयुष्मानेधि गार्ग्य ३ इत्यूह्यं। दूराद्धूते च। हूतमाह्वानं। तच्च संबोधनमात्रोपलक्षणमित्याह दूरा

त्संबोधनइति। उपलक्षणतया व्याख्यानस्य फलमुदाहरति सक्तून्पिबेत्यादि॥ ॥ गुरोरनृतः। अनंत्यस्यापीति। अत्र वदंति। यद्यप्यनंत्यस्य गुरोः प्लुतार्थोपि
शब्द इति व्याख्यायते तर्हि गुरुस्थानिकप्लुतानामेव पर्यायता स्यात्तथा च दूराद्धूत इति लक्षणांतरेण लघोष्टेः स्थाने विहितेन प्लुतेन सह युगपत्प्रयोगः प्रसज्ये
त तस्मादपिशब्दो गुरोरगुरोश्च टेः प्लुतार्थ इत्येव व्याख्यातव्यः। टेरिति प्रकृतत्वादिति। देवदत्तेति। वाक्यत्वसंपत्तये अस्यादिरेहीति शब्दो बोध्यः। एवमग्रेपि। सर्वः
प्लुतो विकल्प्यत इति। एतेन द्वैपायनो विरहकातर आजुहाव पुत्रेति भा[illegible] व्याख्यातो। प्लुतस्य वैकल्पिकत्वात्। आर्षप्रयोग इति श्रीधराचार्योक्तिस्तु नादर्तव्या
विस्तरस्त्वत्र मनोरमायामनुसंधेयः। यणादिकं करोतीति। अत्र नव्याः इत्येवमग्नी इति विष्णू इति इत्यत्र प्रगृह्याश्रयप्रकृतिभावं बाधित्वा परत्वादनेन भ

गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचां ८।२।८६। दूराद्धूते यद्वाक्यं तस्य ऋद्भिन्नस्याऽनन्त्यस्यापि गुरोर्वा प्लुतः स्यात्। दे३वदत्त। देवद३त्त। देवदत्त३।
गुरोः किं। वकारात्परस्याकारस्य मा भूत्। अनृतः किं। कृ३ष्ण। एकैकग्रहणं पर्यायार्थं। इह प्राचामिति योगो विभज्यते। तेन
सर्वः प्लुतो विकल्प्यते। अप्लुतवदुपस्थिते ६।१।१२९। उपस्थितोऽनार्ष इतिशब्दस्तस्मिन्परे प्लुतोऽप्लुतवद्भवति। अप्लुतकार्यं यणादिकं क
रोति। सुश्लोक३ इति। सुश्लोकेति। वत्किं। अग्ना३इ इति। प्लुतएव निषिध्येत। तथा च प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणं न स्यात्। अग्नी३इ
ति। ई३ चाक्रवर्मणस्य ६।१।१३०। ई३प्लुतोऽचि परेऽप्लुतवद्वा स्यात्। चिनुहीति। चिनुहि३ इति। चिनुही३दं। चिनुहीदं। उभयत्र विभाषेयं॥

यणादिकार्यस्यासिद्धत्ववत्करणप्रयोजनं यणादिकमेव स्यात्तस्मात्प्लुतकार्यं प्रकृतिभावं न करोतीत्यर्थः। इति प्राचां व्याख्यैव ज्यायसी। एवं चेकोयणचीत्य
त्रेक्ग्रहणस्य वैयर्थ्यशंकापि नास्ति॥ तथाहि। तत्रेक्ग्रहणाभावेपि ह्रस्वस्यापि तिष्ठति तु कादिघोरित्यतो ह्रस्वदीर्घपरानुवृत्त्या तयोर्यण्विधानान्न व्यंजन
स्य भविष्यति। प्लुतस्य तु प्रकृतिभावेनैव भवितव्यमेचोऽत्वयादयोपवादाः हरयइत्यादौ॥ उपेंद्र इत्यौकत्वमित्यादौ त्वाद्गुणः वृद्धिरेचीति बाधके भविष्यतः यथा
सत्यपि इक्ग्रहणे श्रीश इत्यादौ सवर्णदीर्घत्वं बाधकमतो नार्थ इक्ग्रहणेन। तथापि एहि करभोरू३ इति। सुतनू३ इति। चिनुही अत्रेत्यादावप्लुतवदुपस्थिते ई३ चा
क्रवर्मणस्येति प्रकृतिभावनिषेधेपि आभ्यां यणादिकार्यं विधानात् प्लुतस्यास्य यण्न स्यात् ह्रस्वदीर्घपराननुवृत्तौ तु व्यंजनस्य स्यात्। तस्मादिक्ग्रह

अमुकेत्रेति।स्त्रीलिंगद्विवचनस्य तु पूर्वसूत्रेण प्रगृह्यत्वे प्रकृतिभावएव अमुके अत्र।एकारोप्यनुवर्ततेति।तथा च एकारानुवृत्तितात्पर्यग्राहकफलकं मात्रग्रहणमिति
भावः।शे।त्वां इत्समपीरं संदर्भशुध्यर्थमुक्तमिसाहुः। अस्मे इति। अस्मभ्यमित्यर्थः।सुपांसुलुगिति भ्यसः शे आदेशः।शेषे लोपः।निपात एकाजनाङ्।निपातः किं। अतते
र्डः। अः। हे अ अ आगच्छ। हे आ आगच्छ। अत्र प्रगृह्यसंज्ञा माभूत्। एकग्रहणाभावे येन विधिरिति सूत्रात् तदंतलाभे प्रेदमित्यत्रस्यादत उक्तमेकेति। एकाजिति तु न बहुव्रीः
हिरजंतनिप्रसंग नारवस्थ्या दतः पूर्वकालैकेति कर्मधारय एव। ननु निपात एकाजनाङिति सूक्ते हलंतस्य सत्यपि प्रगृह्यत्वे प्रयोजनाभावादजंतेप्राप्ते अज्ग्रहणसामर्थ्या
दज्रूपस्यैव निपातस्य प्रगृह्यत्वसिद्धेः किमेकग्रहणेन।न च पुरोली त्यादौ हलंतस्यापि संज्ञायां सत्यां प्रकृतिभावादेओरोरिति रोरुत्वं न स्यादतोऽज्ग्रहणसामर्थ्यमुपक्षीण
मित्येकग्रहणमावश्यकमिति वाच्यं। प्रगृह्यसंज्ञां प्रति रुत्वस्यासिद्धतया रेफांतस्यैव तस्य प्रगृह्यसंज्ञाभावेन दोषाप्रसक्तेः। न च सांतस्य कृतप्रगृह्यसंज्ञा एकदेशविकृ
तन्यायेन रेफांतस्यापि स्यादेवेति प्रकृतिभावादुत्वाभावप्रसंगस्तदवस्थ इति वाच्यं। प्रगृह्यतां प्रतीव प्रकृतिभावं प्रत्यपि रुत्वस्यासिद्धत्वात् प्रकृतिभावाप्रवृत्तेः सका
रांतस्य तु न किंचिदप्यसिद्धं कांडस्य प्रयोजनं प्राप्नोतीति प्रकृतिभावेन व्यावर्त्येत। न चाज्ग्रहणसामर्थ्यादजंतस्यैव प्रप्रा अपेत्यादिनिपातस्य प्रगृह्यसंज्ञा स्या
न्न त्वज्रूपनिपातस्येति वैपरीत्यशंकानिवारणार्थमेकग्रहणमिति वाच्यं। अनाङ्ग्रहणस्य वैयर्थ्यापत्तेर्व्याहरति मृग इत्यादिनिर्देशविरोधाच्चोक्तशंकाया अप्रवृत्तेः। किंच
निपातो अच् आङित्युक्तेप्यनाङिति प्रतिषेधसामर्थ्यान्निपातस्य विशेषणत्वाभ्युपगमे तदंतविध्यप्रवृत्त्या निपातरूपो योच्प्रगृह्य इत्यर्थलाभादज्रूपस्यैव निपातस्य प्र
गृह्यत्वं सिद्धमिति तावदेव प्रयोजनमेकग्रहणस्यान्नत्वेवमपि समुदायनिर त्यर्थमेकग्रहणमावश्यकमेवान्यथा अ इ उ अपेहीत्यत्रैकाच द्विर्वचनन्यायेन समुदा
यस्यैव संज्ञा स्यान्नावयवानामिति चरमस्यैव प्रकृतिभावः स्यान्न तु पूर्वयोरिति चेन्न। अजित्येकत्वस्याविवक्षयैव समुदायनिराससंभवात्समुदायसंज्ञया अवयवाना
मननुग्रहे पैकाज्द्विर्वचनन्यायस्याप्यप्रवृत्तेरेकस्मिन्निपाते संज्ञाविधानसंभवेन निपातसमुदायस्य निपातग्रहणेनाग्रहणाच्च। अत्राहुर्भाष्यकाराः। अच्समुदा
यग्रहणशंकानिरासार्थमेकग्रहणं कुर्वन् ज्ञापयति वर्णग्रहणेषु व्यक्तिसंख्या न विवक्ष्यते किंतु जातिरेव निर्दिश्यत इति तेन हलंताच्चेति सनः कित्वात् दंभ इत्वे।
धिप्सतीत्यादि सिद्धं। हल्ग्रहणस्य व्यक्तिपरत्वे तु यत्रैकः समीपे हल् न कारो नेतनः परः सन् यस्माच्च परः स न भकारान्नासाविक्समीप इति कित्वं न स्यात्तेन ध्वनंतो

उञः। निपात एकाजिति नित्यं प्राप्ते विभाषेयं। शाकल्यस्येतौ प्रगृह्यमिति चात्रानुवर्त्तते तदाह इतौ वा प्रागुक्तमिति। इह उञ ऊँ इत्येकमेव सूत्रं योगविभागेन व्याख्या-
तमेकसूत्रत्वे तु उञ इतौ ऊँ शाकल्यस्येत्यर्थात्। ऊँ इतीत्येव रूपं शाकल्यमते सिध्यति अन्येषां तु मते नित्यं प्रगृह्य इति उ इतीत्येव रूपं सिध्यति विति इति रूपं तु न सिध्यत्येवेति ज्ञेयं
ऊँ। अनुनासिके इति। तेनास्मिन् परे यरोऽनुनासिक इति विकल्पः। यद्यत्तन् इति पठसि यदेतत् ईं इति वा न दीर्घमित्यादि। एतदर्थमेवात्रानुनासिकग्रहणं। अन्यथा यरोऽ-
न्यनुनासिको वेत्येवावक्ष्यत्। यरोऽनुनासिकेऽनुनासिको वेत्यवावक्ष्यदित्युक्तौ तु यथासंख्यमनया अम्मयं तन्नेत्यादि सिद्धावपि छिन्मयं एतन्मुरारिरिति न सिध्येत्। क्रमेणञः। ऊँमुण्नि
त्यस्मिन्नादिनिर्देशः। श्रयणे तु प्रतिपत्तिगौरवं। वस्तुतस्तु यरोऽनुनासिकेऽनुनासिको वेत्येव सूत्रयितुमुक्तमित्याहुः। प्रगृह्यमित्यनुवर्त्तनादाह। प्रगृह्यश्चेति। ननु दीर्घोच्चारणसामर्थ्या-
देव प्रकृतिभावसिद्धौ किमनेन प्रगृह्यत्वेनेति चेदत्राहुः। प्रगृह्याप्रगृह्ययोर्द्वयोरप्यु   शापत्तौ प्रगृह्यादेशे प्रकृतिभावादिष्टसिद्धावपि अप्रगृह्यादेशस्यानुनासि

ऊँ ।१।१।१९। उञ इतौ दीर्घोऽनुनासिकः प्रगृह्यश्च ऊँ इत्ययमादेशो वा स्यात्। ऊँ इति। मयि उञो वो वा ।८।३।३३। मयः परस्य उञो वो वा स्यादचि। किमु उ-
क्तं। किम्वुक्तं। वस्यासिद्धत्वान्न   तु स्वारः॥ ईदूतौ च सप्तम्यर्थे ।१।१।१९। सप्तम्यर्थे पर्यवसन्नमीदूदन्तं प्रगृह्यं स्यात्। सोमो गौरी अधि-
श्रितः। मामकी तनूरिति। सुपां सुलुगिति सप्तम्या लुक्। अर्थग्रहणं किं। वृत्तावर्थान्तरोपसंक्रान्ते मा भूत्। वाप्यामश्वो वाप्यश्वः।   ॥

को वकारः स्थानिवद्भावेन प्रगृह्यत्वाश्रयणमिति। आदेशस्यास्य स्थानिवत्त्वे नो न त्वा उञ इति प्रगृह्यत्वविकल्पे प्राप्ते नित्यार्थं तदाश्रयणमित्यन्ये। यदि तु प्रगृह्यमित्यस्य म-
स्थानिविशेषणत्वं स्वीकृत्य प्रगृह्यस्योञः ऊँ इत्ययमादेश इति व्याख्यायते तदा दीर्घानुनासिकोऽपि वत्प्रगृह्यश्चेत्युक्तिरपि स्वरूपकथनमेवेति बोध्यं। ऊँ इत्यत्र यदि शाक-
ल्यस्येति नापेक्ष्यते तदा प्रगृह्यस्योञो नित्यमादेशः स्यात् तत्र च विति ऊँ इत्येते द्वे रूपे स्यातां। तस्माच्छाकल्यग्रहणानुवृत्त्या आदेशविकल्पे सिद्धे त्रीणि रूपाणि सिध्यन्तीति।
कैयटस्तदाह अयमादेशो वा स्यादिति। वस्यासिद्धत्वादिति। अत एव इदं वत्वं त्रिपाद्यां विधीयते प्रकृतिभावमात्रबाधनार्थत्वे हि इको यणीत्यनन्तरं मय उञो वेत्येवावक्ष्य-
त यणं चानुवर्त्तयिष्यत्॥ ईदूतौ च॥ ईदूताविति किं॥ श्रियः सूर्यप्रियो अग्नाभवाति। अग्निशब्दात्परस्याः सप्तम्याः सुपां सुलुगित्यादिना डा   देशः। पदकारैः प्रगृह्ये
त्वेऽपि इति शब्दप्रयोगस्यावश्यमित्तत्वेन इहापि पदकाले इति शब्दप्रयोगप्रसंगः स चानिष्ट इति बोध्यं। सप्तमीग्रहणं किं। धीती॥ मती। सुष्टुती। धीत्या मत्या सुष्टुत्या इति

प्रमितनी चैकवचनस्य पूर्वसवर्णे ईकारः । ततोऽकः सवर्णे दीर्घ इत्येकादेशः । न त्विह सुपां सुलुगिति लुक् । ह्रस्वप्रसक्तापत्तेः । सोमो गौरी इति । वा न प्रमी अत्र पर्यं । आस
त इत्याद्युदाहरणेष्वप्युकारान्तस्य लौकिकोदाहरणाभावात् । उभयोरप्यवैदिकत्वेनोदाहरणमुक्तं । मामकी तनू इति । यद्यप्यत्र संहितायां प्रगृह्यत्वप्रयोजनं नास्ति
तथापि मामकी इति तनू इतौ । इतिपरकाले तत्र इत्येव । स्वाध्याये ननु क्वत्वेनाध्यमानामित्यत्र संहिताकालेऽप्यस्ति तथापि इकारस्य कृ इति पाक्षिक प्रकृतिभावेन । प्यत्नसिद्धं
त्वं समितिरूपं न रसाधारयितुमशक्यत्वादिति बोध्यं । सुप्तस्म्यालुगिति । यदि धीसादावि विभक्तेः पूर्वसवर्णे कृते सवर्णदीर्घ एकादेश इति व्याख्यायते तदा एका
देशस्य बाधित्वात् लाक्षणिकत्वाच्च आनन्तर्यादित्यादेः समर्थस्यादिति भावः । अर्थग्रहणं किमिति । वाप्यश्व इत्यादावपि सप्तम्यर्थोऽस्त्येवेति नार्थोऽर्थग्रहणेनेति प्रश्नः
अर्थान्तरोपसंक्रान्त इति । वाप्यश्व इत्यत्र यो वापीशब्दः स तु वाप्यधिकरणकद्रव्ये उपसंक्रान्तः । सोमो गौरी इत्यत्र गौरीशब्दस्तु सप्तम्यर्थमात्रे पर्यवसन्नः न तु तद
धिकरणकद्रव्ये [illegible] वा इति भेदः । [illegible] । अणोऽप्रगृह्यस्य । अण इति किं । कर्तृहर्त्रौ अत्र संधिरिति । कृत्वं श्चुत्वं चात्र न कृतं स्पष्टप्रतिपत्त्यर्थं । अत एवानुस्वा

अणोऽप्रगृह्यस्यानुनासिकः । ८।४।५७ । अप्रगृह्यस्याणोऽवसानेऽनुनासिको वा स्यात् । दधिँ । दधि । अप्रगृह्यस्य किं । अग्नी ॥ इत्यचसन्धिः ॥

स्तोः श्चुना श्चुः । ८।४।४० । सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः । हरिश्शेते । रामश्चिनोति । सच्चित् । शार्ङ्गिञ्जय । शात् ॥

। ८।४।४४ । शात्परस्य तवर्गस्य चुत्वं न स्यात् । विश्नः । प्रश्नः ॥

[illegible] इत्यादावप्युक्ता दिवादिनिर्देशोऽप्युपपन्नः । इत्यचसंधिः । स्तोः श्चुना श्चुः । स्तोरिति समाहारद्वंद्वः
सौत्रं पुंस्त्वं । एवं श्चुः इत्यपि बोध्यं । श्चुनेति । सहयुक्तेति सूत्रे विना । [illegible] योगे तृतीयेति वक्ष्यमाणत्वान्नियमा । योग इति । एतदध्याहारलभ्यं । अत्र स्थान्यादेशयोर्यथा
संख्यं । निमित्तकार्यिणोर्न । शादिति त्वपकात् । यथासंख्यसूत्रमिह नोपन्यस्तं स्थानेऽन्तरतमः इत्यनेनापि इष्टसिद्धेः तस्यानावश्यकत्वात् । हरिश्शेते इति । वाशरीति पा
क्षिकत्वाद्विसर्जनीयस्य सत्वस्य शेन योगे शः । [illegible] योगे [illegible] मश्चिनोति । तवर्गस्य तु चवर्गयोगे सच्चिदित्यादि । शेन योगे तु न च शिव इत्याद्युदाहरिष्यति ॥ शात् । नेति ।
तोरिति चानुवर्तते तदाह तवर्गस्येत्यादि । जश्त्वमित्यादि ग्रास्यात् निर्देशो [illegible] न बोधनाय यथा अत्र श्चुत्वं जश्त्वं च न कृतं तथा श्चुत्वमपि न कृतमिति परि
हारः समवाहर्गस्य मे [illegible] उदाहरति । विश्नः प्रश्न इति ॥ विच्छ गतौ प्रच्छ ज्ञीप्सायां यजयाचेत्यादिना नङ् । च्छ्वोः शूडिति छस्य शत्वं । नङो ङित्त्वाद्गुणाभावः । प्रच्छग्रह

सु·
सि·कौ·
टी·त·
२३

श्चेचासन्नेति निर्देशात्संप्रसारणाभावः। नन्वेवं ङञणनमानां नासिकास्थानाधिक्याद्वर्गीयाद्यैश्चतुर्भिः सह तुल्यस्थानत्वाभावेन सावर्ण्याभावात्तेषां सुनेति तुशब्देन
नकारो न गृह्यते किं तु स्ववर्गाद्याश्चत्वार एवेति विश्रान्त प्रश्न इत्यत्र श्चुत्वाप्रसक्तेः किमनेन निषेधेनेति चेदत्राहुः। शादिति निषेधाल्लिंगादेव तुल्यास्यप्रयत्नमित्
यस्य ग्रहणेन नासिकास्थानभिन्नताल्वादिस्थानं गृह्यते। न तु स्थानं तुल्यमेवेति तुशब्देन पंचमस्यापि ग्रहणात् श्चुत्वप्रसक्तौ निषेधोऽयमावश्यकः। एवं च तोर्लीति तु
शब्देन नकारस्यापि ग्रहणात् हिर्हो लिप्तिरित्यादि सिध्यति। न च निमित्तकार्यिणोर्यथासंख्यनिरासं ज्ञापकमित्युक्तत्वात् अनेनैव चार्थवत्त्वे कथमन्यार्थं ज्ञापकं भवेदिति
वाच्यं तुशब्देन नकारग्रहणे सिद्धे हि यथासंख्यनिवृत्तिरनेन ज्ञापनीये उभयज्ञापने बाधकाभावात्। तु भावे तु स्यादस्य मित्यत्र यत्किंचित्स्थानतुल्यत्वविवक्षायां
दीर्घेषु पंचापि वर्णाः परस्परं सवर्णा भवेयुरित्युक्तोदाहरणे श्चुत्वप्रसक्तौ शादित्यारंभ आवश्यक इत्येनं न ज्ञापकाश्रयणं किमर्थमिति वाच्यं। तथा हि सति ञ
मङणनानां परस्परसावर्ण्यापत्त्या त्वं न यसीत्यादौ अनुस्वारस्यापि परसवर्णः वा पदान्तस्येत्यनुस्वारस्य ञादयोऽपि स्युः। ताल्वादिस्थानसाम्याभावेऽपि नासिकारूप
स्य यत्किंचित्स्थानस्य तुल्यत्वात्। नापि तुल्यास्यसूत्रमन्यूनास्यत्वमिति व्याख्यायां ञादीनां परस्परसावर्ण्यं न भवेत्तेषां नासिकास्थानसाम्येऽपि ताल्वादिस्थानसाम्या
भावेन न्यूनस्थानकत्वात् ततश्च त्वं न यसीत्यादिषु नातिप्रसंगः। स्ववर्गाद्यैः सह तु ञादीनां सावर्ण्यं स्यादेव। नासिकास्थानाधिक्येऽपि तदन्यूनस्थानकत्वात्तेषामिति।
विद्वाँल्लिखतीत्यादि सिध्यति वर्गाद्यानां तु नासिकास्थानाभावेन न्यूनस्थानकत्वान्न च मेन सावर्ण्याभावेऽपि न क्षतिरिति ज्ञापकाश्रयणं विनैवेष्टसिद्धिरिति वाच्यं।
हलोऽरि ए हीं ... सवर्णे दीर्घापत्तेरिको सवर्ण इति शाकल्यप्रकृतिभावानापत्तेश्च। ऋकारान्न्यूनस्थानकत्वेन तत्सवर्णकत्वादृकारस्य। स्वराणामूष्मणां चैव विवृतं क
रणं स्मृतं। तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव चेति वचनात्प्रयत्नभेदेन सावर्ण्याभावमभ्युपगम्याकानिष्टवारणेऽपि तद्दस्तुत ह्रस्वमित्यत्र तोर्लीति परसवर्णवि
धिना ऋकारस्य वकारापत्तेः। वकारस्य ओष्ठस्थानाधिक्येऽपि दंतस्थानसाम्येन लकारान्न्यूनस्थानकत्वात्। यदि तु वकारस्य दंतोष्ठमिति समाहारनिर्देशात् ओष्ठस्थान
दंतस्थानभिन्नमेव दंतोष्ठस्थानमिति वकारस्य लकारसावर्ण्याभावात् तद्दस्त्वित्यादौ नातिप्रसंग इति ब्रूषे तर्हि लुग्वा दुहेत्यादिना दंत्येतङि विधीयमानो यः कस
स्य लुकि अदु ह्वहीत्यत्र न स्यात्। किंतु अदुग्धेत्यादावेव स्यात्। तथापि पूर्तेः पिपुरतीत्यादौ विधीयमानमुदोष्ठ्यपूर्वस्येत्युत्वं सुस्पूर्षतीत्यादौ न स्याद्दुक्करीत्या

२३

चात्तथानुरोधेन स्पर्शभिन्नेषु अनुनासिकविधिर्न प्रवर्तते। अनभिधानादिति वा यो ज्यां रेफेन प्रवर्तत इति। यद्यपि व्यक्तिः पदार्थ इति पक्षे लक्ष्यभेदे लक्षणभेदात्। अस्मा
व्यक्तौ लक्षणस्याचरितार्थत्वाद्रेफेऽपि प्रवृत्तिर्दुर्वारैव तथापि लक्ष्यानुरोधेन जातिपक्षमाश्रित्येदमुक्तं दकारनिपातनादिति। ननु यवादिगणे ककुदित्येव पठ्य
तेन तु ककुद इति मतुब्विशिष्टं तथा च यरोनुनासिक इति वा रः। नु च यरोनुनासिकप्रवृत्तौ यवादित्वाभावेन मतुप इति मतुपो मकारस्य वत्वाप्रसक्त्या यवादिगणे
ककुदिति पाठो निरर्थकः स्यादिति वाच्यम्। अनुनासिकविधेरसिद्धत्वेन यवंतत्वानपायाद्गणे तत्पाठस्य सार्थक्यादिति चेदत्राहुः। यद्यत्र ककुद्दकारस्य न।

उदः स्थास्तम्भोः पूर्वस्य। ८।४।६१। उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात्। आदेः परस्य। उत्थानं। उत्तम्भनं। अत्र अघोषस्य महाप्राणस्य स
स्थाने तादृश एव थकारः। तस्य झरो झरि सवर्णे इति पाक्षिको लोपः। लोपाभावपक्षे तु थकारस्यैव श्रवणं न तु खरि चेति चर्त्वं सन्ध्यति थकारस्य असिद्धत्वात्।
उत्थानं। उत्तम्भनम्। झयो होऽन्यतरस्याम्। ८।४।६२। झयः परस्य हस्य पूर्वसवर्णो वा स्यात्। घोषवतो नादवतो महाप्राणस्य संवृतकण्ठस्य हस्य
तादृशो वर्गचतुर्थः। वाग्घरिः। वाग्हरिः॥ शश्छोऽटि। ८।४।६३। झयः परस्य शस्य छो वा स्याटि। दस्य चुत्वेन जकारे कृते खरि च। ८।४।५५।
[illegible] इति जकारस्य चकारः। तच्छिवः। तच्शिवः। छत्वममीति वाच्यम्। तच्छ्लोकेन। तच्श्लोकेन। अमि किम्। वाक्श्च्योतति। मोऽनुस्वा
रः। ८।३।२३। मान्तस्य पदस्यानुस्वारः स्याद्धलि। अलोऽन्त्यस्य। हरिं वन्दे। पदस्येति किम्। गम्यते। नश्चापदान्तस्य झलि। ८।३।२४। नस्य मस्य चापदान्त
स्य झल्यनुस्वारः। यशांसि। आक्रंस्यते। झलि किम्। मन्यसे। अनुस्वारस्य ययि परसवर्णः। ८।४।५८। स्पष्टम्। अङ्कितः। अञ्चितः। कुण्ठितः। शान्तः। गु
म्फितः। कुर्वन्ति। अत्र णत्वे प्राप्ते तस्यासिद्धत्वादनुस्वारे परसवर्णे तस्यासिद्धत्वान्न णत्वम्॥ ९। कार इष्टः स्यात्तर्हि गणे ककुन्नित्येव पठेन्न तु ककुदिति। म
तुप्प्रकृतिभूतककुद्शब्दस्य नान्तत्वनिपातनेऽपि अन्यत्र दकारान्तप्रयोगस्य निर्बाधत्वात्तस्माद्यरोनुनासिकोऽत्र न प्रवर्तत इति। अन्ये त्वाहुः। यच्चिभं तसौ मत्वर्थ इति
संहितयापाठे तसावितिनः पूर्वं दकारं प्रश्लिष्य भत्वेनाप्येतत्समाधातुं शक्यं। तसाविति द्विर्वचननिर्देशस्तु दतयोः समाहारद्वन्द्वं कृत्वा इतरेतरयोगद्वन्द्वे कृते सम्प
द्यत इति। झः॥ उदः स्था॥ अनुस्वारस्य ययीत्यत्र समस्तमपि सवर्णग्रहणमिह निष्कृष्य सम्बध्यते। एकदेशे स्वरितत्वप्रतिज्ञानादित्यभिप्रेत्याह। पूर्वस

वर्णः स्यादिति॥ शश्छोटि। इह पदांतादित्यनुवर्त्य पदांतात् झय इत्याख्यानेन तन्मध्यश्चोतंत्यमितो विरपशं। विमूर्वाद्दपेरौ [illegible] इकः शः छत्वममीति। शश्छोटीति सूत्रं शश्छो
मीति पठनीयमित्यर्थः। तच्छ्लोकेनेति। तच्छ्लोकेन [illegible] तव्य। मोनु। हलि सर्वेषामित्यतो हलीत्यनुवर्तते पदस्येति च तदाह मांतस्येत्यादि। हलि किं। त्वमत्र।
किमत्र। नश्चापदांतस्य। अपदांतस्य किं। राजन्पाहि। आक्रंस्यत इति। आङ् उङ् क्रमु इति नङ्। स्नुक्रमोरिति नेट्। अनुस्वारस्य। अत्र ययीति स्पष्टार्थं अचि परे अ
नुस्वाराभावात्। शलि तु परसवर्णो नुस्वारांतरतमो नास्ति। वक्ष्यति कुंडं रथेनेत्यत्र वरं शानमित्यादावपि परसवर्णविध्यप्रवृत्तेः। अत्र वदंति। ईषद्विवृतमूष्मणां विवृ
तं स्वराणामिति भाष्यमते ययीत्यस्यापार्थकत्वं। सूत्रकारमते तु तदावश्यकमेवान्यथा दंशनमित्यादावनुस्वारांतरतमः परसवर्णोनुनासिक ईकारः स्यात्। ईकार
शकारयोः [illegible] वर्ण्यस्य सत्वात्। तथा कुंडं शेते इत्यादावनुस्वारस्य नापदांतस्येति स्यादिति। अंकित इति अंक पदे लक्षणे चेति चुरादिर्ण्यंतात्क्तः। निष्ठायां

वा पदान्तस्य ८।४।५९। पदान्तस्यानुस्वारस्य ययि परे परसवर्णो वा स्यात्। त्वङ्करोषि त्वं करोषि। सय्यन्ता संयन्ता। सम्वत्सरः संवत्सरः। यल्लो
कम् यं लोकम्। अत्रानुस्वारस्य परसवर्णे अनुनासिका यवलाः। मो राजि समः क्वौ ८।३।२५। क्विबन्ते राजतौ परे समो मस्य म एव स्यात्। सम्राट्। हे मपरे
वा ८।३।२६। मपरे हकारे मस्य म एव वा स्यात्। ह्मल संचलने। किम्ह्मलयति। किं ह्मलयति। यवलपरे यवला वेति वक्तव्यम्। यथासंख्यमनुदे
शः समानाम् १।३।१०। समसम्बन्धी विधिर्यथासंख्यं स्यात्। किं ह्यः। किय्ँ ह्यः। किं ह्वलयति। किव्ँ ह्वलयति। किं ह्लादयति। किल्ँ ह्लादयति॥

मेटीति। लोपः परसवर्णेन ङः। अकिल इति इत्यस्माद्धातोः क्तः। नमानुस्वारे परसवर्णेन ङः। अंचित इति। अंचेः पूजायामिति निष्ठायां [illegible]
कुंठित इति। कुठि प्रतिघाते क्तः नुमोनुस्वारे परसवर्णेन णः। शांत इति। शमु उपशमे क्तः॥ [illegible]॥ वा दांतशांतेति निपातनादिडभावः। अनुनासिकस्य क्विझलोरिति दीर्घः।
मस्य अनुस्वारे परसवर्णेन नकारः। गुंफित इति। गुंफ ग्रंथे क्तः। मस्यानुस्वारे परसवर्णेन मः। मो राजि समः क्वौ। राजीति किं। संयत्। समः इति किं। [illegible] इति किं। स
राजितं संराजितव्यं। मकारस्य मकारवचनमनुस्वारनिवृत्त्यर्थं तदाह। म एव स्यादिति। सम्राडिति। राजृ दीप्तौ। संपूर्वादस्मात् सत्सूद्विषेत्यादिना क्विप्। व्रश्चादिना
षत्वं। जश्त्वचर्त्वे। हे मपरे वा। मपर इति तद्गुणसंविज्ञानो बहुव्रीहिः। यवलेति। यवलाः परा यस्मात् स यवलपरस्तस्मिन् हकारे परे मस्य यवला भवंतीत्यर्थः। [illegible] यथासंख्यमनुदेशः। अनुदि
श्यत इति अनुदेशः पश्चादुच्चार्यत इत्यर्थः। समानामिति संबंधे षष्ठी तदाह। समसंबंधी विधिरिति। समकर्मकं विधानमिति तु नो [illegible]

सुसमानां विधानं पाद्यादिषु पिवादीनां प्रियस्थिरादिषु च प्रस्थादीनां तत्रैव यथाक्रमं प्रवृत्तिः स्यात्। दृश्यते तु अनुवाद्ययोरपि यथासंख्यत्वं। समूलाकृतजीवेषु हन्कृञ्ग्रहः इत्यत्र यथा। समानामिति किं। लसलोऽस्यं भूतेऽन्यत्र लसणादयश्चत्वारोऽर्थाः प्रत्यादयस्तु त्रयः तत्र सर्वेषां सर्वत्र कर्मप्रवचनीयसंज्ञा यथा स्यात्। ॥ नपरे। अयमपि नहुव्रीहिरवा हेदृनितु अनुवर्तते नदाहा। नपरे हकारे इति। ङ्णोः ॥ चयो द्वितीया इति। एतच्च नादिन्याक्रोशे इति सूत्रे भाष्ये स्थितं। अत एव मनोरमायां ङःसीति सूत्रे तु डित्युच्यमाने चयो द्वितीया इति पक्षे थकारापत्तिरुक्ता। यदि तु ङ्णोरिति सूत्रस्थ स्यात् तर्हि डुडित्येव सुवचं स्यात्। तुटोऽसिद्धत्वेन चयो द्वितीया इत्यस्या प्रवृत्तेः पौष्करसादेरिति। पुष्करतीर्थविशेषे सीदतीति पुष्करसित्। तस्यापत्यं पौष्करसादिराचार्यः बाह्वादित्वादिञ् अनुशतिकादित्वादुभयपदवृद्धिः। ङःसि धुट्। उभयनिर्देशोऽयं पंचमीनिर्देशो बलीयान् परत्वादित्यभिप्रेत्याह। सस्येति। सीति सप्तमीनिर्देशस्तु लाघवार्थः। षट्सन्त इति। धुट्श्चर्त्वेन तकारः चयो द्वितीया इति तस्य थो न च तस्यासि

नपरे नः। ८। ३। २७। नपरे हकारे मस्य न स्याद्वा। किंह्नुते। किं न्हुते। ङ्णोः कुक्टुक् शरि। ८। ३। २८। ङकारणकारयोः कुक्टुकावागमौ वा स्तः शरि कुक्टुकोरसिद्धत्वाज्जश्त्वं न। चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्॥ प्राङ्क्षष्ठः प्राङ्ख्षष्ठः प्राङ्षष्ठः। सुगण्ट्षष्ठः। सुगण्ठ्षष्ठः सुगण्षष्ठः। ङःसि धुट्। ८। ३। २९। ङात्परस्य सस्य धुड्वा स्यात्। षट्सन्तः। षट्त्सन्तः। नश्च। ८। ३। ३०। नकारान्तात्सस्य धुड्वा। सन्त्सः। सन्सः। शि तुक्। ८। ३। ३१। नस्य पदान्तस्य शे परे तुग्वा स्यात्। शश्छोऽटीति छत्वविकल्पः। पक्षे झरो झरि इति चलोपः। सञ्च्छम्भुः। सञ्च्शम्भुः। सञ्शम्भुः। सञ्छम्भुः। ञछौ ञचछाः ञचशा ञशाविति चतुष्टयम्। रूपाणामिह तुक्छत्वचलोपानां विकल्पनात्॥

द्धत्वात्। अत एव धुडभावे षट्सन्त इत्यत्र टस्य ठो संभवति। नचैवमपि ङःसीति धुगिति धुग्विधीयतां डकारस्य सकारे परे धुगिति व्याख्यानसंभवात्। किमनेन धुटः परादित्वाऽभ्युपगमेन मैवं। पूर्वान्तत्वे तु नपदान्ताट्टोरनामिति निषेधाप्रवृत्त्या धकारस्य ष्टुत्वप्रसंगात्। अत एव वक्ष्यमाणे लुगिहैव न कृतः डस्य तु किं ष्टुत्वे तस्यासिद्धत्वेन चयो द्वितीया इत्यस्याप्यप्रसंगाच्च। इह धुड्विकल्पेन रूपद्वयं सन्निट्कारतकारविसर्गाणां द्वित्वविकल्पात् कोऽपि रूपाणि। स्वयः शार इति द्वित्वे हात्रिंशत्। शरोऽचीति निषेधोऽत्र न प्रवर्तते। तस्य सौत्रद्वित्वमात्रविषयत्वस्योक्तत्वात्। न च चर्त्वस्यासिद्धत्वात् खयः परत्वमेव नास्तीति शंक्यं। पूर्वत्रासिद्धीयमद्वित्व इत्युक्तेः। शि तुक्। शीति सप्तमी पूर्वत्र कृतार्थायाः न इति पंचम्याः

काराद्देवरूपकरणलाभात्। तुशब्दस्तु अधिकारपक्षे परस्मात्कार्यिणः पूर्वकार्यस्यावशेषद्योतनार्थः। परस्य नित्यं रुत्वं पूर्वस्य तु वाऽनुनासिक इति विधिपक्षे व्यर्थः। वा
ग्रहणं स्पष्टार्थं। अनुनासिकात्पर इति ज्ञापकादेव सिद्धेः। नहि विकल्पं विना अनुनासिकं विहायेत्यनुनासिकाभावपक्षः संभवति। इदमेवाभिप्रेत्य वृत्तौ तु वेति
शब्दावनुक्तौ। रोः पूर्वस्यानुनासिकः स्यात् इत्येवोक्तौ। रोः पूर्वस्येति। उपलक्षणमेतल्लोपस्यापि अत्र रूपकरणेयोर्विधिस्ततः पूर्वस्येति निष्कृष्टोर्थः। एवं रोः पूर्वस्मात्प
रइत्यस्यापि प्रकरणयोर्विधिस्ततः पूर्वस्मात्पर इत्यर्थो बोध्यः। अनुनासिकात्परोनुस्वार इत्यत्र त्वनुनासिकात्पर इत्येव विधिस्तदर्थं वा पक्षं विहायेति। अनुनासिकाभावपक्ष इत्यर्थः। पूर्वस्य
तिप्रकृतस्य तु विभक्तिविपरिणामेन पंचम्यंततेत्यभिप्रेत्याह। रोः पूर्वस्मादिति। संसर्गवद्विभागस्यापि विशेषावगतिहेतुत्वादवसायेनेत्थं नानीयतामित्यत्रे वसं

विसर्जनीयस्य सः। ८। ३। ३४। खरि विसर्जनीयस्य सः स्यात्। एतदपवादेन वा शरीति पाक्षिके विसर्गे प्राप्ते। सम्पुङ्कानां सो वक्तव्यः। संस्कर्ता।
संस्कर्ता। समो वा लोपमेके इति भाष्यं। लोपस्यापि प्रकरणस्थत्वादनुस्वारानुनासिकाभ्यामेकसकारं रूपद्वयं द्विसकारं तूक्तमेवात्र
त्रानचि चेति सकारस्य द्वित्वपक्षे त्रिसकारमपि रूपद्वयम्। अनुस्वारविसर्गजिह्वामूलीयोपध्मानीययमानामकारोपरि शर्षु च पाठस्योपसंख्या
तत्वेनानुस्वारस्याप्युच्त्वात्। अनुनासिकवर्णात्रयाणां शरः खय इति कद्वित्वेषट्। अनुस्वारवतामनुस्वारस्यापि द्वित्वे द्वादश। एषामष्टार
णान्तां ककारस्य द्वित्वे वचनान्तरेण पुनर्द्वित्वे तु एकं तद्द्वितत्रितमिति चतुष्पञ्चाशत्। अणोऽनुनासिकत्वे ऽष्टोत्तरशतम्॥ ॥

भावित्वानुनासिकत्वगुणेन वोपस्थितत्वादाकांक्षितत्वाच्चावधित्वेन संबध्यते इत्यभिप्रेत्याह। रोः पूर्वस्मादिति तुमनोरमायामवतारितं। तत्तु पूर्वस्येत्यनुवर्त्य
नेविभक्तिविपरिणामं चानपेक्ष्य लौकिकन्यायेनैवेष्टं सिध्यतीत्याशयेनोक्तमित्याहुः। अनुस्वारागम इति। आगमत्वं च परशब्देनैव लभ्यते। यथा पूर्वेनुनाभ्या
मेजित्यत्र पूर्वशब्देनैव चोरागमत्वमिति भावः॥ ॥ विसर्जनीयः। खरीति। एतच्च खरवसानयोरिति सूत्रान्मंडूकप्लुत्यानुवर्तते। संस्कर्तेति। संपरिभ्यामिति
करोतेः सुट्। ननु अनुस्वारस्यानच्त्वात्ततः परस्य द्वित्वं न स्यादेवेति अनुस्वारपक्षे त्रिसकारकं रूपं कथं स्यादित्याशंक्याह। अनुस्वारविसर्गेत्यादि। अकारोपरीति। यद्य
पि कारोपरि पठ्य इत्युक्तं तर्हि विषयः सुयशः सु इत्यादौ इणः परस्येति षत्वं स्यादिति भावः। अच्त्वादिति। नचैवं हरिः कर्ता। हरिंस्मरेत्। रामः पातीत्यादौ यणादिप्रसंगः।

त्रिपादीस्थत्वेन विसर्गादीनामसिद्धत्वात्। अनुस्वारस्यापि सिद्धत्व इति। अपिशब्दात्कारस्य। वचनान्तरेणेति। अचो रहाभ्यामिति कृतेपि यलोमय इति भवत्येवेति
भावः॥ पुमः खय्यि। पुमः संयोगान्तलोपः वशिष्टभागस्येदमनुकरणं। अम्पर इति बहुव्रीहिः। पर्युदासादिति। इदुदुपधस्येति षत्वविधायके सूत्रे इति भावः।
ख्यात्रादेशे नेति। चक्षिङः ख्याञ् इत्यत्र ख्शादिरयमादेशः। असिद्धकाण्डस्थत्वात् अनन्तरं शास्त्रयोर्बोधीति स्थितमिति वक्ष्यते। एवं च यत्वस्यासिद्धतया अम्परत्वा
भावात् पुमः खय्यीति रुत्वं न स्यादित्यर्थः। पुरुख्यानमिति। चक्षिङो ल्युट् चेति ल्युटि ख्यात्रादेशः। ननु आदेशे रह दुर्लभः। वर्जने प्रतिषेधः असनयोश्चेति वार्तिकादि
ति चेत्सत्यं। बहुलतरे यं स्नवधकगात्रविचक्षणाजिराद्यर्थमिति वार्तिके बहुलग्रहणात्समाधेयं। विस्तरस्त्विह मनोरमायामनुसंधेयः। त्रायस्वेति ते इ

पुमः खय्यम्परे। ८।३।६। अम्परे खयि पुम उन्दस्य रुः स्यात्। व्युत्पत्तिपक्षे प्रत्ययस्येति षत्वपर्युदासान्नह्कःपयोः प्राप्तौ। अव्युत्पत्तिपक्षे तु
षत्वप्राप्तौ। संपुकानामिति सः। पुंस्कोकिलः। पुंस्कोकिलः। पुंस्पुत्रः। पुंस्पुत्रः। अम्परे किं। पुंक्षीरं। खयि किं। पुंदासः। ख्यात्रादेशे न। पुंख्यानं। नश्छ
व्यप्रशान्। ८।३।७। अम्परे छवि नकारान्तस्य पदस्य रुः स्यात्। न तु प्रशान्शब्दस्य। विसर्गः सत्व श्चुत्वं। शार्ङ्गिंश्छिन्धि। शार्ङ्गिँश्छिन्धि। चक्रिं
स्त्रायस्व। चक्रिंस्त्रायस्व। पदस्य किं। हन्ति। अम्परे किं। सन्त्सरुः। खड्गमुष्टिः। अप्रशान् किं। प्रशान्तनोति। नॄन्पे। ८।३।१०। नॄनित्यस्य रुः स्या
द्वा पकारे परे। कुप्वोः ≍क≍पौ च। ८।३।३७। कवर्गे पवर्गे च परे विसर्जनीयस्य क्रमाज्जिह्वामूलीयोपध्मानीयौ स्तः। चाद्विसर्गः। येन नाप्रा
प्तिन्यायेन विसर्जनीयस्य सः इत्यस्यापवादोयं। नतु शर्परे विसर्जनीयः इत्यस्य। तेन वासः क्षौममित्यादौ विसर्ग एव। नॄँ≍पाहि। नॄं≍पाहि।

पालने। लोटि शप्या पादेशः। प्रशान्तिति। प्रपूर्वात् शाम्यतेः क्विप्। अनुनासिकस्येति दीर्घः। मो नो धातोरिति नः॥ ॥९९ नॄँ≍पाहि। नॄं≍पाहि। नॄन्पाहि।
स्यासिद्धत्वान्नलोपो न। नॄन्पे। पकारो परि अकार उच्चारणार्थः। तेन नॄं≍प्नातीत्यादि सिद्धं। उभयथर्क्ष्विन्यत उभयथेति अनुवृत्तेर्विकल्पः फलितः इत्याशुद्दे
येनाहारुःस्याद्धेति। कुप्वोः ≍क≍पौ। अत्र कुप्वोरिति रेफस्य विसर्गः। जिह्वामूलीयस्य खत्वात्। खर्परे शरीति विसर्गस्यास्य लोपः। जिह्वामूलीयस्यान्तःस्थे
वा शरीति विसर्ग एव वा। आदेशयोः कपावुच्चारणार्थौ। चाद्विसर्ग इति। प्राचा तु चाद्विकल्प इत्युक्तं तेरसत्। ≍कःपाभ्यां मुक्ते विसर्जनीयस्य सत्व प्र

कानाम्रेडिते। कान्कानीति वाच्ये आम्रेडितग्रहणं यत्र द्विरुक्तिस्तत्रैव यथा स्यात्। इह मा भूत्। कान्कान्पश्यसीति। अत्र एकः किंशब्दः प्रश्ने। द्वितीयः क्षेपे। कुत्सितान्पश्यसीत्यर्थः। वार्तिके कान्ग्रहणाभावेपि सत्वं सिध्यतीत्याशयेनाह। यद्वेति। संपुमोस्तु वार्तिके नैव सत्वं। कस्कादिषु संस्कर्ता। संस्करिष्यति। पुंस्कोकिलः। पुंस्कामः इत्यादिबहूनां पाठे गौरवात्। कस्कादिषु संपुंकानानिति पठित्वा सर्वमपि वार्तिकं सत्यक्तुं शक्यं। पुंस्कोकिल इत्यादावित्वे परत्वेन विसर्गस्य षत्वप्रसंगाच्च। किंतु कान्ग्रहणमिव समग्रहणं वार्तिके त्यक्तुं शक्यमित्यन्ये। कस्कादिषु च। अत्र सोपदादाविति नतः सः इति इणः षः इति सूत्रं चानुवर्तते तदाह। इणः षः इत्युत्तरस्य त्यादिकौ नस्कुनः इति। कुतः कुत आगत इत्यर्थे अव्ययात्त्यप् इति गणपाठसामर्थ्यात् अणित्याहुः। अव्ययानां भमात्रे टिलोप इति वक्ष्यमाणेन

कानाम्रेडिते। ८।३।१२। कान्नकारस्य सः स्यादाम्रेडिते परे। संपुङ्कानामिति सः। यद्वा। कस्कादिषु च। ८।३।४८। एष्विण उत्तरस्य विसर्गस्य षः स्यात्, अन्यत्र तु सः। कःकपयोरपवाद इति सः। कांस्कान् कांस्कान्। कस्कः। कौतस्कुतः। सर्पिष्कुण्डिका। धनुष्कपालं। आकृतिगणोयं॥ संहितायां। ६।१।७२। इत्यधिकृत्य। छे च। ६।१।७३। ह्रस्वस्य छे परे तुगागमः स्यात्संहितायाम्। चुत्वस्यासिद्धत्वाज्जश्त्वेन दः। ततश्चर्त्वस्यासिद्धत्वात्पूर्वं श्चुत्वेन जः। तस्य चर्त्वेन चः। चुत्वस्यासिद्धत्वाच्चोः कुरिति कुत्वं न। शिवच्छाया। स्वच्छाया। आङ्माङोश्च। ६।१।७४। एतयोश्छे परे तुक् स्यात्। पदान्ताद्वेति विकल्पापवादः। आच्छादयति। माच्छिदत्। दीर्घात्। ६।१।७५। दीर्घे छे परे तुक् स्यात्। दीर्घस्यायं तुक् न तु छस्य। सेनासुराछायेति ज्ञापकात्। चेच्छिद्यते। पदान्ताद्वा। ६।१।७६। दीर्घात्पदान्ताच्छे परे तुग्वा। लक्ष्मीच्छाया। लक्ष्मीछाया।

त्रिटिलोपः। सर्पिष्कुण्डिकेति। नित्यं समासे इत्येव सिद्धे इह पाठस्य प्रयोजनम् असमासे व्यपेक्षाविरहेपि षत्वार्थं इत्यादि वक्ष्यति। संहितायामित्यधिकृत्येति। एतच्च इको यणचीत्यत्रैव वक्तव्यमपि सूत्रक्रमानुरोधेनात्रोक्तं। छे च। छकारोपरि अकार उच्चारणार्थः। विदिभिदिच्छिदेरिति निर्देशात् नविच्छिन्नमित्यादि सिद्धं। ह्रस्वस्येति। एतच्च ह्रस्वस्य पिति कृतीत्यतोनुवर्तते। तुक् च। सेनासुरेति। यदि हि छस्य तुक् स्यात्तर्हि छस्य चर्त्वे सति च द्वयं स्यात्। असन्निपातपरिभाषया चर्त्वाप्रवृत्तौ तु छकारोपरि चकारः श्रूयेतेति भावः॥ पदान्ताद्वा। प्रकृतेन दीर्घेण पदविशेषणात्तदन्तविधिलाभेनेष्टसिद्धौ वक्तव्यं न ग्रह

ऽपदांतस्यैव तु ग्रयथा स्यान्न दस्यमाभूदित्येतदर्थं। अन्यथा पदविधित्वात्समर्थपरिभाषोपस्थितौ समर्थेषु लक्ष्मीच्छायादिष्वेव स्यान्तिषु तु कुमारी छ
त्रहर इत्यत्र न स्यादसामर्थ्यादेवं न पदांताट्टोरिति सूत्रे पदांताट्टोरिति वक्तव्येंतग्रहणं दुष्टाः षट् संतं ह्र यद्यत्रापि ष्टुत्वनिषेधार्थमित्याहुः॥
इति हल्संधिः॥ ॥ ॥ विष्णुस्त्रातेति। प्रातिपदिकात्स्वौजसमौडिति सुप्रत्यये तस्य रुत्वे खरवसानयोरिति विसर्गे च कृते विसर्जनीयस्येति सः
अस्य च रुत्वं नाशंक्यं। रुत्वं प्रति विसर्जनीयसत्वस्यासिद्धत्वात्। शर्परे विसर्जनीयः। शर्परे इति बहुव्रीहिरनुवर्तमानश्च खरः अन्यपदार्थः। सत्वादेरयम
पवादः। यदि तु शर्परे इत्येव च्येत। तर्हि प्रकृते सत्वनिषिद्धेपि कुप्वोः ≍क≍पौ स्यातां॥ वासः क्षौमममद्भिः प्सातमित्यादौ विसर्जनीयवचनात्तु विकारमात्रं वाध्यते रुत्वादि

विसर्जनीयस्य सः। विष्णुस्त्राता। शर्परे विसर्जनीयः। ८। ३। ३५। शर्परे खरि विसर्जनीयस्य विसर्जनीयो न त्वन्यत्। कः त्सरुः। घनाघनः क्षो
भणः। इह यथायथं सत्वजिह्वामूलीयश्च न। वा शरि। ८। ३। ३६। शरि परे विसर्जनीयस्य विसर्जनीय एव वा स्यात्। हरिः शेते। हरिश्शेते। ख
परे शरि वा विसर्गलोपो वक्तव्यः॥ रामस्थाता। रामः स्थाता। हरिस्फुरति। हरिः स्फुरति। पक्षे विसर्गसत्वे च त्रैरूप्यम्। कुप्वोः ≍क≍पौ च। ≍कः
करोति। कः करोति। ≍कः खनति। कः खनति। ≍कः पचति। कः पचति। सोपदादौ। ८। ३। ३८। विसर्जनीयस्य सः स्यादपदाद्योः कुप्वोः परयोः। पाश
कल्प कका म्येष्विति वाच्यम्॥ पयस्पाशं। यशस्कल्पम्। यशस्कम्। यशस्काम्यति। अनव्ययस्येति वाच्यम्॥ प्रातः कल्पम्। काम्ये रोरेवेति वाच्य
म्॥ नेह। गीः काम्यति॥ ११ येनाह। न त्वन्यदिति। नरेव स्फुटयति। इहेति। सोपदादौ। अपदाद्योरिति। सूत्रे व्यत्ययेन एकवचनं। यदि तु विसर्जनीयस्य सः शर्प

रे विसर्जनीय इत्यतः स्मंडूकप्लुत्यानुवर्तिते यः खरः स इहाप्यनुवर्त्य विशेष्यते अपदाद्योः खरीति यथाश्रुतं साधु। परंतु पुनर्मंडूकप्लुत्यानुवर्तने क्लेश इत्यभिभावः। अन्ये
त्वाहुः पुनर्मंडूकप्लुतिं विनाप्यनुवर्तितुं शक्यः। वा शरीत्यत्र शरा खरं विशेष्य शर्परे खरीति व्याख्याने कुप्वोरिति सूत्रे कुप्वोः खरीति व्याख्याने च [illegible]त्वभावा[illegible]य
स्पाशमिति। याप्यपाशः पाद इव रसमाप्तौ कल्पप्। अज्ञाते कुत्सिते इति कः। काम्यच्चेति काम्यच्। पाशकल्पककाम्येष्विति वृत्तिः संभवप्रदर्शनमेतत्। न तु परिगणनं [illegible]
स्यासंभवात्। प्रातः कल्पमिति। अधिकरणशक्तिप्रधानस्यापि प्रातः शब्दस्य वृत्तिविषये शक्तिमत् परत्वं। दोषाभूतमहः दिवाभूता रात्रिरितिवत्॥ गीः काम्यतीति

नचसत्वनिषेधेपीह इणः ष इति षत्वं स्या दिति वाच्यं। तत्रापि कास्यरोरेवेत्यस्यानुवृत्तेः। यदितु इणः ष इत्यत्रैवेदं पठ्येत तर्हि षत्वमात्रप्रतिषेधेपि पूर्वेण सत्वं स्यान्न।
॥ ॐ॥ इणः षः। सोपदादावित्यस्यापवादः। परः प्रष्टव्या इति। पृथालनपूरणयोः॥ ॥भ्राजभासेत्यादिना क्विपान्तं। ताज्जस। जसंत तास्फुटीकर्तुः। पुराविन्युपन्याति।
इदुदुपधस्य। इदुदिति किं। गीः करोति। पूः करोति। इह इदुतौ उपधे यस्य समुदायस्य तस्यावयवो यो विसर्ग इति वैयधिकरण्येन संबंधः। अप्रत्ययस्येति तु अप्रत्य
यो यो विसर्ग इति संबध्यते। संभवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वात्। न च विसर्गस्य प्रत्ययत्वमप्रसिद्धमिति वाच्यं। अग्निः करोतीत्यादौ स्थानिव
द्भावेन तत्प्रसिद्धेः। न चातिदेशं प्रति त्रिपाद्या असिद्धत्वं शंक्यं। अप्रत्ययस्येति निषेधेनैव सिद्धत्वज्ञापनात्। अतएव अग्निरित्यादौ रोर्विसर्गः सिध्यति। अन्यथा

इणः षः ८।३।३९। इणः परस्य विसर्गस्य षकारः स्यात्पूर्वविषये। सर्पिष्पाशं। सर्पिष्कल्पम्। सर्पिष्कं। सर्पिष्काम्यति। नमस्पुरसोर्गत्योः।
८।३।४०। गतिसंज्ञयोरनयोर्विसर्गस्य सः स्यात्कुप्वोः परयोः। नमस्करोति साक्षात्प्रभृतित्वात् कृञो योगे विभाषा गतिसंज्ञा। तदभावे नमः करोति
पुरोऽव्ययमिति नित्यं गतिसंज्ञा। पुरस्करोति। अगतित्वान्नेह। पूः। पुरौ। पुरः। प्रष्टव्याः। इदुदुपधस्य चाऽप्रत्ययस्य ८।३।४१। इकारोका
रोपधस्याऽप्रत्ययस्य विसर्गस्य षः स्यात्कुप्वोः। निष्प्रत्यूहं। आविष्कृतम्। दुष्कृतम्। अप्रत्ययस्य किं। अग्निः करोति। वायुः करोति। एकादे
शशास्त्रनिमित्तकस्य न षत्वम्। कस्कादिषु भ्रातुष्पुत्रशब्दस्य पाठात्। तेनेह न। मातुः कृपा। मुहुसः प्रतिषेधः। मुहुः कामा। तिरसोऽन्यतर
स्यां ८।३।४२। तिरसः सो वा स्यात्कुप्वोः। तिरस्कर्ता। तिरः कर्ता॥ ((((अपदान्तत्वान्नस्यान्। विसर्गविधिस्तु पुनरित्यादौ चरितार्थः। ज्ञापकं च वि
शेषापेक्षं। तेनोचैः परस्मिन्निति त्रिपाद्यां न प्रवर्त्तते। एवं च पूर्वत्रासिद्धे न स्थानिवदिति सिद्धांतः उक्तयुक्तिमूलको न तु वाचनिक इति मनोरमायां स्थितं। अत्र
वदंति अप्रत्ययस्येत्यत्र प्रत्ययस्य यो विसर्जनीयो न भवतीत्यर्थ एव आकरे स्थित इति। अप्रत्ययो यो विसर्ग इति सामानाधिकरण्येनान्वयो न युक्तः। सर्पिष्क
रोतीत्यत्र इस्ससोः सामर्थ्ये इति वैकल्पिकषत्वप्रवृत्तावपि तिष्ठतु सर्पिः पिबत्वमुदकमित्यत्र इदुदुपधस्येत्यनेन नित्यं षत्वप्रसंगात्। न चाकरमतेप्युणादीनाम
व्युत्पन्नपक्षे षत्वं न स्यादिति वाच्यं। व्युत्पन्नपक्षे दोषतादवस्थ्यात्। इस्ससोरित्यत्र सर्पिष्करोतीत्युदाहरणेन व्युत्पत्तिपक्षस्यैव वार्तिक

कार्णस्वीकृतत्वानुमापात्। अन्यथा इदुदुपधस्येत्यनेनैव व्युत्पत्त्यव्युत्पत्तिपक्षभेदेन षत्वविकल्पसिद्धेस्तदुदाहरणस्यासंगतित्वसंभवात्। किंचातिष्ठुतसर्पिरित्या
दाविदुदुपधस्येति षत्वस्येष्टत्वे कस्कादिषु सर्पिष्कुण्डिकाशब्दो असमासेऽव्यपेक्षाविरहेऽपि षत्वार्थ इति स्वमूलग्रंथविरोध इति। अत्र केचित्। इदुद्भ्यामप्रत्ययस्ये
ति वक्तव्ये इदुदुपधस्येति ग्रहणं नित्यं पः इदुदुपधस्य सस्यैव विसर्गस्य षत्वं यथा स्यात्। कविभिः कृतमित्यादौ मा भूदित्येवमर्थं भिसो विसर्गस्य हि नित्यमिदुदुपध
त्वं नास्ति समरिन्स्यादौ तदभावात् इति तन्न। अग्निः करोतीति निषेधोदाहरणस्यासंगत्यापत्तेः। देवरित्यादौ अकारोपधत्वान्प्रियचत्वारित्यादौ वकारोपधत्वेन।
चतुष्कपाल इत्यादौ षत्वानापत्तेश्चेति यत्किंचिदेतत्। अन्ये तु प्रत्ययस्य यो विसर्जनीयो न भवति इत्यादिव्याख्याने तूक्तोदाहरणे षत्वस्याप्रवृत्तेरयं धूस्त्यजन्तु
त्यजमित्याहुः। स्यादेतत्। अप्रत्ययग्रहणमेवस्त्वा नित्यं सूत्रं प्रतित्रिपादी सिद्धेत्यत्र ज्ञापकमित्युक्तं। तदिदं वैयधिकरण्येनान्वयमभ्युपगच्छतां न सिद्ध्य द
त्राहुः। नमुनेत्यत्र नेति योगं विभज्य स्थानिवत्सूत्रे प्रतित्रिपादीनां सिद्धेति व्याख्यायते प्रत्ययः परश्चेत्यादिनिर्देशाश्चहानुकूलाः। योगविभागस्येष्टसिद्ध्यर्थ
त्वात्। चः परस्मिन्निति सूत्रं प्रतित्वसिद्धेर्वा। न तत्र पूर्वत्रासिद्धेन स्थानिवदिति सिद्धं मोयुक्तिमूलक इत्यादि सर्वं संगच्छते इति। अप्रत्ययायो विसर्ग इति सामाना
धिकरण्यपक्षमातः [illegible]त्यादाविदुदुपधस्येति षत्वमाशंक्याह। एकादेशशास्त्रनिमित्तकस्येति मातुरित्यत्र हि ऋत उदिति एकादेशशास्त्रं विसर्गस्य निमित्तं परंपरया प्रयो
जकं। आकरे तु एकादेशनिमित्तादिति प्रचुरः पाठः। तत्र एकादेशशास्त्रं तन्निमित्तं यस्य उकारस्य तस्मादित्यर्थः। नन्वेवमप्रत्ययस्येत्यत्र सामानाधिकरण्यपक्षोऽप्याक
रसंमत इति चेदत्राहुः। प्रत्येकं संयोगसंज्ञेति पक्ष आकरसंमतोऽपि यथा निष्प्रयोजनस्तथायमपि। वैयधिकरण्यपक्षस्त्वावश्यक एवान्यथा तिष्ठतु सर्पिः पिबतमु
दकमित्याद्यसिद्ध्यापत्तेरिति। भ्रातुष्पुत्रपाठादिति। ननु षत्वतुकोरसिद्ध इत्येकादेशशास्त्रस्यासिद्धत्वात् षत्वाप्राप्तौ विध्यर्थ एव तत्र पाठो न ज्ञापनार्थ इति वाच्यं षत्वे
तुकि च कर्तव्ये पदान्तपदाद्योः सतोरेकादेशः सिद्ध इति सिद्धान्तात्। अन्यथा शकहूषि इत्यत्रापि षत्वं न स्यात्। शकान् हूयन्तीत्यत्रादेच उपदेश इत्यात्वे [illegible] पसं
प्रसारणे कृते संप्रसारणाच्चेति पूर्वैकादेशे च हलः इति दीर्घे भवति। [illegible]कोऽसिचन्सोऽसिचन् इत्यादौ पदान्तपदाद्योरादेशत्वेन तत्र षत्वनिषेधः सिद्ध्यति। ननु शक
हूषि इत्यत्र। एवं च भ्रातुष्पुत्र इत्यत्रापि षत्वतुकोरित्येकादेशशास्त्रमसिद्धं न भवतीत्युक्तज्ञापकं सुस्थमेव। ननूक्तज्ञापकात् शकहूषि इत्यत्रापि मानुः कृपे

त्रेवषत्वंनस्यात्‌।मैवं।तुल्यजातीयस्य ज्ञापकत्वात्‌। कश्चतुल्यजातीयः। कुप्वोरितिरिफ्‌॥ ॥ ह्रिस्त्रिश्चतुरिति। इहह्रित्रिभ्यां सुजंताभ्यां साहचर्याच्चतुःशब्दो
पि सुजंत एव गृहीष्यते। कृत्वोर्थग्रहणं तु साहचर्येन सर्वत्र व्यवस्थापकमित्यत्र ज्ञापकं। तेन दीधीवेवीटामित्यत्र धातुसाहचर्येप्यागमस्येटो ग्रहणं॥ चतुष्क
पाल इति। चतुर्षु कपालेषु संस्कृत इत्यर्थे संस्कृतं भक्षा इत्यणः द्विगोर्लुगनपत्य इति लुक्‌। अत्र मनोरमायामिदुदुपधस्येति नित्यं षत्वमित्युक्तं। एवं च ह्रिस्त्रि
मितिचेतुःपंचोयादितिस्वमूलग्रंथप्रयोगश्चिंत्यः। चतुष्कपालवत्त्वापिनित्यतया षत्वप्रवृत्तेरतः षत्वनिवारणाय प्रत्ययस्येत्यत्र प्रत्ययस्य यो विस

ह्रिस्त्रिश्चतुरिति कृत्वोर्थे। ८।३।४३। कृत्वोर्थे वर्तमानानामेषां विसर्गस्य षकारो वा स्यात्‌ कुप्वोः। द्विष्करोति। द्विः करोति इत्यादि। कृत्वोर्थे किं। चतुष्कपालः॥ इसुसोःसामर्थ्ये। ८।३।४४। एतयोर्विसर्गस्य षः स्याद्वा कुप्वोः। सर्पिष्करोति। सर्पिः करोति। धनुष्करोति। धनुः करोति। सामर्थ्यमिह व्यपेक्षा। सामर्थ्ये किं। तिष्ठतु सर्पिः पिब त्वमुदकं। नित्यं समासेऽनुत्तरपदस्थस्य। ८।३।४५। इसुसोर्विसर्गस्यानुत्तरपदस्थस्य समासे नित्यं षः स्यात्‌ कुप्वोः परयोः। सर्पिष्कुण्डिका। अनुत्तरपदस्थस्य किं। परमसर्पिःकुण्डिका। कस्कादिषु सर्पिष्कुण्डिकाशब्दोऽसमासेव्यपेक्षाविरहेपि षत्वार्थः। व्यपेक्षायां नित्यार्थश्च। अतः कृकमिकंसकुंभपात्रकुशाकर्णीष्वनव्ययस्य। ८।३।४६। अकारादुत्तरस्यानव्ययस्य विसर्गस्य समासे नित्यं सकारादेशः स्यात्‌ करोत्यादिषु परेषु न तूत्तरपदस्थस्य। अयस्कारः। अयस्कामः। अयस्कंसः। अयस्कुंभः। अयस्पात्रं। अयस्कुशा। अयस्कर्णी। अतः किं। गीःकारः। अनव्ययस्य किं। स्वःकामः। समासे किं। यशः करोति। अनुत्तरपदस्थस्य किं। परमयशाः। अधःशिरसी पदे। ८।३।४७। एतयोर्विसर्गस्य सादेशः स्यात्पदशब्दे परे। अधस्पदं। शिरस्पदं। समास इत्येव। अधः पदं। शिरः पदं। अनुत्तरपदस्थस्येत्येव। परमशिरःपदं। कस्कादिषु च। भास्करः। इति विसर्गसंधिः॥ ॥ जेनीयो न भवतीत्यर्थ एव स्वीकर्तव्यः। चतुष्कपाल इत्यत्रापि तु कस्कादेराकृतिगणत्वात्‌ षत्वप्रवृ
त्तिरित्याहुः। व्यपेक्षाविरहेपीति। तिष्ठतु सर्पिष्कुंडिकामानयेत्यादावित्यर्थः। व्यपेक्षायामिति। इदं सर्पिष्कुंडिकाया इत्यत्रेत्यर्थः। अत्र सर्पिरित्यसमस्तं पदमिति वो
ध्यं। समासे तु नित्यं समास इत्यनेन सिद्धेः समासाभावमेव ज्ञापयितुमिदमिति सर्पिर्विशेषणमुक्तं। नित्यार्थश्चेति। अयं भावः। असमासे व्यपेक्षाविरहे अन्यंता

त्रोत्रालित्यत्रथापत्वार्थः पाठः। व्यपक्षायांत्वसमासे इसुसोरितिविकल्पेनषात्वेनित्यार्थ इति। अयः सहितेति। नत्वयसो विकारः जानपदेतिङीषप्रसंगात्। अयस्कु
र्णोति। अयइव कर्णौ यस्याः नासिकोदरेतिङीष्। अधः शिरसी। एतयोरिति। सूत्रेतु षष्ठ्याः स्थाने प्रथमा वोध्या। अधस्पदमिति। पदस्याध इति विग्रहः। म
यूरव्यंसकादित्वात्समासः। शिरस्पदमिति। षष्ठीसमासः॥ इति विसर्गसंधिः॥ ॥ ॥ शिवइत्यस्यावसाने विसर्गस्तस्य च्येइत्यनेन समभिव्याहारे स्या
भावात्कुत्वं कथं स्यादित्याशंकायामाह। स्वौजसमौडित्यादिनेति। एवं चात्र मूलभूतएव सुरस्तीति रुत्वादिकं स्यादेव। विसर्गस्त्विह न भवति खरवसानयोर्भावात्॥
भावितत्स्पसत्ता न भंग अकृतव्यूहपरिभाषया अच्व्येपरसमभिव्याहारात्पूर्वमपि न भवतीति वोध्यं॥ ससजुषो रुः। पदस्येत्यनुवृत्तं ससजुभ्यां विशेष्यते विशेषणे
न तदंतविधिः। नचैवं जुः शब्दोपि ग्रहणं वताप्रातिपदिकेन तदंतविधिर्नेति निषेधः शंक्यः। तस्य प्रत्ययविधिविषयकत्वात्। सांतसजुष्शब्दांतं च यत्पदं
तस्य रुः स्यात्स चालोन्त्यस्य। एवं स्थिते फलितमाह। पदांतस्य सस्येति। सजुषशब्दस्येति। तदंतस्य पदस्येत्यर्थः। तेन सजुषौ सजुष इत्यत्रापि नातिव्याप्तिः। नच
स्वौजसमौडितिसुप्रत्यये शिव स् अर्च्य इति स्थिते। ससजुषो रुः। ८।२।६६। पदांतस्य सस्य सजुष्शब्दस्य च रुः स्यात्। जश्त्वापवादः। अतो रोरप्लु
तादप्लुते। ६।१।११३। अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति। भोभगोअघोइति प्राप्तस्य यत्वस्यापवादः उत्वम्प्रति रुत्वस्यासिद्धत्वं तु न भव
ति। रुत्वमनूद्य उत्वविधेः सामर्थ्यात्॥ ॥ सजूरित्यत्राव्याप्तिः व्यपदेशिवद्भावोऽप्रातिपदिकेनेति निषेधादिति वाच्यं। तस्यापि प्रत्ययविधिविष
यकत्वात्। अत एव व्यपदेशिवद्भावोऽप्रातिपदिकेनेति ग्रहणवतेति च परिभाषाद्वयमपि प्रत्ययविधिविषयकमिति दिव उत्सूत्रे हरदत्तेनोक्तं। कैयटहर
दत्ताभ्यामिति तु मनोरमायां स्थितं। तत्र कैयटेनानुक्तत्वात् कैयटग्रहणं प्रमादप्रमितमिति नव्याः। केचित्तु दिव उत्सूत्रं यस्मिन्निति बहुव्रीहिः स्वसूत्रसमुदा
यश्चान्यपदार्थः। तथा च दिव उत्सूत्र इत्येतत् च इति सूत्रस्यापि क्रोडीकरणात्तत्र कैयटेनोक्तत्वान्नोक्तदोष इति कुक्कविकृतिवत्क्लेशेन मनोरमां योजयंति। य
त्वस्यासिद्धत्वादुत्वकृते पिनस्य स्थानिवत्वेन रुत्वाच्चत्वं स्यादित्याशंकायामाह। यत्वस्यापवाद इति। उत्वविधेः सामर्थ्यादिति। नचातोरोरप्लुतादिति सूत्रे परि
त्यज्यरोः सुपीति सूत्रानंतरं अतउरितीव्येवं लाघवादुच्यतामिति मनेनसामर्थ्यं श्रयणप्रयासेनेति वाच्यं। तथाहि सति उत्वस्यासिद्धतया शिवो र्च्य इत्यादावोत्त्वं

प्रथमयोः। अत्र प्रथमाशब्दः प्रथमाद्वितीययोः समुदाये गौणः। द्विवचनं तु समुदायद्वयापेक्षया। इको यणचीत्यतो अचीत्यकः सवर्णे दीर्घ इत्यतो ऽको दीर्घ इत्येकः
पूर्वपरयोरिति सूत्रं चानुवर्तत इत्याशयेन व्याचष्टे। अकः प्रथमाद्वितीययोरचीत्यादिना। अचि किं। रामः। अकः किं। गावौ। नावौ। प्रथमयोः किं। वृक्षा ञसा।
यद्यपीदं नादिचीत्यनेनैव सिध्यति तथापि हरी इत्यत्रेहहर्योरित्यत्रापि पूर्वसवर्णदीर्घः स्यात् तद्वारणाय प्रथमयोरित्युक्तमिति दिक्। पूर्वग्रहणं किं।
अग्नी इत्यत्र पक्षे परसवर्णो माभूत्। दीर्घग्रहणं किं। त्रिमात्रस्थानिनि त्रिमात्रो माभूत्। आद्गुण इति। अपवादे निषिद्धे पुनरुत्सर्गस्य स्थितिरिति न्यायादिति भावः

प्रथमयोः पूर्वसवर्णः। ६।१।१०२। अकः प्रथमाद्वितीययोरचि परे पूर्वसवर्णदीर्घ एकादेशः स्यात् इति प्राप्ते॥ नादिचि। ६।१।१०४। अवर्णादिचि
परे न पूर्वसवर्णदीर्घः। आद्गुणः। एङः पदान्तादति। शिवो ऽर्च्यः। अत इति तपरः किम्। देवा अत्र। अतीति तपरः किं। श्व आगन्ता। अप्लुतात् किम्
एहि सुश्रोत ३ अत्र स्नाहि। प्लुतस्यासिद्धत्वादतः परो ऽयम्। अप्लुतादिति विशेषणेन तु तत्सामर्थ्यान्नासिद्धत्वम्। तपरकरणस्य तु न सामर्थ्यं दी
र्घनिवृत्त्या चरितार्थत्वात्। अप्लुत इति किम्। तिष्ठतु पय आग्निदत्त ३। गुरोरनृत इति प्लुतः। हशि च। ६।१।११४। अप्लुतादतः परस्य रोरुः स्याद्धशि।
शिवो वन्द्यः। रो रित्युकारानुबन्धग्रहणान्नेह। प्रातरत्र। धातर्गच्छ। देवास् इह इति स्थिते रुत्वम्। भोभगोअघोअपूर्वस्य यो ऽशि। ८।
३।१७। एतत्पूर्वस्य रोर्यादेशः स्यादशि परे। असन्धिः सौत्रः। लोपः शाकल्यस्य। देवा इह। देवायिह। अशि किम्। देवास्सन्ति। यद्यपीह यत्व
स्यासिद्धत्वाद्विसर्गो लभ्यते। तथापि विसर्गस्य स्थानिवद्भावेन रुत्वाद्यत्वं स्यात्। न ह्ययमल्विधिः। रोरिति समुदायरूपाश्रयणात्। भोस् भ
गोस् अघोस् इति सकारान्ता निपाताः। तेषां रोर्यत्वे कृते॥

११ ११ अत्र भिद्योद्ध्यौ नदे नौ सदित्यादिलिंगा। न ह्विनादिचीति पूर्वसवर्णदीर्घे निषिद्धे पुनरु
त्सर्गस्य वृद्धिः प्रवृत्त्यैव सिध्यति नान्यथेति। नन्वेवं नान्तः पाद मव्यपर इति पाठे सुजाते अश्वसूनृते। उप प्रयन्तो अध्वरमित्यादावेङः पदान्तादतीति पूर्वरूपमेव हि तेन नि
षिध्यते तस्मिंश्च निषिद्धे ऽचो ऽयवायाव इत्युत्सर्गो ऽपि प्रवर्तेत। मैवं। बाधकेनिषिद्धे बाध्यमपि क्वचिन्नेति स्वीकारात्तत्सिद्धेः॥ भो भगो। असंधिः सौत्र इति। सूत्रकृतः सौ
त्रः कृतलब्धेत्यर्थः। भगो अघो शब्दयोरोकारस्याकारस्य च पूर्वरूपं सौत्रत्वान्नेत्यर्थः। यदि तु भोस भगोस अघोस इति सान्तरा नवानुकृत्य भो इत्यादीनां त्र पाणिनं अलौकित्यस्य

यः स्थाने अपूर्वस्यरोश्चेति व्याख्यायते तर्हि असंधिर्न प्राप्नोति वाच्यो ननु रोरुकारस्यानुबंधत्वाद्रेफमात्रं विसर्गस्थानि तथा च अनल्विधाविति स्थानिवद्भावेन
सादित्यत आह। नस्युयमिति। यथा अगृहीदित्यत्र ग्रहो लिटि दीर्घ इत्यस्य स्थानिवद्भावेन इट्त्वात् इट ईटीति प्रवर्तते एवमिहापि विसर्गस्य रुत्वाद्यत्वं प्रवर्तेतेति
भावः। यद्यपि रोरीत्यतो र इत्यनुवर्त्य रोर्यो रेफः तस्य यादेशः इति व्याख्याने अयमल्विधिरेव तथापि उत्तरार्थं कर्तव्यमवश्यं ग्रहणं इत्यस्यानुवृत्तिक्लेशवारणाय।
र्थमिति। हे इदन्तानां निपातानामिति। भो भगो इति सूत्रे निर्दिष्टाश्चादरादिगणत्वान्नत्र बोध्याः। यदि तु विभाषा भवद्भगवदघवतामोच्चावस्येति वार्तिकेन एषां रुः
[illegible] अं वस्योकारो वा संबुद्धावित्यर्थकेन निष्पन्ना एव भोः शब्दादयो गृह्येरन् तदा पुल्लिंगैकवचनमात्रे भो हर इत्यादिसिद्धावपि भो हरिस्त्री भो गंगे इत्या
दिन सिद्ध्येत् तस्माद्विभाषा भवदिति वार्तिकं नावश्यमाश्रयणीयमिति भावः॥ मनोरमायां तु भाष्यस्वरसरीत्या तु विभाषेति वार्तिकमारब्धव्यमेवेत्युक्तं तथाहि
हे भगवन् इतिवन्नहे भो इति प्रयोगस्यापीष्टत्वात् तच्च वार्तिकारंभ एव सिद्धेः। सुःपाइत्याद्यं हे हे भोरित्यमरोक्तानां तु संबोधनार्थकानां निपातानां सह प्रयो
गाभावात्॥ किंच॥ अत्रभवान् हरिः तत्रभवान् ततोभवानितिवत् तत्रभोरित्याद्यपि वार्तिके सत्येव सिध्यति इतराभ्योपि दृश्यंत इति सर्वविभक्त्यंतात्त्रतसो
र्भवदादियोग एवेष्टत्वाच्च। किंच। आमंत्रितस्य पदात्परस्याष्टमिकनिघातः। आमंत्रितं पूर्वमविद्यमानवत् भावश्चेत्यादि सिध्यति नान्यथा। भो हरि हरा वित्यादि
सिद्धये भो इति निपातोप्यवश्याभ्युपगंतव्यः। यदि तु भगो अघो इति प्रामादिकौ तर्हि सान्नामवार्तिकं तूक्तप्रयोजनाय स्वीकर्तव्यमेवेति दिक्। स्यादेतत्। निपाता
नाम्नृदन्मयस्त्वविधौ तएव गृह्येरन् प्रतिपदोक्तत्वात् न तु संबुद्ध्यन्ताः लाक्षणिकत्वादिति चेन्नैवं। स्वरितेनाधिकार इत्यत्राधिकः कारोधिकार इति व्याख्यानमा
श्रित्य लक्ष्यानुरोधेन स्वरितत्वमाश्रित्योभयग्रहणात् लक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्वाच्च अनित्यत्वे लिंगं भुवश्च महाव्याहृतेरिति सूत्रे महाव्याहृ
तिग्रहणं यावत्पुर इति सूत्रे निपातग्रहणं च। न चैवं लाक्षणिकानामपि ग्रहणे विभोरिदं सुप्रभागो यस्य स सुप्रभगुः तस्य सुप्रभगोरिदं रघोरिदं इत्यत्रापि प्रसंगाप
त्तिरिति वाच्यं। परस्परसाहचर्येण निपातानां वार्तिकोक्तानां च ग्रहणेप्यन्येषामग्रहणात् साहचर्यं तेषां संबोधनार्थ इति बोध्यं। भो इत्यादीनां त्रयाणामन्त्यस्य य
स्यादिति व्याख्याने तु अर्थवद्ग्रहणपरिभाषया नातिप्रसंगः। न चाजहत्स्वार्थावृत्तिरिति पक्षे विभोरिदं प्रभोरिदमित्यत्र भोः इत्येकदेशस्य अर्थोस्तीति शंकाज

विद्यमानवदित्य

य्योर्लघु वकारयकारयोरिति। भोभगोअघोअपूर्वयोरित्यर्थः। लघुप्रयत्नतरः लघूच्चारणतरः। स चांतरतम्याद्ध्रस्वकः यस्य यः इत्याह। वयाविति। विधानसामर्थ्यात्तु लघुप्रयत्न
तरस्य न भवतीत्याशयेनाह। अलघुप्रयत्नस्येति। भोयच्युतेति। एवं भगोयच्युत। अघोयच्युत। वकारस्योदाहरणं तु असावादित्यः। एतच्च काशिकायां स्पष्टं। उत्त
रार्थपरग्रहणमिति। वस्तुतस्तु तत्रापि नोपयुज्यते परस्येत्यनुवृत्त्यैव निर्वाहात्। उञि च पदे इत्यतः पदे इत्यनुवर्त्य अजादेः परस्येति व्याख्यानात्। परमदंड्डिनावि
त्यादौ ङमुण्नेति प्राचो व्याख्यानस्य ङमो ह्रस्वादचीति सूत्रे मनोरमायां निरस्तत्वाच्च। ननु हलि सर्वेषामित्यत्र पदे ग्रहणान्न त्वो हलादौ पदे इति व्याख्यान
लाभात्। वृक्षवृभ्यां वृक्षवृभिरित्यत्र वस्य नित्यं लोपो न भवति। किंतु लोपः शाकल्यस्येति वैकल्पिक एव लोपः इत्यलि पदेग्रहणस्य प्रयोजनमिति चेन्मैवं। ह

व्योर्लघुप्रयत्नतरः शाकटायनस्य ८।३।१८। पदान्तयोर्वकारयकारयोर्लघूच्चारणौ वयौ वा स्तोऽशि परे। यस्योच्चारणे जिह्वाग्रोपाग्रमध्य
मूलानां शैथिल्यं स लघूच्चारणः। ओतो गार्ग्यस्य ८।३।२०। ओकारात्परस्य पदान्तस्य लघुप्रयत्नस्य यकारस्य नित्यं लोपः स्यात्। गार्ग्यग्रहणं पूजा
र्थम्। भो अच्युत। लघुप्रयत्नपक्षे भोयच्युत। पदान्तस्य किम्। तोयम्। उञि च पदे ८।३।२१। अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोपः उञि परे।
स उ एकाग्निः। पदे किम्। तन्त्रयुतम्। वेञः सम्प्रसारणे रूपं। यदि तु प्रतिपदोक्तो निपात उञिति गृह्यते। तर्हि उत्तरार्थं पदग्रहणम्। हलि सर्वेषाम्
८।३।२२। भोभगोअघोअपूर्वस्य लघ्वलघूच्चारणस्य यकारस्य लोपः स्याद्धलि सर्वेषां मतेन। भो देवाः। भो लक्ष्मि। भो विद्वद्वृन्द। भगो नमस्ते। अ
घो याहि। देवा नम्याः। देवा यान्ति। हलि किम्। देवा यिह॥

((लि सर्वेषामित्यत्र वस्यानुवर्तितत्वात्। किं च माभ्यां माभिरित्यत्र मिभ्यां प्रदीपरतो य
सावि कल्पेनैव भवन्मते लोपः स्यात्तत्र हलि सर्वेषामित्यस्य प्रसंगे न चेष्टापत्तिः भाष्यकारैर्दंडिनेत्यत्र ङमुड्वारणाय ङमो ह्रस्वादचीत्यत्रानुवृत्त्यर्थपदग्रहणमित्यु
क्तत्वात्। न च तदेव प्रयोजनमस्त्विति वाच्यं ह्रस्वात्परो यो ङम् तदंतं यत्पदं तस्मात्परस्याचो नित्यं ङमुडिति व्याख्यानेन दंडिनेत्यत्र ङमुटः प्रसक्त्यभावादाह
लि सर्वेषां। यकारस्येति। वकारस्तु नानुवर्तते। भोभगोअघोअपूर्वस्यासंभवात्। अपूर्वस्तु यद्यपि संभवति वृक्षव् करोतीति तथापि तत्र लोपाप्रसंगः। अशीत्य
नुवर्त्याशहलोर्विशेषणात्। वृक्षव् हसतीत्यादि त्वनभिधानादसाध्वित्याहुः। गव्यमित्यत्र तु पदान्तत्वं नास्ति गव्यूतिरित्यत्र वकारप्रश्लेषान्न वलोपः इत्युक्तं

पारिदृढीकन्येत्यत्र इतोमनुष्यजातेरिति ङीषं बाधित्वा अलिङ्गोरिति ष्यङ् स्यात् ढलोपस्यासिद्धत्वेन गुरूपोत्तमत्वादित्याकरे स्थितं। ननु परिदृढप्येत्यत्र ल्यप्
वादेशः कथं भवेत् यावता परिदृढ गा चष्टे इति णिचि कृते ल्को प्रत्यये च ल्कोतत एव परे नर्भावात्समासाभावः। इति चेत्। अत्र कैयटः संग्राम यतेरेव सोपसर्ग
गात्प्रायपोत्पत्तिर्नान्यस्मादिति नियमात्पारे शब्दे पृष्ठकाय दृढ शब्दादेवणिचि क्रियते णिजन्तस्य धातुत्वात्क्त्वा मन्त्य पेक्ष तत्परेः क्त्वा तेनकृदन्तेन समासः इ
ति सिद्धो ल्यबादेशः॥ णाविष्ठवद्भावाद्भाव इति। ननु पूर्वस्येति निर्धार्य सप्तमी निर्देशादेव तल्लाभादृत आह। पूर्वग्रहणमित्यादि। ढ्रलोपे पूर्वस्याणि सूत्रस्थो
त्तरपदाधिकारस्थत्वादुत्तरपदस्थयोरेव ढरेफयोः परतो दीर्घः स्यान्न तु लीढः अजर्घा इत्यत्रेति भावः। यद्यप्यसंभवादेवानुत्तरपदस्थ ढकारे दीर्घो भवेत्तथा

पि प्रतिषेधे परङ्कार्यम्। ५।४।२। तुल्यबलविरोधे परं कार्यं स्यात्। इति लोपे प्राप्ते पूर्वत्रासिद्धमिति परीत्यस्याऽसिद्धत्वाद्ह्रस्वमेवा। मनोरथः। एत
त्तदोः सुलोपोऽकोरनञ्समासेहलि। ६।१।१३२। अककारयोरेतत्तदोर्यः सुस्तस्य लोपः स्याद्धलि न तु नञ्समासे। एष विष्णुः। स शम्भुः। अकोः
किम्। एषको रुद्रः। अनञ्समासे किम्। असशिवः। हलि किम्। एषोत्र। सोऽचि लोपे चेत्पादपूरणम्। ६।१।१३४। स इत्येतस्य सोर्लोपः स्या
दचि पादश्चेल्लोपे सत्येव पूर्यत। सेमामविड्ढि प्रभृतिम्। इह क्वचिदेव गृह्यत इति वामनः। अविशेषादृक्पादयोरपीत्यपरे। सैष दाशरथी
रामः। लोपेऽविदितिविम्। सरतहराति। सएषम। कोसत्ये वेत्यव धारणेनु स्पष्ट इत्युस्य। सिद्धलमितिपूर्वसूत्रोद्धरुलग्रहणान्नु वृत्त्यालभ्यते। तेनेह
नासोहमाजन्मशुद्धानां॥ इति स्वादिसन्धिः॥ ॥ ऽऽ ष्यजर्घा इत्यत्र दीर्घो न स्यादित्यारोपो वेलुतमत्र उत्तरपदस्य समासस्थ रमावयवे लस्त्वात्तुनी

[illegible]मत इत्याद्यवपि न स्यान्। किं तु नीरक्तं दूरक्तं इत्यादावेवस्यादिति तत्त्वं। लीढ इति। लिह आस्वादने क्तः ढत्वधत्वष्टुत्वढलोपाः इह ढलोपं प्रति ष्टुत्वं नासिद्धं ढका
रेपरतो लोपविधिसामर्थ्यात् इत एव ढोढे लोप इत्यस्य पदाधिकारस्थत्वेप्यपदान्तस्य ढलोपो भवति। अजर्घा इति। गृधु अभिकांक्षायां। यङ्लुकि हित्वे अभ्यासस्य रु
कालङः सिपि शब्लुकि सिपरेऽभावपक्षे लघूपधगुणे रपरः। इतश्चेति कारलोपे हलङ्यादिलोपः भष्भावः। जश्त्वं दश्चेति रुत्वपक्षे अजर्घा इति। स्थानेयोरी
ति रेफलोपे अनेन दीर्घः। अत्रेयं सुगमव्याख्या। ढ्रलोपे पूर्वस्य दीर्घोऽणः। लीढः। नीरक्तं। दूरक्तं। अणः किं तृढः। वृढः। पूर्वग्रहणमनुत्तरपदेपि पूर्वमात्रस्य दीर्घार्थं। अजर्घाः ।

ह्राधातोर्वृत्ता। अपसर्गात्तु नेतीति निषत्वं। उपसर्गवशाच्च विरोधार्थकत्वं। कार्यमिति। अर्हे कृत्यतृचश्चेत्यर्हार्थे कृत्यप्रत्ययः तेन तुल्यबलविरोध इति पर्यवसानात्
तुल्यबले पूत्सर्गापवादानित्यांतरंगबहिरंगविधिषु नेदं प्रवर्त्तते। न ह्यपवादादीनां सन्निधावुत्सर्गादीनां कृत्यर्हत्वं तैर्वाधितत्वात् तत्र नित्यमावश्यकत्वाद्बाधकमंत
रंगं तु लाघवादपवादस्तु वचनप्रामाण्यात् तद्भिन्नस्तु प्रकृतसूत्रस्य विषयः। अत एव परनित्यांतरंगापवादानामुत्तरोत्तरं वलीय इत्युक्तं। यद्यतुल्यबलेष्वपि परमेव स्यात्त
[illegible]पपद्येत। तेष्वाचष्टां तुल्यबलविरोध इति। जातौ पदार्थे विध्यर्थमिदं सूत्रं। वृक्षेषु वृक्षाभ्यामित्यत्र हि लब्धावकाशयोरेत्वदीर्घत्वशास्त्रयोर्वृक्षे[illegible] इत्यत्र युगप
[illegible]संभवेन निगमकाभावात् प्रतिपत्तिरेव स्यात्। तदुक्तं अप्रतिपत्तिर्वा उभयोस्तुल्यबलत्वादिति तत्रास्माद्वचनात्परस्मिन् कृते यदि पूर्वस्यापि निमित्तमस्ति तर्हि तद
पि भवत्विति [illegible]विधेयोन्यः परत्वाद्विभावे कृतेप्यकृवा। तदुच्यते पुनः प्रसंगविज्ञानात् सिद्धमिति। व्यक्तौ तु पदार्थे तत्तद्व्यक्तिविषयकत्वात् लक्ष्यलक्षणयोरन्यत्र चरि
तार्थत्वासंभवात्तव्यक्तव्यानाऽरामि वपर्यायेण वृत्तौ। नियमार्थमिदं सूत्रं विप्रतिषेधे परमेव स्यान्न तु पूर्वमिति। एतल्लक्षणारंभाच्च तत्र तत्र पूर्वस्यानारंभो न मी
यते। तथा च जुहुतात्त्वमित्यत्र [illegible] नतङि हे नेस्यादिवद्भावेन ह्युल्य इति धित्वं न भवति तदुच्यते। संकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति। लक्ष्या
नुरोधाद्यवस्थाप्यमेतत् द्वयमपि तत्र विधिपक्षानुत्तरफलं पि च प्राप्त इति। पाल्यां नियमार्थमिति पक्षे परमेव कार्यं स्यादित्येवकाराध्याहर्त्तव्यो वृत्तौ। उत्वमेवेति। मि
ह्यो द्वयोरतुल्यबलत्वेन विप्रतिषेधे परमित्यस्याप्रवृत्तेः निष्प्रतिपक्षत्वादुत्वमेव भवतीत्यर्थः। तदुक्तं। पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येति। एते
न विभक्तिकार्यं प्राक्पश्चादुत्वमत्व इति वक्ष्यमाणग्रंथे व्याख्यानः। एतत्तदोः। अत्र त्यदाद्यत्वमेकशेषश्च न कृतः सौत्रत्वात्। प्रकृतिवदनुकरणमिति वैकल्पि
कातिदेशाद्वा। एवं च हस्ता वप्येतत्तदोरिति प्रयोगः साधुः। हल्यंवभ्य इत्यस्यानंतरमेवेदं लाघवाय न कृतं संहिताधिकारोपजीवनादित्याहुः। सूत्रे तु इति पृथ
क्पदं लुप्तषष्ठीक[illegible]मित्याह। एतत्तदोर्यःसु[illegible]ति। एतत्तदे[illegible]गतं[illegible]व्याभिधायीयः सुलस्येत्यर्थः। एतत्तदोर्विहित इति व्याख्याने तु परमसदादाति परमेष [illegible]द
दाःतीत्यादा सुलोपो न स्यात्। एतत्तदोः पर इति व्याख्याने [illegible]नरं भवति। एतत्त्वामितिपंचम्यभावात्। एतत्तदोवयव इति तु न संभवत्येव सौः प्रत्ययत्वात्तस्माद
र्थद्वारकसंबंध एवाश्रितः तदाश्रयणात् लिंगं तु अनन्समास इति बोध्यं। एतत्तदोः किं। यो ददाति। अकोः किमिति। साकच्कयोः श्रावयंतरत्वादप्रसंग इति प्रश्नः

एवकरइति। अकोरितिप्रतिषेधएवतःमध्यपतितस्तद्ग्रहणेनगृह्यतइतिपरिभाषांज्ञापयतीतिभावः। सोचिलोपे। अचीतिविस्पष्टार्थमितिवृत्तौस्थितं। सस इति कच्छ
स्यप्रथमैकवचनांतस्यानुकरणंतुनषष्ठीकमित्याह सइत्यस्येति। बहुलग्रहणेति। अतएवलोपंविनापादपूरणेपिक्वचिद्भवति। सास्मा अरमिति। अत्रवृत्ति
यतुसोहमाजन्मशुद्धानामित्यादिसिध्यर्थंपादश्चेल्लोपप्रसक्तएवपूर्वेनेतिसावधारणंव्याचख्युस्तेषांसास्मानअरमित्यादौसुलोपानापत्तिः। अत्रहिसः अस्मैइतिच्छे
दः। बहुलग्रहणानुवृत्यानदुपपद्यइनेतुसोहमाजन्मेत्याद्येवतथाउपपाद्यतांकिमवधारणेनेति॥ इतिस्वादिसंधिः॥ अर्थवदधातु। प्रत्ययंप्रत्ययांतंचेति
सूत्रेतंत्रादिनोभयंविवक्षितमितिभावः। अर्थवदितिनपुंसकनिर्देशस्यानुगुणंविशेष्यमध्याहरति शब्दस्वरूपमिति अधातुरप्रत्ययइतिपुल्लिंगनिर्देशस्तुपर
वल्लिंगंद्वंद्वतत्पुरुषयोरित्युत्तरलिंगवत्वाद्बोध्यइत्याहुः। यदितुधातुभिन्नमित्यर्थंपरित्यज्यारोपितोधातुरधातुरितिव्याख्यायतेतदानपुंसकत्वप्राप्तिशंकैवना
स्तीतिज्ञेयं। अर्थवदितिकिं। धनंवनमित्यादौप्रतिवर्णसंज्ञामाभूत्। तस्यांचसत्यांस्वादयःस्युःनतुसंख्याकर्मादिरभावान्नभविष्यंतीतिचेन्न। एकवचनमुत्स

अर्थवदधातुरप्रत्ययःप्रातिपदिकम्। १।२।४५। धातुंप्रत्ययंप्रत्ययांतंचवर्जयित्वाऽर्थवच्छब्दरूपंप्रातिपदिकसंज्ञंस्यात्॥ ॐ॥

र्गतःकरिष्यतइतिसिद्धांतात्। हुंफडादिभ्यइवस्वेदुर्वारत्वात्। नचार्थवद्ग्रहणपरिभाषया अनर्थकेनस्यादितिवाच्यं। तस्याःविशिष्टरूपोपादानविषयत्वा
त्। प्रादूहोढइत्यत्रतुऊइतिविशिष्टरूपमुपात्तमितिकृत्वातेनैकदेशस्यानर्थकस्योढशब्दस्यग्रहणंनेत्युक्तं। नत्वत्रतथाविशेषरूपस्योपादानमस्ति। यद्य
प्यधातुरित्यादिपर्युदासेनार्थवत्वंलभ्यतेतथाप्युत्तरार्थमर्थवद्ग्रहणंस्पष्टप्रतिपत्तयेइहैवकृतं। नचैकाज्द्विर्वचनन्यायेनसमुदायस्यैवसंज्ञास्यात्। नावयवा
नामित्यर्थवद्ग्रहणंव्यर्थमितिशंक्यं। समुदायेहिरूढा अवयवा अपिहिरूढाभवंति। वृक्षःप्रचलन्सहावयवैःप्रचलतीतिन्यायात्। इहतुसमुदायप्रवृत्तया
प्रातिपदिकसंज्ञयानावयवानांतत्कार्यसिद्धिरितिवैषम्यात्। अतएवयत्रबहवोहलःसंश्लिष्टास्तत्रद्वयोर्बहूनांचाविशेषेणसंयोगसंज्ञेतिसिद्धांतःसंगच्छते।
अन्यथात्वदुपन्यस्तन्यायेनसमुदायएवसंयोगसंज्ञाप्रवर्तेत। अत्रकेचित्। धनंवनमित्यादौप्रतिवर्णसत्यामपिसंज्ञायांसत्स्वपिस्वादिषुनक्षतिः। हल्ङ्यादि
नासुलोपात्। नचनलोपोधस्यजश्त्वंचस्यादितिशंक्यं। धातुपाठेधनवनेत्युच्चारणसामर्थ्यात्तदप्रवृत्तेरित्याहुस्तदसत्। अकारान्तोरुत्पत्तौरुत्वप्रसक्तेः। यद्य

प्रजितिमूलस्याग्रं योयमपि विरुध्येत। कालसमयवेलासु इत्यादिज्ञापकादेवढत्वाभावसिद्धेः। यदि ज्ञापकेन प्रत्याख्यानमयुक्तमिति यदि वाऽकारप्रश्लेषेण
तर्हि गम्भीरमित्यादिदृष्ट्वाभ्युपगमे सूत्रेऽस्मिन् रेवंसिध्यतीत्युच्यते न तर्हि अप्रत्ययेनेत्यनेन अभ्युपगम्य प्रत्ययपर्युदासे सातिग्रहणं लिंगं प्रत्ययान्तपर्युदासे तु तद्धितग्रहणमे
त्यप्रत्ययग्रहणमेवास्त्वित्यव्याख्यास्यतां किमनया कुसृष्ट्येति दिक्। अधातुप्रत्ययावितिसिद्धे नञ्द्वयोपादानमप्रत्यय इत्यस्यावृत्तिसौकर्यार्थं। महासंज्ञाकरणं
त्वनुरोधात्। तथा चाथर्वलपश्यन्ते को धातुः किं प्रातिपदिकं कः प्रत्यय इति डित्यादीन्यव्युत्पन्नानीहोदाहरणं। अव्युत्पत्तिपक्षस्य चेदमेव ज्ञापकमिति प्राञ्चः।
ण्जन्तव्युत्पत्तिपक्षे व डुपटवइत्यादि अर्थसूत्रमिति नव्याः। न चैवं वहुच्पूर्वः प्रातिपदिकमित्येव सूत्र्यतामिति वाच्यं। मूलकेनोपदंशमित्यादौ कृदन्तत्वेनातिप्रसंग
त्। गामिकारकपूर्वस्यापि कृदंतत्वात्। न च समासग्रहणं नियमार्थमिति निरासः। अर्थवत्सूत्रारंभं विना समासग्रहणस्य नियमार्थत्वायोगात्॥ ॥ कृत्तद्धितस
मासाश्च। अर्थवदित्यनुवर्त्तते तत्सामर्थ्यात्तदंतविधिः। ननु यद्यर्थवत्ता पारमार्थिकी विवक्ष्यते सा पदस्य वाक्यस्य वा अस्ति न तु कृत्तद्धितांतस्य यदि तु प्रक्रिया

कृत्तद्धितसमासाश्च १।२।४६। कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञास्स्युः। पूर्वसूत्रेण सिद्धे समासग्रहणं नियमार्थम्। यत्र संघाते पूर्वो भागः
पदं तु स्याच्चेद्भवति तर्हि समासस्यैवेति। तेन वाक्यस्य न॥ प्रत्ययः ३।१।१। आपञ्चमपरिसमाप्तेरधिकारोऽयम्॥ परश्च ३।१।२। अयमपि तथा॥

दशायां प्राकल्पिकी सा विवक्ष्यते तर्हि कृत्तद्धितयोरपि सा अस्तीति कथमर्थवद्ग्रहणानुवृत्त्या तदंतग्रहणमिति चेदत्राहुः। अतएवार्थवद्ग्रहणसामर्थ्यात्प्रकृ
प्रकृत्यर्थानेन तो कार्यीभूतेन प्रतीयमानोऽर्थ इह गृह्यते। तस्य लौकिकार्थप्रतिप्रत्यासन्नतरत्वात्। मतुपः प्राशस्त्यपरतया तस्यैव ग्रहणम् इत एव न तदुपादाने
सार्थकं पूर्वसूत्रे अधातुरिति पर्युदासबलेनापि तल्लाभसंभवादिति। तदेतत्सकलमभिप्रेत्याह। कृत्तद्धितान्ताविति। लिट्। धुकृ इत्यादावधातुरिति कर्त्ता
औपगवइत्यादौ अप्रत्ययान्तमिति पर्युदासे प्राप्ते कृत्तद्धितेत्यारंभः नियमार्थमिति। न च प्रत्ययांतत्वेन पर्युदासे प्राप्ते विध्यर्थमस्त्विति शंक्यं। वाक्यस्य प्रत्ययां
तत्वात्। प्रत्ययग्रहणे यस्मात्स विहितस्तदादेरेव ग्रहणात्। न चैवमपि अनुपसर्जनस्त्रीप्रत्यये तदादिनियमाभावाद्राजकुमारीत्यादौ ङीवंते विध्यर्थमस्त्विति
वाच्यं। अंतरंगानपि विधीन्बहिरंगो लुग्बाधत इति लुग्विषये हलङ्यादिलोपाप्रवृत्त्या श्रूयमाणएव सुपि समासप्रवृत्तेः। तत्र च कुमारीश्रश्रूस्सुवंतत्वेपि।

राजकुमारीशब्दस्यानर्थत्वादप्रत्ययान्तत्वेन प्रवृत्ताया संज्ञाया एकदेशविकृतन्यायेन विभक्तिलुक्यपि सुलभत्वात्। अत एव गोमतप्रियदत्यादौ नुमाद्
योन लुकः प्रागन्तरङ्गस्य हल्ङ्यादिलोपस्य प्रवृत्तौ तु स्यादेवेति दिक्। नियमशरीरमाह। यत्र संघात इति

। नियमश्चात्र सजातीयापेक्ष इत्याह। पूर्वो भागः पदमिति। षड्विधेऽपि समासे पूर्वभागस्य पदत्वाव्यभिचाराद्भवत्ययं सजातीयः पूर्वोभा
गः इत्युपलक्षणं। उत्तरत्र तु प्रत्ययो नेत्यपि बोध्यं। अन्यथा जन्मवानित्यादौ संज्ञा न स्यात् स्वादिष्विति अनेन पूर्वभागस्य पदत्वात्। न च तद्धितग्रहणसामर्थ्या
त्तत्र स्यादेवेति वाच्यं। तद्धितग्रहणस्य भानवदित्यादौ कृतार्थत्वात्। तत्र हि पूर्वभागस्य भत्वं न तु पदत्वं। न चैवमयमिथानित्यादि समुदायस्य प्रातिपदिकत्वं
स्यादेव पूर्वभागस्य पदत्वेऽप्युत्तरस्य प्रत्ययत्वात् अनेन नियमेन वारयितुमशक्यत्वादिति वाच्यं। उत्तरत्र तु प्रत्ययो नेत्यत्र तद्धितप्रत्ययो नेति व्याख्या
नात्। पूर्वो भागः पदमिति किं। वहुत्र विशिष्टस्य प्रातिपदिकसंज्ञा यथा स्यात्। [illegible] पटवद्रित्यत्र उपोत्तमोदात्तत्वं सिध्यति। प्रथमजसो लुकि चितः सप्रकृ
तेर्बह्वकजर्थमिति चित्स्वरेण तेपुनर्जस उत्पत्तिः [illegible] संज्ञाया [illegible] जसेवोदात्तः स्यात्। यद्वा। प्रकृतिप्रत्ययभावापन्नसंघातस्य चेद्भवति
तर्हि समासस्यैवेति नियमार्थं समासग्रहणं तेन [illegible] इति दिक्। नियमफलमाह। तेन वाक्यस्य नेति। गामभ्याज शुक्लामि
त्यादिवाक्यस्य न भवतीत्यर्थः। समर्थानां हि संज्ञायां सुपलुक् स्यात्। न चैवं मणिमूलकेनोपरंशं भुक्त इत्यादिवाक्यस्य संज्ञा दुर्वारा कृद्ग्रहणे गतिकारकपूर्वस्या
पि ग्रहणादिति चेन्मैवं। समासग्रहणात् [illegible] इत्येव द्योतनात्। एवं च कृत्तद्धितेति सूत्रे कृद्ग्रहणपरिभाषा निष्फलत्वान्नोपतिष्ठते तस्मा[illegible]
व्यावक्रोशी व्यावहासीत्यत्राक्रोशः तत्र हि [illegible] यामिति [illegible] चिकृते गतिपूर्वस्य णजन्तत्वात् णचः स्त्रियामित्यञि [illegible]
स्यादिवृद्धिस्तु नैव न। कृद्ग्रहणे कारकपूर्वस्याप्य [illegible] मित्यादि स्फुटीभविष्यति। चकारो नुक्तसमुच्चयार्थः। तेन निपातस्यान
र्थकस्य प्रातिपदिकसंज्ञा [illegible] वार्तिकं [illegible] मिदं। अव घाति। अनुकरणं त्वनुकार्य[illegible]
वत्वाभावादव्ययानां प्रातिपदिकत्वे [illegible] सुसंज्ञायामिति यथा [illegible] व भवेत् [illegible] यथा। अधिकारोऽयमिति। प्रत्यय [illegible] संज्ञात्वेनाधिकृ

ङ्याप्प्रातिपदिकात्॥ समाहारद्वन्द्वादेकवचनं। ङीति ङीप्ङीष्ङीनां सामान्यग्रहणं। आविति चटाप्डाप्चापां। आपंचमसमाप्तेरिति। ननु घकालतनेष्विति ज्ञापि-
का। सुबन्तात्तद्धितोत्पत्तिरित्यभ्युपगमात्। किमर्थं तद्धितेषु प्रातिपदिकाधिकार इति चेदत्राहुः। असति त्वधिकारे अतइञित्यत्रात इत्येतत्सुबन्तस्यैव विशेषणं स्या-
त्। ततश्च दक्षस्यापत्यमित्यत्रैव स्यान्न तु दक्षयोर्दक्षाणामित्यत्र। किंच बृहच्छब्द इत्यत्र बृहच्छमित्येतत्सुबन्तविशेषणं माभूत्। अन्यथा जानन्तीमिति ज्ञानात् वृ-
गुपधेति कः। ज्ञानामयमित्यत्र सुबन्तस्य वृद्धत्वात् तच्छः स्यात्। प्रातिपदिकाधिकारे तु वृद्धं यत्प्रातिपदिकं तत्प्रकृतिकात्सुबन्तात्तच्छ इत्यर्थलाभादिह ज्ञा-
कस्मात् वृद्धत्वाच्छो न भवति। किंतु अणेव भवति। शब्दकौस्तुभे तु सत्यस्मिन्नधिकारे वाक्यादपि कप्रत्ययादयः स्युः। ततो विशिष्टस्य प्रातिपदिकतयासंके-
तमुक्तापेस्पष्टमेवानिष्टमित्युक्तं। लिंगविशिष्टस्येति। लिंगबोधकप्रत्ययविशिष्टस्यापीत्यर्थः। परिभाषायाः प्रयोजनं च श्रूः। प्रत्ययान्तत्वेनाप्रातिपदिक

ङ्याप्प्रातिपदिकात्।४।१।१। ङ्यन्तादावन्तात्प्रातिपदिकाच्चेत्यापञ्चमपरिसमाप्तेरधिकारः। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि
ग्रहणमित्येव सिद्धे ङ्याप्ग्रहणं ङ्यावन्तात्तद्धितोत्पत्तिर्यथा स्यात्। ङ्याब्भ्यां प्राग् ङ्याभूदित्येवमर्थम्॥ स्वौजसमौट्छष्टाभ्याम्भिस्-
ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्।४।१।२। ङ्यन्तादावन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः। सुङस्योरुकारङकारौ जश्टा र इ

त्वपि ह्रस्वादयः। सेच ष्यु शुषः ष्व ष्वा इति निर्देशादेव स्वादिसिद्धिरिति वाच्यं। निर्देशस्य शब्दपरत्वात्। विपराभ्यां जेः डे ये इतिवत्। किंच कुमारीमाचष्टे
कुमार्यः ... णिष्ठवदिति टिलोपः। एवं यामिन्य इवाचरति यामिनयतीत्यत्राचारे क्विपि फलं॥ ङ्याब्भ्यां प्रागिति तेन एनिका आर्यका चेति सिध्यति। तथा
हि। मित्तामिव चैतेरर्तिह्रीपयिष्यमाणोऽत्यन्तः स्वार्थिकः कन्। एतार्यशब्दाभ्यां ङ्यापौ बाधेन ततश्च एतिका आर्यिकेत्येवरूपं स्यात्। ङ्याप्ग्रहणसामर्थ्यात्तु ङ्य-
बन्तात्कनि एनिकेत्यपि सिध्यति। वर्णादनुदात्तादित्यस्य वैकल्पिकत्वात्। आवन्तात्कनि उदीचामातः स्थाने इतीत्वविकल्पाद् आर्यका आर्यिकेति रूपद्वयं सिध्यति।
वस्तुतस्तु ङ्यापोर्ग्रहणं मास्तु घकालतनेष्वित्यलुग्विधानसामर्थ्यात्सुबन्तात्तद्धितोत्पत्तिरिति हि निष्कर्षः। तथा च सुपः प्रागेव ङ्यापौ प्रवर्तेते। स्वार्थद्रव्यलिंगसं-
ख्याकारकप्रयुक्तकार्याणां क्रमिकत्वस्वीकारादित्यवधेयं॥ स्वौजसमौट्। समाहारे द्वन्द्वः। सुङस्योरिति। सोरुकारो ङस्त्वसाविन्यत्र विशेषणार्थः। अस्मि

त्युक्ते हि अमकारादावित्यर्थः स्यात्। तथा च वा जस इत्यिति नसिध्येत्। ङसेरिकारश्चाङसिङसोर्ङसिङोस्मात्स्मिनावित्येतदर्थः। जश्शसोर्जकारशकारौ जसः शी
तस्माच्छसो न इत्यनयोर्विषयविभागार्थौ। अन्यतरस्य निरनुबंधकत्वमेवास्त्विति चेन्न। जसो जकाराभावे औङ इत्यस्य आवृस्यात्। ततश्च प्रत्ययस्य वकारांतता संभाव्येत
एवं शसः शकाराभावे औटोडित्वं संभाव्येत। तथा च तेजसी इत्यादौ टिलोपः स्यात्। अथवा लिहाविस्यादौ डित्वसामर्थ्यादभस्यापि टेर्लोपः संभाव्येत। औटष्टकारः सुडिति
प्रत्याहारार्थः ङकारस्तु टाङसिङसां हितीया टा स्वेनइतिविशेषणार्थः। एतेन आदिरन्त्येनेति सूत्रे काशिकाकारेणयदुक्तमंत्येनेति किं सुडिति तृतीयैकवचना
वयवेन मा भूदिति तत्परास्तं। औटष्टकारस्यानन्यार्थतया तेनैव संभवात्प्रत्यासत्तेश्च। अत एव शब्दकौस्तुभे तत्रान्यदेव प्रयोजनमुक्तं मध्यमेनेतासहितआ
दिलदुत्तरेषामपि ग्रहणं मा भूदित्यंत्येनेतिग्रहणं। अंत्येनेतासहितो मध्यमः पूर्वेषामपि मा भूदित्यादिग्रहणमिति। अमुमेवार्थं मनसि निधाय आद्यंताभ्या

विभक्तिश्च ।१।४।१०४। सुप्तिङौ विभक्तिसंज्ञौ स्तः। तत्र सु औ जस् इत्यादीनां सप्तानां त्रिकाणां प्रथमादयः सप्तम्यन्ताः प्राचां संज्ञास्ताभिरिहापि
व्यवहारः। सुपः ।१।४।१०३। सुपस्त्रीणि त्रीणि वचनानि एकश एकवचनद्विवचनबहुवचनसंज्ञानि स्युः। द्व्येकयोर्द्विवचनैकवचने ।१।४।२२।
द्वित्वैकत्वयोरेते स्तः॥

एकवचनम्।वचनसमुदाय आक्षिप्यते इति निष्कृष्टमुक्तं प्राक्। प्रकृतमनुसरामः। ङ प्रभृतीनां ङकाराद्यङ्गितिङ
तामिति विशेषणार्थः। सुपः पकारस्तु प्रत्याहारार्थः॥ ॥ विभक्तिश्च। तिङ स्त्रीणि त्रीणीत्यतस्तिङ् ग्रहणं व्यवहितमपि स्वरितत्वबलादनुवर्तते। सुपइति च
संनिहितमित्यभिप्रेत्याह। सुप्तिङाविति। तिङां विभक्तिसंज्ञायाः प्रयोजनं न विभक्तौ तुस्माः इति। सुपां तु सदादिघत्वादिकमपि। चकारः पृथग्वचनसंज्ञाभ्यां समा
वेशार्थः। अन्यथा एकसंज्ञाधिकारादेकवचनादिसंज्ञाभिः सह वचनद्वय प्रामाण्यात्पर्यायः स्यात्। ततश्च रामेभ्यः नमाम इत्यादौ बहुवचनसंज्ञाप्रवृत्तौ विभक्ति
त्वाभावात्तलोपः स्यात्। इहापीति। अस्मिन्नपि तंत्रे प्रातिपदिकार्थलिङ्गपरिमाणेत्यादौ इत्यर्थः। सुपः। अत्र तिङस्त्रीणि त्रीणीति सूत्रात् त्रीणि त्रीणीति पद
त्रयं एकवचनादिसूत्रं वचनानीति पदं विहायानुवर्तत इति व्याचष्टे सुपस्त्रीणि त्रीणीत्यादिना। एकश इति। एकैकमित्यर्थः। संख्यैकवचनाच्च वीप्सायामिति
शस्। द्व्येकयोः। इहद्व्येकशब्दौ संख्यापरावित्याह। द्वित्वैकत्वयोरिति। संख्येयपरत्वे तु बहुवचनं स्यादिति भावः॥

बहुषु। अयमपि संख्यापर एवेत्याह। बहुत्व इति। बहुवचनं त्वाश्रयद्रव्यगतं बहुत्वं धर्मे आरोप्य वक्तव्यं। तत्फलं तु बहवः पर्वत इति वैपुल्यवाचिनो नेह ग्रहणमिति
सूत्रनमेव। वस्तुतो व्यर्थं तत्परतो द्विकवचनसंभवादिति शब्दकौस्तुभादौ स्थितं। रुत्वविसर्गाविति। ननु रुत्वस्यासिद्धत्वादुकारस्येत्संज्ञालोपयोरभावात् स्था
निवद्भावेशादेशस्यापि त्रिपाद्यामप्रवृत्त्या रेफांतस्य सुप्तिङंतमिति पदसंज्ञाभावेन च विसर्गोत्र दुर्लभः। विधेयस्तु पुनरित्यादौ चरितार्थत्वादिति चेन्मैवं। नेमुनरु
तिसूत्रे नेति योगं विभज्य असिद्धमिति व्याख्यायामिष्टसिद्धिरित्युक्तत्वात्। राम इति। संज्ञाशब्दोयमव्युत्पन्न इति पक्षे अर्थवत्सूत्रेण प्रातिपदिकसंज्ञा। क[?]वि
करणयोश्चेत्यधिकारे घापवादे नेहलश्चेति घञा रमंते तस्मिन्निति व्युत्पादनेन तु कृत्तद्धितेति सूत्रेणेति विवेकः॥ अत्र केचित्परिष्कुर्वंति। गंधर्वः शरभो राम
मरोगवयः शशः। इत्यादौ मृगविशेषे गवायोपशुजातपरत्वमरोक्तपर्यायोपरिपशुविशेषे प्रयुज्यते तदा रूढोयं रामशब्द इत्यर्थवत्सूत्रेण संज्ञा। यदा तु रामचंद्रे भगव
ति प्रयुज्यते तदा रमंते योगिनो यस्मिन्निति व्युत्पत्त्याश्रयणात् कृत्तद्धितेति सूत्रेण संज्ञेति। सरूपाणामेकशेषः। इतरनिवृत्तिपूर्वकमवस्थानं शेषशब्दार्थः। न

बहुषु बहुवचनम्। १।४।२१। बहुत्वे एतत्स्यात्। रुत्वविसर्गौ। रामः। सरूपाणामेकशेष एकविभक्तौ। १।२।६४। एकविभक्तौ यानि
सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते॥ प्रथमयोः पूर्वसवर्णः॥ नादिचि। वृद्धिरेचि। रामौ॥

चविरूपेष्वेकशेषाप्रवृत्त्या घटकलशाविति
इह प्रवृत्तिरिति शंक्यं विरूपाणामिति वार्तिकस्य वक्ष्यमाणत्वात्। वस्तुतस्तु सूत्राक्षरैरेव वार्तिकार्थो लभ्यते। रूप्यते बोध्यते इति रूपमर्थः। समानं रूपं येषामिति
सरूपाः ज्योतिर्जनपदेत्यादिना समानस्य सभावः तथा समानं रूपं स्वरूपं येषां ते सरूपाः सरूपाश्च सरूपाश्च सरूपाश्च सरूपाः तेषामित्येकशेषेण व्याख्यान
ते निवृत्त्यापेक्षत्वात् सव्यापारयोगः [?] वाक्यापरिसमाप्तिन्यायादिति वाच्यं। उद्देश्यतावच्छेदकरूपाक्रांततया स्वस्मिन्नपि प्रवृत्तेः। अन्यथा तुल्यास्यप्रयत्नमित्यादौ सव
र्णदीर्घो न स्यात्। तथा अर्थवत्सूत्रांतर्गतानां प्रातिपदिकत्वं। प्रत्ययः परश्चेत्यत्र तु प्रत्ययः। ससजुषो रुरित्यत्र रुः। खरवसानयोरिति सूत्रे विसर्गश्च न स्यादिति स।
र्वोपप्लवः स्यात्। स्वाध्यायोध्येतव्य इत्यस्य नेह नानेत्यादिश्रुतेश्च स्वस्मिन्नपि यथा प्रवृत्तिस्तथा रीर्यादीनामपीति चेत्तुल्यमेकशेषेपि। एतेन अइउणित्यादावा
वृत्त्यादिसंधिकार्यं कुतो नेत्याशंकायां वर्णोपदेशकाले अजादिसंज्ञानामनिष्पादात्संधिर्नेति केषांचित्समाधानं परास्तं। वर्णोपदेशे इत्संज्ञायामच्प्रत्याहारे

चनिष्पन्नेषु वर्तमानानां गुणादीनामपि दूरत्वादौ तन्न स्थे वउद्देश्यतावच्छेदकरूपाक्रांतेष्वल्पेपदेशादावपि प्रवृत्तेरावश्यकत्वात्। स्यादेतत्। सरूपाणामेकए-
कविभक्तावित्येव सूत्रमस्तु किमनेन शेषग्रहणेन। अत्राहुः। तथाहि सति सरूपाणां स्थाने एकोन्तरतम आदेशो भवतीत्यर्थः स्यात् तथा चाश्वश्चाश्वश्चेत्यत्रोदा-
त्तहूयवतः स्थाने उदात्तहूयवानादेशः। तथा अनुदात्तहूयवतः स्थाने अनुदात्तहूयवानादेशः प्रसज्येतेति। एकविभक्तावित्यादिनीति। विभक्तिः सारूप्ये उपलक्ष-
णं न त्वेकशेषनिमित्तम्। एवं चानैमित्तिकत्वेनान्तरंगत्वादेकशेषः सुबुत्पत्तेः प्रागेव प्रवर्तते। यद्येतन्नारभ्येत तर्हि प्रत्येकं विभक्तिः स्यात् द्वंद्वश्च प्रवर्तेत। आर-
ब्धे त्वेकशेषे नैकसुबंतविरहात् द्वंद्वप्राप्तिरेव नास्तीति भावः। ननु सुबुत्पत्तेः प्रागेकशेषप्रवृत्तौ शिष्यमाणं यत्प्रातिपदिकं तदेकमेवार्थं बोधयतीति द्विव-
चनाद्यनुत्पत्तौ रामौ रामा इत्यादि न सिध्येत्। नैव दोषः। शिष्यमाणस्य लुप्यमानार्थाभिधायित्वात्। अत एव कृत्तद्धितसमासैकशेषेष्वेकशेषो वृत्तिषु गण्य-
ते। परार्थाभिधानं हि वृत्तिः। अत एव च लुगपि प्रत्ययलिङ्बुधुक् इत्यादौ कर्तृप्रणीयत इति दिक्। सरूपाण्येवेति। एतच्च उत्तरसूत्रस्थस्यैवकारस्य इह स्थानु-
कर्षणेन लभ्यते। अत्र च एकस्यामपि विभक्तौ परतः विरूपाणि न दृष्टानीति पर्यवसन्नोर्थः। तेन मातृशब्दयोर्जननीधान्यपरिच्छेत्तृवाचिनोर्नैकशेषः। मातृमा-
तृभिरित्यादौ सारूप्येपि औजसादिषु वैरूप्यात्।

नन्वेवं पयः पयो नयति द नरेव
न्याद्यवति प्रसंगः स्यादेवेति द्वंद्वे त्यागमहाविभाषया एकशेषः प्रवर्तते। इतरेतरयोगद्वंद्वस्य विषय इति यावत्। यत्र त्वनेकस्यार्थस्य मिलितस्य द्वन्द्वान्वयः तत्-
थाभूतो विषयः समाहारद्वंद्व इति। [illegible] यत्नन्यायाच्च। तथाहि। यच्छिष्यते स लुप्यमानार्थाभिधायीति इति स्थिते श्रूयमाणे कृष्णाद्यापर्यवसि-
वेमति [illegible] एकरूप्येणान्वेतुमर्हति। [illegible] इति सूत्रात् द्वंद्व इत्यनुवर्त्य द्वंद्वे प्रसक्ते सतीति व्याख्येयं। न तु द्वंद्वे कृते सतीति। पयसोः पयः इत्या-
दौ [illegible] इत्यादिना समासान्त [illegible] द्वंद्वस्य बाधितत्वात् [illegible] इत्यादिना एकवद्भावापत्तेश्चेति दिक्। सूत्रे शेषग्रहणं कर्मसाधनमित्याहुः। एकशेषः
ष्यत इति। असत्येकग्रहणे हि [illegible] कग्रहणं नैवं मध्ये एकविभक्तावित्यत्र एकग्रहणं व्यर्थमिति शंक्यम्। एकस्यामपि विभक्तौ परतः वि-
रूपाणि न दृष्टानीत्यर्थलाभाय तस्यावश्यकत्वात् [illegible] चा [illegible] समासः समासौ वेष्यादौ विभक्तौ परतः पूर्वभागयोर्वैरूप्यदर्शनात् समा [illegible] इत्येकशेषस्तत्र न स्यात्।

तथास्त्वसूरिचस्त्वस्तो श्चेत्यत्रवैरूप्यदर्शनात्त्वसृष्विति न स्यात्। किंतु कमलौ कमल इत्यादिष्वेवस्यात्। सकृत्तेन्वेकग्रहणेनायं दोषः प्रसज्यते। एकविभक्तौऽपि त
तः पूर्वत्र वैरूप्यादर्शनात्। यदा तु विभक्तावित्यत्रैकत्वं विवक्षितं तदा तु मास्त्वत्र एकग्रहणमित्युच्यते तर्हि स्पष्टप्रतिपत्त्यर्थमेवास्त्विति केचित्। अन्ये तु आहुः
एकग्रहणमेकैकविभक्तावितिअर्थलाभार्थं॥ तथा च सकलविभक्तावित्यर्थलाभादेवकारापकर्षणं विनैव सिद्धमिष्टमिति दिक्। एकश्च एकश्च द्वौ च द्वौ चेत्या
दावेकशेषो न भवत्यनभिधानात्। इंद्वोप्यत्रानभिधानेनैव वारणीयः उत्सर्गतः संख्याशब्देष्वेवमेवा विंशत्यादौ त्वेकशेष इष्ट एवेति बोध्यं॥ ❀ ॥ चुटू ॥
आदिर्ञिटुडवः इत्यत आदिः षः प्रत्ययस्येत्यतः प्रत्ययस्येति चानुवर्त्तते तदाह। प्रत्ययाद्याविति। प्रत्ययाद्याविति किं। चाचाटः। तेन वित्तः श्चुं चुप् चणपा

चुटू। १।३।७। प्रत्ययाद्यौ चुटू इतौ स्तः। इति जस्य इत्संज्ञा॥ न विभक्तौ तुस्माः। १।३।४। विभक्तिस्थास्तवर्गसकारमकारा इतो न स्युः। इति सका
रस्य नेत्त्वं। अतो गुणे ६।१।९७। अपदान्तादकाराद्गुणे परतः पररूपमेकादेशः स्यात्। इति प्राप्ते परत्वात्पूर्वसवर्णदीर्घः। अतो गुण इति
हि पूर्वापवादः अनन्तरान्विधीन्बाधन्ते नोत्तरानिति न्यायेनाकः सवर्णे दीर्घ इत्यस्यैवापवादो न तु प्रथमयोरित्यस्यापि॥ रामाः॥ एक
वचनं संबुद्धिः २।३।४९। सम्बोधने प्रथमाया एकवचनं सम्बुद्धिसंज्ञं स्यात्॥ ॥ ९ विसत्र प्रत्ययादौ यकारो लुप्तनिर्दिष्टस्तेन चस्य भ

नेत्संज्ञेति स्यात्॥ न विभक्तौ ॥ हलंत्यमिती त्संज्ञा प्राप्तौ निषेधारंभः। तु इत्यस्योदाहरणं। रामान्। पचेरन्। मकारस्य तु रामम्। अद्राक्षं। विभक्तौ किं। अ
वापतं। ऊर्णायायुस्। हृधादिभ्यः श्नम्। एतेष्वंत्यस्येत्संज्ञा यथा स्यात्। इदमस्थमुरित्यत्र मकारपरित्राणार्थं मुकारानुबंधासंजनादनित्योयमिति
ज्ञाप्यते अन्यथा प्राद्दिशो विभक्तिरिति प्रथमा विभक्तित्वाद्दानीमोमकारस्यैवानेनैव सूत्रेणेत्वनिषेधसिद्धेः किं तेनेति। तेन किमोत्रुक्तेति सिद्धं। एकवचनं
सुः संबुद्धिरित्येव सुवचं। न च सुप्समीवहु वचनेति प्रसंगः। संबोधने प्रथमेत्यधिकारादेवतदभावादिति न भ्रमः। अत्र व्याचख्युः। सुः संबुद्धिरिति वा
ऽस्तु एकवचनग्रहणमेकार्थ उच्यते येन तावन्मात्रस्य प्रत्ययस्य संज्ञार्थं। अन्यथा सामंत्रितमिति पूर्वसूत्रेत दंतस्यामंत्रितसंज्ञाकृतेति प्रक्रमाभेदा
पदस्यमपिसंज्ञा तदंतस्यैवस्यादिति॥ ❀ ॥

लशक्व। आदिर्ञिटुडव इत्यत आदिरनुवर्त्तते। षः प्रत्ययस्येत्यतः प्रत्ययस्येति। अतद्धित इति पर्युदासाद्धालभ्यत इत्याह। प्रत्ययाद्या इति। लश्च शश्च कुश्च
तेषां समाहारद्वंद्वे लशक्विति नपुंसकं। तदितरेतरयोगद्वंद्वे न विद्यत इति। लशकवर्गा इति। अतद्धित इति किं। प्राणिस्थादात इति लच्। चूडालः। लोमादिभ्यः शः।
लोमशः। अत्र प्रयोजनाभावादेव नेत्संज्ञेति भेदं प्रत्युदाहरणमिति नव्याः। कर्णललाटेति भवार्थे कन्। कर्णिका। सत्यां हीत्संज्ञायां किति चेति वृद्धिः स्यात्।
प्रत्ययाद्या इति किं। जल्पभिक्षेति वृङः षाकन्। वराकः। अत्र क्ङिति चेति गुणो न स्यात्॥ तस्माच्छसो। तच्छब्देन सन्निहितः पूर्वसवर्णदीर्घः परामृश्यते। दीर्घमात्र
परामर्शे तु एता न्गाः पश्येत्यत्रापि नत्वप्रसंगात्। शस इत्यवयवषष्ठी सा चावयवे परत्वेन विशेष्यते पूर्वसवर्णदीर्घात्परस्य शसोऽवयवस्येति। तदेतदाह
परो यः शसः सकार इति। परो यः शसीति न व्याख्यातं। कृते पूर्वसवर्णदीर्घे ततः परस्य शसोऽसंभवात्। अट्कुप्वाङ्॰ रषाभ्यामिति पंचमीनिर्देशाद्व्य

लशक्वतद्धिते। १।३।८। तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः। इति शसः शस्येत्संज्ञा। तस्माच्छसो नः पुंसि। ६।१।१०३। पूर्वसवर्ण
दीर्घात्परो यः शसः सकारस्तस्य नः स्यात् पुंसि॥ अट्कुप्वाङ्नुम्व्यवायेऽपि। ८।४।२। अट्कवर्गपवर्गआङ्नुम् एतैर्व्यस्तैर्यथासम्भवं
मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात् समानपदे। पदव्यवायेऽपीति निषेधं बाधितुम् आङ्ग्रहणम्। नुम्ग्रहणमनुस्वारो
पलक्षणार्थम्। तच्चाकर्त्तुं शक्यम्। अयोगवाहानामट्सूपदेशस्योक्तत्वात्॥ इति णत्वम्। रामान्। पदान्तस्य। ८।४।३७। पदान्तस्य नस्य णत्वं न

वहितस्यापाक्षीव वचनमिदं। तत्र सर्वैर्व्यवायोऽसंभवी। एकैकमात्रव्यवाय इत्यपि नार्थः। क्षुम्नादिषु क्षुम्नपाठसामर्थ्यात्तृप्नोमित्यादिनिर्देशाच्चे
ति अभिप्रेत्याह। व्यस्तैर्यथासंभवं मिलितैश्चेति। नन्वेवं कृत्स्नं कात्स्न्यमित्यादावडादिव्यवधानाभावाण्णत्वाभावेऽप्यादर्शनेत्यादावड्व्यवधानादिति
प्रसंगः। न च अडादिभिरेव व्यवधान इति नियमः। अप्राप्ते विधिरयमित्युक्तत्वात्। सत्यं। योगविभागोऽत्र बोध्यः। व्यवायेऽपीत्येको योगो विध्यर्थः। अट्
कुप्वाङ्नुमित्यन्यो नियमार्थः। छन्दसो भिसो लुक्। अत्र योगविभागं विनापि निर्वाहः सुकर इति नव्याः। तथाहि। अट्कुप्वाङिति सूत्रे रषाभ्यामित्य
नुवर्त्तते पंचम्या श्रुतत्वात्तस्मादित्युत्तरस्येति परिभाषोपतिष्ठते। उपस्थितापि सा वचनप्रामाण्यादडादिव्यवायेन प्रवर्त्तते। तदन्यव्यवाये तु प्रवर्त्तत एव॥ ॥

तथा लुखी अंपश्यतीत्यत्र खीशब्दस्य स्त्रिया इति इयङ् स्यात्। अभ्यारादभिकृते अमिपूर्व इत्येकादेशस्य परादिवद्भावेन प्रत्ययत्वात्। अततेई प्रत्यये ठिलो पे वसत्यकारस्य स्वतएव प्रत्ययत्वाच्च। विधिग्रहणे कृते तु नायं दोषः प्रसज्यते। अम्प्रत्ययस्य अकारादप्रत्ययस्य चाततेर्विहितत्वेपि स्त्रीशब्दादविधानात् स्यादेतत्। वतुपोः मप्रत्ययस्य च स्त्रीशब्दादविधानेपि सो विधिरित्यवतिष्ठते तथा नादवस्थ्यमिति चेन्मैवं। सन्निधानबलेन यस्मात् यः प्रत्ययो विहितः तस्मिन् तदंगमिति व्याख्यानात्। प्रत्ययेकिमिति। तदादिरूपंकि यदित्यपेक्षायां यस्मात्प्रत्यय इति प्रत्ययस्य श्रुतत्वात्प्रत्ययपर्यंतमेवांगं भविष्यतीति मत्वा प्रश्नः प्रत्ययस्य श्रुतत्वेपि प्रत्ययविशिष्टस्येत्यादितोप्यधिकं वा निरवधिकमंगं स्यात् तदादिरित्यस्यार्थे निर्णये प्रत्ययश्रवणस्योप [illegible] सपादित्याशयेन व्याचष्टे। प्रत्ययविशिष्टस्येत्यादिना। प्रत्ययविशिष्टस्येतिकिं। वभ्रश्च। अत्रविशिष्टस्यांगसंज्ञायामुरदित्यदादेशस्य परनिमित्तत्वालाभादचः परस्मिन्निति स्थानिवत्त्वाप्रवृत्त्या न संप्रसारणं द्रु इति निषेधाभावादभ्यासस्य पुनरपि संप्रसारणं प्रवर्त्तेत। तथाप्यर्थं स्यर्थमित्यत्राचि श्नुधातुभ्रुवामिति इयङ् वङौ स्याताम् उकारात्पा अचीत्यनेनाजादौ प्रत्यये रूपलाभात्। ततोधिकस्यांगसंज्ञायां तु देवदत्त ओदनमपाक्षीत् इत्यत्र देवशब्दस्याडागमः स्यात् देवदत्तशब्दात्तु प्रत्ययस्य विहितत्वेन लुङः

टाङसिङसामिनात्स्याः। ७।१।१२। अकारान्तादङ्गाट्टादीनां क्रमादिनादय आदेशाः स्युः। णत्वं। रामेण॥ सुपि च ७।३।१०२। यञादौ सुपि परे अतोङ्गस्य दीर्घः स्यात्। रामाभ्याम्॥ अतो भिस ऐस्। ७।१।९। अकारान्तादङ्गाद्भिस ऐस् स्यात्। अनेकाल्त्वात्सर्वादेशः॥ ॥

प्राग्वर्तिसमुदायस्यांगत्वाद्बहिर्द्वितीयप्रत्ययग्रहणे कृते तु न कोपि दोषः प्रसज्यते। अन्ये तु यस्माल्लुङादिविधिः प्रत्यासन्यात् तस्यैवांगस्याडागमः स्यादिति ततोप्यधिकस्येत्येतदनास्थयोक्तं किंतु एतस्यापि विशिष्टस्यांगत्वे यद्दूषणं तदेवेत्याहुः॥ ॥ टाङसि। अतो भिस ऐस् इत्यस्माद् अनुवृत्तेन अत इत्यनेन सामानाधिकरण्येन विशेषणादंगस्येत्यधिकृतं षष्ठ्यंतमपि पंचम्या विपरिणम्यते विशेषणेन तदंतविधिरित्याह। अकारांतादंगादिति। सुपि च। यञीत्यनुवर्त्तते। अल्ग्रहणमादादिविधिरित्याह। यञादौ सुपीति। यञि किं। रामः। अत इति किं। अग्निभ्यां। अतो भिस ऐस्। ननु एस इत्येवास्तु। न चातो गुण इति पररूपापत्तिः। एकारोच्चारणवैयर्थ्यापत्तेः। अन्यथा इसमेव विदध्यात् इति चेत्सत्यं। ऐ इत्यो हि मात्रत्वाविशेषेण गौरवाभावात्। बहुलं छंदसीत्यत्र अनतो [illegible] भवति। नद्यैरिति काशिकोदाहृतप्रयोगस्य ऐस्करणं विना अनिर्वाहाच्च। केचित्त्वैस्करणं निर्जरसैरित्येकारश्रवणार्थमिति व्याचख्युः। तच्चिंत्यं। सन्निपातपरिभाषया जरसादेशाप्रवृत्ते,

ङेर्यः। ङेरितिं च तुर्थ्येकवचनस्य ग्रहणं। न सप्तम्येकवचनस्य व्याख्यानात्। अत एव ङेरामित्यत्रास्याग्रहणं। समानाधिकरणे स्त्रियां इत्यादिनिर्देशाच्च
स्थानिवद्भावेनेति। आदेशेऽल्विधौ स्थानिवत्त्वनिषेधाभावादिति भावः। सुपि चेति दीर्घ इति। न च परत्वादकृत्सार्वधातुकयोरिति दीर्घः स्यादिति शंक्यं।
तत्रायङ् यि ङ्किति इत्यतः ङ्कितीत्यनुवर्त्तनादन्यथा उरुयेत्यत्रापि दीर्घः स्यात्। उरुशब्दात्परस्य टाइत्यस्य सुपां सुलुगिति यादेशः एतच्च काशिकायां स्पष्टं। यद्य
पि ङेयदेशस्य ङित्त्वमुक्तिनल्पदीति ज्ञापकेन अनुबंधकार्येष्वल्विधावपि स्थानिवत्त्वाभ्युपगमात् तथापि शानचः शित्वेन लिंगेन क्वचिदनुबंधकार्ये
ष्वस्थानिवत्त्वानभ्युपगमादादेशे ङित्त्वेनेत्यभ्युपेत्यैवं विशेषाभावात्परत्वमत्राकिंचित्करमित्यनादरेण वा अकृत्सार्वधातुकेति दीर्घो नोक्त इति स्थितस्य गा
तिमाहुः। ननु ज्यादादीयस इति यस्य ङ्व्यात्परस्य ईयस आकारविधानमंगवृत्तपरिभाषाया लिंगं। अन्यथा वहोर्लोप इत्यतो नुवर्त्यलोपमेव विदध्याद

ङेर्यः।७।१।१३। अतोऽङ्गात्परस्य ङे इत्यस्य यादेशः स्यात्। रामाय। इह स्थानिवद्भावेन यादेशस्य सुप्त्वात्सुपि चेति दीर्घः। सन्निपातलक्षणो
लो विधिरनिमित्तं तद्विघातस्येति परिभाषा तु नेह प्रवर्त्तते। कष्टाय क्रमण इति निर्देशेन तस्या अनित्यत्वज्ञापनात्। रामाभ्यां। बहुवचने झ
ल्येत्।७।३।१०३। झलादौ बहुवचने सुपि परे अतोऽङ्गस्य एकारः स्यात्। रामेभ्यः। बहुवचने किं। रामः रामस्य। झलि किं। रामाणां। सुपि किं। पचध्व

कारं तु न विदध्यात्। अकृत्सार्वधातुकयोरिति दीर्घेण ज्यायानिति प्रसिद्धेरिति भाष्ये स्थितं। तदिदानीं विरुध्येत। ङ्कितीत्यनुवृत्तौ तु ज्यायानित्यत्राकृत्सार्वधातु
दीर्घाप्रसक्तेः तथा चाकृदिति सूत्रे ङ्कितीति नानुवर्त्तनीयं। उरुयेत्यत्र दीर्घाभावः छांदस इत्येवाभ्युपेयं इति चेत्। अत्राहुः। ज्ञाजनोर्जा इत्याकारग्र
हणमकृत्परिभाषालिंगं। अन्यथा जेमवदिदध्यात्। अतो दीर्घो यञि जायते जानातीत्यादौ दीर्घसिद्धेरित्यपि भाष्ये स्थितं। तच्च ज्ञापकमकृदित्यत्र ङ्कि
तीत्यनुवृत्तावपि संगच्छते। एवं च सति ज्यादादित्याकारग्रहणं लिंगमिति तु भाष्यप्रौढिवादमात्रमस्तु। सन्निपातेति। सन्निपातः संश्लेषः तल्लक्षणो निमित्तं
यस्य स सन्निपातलक्षणः तं सन्निपातं विहन्तीति तद्विघातः कर्मण्यण्। कृत्तत्वे। उपजीव्यविघातकविधेर्निमित्तं न भवतीत्यर्थः॥ रामः रामस्येत्यत्र स
न्निपातपरिभाषयाप्यत्वं सुपरिहरं तथाप्यदः सर्वेषामिति निर्देशादित्यादि धामसन्निपातपरिभाषा न प्रवर्त्तत इत्याशयेनोक्तं इति स्थितस्य गतिः समर्थनीया।

सु॰
सि॰ कौ॰
टी॰ त॰
४०

वावसाने इति। अत्राहुः। जश्त्वे कृते अवसाने चर्त्वमिति न मंतव्यं किंतु येन नाप्राप्तिन्यायेन अवसाने चर्त्वस्य जश्त्वापवादत्वात् चर्त्वाभावपक्षे जश्त्वमिति योज्यं हिलव इति। अनचि चेत्यमे
न अनचीति प्रसज्यप्रतिषेध इति प्रागेवोक्तं। पर्युदासाभ्युपगमे तु रहल्विति रूपं न स्यात्। नादेश आरभ्यत इति। वत्स्यतीत्यादौ चर्त्वेन तकारो न लभ्यत इति सस्यार्धधातुकस्ये
नेन सकारस्य तकारो विधीयत इत्यर्थः। ह्रस्वनद्यापो। अंगस्येत्यनुवर्तते। तच्च पंचम्यंतेन। सामानाधिकरण्यात्। अंगादिति विपरिणम्य ह्रस्वादिभिर्विशेष्यते विशेषणे
तदंतविधिरित्याशयेनाह। ह्रस्वांतादिति। एतेन ह्रस्वनद्याप इति पंचमी न तु षष्ठीति स्फोटितं। ज्ञापकं त्वत्र नामीति। न हि प्रकृत्यागमत्वे अंगसंज्ञाविमित्तं नाम संभवति। एवं
चानया पंचम्याः अन्यार्थतया तस्मादित्युत्तरस्येति परिभाषोपस्थित्या आमि सर्वनाम्नः सुडित्यतो नुवृत्तं नामीति सप्तम्यन्तं षष्ठ्या विपरिणम्यते आमीति सप्तम्या
स्त्वपर इत्यत्र चरितार्थत्वादित्यभिप्रेत्याह। आमो नुडागमः स्यादिति। अत्र नव्याः। नुडिति योगं विभज्यांगात्परस्यामो नुडित्युत्सर्गविधिं कृत्वा नद्यापि

वावसाने। ८।४।५६। अवसाने झलां चरो वा स्युः। रामात्। रामाद्। द्वित्वे रूपचतुष्टयं। रामाभ्यां। रामेभ्यः। रामस्य। सस्य द्वित्वपक्षे खरि चे
ति चर्त्वेऽप्यांतरतम्यात्सस्य स एव। न तु तकारः। अल्पप्राणतया प्रयत्नभेदात्। अत एव सः सीति तादेश आरभ्यते। ओसि च। ७।३।१०४। ओ
सि परे अतोऽङ्गस्यैकारः स्यात्। रामयोः। ह्रस्वनद्यापो नुट्। ७।१।५४। ह्रस्वान्तान्नद्यन्तादावन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्॥

इत्यंशेन दीर्घात्परस्यामो नुट् चेद्भवति तर्हि नद्याप एवेति नियमविधिं व्याख्याय ह्रस्वग्रहणं प्रत्याख्येयं। न चैवं लिहां दुहामित्यादौ अतिप्रसंग इ
ति वाच्यं। हलं ताच्चेद्भवति तर्हि षट्चतुर्भ्य एवेति नियमाभ्युपगमात्। ध्वंस्वनडुहां कतिपय चतुरां युजिक्रुंचां झलामित्यादिनिर्देशाच्च। तस्मात् ह्र
स्वग्रहणप्रत्याख्यानेन को विरोध इत्याहुः। अत्र वदंति। नुडिति पृथक्। योगे कृते सति ङे रामि कृते परमप्यां टं बाधित्वा अंतरंगत्वाद्रामो नुट् स्यात्
तथा च परत्वाद्दाटा नुट् बाध्यत इति वक्ष्यमाणग्रंथेन आटि कृते सकृद्गतिन्यायात् नुट् नेति भाष्यग्रंथेन च। विरोधः स्यात्। यद्यपि नियमसूत्राणां वि
धिमुखेन प्रवृत्तिरिति पक्षे ङे रामि कृते तस्य नद्याप इत्यनेनैव नुडागमे प्रसज्यमाने आण्नद्या इत्यनेन स बाध्यत इति परत्वाद्रामे नुट् बाध्यते इत्यादि ग्रं
थः संगच्छते तथापि नियमसूत्राणां निषेधमुखेन प्रवृत्तिरिति पक्षे परमपि आटं बाधित्वा अंतरंगत्वान्नुट् स्यादेव। किंच नद्याप इत्यत्र नद्यापः परं।

ङ्गं मा भूदिति। स्यादेतत्। नुडागमस्यामभक्त्वा आम्ग्रहणेन सनकारोप्याम् गृहीष्यत इति। आमीत्येव सूत्रमस्तु। न चामीति दीर्घस्य कृताकृतप्रसंगित्वे
न नित्यत्वात्परमपि नुटं बाधित्वा अग्नीनामित्यत्र दीर्घे कृते ह्रस्वाश्रयो नुट् न भवेदिति वाच्यं। ह्रस्वान्नात्तु नुडिति वचनसामर्थ्यात् कृतेपि दीर्घे भूतपूर्वह्रस्वा
श्रयेणैतत्प्रवृत्तेः। नापि न तिसृचतसृ इति निषेधात्तिसृणामित्यत्र ह्रस्वान्तान्नुडिति वचनस्य प्रयोजनमस्तीति वाच्यं। चतसृणामित्यत्र षट्चतुर्भ्यश्चेत्यनेनैव
नुट्सिद्धेः। ह्रस्वनद्याप इति सूत्रे त्रेस्त्रय इत्यतः त्रेरित्यनुवर्त्य त्रिशब्दात्परस्यामो नुडिति व्याख्यानात्। तिसृणामित्यत्रापि तत्सिद्धेः। यद्यपि नृणामित्यत्र प्रयोजन
मस्ति तथापि नैकमुदाहरणं ह्रस्वग्रहणं प्रयोजयति। अन्यथा नृनद्यापः इत्येव वदेत्। तस्मादामीत्युक्तौ न किंचिद्बाधकमस्ति इत्यामः सनकारस्य ग्रहणमनर्थक
मिति चेदत्रोच्यते। उत्तरार्थं सनकारग्रहणं कर्त्तव्यं नोपधाया इति दीर्घो नामि यथा स्यात्। चर्मणां वर्मणामित्यत्र मा भूदिति। तदुक्तं वार्तिककृता। नामि दीर्घ आमि
चेत्स्यात्कृते दीर्घे न नुट् भवेत्। वचनाद्यत्र तन्नास्ति नोपधायाश्च चर्मणामिति। अत्र वदंति। वचनाद्भूतपूर्वगत्याश्रयेण तत्प्रवृत्तिरित्येतच्चिंत्यं। गौणत्वे षट्चतु
र्भ्यश्चेति नुडप्रवृत्त्या प्रियचतसृणामित्यत्र नुडर्थं ह्रस्ववचनस्य चरितार्थत्वेन सामर्थ्यानुपक्षयात्। तत्र हि नुमचिरेति रादेशात्पूर्वविप्रतिषेधेन नुडिष्यत इति
नदप्युक्तं। ऋन्नद्याप इति सूत्रेपि ऋदंतान्नुट्सिध्यत्वेति ह्रस्वग्रहणस्य सामर्थ्यानुपक्षीणत्वादिति दिक्। परिभाषाविरोधादिति। कृताकृतप्रसंगित्वेन नामी
ति दीर्घस्य नित्यत्वात्परोपि सुपि चेति दीर्घो न प्रवर्तेत इति नोक्तं। शब्दांतरस्य प्राप्नुवन्विधिरनित्यो भवतीति नामीति दीर्घस्याप्यनित्यत्वात्। आरंभसामर्थ्या
दिति। सुपि चेत्यस्य तु न सामर्थ्यं रामाभ्यामित्यादौ सावकाशत्वादिति भावः। ननु कतीनामित्यत्र परत्वात्षट्चतुर्भ्यश्चेति नुटि नामीति दीर्घः सन्निपातपरि
भाषामबाधित्वैव प्रवर्त्तत इत्यारंभसामर्थ्यस्योपक्षयान्नामीति सूत्रमपि रामाणामित्यत्र सन्निपातपरिभाषया न प्रवर्त्तेत तथा च आचार्याणामिति निर्देशो
नोक्तपरिभाषाया अनित्यत्वमाश्रित्य सुपि चेति दीर्घ एव परत्वात्प्रवर्ततामिति चेत्। अत्र केचित्समाधयंति। चतुर्ग्रहणसाहचर्यात् हलंतषट्संज्ञकादेव
परस्यामः षट्संज्ञाश्रयो नुट् भवति न तु कतिशब्दात्परस्यामः तथा च कतीनामित्यत्र ह्रस्वाश्रय एव नुडित्यारंभसामर्थ्येनोपक्षीणमिति तदपरे न स
मंते रेफोपधाहलंतसंज्ञकस्तथा अन्संज्ञकोपि भवतीत्यमं तषट्संज्ञकादेव परस्यामः षट्संज्ञाश्रयो नुट् भवति न तु षकारांतात्परस्येति वक्तुं शक्यतया षण्णामि

त्यत्रनुडभावप्रसंगान्न तस्मादिहसाहचर्येनग्राह्यमेव। अन्नतुषट्चतुर्भ्यइतिवहुवचननिर्देशादर्थपरोयंनिर्देशस्तथाचार्थप्राधान्यंयत्रतत्रैवषट्संज्ञाश्रयोनुट्
भवतिनतुप्रियषट्चतुरोप्रियषषामित्यादाविति सिद्धांतात्। वहिरंगःषट्संज्ञाश्रयोनुट्। तथाचांतरंगत्वात्कृतीनामित्यत्रह्रस्वाश्रयएवनुडितिनामीतिदीर्घःसन्निपात
परिभाषांवाधित्वैवप्रवर्ततेतनश्चारंभसामर्थ्यादितिमूलोक्तग्रंथस्यनकाप्यनुपपत्तिरितिसमादधुः। इतरेतुआरंभसामर्थ्यादित्यस्यायमर्थः। नतिसृचतसृइतिनिषेधा
रंभसामर्थ्यादितिनिसृणामित्यत्रह्रस्वांतलक्षणोनुट्कृतेनामीतिदीर्घप्रसक्तौहिनतिसृचतसृइतिनिषेधआरभ्यते। सन्निपातपरिभाषयादीर्घाप्रवृत्तौतुकिमनेननिषेधे
नानेनज्ञायतेनामीतिदीर्घःसन्निपातपरिभाषांवाधतइति। यैस्तुह्रस्वनद्यापइत्यत्रह्रस्वग्रहणंप्रत्याख्यायतेतैस्तुनामीतिदीर्घेआरंभसामर्थ्येनाश्रयणीयमेव। अप्र
तस्यषइत्येवसिद्धेमूर्धन्यग्रहणमिणःषीध्वमितिढत्वार्थं। चकृढ्वे। अकृढ्वं ॥ ❀ ॥ इण्कोः॥ समाहारद्वंद्वेसौत्रंपुंस्त्वं। कोःकिं। गवाक्षु। गवाङ्क्षु। आदेशप्र

इण्कोः ८।३।५७। इत्यधिकृत्य। आदेशप्रत्यययोः ८।३।५९। सहेःसाडःसइतिसूत्रात्सइतिषष्ठ्यन्तंपदमनुवर्तते। इण्कवर्गाभ्याम्पर
स्याऽपदान्तस्यादेशस्यप्रत्ययावयवस्यचयःसकारस्तस्यमूर्धन्यादेशस्स्यात्। विवृताघोषस्यसस्य तादृशएवषः। रामेषु। इण्कोःकिं।
रामस्य। आदेशप्रत्यययोःकिं। सुपीः। सुपिसौ। सुपिसः। अपदान्तस्यकिं। हरिस्तत्र। एवंकृष्णमुकुन्दादयः॥ ॥

त्यययोः। प्रत्ययशब्दःप्रत्ययावयवेलाक्षणिकः। हलिसर्वेषामितिनिर्देशात्सात्पदाद्योरित्यत्रसातिग्रहणाच्चलिंगादित्याशयेनव्याचष्टे आदेशःप्रत्यय
वयवश्चेति। यदितुआदेशावयवोगृह्येततर्हितिसृणामित्यादौदोषः। यद्यपिसकारोच्चारणसामर्थ्यात्तत्रषत्वंनस्यात्तथापिविसिंविसंमुसलंमुसलमित्यादौषत्व
दुर्वारंस्यात्। आष्टमिकद्विर्वचनस्यादेशरूपत्वात्। यदितुप्रत्ययावयवःसकारइतिगृह्येततर्हिरामेषुकरिष्यतीत्यादौनस्यात्। किंतुइंद्रोमावक्षदित्यादावेवस्यात्तथा
हमनोरमायामकापिपक्षौविषयभेदात्भिद्येते इत्युक्तौसहविधिशास्त्रमावृत्तिसौत्रत्वात्द्वंद्वइत्युक्तंतत्तुप्रत्ययशब्देनलक्षणमनंगीकृत्यपयाश्रुतामिदंद्वन्द्व
क्तमितिवोध्यं। विवृताघोषस्येति। विवृतस्यसस्यतादृशएवषुत्वेएवचकारोऽप्ययंसंगच्छत्। हारणायाघोषस्येति। अघोषस्येत्येतावदुच्यमानेठकारइतिप्रसंगःनहार
णयोमयमुपात्तं। तादृशएवषइति। तादृशएवषादेशोभवतिनान्यइत्यर्थः। ननुइधिसेचौइधिसेचइत्यादौप्राक्सुवुत्पत्तेःसमासेषत्वंवारयितुं

सु
सि॰कौ॰
टी॰त॰
४२

पदादाविति पंचमीसमासो भाष्ये उक्तः तत्रश्च इहापि सात्पदाद्योरिति निषेधः करिष्यतीत्यादौ षत्वविधेः सावकाशत्वादिति चेन्मैवं । स्वादिष्विति यापदसंज्ञा तामा श्रित्य उक्तनिषेधो न प्रवर्त्तते इति सातिग्रहणेन ज्ञापितत्वात् ॥ रामस्येति ॥ टाङसिङसामिनात्स्या इति वक्तव्ये सकारोच्चारणसामर्थ्यात्षत्वं न भवेन्न डादिषु अमुष्येति निपातनान्नन्ततः फगादौ आमुष्यायणेत्यादिवार्त्तिकनिर्देशाच्च अमुष्येत्यत्र षत्वं भवेत् । तर्हि विश्वपास्वित्यादि प्रत्युदाहर्त्तव्यं । न च तत्रापि षुत्विति क क्तव्ये सुवितिसकारोच्चारणसामर्थ्यादेव न भवेदिति शंक्यं । लिट्सु प्रश्नात्सुरस्यत्र ङःसिधुट् न श्चेति धुट्ः प्रवृत्तये सकारोच्चारणस्यावश्यस्वीकर्त्तव्यत्वादिति दि क् ॥ ॥ सर्वादीनि इति ॥ तद्गुणसंविज्ञानो बहुव्रीहिरयं अदः सर्वेषामिति लिंगात् आदिशब्दोऽत्रावयववाची सर्व आदिराद्यवयवो येषां तानीति विग्रहः । उद्भूताव यवभेदः समुदायः समासार्थ इति बहुवचनं तस्य समुदायस्य युगपत्त्वस्य प्रयोगाभावादानर्थक्यात् तदंगेष्विति न्यायेन तदवयवेषु प्रवर्त्तमाना सर्वनामसंज्ञा विशेष्यात्सर्वशब्देऽपि प्रवर्त्तत इति युक्तं । तद्गुणसंविज्ञानत्वं तस्यान्यपदार्थस्य गुणाः वर्त्तिपदार्थरूपाणि विशेषणानि तेषां कार्यान्वयितया संविज्ञानं यत्र स

सर्वादीनि सर्वनामानि । १ । १ । २७ । सर्वादीनि शब्दरूपाणि सर्वनामसंज्ञानि स्युः । तदन्तस्यापीयं संज्ञा । द्वन्द्वे चेति ज्ञापकात् । तेन परम सर्वत्रेति च ॥ परमभवकानित्यत्राकच्च सिध्यति ॥ ॥

२७ तद्गुणसंविज्ञान इत्यस्यार्थः । लोकवेदयोरपि संयोगसमवायान्यतरसंबंधे लो हितोष्णीषा ऋत्विजश्चरंति लंबकर्णमानयेत्यादौ तद्गुणसंविज्ञानत्वमेव । स्वस्वामिभावसंबंधे त्व तद्गुणसंविज्ञानत्वं चित्रगुमानयेत्यादौ । ननु सर्वनामा नीत्यत्र पूर्वपदात्संज्ञायामिति णत्वं कस्मान्न भवति । सौत्रत्वान्नेति चेल्लोके सर्वणामशब्दस्य साधुत्वापत्त्या सर्वनामसंज्ञानि स्युरित्युत्तरग्रंथस्यासाधुत्वापत्तेरिति चेन्नैवं । निपातनाण्णत्वं नेति । भाष्योक्त्या व्याख्याश्रयणादिष्टसिद्धेः । अत्र भाष्यानुसाराद्बाधकान्येव निपातनानि भवंतीति पक्ष आश्रितः । अबाधकान्यपि निपा तनानि भवंतीति पक्षस्तु विभाषा फाल्गुनीति सूत्रे श्रवणाशब्दे निपातितेऽपि श्रावणीति प्रयोगोऽपि साधुरित्येवमर्थं आश्रयिष्यते । विशेषणानुगुणं विशेष्यमध्या हरति । शब्दरूपाणीति ॥ द्वंद्वे चेति । स हि निषेधः समुदायस्यैव न त्ववयवानामिति वक्ष्यति । न च तदंतविधिं विना समुदाये संज्ञाप्रसक्तिरस्तीति भावः । नन्वेवं गाधि कारे तदंतविधिनैव परमसर्वस्मा इत्यादौ स्मायादिसिद्धेस्तदंतसंज्ञायाः किं फलमित्यत आह । तेनेति । न चेहापि प्रातिपदिकादित्यनुवृत्तेः । सर्वनाम्नात्तद्वि

ष्यत्राधिकलोपादित्युक्तत्वात्। ननु सर्वेषां नाम सर्वनामेत्यन्वर्थत्वात्संज्ञायाः सर्वविश्वादय एव संज्ञिनो भविष्यंति नान्ये इति किमनेन पंचत्रिंशदिति परिग
णनेन सर्वादीनि इति सूत्रेणवाभेवा परिगणनाभावे कृत्स्नसमस्तादिष्वतिप्रसंगात्। एवं च पंचत्रिंशत्संख्याकानि सर्वादीन्येव सर्वनामसंज्ञकानि नान्यानी
ति नियमाय सर्वादीनि इति सूत्रमत्यावश्यकं। न त्वनुनासिकसंज्ञासूत्रमिव मंदप्रयोजनमिति बोध्यं। पूर्वपरा। व्यवस्थायामसंज्ञायां यानि पूर्वापरावरदक्षिणो
त्तरापराधराणि तानि सर्वादिगणपठितविशिष्टानि नान्यानीत्यर्थः। सर्वनामसंज्ञा तु सर्वादीनि सर्वनामानीत्यनेनैव सिध्यति। एवमुत्तरसूत्रद्वयेपि बोध्यं। अत एवेति। द्वयोर्द्विवचन
स्यैव युक्तत्वादिति भावः। नित्यं द्विवचनांतं इति। सर्वदा द्विवचनांत इत्यर्थः। न चैवं उभादुदात्तो नित्यं उभस्य सर्वनामत्वे कोर्थः इति सूत्रकारभाष्यकारप्रयोगो विरु
ध्यत इति शंक्यं। अर्थपरस्यैव नित्यं द्विवचनांतत्वं न तु स्वरूपानुकरणपरस्येत्यभ्युपगमात्। अथ सर्वादिषु उभशब्दपाठो व्यर्थः। सर्वनामकार्याणां स्मायादीनां द्विव
चने भावात्। न च सर्वनाम्नस्तृतीया चेति सूत्रेण उभाभ्यां हेतुभ्यां उभयोर्हेत्वोरिति षष्ठीतृतीयासिद्धिस्तत्फलमिति वाच्यं। निमित्तकारणहेतुषु सर्वासां प्रायदर्श
नमिति वार्तिकेनैव गतार्थत्वात्। न च वृत्तिकृता सर्वनाम्नस्तृतीया चेति सूत्रे पठितत्वादिदमपि वार्तिकं सर्वनाम्न एव सर्वविभक्तिप्रापकं नान्यस्येति वाच्यं। भा
ष्ये हेताविति सूत्रे तद्वार्तिकस्य पठितत्वात् इत एवान्नेन कारणेन वसति अन्नस्य कारणस्येत्युदाहृतं हरदत्तेनेत्याशंक्याह। तस्येह पाठस्त्विति। ननु कप्रत्य
येनापीष्टसिद्धेः किमनेन अकजर्थपाठेन। न च काकचोः स्वरे विशेषोस्तीति वाच्यं। प्रत्ययस्वरेण चित्स्वरेण वांत्योदात्तत्वे विशेषाभावादित्याशंक्याह। नचेति
उभशब्दस्य द्विवचनपरत्वं अकच्प्रत्ययो न विहंति टेः प्राक् जायमानत्वात्तन्मध्यपतितस्य तद्ग्रहणेन ग्रहणात्। कप्रत्ययस्तु विहंत्येव प्रातिपदिकात्परत्र
जायमानत्वादित्याशयेनाह। द्विवचनपरत्वाभावेनेति। अयच्प्रसंगादिति। उभशब्दात्त्रतसोः परतः स्वार्थे यथा अयच् भवति न तथा कप्रत्यये सति स्यादिति भा
वः। यद्यपि स्वार्थे अयच् दृष्टांतेपि दुर्लभस्तथाप्युभादुदात्त इति सूत्रे नित्यमिति योगविभागात्सुलभ एव। तथा हि। उभादुदात्तः। द्वित्रिभ्यामिति सूत्राद्वेति नानुवर्तति
अस्वरितत्वात्। अवयववृत्तेः संख्यावाचिन उभशब्दादवयविन्यर्थे अयच् स्यात्। उभयो मणिः। उभयः पाशः। ततो नित्यं। उभशब्दाद्वृत्तिविषये नित्यमयच् स्या

त्स्वार्थे जेम उभयतः उभयत्र उभयपक्षविनीतनिद्रः स्या—दिसिद्धं। नन्वेवमकचि कृतेप्ययच् दुर्वारः। वृत्तिविषये स्वार्थे नित्यमयजिति लघ्वैवोक्तत्वादिति

एकाचश्चायामिति विहितौ। अभ्युत्पन्नाविति। एतच्चपक्षद्वयं कैयटे स्पष्टं। एके इति काशिकाकाराः। एतं त्वंमन्ये इत्युदात्तस्य उतत्वः पश्यन्नित्यनुदात्तस्य च दर्शना
दितिभावः। एक इति। प्रथम इत्यर्थः। संहितया पाठे तां तत्वस्यास्फुटत्वेपि तां त प्लुतव्यः। अन्यथा एकश्रुत्या सकृदेव पठेत्। न च तां ते विप्रतिपत्तव्यं। त्वत्त्वसमसि
मेत्यनुच्चानीति पित्त्वात्। तथा च ऋङ्मंत्रः। स्तरीरु त्वद्भवति सूत उ त्वदिति। जयदेवोपि प्रायुंक्त। त्वद्धरमधुरमधूनि पिबं तमिति। त्वत्तोऽन्यस्याधर इति वि
ग्रहे मयूरव्यंसकादित्वात् त्वदधर इति। पश्यैसि दिशि दिशि रहसि भवं तमिति पूर्ववाक्येन सहानन्वयापत्तेः। सम इति। तथा च श्रूयते। मानो वृकाय वृक्ये समस्मै। उतो समस्मि
न्नित्यादि। सिमः कृत्स्ने वर्तमानस्य च सान्मर्यादावचनयोः। गणसूत्र इति। यद्यपि भाष्ये अष्टाध्यायीस्थसूत्रे पूर्वाणीति वक्तव्यमिति वार्त्तिकं पठितं तथापि तद्गणसूत्रस्यैव
शेषो न तु जसि विभाषा [illegible] तस्य। अतइ [illegible] सघि [illegible] जसः शीविधानादेवं तास्याप्यभावात्। अंतरायामिति। प्राकाराद्बाह्यायां तदंतवर्त्तिन्यां वेत्यर्थः। लिंगविशिष्ट
परिभाषया एकदेशस्य पूर्वोत्तत्वेन ग्रहणात् सर्वनामतायाः प्राप्ति र्वोध्या। न्यद्गतद्गतौ उक्तपरामर्शकौ। तत्रापि यच्छब्दं इस इति गणरत्नकारोक्तिर्नादर्तव्या। स्वच्छंदं
इत्येव तुल्यमिति सूत्रेत्वं [illegible] ग्रहणे वैयर्थ्यापत्तेः एक इति एको न्यार्थे प्रधाने च प्रथमे केवले तथा। साधारणे समानेऽल्पे संख्यायां च प्रयुज्यते। इत्थं सर्वादिगणं व्याख्याय
दानीं तदंतर्गतत्रिसूत्रीसमानाकारामष्टाध्यायीस्थां त्रिसूत्रीं व्याचष्टे पूर्वापरेत्यादिना। स्वाभिधेयेति। स्वस्य पूर्वादिशब्दस्याभिधेयेनापेक्ष्यमाणस्यावधेर्निय
म इत्यर्थः। अपेक्षत इत्यपेक्षः कर्मणि घञ्। कथं तर्हि दिशः सपत्नी भव दक्षिणस्या इति। अत्राहुः। अस्त्येवात्रापि व्यवस्था। प्रसिद्धत्वात्त्वावधिवाची शब्दः प्रयुज्यते। न
त्वसंज्ञायामिति निषेधः। आधुनिकसंकेतो हि संज्ञा न च दिक्षु सास्तीति। दिक्षु चिरंतनः कुरुषु त्वाधुनिकः संकेत इत्यत्र तु व्याख्यानं वचनमेव प्रमाणं। एतेन विश्वेषां देवानामि
ति व्याख्यातं वेद प्रसिद्धत्वाद्देवगणविशेषे विश्वशब्दस्याधुनिकसंकेताभावात्। दक्षिणगाथका इति। गाथकन्निति शिल्पिनि थकन्। इहामुकस्मात्कुशला इत्य
वध्यन्वय संभवेपि तन्नियमो नास्तीति भावः। एवमधरे तांबूलरागः। उत्तरे प्रत्युत्तरे च शक्तवत्यपि प्रत्युदाहर्तव्यं। उत्तराः कुरव इति। सुमेरुमवधिमपेक्ष्य कुरुषु उत्त
र शब्दो वर्तत इत्यस्तीह व्यवस्था। किं त्वाधुनिकसंकेतो यमित्याहुः॥ ॐ ॥

स्वमज्ञेति। आत्मात्मीयज्ञातिधनवाची स्वशब्दस्तत्र ज्ञातिधनयोः पर्युदासादात्मात्मीयौ परिशिष्टाविति आशयेन व्याचष्टे। आत्मीया इत्यर्थः। आत्मान इति वा। अत्र कुं
आत्मनि स्वशब्दो नपुंसकस्तेन स्वे स्वा इत्युदाहरणं तत्रायुक्तमिति न [illegible]। स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धन इत्यमरसिंहोक्तेरात्मन्यपि स्वशब्दस्य
पुंस्त्वात्। न च स्वो ज्ञाताविति अमरकोशे आत्मनीत्यस्य स्वमित्युत्तरेणान्वयादात्मवाची स्वशब्दो नपुंसक एवेति वाच्यं। स्वः स्यात्पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीये स्त्रियां धने इति
मेदिनीकोशविरोधात्। आत्मनीति पूर्वान्वयेन तु अत्रान्वयेऽपि इति व्याख्यातुमुचितत्वात्। किं चाविभाषा जसीति प्रकरणे स्वमात्मीय इत्येव वक्तव्ये गुरुनिर्देशं कुर्वन् सू

स्वमज्ञातिधनाख्यायाम्। १।१।३५। ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्राप्ता संज्ञा जसि वा स्यात्। स्वे। स्वाः। आत्मीया इत्यर्थः। आत्मान इति वा॥
ज्ञातिधनवाचिनस्तु स्वाः ज्ञातयोऽर्था वा॥ अन्तरं बहिर्योगोपसंव्यानयोः। १।१।३६। बाह्ये परिधानीये चार्थेऽन्तरशब्दस्य प्राप्ता संज्ञा जसि वा
स्यात्। अन्तरे। अन्तरा वा गृहाः। बाह्या इत्यर्थः। अन्तरे अन्तरा वा शाटकाः। परिधानीया इत्यर्थः॥ पूर्वादिभ्यो नवभ्यो वा। ७।१।१६। एभ्यो
ङसिङ्योः स्मात्स्मिनौ वा स्तः। पूर्वस्मात्। पूर्वात्। पूर्वस्मिन्। पूर्वे। एवं परादीनामपि। शेषं सर्ववत्। एकशब्दः संख्यायां नित्यैकवचनान्तः॥
न बहुव्रीहौ। १।१।२९। बहुव्रीहौ चिकीर्षिते सर्वनामसंज्ञा न स्यात्। त्वकम्पितृकः। त्वकं पिता यस्य सः त्वत्कपितृकः। अहकम्पितृकः अहकं पिता यस्य सः मत्कपितृकः। इह
समासात्प्रागेव लौकिके प्रक्रियावाक्ये सर्वनामसंज्ञा निषिध्यते। अन्यथा लौकिके विग्रहवाक्य इव तत्राप्यकच्प्रवर्तेत। स च समासेऽपि श्रू-
येत। अतिक्रान्तो भवकन्तमतिभवकानिति वत्। भाष्यकारस्तु त्वकत्पितृको मकत्पितृक इति रूपे इष्टापत्तिं कृत्वैतत्सूत्रं प्रत्याचख्यौ॥ संज्ञोपस-
र्जनीभूतास्तु न सर्वादयः। महासंज्ञाकरणेन तदनुगुणानामेव गणे सन्निवेशात्। अतः संज्ञाकार्यमन्तर्गण-
कार्यं च तेषां न भवति। सर्वो नाम कश्चित्तस्मै सर्वाय देहि। अतिक्रान्तः सर्वमतिसर्वस्तस्मै अतिसर्वाय। अतिकतरं कुलं। अतितत्॥

त्रकारोऽप्यात्मवाचिस्वशब्दस्य पुंल्लिङ्गे प्रमाणं। तस्मात् स्वे स्वा इत्यस्य आत्मान इति विवरणं सम्यगेवेति स्थितं ज्ञातिधनवाचिनस्त्विति। ता... ज्ञा-
तिधनयोरप्यात्मीयत्वे पुरस्कृते प्रवर्ततेऽसर्वनामतास्त्येवेति ... हि सूत्रे आख्याग्रहणं कृतं स्वमात्मीयाख्यायामिति वक्तव्ये ...

सु॰
सि॰ कौ॰
टी॰ त॰
४५

दासाः श्रयणं मात्रालाघवाय। न च स्वमात्मीयमयोरित्युच्यमाने आस्वाग्रहणं नापेक्षितमिति वाच्यं। वस्तुतः आत्मीयस्यापि ज्ञातित्वेन धनत्वेन विवक्षायां सर्वनामता

मा भूदिति तस्यावश्यकत्वात्। अंतरं बहिर्योगोपसंव्यानयोरिति। बहिरित्यनावृत्तो देशो बाह्यं चोच्यते। तत्राद्यमर्थं गृहीत्वाह। बाह्य इत्यर्थ इति। द्वितीये त्वा

भ्यंतर इत्यर्थो बोध्यः। बाह्येनाभ्यंतरस्य योगोस्ति। अर्थद्वयमप्याकरे स्थितं। इदमेवार्थद्वयं मनसि निधाय अंतरायां पुरीत्यत्र प्राकाराद्बाह्यायां तदंतर्वर्तिन्यां

वेति व्याख्यातं। उपसंव्यानशब्दोपि करणव्युत्पत्त्या उत्तरीयपरः। कर्मव्युत्पत्त्या त्वंतरीयपरः। एकशब्दस्याष्टावर्था उक्ताः तत्र विशेषमाह। संख्यायामिति। अन्य

थानुसमस्तस्वर्थेषु वचनांतरमपि स्यादेषां एके एकेषामिति यथेति भावः। न बहुव्रीहौ। कृते बहुव्रीहौ निषेधोऽयमर्थः। उपसर्जनीभूतानां सर्वादय इति वक्ष्यमाण

त्वात् अत आह। चिकीर्षित इति। बहुव्रीहावित्यत्र विषयसप्तम्याश्रयणादयमर्थो लभ्यते। त्वकमिति। अज्ञाते कुत्सिते वा व्यपसर्वनाम्नामित्यकच्। एवमहक

मित्यत्रापि। प्रक्रियायां कं देश इति। अलौकिकविग्रहवाक्ये इत्यर्थः। तत्र युष्मद् सु पितृ सु इत्याद्याकारकं। ननु तत्राकच् प्रवर्ततां को दोष इत्यत आह। स चेति॥

न च निमित्तस्यानुपसर्जनत्वस्य विनाशोन्मुखत्वादकृतव्यूहपरिभाषया समासात्प्रागपि सर्वनामत्वं न भविष्यतीति वाच्यं। तस्या अनित्यत्वात्। तत्र चैतत्सूत्रस्थे

व ज्ञापकत्वात्। अभिभवकानिति। इदमेव ज्ञापनफलमिति भावः। अन्यादयः क्रांताद्यर्थे द्वितीययेति प्रादिरिति समासः। मत्याख्याविति। त्वोः भूउ इति सनुकग्रहणं

प्रकृतिश्रत्यापत्तिवचनं वा अनित्यत्वे ज्ञापकं। तस्यानुरोधाच्च व्यवस्थेति भावः। यथोत्तरमिति तथा च संप्रति भाष्यकारो नैव व्यवस्थेति भावः। गणे सन्निवेशादिति

एतेन पूर्वापरेति गणसूत्रे संज्ञायामिति ग्रहणं मंदप्रयोजनमिति ध्वनितं। संज्ञायां यानि पूर्वादीनि तेषां गणे संनिवेशाभावात्। एवमष्टाध्यायीस्थपूर्वपरावरेति सू

त्रेप्यसंज्ञायामित्येतत्सर्वं व्यर्थकं। न च तदभावे जसि परतः संज्ञायामुत्तराः कुरव इत्यत्राप्राप्तविकल्पः स्यादिति वाच्यं। सर्वनामसंज्ञाया अन्वर्थत्वेन संज्ञायामप्राप्त

विधेरसंभवात् संज्ञायामेव पूर्वेणाप्राप्तासंज्ञा जसि वा स्यादिति वक्तुमुचितत्वात्॥ संज्ञाकार्यमिति। सर्वनामसंज्ञाप्रयुक्तं स्मायादिकमित्यर्थः। अंतर्गणकार्यमि

ति। अड्डुतरादिभ्यः। त्यदादीनामः। तदोः सः सावित्यादिकमित्यर्थः। अतिकतरमिति। अत्राद्डादेशो न। अतितदित्यत्र तु त्यदाद्यत्वं न टेः सः साविति सत्वं च नेति भा

सि॰कौ॰
टी॰त॰
४६

चः प्राप्तिरेव नास्ति। ये तु हूं हु चेति चकारेणावयवेष्वपि संज्ञा निषिध्यते इत्युच्यते तेषां अजहत्स्वार्थवृत्तिपक्षाभ्युपगमेपि न दोष इति। प्रथमचरम नेमशब्दस्य
नित्यं प्राप्ते अन्येषामप्राप्ते चायमारंभः। तयः प्रत्यय इति। संख्याया अवयवे तयपिति विहितः। तीयस्येति। द्वेस्तीयः। त्रेः संप्रसारणं चेति विहितस्य। पटुस्मनी
यायेति। प्रकारवचने जातीयर्॥ ॥जराया जर०। अष्टन आ विभक्तौ। विभक्तावित्यनो। विभक्तावित्यनुवर्त्य अचिर ऋत इत्यतो नुः। वृत्तिनाचीत्यनेन विशेष्यते। श्विरो
षष्ठो नेह तदादिविधिः यस्मिन् विधिस्तदादावल्ग्रहणे इत्यस्य तु इदं तद्विधेरपवादत्वादित्याशयेनाह। अजादौ विभक्ताविति। अजादौ किं। जराभ्यां। ज
राभिः। विभक्ताविति किं। जराया इदं जारं। न च जराया अमुडेवास्त्विति वाच्यं। जराशब्दात्तन्करोतीति णिचि णाविष्ठवदिति टिलोपे ततः क्विपि णि
लोपे चैकदेशविकृतस्यानन्यतया जरित्यस्य नरशब्दत्वादमुडिङिचेत्यस्य प्रवृत्त्या जसौ जस इति रूपापत्तेः। इष्यते त्वत्रापि जरसौ जरस इति। न च णिलोपस्य

जराया जरसन्यतरस्यां ७।२।१०१। जराशब्दस्य जरस् वा स्यादजादौ विभक्तौ। पदाङ्गाधिकारे तस्य तदन्तस्य च। अनेकाल्त्वात्सर्वादेशः प्रा
प्ते निर्दिश्यमानस्यादेशा भवन्ति। एकदेशविकृतस्यानन्यत्वात् जरशब्दस्य जरसा। निर्जरसौ। निर्जरसः। इनादीन्बाधित्वा परत्वाज्जरसानि
र्जरसा। निर्जरसौ। निर्जरसः। पक्षे हलादौ च रामवत्। वृत्तिकृता तु पूर्वविप्रतिषेधेन इनातोः कृतयोः सन्निपातपरिभाषया अनित्यत्वमाश्रि
त्य टाङसि कृते निर्जरसिन निर्जरसादिति रूपं न तु निर्जरसा निर्जरस इति केचिदित्युक्तं। तथा भिसि निर्जरसैरिति रूपान्तरमुक्तं। तदनुसारिभि
स्थानिवद्भावाद्विभक्तिपरत्वाभावेन जरसादित्यादि न सिध्यतीति शंक्यं। क्विलुप्तं न स्थानिवदिति। अथ षष्ठ्येकवचने निर्जरस्येत्यपरूपमिति स्वीकृतमेतच्च भा
ष्यात्। यद्यपि क्विलुप्तं न स्थानिवदिति क्वाचित्कं तथापीह तदाश्रयणे जरसिनि गुर्वादेशकरणमेव मानमित्यवधेयं। पदाङ्गाधिकार इति। परिभाषे
यं येन विधिरित्यस्य प्रपंचभूता। अत एव मनोरमायां पदमंगं च विशेष्यं विशेषणे नेच तदन्तविधिरित्युक्तं। विशेष्यमिति तु प्रायेणेति बोध्यं तेनाह्लोपोन इति सू
त्रे अंगावयवे योनिति वक्ष्यमाणग्रंथः संगच्छते। अत्र नव्याः नन्वाकरतस्य नद्युत्तरस्य परस्य चेति प्रचुरः पाठः। तदंतस्येति पाठे तु बहुच्पूर्वकेष्वपि पदांग
गाधिकारकार्याणि प्रवर्तेरन्नित्याशंक्य समादधुः। अनभिधानात्पदांगाधिकारकार्याणि बहुच्पूर्वकेषु न प्रवर्तंत इत्याशयेन फलितार्थकथनपरं तम्

यद्यपि शीर्ष छंदसीत्यतः छंदसीति अनुवर्त्तते तथापि भाषायामपि क्वचित्पदादयो भवंति मासश्छंदसीति वार्त्तिके छंदोग्रहणसामर्थ्यादिति वक्ष्यति॥ मासादिक
मिति। तथाहि। आस्नो वृकस्य वर्त्तिकाम् इति मंत्रे मुखादित्यर्थः औचित्यात्। वृकस्य चित् वर्त्तिकामंतरास्यादिति मंत्रांतरासंवादाच्च। तथाहि व्याज्जह्वानमानीति
ति मंत्रे मुख इत्यर्थः। एवमासन्यं प्राणमूचुरित्यादि बोध्यं॥ ॐ ॥ सुडनपुंसकस्य। सुट् स्त्रीपुंसयोरिति वक्तव्ये अनपुंसकस्येति वचनं लाघवार्थं प्रसज्यप्रतिषेधे
पि नञ्समासोस्तीति कैयटः। तेन असूर्यंपश्यानि मुखानीत्यादि सिद्धं। स्वादिष्वसर्वनामस्थाने सप्तमी बहुवचनमिति न शंक्यं किं त्वसर्वनामस्थान इति पर्युदासा
त्प्रथमैकवचनमेव। सुपीत्येव सिद्धे आदिग्रहणमधिकपरिग्रहार्थमित्याशयेनाह। कप्प्रत्ययावधिष्विति। नन्वेवं राजेत्यत्र नलोपो न स्यात् प्रत्ययलक्षणेन स
र्वनामस्थानपरत्वात्पदत्वाभावात् नैष दोषः सौ परतः स्वादिष्वित्यनेन पदत्वासंभवेपि सुप्तिङंतमिति पदसंज्ञायां हल्ङ्यादिना सुलोपे एकदेश

सुडनपुंसकस्य। १।१।४३। सुडिति प्रत्याहारः। स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य। स्वादिष्वसर्वनामस्थाने। १।४।
१७। कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्। यचि भं। १।४।१८। यकारादिष्वजादिषु च कप्प्रत्ययावधिषु
स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात्॥ आकडारादेका संज्ञा। १।४।१। इत ऊर्द्ध्वं कडाराः कर्मधारय इत्यतः प्रागेकस्यैकैव संज्ञा ज्ञेया
या परानवकाशा च। तेन शसादौ चि भसंज्ञैव न पदत्वम्। अतो जश्त्वं न। दतः। दता। जश्त्वं दद्भ्यामित्यादि। मासः। मासाभ्यामित्यत्र रुत्वे पत्वे

विकल्पन्यायेन न कार्यं वस्य परत्वात्। यदि तु स्वादिष्विति योगेन स्वादिषु परेषु पूर्वं पदं भवतीति पूर्वस्य पदसं॥ च यलोपः। माभ्यां। माभिरित्यादि॥
ज्ञां विधाय यचि भमित्यत्र यचीति छित्वा यजादौ सर्वनामस्थाने परतः पूर्वं पदं नेति निषिध्यते तदा औजसादिषु पदसंज्ञाभावेपि सौ परतः पदत्वसंभवात् रा
जेत्यादौ नलोपे कार्ये न काप्यनुपपत्तिः। यचि भं। यचीत्यल्ग्रहणेन सप्तमीनिर्देशात्तदादिविधिरित्याह। यकारादिष्वित्यादि। यकारादिषु किं। गार्ग्यः। वात्स्यः
गर्गादिभ्यो यञ् आपत्यस्य चेति यकारलोपो यथा स्यात्। असर्वनामस्थानेषु किं। सुपादौ। सुपादः। विद्वांसौ विद्वांसः इत्यत्र वाहो दित्यवाहः। इत्यादौ पादः पत्व
सोः संप्रसारणं वाह ऊठ् इत्यादयो माभूवन्निति। आकडारा। इह प्राक् कडारात् समास इत्यस्य नावधित्वं व्याख्यानात्। तत्पुरुषो द्विगुश्चेति लिंगाच्च संज्ञाद्वय

समावेशार्थं तत्र चकारस्तदाह । कडाराः कर्मधारय इत्यत्र इति । एकस्यैकैव संज्ञेति । उभयोः सावकाशत्वे विप्रतिषेधपरमिति परैव गृह्यते निरवकाशत्वे सैवात
त्र परस्या उदाहरणं धनुषा विध्यतीति । अत्र शराणामपायं प्रत्यवधिभूतस्यैव धनुषो व्यधनं प्रति साधकत्वमित्युभयप्रसंगे परत्वात्करणसंज्ञा अपादानसं
ज्ञां बाधते निरवकाशायाः पूर्वस्या उदाहरणं भवतश्च कच्छसो भवदीय इति । अत्र हि सिति चेति पदसंज्ञा परामपि भसंज्ञां बाधते निरवकाशत्वात्तेन न
कारस्य जश्त्वं भवति । प्रकृते तु परा अनवकाशा भसंज्ञा पदसंज्ञां बाधत इति शासादावचि सैव गृहीतुमुचितेत्याशयेनाह । यापरत्वादि । यलोप इति । हलि
सर्वेषामित्यनेन लोपो व्योर्वलीति तु न प्रवर्त्तते । पलस्यासिद्धत्वात् ॥ ॥ अल्लोपोऽनः ॥ भस्येत्यनेनाक्षिप्तः प्रत्ययविशेषः । अंगं चेति द्वयमनो
विशेषणं अन् तु अकारस्येत्यस्य विशेषणमित्यभिप्रेत्य व्याचष्टे ॥ अंगावयव इत्यादि । अन्नंतस्य भस्यांगस्याकारस्य लोपः स्यादिति प्राचां व्याख्यानेन तक्ष्णोत्यादौ तकाराकार
स्यापि लोपः स्यात् । भस्यांगस्यानोऽकारस्येति व्याख्यानेन तु अनसामनसेत्यादौ स्यात् । तन्त्राः वृत्त्यादिना अन्नंतस्य भस्यांगस्यानो अकारस्येति व्याख्यानेऽपि अ

अल्लोपोऽनः । ६ । ४ । १३४ । अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपः स्यात् ॥ ॥ ॥

नलक्षणं त्यादावतिव्याप्तिरेवेति भावः । सूत्रे तपरकरणं तन्न समासश्च मनिवारणाय कृतमित्येके ॥ ननु प्राणितीति प्राणन्ततः प्राणादिप्रत्यये प्राणः प्राणेत्यादा
वनितेरिति णत्वस्यासिद्धतया अतिप्रसंगः स्यादिति । तद्वारणायैव तपरकरणमस्त्विति चेन्नैवं । सवर्णदीर्घकृते अन एव तत्रासत्त्वात् । नच वार्णादांगं ब
लीय इति सवर्णदीर्घात्प्रागेव लोपः प्रवर्त्तत इति । अस्तीवानरूपमिति वाच्यं । तथाहि सति व्यावर्त्यालाभेन तपरकरणवैयर्थ्यस्य तदवस्थत्वात् । वस्तुतो वा
र्णपरिभाषेह न प्रवर्त्तते युगपत्प्रवृत्तावेव वार्णादांगस्य बलीयस्त्वात् । क्विप्यनुनासिकस्येति दीर्घे सवर्णदीर्घात्प्रागपि अनो अभावाच्च । तस्मात्प्रमणि
स सार्थमेव तपरकरणं न तु प्राण इत्यादावनाकारलोपवारणार्थमिति तेषामाशयः ॥ वस्तुतस्तु । एकदेशविकृतन्यायेन भवत्येव तत्रातिप्रसंग इति त
॥ ॥ ॥ परकरणमत्रावश्यकमेवेति नव्याः ॥ ॥ ॥
॥ ॥ ॥ ॥ ॥ ॥ ॥

रषाभ्यां नो णः॥ अत्रापदान्तस्य मूर्धन्य इत्यनुवर्त्य णग्रहणं पदान्तस्येति सूत्रं च भाष्ये प्रत्याख्यातं। समानपदे इति। निमित्तनिमित्तिनोरेकपदस्थत्वासंभवात्। यद्येतौ
पत्तै वसामर्थ्यादेकपदत्वे लब्धे समानग्रहणं यत्समानमेव पदं निमित्तवत् पदभिन्नपदत्वाभाववदिति यावत्। तत्र यथा स्यादित्येतदर्थं। तेन समासे रामना
मगं धर्वगा नमित्यादौ न भवति। तत्र हि नकारस्यैव पदवृत्तित्वेऽपि निमित्तवत्पदभिन्नपदस्थत्वात्। भवति हि पूष्णेत्यादौ णत्वं। निमित्तवत्पदभिन्नपदत्वा
भाववद्वृत्तित्वान्नकारस्य मातृभोगीणेत्यादावपि नस्य णत्वं भवत्येव। प्रत्ययवृत्तित्वेऽपि निमित्तवत्पदभिन्नपदवृत्तित्वाभावात्। एतेन समानग्रहणमस्वरु
पदत्वाभावार्थमिति व्याख्यायां रामनामेत्यादावतिप्रसंगो निवारितेऽपि मातृभोगीणेत्यादाव व्याप्तिः स्यादेवेति केषांचिदुक्तिरपास्ता। उक्तरीत्या लब्धांशि
शंकाया निरस्तत्वात्। पूष्णेति पूषा मंडः। मुद्गामलकयूषस्तु भेदी दीपनपाचन इति दर्शनात्॥ पूर्वत्रासिद्धे न स्थानिवदिति। एतच्च न्यायसिद्धं त्रिपाद्या असिद्ध-
त्वेन तत्रत्य कार्ये अचः परस्मिन्नित्यतिदेशस्याप्रवृत्तेः। तस्येति। तस्य पूर्वत्रासिद्धेनेत्यस्य तथा च स्थलत्रये स्थानिवद्भावो वक्तव्य इत्यर्थः। संयोगादिलोपे॥

रषाभ्यां नो णः समानपदे॥८।४।१॥ एकपदस्थाभ्यां रेफषकाराभ्यां परस्य नस्य णः स्यात्। पूष्णः। पूष्णा। पूर्वस्मादपि विधौ स्थानिव-
द्भाव इति पक्षे तु अड्व्यवाय इत्येवाऽत्र णत्वं। पूर्वत्रासिद्धे न स्थानिवदिति तु इह नास्ति तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति निषेधात्

चक्षुत्रा इहाचः परस्मिन्निति यणादेशस्य स्थानिवत्त्वात् स्कोरिति कलोपो न। लत्वं निषेत्स्यते। अत्र णिलोपस्य स्थानिवत्त्वादचि विभाषेति लत्वं। णत्वं माषव
पन्ना इह मस्येति चेन्न ह्लोपस्य स्थानिवत्त्वेन नकारस्य प्रातिपदिकान्तत्वाभावात् तेन ननु गर्गभगिनीत्यत्रेव माषवपनीत्यत्रापि णत्वप्राप्तिर्नास्त्येव। उत्तरपदं यत्प्रा-
तिपदिकं तदन्तस्य विधिवक्ष्यमाणत्वात्। अत्राहुः। साधने कृते तिल्युडन्तेन समासे पश्चान्ङीपि यस्येति चेति अल्लोपे कृते नकारस्योत्तरपदान्तत्वात् णत्वप्राप्तिरस्त्ये-
वेति सिद्धं तत्। पूष्णेत्यादौ रषाभ्यामित्यस्य नोपयोगः कृत्वेनैव रूपसिद्धेः। अत एव षग्रहणमुत्तरार्थमित्याकरे स्थितं इति चेत् उच्यते। उत्तरार्थं तथापीह
षग्रहणं स्थितं तत्र यत् पूष्णः पुष्णातीत्यादौ रषाभ्यामिति णत्वस्य प्रवृत्तिः केन वार्यतां। ऋत्वेनेति चेन्न। तस्यासिद्धत्वात्। न च वचनप्रामाण्यात्सिद्धत्वं पुष्टः। पुष्टिः। षष्ठ इत्या-
दौ चरितार्थत्वात्। तस्य षयोगेण इत्यंशोऽचरितार्थ इति चेन्न। तस्य पृथगनुक्तेः। इह यान्यस्येत्युक्तिश्चरितार्थत्वस्यापि तुल्यत्वाच्च। एवमुत्तरार्थषग्रहणमित्याकरो विरु-

ध्यत इति चेन्न। आकरे होहयन्त्र इत्युं विना पुष्णातीत्यादिलक्ष्यस्यासिद्धिर्नालीन्येनावदभिप्रेतं न तु पुष्णातीत्यादौ रषाभ्यामित्यस्याप्रवृत्तिरिति॥ ॥ नलोपः प्रातिप
दिकान्तस्य। लुप्तषष्ठीके इति। सौत्रत्वात्। न तु षष्ठीतत्पुरुषयोः पूर्वपदे सापेक्षत्वे समासासंभवात्। प्रातिपदिकस्य पदविशेषणत्वाच्चेति भावः। तदन्तस्येति। षष्ठी
तत्पुरुषोऽयं। तस्य प्रातिपदिकसंज्ञकपदस्य अन्तो नकारस्तस्येत्यर्थः। यदि तु प्रातिपदिके नैव नेत्यनेनापि पदं विशेष्यते तदा विशेषणेन तदन्तविधौ सौत्रमंतग्रह
णं ध्वनेर्नलोप इति मनोरमायां स्थितं। प्रातिपदिके किं। अहन्। परमिति किं। राजानौ। राजानः। विभाषाङिश्योः। स्त्रीति नपुंसकाच्चेति विहितो गृह्यते। ननु
जश्शसोः शिः। तस्मिन्भत्वात्। भस्येत्यनेनासर्वनामस्थानस्यैव यजादेराक्षेपात्। तदेतदाह। असर्वनामस्थानेत्यादि। ककुद्दोषणी इति। ककुद्दोषणी इति

नलोपः प्रातिपदिकान्तस्य। ८।२।७। नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्। नलोप
स्यासिद्धत्वाद्दीर्घत्वमेत्वमैस्त्वं च न। पूषभ्यां। पूषभिः। पूषभ्यः इत्यादि। विभाषा ङिश्योः। ६।४।१३६। अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन्
तस्याकारस्य लोपो वा स्यात् ङिश्योः परयोः। पूष्णि। पूषणि। पक्षे राजवत्। पद्दन्निति सूत्रे प्रभृतिग्रहणं प्रकारार्थं। तथा च। औङः श्याम्प्रतिषेध
ार्थं देशाभाष्ये ककुद्दोषणी त्युदाहृतः। तेन पदं घृ... ... स्त्रियोस्त्वान्तं तन्मोनमन्न इति सङ्गच्छते। आसन्यं प्राणमूचुरिति च। आस्यभवः
आसन्यः। दोःशब्दस्य नपुंसकत्वमत एव भाष्यात्। तेन दक्षिणं दोर्निशाचर इति सङ्गच्छते। भुजबाहू प्रवेष्टो दोरिति साहचर्यात् पुंस्त्वमपि। दोषं तं

दः। एकपदत्वे तनुपपत्तिरनुपदमेव वक्ष्यते। आसन्यमिति। येचाभावकर्मणोरिति प्रकृतिभावान्नलहितं इतिटि। ((स्य तथाविधस्य भजत इति। हृदयोरङ्गो र्भवो
लोपेन। अत एवेति। ककुद्दोषणी इति भाष्यप्रयोगाद् इति अर्थः। यद्यपि ककुच्च दोश्च तयोः समाहारः ककुद्दोः ककुद्दोश्च ककुद्दोश्च ककुद्दोषणी त्येकशेषकृत भा
ष्यं सुयोज्यमिति दोःशब्दस्य नपुंसकत्वेन तं प्रमाणं तथापि ककुदित्यस्य पृथक्पदत्वमेव न्याय्यं। अन्यस्या वा होहीति लब्धे पि ककुद एकत्वेन लभ्यते इति भावः। तुम
पाद्भवद्भुयम्पद दक्षिणं दोर्निशाचर इति रघुस्तत्र दक्षिणं दोरुद्यम्यतमुपाद्रवदित्यन्वयः। दोषं तस्येति। अयं च श्रीहर्षप्रयोगः। दोषं हसं दूषणं च भजतः। चापस्य
निसंबंधन हृदयोरन्त्यो भव इति। तद्धितार्थेति समासः। राजाहःसखिभ्य इति टच्। अन्होऽन्ह एतेभ्य इति अन्हादेशः। कालाट्ठञो द्विगोर्लुगनपत्ये इति लुक्। अ. हः

संख्याविसायेतिज्ञापकादेकदेशिसमासः ॥ इत्यदन्ताः ॥ विश्वपा इति। विश्वं पातीति रक्षतीति विग्रहे पा रक्षणे इत्यस्मादातोनुपसर्गे क इति कं बाधित्वा आतो मनिन्क्वनिब्वनिपश्चेति चकाराद्विजिति व्याख्यातारः इहलुंदस्यातो मनिन्निति विचलोके त्वन्येभ्योपि दृश्यन्त इति अनेनेति विवेकः। दीर्घाज्जसि चेति चकाराद्दिचीत्यनुकृष्य तेनेर्निर्वर्तनेन दाह। दीर्घाज्जसि इति चेति। सूत्रे चकाराभावे ह्रस्वाकारादिविरीर्घाकारान्तु जसीति व्यवस्था संभाव्येतेति भावः। इत्याद्यर्थमिति। ननु पूर्वस्त्रास्यौत्वादि

संख्याविसायपूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ। ६।३।११०॥ संख्यादिपूर्वस्याह्नस्याहनादेशो वा स्यात् ङौ। द्व्यह्नि। द्व्यहनि। द्व्यह्ने। विगतमहः व्यह्नः। व्यह्नि। व्यहनि। व्यह्ने। अन्हः सायः सायाह्नः। सायाह्नि। सायाहनि। सायाह्ने। इत्यदन्ताः। विश्वपाः। दीर्घाज्जसि च ६।१।१०५ दीर्घाज्जसि इचि च परे प्रथमयोः पूर्वसवर्णदीर्घो न स्यात्। वृद्धिः। विश्वपौ। सवर्णदीर्घः। विश्वपाः। यद्यपीह औङि नादिचीत्येव सिद्धं जसि तु सत्यपि पूर्वसवर्णदीर्घे सति न क्षतिः। तथापि गौर्यौ गौर्य इत्याद्यर्थं सूत्रमिहाप्यत्वादुपन्यस्तं। आतो धातोः ६।४।१४०। आकारान्तो यो धातुस्तदन्तस्य भस्याऽङ्गस्य लोपः स्यात्। अलोऽन्त्यस्य। विश्वपः। विश्वपा। विश्वपाभ्यामित्यादि। एवं शङ्खध्मादयः। धातोः किं। हाहान्। टा। सवर्णदीर्घः। हाहा। ङे। वृद्धिः। हाहै। ङसिङसोः दीर्घः। हाहाः। ओसि वृद्धिः। हाहौः। ङौ। आद्गुणः। हाहे। एवं विश्वपावत्। आत इति योगविभागाद्धातोरप्याकारलोपः क्वचित्। क्त्वः। श्नः। इत्यादन्ताः। हरिः। प्रथमयोः पूर्वसवर्णः। हरी। जसि च ७।३।१०९ ह्रस्वान्तस्याङ्गस्य गुणः स्याज्जसि परे। हरयः। ह्रस्वस्य गुणः ७।३।१०८। ह्रस्वस्य गुणः स्यात्सम्बुद्धौ। एङ्ह्रस्वादिति सम्बुद्धिलोपः। हे हरे। हरिं। हरी। हरीन्। शेषो घ्यसखि १।४।७। अनदीसंज्ञौ ह्रस्वौ याविवर्णोवर्णौ तदन्तं सखिवर्जं घिसंज्ञं स्यात्। शेषः किं। मत्यै। एकसंज्ञाधिकारात्सिद्धं शेषग्रहणं स्पष्टार्थं। ह्रस्वौ किं। वातप्रम्यै। यू किं। मात्रे॥ ॥

भ्य इति निर्देशादिकप्रत्याहार अच्प्रत्याहारयोरेव निरूढलक्षणेति व्याख्यायमानं तथा च दीर्घस्याच्त्वाभावाद्गौर्यावित्यादौ पूर्वसवर्णदीर्घो न प्राप्नोतीति किमनेन निषेधेनेति चेन्मैवं। अस्मादेव निषेधात् ज्ञापकादिग्ग्रहणेनेष्वपि प्रत्याहारेषु लक्षणा स्वीक्रियते। अन्यथा गौरीरित्यादौ शसि परतः पूर्वसवर्णदीर्घो न स्यात्। किंच। उपाध्वीत्यादौ उरण्रपरः नैषा रकर्षुकः इत्यादाविसुसुगिति ठस्यादेशः। अमीषामित्यादौ इणः परस्य सस्य षत्वं च न सिध्यतीति दिक्। प्रथमयोरि

सु.
सि.कौ.
टी.त.
५०

त्रेइदुत्यामुत्तरस्यङेरितिक्तमसंबंधस्यन्यायायोगाच्चायत्नुव्याचख्युः। अदितितपरत्वं वृद्धौ विप्यादावत्वे कृते स्त्रियां टाप्मा भूदित्येतदर्थं इति तच्चिंत्यं तपर
ग्रहणं हि टापा सह दीर्घो मा भूत् टाप्तु स्यादेवा लक्षणद्वयबाधे मानाभावात्। अतएव कृन्मेजंत इति सूत्रे भाष्यादौ सन्निपातपरिभाषया पद्धताविन्यत्र टाप् नेत्युक्तं।
टापोव्यवधानेत्यात्रं तयैविघातः स्यादिति। तपरकरणं वृद्धा वभावे तु सन्निपातपरिभाषोपन्यासस्तत्र विरुध्येत। यदपि व्याचख्युः। औतस्तकारस्त्वरितार्थ इति तदर
पिनः सौरत्वं बर्हिषि समिधाने अम्नाविन्यादौ स्वरितत्वादर्शनात्। न विभक्ताविति सूत्रे ङसैतस्तु तकार उच्चारणार्थो नेत्संज्ञक इति स्वयमेवोक्तत्वाच्चात स्मादुभयत्रा त
परकरणमुच्चारणार्थमेवेति मनोरमायां स्थितं॥ ॥ अनङ् सौ। नकारात् अकार उच्चारणार्थः। असंबुद्धाविति पर्युदासात्। साविति प्रथमैकवचनं गृह्यते न तु स
मीवहुवचनं। सौङित्यवसिद्धे अनङ् विधानमन्यतोपि स्यादिति ज्ञापनार्थं। तेन उशनसः संबुद्धौ वनङ् सिद्ध्यतीति प्राञ्चः। यद्यपि सौङित्युक्ते ऋदुशनेत्युत्तरसूत्रेण।
पिङा स्यात्। ततश्च उशनेत्यत्र सर्वनामस्थाने चासंबुद्धाविति दीर्घः स्यात्। पुरुदंसेत्यत्र नुसांतमहत इति स्यात्। तथापि संज्ञापूर्वकविधेरनित्यत्वं फलं वा। अंगस्तत्य

अनङ् सौ। ७।१।९३। सख्युरङ्गस्यानङादेशः स्यादसंबुद्धौ सौ परे। ङिच्चेत्यन्तादेशः। अलोन्त्यात्पूर्व उपधा। १।१।६५। अन्त्यादलः पूर्वो व
र्ण उपधासंज्ञः स्यात्। सर्वनामस्थाने चासंबुद्धौ। ६।४।८। नान्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे॥ ॥

रिभाषयाबाधात्समाधेयमिति तिष्ठतामाग्रहः। अलोन्त्यात्पूर्व। अल इति पंचमी अन्यादित्यनेन विशेष्यत इत्याह। अंत्यादल इति। अलः किं। शिष्टः शिष्टवानित्यादौ अंत्यात्संघाता
त्पूर्वस्य शकारस्य मा भूत्। सत्यां हि तस्यां शास इदङ्हलोरिति ह्रस्वत्वं स्यात्। नन्वेवमप्यंत्यादलः पूर्वस्य संघातस्योपधासंज्ञायां शिष्ट इत्यादौ शकारविशिष्टस्या
कारस्य इत्वं स्यादिति स्यादिति चेत् संगतं वर्णस्य एवेति चेदुच्यते। तथाहि। लोके अमीषां ब्राह्मणानामंत्यात्पूर्व आनीयतामित्युक्ते यथाजातीयकोंत्यात्पूर्व आनीयते
तथा अत्राप्यंत्यात् अलात्मक इति तत्पूर्वोप्यल् एव गृह्यते तेन तदेतदाह। पूर्वो वर्ण इति। अत्र अचोंत्यादिटीत्यत्रेव अल इति निर्धारणे षष्ठी त्वपि सुवचमिति केचिदाहुः
अलोंत्यविधयोग्यस्तस्मात्पूर्वो वर्ण उपधासंज्ञः स्यादिति व्याख्याया अपि संभवदुक्तिकत्वात्। सर्वनामस्थाने। नोपधाया इति सूत्रं द्विलोपसूत्राद्दीर्घग्रहणं चानुव
र्तत इत्यभिप्रेत्याह। नांतस्येत्यादि

५०

अश्रिष्य दीर्घग्रहणस्य प्रत्याख्यानत्वेन प्रकृते आकारहल्वस्य आपो भावादुक्तातिप्रसंगाभावात्। निष्कौशाम्बीयतेः क्विपि तु निष्कौशाम्बी इति भवत्येव। ईकारहल्
पदं वा तत्वेन सुलोपप्रसक्तेः। अप्युक्तं क्विं। विभर्तीति। इदं च प्रत्युदाहरणं चिंत्यं। विशिष्टस्याहलन्तत्वात्। सुतिसीनां हलिति क्लिष्टं व्याख्याय अतिप्रसंगापादनस्या
युक्तत्वात्। यत्तु व्याचख्युः। सुरां सुनोतीति सुरासुत्तमाचष्टे सुरासयतितः क्विप्। सुरः। सुरासौ। सुरासः। इह सुनोतेरवयवस्य सस्य लोपं व्यावर्त्तयितुमप्रक्त
ग्रहणं इति तदपि चिंत्यं। परस्परसाहचर्येण सुतिसीनां विभक्तीनामेव ग्रहणात्। अन्यथासि चो लोपापत्तेरुक्तत्वात्। प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणाच्च।
यत्तु तिनस्वरितत्वमिति सूत्रे कैयटेनोक्तं नक्वचिदियं परिभाषा भाष्यवार्त्तिककाराभ्यामाश्रितेति तदिह भसात्। अंगस्येति सूत्रे भाष्यादौ तस्याः पठितत्वात् स्वपम
पि तत्र व्याख्यातत्वाच्च। संयोगांतलोपस्यासिद्धत्वात् इति। ननु संयोगांतलोपेनासिद्धः। नङि संबुद्ध्योरिति सूत्रे संबुद्धिग्रहणात् ज्ञापकात् इत्येवं गोक्षानि
न्यादावपि नलोपापत्तिः। ज्ञापकस्य विशेषविषयत्वात्। प्रत्याहृतनकारविभक्त्योरानंतर्यं तत्रैव सिद्धं। व्याख्यानात्। यत्त्वाहुः। हे ब्रह्मन्निति नपुंसकार्थत्वान्नेत
ज्ञाप[illegible]मिति तन्न लुकालुक्प्रत्ययलक्षणाभावात्संबुद्धौ नपुंसकानामित्यस्यावश्यकत्वाच्च संबुद्धिग्रहणस्य नपुंसकविषयत्वासंभवेनोक्तज्ञापकस्य सु
स्यत्वा[illegible] तस्मान्नलोपो न प्रयोजनमिति च दिहन हि [illegible] अत्रेत्यत्र रोरुत्वं न स्यात्। सिपि दश्चेति रुत्वे विभक्तिसकारस्य संयोगांतलोपे तस्यासिद्धत्वान्न
या अविभर्भवान्। अजागर्भवानित्यत्रापि लोपो न स्यात्। रात्सस्येति नियमात्। नदुक्तं। संयोगांतस्य लोपे हि नलोपादिर्न सिध्यति। रात्तु तेनैव लोपः स्यादु
च्चलितं हृच्चायते इति। नलोपादिरित्यादिशब्देनात्वं संगृह्यते। अत्रेदमवधेयं। ङ्यापग्रहणं सोरेव विशेषणं न तु तिस्योः व्याख्यानात्। तेन मालेवाचरत्
अमालात्। गंगेवाचरत् अगंगात्। इत्यत्र नातिप्रसंगस्तथा च हलंतात्परं सुतिसीत्येतदपृक्तं हल् लुप्यते दीर्घाभ्यां ङ्यापोन्तरं नात्परं सुतिसीत्येतदपृक्तं हल्लु
प्य[illegible]ति व्याख्यानेऽर्थस्य पर्यवसन्नः। यत्तु व्याचख्युः। ङ्याप्भ्यामिति स्यात् संभवत्येवेति। तत्र ङ्यंतो दसंभव इति सत्यं। आबंतात्तु आचारक्विबंतात्त्वङ्सिप्सिपो
लस्य अगंगात्। अगंगाः इति स्थिते न च शपा व्यवधानं। एकादेशस्य पूर्वांतत्वेन ग्रहणात्। न चस्यानिवद्भावः। अपूर्वविधित्वात्। अन्ये त्वाहुः। ङ्यापग्रहणं अ
संभवादेव तिस्योर्विशेषणं न भवतीति यदुक्तं तन्न सम्यगेव। न च अगंगाः इत्यत्र संभवोस्तीत्युक्तमिति वाच्यं। तत्र स्थानिभूतस्य शपः पूर्वस्मान्निमित्तभा।

औत्‌। एतच्च सूत्रं नदीसंज्ञकेषु इदुद्भ्यामिति पूर्वसूत्रेण बाध्यते। घिसंज्ञकेषु च शेषो घ्यसखीति उत्तरसूत्रेण तस्मात्संज्ञाद्वयशून्योऽस्य विषयः। न च ताहृश उकारोऽस्ती
त्यत आह। उकारानुवृत्तिरिति। प्राचा तु घिनदीसंज्ञकाभ्यामिदुद्भ्यां परस्येत्युक्तं तदसत्‌। ताहृशस्योकारस्याप्रसिद्धेः। सुसखेति। प्रादिसमासे राजाहःसखिभ्य
इति टच्‌ तु न पूजनादिति निषेधः। शेषो घ्यसखीत्यत्रासखीति नायं प्रसज्यप्रतिषेधः। असमर्थसमासादिदोषापत्तेः। किं तु पर्युदासः एवं तु सुसखी त्यस्य सखि
शब्दभिन्नत्वान्न घिसंज्ञा स्यादेव। न च समुदायस्य सखिशब्दभिन्नत्वेऽपि सखिशब्दाभिन्नत्वं नेति कथमसखीति निषेधाप्रवृत्तिरिति शंक्यं। वेर्ष्यात्सम
भिधानादसखीत्यत्र येन विधिस्तदन्तस्येत्यस्य प्रवृत्तेस्तदन्तस्य केवलमभिप्रेत्याह। समुदायस्येत्यादि। एवमतिसखेत्यत्रापि समासान्तनिषेधादिकं बोध्यं। गौण

औत्‌। ७।३।११८। इदुद्भ्यामुत्तरस्य ङेरौत्‌ स्यात्‌। उकारोऽनुवृत्तिरुत्तरार्था। सख्यौ। शेषं हरिवत्‌। शोभनः सखा सुसखा। सुसखायौ। सुसखायः। अन
ङ्‌णिद्वद्भावयोरङ्गत्वात्तदन्तेऽपि प्रवृत्तिः। समुदायस्य सखिरूपत्वाऽभावादसखीति निषेधाऽप्रवृत्तेर्घिसंज्ञा। सुसखिना। सुसखये। ङसिङसो
र्गुणे कृते एकादेशत्वाऽभावान्नख्यत्यादित्युत्वम्‌। सुसखेः। सुसखौ। इत्यादि। एवमतिशयितः सखा अतिसखा। परमः सखा यस्येति विग्र
हे परमसखा। परमसखायावित्यादि। गौणत्वेऽप्यनङ्‌णित्वे प्रवर्तेते सखीमतिक्रान्तोऽतिसखिः। लिङ्गविशिष्टपरिभाषाया अनित्यत्वान्न
चाहरिवत्‌। स्त्रीत्वाऽनङ्‌णित्वे न भवतः। गोस्त्रियोरिति ह्रस्वत्वे न सखिशब्दस्य लाक्षणिकत्वात्‌। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणान्न

त्वपीति। अतिरथेत्यादौ वक्ष्यमाणमनङ्‌ इति भावः। तथा च येन विधिरिति सूत्रे परमसखायावित्ति बहुव्रीहिस्तत्पुरुषे हि टचा भाव्यमिति कैयटः। तथा हि तौ
यः। श्रिते तिसज्ञे परमसखेति प्रतीकमुपादाय बहुव्रीहित्वान्न समासान्त इति स एवाह। अनुष्टुभा बहुणा इन्द्रसखा। आग्नेया हि मरुत्सखा। तीव्रं सोमं पिबति गो
सखायमित्यादिप्रयोगाश्चैवमेव संगच्छन्ते। तत्र बहुव्रीहिप्रयुक्तस्य पूर्वपदप्रकृतिस्वरस्य दर्शनेन गौणत्वात्‌। एतेन घिसंज्ञासूत्रे शोभनः सखा अस्य सुसखि
रित्युदाहरन्तौ हरदत्तन्यासकारौ तदनुगामिनश्चान्ये उपेक्ष्याः। अनित्यत्वादिति। शक्तिलाङ्गलाङ्कुशेति वार्तिके घटघटीग्रहणमत्र लिङ्गम्‌॥ ॥

पतिः समास एव। एवकार इष्टतोऽवधारणार्थः। अन्यथा हि समासे [illegible] नियमः संभाव्येत। ततश्च महाकविनेत्यादि प्रयोगो न सिध्येत्। अनल्विधौ धात्वादेरि
त्यादि ज्ञापकानुसरणेन तु प्रतिपतिभ्यां वंस्यादिनिभाक्। पत्येत्यादि नन्वेवं शेषो [illegible] ध्यसखिपती इत्यवोच्यतां किमनेन पतिः समास एवेति सूत्रेणेति चेन्न। समुदायस्य पति
रूपत्वाभावेन बहुच्पूर्वकपतिशब्दस्यापि घिसंज्ञा स्यात्। ततश्च सुसखिनेत्यादिवद्बहुपतिनेत्यादि प्रसज्येत। इष्यते तु बहुपत्येत्यादि। नापि सखिपती समास एवेत्येव
सूत्र्यतामिति [illegible] बहुपत्येत्यादिवद्बहुसख्येत्याद्यापत्तेः। इष्यते तु बहुसखिनेत्यादि। अथ कथं सीतायाः पतये नमः इति नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतावि
ति पराशरश्च। अत्राहुः। पतिरित्याख्यातः पतिं करोतीति णिचि टिलोपे अच इः इत्यौणादिकप्रत्यये णेरनिटीति णिलोपे च निष्पन्नोऽयं पतिशब्दः
पतिः समास एवेत्यत्र न गृह्यते लाक्षणिकत्वात्। एतेन कृष्णस्य सखिरर्जुन इति भारते सखिना वानरेन्द्रेणेति रामायणं च व्याख्यातं। कतिशब्द इति। का
संख्या येषां ते कति। किमः संख्यापरिमाणे डति चेति डतौ डित्वाट्टिलोपः। बहुगणवतु। बहुगणौ प्रातिपदिके संख्यावाचके गृह्येते न तु संघवैपुल्यवाचकौ।

१० [illegible]तिः समास एव। १।४।८। पतिशब्दः समास एव घिसंज्ञः। पत्या। पत्ये। पत्युः २। पत्यौ। शेषं हरिवत्। समासे तु। भूपतिना। भूपतये। कति

११ [illegible]ब्दो नित्यं बहुवचनान्तः। बहुगणवतुडति संख्या। १।१।२३। एते संख्यासंज्ञाः स्युः॥ डति च। १।१।२५। डत्यन्ता संख्या षट्संज्ञा स्यात्। प्रत्यय

१२ स्य लुक्श्लुलुपः। १।१।६१। लुक्श्लुलुप् एतैः शब्दैः कृतं प्रत्ययादर्श[illegible]

के अपि संख्यासंज्ञे अन्वर्थसंज्ञाविज्ञानात्। अत एव डतिरपि किमः संख्याप
रिमाणे डति चेति विहितस्तद्धित एव गृह्यते वतुसाहचर्याच्च। न तु पातेर्डतिः। यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति तथापीह वतुडत्योः केवलयोः
संज्ञाविधौ प्रयोजनाभावादन्वर्थताबलाच्च तदन्तयोरेव संज्ञा प्रवर्तते। [illegible] अनुबन्धनिर्देशात् बहुगणवहुसतिरित्यादावतिप्रसंगशंका निराकर्तुरित्याहुः। न चैवं संख्या
[illegible] कृत्वसुजादिषु कृत्रिमसंख्याया एव ग्रहणं स्यात् ततः कृत्रिमाया इति पंचकृत्व इत्यादि न सिध्येत्। कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययात् इति
वाच्यं संख्याया अतिशदन्तायाः कन् इत्यत्र तिशदन्तपर्युदासबलेन संख्याकार्येषु कृत्रिमाकृत्रिमस्याप्रवृत्तेः। नन्वेवं भूरिशब्दात्कृत्वसुच् प्रत्यय इति चेन्
[illegible]त्राहुः। अनियतसंख्यावाचिनां चेत्संख्याकार्यं स्यात्तर्हि बहुगणयोरेवेत्येवंभूतनियमफलकसंख्याविज्ञानान्नास्त्यतिप्रसंग इति। डति च षण्णां षडित्यतः षडित्य

सु॰ सि॰कौ॰ टी॰न॰ ५३

नुवर्तते।संख्येति च प्रकृतं डतीत्यनेन विशेष्यते तदाह। डत्यंता संख्या संख्येति किं। पतयः। प्रत्ययस्य लुक्श्लुलुपः। अदर्शनं लोप इत्यतोनुवृत्तस्यादर्शन
स्यायं तेन संज्ञाकरणसामर्थ्यात्तत्तद्व्याश्रित्य तद्भावित संज्ञा इह विज्ञायं तेनेन संज्ञासंकरोत्र न भवतीति तदाह। लुक्श्लुलुपशब्दैरित्यादि। सतितु संज्ञासंक
रे... त्र श्लावलुकि श्लाविति द्वित्वं स्यात्। जुहोतीत्यत्र श्लौ सति उतो वृद्धिर्लुकि हलि इति वृद्धिः स्यात्। न च तत्र अभ्यस्तस्य नेत्यनुवृत्तेर्योयोतीनोनोतीत्या
दाविव वृद्धेर्न भविष्यतीति वाच्यं। संज्ञासंकरपक्षे तदनुवृत्त्यसंभवात् अभ्यस्त सूत्रस्य निर्विषयत्वापत्तेः। न च योतीत्यादिरवकाशः। संज्ञासंकरेप्यत्रापि
द्वित्वस्य दुर्वारत्वादिति भावः। फलेलुक्। जुहोत्यादिभ्यः श्लुः। जनपदे लुबित्यादि विधिप्रदेशेषु सूत्रपाठकवद्भावि संज्ञाविज्ञानान्नान्योन्याश्रयः॥ ॥
षड्भ्यो लुक्। सर्वनाम्नः स्मै इतिवत् षड्भ्यो लुगिति वक्तव्ये बहुवचननिर्देशो अत्रार्थप्राधान्यसूचनार्थः। कृत्रिमाकृत्रिमन्य, न स्वरूपनिरासः सिद्धे स्तेन
षडर्थगतसंख्याभिधायिनो ये जश्शसो लुगित्यर्थपर्यवसानात्प्रियपंचान इत्यादौ नातिप्रसंगः। जश्शसोः शिरित्यतो अनुवर्तनादाह। जश्शसोर्लुक्।

८ षड्भ्यो लुक्। ७।१।२२। षड्भ्यः परयोर्जश्शसोर्लुक् स्यात्। प्रत्ययलोपे प्रत्ययलक्षणं। १।१।६२। प्रत्यये लुप्तेपि तदाश्रितं कार्यं स्या
त्। ...जसि चेति गुणो प्राप्ते॥ ९ स्थादिति। प्रत्ययलोपे विशेषविहिता अपि लुगादि संज्ञा लोप संज्ञां न बाधंते। एकसंज्ञाधिकारादन्य
त्र संज्ञानां बाध्यबाधकभावानंगीकारादिति भावः। स्थानिवत्सूत्रेण सिद्धे नियमार्थमिदं सूत्रं। प्रत्ययस्यासाधारणं रूपं यत्र प्रयोजकं तदेव कार्यं प्रत्ययलोपे स
ति भवति न तु प्रत्ययाप्रत्ययसाधारणमिति। तेन शोभना दृषदो यस्य सुदृषत्प्रासाद इत्यत्र न नुम् सुम्भ्यामित्यंतोदात्ततां बाधित्वा सोर्मनसी अलोमोषसी इत्युत्त
रपदाद्युदात्तत्वं मत्वसंतस्येति दीर्घश्च न भवति। यद्वा यत्र प्रत्ययः प्राधान्येनाश्रीयते तत्राल्विधावपि विध्यर्थमिदं। तेन अत्र लोडित्यत्र हलादौ पितिसार्वधा
तुके विहित इमं लुप्तेपि तस्मिन्न भवति। वर्णाश्रयेनास्ति प्रत्ययलक्षणमिति तु वर्णप्राधान्यविषयकं तेन गवे हितं गोहितमित्यत्र अवादेशो न। यद्यपीदं पस्पह
आकारा रूढं तथापि नियमपक्षस्यैव प्रबल इति पड् लुगंतेमनोरमायां स्थितं। स्यादेतत्। सूत्रस्यावश्यकत्वेपि प्रत्ययलोपे तल्लक्षणमित्येव सूच्यतां किमने
न द्वितीयप्रत्ययग्रहणेन। अत्राहुः। प्रत्ययस्यासाधारणं रूपं यत्रेत्यादि...भाय द्वितीयप्रत्ययग्रहणमिति॥ ॥ ॥

५३

नलुमतांगस्य। लुमतेति किं। कार्यते हार्यते। अत्र णेरनिटीति णिलोपे। ... अपेक्षा वृद्धिर्भवत्येव। अंगस्येति किं। पचसप्तकर्तीत्यादौ प्रत्ययान्तकार्यं सुप्तिङन्त-
मिति पदसंज्ञा यथा स्यात्। अस्मदिति। प्राचा त्वव्ययास्मदिति पठितं तत्र अव्ययेष्वपेक्षितं। सदृशं त्रिषु इति श्रुतेर्लिंगत्रयाद्यपरत्वेन अव्ययानामलिंगत्वा

न लुमताऽङ्गस्य।१।१।६३। लुक्श्लुलुप एते लुमन्तः। लुमता शब्देन लुप्ते तन्निमित्तमङ्गकार्य्यं न स्यात्। कति२। कतिभिः। कतिभ्यः२। कती-
नां। कतिषु। युष्मदस्मद्‌षट्‌संज्ञास्त्रिषु सरूपाः। त्रिशब्दो नित्यं बहुवचनान्तः। त्रयः। त्रीन्। त्रिभिः। त्रिभ्यः। त्रेस्त्रयः।७।१।५३। त्रिशब्दस्य त्र-
यादेशः स्यादामि। त्रयाणां। परमत्रयाणां। गौणत्वे तु नेति केचित्। प्रियत्रीणां। वस्तुतस्तु प्रियत्रयाणां। त्रिषु। द्विशब्दो नित्यं द्विवचनान्तः। त्यदा-
दीनामः।७।२।१०२। एषामकारोन्तादेशः स्याद्विभक्तौ। द्विपर्य्यन्तानामेवेष्टिः। द्वौ२। द्वाभ्यां३। द्वयोः२। द्विपर्य्यन्तानामिति किं। भवान्। भव-
न्तौ। भवन्तः। संज्ञायामुपसर्जनत्वे च नात्वम्। सर्वादिगणकार्य्यत्वात्। द्विर्नाम कश्चित्। द्विः। द्वौ। द्वयः। द्वावतिक्रान्तोऽतिद्विः। हरिवत्। प्रा-
धान्ये तु परमद्वौ। इत्यादि। औडुलोमिः। औडुलोमी। उडुलोमाः। लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः॥ बाह्वादीञोऽपवादः। औडुलोमिं। औडु-
लोमी। उडुलोमान्। इतीदन्ताः। वातप्रमीरिति उणादिसूत्रेण माङ ई प्रत्ययः कित्। वातं प्रमिमीते इति वातप्रमीः। दीर्घाज्जसि च। वातप्रम्यौ।
वातप्रम्यः। हे वातप्रमीः। अमि पूर्वः। वातप्रमीम्। वातप्रमीन्। वातप्रम्या। वातप्रमीभ्यां३। वातप्रम्ये। वातप्रम्यः२। वातप्रम्योः२। वातप्र-
म्यां। दीर्घत्वान्न नुट्। ङौ तु सवर्णदीर्घः। वातप्रमी। वातप्रमीषु। एवं ययीपप्यादयः। यात्यनेनेति ययीर्मार्गः। पाति लोकमिति पपीः सूर्यः॥
पापोः किद्द्वे चेति ई प्रत्ययः। क्विबन्तवातप्रमीशब्दस्य तु अमिशसिङौ च विशेषः। वातप्रम्यं। वातप्रम्यः। वातप्रम्यि। एरनेकाच इति वक्ष्यमा-
णयण्। प्रधीवत्। बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी। दीर्घङ्यन्तत्वाद्धल्ङ्याब्भ्य इति सुलोपः॥

१॥ न। अव्ययीभावस्य तु वचनात् क्लीबत्वेपि लिं-
गान्तराभावाच्च। त्रिशब्द इति। जसि ते ङिन् डित्वाट्टिलोपः। त्रेस्त्रयः। त्रेरिति षष्ठी न तु पंचमी। त्रयादेशस्य रंतं न तु सांतं निजां त्रयाणामिति निर्देशादित्यभिप्रेत्याहात्रिश-
ब्दस्य त्रयादेश इति। ननु निजां त्रयाणामिति निपातनादेव त्रयादेशे सिद्धे किमनेन सूत्रेणेति चेन्मैवं। अबाधकान्यपि निपातनानि भवन्तीत्यनेन ज्ञापनात्॥

तेनप्रातनमिति सिद्ध्यति। अन्यथा पुराणप्रोक्तेष्वपि निपातनमात्रं एतदाध्येत। ऋयपङ्कि इत्येव नसूत्रितं। तत्करोति आचष्टे वेत्यर्थे तत्करोतीत्यादिना णिचि तनः। क्विपि प्र
शान्त्यैर्यञ्च इति प्रकृतिभावादिलोपाभावे हृस्वस्यापि तीति तुकि त्रितन्। ततो बहुत्वविवक्षायाम् आमि कृते त्रेस्त्रयः त्रयाणामिति रूपासिद्धेः। नच वार्णादांगं बलीय इति नुकः प्रा
गेवा पुंस्यादिति शंक्यं। युगपत्प्रवृत्तावेवांगस्य बलीयस्त्वात्। केचिदिति। ऋसंबधिन्यामीति विज्ञानाद्गौणे त्रयादेशो न भवतीति तेषामाशयः। वस्तुतस्त्विति। अर्थप्राधान्य
बोधकस्य बहुवचनस्याभावाद्गौणत्वेपि त्रयादेशो न्याय्यः। प्रियास्त्रेन्यादावस्थ्या घनङ्ग इति भावः। त्यदादीनामः। अष्टन आ विभक्तावित्यतोनुवर्तनादाह। विभक्तावि
ति। विभक्ताविति किम्। तदूयदूसोर्लुका लुप्तत्वात्प्रत्ययलक्षणेनाद्विवर्यतानां किमिति। युष्मदस्मच्छब्दयोरिष्टप्रभावेपि दोषो नास्ति। आत्वयत्वलोपैर्विशेषविहितैरा
त्वस्य बाधनात्। तथा किमः शब्देपि न दोषः। किमः कादेशस्य विशिष्य विधानादिति प्रश्नः। भवानिति। भवत्सु इति स्थिते तकारस्थाने अत्वे कृते अतो गुणे इति पररूपे उगि
दचामिति नुमि सौ सिति सर्वनामस्थाने इत्यनेन दीर्घे सुलोपे नलोपे च सति भवा इति हल्संस्यादिति भावः। भवंताविति पूर्ववत्तकारस्यात्वे पररूपे नुमि दीर्घे भवानिति रूपं स्यादि
ति भावः। उडूनि वत्सलोमानि यस्य तस्यापत्यं औडुलोमिः। इत्रो पधाद इति। तथा च बहुत्वे अकारान्तोयं उडुलोमशब्दः। स औडुलोमिशब्दादन्य एव तस्य च इकारान्तेषु
व्युत्पादनं प्रामादिकमिति बोध्यं॥ इति इदंताः॥ ॥ क्विदिति। तेन आतो लोप इटि चेत्यालोप इति भावः। क्विवंत वातप्रमी इति। माङ् धातोः क्विपि ईत्वमवका
शः। क्विति निषेधादीत्वं नेति शंकायां मनिनंतेरवक्विप् बोध्यः॥ यद्वा॥ ईप्रत्ययांत वातप्रमी शब्दादाचारक्विवंतात्कर्तरि क्विप् बोध्यः। बहुश्रेयस्य इति। प्रशस्यस्य श्र इतीय
सुनि श्रादेशः ~~श्रीयसु~~ श्रेति ङीप्। बहुश्रेयसीति। स्त्रियाः पुंवदिति पुंवद्भावः। ईयसश्चेति न कप्। नाप्युपसर्जन ह्रस्वः। ईयसो बहुव्रीहौ नेति निषेधात्॥

यूस्त्र्याख्यौ॥ ईश्च ऊश्च यू स्त्र्याख्यानादीर्घयोरेव ग्रहणं। अविभक्तिकोऽयं निर्देश इत्येके। दीर्घाज्जसि चेति निषेधस्य वाच्छन्दसीति पाक्षिकत्वात् प्रथमया पूर्वसवर्णदीर्घ इत्यन्ये। इह प्रत्ययस्य च ग्रहणमिति परिभाषा नोपतिष्ठते। नेयङुवङ्स्थानावस्त्री इति निषेधाल्लिङ्गात्। तेन प्रध्यै प्रध्या इत्यादौ नदीकार्यं स्यादेव। स्त्रियं आचक्षाणे स्त्र्या स्त्रियौ। मूलविभुजादित्वात्कः। चक्षिङः ख्याञ्। आतो लोप इटि चेत्यालोपः। ईदूतंताविति। इह वर्णयोरेव संज्ञेत्यपि पक्षोऽस्ति। आच्छीनद्योरिति सूत्रस्वरसात्। तत्पक्षे स्त्र्याख्यत्वं तु ङ्यादिषु स्तुतः श्रीर्लक्ष्मीरित्यादौ तु स्त्रीवाचकवर्णसमुदायघटकत्वेन प्रवेशात्। तेन नद्यन्तादिव्यवहारो न विरुध्यते। एवं शेषो घ्यसखीत्यत्रापि रवर्णो वर्णयोरेव विशेषणमिति पक्षोऽप्यस्तीति बोध्यं। तेन घ्यन्ताजाद्यन्तयोर्घ्यन्तं परमिति व्यवहारः संगच्छते। वर्णसंज्ञापक्षे असखीत्यस्य सखिभिन्नस्यावयव इत्यर्थो न तु सखिशब्दावयवं वर्जयित्वेति। तेन समुदायस्य सखिशब्दभिन्नत्वादतिसखिनेत्यादि निर्बाधमित्यवधेयं। स्त्रियामित्येव वक्तव्ये आख्याग्रहणं नित्यस्त्रीत्वलाभार्थं इत्याशयेना।

यू स्त्र्याख्यौ नदी। १।४।३। ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः। प्रथमलिङ्गग्रहणं च॥ पूर्वस्त्र्याख्यस्योपसर्जनत्वेऽपि नदीत्वं वक्तव्यमित्यर्थः। अम्बार्थनद्योर्ह्रस्वः। ७।३।१०७। अम्बार्थानां नद्यन्तानां च ह्रस्वः सम्बुद्धौ। हे बहुश्रेयसि। शसि बहुश्रेयसीन्॥ आण्नद्याः। नद्यन्तात्परेषां ङितामाडागमः स्यात्। आटश्च। ६।१।९०॥ आटोऽचि परे वृद्धिरेकादेशः स्यात्। बहुश्रेयस्यै। बहुश्रेयस्याः। नद्यन्तात्परत्वान्नुट्। बहुश्रेय

हा। नित्यस्त्रीलिङ्गाविति। यू किं। मात्रे। स्त्र्याख्यौ इति किं। ग्रामण्ये। पूर्वमिति। वृत्तेः प्रागित्यर्थः। संज्ञायाः यथोद्देशपक्षे न्यायसिद्धमिदं। कार्यकालपक्षे तु वाचनिकमित्याहुः। वर्णसंज्ञापक्षाश्रयेणेदं। नद्यन्तानामिति। हे बहुश्रेयसीति। अत्र ह्रस्वविधानसामर्थ्याद्गुणो न प्रवर्तते। अन्यथा अंबार्थनद्योर्गुण इत्येव ब्रूयात्। न च लाघवाभावः शंक्यः। ह्रस्वग्रहणे मात्राधिक्यात्। ह्रस्वस्य गुण इत्युत्तरसूत्रे गुणग्रहणत्यागेन सुतरां लाघवसंभवाच्च। अन्ये तु कृतेऽपि ह्रस्वे परत्वाद्गुणः इष्टः स्यात्तदर्थं कार्याणां ह्रस्वः इत्येके। नदीह्रस्वयोर्गुण इत्येव ब्रूयादित्याहुः। तत्र परत्वाद्घ्वाभावेऽपि प्रक्रियालाघवमस्ति परं तु जसि च इत्यत्र ह्रस्वस्येत्येकदेशानुवृत्तौ क्लेशोऽस्तीति बोध्यं॥ आण्नद्याः। आण्नद्याः इत्येव सुवचं। आड्विधानसामर्थ्यादतो गुण इत्यस्याप्रवृत्तौ पृथक्पृथग्वृद्धिसवर्णदीर्घाभ्यां बहुश्रेयस्यै बहुश्रेयस्याः इत्यादिसिद्धेः। ननु परत्वादाटा नुड्बाध्यन्तरंगत्वात्तर्ह्येकपर्यालोचनया ङिद्वचनमिति कृते तस्य नुडागमनिवारणार्थमाड्विधानावश्यकत्वात् सामर्थ्यमुपक्षीणमिति चेन्न। एवं तर्हि ह्रस्वनद्याप इत्यनन्तरं ङेर्न

स्येवसूत्रयतो॥ आमीत्यनुवृत्त्या ङेराम्नो नुट् इत्येतस्यार्थलाभात्। तस्मात् इण् न घा इति विधानसामर्थ्यात् नो गुण इति न प्रवर्तत इति दिक्। आट् श्चायद्यपि इह ङ्यि वृद्धिरेचीत्येव सिद्धं सिद्धं सोर्ङेरामि चसवर्णदीर्घेण तथाप्यैदन्तादित्यादि सूत्रमिहापि व्याप्यत्वाद् इत्यत्र अजादीनामटा सिद्धमाङ् जादीनामिति सूत्रमास्त्विति वदतां वार्तिककारस्य मते तु आट् श्चेत्येव सूत्रमिति बोध्यम्॥ ॐ॥ ङेराम्नाड् इति समस्य कवचनस्य ग्रहणं स मानाधिकरणे स्त्रियामित्यादि निर्देशात्॥ आटानुट् बाध्य इति। आटि कृते तु पुनर्न प्रवर्तते। सकृद्गतौ विप्रतिषेधे यद् बाधितं तद्बाधितमेवेति न्यायाश्रयणादिति भावः। न सुलोप इति। लक्ष्मेर्मुट् चेत्यौणादिक ई प्रत्ययान्तो लक्ष्मीशब्दः इत्युपसर्जनह्रस्वा पिनेति बोध्यं। कुमारीति। यद्यपि क्विवर्थप्रतिङ्यन्तस्योपसर्जनत्वाद् ह्रस्वत्वं प्राप्तं तथापि गोस्त्रियोरित्यत्र कृत्रिमोपसर्जनत्वं गृह्यते न त्वप्रधानरूपमिति नात्र ह्रस्वः प्रवर्तते। अत एव हरीतक्याः फलानि हरीतकाः इत्यत्रापि ह्रस्वो न भवति। लुक्तद्धितलुकीत्यत्र त्वप्रधानरूपमुपसर्जनमेव गृह्यते न तु कृत्रिमोपसर्जनसंभवादिति वक्ष्य

ङेराम्नद्याम्नीभ्यः। ७।३।११६। नद्यन्तादाबन्तान्नीशब्दाच्च ङे राम् स्यात्। इह परत्वादाटा नुट् बाध्यते। बहुश्रेयस्यां। शेषमीप्रत्ययान्तवाच्चप्रधीवत्। अङ्ग्यन्तत्वान्न सुलोपः। अतिलक्ष्मीः। शेषं बहुश्रेयसीवत्। कुमारीमिच्छन् कुमारीवाचरन् इत्यर्थे कुमारी। कयजन्तादाचारक्विबन्ताद्वा कर्तरि क्विप्। हल्ङ्याबिति सुलोपः। अचि श्नुधातुभ्रुवां य्वोरियङुवङौ। ६।४।७७। श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तधातोर्भ्रू इत्यस्य च इयङुवङौ स्तोऽजादौ प्रत्यये परे। ङिच्चेत्यन्तादेशः। आन्नरनम्यादेरियङोरुवङ इति यङि प्राप्ते॥ ((म: अचि श्नु। भ्रमेश्च डूरिति डूप्रत्यया न्तत्वाद् भ्रूशब्दस्य धातोः पृथग्ग्रहणं अन्ये त्वाहुः। गमः क्वावित्यत्र ऊङ् चगमादीनामिति वक्तव्यमिति वार्तिककारेणानुनासिकलोपे ऊङादेशे कृते निष्पन्नोयं भ्रूशब्दः। तथा च धातुग्रहणेनैव सिद्धे भ्रूग्रहणं निरर्थकमिति। इण इति वक्तव्ये य्वोरिति गुरुनिर्देश इण्प्रत्याहारः। परेण णकारेण गृह्यत इति ज्ञापनार्थः। इह य्वोरिति धातोरेवविशेषणं तेन श्नुभ्रुवोरव्यभिचारादित्याह। इवर्णोवर्णान्तधातोरिति। श्नुधातुभ्रुवामिवर्णोवर्णयोरिति व्याख्याने तु इयङुवङोर्ङित्त्वं व्यर्थं स्याद्धि अधिकारे च प्रसज्येतेति भावः। ननु सामानाधिकरण्यपक्षेऽपि ङित्त्वं व्यर्थं निर्दिश्यमानस्यादेशा भवन्तीति इवर्णोवर्णान्तधातोः सर्वादेशत्वनिवृत्तिसंभवादिति चेन्न। श्नुभ्रुवोरपि निर्दिश्यमानत्वेन सर्वादेशत्वप्रसंगात्। इउ इत्यष्टादशानां संज्ञेत्युक्त्वा तत्र यथासंख्यमिह न प्रवर्तत इत्याह। आन्नरनम्यादिति। स्थानत इति भावः। य्वोः किं।

एरनेकाचोऽसंयोगपूर्वस्येत्यतोयण इति वर्त्तते। अचिश्नुधातुरिति सूत्रादिह धातुरेव अनुवर्त्तते न तु श्नुभ्रुवो। तयोरिव र्णासंभवात्। धातुग्रहणं चावृत्त्योभयोर्विशेषणं संयोग
स्यागस्य चेति व्याचष्टे। धात्ववयवसंयोगेत्यादि। तत्र धातुनासंयोगस्य विशेषणादिह यण्। उन्न्यौ। उन्न्यः। हरि। हरीन इत्यादि सिध्यर्थं तु धातुना अंगं विशेष्यते। अन्यथा
प्रध्यं प्रध्यइत्यासविवपूर्वरूपं पूर्वसवर्णदीर्घं च बाधित्वा यण्स्यात्। धात्ववयवसंयोगपूर्वो न भवति यरवर्णस्तदंतत्वादंगस्य। प्रधीरिति। प्रध्यायतीति प्रधीः। ध्या
यतेः संप्रसारणं चेति क्विपि संप्रसारणे पूर्वरूपे च हल इति दीर्घः। यदा तु प्रकृष्टा धीर्बुद्धिर्यस्येति विगृह्यते तदा धीशब्दस्य नित्यस्त्रीत्वात्प्रथमलिंगग्रहणं चेति निषे

एरनेकाचोऽसंयोगपूर्वस्य। ६।४।८२। धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्याऽनेकाचोऽङ्गस्य यण्स्यादजादौ प्रत्यये प
रे। इति यण्। कुमार्य्यौ। कुमार्य्यः। हे कुमारि। अमि शसि च। कुमार्य्यौ। कुमार्य्यः। कुमार्य्या। कुमार्य्यै। कुमार्य्याः। कुमारीणां। कुमार्य्यां।
प्रधीः। प्रध्यौ। प्रध्यः। प्रध्यं। प्रध्यः। उन्नयतीत्युन्नीः। धातुना संयोगस्य विशेषणादिह स्यादेव यण्। उन्न्यौ। उन्न्यः। हे उन्नीः। उन्न्यं। ङेराम्। उन्न्यां।
एवं ग्रामणीः। अनेकाचः किं। नीः। नियौ। नियः। अमि शसि च परत्वादियङ्। नियं। नियः। ङेराम्। नियां। असंयोगपूर्वस्य किं। सुश्रियौ। यवक्रि
यौ। गतिकारकेतरपूर्वपदस्य यण्नेष्यते। शुद्धधियौ। परमधियौ। कथन्तर्हि दुर्धियौ वृश्चिकभियेत्यादि। उच्यते। दुःस्थिता धीर्येषामि
ति विग्रहे दुरित्यस्य धीशब्दं प्रति गतित्वमेव नास्ति। यत्क्रियायुक्ताः प्रादयस्तम्प्रत्येव गत्युपसर्गसंज्ञा। वृश्चिकशब्दस्य बुद्धिकृतमपादानत्व
मेह विवक्षितं। वृश्चिकसम्बन्धिनीभीः वृश्चिकभीरित्युत्तरपदलोपो वा॥ १९ स्त्रीलिंगानिर्देशे यथासंभवं नदीकार्यं बोध्यं। प्रथमलिंगग्रहणं चेति
वार्त्तिकस्य प्रथमलिंगं गृहीत्वा पूर्वस्मात्ख्याति त्यनेन नदीत्वं वक्तव्यमित्यर्थात्। एरनेकाच इति यण्विषयत्वेन नेयङुवङ्स्थानाविति निषेधस्याप्रवृत्तेः श्रुत्यके। अन्ये त्वाहुः एवं त
र्हि यथोद्देशपक्षे नैव न्यायसिद्धमिदमिति मनोरमाग्रंथो विरुध्येत। यथोद्देशपक्षेपि प्रधीशब्दादर्थतया वचनस्यावश्यकत्वात्। मूले हि उपसर्जनत्वेपि नदीत्वं वक्तव्य
मित्युक्तं। न तु नित्यस्त्रीत्वमिति। तस्मात्प्रथमलिंगग्रहणमित्यनेन लिंगं प्रयुक्तं यन्नदीत्वं तन्नैः प्राकृस्थितं तदिहातिदिश्यते। धीशब्दे तु नेयङुवङ्स्थानाविति निषेधेन न
दीत्वाभावान्नास्त्येव प्रधीशब्दे नदीत्वातिदेश इति। ङिति ह्रस्वश्चेति वैकल्पिकनदीत्वमपीह नातिदिश्यते। प्रथमलिंगेति वचनं यथोद्देशन्यायसिद्धमिति ग्रंथानु

रोधेनर्वर्तते॥ प्रागवस्थायां अवयववत्वेनाभिमतेविद्यमानायाएवनदीसंज्ञायाः समुदाये अभ्युपेयत्वात्। नचप्रकृष्टाधीर्यस्यतस्मैप्रध्ये प्रध्यइत्यादौ प्रथमांतधीश
ब्दस्यङितिपरे प्रवर्तमानानदीसंज्ञा अस्तीतिदिक्। उन्नीरिति। सत्सूद्विषेत्यादिना क्विप्। ङेराममिति। आं गत्वान्नीशब्दांतादपि ङेराम् भवतीतिभावः। ग्रामंन
यतीतिग्रामणीः। अग्रग्रामाभ्यांनयतेरितिणत्वं। नीरितिनयतीतिनीः क्विप्। गतिकारकेतरेति। गतिकारकपूर्वस्यैवयणिष्यतेइतितुनोक्तं। कुमारीमिच्छन्
ब्राह्मणः कुमारी कुमार्यौ कुमार्यइत्यत्रयणःप्रसंगात्॥ ॥ शुद्धधियाविति॥ यदातुशुद्धंध्यायतीतिविगृह्यतेतदाभवत्येवयण्। शुद्धध्यौ। शुद्धध्यः। एव
नभूसुधियोः। ६।४।८५। एतयोर्यण्नस्यादचिसुपि। सुधियौ। सुधियइत्यादि। सखायमिच्छतिसखीयति। ततः क्विप्। अल्लोपयलोपौ। अल्लो
पस्यस्थानिवत्वाद्घिलोपाभावे। कौलुमन्स्थानिवत्। एकदेशविकृतस्याः नन्यतयाः नङ्लित्वं। सखायौ। सखायः। हेसखीः। अमिपूर्वरूपात्
ख्वाघिलोपाभावे। ततोऽपिपरत्वात्सख्युरसंबुद्धाविति प्रवर्तते। सखायं। सखायौ। शसियण्। सख्यः। सहखेनवर्ततइतिसखः। तमिच्छतीति। सखीः
सुखमिच्छतीति। सुखीः। सुतमिच्छतीति। सुतीः। सख्यौ। सुख्यौ। सुत्यौ। ख्यत्यादितिदीर्घस्याऽपिग्रहणादुकारः। सख्युः। सुख्युः। सुत्युः। लूनमि
च्छतीतिलूनीः। क्षाममिच्छतीतिक्षामीः। प्रस्तीममिच्छतीतिप्रस्तीमीः। एषां ङसिङसोर्यण्। नत्वमत्वयोरसिद्धत्वान्नख्यत्यादित्युत्वं। लून्युः।
क्षाम्युः। प्रस्तीम्युः। शुष्कीयते। शुष्कीः। पक्वीः। इयङ्। शुष्कियौ। शुष्कियः। ङसिङसोः शुष्कियइत्यादि। इतिईदन्ताः। शम्भुर्हरिवत्। एवंभि
क्षुवायुभान्वादयः॥ ॥ ११ मग्रेपि। कथंनहीति। गतिकारकेतरपूर्वपदत्वंइहनास्तीतियत्नेवभाष्यमितिप्रश्नः। दुर्धियइत्यत्रप्रादिभ्योधा
तुजस्येतिवार्तिकेनउत्तरपदलोपंविधाय इत्याशयेनाह दुस्थितधीर्येषामिति। वृश्चिकशब्दस्येति। भाष्यकृताहिबुद्धिपरिकल्पितमपायमाश्रित्यभीत्रार्था
नामितिसूत्रंप्रत्याख्यातं। ततश्चसंबंधमात्रविवक्षायांषष्ठ्येवेतिनास्त्यत्रकारकपूर्वत्वमितिभावः। वृश्चिकसंबंधिनीभीरिति। एवंचभययोगाभावाद्वृश्चिकस्य
नापादानकारकत्वमितिसूत्रमतेपिनदोषइतिभावः। ओः सुपीत्यतः सुपीत्यनुवर्तनादाह। अचिसुपीति। सुपिकिं। सुध्युपास्यः। वस्तुतस्तुसुपीत्यननुवर्तनादपि
न क्षतिः। अनंतरस्येतिन्यायेनएरनेकाचइतिओः सुपीतिचसूत्रद्वयेनप्रापितस्यैवयणोनभूसुधियोरितिनिषेधाभ्युपगमात्। स्थानिवत्वाद्घिलोपाप्रसङ्गात्॥

रर नेकाचइत्यनेनान्तर्वर्तिनीं विभक्तिमाश्रित्य सर्वो गन्धस्य पदत्वान्नपदान्तेति निषेधेन अल्लोपो न स्थानिवदिति वाच्यो नः क्यइति नियमेन क्यचि नांतस्यै
वपदत्वादत आह। कौलुप्तमिति। नपुंसके भावे क्तः। कौ लोप इत्यर्थः। इदं सर्वं कुमारीमिच्छन् कुमारीत्यत्रापि वाच्यं। कौलुप्तमित्यनन्तकाचित्कं। कौ विधिं प्रति न
स्थानिवदित्यभ्युपगमात्। अन्यथा विभिदिद्भास्तलाकुल्लानीति हलंतनपुंसके वक्ष्यमाणं न संगच्छेत। वेभिद्यतेः क्विपि अल्लोपे यलोपे च कौलुप्तत्वेनाल्लो
पस्य स्थानिवत्त्वाभावे झलंतलक्षणो नुम्प्रसंगात्। कौ विधिं प्रति न स्थानिवदित्यस्योदाहरणं लवमाचक्षाणो लौः। अत्र णिचि यष्टिलोपः यश्च कौ णिलो
पः तदुभयं च्छ्वोः शूडिति वकारस्य ऊठि निमित्ते ऊठि कर्तव्ये न स्थानिवत्। एत्येधत्यूठस्विति वृद्धिः। अत्र दमवधेयं न पदान्तेति सूत्रे क्विलुगुपधात्वचङ्प
रनिर्ह्रासकुत्वेषूपसंख्यानमिति वार्तिकमस्ति तदेकदेशानुवादोयं। कौलुप्तमित्यादीति। लुकालुप्तं न स्थानिवदित्यादीनां प्युदाहरणान्यत्रोच्यंते। तापंचमि
पट्वीभिः क्रीतः पंचपटुः। आर्हादिति ठक् तस्याध्यर्धपूर्वेति लुक्। लुक्तद्धितलुकीति ङीषो लुक्। तस्य लुका लुप्तत्वेन स्थानिवत्त्वाभावात् अत्र यणादेशो न भ
वति। न च ङीषो लुकः परनिमित्तकत्वाभावान्न स्थानिवत्त्वं न भवेदिति शंक्यं ङीषो लुकं प्रति स्थानिभूतात्तद्धितलुकः परत्वस्वीकारात्॥ यद्वा॥ वृद्धिपरिक
ल्पितं पौर्वापर्यमभावेप्यस्तीति नात्रानुपपत्तिः। न च अहेतद्धितविवादिनं तस्मात् तद्धितइति पुंवद्भावादत्र निषेधं विनैवेष्टसिद्धिरित्यपि शंक्यं। यत्र भावि
भत्वं तत्रैव पुंवद्भावः। इह तु लुकि भत्वाभावात् तक्ते तः पुंवद्भाव इति कथं टनीक्तत्वात्। तथा पंचेंद्राण्यो देवता अस्य पंचेंद्रः। सास्य देवतेत्यण्। द्विगोर्लुगनप
त्ये इति लुक्। ततो ङीषो लुकि तस्य स्थानिवत्त्वाभावात् ङीषा संनियुक्त आनङ् न श्रूयते। पुंवद्भावस्यात्र शंकापि नास्ति। इंद्रे इंद्रत्वमिंद्राण्यामिंद्रस्त्री
त्वमिति प्रवृत्तिनिमित्तभेदे भाषितपुंस्कत्वस्यानभ्युपगमात्। यत्तु न पदांतेति सूत्रे वरे इति ईकारप्रश्लेषं कुर्वंति तेषामिह लुग्ग्रहणं न कार्यं। उपधात्वे कर्तव्ये न स्थानि
कोनपारिखाप्रत्याचातुरर्थिके अणि कृते वृद्धौ रके कौ नत्यादिना पारिखशब्दात् तेनोपधलक्षणे छप्रत्यये पारिखीयः सिध्यति। अन्यथा उपधासंज्ञायाः पूर्व
विधित्वेनास्याकर्तव्यायां आल्लोपः स्थानिवत्स्यात्। नन्वेवं इटयतीत्यादौ वृद्धिः स्यादिति चेन्न। यत्रोपधासंज्ञामुपजीव्य प्रत्ययो विहितस्तत्रैवायं निषेध इति
भाष्यध्वनितत्वात्। तत्र चङ्परनिर्ह्रासग्रहणमवश्यापकं। चङि परे यो ह्रस्वः स चङ्परनिर्ह्रासस्तत्र न स्थानिवत्। वादितवंतं प्रयोजितवान् अवीवदद्वीणां परि

वार्तिकेन। अत्र प्रथममल्लोपस्य स्थानिवत्त्वाद्दाकारो नोपधेति णौ चङ्युपधाह्रस्वो न प्राप्नोति। णिसामान्यग्रहणादेतन्सिद्धमिति चेन्न तर्ह्यन्यदुदाहर्तव्यं वारि आख्या
दर्षीवरत्। न चाग्लोपीति निषेधः शङ्क्यः परत्वाद्वृद्धौ सत्यां टिलोपइत्यभ्युपगमेनाग्लोपित्वाभावात्। अत एवमूदमिश्रेति सूत्रे हलि च कल्योर्हलकलेत्यदन्तनिपातनं
सार्थकं। कुत्वेन स्थानिवत्। अर्चयतेरर्कः कृदाधारार्चिकलिभ्यः क इति कः पाचयते पाक्तिः रहचोः कुरिति कुत्वम्। णिलोपो न स्थानिवत् वार्त्तिके स्मिन्नुक्ते चङ्परनिह्रासो
पधानां ग्रहणमात्रस्य कम्बुकर्दकास्सव्रक्षैत्ययणगजार्थत्वात् कुत्वस्य पूर्वत्रासिद्धीयत्वाच्चेत्यपषधेयां। चजोरिति कुत्वं वा उदाहरणमन्वेषणीयोसत्वरत्ते। तेनस
हेति बहुव्रीहौ वोपसर्जनस्येति सभावः। सखीरित्यादि। सुप आत्मनः क्यच्। क्यचि चेतीत्वं। दीर्घस्यापीति। एतदर्थं कृत यणादेश इति भावः। ननु अन्तिसत्त्वेभूपि
तेरिति गुणविषयं व्यावर्तयितुं यणानिर्देशः स्यादिति चेन्न। अस्त्वेवं तथापि दीर्घप्रवृत्तिः केन वार्यतां। नहि ह्रस्वेषु यणाभाव्यं न दीर्घेष्वित्यत्र प्रमाणमस्ति। सोऽस्य
विकृतनिर्देशस्याव्याप्त्यानियां स्युभय कार्यत्वे सारवत्त्वलाभेन तथैवोचित्याद्भाष्यारूढत्वाच्च। लूनमिति। ल्वादिभ्य इति निष्ठानत्वं। स्तामममिति। स्त्यायोमः इति

तृज्वत्क्रोष्टुः ।७।१।९५। क्रोष्टुशब्दस्तृजन्तेन तुल्यं वर्त्तते। असम्बुद्धौ सर्वनामस्थाने परे क्रोष्टुशब्दस्य स्थाने क्रोष्टृ प्रयोक्तव्य इत्यर्थः॥

मः। प्रस्तीममिति। प्रस्त्योन्यतरस्यामिति मः। स्फः प्रपूर्वस्येति संप्रसारणं। शुष्कौरिति। शुषः क इति निष्ठातस्य कः। पक्वौरिति। पचो व इति वः। इयङिति। संयो
गपूर्वत्वादिव स्थयणन्निति भावः॥ इतीदन्ताः। हरिवदिति। तद्धत्साध्य इत्यर्थः। तृज्वत्क्रोष्टुः। क्रुश आह्वाने रोदने च। अस्मात्सितनिगमिमसिसच्यविधा
ञ्क्रुशिभ्यस्तुन् इति तुन प्रत्यये क्रोष्टुशब्दः तृचितु क्रोष्टृशब्दः द्वावपि शृगालवचनौ तत्राविशेषेण द्वयोः प्रयोगे प्राप्ते सर्वनामस्थाने स्त्रियां च तृजन्तमेव तत्
तीयादावच्युभयमन्यत्र तुजन्तमेवेति नियमार्थं त्रिसूत्री आरभ्यते। क्रोष्टुरिति तृन्नन्तान्नाथमा तृज्वदिति तृतीयान्ताद्वतिः निमित्तव्यपदेशतादात्म्यपक्षस्त्वका
र्यरूपविषयत्वेनातिदेशस्यानेकविधत्वेपि प्राधान्यादिह रूपमेवातिदिश्यते। न त्वनपित्रादेर्यस्य कस्यचित् किंतु क्रुशेरेव उपस्थितत्वात्। अर्थतः आनर्था च
त्यभिप्रेत्य फलितमाह। क्रोष्टुशब्दस्थाने क्रोष्टृशब्द इति निमित्तातिदेशो यथा। चिकीर्ष तिः। चिकीर्षति। अप्रसन्नं तस्य पूर्ववत् समनइत्यनेन न जित्वातिदेशः कर्त्रभि
प्राये आत्मनेपदं सिध्यति। ननु कार्यातिदेशनाप्येतद्गतार्थमिति चेत्। अत्राहुः। निमित्तप्रतिसंधानपूर्वकत्वान्नस्येति निमित्तातिदेशः पृथगुक्त इति। व्यपदे

शातिदेशोयथा। आद्यन्तवदेकस्मिन्नित्यनेनकर्तव्यमित्यादौसावकाशप्रत्ययाद्युदात्तत्वफलकआदित्वव्यपदेशऔपगवादावतिदिश्यते। तादात्म्याति
देशोयथा। सुबामन्त्रितेपराङ्गवत्स्वरे इत्यनेन द्रवत्पाणीशुभस्पती इत्यत्र शुभशब्दस्य पराङ्गवत्त्वे सति षाष्ठिकेनामन्त्रितस्येत्यनेन प्रकारान्तरस्याद्यु
दात्तत्वंसिध्यति। शास्त्रातिदेशोयथा। कालभ्योभववत् इत्यनेन कालवाचिभ्यस्तत्रभव इत्यधिकारस्थं तत्शास्त्रं तत्रास्य देववत् इत्यर्थे अतिदिश्यते।
तेनमासिकंप्रावृषेण्यमित्यत्र यथाविहितंकालाट्ठञ्। प्रावृषएण्य इतिसिध्यति। कार्यातिदेशस्तु इह प्रकृतिप्रत्ययादीनांसांकर्यं स्यात्। कार्याति
देशोयथा गोतोणिदित्यनेन गौः गावौ गावः। अत्र णित्कार्यवृद्धिरतिदिश्यते। प्राधान्यात्। केचित्तुनिमित्तातिदेशो गोतोणिदित्युदाहरन्ति तन्मते कार्यातिदेशस्य क
र्मवत्कर्मणा। स्थानिवदादेश इत्याद्युदाहर्तव्यं। रूपातिदेशोयथा। वतण्डी चासौ वृन्दारिका च वातण्ड्यवृन्दारिका। अत्र वतण्डीशब्दे पुंवत्कर्मधारये

ऋतोङिसर्वनामस्थानयोः।७।३।११०। ङौसर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणःस्यात्। इतिप्राप्ते ऋदुशनस्पुरुदंसोऽनेहसां
च।७।१।९४। ऋदन्तानामुशनसादीनां च अनङ् स्यात् असम्बुद्धौ सौ परे। अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम्।६।४
।११। अप्वादीनामुपधायादीर्घः स्यात् असम्बुद्धौ सर्वनामस्थाने परे। नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थं। तेन पितृभ्रातृप्रभृतीनां न॥ उ
द्गातृशब्दस्य भन्नेव। समर्थसूत्रे उद्गातार इतिभाष्यप्रयोगात्। क्रोष्टा। क्रोष्टारौ। क्रोष्टारः। क्रोष्टारं। क्रोष्टारौ। क्रोष्टॄन्। विभाषातृतीया
दिष्वचि।७।१।९७। अजादिषुतृतीयादिषु क्रोष्टुर्वा तृज्वत्। क्रोष्ट्रा। क्रोष्टु॥ ॥ २२ त्यनेनपुंवाचकः वातण्ड्यशब्दरूपमतिदिश्यते। इह

मध्यमायामतिदेशस्य षड्विधत्वमुक्तं अन्ये तु कार्यरूपनिमित्तार्थशास्त्रतादात्म्यशब्दिताः। व्यपदेशश्च सप्तैता नतिदेशान्प्रचक्षते इति सप्तविधत्वमाहुः
अर्थातिदेशस्योदाहरणं तु गार्गी च गार्ग्यायणौ च गर्गाः। अत्र स्त्रीपुंवच्चेत्यनेन गोत्रप्रत्ययान्तस्त्रीवाचकस्य वृद्धस्त्रीयूनेत्येकशेषे सति स्त्र्यर्थस्य पुमर्थोऽति
दिश्यते तेन स्त्रियामपत्यकृतं बहुत्वे यञञोश्चेति लुक् सिध्यति॥ ॐ॥ ऋतोङि। कृतृ एतयोरनुकरणे ऋकारान्ते गुणनिवारणाय न परस्करणमितिबो
ध्यं। अप्तृन्। तृजिति च मयस्विति वक्तृ इत्यवसिद्धे तृन्तृचोर्भेदेनोपादानं क्वचित्सामान्योक्तावपि विशेष एव गृह्यत इति ज्ञापनार्थं। तेन नकोपधाया इत्य

त्सामान्योक्तौ वष्यकतद्धितयोरेव ग्रहणं यत्तेनानकमात्रं। तेन यदग्रे वक्ष्यति क्रोष्टुप्रतिषेधनद्धितवुग्रहणमिति तदुपपन्नं भवतीत्येके॥ अन्ये त्वाहुः। अ
पर्मे इत्येवं कृत्व्ये नृन्तजितिभेदेनोपादानमर्वणस्तृच्यान्तृन्नयोः यद्यप्यर्थवत्परिभाषया तृन्निवृत्तिः सिध्यति तथापि तस्याः परिभाषायाः अनित्यत्व
ज्ञापनाय तयोः पृथगुपादानं। तेन अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्तीति सिद्धमिति। व्युत्पत्तिपक्षे तृन्नन्तत्वात् जंतत्वा
द्धा सिद्धे नप्त्रादिग्रहणं व्यर्थमित्यत आह। नियमार्थमिति। औणादिकानामन्येषां संज्ञाशब्दानां मा भूदित्येतदर्थमित्यर्थः धातृशब्दस्त्वौणादिकशब्दो
न भवतीति। अत्र दीर्घो भवत्येव। धातारौ। धातारः। अव्युत्पत्तिपक्षे तु नप्त्रादिग्रहणं विध्यर्थमिति। पितृभ्रातृप्रभृतीनां दीर्घशंकैव नास्तीति बोध्यं। तेनेति। पि
तरौ। पितरः। भ्रातरौ। भ्रातरः इत्यादौ दीर्घो नेत्यर्थः। क्रोष्ट्विति। अनङ् हल्ङ्यादिलोपात्परत्वादुपधादीर्घः। सर्वनामस्थाने चेत्यनेन यद्यप्युपलभ्यते तथापि परत्वादय

ऋत उत्। ६।१।१११। ऋदन्तान् ङसिङसोरति परे उकार एकादेशः स्यात्। रपरत्वं। रात्सस्य। ८।२।२४। रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य
रेफस्य विसर्गः। क्रोष्टुः। आमि परत्वान्नुम् नुड्भावे प्राप्ते। नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन॥ क्रोष्टूनां। क्रोष्टरि। क्रोष्ट्रोः। पक्षे हलादौ च श
म्भुवत्। इत्युदन्ताः। हूहूः। हूह्वौ। हूह्वः। हूहूं। हूह्वौ। हूहून् इत्यादि। अतिचमूशब्दे तु नदीकार्यं विशेषः। शेषं तु क्विबन्तवातप्रमीवत्। हे
अतिचमु। अतिचम्वै। अतिचम्वाः। अतिचमूनां। अतिचम्वां। खलपूः॥

नित्यं वक्ष्यमाणः। कृतेऽप्यनङि एकादेशो विकृतस्यानन्यत्वेन तत्त्वात्। अन्य
था गुणे कृते सिक्रोष्टा स्थितावित्यादौ स्थानिवद्भावेन स्यादिति भावः। विभाषात्। यस्मिन्विधिस्तदादावितितदादिविधिरित्याह। अजादिष्विति। ऋत उत्। ऋकाराकारयोरेकदे
शे सति ह्रस्व एव उकारः स्यात्। तु दीर्घ इत्येतदर्थकेन तपरकरणेन भाव्यमानोऽण् सवर्णान्न गृह्णातीति ज्ञाप्यते तेन यवलपरे हकारे मस्य विधीयमाना यवला
अनुनासिका भवंति। रात्सस्य। सस्यैवेति तस्य लोप इत्यनेनैव सिद्धे नियमार्थमिदमित्याह। सस्यैवेति। नान्यस्येति। उर्क्। परिमार्ट् इत्यादौ रेफात्संयोगान्तस्य लोपो नेत्यर्थः
रादेव सस्येति विपरीतनियमोऽत्र न भवति। उरः प्रभृतिषु कृतसंयोगान्तलोपस्य प्रमानित्यस्य दर्शनात्। परत्वादिति। न च नुट् नित्य इति वाच्यं। तृज्वद्भावे कृते सन्नि
पातपरिभाषया नुटो दुर्लभत्वात् इति भावः। नुमचिरेति। वारीणां तिसृणां क्रोष्टूनामिति क्रमेणोदाहरणानि। ननु रेण स्वविषयप्राप्तं सर्वं बाध्यं। बाध्यसामान्यचिं

ना। श्रयणं नृ। अनङ् ... गुण दीर्घोत्वानामपवाद इति वक्ष्यति। तथा चाविशेषान्नुड् प्यनेन बाध्यत इति कथमिह विप्रतिषेधः। उत्सर्गापवादयोस्तु योगादिति चेत्। अ
त्राहुः अत एव तत्र इति विप्रतिषेधं दर्शयित्वा नतिसृ चतसृ इति ज्ञापकान्नुडिति भाष्यकृतोक्तं। एवं च नुमत्र स्वद्वावाभ्यामित्येव सुवचमिति। इत्युक्तं॥ हूहूरिति
गंधर्वविशेषवाचकमव्युत्पन्नं ... परिकमिदं। हूह्वाविति। दीर्घाज्जसि चेति पूर्वसवर्णदीर्घनिषेधे सति कृत इति यण्। अति च भूशब्देत्विति। प्रथमलिंगग्रह
णं चेत्युक्तेः। तथा चैवमतिचम्वा इत्यत्र इति प्राचोक्तं नादर्त्तव्यमिति भाः। खलपूरिति। खलं पुनातीति पूञः क्विप्॥ ❀ ॥ ओः सुपि॥ इणो यणिति त्यजतो यण्। एरनेकाच

ओः सुपि। ६। ४। ८३। धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ सुपि। गतिकारकेत
रपूर्वपदस्य यण्नेष्यते। खलप्वौ। खलप्व इत्यादि। एवं सुल्वादयः। अनेकाचः किं। लूः लुवौ। लुवः। धात्ववयवेति किम्। उल्लूः। उल्ल्वौ। उल्
ल्वः। असंयोगपूर्वस्य किम्। कटप्रुवौ। कटप्रुवः। गतीत्यादि किम्। परमलुवौ। सुपि किम्। लुलुवतुः। स्वभूः। न भूसुधियोः। स्वभुवौ। स्वभुवः। व
र्षाभ्वश्च। ६। ४। ८४। अस्योवर्णस्य यण् स्यादचि सुपि। वर्षाभ्वौ। वर्षाभ्वः। दृन्भवतीति दृन्भूः। अन्दूदृन्भूजम्बूकफेलूकर्कन्धूदिधिषूरित्युणादिसू
त्रेण व्युत्पादितः। दृंभ्वौ। दृंभ्वः। दृंभ्वं। दृंभ्वौ। दृंभून्। शेषं हूहूवत्। दृन्निति नाम्नो हिंसार्थस्याव्ययस्य भुवः क्विपा दृन्भूः। दृन्करपुनःपूर्वस्य भुवो यण् व
क्तव्यः। दृन्भ्वौ। दृन्भ्वः इत्यादि। खलपूवत्। कारभ्वौ। कारभ्वः। दीर्घपाठे तु कार एव कारः। स्वार्थिकः प्रज्ञाद्यण्। कारभ्वौ। कारभ्वः। पुनर्भूर्योगिकः पुंसि
पुनर्भ्वौ इत्यादि। दृग्भूकारभूशब्दौ तु यथाभूवत्। इत्युक्त्वाः। धाता। हे धातः। धातारौ। धातारः। ऋवर्णान्नस्य णत्वं वाच्यं॥ धातॄणां। इत्यादि। एवं न
प्त्रादयः। उद्गातारौ। पिता। अप्तृन्नादिसूत्रे नप्त्रादिग्रहणस्य नियमार्थत्वान्न दीर्घः। पितरौ। पितरः। पितरम्। पितरौ। शेषं धातृवत्। एवं जामातृभ्रात्रादयः।

इति सूत्रं च सर्वमनुवर्त्तते। इवर्णवर्जं। ओरित्युकारस्य कार्यित्वेन निर्देशात्। अविशेषु धात्विति सूत्रात्तु एरनेकाच इत्यत्रैव संबध्यते इत्याशयेन व्याचष्टे। धात्ववयवसंयो
गेत्यादि। वर्षाभ्वौ वर्षाभ्व इति। अत्र इको यणचीति यणं बाधित्वा प्रथमयोरिति पूर्वसवर्णदीर्घः प्राप्तः तस्य दीर्घाज्जसि चेति निषेधे पुनरपि यणादेशप्रसक्तौ अचि श्नु
धातुभ्रुवामित्युवङ् तं च बाधित्वा ओः सुपीति यण् तस्य न भूसुधियोरिति निषेधे पुनरुवङादेशप्रसक्तौ वर्षाभ्वश्चेति यणिति बोध्यं। एवमन्यत्राप्युत्सर्गापवादवि

सु
सि·को
टी·त
५८

…पर्ययाः। भेके मंडूकवर्षाभूशालूरप्लववर्दुरा इत्यमरः। भेक्यां पुनर्नवायां स्त्री वर्णभूर्ददुरे पुमानिति यादवः। दृंभतीति। दृभी ग्रंथे तुदादिः। दृंभूर्ग्रंथकर्ता। कथकर
मन्त्येयुत्यादिरिति। उ प्रत्ययो नुमागमश्चात्र निपात्यते इत्यर्थः। दृशपादीदृन्तो तु दृभेर्णं दृंभूः नुमागमोऽ नुस्वारश्च नि
पात्यत इत्युक्तम्। अयमूकारो न धातोरिति उवङोऽप्रसंगादिको यणेवीति यण् स चाभिपूर्व इत्यनेन वा ध्यन इत्याशयेनाह। दृंभूमिति। शसि दीर्घाज्जसि चे
ति निषेधात् दृन्भूपूर्वसवर्णदीर्घेणापि वाध्यत इत्याह। दृंभूनिति। दृन्भितीति। इदं च श्रीपतिमतं। माधवेन तु अंदूदृंभू इत्यादिसूत्रेण दृढशब्दे उपपदे भुवः कूप्रत्य
यः उपपदस्य दृन्भादेशश्च निपात्यत इत्युक्तं। दृन्भूरिति। नक्रुसर्पजातिभेद इत्येकेकपिरित्यन्ये। वज्रंच्य इति। वर्षाभ्वश्चेति चकारस्यानुक्तसमुच्चयार्थत्वादिति भावः। एवं
वभ्वोः सुधीनिषा मस्य यणा न भूसुधियोरिति निषेधे वर्षादृन्कर पुनः पूर्वस्य भुव इत्येन हि ध्यर्थमिति स्थितं। अत्र नव्याः। वर्षादृन्कर इत्यस्य नियमार्थतां स्वीकृत्य न भूसुधि
योरित्यत्र भूग्रहणं त्यक्तुं शक्यमिति। दीर्घपाठ इति। दृन्कारे इति पादे इत्यर्थः। एवं च ह्रस्वपाठे कारपूर्वस्यो वङ् दीर्घपाठे तु करपूर्वस्योवङिति विवेकः पुनर्भूर्दिधिषूरूढा
दिरित्यमरोक्तेः पुनर्भूशब्दो नित्यस्त्रीलिंगः तथा च स्त्रीलिंगप्रकरण एवायं वक्तुमुचितो न त्वत्रेत्याशंकायामाह। यौगिकः पुंसीति। पुनर्भवतीति पुनर्भूरिति क्रियाशब्दः पुल्लिंगेऽप्यस्तीत्यर्थः
स्वयंभूवदिति। स्त्रीवाच्ये तु दृग्भूकारभूशब्दो वर्षाभूवदुदाहृतो न तु पैस्यमिति भावः। इत्यूदंताः॥ धातेति। दधातीति धाता। अब्जयोनिः। दुधाञ् तृच् तृन्वा अनङ् दीर्घ
सुलोप नलोपाः। व्युत्पत्तिपक्ष इति। अव्युत्पत्तिपक्षे दीर्घशंकैव नास्ति। अवादिष्वपठनादिति भावः। नेति। नयतेर्डिच्चेति ऋप्रत्यये नो नृशब्दः। अनङादि प्राग्वत्॥

५८

नृ चा इहछंदस्युभयथेति सूत्रादुभयथेत्यनुवर्तत इत्यभिप्रेत्याह। वा दीर्घः स्यादिति। केचित्त्विहछंदसीत्यप्यनुवर्तयंति तेषां हि चिंता जर्जरचेतसां वत नृणां कानाम्
भवतेः कथा। नृणामेकोगम्यस्त्वमसीत्यादिप्रयोगानसंगच्छेरन्॥ किंच। छंदस्युभयथेति पूर्वसूत्रेणैव नृणां नृणामिति सिद्धे नृ चेति सूत्रस्य वैयर्थ्यं स्यात्तस्यदपि पूर्वसू
त्रेतिसूत्रेनसहर लनुवर्तयंतितदप्ययुक्तं। अविशेषेण विकल्पदर्शनात्। तथा च धाता धाता नृणामिति मत्रेनैत्तिरीये हस्वः पठ्यते बह्वृचैस्तु दीर्घ इति दिक्॥ ॐ॥
इत्यृदंताः। प्रकृतिवदनुकरणमित्यादि। यत्तदेतेभ्यः परिमाणे इति निर्देशोऽत्र लिंगं भवति हि तत्र त्यदाद्यत्वकरणादनुकरणस्य प्रकृतिवत्त्वमेकशेषाभावदर्शी
नाच्च वैकल्पिकत्वेति इत्वेरपरत्वमिति। कृत इत्थानोरिनी त्वे उरण्रपर इति रपरत्वं। कीरिति कृधातुरित्यर्थः। एवं तीरिरिति। तृधातुः। इत्यादीति। ऋत उदिति तपरकरणान्न उसि
उ सोरत उदिति स्वेनक दीर्घान्न स्यादा मो ननुट्। क्रामा अं तु क्रि इत्यादि। इत्यृदंताः। अनडिति। ऋलृवर्णयोः सावर्ण्यादृदुशनेति सूत्रप्रवृत्तेः। गुणविषय इति। ऋतो ङीनि

नृचा ६।४।६। नृ इत्येतस्य नामि वा दीर्घः स्यात्। नृणां। नृणां। इति ऋदन्ताः। कृतृ अनयोरनुकरणे प्रकृतिवदनुकरणमिति वैकल्पिकातिदेशादि
त्वे रपरत्वे कीः। किरौ। किरः। तीः। तिरौ। तिरः। इत्यादि गीर्वत्। इत्वाभावपक्षे तु ऋदुशन इति ऋतो ङीनि च तपरकरणादनङ् लोना। कृः। क्रौ। क्रः। क्रं। क्रौ
क्रन्। क्रा। क्रे। इत्यादि। इति ऋदन्ताः। गम्लृ शक्लृ अनयोरनुकरणेऽनङ्। गमा। शका। गुणविषये तु लपरत्वं। गमलौ। गमलः। गमलम्। गमलौ। गमॄ
न्। गम्ला। गम्ले। ङसिङसोः गमुल्। ऋत उदित्युत्वे लपरत्वे संयोगान्तस्य लोपः। गमुल्। शकुल्। इत्यादि। इति लृदन्ताः। सेः। सयौ। सयः। स्मृतेः। स्मृतयौ। स्मृते

गुणाविषये। गमृन् इति। लृवर्णस्य दीर्घाभावात् प्रथमयोरिति यः पूर्वसवर्णदीर्घः स लकाराकारयोः स्थाने ऋकार एव भवति। नन्वत्र लकार ॥ यः इत्येदन्ताः
द्वयगर्भो लकार दीर्घोस्त्विति चेदु॥ अत्राहुः प्रथमयोः पूर्वसवर्ण इत्यस्याकः प्रथमाद्वितीययोरचि पूर्वस्य सवर्णो यो दीर्घः स पूर्वपरयोः स्थाने भवतीत्यर्थो हल्लृवर्णयावे
चनेन सावर्ण्यसंज्ञा वा नत्वकार एव लृकाराऽकारयोः स्थाने भवति न तु लकारद्वयगर्भो दीर्घलस्य ईषत्स्पृष्टप्रयत्नत्वात् प्रयत्नभेदेन लकारसावर्ण्याभावादिति एव
च हीनं नित्यादौ रेफद्वयगर्भो दीर्घ ऋकाराकारयोः स्थाने न भवत्येवेति बोध्यं। इत्यादीति। गमॢभ्यां। गमॢभिः। गमॢभ्यः आमि तु गमृणामिति केचित्। वस्तुतस्तु
ऋकारस्थाने लकारद्वयगर्भेणैव दीर्घेण भाव्यं तेन ऋस्थाने नत्वं अंतर्यस्य बलीयस्त्वात्। होतॄणामित्यत्र तु ऋकार एव भवति स्थानप्रयत्नाभ्यां सामान्यात्। स्यादेतत्

सु० सि० कौ० टी० त० ६०

ऋॢ इत्ययुक्तस्य लृकार इत्ययुक्तस्य चैव स्पृष्टप्रयत्नत्वात् प्रयत्नभेदेन ऋलृवर्णाभ्यां सावर्ण्याभावेनाच्त्वाभावाद् ऊकालोऽजित्यादिना दीर्घसंज्ञानाप्तीति कथमृॢकार इ
त्यत्राभेलभवितव्यं। ऋति ऋ वा लृति लृ वेति वार्त्तिकप्रत्याख्यानं वा कथं संगच्छतां। अकः सवर्णे इत्यनेन इष्टरूपाणामसिद्धेः। अत्राहुः उभयोरप्यच्त्वसिद्धये वर्णस
माम्नाये ऋॢक् सूत्रेऽन्तरं पाठः कर्तव्यस्तेन सर्वेष्टसिद्धिः। न च दीर्घत्वसिद्धावपि विवृतप्रयत्नसाम्यात् होतॄकार इत्यत्र ऋकारो दीर्घ एव स्यात् न तु रेफद्वययुक्तो दीर्घ इति
शंक्यं। ऋकारद्वयस्थाने रेफद्वययुक्तसाम्येन कदाचित्तस्यापि प्रवृत्तेः। होतृॢकार इत्यत्र लृकारेण आनर्यात् कदाचिल्लकारद्वययुक्तः कदाचिदृकारेण आनर्यादि
कारश्च भवति परं तु वार्त्तिकमते होतॄकार इत्यत्र रेफद्वयगर्भो न भवति। प्रत्याख्यानपक्षे तु कदाचिद्भवतीति वैषम्यमस्ति तत्रेष्टापत्तिर्वा प्रत्याख्यानस्य प्रौढिवाद
ता वा अभ्युपगन्तव्येति। अत्रेदं बोध्यं। अकः सवर्णे इति सूत्रस्थभाष्ये ऋति ऋ वा लृति लृ वेत्यनेन प्रत्याख्यानं तुल्यास्यमिति सूत्रस्थभाष्येऽनुतस्य प्रत्याख्यानेऽपि फलभेदेन द्वोगा।
त्सीकृतेऽनु तस्मिन्न कोकीत्यवसुवेच्चमिति ग्रंथोऽनुपपन्न एव। यदि तु ऋति ऋ वेति वार्त्तिकं अर्कऋति ऋ वेति पठ्येत तदा वार्त्तिकयोः सवर्ण इति पदानुवृत्त्यनपेक्षणान्तु
वच्चमेवाऽकोकीति। पंक्तमनुसरणमः ङेतु ऋतो ङीति गुणो लपरः। गमलि। गम्लोः। गम्लषु। एवं शक्लृ शक्तेप्लृत्सां। इति लृदन्ताः। सेरिति। अस्यापत्यमिः कामः। अस्य
स्त्री ईः लक्ष्मीः तेन सह या वा सह वर्तत इति विग्रहे तेन सहेति तुल्ययोग इति बहुव्रीहौ वोपसर्जनस्येति सहस्य सभावे आटुणः। सय इति। ननु से इत्येकारस्य अंतवद्भावे
न पदांतत्वात् यादेशं बाधित्वा जसि परतः एङः पदांतादिति पूर्वरूपमेकादेशः स्यात्। तथा च सेरित्यव रूपं स्यात् न तु सय इति चेत्। अत्र केचित्। एवं तर्हि ध्यासः से ई
शः से इति विग्रहे तेदेशस्यानुकरणं शब्दोयम् तत्र हि जसि परतोऽयादेशस्य निर्बाधत्वादिति। स्मृतेरिति इः कामः। स्मृतो येन सः ई लक्ष्मीः। स्मृता येनेति वा विग्रहः।
निष्ठेति स्मृतशब्दस्य पूर्वनिपातः। स्मृतय इति। नन्वत्र पूर्वोक्तरीत्या एङः पदांतादतीति पूर्वरूपेण भाव्यं न त्वयादेशेन न त्वत्रानुकरणशब्दत्वकल्पनमौचितीं लभ
ते इति चेत्। अत्र ब्रूमः। उत्तरपदत्वे चापदादिविधौ प्रतिषेध इति प्रत्ययलक्षणप्रतिषेधादेङः पदांतादतीत्यस्याप्रवृत्तिः। किं च। स्वादिष्वसर्वनामस्थाने यचि भमित्यत्र
ष्टित्वानन्तरं चकिं यथा संग्रथ्ययजादौ सर्वनामस्थाने परतः पूर्वपदसंज्ञं न भवतीति व्याख्यातं तेन श्यानेन सुप्तिङंतमिति स्वादिष्विति च द्विविधापि पदसंज्ञा निषिध्य
त इति पूर्वान्तत्वप्रयुक्तोपदांतत्वेह दुर्लभेति स्मृतय इति रूपं निर्बाधमेव तथा सय इत्यत्र इनासहेत्यादिव्युत्पत्तिपक्षेऽपि नानुपपत्तिः। न चैकादेशस्य पूर्वांतत्वेनाव्य

६०

यत्वात्सुपो लुक्स्यादिति शंक्यं। अव्ययसंज्ञाया अन्वर्थत्वेनोपसर्जनेतरभावात्। न चैवमपि सहद्र इति स्थिते अंतरंगत्वाद्गुणे कृते सहेशब्दस्य सादेशः एव नस्या
देकादेशस्य परादिवद्भावे सहशब्दाभावात्पूर्वांतत्वेनोत्तरपदत्वाभावात् उभयत आश्रयणे अंतादिवद्भावनिषेधाच्च असुवा सहेशब्दस्य सभावस्तथापि सहत्स्यदं नमे
वद्रूपं स्यान्न तु सह इत्यदंतमिति शंक्यं। नेंद्रस्य परस्येत्युत्तरपदवृद्धिप्रतिषेधेन पूर्वोत्तरपदयोः प्रथमं कार्यं भवति न तु एकादेश इति सामान्यज्ञापनादित्याहुः॥ ॐ ॥
गोतो णित्। इतोत्सर्वनामस्थाने इत्यतोनुवृत्तं सप्तम्यंतं सर्वनामस्थानग्रहणं प्रथमया विपरिणम्यते णिदित्यनेन सामानाधिकरण्यात् तदाह। सर्वनामस्थानमि
ति। णित्कार्यं कृत्स्यादिति। णित्कार्यं परपूर्वस्य यत्कार्यं तत्करोतीत्यर्थः। गोरित्यादि। चित्रगुरित्यत्र तु न भवति। ओत इति वक्ष्यमाणत्वात्। तद्धितोयः शसस ओकारं

गोतो णित्। ७।१।९०। गोशब्दात्परं सर्वनामस्थानं णिद्वत्। गौः। गावौ। गावः। ओतोऽम्शसोः। ६।१।९३। आ ओत इति छेदः। ओकारादम्शसोरचि परे
आकार एकादेशः स्यात्। शसा साहचर्यात्सुबेवाम् गृह्यते नेह। अचिनवं। असुनवम्। गाम्। गावौ। गाः। गवा। गवे। गोः। इत्यादि। ओतो णिदिति
वाच्यं। विहितविशेषणं च्चा तेन। सुद्यौः। सुद्यावौ। सुद्यावः। औकारान्ताद्विहितं सर्वनामस्थानमिति व्याख्यानान्नेह। हे भानो। भानवः। उः शम्भुः स्मृतो येन सः
स्मृतोः। स्मृतावौ। स्मृतवः। स्मृ[illegible]। स्मृतावौ। स्मृताः। इत्यादि। इत्योदन्ताः। रायो हलि। ७।२।८५। रैशब्दस्याऽऽकारान्तादेशः स्याद्धलि विभक्तौ। अ
चि आयादेशः। राः। रायौ। रायः। रायं। रायौ। रायः। राया। राभ्यामित्यादि। इत्यैदन्ताः। ग्लौः। ग्लावौ। ग्लावः। ग्लावम्। ग्लावौ। ग्लावः। इत्यादि। औतो
ऽम्शसोरिति नेह प्रवर्तते। एऔच्सूत्रेण ओदौतोः सावर्ण्याभावज्ञापनात्। इत्यजन्ताः पुल्लिङ्गाः॥

तान्न संभवतीत्याशयेनाह। शसा साहचर्यादिति। सुपीत्यनुवर्त्तना
द्वित्यपि काशिकायामुक्तं। कैयटस्तु तद्धितोपि शस संभवतीति कथमिह साहचर्यादमः सुप्त्वमित्याशंक्य अचीत्यधिकारादजादिशसः सुबेव संभवति न तु तद्धित इत्याह। अचिन
वमिति। चिनोतेर्लङादेशस्य मिपस्स्थमिपामित्यम्। ओतो णिदिति वाच्यं। गोत इत्यपहाय ओत इति वाच्यमित्यर्थः। एवं च गामित्यत्र परत्वाद्वृद्धिः स्यादिति शंकायां।
अनवकाशः। निरवकाशतया आत्वेन वृद्धेर्बाधनात्। इत्योदन्ताः। रायो हलि। अष्टन आ विभक्तौ। विभक्ताविति च वर्तते तदाह। आकारोन्तादेश इति
अर्थरैविभवा अपीत्यमरः। रापिश्च। रस इति भाष्यं तत्र कैयटेन तस्य रैशब्दस्य छांदसत्वपरं न तु केवलस्यापीति वा नो यो नि सूत्रे कैय्यटः। म[illegible]वके नत्नापिच्छः रस इति

पक्षांतरमप्याह। इत्यैरंतः। ग्लौरितिग्लौर्मृगांकः कलानिधिरित्यमरः। एवंजनामवतीतिजनौः। ज्वरत्वरेत्यूठ्। एत्येधत्यूठ्स्वितिवृद्धिः। अच्यावादेशः। जना
वौजनमवइत्यादिनप्रवर्ततइति। हेग्लौरित्यत्रसंवुद्धिलोपः ग्लावइत्यत्रङसिङसोश्चेतिपूर्वरूपंचनप्रवर्ततइत्यपिवोध्यं। सावर्ण्याभावज्ञापनादिनिसा
तिसावर्ण्येएचोश्चतुर्विंशतेःसंज्ञाभवंतीतिवृद्धिरादैजित्येनवृद्धिरादेङितिपठितुंशक्यत्वादैऔजितिसूत्रंव्यर्थंसत्सावर्ण्याभावंज्ञापयति। अतएवएदैतोरो
दौतोश्चनमिथःसावर्ण्यमैऔजितिसूत्रारंभसामर्थ्यादित्याद्यणुदित्सवर्णस्यचेतिसूत्रएवोक्तमितिभावः। नन्वैऔजितिसूत्राभावेनप्याभ्यामितिसूत्रेताभ्यामैजि
तिप्रत्याहारोयंनसिध्येत्। पूर्वेतुताभ्यामेङित्युक्तेतुविधीयमानस्यसवर्णग्राहकतयावैय्याकरणैःसौवश्वइत्यादावदोतावेवागमौस्यातांनत्वैदौतौ।ततश्चवैय्यर्थ्या
भावादैऔजितिसूत्रंसावर्ण्याभावंनज्ञापयतीतिचेन्मैवं। पूर्वेतुताभ्यामैऔइतिपठनेनापिइष्टसिद्धेरस्य सूत्रवैयर्थ्यस्यतदवस्थत्वात्। स्थितस्यगतिश्चिंतनीयेतिन्यायेनमिदंवसुतस्तुएओङितिसूत्रारंभसामर्थ्यादित्युक्तेतुताभ्यामेजितिअत्रानुपपत्तिर्नास्त्येव। नचएओङितिसूत्राभावेअदेङ्गुणएङिपररूपंएङःपदांतादतीत्य
दावेङ्प्रत्याहारःकथंसिध्येदितिवाच्यं। सतितुसावर्ण्येअदेज्गुणःएचिपररूपंएचःपदांतादतीतिपठितुंशक्यत्वादतिप्रसंगस्यएङ्ग्रहणेपितुल्यत्वात्।। न
चैवमप्येचांचतुर्णांक्रमादयावादेशासिध्यर्थंएओङ्ऐऔजितिसूत्रद्वयमप्यावश्यकमितिवाच्यं। स्थानेंतरतमइत्यनेनैवएचांक्रमादयादयः सिध्यंतीतिप्रा
गेवास्माभिरुपपादितत्वात्। यदाहिस्वराणांमूष्मणांचैवेत्यादिप्रागुक्तशिक्षावचनानुरोधादैऔविवृततरावेचौविवृततमावित्यभ्युपगम्यतेतदात्वेदैतोरो
दौतोश्चमिथःसावर्ण्यप्रसक्तौरेवनास्तिइतिएओजितिएओङितिवासूत्रंनोक्तज्ञापकमितिज्ञेयं। केचित्तुविवृततमयोरैऔविवृततमत्वाभावेपिविवृततरेविवृततमेचविवृ
तत्वस्यसत्वात्तदादायतुल्यप्रयत्नत्वमेऔरैचोश्चास्तीतिसावर्ण्यप्रसक्तौवुक्तज्ञापकाश्रयणंसम्यगेवेत्याहुस्तदपरेनक्षमंते। तथाहिसतिइकोगुणवृद्धीतिसूत्रस्थशब्द
कौस्तुभग्रंथेनसहविरोधप्रसंगात्। तत्रहिस्वराणांमूष्मणांचेत्यादिशिक्षानुरोधाच्चेतानेतेत्यादौगुणप्रवृत्तिःस्याद्विवृततरत्वरूपवैलक्षण्यस्यसत्वादितिनशं
क्याविधेर्विषयत्वोपत्तेः। जयःकरणंधान्यानांभवनइत्यादिनिर्देशैरिकारादिषुगुणप्रवृत्त्यनुमानाच्चेतिप्रकारांतरेणसमाहितंत्वदुक्तरीत्यातुल्यप्रयत्नवले
तुचेतानेतेत्यादौगुणप्रवृत्तिशंकानिरालंवनैवस्यात्तस्माद्दीर्घह्रस्वप्लुत भेदेनस्वराणांमूष्मणामिवविवृततरविवृततमभेदेनसावर्ण्याभावोत्र सु

रमेति। रमते इति रमा। रम क्रीडायामित्यस्मात् पचाद्यचि टापि लिंगविशिष्टपरिभाषया स्वादयः। हल्ङ्यादिलोपः। न चात्रावंतत्वादेव स्वाद्युत्पत्तिरस्तु प्रत्ययांतस्या-
प्रातिपदिकत्वेपि ङ्याप्ग्रहणं पृथक् ग्रहणादिति वाच्यं। ङ्याप्ग्रहणस्यान्यार्थतायाः प्रागेवोक्तत्वात् प्रत्याख्यातत्वात् चतद्ग्रहणस्य। शीस्यादिति। जसः शीत्यतः शी इत्यनु-
वर्तत इति भावः। संबुद्धौ च। बहुवचने झल्वत् आङि चापः इत्यतः एदाप इत्यनुवर्तते तदाह। आप एकारः स्यादिति। एङ्ह्रस्वादिति। न चात्र हल्ङ्यादिनैव सु-
लोपोस्तु। प्रत्ययलक्षणन्यायेन संबुद्धौ चेत्यस्यापि प्रवृत्तिसंभवादिति शंक्यं। परत्वात् प्रतिपदोक्तत्वाच्च एत्वे कृते हल्ङ्यादिलोपस्याप्राप्तेः स्थानिवद्भावात्पूर्वे
व्याकारे लोपत्वाभावात् आ आदित्याकारं प्रश्लिष्य दीर्घग्रहणस्य प्रत्याख्यानात्। एङ्ह्रस्वादित्त्विलोपस्यैव परत्वेनन्याय्यत्वाच्चेति भावः। आङि। चकारेण ओ-
सि चेति प्रक्षतं परामृश्यते इत्याह। ओसि च परे इति। रमाभिरिति। नन्विह एकादेशस्य पूर्वांतत्वेन ग्रहणात् इतो भिस ऐस् इत्यैस् प्राप्नोति। न च परत्वसामर्थ्यादि-

रमा। औङ आपः ७।१।१८। आबन्ताद् अङ्गात्परस्योङः शी स्यात्। औङित्यौकारविभक्तेः संज्ञा प्राचाम्। रमे। रमाः। सम्बुद्धौ च ७।३।१०६। आप एका-
रः स्यात् सम्बुद्धौ। एङ्ह्रस्वादिति सम्बुद्धिलोपः। हे रमे। हे रमे। हे रमाः। रमाम्। रमे। रमाः। स्त्रीत्वान्नत्वाभावः। आङि चापः ७।३।१०५। आङि ओसि च परे आ-
बन्तस्याङ्गस्य एकारः स्यात्। रमया। रमाभ्याम्। रमाभिः। याडापः ७।३।११३। आपः परस्य ङिद्वचनस्य याडागमः स्यात्। वृद्धिरेचि। रमायै। सवर्ण-
दीर्घः। रमायाः। रमयोः। रमाणाम्। रमायाम्। रमयोः। रमासु। एवं दुर्गादयः॥ ॥ १९ वमिति शंक्यं। अकृतैकादेशविभक्त्यपाभिरित्यादौ कृता-
र्थत्वादिति चेन्मैवं। अल्लिंधावेनादिवच्चैत्यस्याप्रवृत्तेः। याडापः। घेर्ङितीत्यतो ङ्गुइत्ततं ङितीति सप्तम्यंतमापइति पंचम्यनुरोधेन विपरिणम्यत इत्याह। ङिद्वच-
नस्येति। अत्रसुपि चेत्यतः सुपीत्यनुवर्तनात् सुप एव याट् तेन अपि स्यार्वधातुकस्य ङित्वेपि मालेवाचरतो मालातइत्यादौ तसादेर्नभवति। एतच्च अचः पर-
स्मिन् इत्यत्र पूर्वस्य विधिः पूर्वविधिः इति षष्ठीसमासपक्षाभ्युपगमेनोक्तं पंचमीसमासपक्षाभ्युपगमे तु शपः स्थानिवत्त्वेन व्यवधानात् मालातइत्यादौ या-
टः प्रसंग एव नास्तीत्याहुः। याडित्येव वक्तव्ये दीर्घोच्चारणं स्यास्तुट्प्रातिपत्त्यर्थं। न च अतोगुणइति पररूपापत्तिः। अकारोच्चारणसामर्थ्यादेव तद्बाधात् वृद्धिरेचि-
मावात् आट इश्चेत्युपन्यस्तं तदुपेक्षितं। याटूस्यारेऽटकारस्य समुदायानुबंधत्वेनेह आटोऽभावात्॥ ॥ ॥ ॥

सर्वनाम्नः स्याड्ढ्रस्वश्चेति दीर्घोच्चारणं प्रागवता स्पष्टप्रतिपत्त्यर्थम्। आवन्तस्य सर्वादिगणे पाठाभावात् सर्वनामत्वं नेत्याशंक्याह। एकदेशस्य पूर्वान्तत्वेनेति। विभाषा दिक्
समासे। ११।२८ बहुव्रीहाविति निषेधप्राप्तेरिति भ्रमितव्यं तस्य अलौकिकप्रक्रियावाक्यान्तर्गतसर्वादिविषयत्वादस्य च समासविषयत्वा
त्। स्पष्टार्थमिदं। प्रतिपदोक्तदिक्समासविधायके दिङ्नामान्यन्तराल इति सूत्रे शेषो बहुव्रीहिरित्यनेन बहुव्रीहिरित्यधिकारादिति भावः। त्यकुंशकामितिनाववंस्य द्वितीयाटिश
ष्टस्य तीयप्रत्ययान्तत्वाभावाद्विभाषा ——— द्वितीयेति सूत्रमावश्यकमिति शंक्यम्। एकदेशस्य पूर्वान्तत्वेन ग्रहणाद्येवं तस्यापि तीयप्रत्ययान्तत्वात्। तीयस्य

सर्वनाम्नः स्याड्ढ्रस्वश्च।७।३।११४। आबन्तात्सर्वनाम्नः परस्य ङितः स्याट् स्यादापश्च ह्रस्वः। याटोऽपवादः। सर्वस्यै। सर्वस्याः २। एकदेशस्य पूर्वान्त
त्वेन ग्रहणादामि सर्वनाम्न इति सुट्। सर्वासां। सर्वस्यां। सर्वयोः। सर्वासु। एवं विश्वादय आबन्ताः॥ विभाषा दिक्समासे बहुव्रीहौ।१।१।२८। अत्र सर्व
नामता वा स्यात्। उत्तरपूर्वस्यै उत्तरपूर्वायै। दिङ्नामान्यन्तराल इति प्रतिपदोक्तस्य दिक्समासस्य ग्रहणान्नेह। या उत्तरा सा पूर्वा यस्या उन्मुग्धायाः
तस्यै उत्तरपूर्वायै। बहुव्रीहिग्रहणं स्पष्टार्थं। अन्तरस्यै शालायै वा ह्यायै इत्यर्थे अपुरीत्युक्तेर्नेह। अन्तरायै नगर्यै। विभाषा द्वितीयातृतीया
भ्यां।७।३।११५। आभ्यां ङितः स्याड्वा पश्च ह्रस्वः। इदं सूत्रं त्यक्तुं शक्यम्। तीयस्य ङित्सूपसंख्यानात्। द्वितीयस्यै। द्वितीयायै। द्वितीयस्याः २ द्वि
तीयायाः २ द्वितीयस्यां। द्वितीयायां। शेषं रमावत्। एवं तृतीया। अम्बार्थनद्योर्ह्रस्वः। हे अम्ब। हे अक्क। हे अल्ल। असंयुक्ता ये डलकास्तद्वतां न ह्र
स्वः। हे अम्बाले। हे अम्बाडे। हे अम्बिके। जरा। जरसौ। शीभावात्परत्वाज्जरस्। आमि नुटः परत्वाज्जरसां जरसामित्यादि। पक्षे हलादौ च रमावत्। इह पूर्वविप्रति
षेधेन शीभावं कृत्वा सन्निपातपरिभाषया अनित्यत्वाज्जरसी इति केचिदाहुस्तन्निर्मूलम्। यद्यपि जरसादेशस्य स्थानिवद्भावेनावन्ततामाश्रि
त्य पुंवत्संकार्यमुभयं वक्तव्येऽमनेनैव सिद्धो विभाषा द्वितीये तिसूत्रेन कर्तव्यमिति भावः। अंबार्थनद्योर्ह्रस्वः अत्र (त्य औङ आपः। आङि चापः। याडापः
अंबार्थद्व्यक्षरं यदीति वक्तव्यान्तव्यक्तस्यैवांबार्थस्य ह्रस्वो भवति नान्येषामित्याशयेन फलितमाह। असंयुक्ता ये डलका इत्यादि॥ जरेति। जृष् वयोहानावित्यस्मात् षि
द्भिदादिभ्योऽङित्यङि ऋदृशोऽङि गुण इति गुणे कृते टाप्। शीभावात्परत्वाज्जरसित्यादि। ननु औङ आपः ह्रस्वनद्यापो नुडित्यपेक्ष्य या जरायां इति सूत्रस्य परत्वादस्त्वेवं। परत्वा

ङ्यामिति विधये जरसादेशं बाधित्वा परत्वात् स्युरिति चेत्। अत्राहुः। आङि चापः इत्येकारादेशे कृतेऽप्येकदेशविकृतन्यायेन जरायाः इति जरसादेशप्रसक्त्या नित्य-
त्वादेकारादेशं बाधित्वा जरसादेश एव भवति न चैकारादेशोऽपि नित्य एव जरसादेशे कृतेऽपि स्थानिवत्त्वेनाबन्तत्वादाङि चापः इति प्रवृत्तेरिति वाच्यं। आकाररूपस्यै-
वापः सर्वत्र ग्रहणान् इत्यनुपदमेव वक्ष्यमाणत्वान्न तत्प्रवृत्तेः। याडापः इति याडागमं तु जरसादेशोऽन्तरङ्गत्वाद्बाधते॥ आकाररूपापः परस्य ङितः सुपो विहित-

ङ्यामिति पञ्चापि विधयः प्राप्ताः एवं न सति शप्टस्तु तथाऽप्यनल्विधावित्युक्तेर्न भवन्ति। आ आपिति प्रश्लिष्य आकाररूपस्यैवाऽऽपः सर्वत्र ग्रह-
णान्। एवं हलङ्याब्भ्य इति सूत्रेऽपि आ आप् ङी ई इति प्रश्लेषादतिखट्वः निष्कौशाम्बिरित्यादिसिद्धेर्दीर्घग्रहणमप्रत्याख्येयं। न चैवमप्यतिखट्वायेत्य-
त्राऽऽश्रयमाकारत्वं स्थानिवद्भावेनापत्त्वमाश्रित्य याट् स्यादिति वाच्यं। आबन्तं यदङ्गं ततः परस्य याड्विधानात्। उपसर्जनस्त्री प्रत्ययेन तदादि-
नियमात्। पद्दन्निति नासिकाया नस्। नसः। नसा। नोभ्यामित्यादि। पक्षे सुटि च रमावत्। निशायाः निश्। निशः। निशा। व्रश्चभ्रस्जसृजमृजय-
जराजभ्राजच्छशां षः ८।२।३६। व्रश्चादीनां सप्तानां छशान्तयोश्च षकारोऽन्तादेशः स्यात् झलि पदान्ते च। षस्य जश्त्वेन डकारः। निड्भ्यां। निड्भिः।
सुपि डः षीत्वपक्षे धुट् चर्त्वं। चर्त्वस्याऽसिद्धत्वाज्झयो हितीयाः इति टत्वयो र्थो न। न पदान्ताट्टोरिति निषेधात्। निट्त्सु। निट्सु। षढोः कः सि ८।२।४१। ष-
स्य ढस्य च कः स्यात् सकारे परे। इति तु न भवति। जश्त्वस्याऽसिद्धत्वात्। केचित्तु व्रश्चादिसूत्रे दादेर्धातोर्घ इति सूत्राद्धातोरित्यनुवर्त्तयन्ति। तन्मते ज-
श्त्वेन जकारः। निज्भ्यां। निज्भिः। जश्त्वं श्चुत्वं चर्त्वं। निच्शु। चोः कुरिति कुत्वं न भवति। जश्त्वस्याऽसिद्धत्वात्। मांसपृतनासानूनां मांस्पृत्स्नसो वा वाच्याः॥ शसा-
दौ वा। पृत्। पृता। पृद्भ्यां। पक्षे सुटि च रमावत्। गोपाः विश्वपावत्। मतिः प्रायेण हरिवत्। स्त्रीत्वान्नत्वाऽभावः। मतीः। नात्वन्न। मत्या॥ ः॥

स्यापो वाऽऽह्यश्रयत्वेन बहिरङ्गत्वात्। ङ्यामपि जरसादेशो नित्यत्वाद्बाधते। न चाकाररूपाबन्तात् परस्य ङ्यामि कृते सन्निपातपरिभाषया जरसादेशस्या-
प्रवृत्तौ न तस्य नित्यतेति वाच्यं। रूपमालायां जरसीत्युक्तत्वादिष्टानुरोधादुक्तपरिभाषाया अनित्यत्वाभ्युपगमे बाधकाभावादिति स्वाश्रयमपि। यत्त्वादिट्-
सुबाश्रयं तन्निमित्तकमित्यर्थः पञ्चादिसुप एव याडाद्यापादनात्स्वशब्दे न तत्परामृश्यते। स्थानिवद्भावेनेति। न चैवं लाक्षणिकत्वात्कथमिह याट् स्यादिति वा-

अतिदेशविषये लक्षणप्रतिपदोक्तपरिभाषायाः प्रवृत्तौ अतिदेशस्यैव वैयर्थ्यापत्तेः अतो व्याचष्टे। आवंतं यदंगमिति। यस्मात्प्रत्ययविधिस्तदादेस्तदंतस्य ग्रहण मितिनियमादतिखट्वेति। यदंगं तदावंतं न भवति यच्चावंतं खट्वेति तदंगं न भवतीति नात्र याडागमप्रसक्तिरिति भावः। अत्र नव्याः प्रत्ययग्रहणे तदंतग्रहणमित्याप्ग्रहणेनाप्यावंतं गृह्यते। आवंतस्यांगविशेषणत्वात् तदंतग्रहणम् इति खट्वायेत्यत्रोक्तदोषतादवस्थ्यमिति यस्सुच्यते तेन तद्योगेनावंतविशेष्यत्वेन। अंगसंज्ञकपरावंतमिति तथा च नोक्तातिप्रसंगशंकालेशः इत्याहुः। स्त्रीप्रत्यये तदादिनियमो नेत्याशंक्याह। उपसर्जनेति। अयं भावः। स्त्रीप्रत्यये चानुपसर्जनेनेत्यनुपसर्जनस्त्रीप्रत्यये तदादिनियमप्रतिषेधो वक्ष्यते न तूपसर्जनेऽपि। अत एव परमकारीषगंधीपुत्र इति कारीषगंध्यपुत्र इत्यत्र ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे इति संप्रसारणं न भवति। अतिकारीषगंध्यस्य हि ष्यङंतत्वाभावात्। न च बहुश्रेयसीत्यत्र श्रेयसीत्युत्तरभागस्य ङ्यंतत्वाद्याडापोहल्।

ङिति ह्रस्वश्च। १।४।६। इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिंगावीदूतौ ह्रस्वौ च इवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे। आण्नद्याः। मत्यै। मतये। मत्याः। मतेः। नदीत्वपक्षे औदिति ङेरौत्वे प्राप्ते। इदुद्भ्याम्। ७।३।११७। नदीसंज्ञकाभ्यामिदुद्भ्यां परस्य ङेराम् स्यात्। पक्षे अच्च घेः। मत्याम्। मतौ। एवं श्रुतिस्मृतिबुद्ध्यादयः॥

॥ ङ्यादिलोपः प्रवर्तते तथा तत्राप्युत्तरभागस्य ष्यङंतत्वात्संप्रसारणं स्यादेवेति शंक्यं। पूर्वपदस्य ष्यङंतस्य पुत्रपत्योरुत्तरपदयोः संप्रसारणमिति ष्यङः संप्रसारणमित्यत्रैव वक्ष्यमाणत्वात्। टतयोः ठथौ नेति। धुडभावे टस्य ठो न धुट्पक्षे तु तस्य थो नेति विवेकः। न भवतीति। जश्त्वात्प्राक् षस्य कत्वं न भवतीत्यर्थः। केचित्त्विति। परिशिष्टकारादयः निचृश् इति। अत्र ग्रन्थे नीतिपक्षे तु त्वं बोध्यं। मांसपृतनेति। पृतना सेना। नात्वं नेति। अस्त्रियामिति पर्युदासादिति भावः॥ ॥ ङिति ह्रस्वश्च। वामीति सूत्रात् वेत्यनुवर्तते। अप्राप्तविभाषेयं। ह्रस्वयोरप्राप्तावितरयोस्तु नेयङुवङ्स्थानाविति निषेधप्राप्तावारंभात्। इहेयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिंगाविति त्रीणि ईदूतोर्विशेषणानि ह्रस्वयोस्तु स्त्रियामित्येव विशेषणं न तु नित्यस्त्रीत्वपर्यंतं। अन्यथा इष्वशनिप्रभृतीनामुभयलिंगानां पटुमृदुप्रभृतीनां सर्वलिंगानां च स्त्रीत्वेऽपि न स्यात्। कैयटमते हि तेषां नित्यस्त्रीत्वाभावात्। मतांतरेऽपि ह्रस्वांशे नित्यग्रहणव्यावर्त्याभावाच्च। अत एवाख्याग्रहणं विहाय स्त्रीशब्दमात्रं निष्कृष्य संबध्यते तदेतद

ह्रस्वो चं र त्वर्णो वर्णोऽस्त्रियामिति। औत्वे प्राप्त इति। ङेराम् इत्यपेक्षया परत्वादिति भावः। प्राचा तु औदिति सूत्रे इदुद्भ्यामच्च घेरिति पूर्वोक्तसूत्रद्वयबललभ्यार्थमु
पादाय घि नदीसंज्ञावर्जिताभ्यामिति व्याख्यानमिदुद्भ्यामिति सूत्रं च नोपन्यस्तमित्यसमंजसमेतत्॥ ❀ ॥ त्रिचतुरोः। अष्टन आ विभक्ताविप्यतोऽनुवर्तते
नादीह। विभक्तौ परत इति। विभक्तौ किं। त्रिभार्यः चतुर्भार्यः इति केचित्तन्मंदं। स्त्रियाः पुंवदिति पुंवद्भावेनापीष्टसिद्धेः। किं तु प्रियादौ परतः पुंवद्भावो नेति। त्रि
प्रियइत्यादावुदाहर्तव्यमिति नव्याः। गुणदीर्घोत्वानामिति। तिसृङि इत्यत्र ऋतो ङीति गुणस्य रत्वमपवादः। तिस्रः पश्येत्यत्र तु प्रथमयोरिति पूर्वसवर्ण

त्रिचतुरोः स्त्रियां तिसृचतसृ ७।२।९९। स्त्रीलिङ्गयोरेतयोरेतावादेशौ स्तो विभक्तौ परतः। अचि र ऋतः ७।२।१००। तिसृचतसृ एतयोर्ऋकारस्य रे
फादेशः स्यादचि। गुणदीर्घोत्वानामपवादः। तिस्रः। तिसृभिः। तिसृभ्यः २। आमि नुमचिर इति नुट्॥ न तिसृचतसृ ६।४।४। एतयोर्नामि दीर्घो न
स्यात्। तिसृणां। तिसृषु। स्त्रियामिति त्रिचतुरोर्विशेषणं नेह। प्रियास्त्रयस्त्रीलिङ्गा वा यस्यास्सा प्रियत्रिः। इत्यादि मतिवत्। आमि प्रियत्रयाणामिति
विशेष्ये। प्रियास्तिस्रो यस्येति विग्रहे तु। प्रियतिसा। प्रियतिस्रौ। प्रियतिस्रः। प्रियतिस्रमित्यादि। प्रियास्तिस्रो यस्य तत्कुलं। प्रियत्रि। स्वमोर्लुका
लुप्तत्वेन प्रत्ययलक्षणेऽभावान्न तिस्रादेशः। न लुमतेति निषेधस्याऽनित्यत्वात्पक्षे प्रियतिसृ। रादेशात्पूर्वं विप्रतिषेधेन नुम्। प्रियतिसृणी। प्रि
यतिसृणि। तृतीयादिषु वक्ष्यमाणपुंवद्भावविकल्पात्पक्षे नुम्रभावौ। प्रियतिस्रा। प्रियतिसृणा इत्यादि। हेऽरत्वे सत्यपि। ह्रस्वाभ्यां
ह्रस्वः। गौरी। गौर्यौ। गौर्यः। नदीकार्ये। हे गौरि। गौर्यै। इत्यादि। एवं वाणीनद्यादयः। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणाद्
न ङीलिङ्गत्वे च प्राप्ते विभक्तौ लिङ्गविशिष्टाग्रहणं। सखी। सख्यौ। सख्यः इत्यादि गौरीवत्। अङ्यन्तत्वान्न सुलोपः। लक्ष्मीः। शेषं गौरीवत्। एवं

दीर्घापवादः। प्रियतिस्र आगतः। प्रियतिस्रः स्वमित्यत्र त्वत उदित्युत्वस्येति विवेकः। यद्यपि मध्ये पवादन्यायेन दीर्घोत्वयोरेव रत्वमपवादः स्यान्न तु ऋतो ङीति गु
णस्य तथापि विंध्यसामान्यचिंतामाश्रित्य स्वविषये प्राप्तं सर्वमेवेह बाध्यत इति भावः। त्रिचतुरोर्विशेषणादिति। श्रुतत्वाद्धि त्रिचतुरोरित्यस्य स्त्रियामिति
विशेषणं नाङ्गस्येति भावः। प्रियतिसृ सति प्रियजसः जस् इति स्थिते। अंतरंगानपि विधीन् बहिरंगो लुग्बाधत इत्युक्तत एवं तिस्रादेशो सुपो लुकि कृते

समासान्तत्वाद्विभक्तिः तस्यां परतः तिस्रादेशः स्त्रियाः पुंवदिति प्रियाशब्दस्य पुंवद्भावः। अद्गुणेत्यत्र यद्यपि इह जहत्स्वार्था वृत्तिपक्षे त्रिशब्दस्य निरर्थ-
कत्वेन स्त्रीवाचित्वं दुर्लभं तथापि भूतपूर्वगत्या स्त्रियां वृत्तिर्बोध्या। उत्तरपदार्थप्रधानस्तत्पुरुष इत्यादिसिद्धान्तपक्षे वा दस्यैवमेव निर्बाध्यत्वात्। अजहत्स्वार्थवृ-
त्तिपक्षे तु स्त्रीनिष्ठसंख्यासमर्थकयोः स्त्रिचतुरोरिति विवक्षितोऽर्थः तेन प्रियास्त्रयः स्त्रीणां वा यस्याः सा प्रियत्रिरित्यत्र प्रियत्रिशब्दस्य स्त्रियां वृत्तित्वेऽपि न तिस्रादेशप्रसंगः
प्रत्ययोत्तरपदयोश्चेत्येतत्सूत्रगतभाष्यग्रन्थसंदर्भश्चोक्तव्याख्याने प्रमाणं। अनित्यत्वादिति। इकोऽचीत्यज्ग्रहणमिह लिंगं। तथा हि। भ्यांभिसादिषु सत्स्वपि नुमि कृते लो-
पः प्रातिपदिकान्तस्येति नलोपसंभवात् अचीति व्यर्थं। न च नङिसंबुध्योरिति निषेधात् संबुद्धौ लोपो न संभवतीति तत्र नुम्निवृत्तये अचीत्यावश्यकमिति वाच्यं। संबु-
द्धिश्च लुका लुप्तेति नुमः प्राप्तेरेव तत्र दुर्लभत्वात्। न लुमतेति निषेधस्यानित्यतां विना तत्र प्रत्ययलक्षणप्रवृत्तेः नाप्युत्तरार्थं तदिति वाच्यं। उत्तरत्रैव कर्तुं शक्यत्वात् अ-
चीतिकरणस्य वैयर्थ्यात्। न लुमतेति निषेधस्यानित्यत्वे तु संबुद्धौ प्रत्ययलक्षणेन प्राप्तं नुमं वारयितुं तदिति भवत्येवान्यत्र इह लिंगं। न चेदमनित्यत्वं संबुद्धिगुणमा-
त्रविषयकमित्यभिनिवेष्टव्यं। लक्ष्यानुरोधेनान्यत्रापि क्वचित्तदभ्युपगमे बाधकाभावात्। अत एव प्रियतिसृप्रियत्रीति रूपद्वयमपि कैयटेन स्वीकृतं। इत्यादीति
प्रियतिसृणी प्रियतिसृणि प्रियतिस्रः प्रियतिसृणः। आमि रादेशं बाधित्वा पूर्वविप्रतिषेधेन नुमं तं च बाधित्वा पूर्वविप्रतिषेधेन नुट्। प्रियतिसृणां। ङेरत्वे सत्यां वि-
त्तौ विभक्तिसन्निपातकृतमपि त्यदाद्यत्वटापौ निमित्तं न यासयोरिति निर्देशेन सन्निपातपरिभाषाया अनित्यत्वादिति भावः। अङ्गान्तत्वादिति। केचिदिह कृ-
दिकारादिति पाक्षिकं ङीषमिच्छन्ति तन्मते तु सुलोपपक्षे स्यादेव। अत एव वातप्रमीः श्रीलक्ष्मीति पक्षे ऽङ्गान्ताः सुसाधव इति रक्षितः। लक्ष्मीर्लक्ष्मी हरिप्रिये-
ति द्विरूपकोशश्च। स्त्री इति। स्त्यायतोऽस्यां शुक्रशोणिते इति॥

स्त्री। स्त्यायतेर्ड्रट्। लोपो व्योर्वलीति यलोपः। टित्वान्ङीप्। ङ्यन्तत्वात्सुलोपः। परत्वादिति। स्त्रियाः इति इयङपेक्षया। इयादेशोऽचि नान्यत्रेति। अजादौ यइयादेशो
विहितः स उपसर्जनत्वेऽपि विद्यमानस्य स्त्रीशब्दस्य औ सादिषु चतुर्ष्वेव न त्वन्यत्र गुणनाभावादिभिः पूर्वोक्तैः बाधितत्वादित्यर्थः। इयङुवङ्स्थानाविन्य
स्यैवेति। पूर्वसूत्रात् ... विन्यनुवर्तनादियङुवङ्स्थानाविति ईदूतोर्विशेषणं। तेनेयङुवङ्स्थानाविदूतावेवास्त्रीति पर्युदस्तौ न तु ह्रस्वाविति भावः। श्रीरिति
स्त्रियाः ६।४।७९। स्त्रीशब्दस्येयङ् स्यादजादौ प्रत्यये परे। स्त्रियौ। स्त्रियः। वाम्शसोः ६।४।८०। अमि शसि च स्त्रिया इयङ् वा स्यात्। स्त्रीं। स्त्रियं। स्त्रियौ।
स्त्रियः स्त्रीः। स्त्रिया। स्त्रियै। स्त्रियाः २ स्त्रियोः। परत्वान्नुट्। स्त्रीणां। स्त्रियां। स्त्रियोः। स्त्रीषु। स्त्रियमतिक्रान्तः अतिस्त्रिः अतिस्त्रियौ। गुणनाभावौत्वनुड्भिः
परत्वात्पुंसि बाध्यते। क्लीबे नुमा च स्त्रीशब्दस्येयङ् इति त्ववधार्य्यतां १ जसि च। अतिस्त्रयः। हे अतिस्त्रे। अतिस्त्रियौ। अतिस्त्रयः। वाम्शसोः। अति-
स्त्रिं। अतिस्त्रियं। अतिस्त्रियौ। अतिस्त्रियः। अतिस्त्रीन्। अतिस्त्रिणा। घेर्ङितीति। अतिस्त्रये। अतिस्त्रेः २ अतिस्त्रियोः २ अतिस्त्रीणां। अच्च घेः
अतिस्त्रौ। औत्त्वौ कारे च नित्यं स्यादम्शसोस्तु विभाषया। इयादेशोऽचि नान्यत्र स्त्रियाः पुंस्युपसर्जने। क्लीबे तु नुम्। अतिस्त्रि। अतिस्त्रिणी। अ-
तिस्त्रीणि। अतिस्त्रिणा। अतिस्त्रिणे। ङेप्रभृतावजादौ वस्य माणपुम्वद्भावात्पक्षे पुम्वद्रूपं। अतिस्त्रये। अतिस्त्रिणो। अतिस्त्रेः २ अतिस्त्रिणोः अ-
तिस्त्रियोः। स्त्र्यादि। स्त्रियानुप्रायेण पुम्वत्। शसि। अतिस्त्रीः। अतिस्त्रिया। ङिति ह्रस्वश्चेति ह्रस्वान्तत्वप्रयुक्तो विकल्पः अस्त्रीति तु इयङुवङ्स्थाना-
वित्यस्यैव पर्युदासः न तत्सम्बन्धस्यैव चानुवृत्तेः तस्माद्दीर्घस्यैवायं निषेधो न तु ह्रस्वस्य अतिस्त्रियै। अतिस्त्रये। अतिस्त्रियाः २ अतिस्त्रीणां। अतिस्त्रियां।
अतिस्त्रौ। श्रीः। श्रियौ। श्रियः। नेयङुवङ्स्थानावस्त्री १।४।४। इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न तु स्त्री। हे श्रीः। श्रियौ। श्रियै। श्रिये। श्रियाः। श्रियः॥

॥ ९ क्विब्वचिप्रच्छीत्यादिना क्विब्दीर्घौ ङ्यन्तत्वाभावान्न सुलोपः॥ नेयङुवङ्स्थानावस्त्री॥ निषेधोयं ययोरिति
स्थानौ। अधिकरणे ल्युट्। इयङुवङोः स्थानावितिषष्ठीसमासमनुपपन्नं च फलितार्थमाह। इयङुवङोः स्थितिर्ययोरिति। स्थानग्रहणं किं। प्रकृष्टा धीः प्रधीः। हे प्रधि अत्र
एकानेकाचः इति यणा इयङो बाधनान्नेयङुवङ्स्थानाविति निषेधो न प्रवर्तते। अत्रेयङुवङौ निष्पद्येते तत्रैव नदीसंज्ञाया निषेधः। यत्र त्वपवादेन त्वाध्यते तत्र नि-
षेध इत्येतदर्थं हि स्थानग्रहणं कृतं। अन्यथा नेयङुवङाविति ब्रूयात् इयङुवङोर्निमित्तभूतौ नदीसंज्ञकौ नेत्यर्थलाभात्। अस्त्रीति किं। हे स्त्रि॥ ॥

वामि। पूर्वस्याख्यौ नदीनेयङुवङ्स्थानावस्त्री इत्यनु वर्तनादाह। इयङुवङोः स्थानावित्यादि। यद्यपि नेति प्रकृतो निषेधो अनेन विकल्प्यते तथापि
निषेधविकल्पे विधिविकल्प एव फलतीति स एव सूत्रार्थ उचित इत्याशयेनाह। वा नदीसंज्ञौ स्त इति। ङिति ह्रस्वश्चेति सूत्रेप्येवमेव। प्रधीशब्दस्य त्विति। एरनेका
च इति यण् इयङोबाधनान्नेयङुवङ्स्थानाविति निषेधोऽत्र न प्रवर्तते। यत्र त्वपवादेनेयङुवङौ बाध्येते तत्र न निषेध इत्याशयेन व्याचष्टे। लक्ष्मीवद्रूपमिति
अमि शसि च विशेषः। इत्यनुपदमेव वक्ष्यति। पुंवद्रूपमिति। अयं च मतभेदः प्रकृष्टा धीर्यस्याः प्रकर्षेण ध्यायतीति वा विग्रहे बोध्यः। लक्ष्मीवदिति। मतद्व
येपि इति शेषः। सुष्ठु धीर्यस्या इति। ननु अस्मिन् विग्रहे कैयटमते सुधीशब्दस्य नित्यस्त्रीत्वाभावेपि धीशब्दस्य नित्यस्त्रीत्वात् प्रथमलिंगग्रहणं चेति सुधीश

वामि प्रधानवा इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तो न तु स्त्री। श्रीणां श्रियां। श्रियि। श्रियां। प्रधीशब्दस्य तु वृत्तिकारादीनां मते ल
क्ष्मीवद्रूपं पदान्तरं विनापि स्त्रियां वर्तमानत्वे नित्यस्त्रीत्वमिति स्वीकारात्। लिङ्गान्तरानभिधायकत्वनादिति कैयटमते पुम्वद्रूपं। प्रकृष्टा धीरिति
विग्रहे तु लक्ष्मीवत्। अमि शसि च। प्रध्यम् प्रध्यः इति विशेषः। सुष्ठु धीर्यस्याः सुष्ठु ध्यायति वेति विग्रहे वृत्तिकारमते सुधी श्रीवत्। मतान्तरे पु
म्वत्। सुष्ठु धीरिति विग्रहे तु श्रीवदेव। ग्रामणीः पुम्वत्। ग्रामनयस्या उत्सर्गतः पुन्धर्मतया पदान्तरम्विना। स्त्रियामप्रवृत्तेः। एवं खलपादेरपि
पुन्धर्मत्वमौत्सर्गिकं बोध्यं। धेनुर्मतिवत्। स्त्रियाश्च। ७।१।९६। स्त्रीवाची क्रोष्टुशब्दस्तृजन्तवद्रूपं लभते॥ ऐ रः श्रीवदेव भवति न तु पुंवदे

व इति चेत्। अत्राहुः नेयङुवङ्स्थानावस्त्री इति धीशब्देन नदीसंज्ञानिषेधात् सुधीशब्दात् प्रथमलिंगग्रहणं चेत्यस्याप्रवृत्तिस्तथा च वृत्तिमते इति ग्रन्थः।
स्वरसतः संगच्छते इति। मतान्तर इति। लिंगान्तरानभिधायकत्वं तदिति कैयटमते इत्यर्थः। श्रीवदेवेति। वृद्धिवाचकधीशब्दस्य नित्यस्त्रीत्वान्मतद्वयेपि श्रीव
देवेत्यर्थः। स्त्रियां च। असर्वनामस्थानार्थमयमारम्भः। तृज्वत्क्रोष्टुरिति वर्तते तद्देवात्रापि रूपातिदेशः। स्त्रियामित्यर्थग्रहणं तदाह। स्त्रीवाची क्रोष्टुशब्द इत्या
दि। एवं च पंचभिः क्रोष्टीभिः क्रीतः इत्यत्र पंचक्रोष्टृभिः रथैरित्यत्रापि तृज्वद्भावः सिध्यति। पत्युः स्त्रियामिति स्त्रीप्रत्यये इति व्याचक्षते ङीष र्थे च क्रोष्टुशब्दं
गौरादिषु पठन्ति तेषां ... तृज्वद्भावेन सिध्येत्। तेन क्रीतमिति ठञः अध्यर्द्धपूर्वेति लुकालुप्तत्वात् लुक् तद्धितलुकीति ङीषो लुकि स्त्रीप्रत्ययपरत्वाभा

ऋन्नेभ्यो। ऋत ऋकारः। न इति नकारः। प्रयोगापेक्षं बहुत्वं। प्रातिपदिकविशेषणत्वात्तदंतविधिः। स्त्रियामिति चाधिक्रियते तदाह। ऋदंतेभ्य इत्यादि। क्रोष्ट्री इति॥ स्त्रियां चेत्येतदागतात्तृजंतेन प्रत्ययस्याक्षेपाट्टिमक्रौ परत एवेह तृज्वद्भावस्तेनो ङीविति बोध्यं। भ्रूरिति। भ्रमतेर्डूः। भ्रमेश्च डूरिति भ्रमतेर्डूप्रत्ययः डित्वाट्टिलोपः। कहेसु भ्रूरिति। ऊङ्प्रत्ययस्य स्त्रीप्रत्ययत्वान्नद्याः स्त्रियोरिति ह्रस्वो न भवति। नेयङुवङ्स्थानाविति नदीसंज्ञानिषेधात्संबुद्धिह्रस्वोपि नेति भावः। ह्रस्वोत्रानुपपन्न इत्याक्षिपति। कथं तर्हीति। विमानना सुभ्रु पितुर्गृहे कुत इति कालिदासप्रयोगोप्यनुपपन्न इति बोध्यं। बहव इति। केचित्तु नेयङिति सूत्रे वामीत्यतो वाग्रहणमपकृष्य व्यवस्थित-

ऋन्नेभ्यो ङीप्। ४।१।५। ऋदंतेभ्यो नांतेभ्यश्च स्त्रियां ङीप् स्यात्। क्रोष्ट्री। क्रोष्ट्र्यौ। क्रोष्ट्र्यः। वधूर्गौरीवत्। भ्रूः श्रीवत्। हे सुभ्रूः। कथं तर्हि। हा पितः क्वासि हे सुभ्रु इति भट्टिः। प्रमाद एवायमिति बहवः। खलपूः पुंवत्। पुनर्भूः। दृन्करेति यणा उवङो बाधनान्नेयङुवङिति निषेधो न। हे पुनर्भु। पुनर्भ्वौ। पुनर्भ्वः॥ एकाजुत्तरपदे णः। ८।४।१२। एकाजुत्तरपदं यस्य तस्मिन्समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य नित्यं णत्वं स्यात्। आरम्भसामर्थ्यान्नित्यत्वे सिद्धे पुनर्णग्रहणं स्पष्टार्थं। यणं बाधित्वा परत्वान्नुट्। पुनर्भूणां। वर्षाभूः। भेकजातौ नित्यस्त्रीत्वाऽभावान् हे वर्षाभूः। कैयटमते। मतान्तरे तु हे वर्षाभु। पुनर्नवायां तु हे वर्षाभु। भेक्यां पुनर्नवायां स्त्री वर्षाभूर्दर्दुरः पुमानिति यादवः। वर्षाभ्वश्च। वर्षाभ्वौ। वर्षाभ्वः। स्वयम्भूः पुंवत्॥ न षट्स्वस्रादिभ्यः। ४।१।१०। षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च ङीप्टापौ न स्तः। स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा। याता मातेति सप्तैते स्वस्रादय उदाहृताः॥ १॥ अप्तृन्निति दीर्घः। स्वसा। स्वसारौ। स्वसारः। माता पितृवत्। शसि मातॄः। द्यौर्गोवत्। राः पुंवत्।

विभाषां वाश्रित्य समाधिरेतदसत्। तथा सति हि नञ्ग्रहणं वामीत्युत्तरसूत्रं च व्यर्थं स्यात्। नेयङुवङ्स्थानावित्येव वक्तुं शक्यत्वात्। अन्ये तु सामान्ये नपुंसकमिति कथंचित्समादधुः। एकाचा। एकाच् यस्मिन्न त एकाच्। तदुत्तरपदं यस्य स एकाजुत्तरपद इति बहुव्रीहिगर्भो बहुव्रीहिः। उत्तरपदशब्दः समासावयवे रूढस्तेनास्मिन्समासोऽनेन विशेष्यत इत्याह। तस्मिन्समास इति। रषाभ्यां नो णः इत्यतो ण इत्यनुवर्तमानेपि णग्रहणमिह नित्यार्थमावश्यकमित्याशंक्याह। आरंभसामर्थ्यादिति। प्रातिपदिकांतनुम्विभक्तिषु चेति विकल्पेन सिद्धावेतदारंभसामर्थ्यादित्यर्थः। स्वयंभूः पुंवदिति। मतद्वयेपि नदी

मु
सि·कौ
टी·त·
६६

संज्ञाया अभावात् ङितीति ह्रस्वश्चेत्यादि न प्रवर्तत इति भावः। नषट्स्वस्रादिभ्यः। स्त्रियां यदुक्तं तन्न भवतीति व्याख्यानादनंतरो ङीविवक्षव हितन्नापि निषिध्यत इ
त्याशयेनाह। स्त्रीपूर्वाणेनेति। स्वस्रादीनां ङीप्प्राप्त षट्संज्ञकानां तु मा। स्वसातिस्र इति। नतिसृचतसृ इति नामि दीर्घत्वप्रतिषेधात् ज्ञापकादेव ङीवभावसि
द्धे स्वस्रादिषु तिसृचतसृशब्दपाठो न कर्तव्य इति कृन्मेजंत इति सूत्रे कैयटः। स्वसेति। सावसे ऋ नाकारदृशनेत्यनङ्। न नांदातु स्वसापत्युः भार्यासु भ्रातृवर्गस्य।
यातरस्युः परस्परं। द्यौगौर्वदिति। गमेर्डो। वा हल्कात्त्युतेरपि डित्वात् टिलोपः। ओतोणिदिति णिद्वद्भावाद्वृद्धिः। राःपुंवदिति। यद्यपि पुल्लिंग एवायमर्थे रैविभवा अ
पीत्यमरोक्तेर्भिन्नलिंगानां न द्वंद्व इति तेन परिभाषितत्वात् तथापि रास्ते नरा स्त्रीत्येके। इति सीरस्वामिना स्त्रीलिंगताया अभ्युपगमादेवमुक्तं। नौग्लौवदिति। ग्लानु
दिभ्यां डौः डित्वात् टिलोपः। स्त्रियां नौस्तरणिः स्तरिरित्यमरः। इत्यजंताः स्त्रीलिंगाः॥ ❁ ॥ अतोम्॥ अत इत्येतदधिकृतस्यांगस्य विशेषणं स्वमोर्नपुंसकादि
ति चानुवर्तत इत्याशयेनाह। अतोंगादित्यादि। अदंतादंगादित्यर्थः। स्वमोरिति। अमोऽम्विधानं स्वमोर्नपुंसकादिति प्राप्तस्य लुको बाधनार्थं। अमस्यादिति

अतोऽम् ७।१।२४। अतोंऽगात् क्लीबात्स्वमोरम्स्यात्। अमिपूर्वः। ज्ञानं। एङ्ह्रस्वादिति हल्मात्रलोपः। हे ज्ञान। नपुंसकाच्च ७।१।१९। क्लीबात्पर
स्यौङः शी स्यात्। भसंज्ञायां।

यद्यपि मस्येत्यत्र छित्वा सोर्मे कृते संनिपातपरिभाषया सुपि चेति दीर्घत्वाप्रसक्त्या ज्ञानमिति रूपं सिध्यति। द्वितीयैक
वचनेत्यादेः परस्येत्यकारस्य मकारे कृते अंत्यस्य मस्य संयोगांतलोपे सिद्धमिष्टं तथापि संयोगांतलोपो ऽसिद्ध इत्यभिप्रायेण व्याख्यातं। यत्त्वाहुः। अमिति परच्छे
दाकरणे अतिजरसमिति न सिध्येदिति तद्भ्रमात्। सोरमि कृते संनिपातपरिभाषया जरसादेशस्य प्रवृत्त्या अतिजरमिति रूपस्यैवेष्यमाणत्वात्। द्वितीयैकव
चने त्वनोमिति बाधित्वा परत्वाज्जरसि कृते संनिपातपरिभाषया लुको ऽप्रवृत्त्या ऽतिजरसमिति रूपसिद्धेश्चेति दिक्। ज्ञानमिति। ज्ञप्तिर्ज्ञानं। ल्युडंतः। स्वो
रनाकौ कृते न द्विरेति प्रातिपदिकत्वान्न स्वाद्युत्पत्तिः। हल्मात्रेति। हे ज्ञान सु इति स्थिते संबुद्धिलोपात्परत्वादमादेशे कृते अमि पूर्वत्वे च तस्यांतवद्भावात् ह्रस्वा
तमंगं भवतीति लिनि लः पूर्वस्य संबुद्धिसंबंधिनो मकारस्य लोप इत्यर्थः। नपुंसकाच्च। जसः शी औङ आप इत्यतः शी औङ इति चानुवर्तत इत्यभिप्रेत्याह। क्लीबा
त्परस्येत्यादि। भसंज्ञायामिति। सुडनपुंसकस्येति पर्युदासेन असर्वनामस्थानत्वादौङि यचि भमिति प्रवर्तत इति भावः।

६६

यस्येति। इश्च अश्च यं तस्य न दाहा इवर्णो वर्णयोरिति। ईति चेति। चकारेण न लङ्घितं इत्यनलङ्घितोऽनुकृष्यते तदाह। ईकारे तद्धिते चेति। औङः श्यामिति। विभ
क्तिपेक्षया स्त्रीलिंगनिर्देशः। नेदं वचनं कर्तव्यं। विभाषा ङिश्योरित्यतः श्यामिति प्रकृतं न संयोगादित्यतो नेति च तत्राभिसंबंधमात्रं कर्तव्यं यस्येति ईकारे त
द्धिते च लोपो भवति श्यां नेत्याकरः। जश्शसोः। जसा सा हचर्यादिह सुवेव शसो गृह्यते। तेने हना कुंडशो रदाति। शिसर्वनामस्थानं। महासंज्ञाकरणं पूर्वाचा
र्यानुरोधेन। नपुंसकादिति। नुमधातोरित्यतो नुमनुवर्तते उगिदचामित्यतः सर्वनामस्थानं च अंगस्येति चाधिकृतं। तथा च झलन्तमप्यां नपुंसकमंगं विशेष्य

यस्येति च।६।४।१४८। भस्य वर्णयोर्लोपस्यादीकारे तद्धिते च परे। इत्यकारलोपे प्राप्ते। औङः श्यां प्रतिषेधो वक्तव्यः। ज्ञाने। जश्शसोः शिः॥
७।१।२०। क्लीबादनयोः शिः स्यात्। शि सर्वनामस्थानं।१।१।४२। शि इत्येतदुक्तसंज्ञं स्यात्। नपुंसकस्य झलचः।७।१।७२। झलन्तस्याजन्त
स्य च क्लीबस्य नुमागमः स्यात् सर्वनामस्थाने परे। उपधादीर्घः। ज्ञानानि। पुनस्तद्वत्। शेषं रामवत्। एवं धनवनफलादयः। अद्ड्डतरादि
भ्यः पञ्चभ्यः।७।१।२५। एभ्यः क्लीबेभ्यः स्वमोरद्डादेशः स्यात्। टेः।६।४।१४३। डिति परे भस्य टेर्लोपः स्यात्। वावसाने। कतरत्।
कतरद्। कतरे। कतराणि। भस्येति निवृत्तं। पञ्चमः। टेर्लुप्तत्वात् प्रथमयोरिति पूर्वसवर्णदीर्घः एङ्ह्रस्वादिति संबुद्धिलोपश्च न भवति। हे कत
रत्। पुनस्तद्वत्। शेषं पुंवत्। कतमत्। इतरत्। अन्यत्। अन्यतरत्। अन्यतमशब्दस्य तु। अन्यतममित्येव। एकतरात् प्रतिषेधो वक्तव्यः। ए
कतरं। सो रमादेशे कृते सन्निपातपरिभाषया नेजरस्। अजरं। अजरसी। अजरा। परत्वाज्जरसि कृते झलन्तत्वान्नुम्॥ ९ नविशेष्यत्वेन च तत्र

न विधिर्भवतीत्याह। झलन्तस्येत्यादि। अद्ड्डतरादिभ्यः। पञ्चभ्य इति किं। नेमं तिष्ठति। नेमं पश्य। डतरादयो डतरडतमेतरान्यान्यतरेति सर्वादिषु पठि
ताः। [illegible] डादेशः स्यादिति। जिघृक्षितादेश [illegible] प्रतिपादनाय इत्वं न कृतं। टेः। निविशत इत्यतो डिमीत्यनुवर्तते भस्येति चाधिकृतं तदाह। डिति परे भस्य
ति। भस्य टेः। पञ्चमः। अत्र [illegible] नवा डित्त्वे लोपो न भवति। किं तु परत्वात् तलोप एव। अद्डो डित्करणस्य प्रयोजनमाह। टेर्लुप्तत्वादित्यादि। ननु पू
र्वसवर्णदीर्घाभावाय दादेश एव क्रियतां किं ड्डादेशेनेत्याशंक्याह। एङ्ह्रस्वादित्यादि। दादेशे तु हे कतरेति स्यादिति भावः। अन्यतमस्येति। एवं च साम

न्यादिष्वन्यतमत्तमइत्यादिप्रयोगाः प्रामादिका एवेति भावः। अजरमिति। अविद्यमाना जरा यस्य तत्। गोस्त्रियोरुपसर्जनस्य ह्रस्वः नोमः परत्वादिति। अजरा शि इति स्थिते। यद्यपि जरसादेशात्प्रागेव नपुंसकस्य झलच इत्यजंतलक्षणो नुमागमः स्यात्स चांगभक्तो गमेवनव्यवधानात्। अवयवस्य तु जराशब्दस्य व्यवधायकएवेति निर्दिश्यमानस्यादेशो विधीयमानो न प्राप्नोति तथापि यस्मादित्यादिचः परस्यैवांतावयवो मित्स्यात् इति स्वमते लवयवावयवः समुदायस्याप्यवयव इत्यभ्युपगमेन कथंचिज्जरसादेशो जातेपि सांतत्वाभावात् सांतमहत इति दीर्घो न स्यादिति भावः॥ ।सांतमहतः। अत्र नोपधायाः सर्वनामस्थानेचासंबुद्धावित्यनुवर्तते। सांतेति लुप्तषष्ठीकं संयोगांतस्येति अनेन समानाधिकरणमिति व्याचष्टे। सांतसंयोगस्येत्यादि। नस्योपधाया इति। नत्पूर्वस्येत्यर्थः। अ

सान्तमहतस्संयोगस्य। ६।४।१०। सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घस्स्यादसम्बुद्धौ सर्वनामस्थाने परे। अजरांसि अजराणि। अमिलुकोऽपवादमभ्यावस्याधित्वात्परत्वाज्जरसा नतस्सन्निपातपरिभाषया न लुक्। अजरसं। अजरं। अजरसी। अजरे अजरांसि। अजराणि। शेषमुम्बत्। पद्दन्निति हृदयोदकास्यानां हृद उदन् आसन्। हृन्दि। हृदा। हृद्भ्यामित्यादि। उदानि। उन्दा। उदभ्याम्। मित्यादि। आसानि। आस्ना। आसभ्यामित्यादि। मांसि। मांसा। मान्भ्यामित्यादि। वस्तुतस्तु प्रभृतिग्रहणं प्रकारार्थमित्युक्तं। अतएव भाष्ये मांस्पचन्या उखाया इत्युदाहृतं। अयस्मयादित्वेन भत्वात्संयोगान्तलोपो न। पद्दन्नित्यत्र हि छन्दसीत्यनुवर्त्तिनं वृत्तौ। तथाप्यपोभीत्यत्र मासश्छन्दसीति वार्त्तिके छन्दोग्रहणसामर्थ्याल्लोकेपि क्वचिदिति कैयटोक्तरीत्या प्रयोगमनुसृत्य पदादयः प्रयोक्तव्या इति बोध्यम्॥ ❀ ॥

मिलुकोपवादमित्यादि। एतेन स्वमोरमादेशे कृते वा जरसिति प्राचोग्रंथः प्रत्युक्तः। मांस्पचन्या इति। पच्यतेस्यामिति पचनी करणाधिकरणयोश्चेति ल्युट्। टित्वान्ङीप्। मांसस्य पचनी मांस्पचनी अत्र ङसो लुक्। अलुक्त्वात् प्रत्ययलक्षणेनेति प्रभृतिग्रहणस्य प्रकारार्थत्वं विना मांसशब्दस्य मांसित्यादेशो न सिध्येदिति भावः। ननु पृषोदरादिसूत्रे मांसस्य पचियुड्घञोरिति निर्दिश्यमानत्वादंतलोपेनाप्येतद्रूपं सिद्धमिति चेत्। अत्राहुः। पृषोदरादीनि यथोपदिष्टमित्यस्योत्तरपदाधिकारस्थत्वात् युडंतं यदुत्तरपदं मांसस्य चनमित्यादि तत्रैवांतलोपः स्यादत्र हि ङीबंतमुत्तरपदं न तु युडंतमिति नास्त्येवांतलोप इति। मासश्छन्दसीति। मासशब्दस्य तकारः स्यान्ङ्यादौ प्रत्यये छन्दसीति वार्त्तिकार्थः। माङ्भिः

ह्रस्वोनपुंसके।इहह्रस्वश्रुत्योपस्थितेनाचइत्यनेनप्रातिपदिकविशेषणात्तदंतविधिरित्याह।अजंतस्येति।प्रातिपदिकस्याचइतिवैयधिकरण्येनव्याख्या
यांसुग्रामणिकुलमित्यत्रातिप्रसंगःस्यात्।एतच्चाचश्चेतिसूत्रएवास्माभिःस्पष्टीकृतं।प्रातिपदिकस्येतिकिं।कांडेकुड्ये।ज्ञानवदिति।श्रीपाणीत्यादावे
काजुत्तरपदे तिणत्वंतुविशेषः।श्रीपेणीत्यत्रापिइन्नादेशेनसहआट्कृतेएकादेशस्यपूर्वांतत्वेनग्रहणात्इचःपरस्मिन्नितिसूत्रेपूर्वस्माद्विधिःपूर्ववि
धिरितिपंचमीसमासपक्षाश्रयेणस्थानिवत्त्वाद्वाएकाजुत्तरपदत्वमस्तीतिस्यादेवणत्वं।संन्निपातेति।अवर्णमाश्रित्यकृतोयाडादेशःकथमवर्णलोपेनिमि
त्तंस्यात्।नचसुपिचेतिदीर्घार्थंसन्निपातपरिभाषायाअनित्यत्वाभ्युपगमआवश्यकएवेति - वाच्यं।कष्टायेतिनिर्देशेनदीर्घविधौअनित्यत्वाभ्युपग

ह्रस्वोनपुंसकेप्रातिपदिकस्य।१।२।४७।क्लीबेप्रातिपदिकस्याजंतस्यह्रस्वस्यात्।श्रीपंज्ञानवत्।श्रीपाय।अत्रसन्निपातपरिभाष
याआतोधातोरित्याकारलोपोन।स्वमोर्नपुंसकात्।७।१।२३।क्लीबादङ्गात्परयोःस्वमोर्लुक्स्यात्।वारि।इकोऽचिविभक्तौ।७।१।७३।इग
न्तस्यक्लीबस्यनुमागमस्स्यादचिविभक्तौ।वारिणी।वारीणि।नलुमतेतिनिषेधस्यानित्यत्वात्पक्षेसम्बुद्धिनिमित्तोगुणः।हेवारि।हेवारे।
आङोना।वारिणा।घेर्ङितीतिगुणेप्राप्ते।वृद्ध्यौत्वतृज्वद्भावगुणेभ्योनुम्पूर्वविप्रतिषेधेन।वारिणे।वारिणः।वारिणोः।नुमचिरेतिनुट्।
नामीतिदीर्घः।वारीणां।वारिणि।वारिणोः।हलादौहरिवत्।तृतीयादिषुभाषितपुंस्कंपुंवद्गालवस्य।७।१।७४।प्रवृत्तिनिमित्तैक्येभाषितं
पुंस्कमिगन्तंक्लीबंपुंवद्वास्याट्टादावचि।अनादये।अनादिने।इत्यादि।शेषंवारिवत्।पीलुर्वृक्षस्तत्फलंपीलुतस्मैपीलुने।अत्रनपुंवत्।

त्येणवर्णलोपेकार्येतदनभ्युपगमात्कृतेपिदीर्घेह्रस्वव्यक्त्यपायेप्यत्वजातेरनपायादितिदिक्।एतेनश्रीपशब्दान्ङेयिश्रीप्यनिकेषांचिद्व्याख्यानंपरास्तं
स्वमोर्नपुंसकात्।अयंलुक्पूर्वविप्रतिषेधेनत्यदाद्यत्वस्यकिमःकादेशस्यचबाधकः।परत्वात्त्यदाद्यत्वेतदोरितिसत्वेसारम्भभावेचसंकुलमितिस्यादिष्यते
तुतत्कुलमिति।इकोचिविभक्तौ।किं।मधुमथनस्येदंमाधवमत्रनुमिसतिटिलोपःस्यात्।वृद्ध्यौत्वेति।अतिसखिनीत्यत्रसख्युरसंबुद्धावितिणिद्वद्भावाद्वृद्धिःप्राप्तावा
रिणीत्यत्रत्वचिघेरित्यौत्वंप्रियक्रोष्टुनीत्यादौतृज्वद्भावःप्राप्तः।ननुनुम्नुटोःकोविशेषइत्यतआह।नामीतिदीर्घत्वमिति।नुमस्त्वङ्गभक्तत्वात्तस्मिन्सतिदीर्घोन

स्यादितिभावः। तृतीयादिषु। यद्यत्र भाषितः पुमान् येन शब्देन स भाषितपुंस्कः शब्द इति विज्ञायेत तदा पीलुने स्यादावतिप्रसंगः स्यात्। अतो व्याचष्टे प्रवृत्तिनिमित्तैक्य इति
अयं भावः। भाषितः पुमान् यस्मिन्नर्थे तत् भाषितपुंस्कं। प्रवृत्तिनिमित्तं तदस्यास्तीति अर्शआदित्वादच्। तेनैकस्मिन् प्रवृत्तिनिमित्ते भाषितपुंस्कं यच्छब्दस्वरूपं
तदन्तस्य वा। इकोऽचिविभक्तौ इत्यतोऽचीत्यनुवर्तनादाह। टादावचीति। इगन्तं किं। सोमपेन कुलेन। अचि किं। ग्राममणिभ्यां कुलाभ्यां। टादौ किं। अनादिनी। अ

अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः। ७।१।७५। एषामनङ् स्याट्टादावचि स चोदात्तः। अल्लोपोऽनः। दध्ना। दध्ने। दध्नः। दध्नोः। २। दध्नि। दधनि।
शेषं वारिवत्। एवमस्थिसक्थ्यक्षि। तदन्तस्याप्यनङ्। अतिदध्ना। सुधि। सुधिनी। सुधीनि। हे सुधे। हे सुधि। सुधिया। सुधिना। सुधि
योः। सुधीनां। प्रध्या। प्रधिना। मधु। मधुनी। मधूनि। हे मधो। हे मधु। एवमम्बादयः। सानुशब्दस्य स्नुर्वा। स्नुनि। सानूनि। प्रियक्रोष्टु। प्रियक्रो
ष्टुनी। तृज्वद्भावात् पूर्वविप्रतिषेधेन नुम्। प्रियक्रोष्टूनि। टादौ पुंवत्पक्षे प्रियक्रोष्ट्रा। प्रियक्रोष्टुना। प्रियक्रोष्ट्रे। प्रियक्रोष्टवे। अन्यत्र तृज्वद्भावात् पूर्व
विप्रतिषेधेन नुमेव। प्रियक्रोष्टुना। प्रियक्रोष्टुने। नुमचिरेति नुट्। प्रियक्रोष्टूनां। सुलु। सुलुनी। सुलूनि। पुनस्तद्वत्। सुलुना। सुल्वा। धा
तृ। धातृणी। धातॄणि। हे धातः। हे धातृ। धात्रा। धातृणा। एवं ज्ञातृकर्त्रादयः। एच इग्घ्रस्वादेशे। १।१।४८। आदिश्यमानेषु ह्रस्वेषु मध्ये एव
इगेव स्यात्। प्रद्यु। प्रद्युनी। प्रद्यूनि। प्रद्युनेत्यादि। इह न पुंवत्। यदिगन्तं प्रद्यु इति तस्य भाषितपुंस्कत्वाभावात्। एवमग्रेऽपि। प्ररि। प्ररिणी।
प्ररीणि। प्ररिणा। एकदेशविकृतस्यानन्यत्वात् रायो हलीत्यात्वं। प्रराभ्यां। प्रराभिः। नुमचिरेति नुट्यात्वे प्रराणामिति माधवः। वस्तुतस्तु सन्
निपातपरिभाषया नुट्यात्वं न। नामीति दीर्घस्यारम्भसामर्थ्यात् परिभाषां बाधित्वा नुडित्युक्तं। प्ररीणां। सुनु। सुनुनी। सुनूनि। सुनुना। सुनुने इत्या
दीनि। ननु फलमिति। पीलोः फलं पीलु। फले लुगिति ओरञो लुक्। प्रवृत्तिनिमित्तभेदादिति। पीलुशब्दस्य हि वृक्षत्वव्याप्यजातिर्वृक्षे प्रवृत्तिनिमित्तं फले तु
फलत्वव्याप्यजातिर्हि स्वविशेषप्रभवत्वं वा उभयथापि पुन्नपुंसकयोर्नैकं प्रवृत्तिनिमित्तमिति भावः॥ ॥ अस्थिदधि। इकोऽचीति नुमि प्राप्ते विधिरयं न
कारादुकारः उच्चारणार्थः। ङकारस्त्वन्तादेशार्थः। नब्विषयस्यानिसन्तस्येति फिट्सूत्रेणास्थ्यादय आद्युदात्ताः। तत्रान्तस्यानुदात्तेकारस्य विधीयमानोऽ

अनङ्स्थानेऽन्तरतम इत्यनुदात्तः स्यादित्युदात्त उच्यते तच्चोदात्तत्वमस्थानि न्यादावल्लोपाभावपक्षे स्फुटं दध्ना दध्ने इत्यादावनङोऽकारलोपे अनुदात्त
स्य च यतोदात्तलोप इत्युदात्तनिवृत्तिस्वरेण विभक्त्युदात्तत्वं प्रयोजनमिति बोध्यं। तृतीयादिष्वित्यनुवर्तते। अचीति च नदाहा। टादावचीति। टारौ किं। द
धिनी। दधीनि। अचि किं। दधिभ्यां। नदंतस्यापीति। आंगत्वादितिभावः। अनिदध्नेति। दधि अनि कृते नेत्यर्थः। स्त्रियामनिदध्नेत्येव। सन्निपातपरिभाषया
वहिरंगपरिभाषया च ङीपोऽप्रवृत्तेः। प्राचा तु प्रियदध्ना त्राहल्लोपेनेत्युक्तं। स्त्रियां तु प्रियदध्ना प्रियदध्ने इत्याद्यपि केचिदुक्तं तदसत्। उरःप्रभृतिषु दधिश
ब्दपाठात्। बहुव्रीहौ नित्यं कप्यनङ्प्रसक्त्यभावात्। उक्तपरिभाषाभ्यां ङीपः प्रवृत्तेरीदृशरूपासंभवाच्चेति दिक्। सुधिनी इति। परत्वान्नुमा इयङ् वाध्यते
सुधियेति। शोभनध्यानवत्त्वं प्रवृत्तिनिमित्तं पुंनपुंसकयोरेकमेवेति भाषितपुंस्कत्वात् तृतीयादिष्विति पुंवत्पक्षे नुमभावान्न भूसुधियोरिति यण्निषेधा
दियङ्। प्रध्येति। अत्रापि प्रकृष्टध्यानवत्त्वं पुंनपुंसकयोरेकमेवेति भाषितपुंस्कत्वात् पुंवत्पक्षे यण्। नपुंसकपक्षे तु नुममिति बोध्यं। बह्व्यः श्रेयस्यो यस्य त
द्बहुश्रेयसी कुलमित्यत्र नपुंसकह्रस्वत्वं न। ईयसो बहुव्रीहेर्नेति ह्रस्वमात्रस्य प्रतिषेधादित्येके। अन्ये तूपसर्जनह्रस्वत्वं निषिध्यते। नपुंसकह्रस्वत्वं
तु स्यादेव। बहुश्रेयसि बहुश्रेयसिनी इत्याहुः। मध्विति। मधु मद्ये पुष्परसे मधुर्वसंते चैत्रे च। इह पुंनपुंसकयोरेकं प्रवृत्तिनिमित्तं नास्ति किंतु मद्यत्ववसं
तत्वादिरूपं भिन्नं भिन्नमेव। तथा च भाषितपुंस्कत्वाभावान्मधुने मधुनः मधुनोरित्येव भवति न तु मधवे मधोरित्यादीति दिक्। स्नुर्वेति। मांसपृतनासानू
नामिति वार्तिककारोक्तेरिति भावः। स्नुः प्रस्थः सानुरस्त्रियामित्युभयलिंगः सानुशब्दस्तस्य नपुंसकत्वे रूपमाह। स्नुनि सानूनीति। पुंसि तु स्नूना सानूना इत्या
दौ। सुल्विति। शोभनं लवनं कर्तृत्वं पुंनपुंसकयोरेकमेवेति भाषितपुंस्कत्वात्पुंवत्पक्षे नुमभावादोः सुपीति यण्। सुलुनेति। यणं बाधित्वा परत्वान्नुम्। धात्रेति
धारणपोषणकर्तृत्वं पुंनपुंसकयोरेकमेवेति पुंवत्पक्षे यण्। एचः। आदिश्यत इत्यादेशः ह्रस्वश्चासावादेशश्च ह्रस्वादेशः। निर्धारणे सप्तमी जातावेकवचन
मतो व्याचष्टे। आदिश्यमानेषु ह्रस्वेषु मध्ये इति। एचां पूर्वभागोऽकारसदृशः उत्तरस्तु इवर्णोवर्णसदृशस्तत्रोभयोस्तरतमस्य ह्रस्वस्याभावात्पर्यायेण अका
रस्येकारोकारौ च स्यातां तथा च मा कदाप्यकारो भूदिति नियमार्थं परिभाषेत्यभिप्रेत्याह। इगेव स्यादिति। आंतरतम्यादेकारैकारयोरिकारः। ओकारौका

रियोस्तु उकारः। एकारांतस्योदाहरणं तु रुः स्मृतो येन स स्मृद्धेः शोभनः स्मृतेः र्यस्य तत् सुस्मृतीत्यादि। एतच्च परिभाषासूत्रमपार्थकं। तथा च वार्तिककृतोक्तं सिद्धमे
ङः सस्थानत्वादैचोश्चोत्तरभूयस्त्वादिति। अस्यार्थः। शब्दपरविप्रतिषेधेन एङ उत्तरभागांतरतमो ह्रस्वर्णो वेवेति सिद्धं। ऐचोश्चेति चकारो भिन्नक्रमः। उत्तरभूयस्त्वा
च्चेति हेतोरनंतरं बोध्यः। अर्द्धमात्रा अवर्णस्य अध्यर्द्धमात्रा इवर्णोवर्णयोरित्युत्तरभागाधिक्यान्मल्लग्रामादिवद्भूयसा व्यपदेशेनापि इकारोकारौ भविष्यत इति।
ह्युनेति। ननु प्रकृष्टस्वर्गवत्वादिकं यत्प्रवृत्तिनिमित्तं न तत् पुंनपुंसकयोः समानमिति भाषितपुंस्कत्वात् पक्षे पुंवत्भावोत्र स्यादेवेत्याशंकायामाह। यदि इगंतमि
ति। एतच्च गदादानेरजिघांतो अतिरिक्तास्तस्लणकुलमिति प्रक्रम्य माधवेन स्पष्टीकृतं। कथं तर्हि मघवा प्रदायासुना वेन्यथुदत्तं इति चेत्प्राहुः। प्रकृष्टस्वर्गवत्वादिप्रवृ
त्तिनिमित्तैक्यात्सुद्योशब्दो भाषितपुंस्कः स एवेदानीमिगंतस्तथा च प्रद्युशब्दोपि भाषितपुंस्क एव एकदेशविकृतस्यानन्यत्वात् पुंवत्भावो भवतीति दृष्टं

होढः। ८। २। ३१। हस्य ढस्याज्झलि पदान्ते च। हलङ्याब्विति सुलोपः। पदान्तत्वाद्धस्य ढः। जश्त्व चर्त्वे। लिट्। लिड्। लिहौ। लिहः। लिहं। लिहौ। लिह्ना।
लिढ्भ्यां। लिड्भ्यां। लिट्सु। लिट्त्सु। दादेर्धातोर्घः। ८। २। ३२। उपदेशे दादेर्धातोर्हस्य घस्याज्झलि पदान्ते च। उपदेशे किं। अधोक्। इत्यत्र यथा स्यात्। दा
मलिहमात्मन इच्छति दामलिह्यति। ततः क्विप्। दामलिट्। अत्र माभूत्॥ ॥ ११ चपुंवत्भावः। एजंतेषु माधवमतेनास्ति मतांतरे त्वस्ती
ति बोध्यं। प्रदीति। प्रकृष्टा द्यौः यस्य तत् शोभना नौर्यस्य तत् सुनु॥ इत्यजंताः नपुंसकलिंगाः॥ होढः॥ झलो झलि परस्य स्कोः संयोगाद्योरन्ते चेत्यतो झलीति पर
स्मात् इति चानुवर्तते। तदाह। झलीत्यादि। झलि परतः पदान्ते वा विद्यमानस्य हस्येत्यर्थः। लिडिति। लिह आस्वादने क्विप्। लिट्स्विति। ढस्य जश्त्वेन डः। तस्य खरि वे
ति चर्त्वेन टः। तस्यासिद्धत्वात् चयो द्वितीया इति पक्षे टस्य ठो न। सस्य षत्वं तु न भवति। न पदान्ताट्टोरिति निषेधात्। लिट्त्स्विति। ढस्य जश्त्वेन डकारे चर्त्वस्यासिद्धत्वा
त्ततः। ङ्णोः कुक्टुक्शरि। डः सि धुट्। चर्त्वेन तकारः। ततो डस्य चर्त्वेन टः। धुटश्चर्त्वस्यासिद्धत्वात् पक्षे चयो द्वितीया इति तस्य थो न। ष्टुत्वं तु तकारस्य न शङ्क्यमेव। न पदान्ता
दिति निषेधस्याधुनैवोक्तत्वादिति। दादेर्धातोर्घः। धातोरित्यावर्तते। तत्रैकं मतिरिच्यमानमुपदेशकालं लक्षयतीत्याशयेनाह। उपदेश इति॥ उपदेशा।
॥ ग्रहणस्याव्याप्तिव्याप्तिपरिहारः फलमित्याह। अधोगित्यादिना। अत्र माभूदित्यनेन॥ ।

एकाचो बशो॰ झलीति निवृत्तमिति। धुग्भ्यां धुक्ष्वित्यत्रैवोदाहरणान्तरत्वेन भष्भावसिद्धेरिति भावः। प्राचा तु प्रातिपदिकस्य तु झलि परतो नेत्येवेति व्याख्यातं। तत्प्रामादिकमेव। अधोक् अधेक् इत्यादावसिद्ध्यापत्तेः। प्रातिपदिकग्रहणस्याप्रकृतत्वाच्च। ननु धातोरवयव इति वैयधिकरण्येनान्वयेऽपि एवं तस्य दुहेर्दादेरिति घत्वे न झषन्तत्वेपि भष्भावो न स्यात्। दुघिति समुदायस्य यः पूर्वावयवो दु इत्येकाच् तस्य झषन्तत्वाभावात्। दु घ इत्युत्तरावयवे तु बशभावादित्यत आह। व्यपदेशिवद्भावेनेति। न च धात्ववयवो धातुरित्येवं व्यपदिष्टत्वं तथा च गर्धबित्यपि सिध्येदिति वाच्यं। अर्थवतो हि व्यपदेशिवद्भावः। न चावयवोऽर्थवानिति तस्य धातुत्वव्यपदेशासंभवात्। भष्भाव इति। क्विपः प्राक् प्रवृत्तायां धातुसंज्ञायां निरपवादत्वेनावस्थितत्वात् दादेर्धातोरिति घत्वे कृते झषन्तत्वादिति भावः। धुगिति। दुह प्रपूरणे क्विप्। वा द्रुह। द्रुह

एकाचो बशो भष् झषन्तस्य स्ध्वोः। ८।२।३७। धातोरवयवो य एकाच् झषन्तस्तदवयवस्य बशः स्थाने भष् स्यात्सकारे ध्वशब्दे च परे पदान्ते च। एकाचो धातोरिति सामानाधिकरण्येनाऽन्वये तु इह न स्यात्। गर्दभमाऽऽचष्टे गर्दभयति। ततः क्विप्, णिलोपः, गर्धप्। झलीति निवृत्तम्। स्ध्वोर्ग्रहणसामर्थ्यात्तेनेह न। दुग्धः दोग्धा। व्यपदेशिवद्भावेन धात्ववयवत्वाद्भष्भावः। जश्त्वचर्त्वे। धुक्। धुग्। दुहौ। दुहः। घत्वचर्त्वे। धुक्षु। वा द्रुहमुहष्णुहष्णिहाम्। ८।२।३३। एषां हस्य वा घः स्याज्झलि पदान्ते च। पक्षे ढः। ध्रुक्। ध्रुग्। ध्रुट्। ध्रुड्। द्रुहौ। द्रुहः। ध्रुग्भ्यां। ध्रुड्भ्यां। ध्रुक्षु। ध्रुट्त्सु। ध्रुट्सु। एवं मुहष्णुहष्णिहः। इग्यणः सम्प्रसारणम्। १।१।४५। यणः स्थाने प्रयुज्यमानो य इक् स सम्प्रसारणसंज्ञः स्यात्। वाह ऊठ्। ६।४।१३२। भस्य वाहः सम्प्रसारणमूठ् स्यात्॥ ॥ १८

जिघांसायां मुहु वैचित्ये। ष्णुह उद्गिरणे। ष्णिह प्रीतौ। दुहेर्दादित्वान्नित्ये प्राप्ते। अन्येषामप्राप्ते अप्राप्ते विभाषेयं। ननु द्रुहादयो दिवादिष्वनेनैव क्रमेण पठ्यन्ते तत्र वा द्रुहादीनामित्येवास्तु दिवाद्यन्तर्गणस्य पुषादेरन्तर्गणो रधादिस्तदन्तर्गणो द्रुहादिरस्तु रधादिगणसमाप्तये लिह धातोरनन्तरं वृत्करणस्य कृतत्वेनातिप्रसंगशंकाया निरवकाशत्वात्। मैवं। तथा हि सति यङ्लुकि दोधुक् दोधुट् इत्यादि न सिध्येत्। निर्दिष्टं यद्गणेन चेति निषेधात्। इग्यणः। यणः स्थाने इति। विप्रदेशसूत्रत्वा एकवद्भावविसंज्ञाश्रयणान्नान्योन्याश्रयः। ननु यणः स्थानिकस्येकः संप्रसारणत्वे अदुहितरामित्यत्र लङो लकारस्य स्थाने उत्तमपुरुषैकवचनमिट् तस्य यण्स्थानिकत्वेन संप्रसारणसंज्ञायां सत्यां हल इति दीर्घः स्यात्। तद्रूपं प्रति लङन्तस्यागत्वादिति चेत् ॥

अत्रकैयटः।यथासंख्यसंबंधात्संप्रसारणसंज्ञाऽत्रनभवतीति।नन्वनुवारेपरिभाषाणामनुपस्थानात्कथमिहयथासंख्यस्यलाभः।नन्वेवंस्था नयोगोपिनल
भ्यतेतिवाच्यं।षष्ठीस्थानेयोगेत्यत्रएतत्सूत्रंमनुवर्त्यव्याख्यायांतल्लाभात्।अत्राहुः।तंत्रावृत्त्याद्याश्रयणेनसंप्रसारणस्येतिसूत्रेतज्ज्ञापितयग्रहणाद्दुहितराप्नि
तत्रहलइतिसंप्रसारणस्यदीर्घोनभवति।वङ्स्थानिक।स्येदःसंप्रसारणशब्देनाभावितत्वात्।नन्वेवमप्यसंघुवौअसंघुवङ्त्यादौऊठःसंप्रसारणसंज्ञायांसं
प्रसारणच्चेतिपूर्वरूपस्यादितिचेतन।संप्रसारणपूर्वत्वेसमानांगग्रहणंकर्तव्यमितिवार्तिककृतोक्तत्वात्वार्णादांगंबलीयस्त्वाद्वाउवङ्वस्यात्।अत्रनव्याः
व्यङः।संप्रसारणमित्यादिविधिप्रदेशेष्वेवयणइकइतिपठित्वासंप्रसारणसंज्ञासूत्रंत्यक्तुंशक्यमित्याहुः।वाहऊठ्।एत्येधत्यूठ्स्वितिविशेषणार्थश्चकारोहलंत्य
मितीत्संज्ञकः।अत्रभस्येत्यधिक्रियते।वसोःसंप्रसारणमित्यतोनुवृत्तंसंप्रसारणमूठोविशेषणंतेनालोन्त्यस्येतिनभवतितदेतदाह।भस्यवाहइत्यादि।प्राचा

सम्प्रसारणाच्च।६।१।१०८।सम्प्रसारणादचिपूर्वरूपमेकादेशःस्यात्।एत्येधत्यूठ्सु।विश्वौहः।विश्वौहेत्यादि।छन्दस्येवण्विरितिपक्षेणि
जन्ताद्विच्।चतुरनडुहोरामुदात्तः।७।१।९८।अनयोराम्स्यात्सर्वनामस्थानेपरेसचोदात्तः।सावनडुहः।७।१।८२।अस्यनुम्स्यात्।
सौपूरे।आदित्यधिकारादवर्णात्परोयंनुम्।अतोविशेषविहितेनाम्पिनुमाम्बाध्यते।आमाचनुम्नबाध्यते।सोर्लोपःनुम्विधिसा
मर्थ्यादसुत्स्वंसिस्थितिरलन्त्यासंयोगान्तलोपस्यासिद्धत्वान्नलोपोन।अनड्वान्।अमसम्बुद्धौ।७।१।९९।चतुरनडुहोरम्स्यात्सम्बुद्धौ।आमोऽपवा

गुणाद्वाशब्दस्यसंप्रसारणंस्यादित्युक्तंतच्चफलितार्थकथनपरंतयाकथंचिन्नेयमित्याहुः॥ ⁘ ॥८९ दः।हेअनड्वन्।अनड्वाहौ।अनड्वाहः।अनडुहा।अनडु
संप्रसारणाच्च।अमिपूर्वइत्यतःपूर्वइत्यनुवर्तते।इकोयणचीत्यतोऽचीति।चएकःपूर्वपरयोरितिचाधिक्रियते।तदाह।संप्रसारणादचीत्यादि।छंदस्येवण्विरि
ति।वहश्चेतिसूत्रेभजोण्विःछंदसिसहइत्यतोण्विप्रत्ययस्यछंदसीत्यस्यचानुवृत्तेरितिभावः।स्यादेतत्।वाहइत्येवसूत्रमस्तुसंप्रसारणमेवात्रविधीयतां।तस्य
लघूपधगुणेवृद्धिरेवेतिवृद्धौसिद्धंविश्वौहइत्यादिकिमूठ्ग्रहणेन।सत्यं।एवंस्थितेक्रियमाणमूठ्ग्रहणंवहिरंगपरिभाषांज्ञापयति।तस्यांहिसत्यांजातस्यव
हिरंगस्यसंप्रसारणस्यासिद्धत्वादंतरंगोगुणोनस्यादितिभाष्येस्थितं।नचनकारांतोपपदेऽकारांतोपसर्गोपपदेचरूपेविशेषःस्यादितिकथमूठ्ग्रहणंज्ञाप

कमिति चेत्। अत्राहुः। कैयटादयः। भाष्यकारोक्तज्ञापकबलेनैव नादृशस्थलेष्वि प्रत्ययाभावोऽनुमीयत इति। एतेन भुवं वहतीति भुवाट् भूहः। भूहा। भौहः भौहेत्या
दिप्रयोगाः परास्ताः। चतुरनडुहोः। इतोऽसर्वनामस्थान इत्यतोऽनुवर्तनादाह। सर्वनामस्थान इति। सावनडुहः। आच्छीनद्योरित्यतोऽनुमनुवर्त्याह। नुमुस्यादिति। विशेष
विहितेन यासुटा सामान्यविहितः सीयुडिव नुमा आम् बाध्यतामित्याशंकां निराकरोति। अवर्णान्तेत्यादयमित्यादिना। उपजीव्योपजीवकयोर्विरोधाभावेन वाध्यवाधक
भावाभावेनेति भावः। अमा चेति। विशेषविहितेनापीत्यनुषज्यते। आमा च नुम्न वाध्यत इति केचित्पठंति। तस्यायमर्थः। वहूनडुहो हीत्यत्र परत्वादामि कृते पुनः प्रसंगविज्ञा
नान्नपुंसकस्य झलच इति नुम् भवत्येव न तु वाध्यत इति। नुमो रुत्वमाशंक्याह। नुम्विधिसामर्थ्यादित्यादि। विधानसामर्थ्यात्सर्वत्राविकृतेन नुमा भवितव्यमिति

वसुस्रंसुध्वंस्वनडुहां दः ८।२।७२ सान्तवस्वन्तस्य स्रंसादेश्च दः स्यात्पदान्ते। अनडुद्भ्यामित्यादि। सान्तेति किं विद्वान्। पदान्ते इति किं। स्रस्तं
ध्वस्तं। सहेः साडः सः ८।३।५६। साडूरूपस्य सहेः सस्य मूर्द्धन्यादेशः। तुराषाट्। तुराषाड्। तुरासाहौ। तुरासाहः। तुराषाड्भ्यामित्यादि। तुरं सह
त इत्यर्थे छन्दसि सह इति ण्विः। लोके तु साहयतेः क्विप्। अन्येषामपीति पूर्वपदस्य दीर्घः। दिव औत्। ७।१।८४। दिविति प्रातिपदिकस्यौत्स्यात्सौ
परे। अल्विधित्वेन स्थानिवत्त्वाऽभावाद्धल्ङ्यादिलोपो न। सुद्यौः। सुदिवौ। सुदिवः। सुदिवं। सुदिवौ। दिव उत्। ६।१।१३१। दिवोऽन्तादेश उकारः स्या
त्पदान्ते। सुद्युभ्यां। सुद्युभिः। चत्वारः। चतुरः। चतुर्भिः। चतुर्भ्यः। ३॥ ॥

११ भावः। नन्वेवमनडुहो सत्रेत्यत्र नडुहीति रुत्वमपि न स्यादिति चेत्। अ
त्राहुर्भाष्यकाराः। यं विधिं प्रत्युपदेशोऽनर्थकस्स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यते। भवति हि रुत्वं प्रति नुमो विधिरनर्थकः रुत्वं प्रति तु निमित्तमेवेति
अनड्वानिति। अनः शकटं वहतीति विग्रहे अनसि वहेः क्विप्। अनसो डश्चायजादित्वात्संप्रसारणं। अनडुह् सु इति स्थिते। आम् नुम् सुलोपे कृते संयोगान्तलो
पेन हकारलोपः। ※ ॥ वसुस्रंसु। वस्विति प्रत्ययस्तेन तदंतग्रहणात्। ससजुषोरिति सूत्रात्सेत्यनुवर्तनेन तच्च वसोरेव विशेषणं। ननु स्रंसुध्वंसोरव्यभिचारात्। नाप्यनडुहः
असंभवादित्यभिप्रेत्याह। सांतवस्वंतस्येति। सहेः साडः सः। सहेरिति किं। सहडेन वर्तते। मडः यस्य नाम्नि डः शब्दोऽस्ति यथा मृड इति। सडस्यापत्यं साडिः। हांताः। दि
व औत्। तकार उच्चारणार्थः। प्रातिपदिकस्येति। अव्युत्पन्नस्यादेवेर्दिवि रितिन्यासो हि तत्सूत्रेणाव्युत्पन्नस्य वा ग्रहणं न तु दिवु क्रीडादाविति धातोर्निरनुबंधकग्रह

णेन सानुबंधकस्येति परिभाषया तेनाप्स्वित्यादौ न भवति। न च तत्रांतरंगत्वादूठेव स्यान्न तु औत्वप्रसक्तिरिति वाच्यं। ऊठि कृतेप्येकदेशविकृतन्यायेन दिव औ
दित्यस्य प्रवृत्तिप्रसक्तिसंभवादिति दिक्। दिव उत्। तपरकरणमिह द्युभ्यामित्यादावुकारस्य संप्रसारणत्वाद्धल इति दीर्घप्राप्ते तन्निवारणायेत्याहुः। वांतः। चत्वा
र इति। चतेरुरन्निति उरन् प्रत्ययांत श्चतुरशब्दस्ततो जसि चतुरनडुहोरित्याम्॥ ॥ षट्चतुर्भ्यश्च। बहुवचननिर्देशादर्थस्य प्राधान्यं विवक्षितं। अर्थाच्च मृ॰प
रत्वं शब्दद्वारकं तेन तदंतविधौ सत्यपि परमचतुर्णामित्यादावेव भवति न तु बहुव्रीहौ तदेतद्ध्वनयति। गौणत्वे तु नुडिष्यत इत्यादिना। द्वित्वमिति। अचो रहाभ्यामि
त्यनेन। रोः सुपि। सुपीति न प्रत्याहारः खरीत्यनुवृत्तेः। तेन पयोभ्यामित्यादौ विध्यर्थमेतन्न भवति। खरवसानयोरित्यवसिद्धे। यमारंभो नियमार्थमित्याह। रोरेवेति
रोः सुप्येव विसर्जनीय इति विपरीतनियमस्त्विह न भवति। हलोनंतराः संयोग इत्यादिनिर्देशात्। शरोचि। अचो रहाभ्यामित्यत्तो द्वे इति नादिन्याक्रोश इत्यतो

षट्चतुर्भ्यश्च। ७।१।५५। षट्संज्ञकेभ्यश्चतुरश्च परस्याम्मो नुडागमः स्यात्। णत्वं द्वित्वं चतुर्णाम्। रोः सुपि। ८।३।१६। सप्तमीबहुवचने रोरेव विस
र्जनीयो नान्यरेफस्य। षत्वं षस्य द्वित्वे प्राप्ते। शरोऽचि। ८।४।४९। अचि परे शरो न द्वे स्तः। चतुर्षु। प्रियचत्वाः। हे प्रियचत्वः। प्रियचत्वारौ। गौणत्वे
तु नुडिष्यते। प्रियचतुरां। प्राधान्ये तु स्यादेव। परमचतुर्णां। कमलड्कमलाम्बा आचक्षाणः कमल्। कमलौ। कमलः। कमलड्कमल्षु। मोनो धा
तोः। ८।२।६४। धातोर्मस्य नः स्यात्पदान्ते। नत्वस्यासिद्धत्वान्नलोपो न। प्रशाम्यतीति। प्रशान्। प्रशामौ। प्रशामः। प्रशान्भ्यामित्यादि॥

मिति चानुवर्तत इत्याह। न द्वे स्त इति। नन्वस्तु द्वित्वमेकस्य झरो झरि सवर्ण इति लोपसिद्धमिष्टं। मैवं। लोपस्य वैकल्पिकत्वेन पक्षे द्वयोः श्रवणप्रसंगात्। प्रियाश्चत्वारश्च
त्वारि यस्य स प्रियचत्वाः। आं गत्वांतरं तस्यापि चतुरनडुहोरित्याम्। हे प्रियचत्व इत्यत्र तु अम्संबुद्धावित्यमारंतः। कमलामिति। कमला श्रीर्हरिप्रियेत्यमरः॥ क
मलामिति। तत्करोतितदाचष्ट इति णिचि इष्ठवद्भावाट्टिलोपः। णिजंतात्क्विप् लोरनिटीति णिलोपः। एवं सलिलमाचक्षाणः सलिल् सलिलौ सलिल इत्यादि बो
ध्यं। नन्वेवं तोयमाचक्षाणस्तोयतौ योतोय इतियांता अपि सुसाधाः। न च वेरपृक्तलोपात् हलि लोपः पूर्वविप्रतिषेधेनेति यलोपः शंक्यः। लोपो व्योर्वलीति लोपे कर्त
व्ये णिलोपस्य टिलोपस्य वास्थानिवद्भावेन यकारस्य वलपरत्वाभावादिति चेन्नैवं। न पदांतेति सूत्रेण यलोपे स्थानिवद्भावनिषेधात्। तस्माल्लोपो व्योर्वलीति

यलोपः स्यात् एवेति यांता नोक्ताः लांताः परा न इति। प्राचा तु ग्लोत्यप्युक्तं। तन्निष्फलत्वादुपेक्ष्यं। प्रशानिति। शम उपशमे। क्विप्। अनुनासिकस्य क्वीति दीर्घः॥ ॥ किमः कः। कायतेर्डिमिः। डिमि डिमि प्रत्ययेन निष्पन्नः किम्शब्दः॥ विभक्ताविति। अष्टन आ विभक्तावित्यतोऽनुवर्तत इति भावः। नन्वत्र इदम इत्येव सूत्र्यतां। तेन तिमष्टिमा दीनां क्विं वत्ता नामतिप्रसंगवारणाय त्यदादीनामित्यनुवर्त्य त्यदादीनामिमः अः स्यादिति व्याख्यास्यते तत्र दाद्विशब्दात्प्राक् किम्शब्दस्य पाठः कर्तव्यः। नानर्थकेऽ ति निषेधादलोन्त्यविधिर्न भविष्यति तत्किं काद्देशेनेत्यत आह। अकच्सहितस्यापीति। इमोकारविधौ तु साकच्कस्य क इति रूपं स्यादिति भावः॥ नन्वेवं गण कार्यत्वाभावादुपसर्जनेपि स्यात्। मैवं। त्यदादीनामित्यनुवर्त्य त्यदादीनां किमः इति व्याख्यानात्॥ इदमो मः। इदं इदः कमिनेर्लोपश्च। इदम्। तदोः सः सावित्यतो

किमः कः। ७।२।१०३। किमः कः स्याद्विभक्तौ। अकच्सहितस्याप्ययमादेशः। कः। कौ। के। कं। कौ। कान्। इत्यादि। सर्ववत्। इदमो मः। ७।२।१०८। इदमो मस्य मः स्यात्सौ परे। त्यदाद्यत्वापवादः। इदोऽय् पुंसि। ७।२।१११। इदम इदः स्थानेऽय् स्यात्सौ पुंसि। सोर्लोपः। अयं। त्यदाद्यत्वम्। पररूपत्वं। दश्च। ७।२।१०९। इदमो दस्य मः स्याद्विभक्तौ। इमौ। इमे। त्यदादेः सम्बोधनं नास्तीत्युत्सर्गः। अनाप्यकः। ७।२।११२। अककारस्य इदम इदोऽन् स्यादापि विभक्तौ। आबिति टा इत्यारभ्य सुपः पकारेण प्रत्याहारः। अनेन। हलि लोपः। ७।२।११३। अककारस्येदम इदो लोपः स्यादापि हलादौ। नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे। आद्यन्तवदेकस्मिन्। १।१।२१। एकस्मिन् क्रियमाणं कार्यमादाविवान्त इव स्यात्।

नुवर्तनादाह। सौ परे इति। इदोऽय् पुंसीति किं। इयं स्त्री। त्यदादेः संबोधनं नास्तीति। प्रचुरप्रयोगादर्शनमेवात्र मूलं। उत्सर्ग इति। तेन तदोः सः सावितिसूत्रे अनंत्ययोरिति किं। हे स इति भाष्यं। भो अच्युत भवन्नच्युतेत्यादि प्रयोगाश्च न विरुध्यंत इति भावः। अनाप्यकः। आबिति प्रत्याहारो न तु टाप्। विभक्ताविति विशेषणादिति व्याचष्टे। टा इत्यारभ्य सुपः पकारेणेति। नानर्थकेऽलोन्त्यविधिरिति। नन्वेवं बिभर्ति पिपर्ति इत्यादौ भृञामित्। अर्तिपिपर्त्योश्चेति इत्वं सर्वस्याभ्यासस्य स्यात्। द्वित्वाभावे केवलस्यार्थवत्त्वेपि द्वित्वे सति समुदायस्यैवार्थवत्त्वादित्याशंकायामाह। अनभ्यासविकार इति। आद्यंतवदेकस्मिन्। अन्यस्मिन्नस्य पूर्वो नास्ति स आदिः। सत्यन्यस्मिन्यस्य परो नास्ति सोंत इति लोके प्रसिद्धं तदुभयमेकस्मिन्नसहाये न संभवतीति तत्राद्यंतव्यपदिष्टानि कार्याणि न स्युरतोऽयमतिदेश आरभ्यते। न च परत्वात्सुपि चेति दीर्घः पश्चाद्धलि लोपः स

न्याभ्यामित्यादि सिध्यतीति किमत्राद्यन्तवत्सूत्रोपन्यासेनेति शंक्यं । निमित्तत्वाद्धलिल्लोप इत्यस्य दीर्घात्पूर्वमेव प्रवृत्तेः । एकस्मिन्नित्युपमेये सप्तमीदर्शनात्सप्तम्यर्थ एव वतिरित्यभि
प्रेत्याह । आदाविवान्त इवेति । आदिवत्किं । औपगवः । अत्राण आद्युदात्तत्वं यथा स्यात् । भाष्ये त्वाद्यन्तवदित्यपनीय व्यपदेशिवदेकस्मिन्निति सूत्रमूहितं । विशिष्ट
अपदेशो व्यपदेशः । मुख्यो व्यवहारः सोऽस्यास्तीति व्यपदेशी मुख्य इति यावत् । तेन तुल्यमेकस्मिन्नसहायेऽपि कार्यं स्यादित्यर्थः । तेन इयाय । आरेत्यादावेकाच इति द्वित्वं

नेदमदसोरकोः ।७।१।११। अककारयोरिदमदसोर्भिस ऐस् न स्यात् । एत्वं । एभिः । अत्वं निमित्तत्वान्ङेः स्मै पश्चाद्धलि लोपः । अस्मै । आभ्यां । एभ्यः । अ
स्मात् । आभ्यां । एभ्यः । अस्य । अनयोः । एषां । अस्मिन् । अनयोः । एषु । ककारयोगे तु अयकं । इमकौ । इमके । इमकं । इमकौ । इमकान् । इमकेन । इ
मकाभ्यां । इमकैः । इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ।२।४।३२। अन्वादेशविषयस्य इदमोऽनुदात्तोऽश् आदेशः स्यात्तृतीयादौ । अश्वचनं
साकच्कार्थं । द्वितीयाटौस्स्वेनः ।२।४।३४। द्वितीयायां टौसोश्च परत इदमेतदोरेनादेशः स्यादन्वादेशे । किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्त
रं विधातुं पुनरुपादानमन्वादेशः । यथाऽनेन व्याकरणमधीतं । एनं छन्दोऽध्यापयेति । अनयोः पवित्रं कुलं एनयोः प्रभूतं स्वमिति । एनं । एनौ ।
एनान् । एनेन । एनयोः । । गणयतेर्विच् । सुगण् । सुगणौ । सुगणः । सुगण्ट्सु । सुगण् त्सु । क्विपि अननुनासिकस्य क्विझलोरिति दीर्घः । सुगाण् । सुगाणौ ।
सुगाणः । सुगाण्सु सुगाण्ट्सु परत्वादुपधादीर्घः हल्ङ्यादिलोपः । नतो नलोपः । राजा । नङिसम्बुद्ध्योः ।८।२।८। नस्य लोपो न स्यान्ङौ सम्बुद्धौ च । हे राजन्
ङौ तु छन्दस्युदाहरणं । सुपां सुलुगिति ङेर्लुक् । निषेधसामर्थ्यात्प्रत्ययलक्षणं । परमे व्योमन् । ङावुत्तरपदे प्रतिषेधो वक्तव्यः । चर्मणि तिला अस्य
चर्मतिलः । ब्रह्मनिष्ठः । राजानौ । राजानः । राजानं । राजानौ । अल्लोपोऽनः । श्चुत्वं । न चाल्लोपः स्थानिवत् । पूर्वत्रासिद्धे तन्निषेधात् । नापि बहिरङ्गतयाऽसिद्धः
पयोद्देशपक्षे षाष्ठीयं परिभाषेति श्चुत्वस्यासिद्धतयाऽन्तरङ्गाभावे परिभाषाया अप्रवृत्तेः । जञोर्ज्ञः । राज्ञः । राज्ञा ॥ ॥ ॥

सेध्यति । अन्यथा आद्यन्तापदिष्टत्वाभावात् द्वित्वं न स्यादिति दिक् ॥ ❁ ॥ नेदमदसो । भाष्ये तु इदमदसोः कात् नियमार्थमिदं । इदमदसोः कादेव भिस ऐस् नान्यत इति
स्यतं । नत्वासु । इदमदसोः कादिति सूत्रिते तु कादिदमदसोरेवेति विपरीतनियमोऽपि संभाव्येत । तथा च याचकैरित्यादि न सिध्येत । किं

द्विसदेस अतइत्येव सूत्रद्वयं सुवचमित्याहुः। स्यायादेशात्परत्वादनादेशः स्यादित्याशंकायामाह। नित्यत्वान्ङेस्मै इति। इदमोऽन्वादेशे। नन्विदमोऽनुदात्तमात्रवि-
धानेऽपि हलि लोपेन आभ्यामित्यादि समीहितरूपं सिध्यति एनेन एनयोरित्यत्र तु विशिष्यैनादेशो विहितः किमनेनाशग्रहणेनेत्यत आह। साकच्कार्थमिति। अय-
घर्थ। हशि तत्करणं व्यर्थं अकारस्याकारविधानसामर्थ्यादेव सर्वादेशसिद्धेस्तथानुदात्तत्वार्थमेवाकारविधानमित्याशंकास्यात्तन्निवारणाय शित्करणमित्या-
हुः। अअ इति प्रश्लिष्य अभेदेशे तु अनेकाल्त्वादेव सर्वादेशसिद्धेः शिद्ग्रहणं त्यक्तुं शक्यमित्याकरः। द्वितीयाटौस्सु। इदमोऽन्वादेश इत्यतः इदम इत्यनुवर्तते।

। अन्वादेश इति च एतदस्त्रसोरित्यत्र एतद इत्यपि तदाह। इदमेतदोरन्वादेश इत्यादि। अनुदात्त इत्यनुवर्तनादेनादेशोऽनुदात्त इति।
देयः। कार्यं विधातुमिति। अपूर्वं बोधयितुमित्यर्थः। ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः। एतमातं ङितं विद्यादित्यत्र तु ईषदर्थादयो न विधीयंते किंत्वनू-
द्यंते इति न तत्रैनादेशः। एतेन नक्तं भीरुरयं त्वमेव तदिमं दाघे गृहं प्रापयेत्यपि व्याख्यातं। भीरुत्वस्यानुवाद्यत्वेन विवक्षितत्वात्। मांतान्सुगालिति। क्विपा नच
अनुनासिकस्य क्विझलोरिति दीर्घे कर्तव्ये अल्लोपस्य स्थानिवद्भावः शंक्यः। दीर्घविधौ तन्निषेधात्। क्वौ विधिं प्रतिनिषेधाच्च॥ णत्वं॥ निषेधसामर्थ्यादि-
ति। यदा तु नङिसंबुद्ध्योरित्यत्र षष्ठ्यंततामाश्रित्य ङ्यंतस्य संबुद्ध्यंतस्य च पदस्य लोपो नेति व्याख्यायते तदा प्रत्ययलक्षणं सुलभमिति तदर्थं निषेधसामर्थ्या-
नुसरणक्लेशो न कर्तव्य इत्याहुः। पूर्वस्मादपि विधौ स्थानिवत्त्वमाशंक्याह॥ नचेति॥ षाष्ठीपरिभाषामिति। वाह ऊठित्यत्र ज्ञापितत्वेन तद्देशस्थत्वादिति भावः॥

नलोपः सुप्स्वर। पूर्वत्रासिद्धमित्यनेनैव सिद्धे नियमार्थमारंभ इत्याहुः। अन्यत्रेत्यादि। तेन राजाश्व इत्यादौ सवर्णदीर्घकर्तव्ये नलोपः सिद्धो न भवतीति भावः। सुब्विधिमुदाह-
रति। आत्वमित्यादिना। सुबाश्रितो विधिः सुब्विधिः। स्वरविधौ पंचार्मे। दिक्संख्ये संज्ञायामिति समासे नलोपे कृते अवर्णांतं पूर्वपदं जातमिति। अर्मे चावर्णं द्व्यच्त्र्यच्-
त्रिपूर्वपदाद्युदात्तत्वं प्राप्तं नलोपस्यासिद्धत्वान्न भवति। संज्ञाविधौ पंचेत्यत्र नलोपे कृते पीत्यादिना स्त्रीप्रत्ययेषु वक्ष्यति। अन्ये तु दंडिगुप्तो गुप्तदंडिनावित्युदाहरणं
अत्र नलोपस्यासिद्धत्वात् घिसंज्ञा नास्तीति द्वंद्वे घीति पूर्वनिपातनियमो न भवतीत्याहुः। कृति तुग्विधौ तु वृत्रहभ्यां ब्रह्मभ्रूणेति विहितं क्विपमाश्रित्य ह्रस्वस्येति तुङ्न
कृति तुग्विधाविति किं। वृत्रहच्छत्रं इह ह्रस्वादेव छे चेति तुक्। यद्यपि वृत्रहभ्यामित्यत्रासिद्धं बहिरंगमंतरंग इत्यनेनैव लोपस्यासिद्धत्वं सिध्यति। तथापि। अस्याः

नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति। ८।२।२। सुब्विधौ स्वरविधौ संज्ञाविधौ कृति तुग्विधौ च नलोपः सिद्धो नान्यत्र। राजाश्व इत्यादौ न। इत्यसि-
द्धत्वादात्वमेत्वमैस्त्वं च न। राजभ्यां राजभिः। राज्ञा। राजभ्यां। राजभ्यः। राज्ञः। राज्ञोः। राज्ञि। राजनि। प्रतिदीव्यतीति प्रतिदिवा। प्रतिदिवानौ। प्रतिदिवानः। अस्य
भविषयेऽल्लोपे कृते। हलि च। ८।२।७७। रेफवकारान्तस्य धातोरुपधाया इको दीर्घः स्याद्धलि। नचाऽल्लोपस्य स्थानिवत्त्वं दीर्घविधौ तन्निषेधात्। ब-
हिरंगपरिभाषा तूक्तन्यायेन न प्रवर्तते। प्रतिदीव्नः। प्रतिदीव्नेत्यादि। यज्वा। यज्वानौ। यज्वानः। न संयोगाद्वमन्तात्। ६।४।१३७। वकारमकारा-
न्तसंयोगात्परस्याऽनोऽकारस्य लोपो न स्यात्। यज्वनः। यज्वना। यज्वभ्यामित्यादि। ब्रह्मणः। ब्रह्मणा। ब्रह्मभ्यामित्यादि॥ ॥

परिभाषाया अनित्यत्वज्ञापनार्थं कृति तुक्ग्रहणं। तेन यासा इत्यादि सिध्यति। अन्यथा विभक्त्याश्रयस्यात्वस्य बहिरंगत्वेनासिद्धत्वाट्टाप् न स्यात्। एतच्च नाजानंतर्ये बहिष्ट्व-
प्रकृतेरित्यत्र यत्रांतरंगे बहिरंगे वा अचोरानंतर्यमिति हरदत्तादिमते न कैश्चिदुक्तं। उत्तरकार्ये अच आनंतर्यमिति कैयटमते तु नात्र बहिरंगपरिभाषा प्रवर्तते। यासे-
त्यत्र टाप् तु संनिपातपरिभाषामपि बाधित्वानया यासयोरिति निर्देशादेव सिध्यतीति ज्ञेयं। प्रतिदिवेति। कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिव इति कनिन्। हलि च॥
र्वोरुपधाया दीर्घ इक इत्यनुवर्तते सिपि धातो रुरित्यतो धातोरिति च तच्च धातुग्रहणं र्वोरित्यनेन विशेष्यते विशेषणेन तदंतविधिरित्याह। रेफवांतस्य धातोरित्यादि। रेफां-
तस्य तु गीर्यति पूर्यति गीर्णः पूर्णः इत्याद्युदाहरणं। धातोः किं। रेफांतस्य परस्य माभूत्। अग्निः करोति। वायुः करोति। नन्वसु धातोर

ांतस्य धातोः। रिति किं नु इह विशेष्यते रेफवांतस्य इकः दीर्घः स्यात् तौ चेद्रेफवकारौ धातोः स्तः। अंतशब्दोऽत्र समीपवाची तथा चोपधायां चेति सूत्रेऽप्युक्तं शाकटायनेनैवमूर्छितः हूर्छेती
त्यादि रूपसिद्धिरिति चेत्। मैवं। कुर्कुरीयतीत्यत्रातिप्रसंगः स्यात् तस्मात् र्वोरित्यनेन धातुरेव विशेष्यः। एतच्चाकरे स्पष्टं। पत्रूपधायां चेति केचित्तु इदुपन्यस्तं। तन्नादिरिवेर्वकारस्या
नुपधात्वात्। उक्तन्यायेनेति। यथोद्देशपक्षे षाष्ठीपरिभाषा प्रतिदीर्घस्यासिद्धत्वेप्यर्थः। प्रतिदीव्न इति। नम कुर्छुरामित्यत्र र्वोरित्यनुवर्तनात् इरफवांतस्यैवमस्य निषेध इति
न दीर्घनिषेधोऽत्र प्रसंगः। नांतस्येह मत्वात्। यज्वेति। इष्टवान् यज्वा। सुयजोर्ङ्वनिप्। । ब्रह्मण इति। सर्वधातुभ्यो मनिन्निति प्रकृत्य बृंहेर्नोऽच्चेति नस्यात्वविधानात् इह ब्रह्मन्शब्दो
व्योयनिष्पन्नः॥ ॐ॥ इन्हन्॥ सर्वनामस्थाने चासंबुद्धौ इत्यनेनैव सिद्धे नियमार्थमिदं तदाह। शावेवो- पधाया इति। उपधादीर्घस्य नियमः। तेन वृत्रहायत इत्यत्र क्यङ्।
सार्वधातुकयोरिति दीर्घो भवत्येव। वृत्रहणीत्यत्रानुनासिकस्य क्विझलोरिति दीर्घः सोऽपि नियमेन व्यावर्त्यते। उपधादीर्घमात्रापेक्षया नियमविज्ञानादिति तु मनोरमायां।

इन्हन्पूषार्यम्णां शौ।६।४।१२। एषां शावेवोपधाया दीर्घो नान्यत्र। इति निषेधे प्राप्ते। सौ च।६।४।१३। इन्नादीनामुपधाया दीर्घः स्यादसंबुद्धौ
सौ परे। वृत्रहा। हे वृत्रहन्। एकाजुत्तरपदे णः इति णत्वं। वृत्रहणौ। वृत्रहणः। वृत्रहणं। वृत्रहणौ। हो हन्तेर्ञ्णिन्नेषु।७।३।५४। ञिति णिति प्रत्यये नकारे
च परे हन्तेर्हकारस्य कुत्वं स्यात्। हन्तेः।८।४।२२। उपसर्गस्थान्निमित्तात् परस्य हन्तेर्नस्य णत्वं स्यात्। प्रहण्यात्॥ अत्पूर्वस्य।८।४।२२। हन्तेरत्पू
र्वस्यैव नस्य णत्वं नान्यस्य। प्रघ्नन्ति। योगविभागसामर्थ्यादनन्तरस्य विधिर्वा प्रतिषेधो वेति न्यायम्बाधित्वा एकाजुत्तरपदे णः इति णत्वमपि निवर्त्तते। नकारे
परे कुत्वविधिसामर्थ्यादल्लोपो न स्थानिवत्। वृत्रघ्नः। वृत्रघ्ना। इत्यादि। यत्तु वृत्रघ्न इत्यादौ वैकल्पिकं णत्वं माधवेनोक्तं। तद्भाष्यवार्त्तिकविरुद्धं। एवं
शार्ङ्गिन्यशस्विन्नर्यमन्पूषन्। यशस्विन्निति विन्नन्तत्वेऽपि इन्नोः नर्थकत्वेऽपि न हन्नित्यत्र ग्रहणमभवत्येव। अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्त
विधिं प्रयोजयन्तीति वचनात्। अर्यम्णि। अर्य्यमणि। पूष्णि। पूषणि॥ ॥ ए॥ स्थितं। शावेवेति नियमाद्दीर्घस्याप्राप्तावाह। सौ चेति। शिस्वादिरिति वक्त
व्ये योगविभाग उत्तरार्थः। वृत्रहेति। वृत्रं हतवान्। ब्रह्म... लोति... । हन्तेर्ञिति णिति नीत्यनेन द्वंद्वे विशेषणं। नकारे इति तु हस्यैति यथासंभवं बोध्यं। यद्यपि ञ्णिन्नाः
सर्वोपि हस्यैव विशेषणं ञिति णिति नीत्यंशेयेन नाव्यवधानेन्यत्र नहि ध्यांव्यवधानं स्वीक्रियते तेन घातः घातक इत्यत्र कुत्वं भवति। इह तु न भवति। हननमात्मन इच्छ

नलोपः सुप्स्वर। पूर्वत्रासिद्धमित्यनेनैव सिद्धे नियमार्थमारंभ इत्याहुः। अन्यत्रेत्यादि। तेन राजाश्व इत्यादौ सवर्णदीर्घे कर्तव्ये नलोपोऽसिद्धो न भवतीति भावः। सुब्विधिमुदाहरति। आत्वमित्यादिना। सुपाश्रितो विधिः सुब्विधिः। स्वरविधौ पंचार्मी। दिक्संख्ये संज्ञायामिति समासे नलोपे कृते अवर्णान्तं पूर्वपदं जातमिति। अर्मे चावर्णं द्व्यच् त्र्यच् इति पूर्वपदाद्युदात्तत्वं प्राप्तं नलोपस्यासिद्धत्वान्न भवति। संज्ञाविधौ पंचेत्यत्र नलोपे कृते पीत्यादिना स्त्रीप्रत्ययेषु वक्ष्यति। अन्ये तु दंडिगुप्तो गुप्तदंडिनावित्युदाहरणं अत्र नलोपस्यासिद्धत्वात् घिसंज्ञा नास्तीति द्वंद्वे घीति पूर्वनिपातनियमो न भवतीत्याहुः। कृति तुग्विधौ तु वृत्रहभ्यामत्र ब्रह्मभ्रूणेति विहितं क्विपमाश्रित्य ह्रस्वस्येति तुक् न। कृति तुग्विधाविति किं। वृत्रहच्छत्रं इह स्यादेव छे चेति तुक्। यद्यपि वृत्रहभ्यामित्यत्रासिद्धं बहिरंगमंतरंग इत्यनेनैव लोपस्यासिद्धत्वं सिध्यति। तथापि। अस्याः

नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति। ८।२।२। सुब्विधौ स्वरविधौ संज्ञाविधौ कृति तुग्विधौ च नलोपोऽसिद्धो नान्यत्र। राजाश्व इत्यादौ। इत्यसिद्धत्वादात्वमेत्वमैस्त्वं च न। राजभ्यां। राजभिः। राज्ञः। राजभ्यां। राजभ्यः। राज्ञः। राज्ञोः। राज्ञि। राजनि। प्रतिदीव्यतीति प्रतिदिवा। प्रतिदिवानौ। प्रतिदिवानः। अस्य भविषयेऽल्लोपे कृते। हलि च। ८।२।७७। रेफवकारान्तस्य धातोरुपधाया इको दीर्घः स्याद्धलि। न चाऽल्लोपस्य स्थानिवत्त्वं दीर्घविधौ तन्निषेधात्। बहिरंगपरिभाषा तूक्तन्यायेन न प्रवर्तते। प्रतिदीव्नः। प्रतिदीव्नेत्यादि। यज्वा। यज्वानौ। यज्वानः। न संयोगाद्वमन्तात्। ६।४।१३७। वकारमकारान्तसंयोगात्परस्याऽनोऽकारस्य लोपो न स्यात्। यज्वनः। यज्वना। यज्वभ्यामित्यादि। ब्रह्मणः। ब्रह्मणा। ब्रह्मभ्यामित्यादि॥ ॥

परिभाषायामनित्यत्वज्ञापनार्थं कृति तुग्ग्रहणं। तेन यासा इत्यादि सिध्यति। अन्यथा विभक्त्याश्रयस्यात्वस्य बहिरंगत्वेनासिद्धत्वाद् आपन्नस्यात्। एतच्च नाजानंतर्ये बहिष्ट्वप्रकृप्तिरित्यत्र यत्रांतरंगे बहिरंगे वा अचोरानंतर्यमिति हरदत्तादिमतेन केश्चिदुक्तं। उत्तरकार्ये अच आनंतर्यमिति कैयटमते तु नात्र बहिरंगपरिभाषा प्रवर्तते। यासेत्यत्र टाप् तु संनिपातपरिभाषामपि बाधित्वा नयासयोरिति निर्देशादेव सिध्यतीति ज्ञेयं। प्रतिदिवेति। कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिव इति कनिन्। हलि च। वोरुपधाया दीर्घ इक इत्यनुवर्तते सिपि धातो रित्यतो धातोरिति च तच्च धातुग्रहणं वोरित्यनेन विशेष्यते विशेषणेन तदंतविधिरित्याह। रेफवान्तस्य धातोरित्यादि। रेफांतस्य तु गीर्यति पूर्यति गीर्णं पूर्णमित्याद्युदाहरणं। धातोः किं। रेफांतस्य पदस्य माभूत्। अग्निः करोति। वायुः करोति। नन्वस्तु धातोरनुवर्तनं परं तु वोरित्यनेन धातुर्न विशेष्यते रेफ

णांतस्य धातोः इति। किं तु इग्विशेष्यत्वे रेफवांतस्य इकारादेर्दीर्घः स्यात्तौ चेद्रेफवकारौ धातोः श्चेत्। अंतशब्दोऽत्र समीपवाची तथा चोपधायां चेति सूत्रं त्यक्तुं शक्यमनेनैव मूर्छितिः हूर्छिती
त्यादिरूपसिद्धेरिति चेत्। मैवं। कुर्कुरीयतीत्यत्रातिप्रसंगः स्यात्तस्मात् र्वोरित्यनेन धातुरेव विशेष्यः। एतच्चाकरे स्पष्टं। पत्तूपधायां चेति कोश्चिदुपन्यस्तं। तन्नादिवेर्वकारस्या
नुपधात्वात्। उक्तन्यायेनेति। यथोद्देशपक्षे षाष्ठीपरिभाषां प्रतिदीर्घस्यासिद्धत्वेऽपीत्यर्थः। प्रतिदीव्न इति। नभकुर्छुरामित्यत्र र्वोरित्यनुवर्तनादिरेफवांतस्यैव भस्य निषेधः इति
न दीर्घनिषेधोऽत्र शंक्यः। नांतस्य हमत्वात्। यज्वेति। इष्टवान्यज्वा। सुयजोर्ङ्वनिप्   । ब्रह्मण इति। सर्वधातुभ्यो मनिन्निति प्रकृत्य बृंहेर्नोऽच्चेति नस्याकारविधानाद्रूपसिद्धिः
द्धोऽयं निष्पन्नः ॥ ःः ॥ इन्हन्॥ सर्वनामस्थाने चासंबुद्धावित्यनेनैव सिद्धे नियमार्थमिदं तदाह। शावेवो-   पधाया इति। उपधादीर्घस्य नियमः। तेन वृत्रहायत इत्यत्राकृत्
सार्वधातुकयोरिति दीर्घो भवत्येव। वृत्रहणीत्यत्रानुनासिकस्य क्विझलोरिति दीर्घः सोऽपि नियमेन व्यावर्त्यते। उपधादीर्घमात्रापेक्षया नियमविज्ञानादिति तु मनोरमायां।

इन्हन्पूषार्यम्णां शौ। ६।४।१२। एषां शावेवोपधाया दीर्घो नान्यत्र। इति निषेधे प्राप्ते। सौ च। ६।४।१३। इन्नादीनामुपधाया दीर्घः स्यादसंबुद्धौ
सौ परे। वृत्रहा। हे वृत्रहन्। एकाजुत्तरपदे णः। ८।४।१२। वृत्रहणौ। वृत्रहणः। वृत्रहणं। वृत्रहणौ। हो हन्तेर्ञ्णिन्नेषु। ७।३।५४। ञिति णिति प्रत्यये नका
रे च परे हन्तेर्हकारस्य कुत्वं स्यात्। हन्तेः। ८।४।२२। उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णत्वं स्यात्। प्रहण्यात्॥ अत्पूर्वस्य। ८।४।२२॥ हन्तेरत्पू
र्वस्यैव नस्य णत्वं नान्यस्य। प्रघ्नन्ति। योगविभागसामर्थ्यादनन्तरस्य विधिर्वा प्रतिषेधो वेति न्यायं बाधित्वा एकाजुत्तरपद इति णत्वमपि निवर्त्यते। नकारे
परे कुत्वविधिसामर्थ्यादल्लोपो न स्थानिवत्। वृत्रघ्नः। वृत्रघ्ना। इत्यादि। यत्तु वृत्रघ्न इत्यादौ वैकल्पिकेण णत्वं माधवेनोक्तं। तद्भाष्यवार्त्तिकविरुद्धं। एवं।
शार्ङ्गिन्यशस्विन्नर्यमन्पूषन्। यशस्विन्निति विन्। यत्र इनोऽनर्थकत्वेऽपि न हन्नित्यत्र ग्रहणमभवत्येव। अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तद
न्तविधिं प्रयोजयन्तीति वचनात्। अर्यमा। अर्यमणौ। अर्यमणि। पूष्णि। पूषणि॥   ॥ ५ ॥ स्थितं। शावेवेति नियमाद्दीर्घस्याप्राप्तावाह। सौ चेति। श्लिष्टावितिवक्त
व्ये योगविभाग उत्तरार्थः। वृत्रहेति। वृत्रं हतवान्। ब्रह्म॰. णतिक्लिप्। हन्तेर्हस्येति ञ्णि ञिति णिति इत्येतद्वंतेर्विशेषणं। नकारे इति तु हस्येति यथासंभवं बोध्यं। यद्यपि ञिति णिन्नाः
सर्वत्रापि हस्यैव विशेषणं ञितिणितीत्यंशे येन नाव्यवधानं न्यायेन हन्तेर्वा व्यवधानं स्वीक्रियते तेन घातः घातक इत्यत्र कुत्वं भवति। इह तु न भवति। हननमात्मन इच्छ

निहन्यनीयतिहननीयते ण्वुल् हननीयक इति। एतच्च भाष्यकैयटयोः स्पष्टं। हन्तेरत्पूर्वस्येति सूत्रं योगविभागेन व्याचष्टे। हन्तेरिति। प्रसंगादस्योदाहरणमाह। प्रहण्मादि
ति। प्रकृतोपयुक्तमंशमाह। अत्पूर्वस्येति। एकाजुत्तरे इति। न च ह्नेपेक्षतेपि एकाच्त्वं नास्तीति वाच्यं। पूर्वस्मादपि विधौ स्थानिवद्भावात्। न च पूर्वत्रासिद्धे न स्थानिव
दिति वाच्यं। तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति उक्तेः। निवर्त्यत इति। कुमति चेति णत्वमपि निवर्त्यत एवेति बोध्यं। भाष्ये तु कुव्यवाये हादेशेषु प्रतिषेधो वक्त
व्यः। किं प्रयोजनं। वृत्रघ्नः सुघ्नः प्रघाणि हन्तेरत्पूर्वस्येत्यत्पूर्वग्रहणं न कर्तव्यं भवतीत्युक्तं। एतच्च वार्तिकार्थवर्णनमात्रं न तु वस्तुस्थितिः। वार्तिके न सूत्रावयवव्य
त्याख्यानापेक्षया योगविभागमाश्रित्य वार्तिकार्थोपसंग्रहस्यैव न्याय्यत्वादिति तु मनोरमायां स्थितं। नन्वत्पूर्वस्येत्यत्र तपरो विवक्षितो न वा। यदि विवक्षितस्तर्हि बहु
वृत्रहाणीति सिध्येत्। यद्यविवक्षितस्तदा प्रघानीति चिंत्यतेपि णत्वं स्यात्। तत्र च कुव्यवाये हादेशेषु प्रतिषेध इति वचनं स्वीकर्तव्यमेवेति किमनेन योगविभागेन॥
अत्राहुः। तपरोत्र विवक्षित एव। न च बहुवृत्रहाणीत्यत्र णत्वासिद्धिः। णत्वस्यांतरंगत्वेन तत्कार्यं प्रति दीर्घस्यासिद्धत्वात्। न चात्रैपादिकेंतरंगे बहिष्परिभाषा न प्र
वर्तत इति वाच्यं। कार्यकालपक्षाभ्युपगमात्। न चैवमंतरंगं णत्वं प्राघाणीत्यत्रापि स्यादिति वाच्यं। पूर्वं धातुः साधनेन युज्यत इति पक्षेण णत्वस्य बहिरंगत्वात्। दृष्टानुरोधे
न पूर्वं धातुरुपसर्गेणेति पक्षस्यानभ्युपगमात् इति। अन्ये तु हन्तेरत्पूर्वस्येत्यत्र उपसर्गादित्यस्यानुवृत्तिस्वीकारात् योगविभागेन सामर्थ्येन भ्रूणघ्न इत्यत्र एका
जुत्तरेत्यादिना णत्वाभावेपि वृत्रघ्नः स्रुघ्न इत्यत्र णत्वं दुर्वारमिति कुव्यवाय इति वार्तिकं स्वीकर्तव्यमेव। योगविभागस्यानंतरस्येति न्यायबाधेनापि चरितार्थत्वादुप
सर्गसंबंधस्यापि बाधे सामर्थ्याभावात्। न च ब्रह्मादिषु कर्मसूपपदेषु विधीयमानः क्विप्प्रत्ययः केवलं धातोरेव स्यान्न तु सोपसर्गादिति ब्रह्मप्रहा भ्रूणप्रहेत्यादि
रूपमेव दुर्लभमिति वाच्यं। आतोनुपसर्गे क इत्यत्रानुपसर्गे इति सामान्यापेक्षज्ञापकात् सोपसर्गाद्धन्तेरपि ब्रह्मभ्रूणेति क्विप्संभवात्। अनुपसर्गग्रहणस्य सामान्यापेक्ष
ज्ञापकत्वेनोक्तवार्तिकस्यैव प्रमाणं। तस्माद्धन्तेरिति योगविभागोत्र निरर्थक एवेत्याहुः॥ माधवेनोक्तमिति। इत्थं हि तदीयो ग्रंथः। भसंज्ञायामल्लोपे उत्तरपदमनकं स्यादिति
वद्भावस्याल्विधित्वान्नेत्ये काजुत्तरपदत्वाभावात्प्रातिपदिकांतनुम्विभक्तिषु चेति विकल्पो भवति॥ वृत्रघ्नो वृत्रघ्ण इति। तद्भाष्येति। किं च अल्विधित्वान्नेत्यसंगतं
अल्विध्यर्थमेवाचः परस्मिन्नित्यस्यारंभात्। तस्याप्रवृत्तौ युक्तं। तरस्येव वाच्यत्वात्। एकाजुत्तरेत्यस्याप्रवृत्तावपि कुमति चेति सूत्रस्य दुर्वारत्वात् वैकल्पिकत्वं णत्वस्यासंगत

नचत्रिपाद्यामपि पूर्वप्रत्युत्तरत्वात्तस्यासिद्धत्वाद्रेफोत्तरपदं रणः कुमतिचेत्यस्याप्रवृत्त्या प्रातिपदिकान्तेति वैकल्पिकमेव णत्वं भवतीति वाच्यं। न हि योगे योगोऽसिद्धः॥
प्रकरणे प्रकरणमिति भाष्यादौ स्पष्टत्वादिति दिक्। अनिनस्मन्ग्रहणानीति। अन्। राजेत्यर्थवता साम्ना इत्यनर्थकेन। इन्। दण्डीत्यर्थवता। वाग्मीत्यनर्थकेन। अस्। सुय-
शा इत्यर्थवता। सुस्रोता इत्यनर्थकेन। इहसुरीभ्यां तुङ्। इत्यसुन्। मन्। सुशर्मेत्यर्थवता। सुप्रथिमा इत्यनर्थकेन। एतच्च इणः षीध्वमिति सूत्रे अङ्गग्रहणेन अर्थवद्ग्र-
हणपरिभाषाया अनित्यत्वज्ञापनात्सिद्धं। विविषीध्वमित्यत्र षीध्वंशब्दस्य ग्रहणं माभूदिति हि तत्राङ्गग्रहणं कृतं तच्चापार्थकमनर्थकत्वादेव तद्ग्रहणसिद्धेरतो ज्ञा-
पयते अर्थवद्ग्रहणपरिभाषा अनित्येति॥ ॥ मघवा बहुलं। अर्वणस्त्रसावनञ इत्यतस्त इत्यनुवर्तते तदपेक्षा च मघवेति षष्ठ्यर्थे प्रथमा। तदाह। मघवन्शब्दस्येति। अधातो-

मघवा बहुलं। ६।४।१२८। मघवन्शब्दस्य वा तृ इत्यन्तादेशः स्यात्। ऋ इत्। उगिदचां सर्वनामस्थानेऽधातोः ७।१।७०। अधातोरुगितो नलोपिनोऽञ्च-
तेश्च नुमागमः स्यात्सर्वनामस्थाने परे। उपधादीर्घः। मघवान्। इह दीर्घे कर्तव्ये संयोगान्तलोपस्याऽसिद्धत्वं न भवति। बहुलग्रहणात्। तथा चाश्व-
न्नुक्षन्निति निपातनान्मघशब्दान्मतुपा च भाषायामपि शब्दद्वयसिद्धिमाश्रित्यैतत्सूत्रं प्रत्याख्यातमाकरे। हविर्जक्षिति निःशङ्को मखेषु मघ-
वानसाविति भट्टिः। मघवन्तौ। मघवन्तः। हे मघवन्। मघवन्तं। मघवन्तौ। मघवतः। मघवता। मघवद्भ्यामित्यादि। तृत्वाऽभावे। मघवा। छन्दसी-
वनिपौ चेति वनिवन्तमध्योदात्तं छन्दस्येव। अन्तोदात्तं तु लोकेऽपीति विशेषः। मघवानौ। मघवानः। सुटि राजवत्॥ ॥ ॥

रिति। अधातुभूतपूर्वस्यापीत्यर्थः। अञ्चतिग्रहणं हि नियमार्थं। उगितो धातोश्चेद्भवति तर्ह्यञ्चतेरेवेति। एवं च गोमानिवाचरति गोमान् इत्यादौ संप्रति धातुत्वेऽपि
विध्यर्थमधातुग्रहणं। एतच्च मूल एव स्फुटीभविष्यति। न च अञ्चतिग्रहणमौपदेशिकधातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेवेति व्याख्याय अधातुग्रहणं त्यज्यतामिति
वाच्यं। अत्र न व्याः। नुम्मात्रविषयको नायं नियमो धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेवेति नियम्यते तेनेह न। उखास्रत् इति। उगितश्चेति सूत्रे वक्ष्यमाणत्वात्। तत्र श्च-
त्यौपदेशिकधातोश्चेदुगित्कार्यमिति व्याख्यायते तर्हि पूर्वं [illegible] गोमानित्यादौ स्त्रियामुगितश्चेति ङीप् प्रसज्येत। आचारक्विबन्तस्यौपदेशिकधातुत्वाभावात्।
न चेष्टापत्तिः। अधातोर्ग्रहणं देवसूत्रकृता तत्र नुम न [illegible] मान इति दिक्। ननु नलोपिनोऽञ्चतेरेव नुमागमः स्यान्न तु पूजार्थस्य नकारवतोऽञ्चतेरित्य-

वमर्थं न चामिति ग्रहणस्य सार्थकत्वात्कथमेतस्य सामान्यनियमार्थतेति चेत्। उच्यते। अचामित्यत्र न लोपो विवक्षितः। तथा च पूर्वोक्तनियमार्थता भाष्यकै
यटाद्युक्ता संगच्छत एव। पूजार्थस्यांचतेर्नुमि सत्यपि लक्ष्याप्रसं। स्येति सूत्रे जातिपक्षमाश्रित्य नत्वजाते ऽनुस्वारविधाने समीहितरूपसिद्धेः। व्यक्तिपक्षे त्व
नुस्वारस्य शर्षु पठितत्वात् अनुस्वारे परे नुमो ऽनुस्वारे सति अनुस्वारवद्रूपमिष्यते। अनचि चेति द्वित्वेन ममद्रूपस्य तवापि मते दुर्वारत्वात्। न च भवन्मते ऽहि
त्वेनानुस्वारत्रयं स्यादिति शंक्यं। झरो झरीति लोपेन निवारयितुं शक्यत्वात्। लोपाभावपक्षे त्रयाणां श्रवणं स्यादिति चेत्। भाष्यकैयटाद्युक्तनियमानुरोधे
नत्वं तत्स्वीकारे बाधकाभावात्। इष्टानुरोधेन जातिपक्ष एव त्राश्रयणीयः। नुमागमः स्यादिति। इदितो नुम् धातोरित्यतो नुमनुवर्तत इति भावः। ननु कुर्वन्नि
त्यादावि वसंयोगांतलोपस्यासिद्धत्वेन नांतत्वाभावाद्दीर्घत्वं न स्यादित्याशंक्याह। इह दीर्घे कर्तव्य इति। बहुलग्रहणादिति। क्वचिदन्यदेवेत्यर्थकादित्यर्थः
वहूनर्थान्लातीति वहुलं॥ आतो ऽनुपसर्गे इति कर्मण्युपपदे कः॥ श्वन्नुक्षन्निति। श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्प
रिज्मन्मातरिश्वन्मघवन्नित्युणादिसूत्रे ऽयमित्यर्थः। निपातनादिति। महेर्हकारस्य घकारः अवुगागमः। कनिप्रत्ययश्चेत्यस्यापि त्रितयस्य निपातनादित्य
र्थः॥ प्रत्याख्यातमाकर इति॥ एवं च फलभेदे त्रादेशस्य प्रत्याख्यानासंभवात् आदेशपक्षेपि दीर्घो भाष्यादिसंमत एवेति बहुलग्रहणात्संयोगांतलोपस्य
नासिद्धत्वमित्युक्तं॥ यत्त्वाहुः॥ मतुप्पक्षेपि छांदसत्वान्न दीर्घ इत्येव भाष्याशय इति॥ तन्न॥ मतुवंतस्य छांदसत्वे मानाभावात्॥ उदाहृतभट्टिप्रयोगविरोधा
च्चेति दिक्॥ छंदसीवनिपाविति। मत्वर्थे ईवनिपौ स्तः छंदसीति वार्तिकार्थः। सुमंगलीरियं वधूः मघवानमीमहे इत्युदाहरिष्यति वैदिकप्रक्रियायां। अंतोदा
त्तत्विति। यद्यपि श्वन्नुक्षन्नित्यत्र कनिन्नंता एते इत्युज्ज्वलदत्तादिग्रंथपर्यालोचनया आद्युदात्तत्वं लभ्यते। तथापि उक्षा समुद्रो अरुणः सुपर्णः पूषात्वेतोन
यतु अग्निर्मूर्धा दिवः ककुत् इत्यादौ तत्सूत्रोपात्तानामुक्षादीनामंतोदात्तस्य निर्विवादतया कनिप्रत्यय एवोचित इति भावः॥

श्वयुवा। अल्लोपो न इत्यतो ऽन इत्यपकृष्य व्याचष्टे। अनंतानामिति। अनंतानां किं। मघवत इति। यद्यपि नस्य तादेशेप्येकदेशविकृतस्यानन्यत्वादनंतता त्वास्त्येव
तथापि विशेषणसामर्थ्यात् श्रूयमाणनकारांतस्यैव संप्रसारणं न त्वत्रेत्याहुः। वार्तिककृता तु श्वादीनां संप्रसारणे नकारांतग्रहणमनकारांतप्रतिषेधा
र्थमुक्तं। नन्वेवमल्लोपो न इत्यल्लोपो दुर्वार इति चेन्नैवं। भाष्यकृता पूर्वोक्तवार्तिकमत्रानुवर्त्य अल्लोपो नः नकारांतस्यैवेति व्याख्यातत्वात्। एतच्च श्रूलकृ
इति सूत्रे भाष्ये स्पष्टं। एतेन बहुधीवरी राजकीयमित्यत्राप्यल्लोपाभावः सिद्धः। वनोर चेत्यादेशकृतेन कारांतत्वाभावात्। स्त्रियां मघवती। मघवत्यौ
मघवन्त्य [illegible] लिंगविशिष्टपरिभाषया उगिदचामिति नुम न शंक्यः। विभक्तौ लिंगविशिष्टाग्रहणमित्याहुः। न संप्रसारणे। द्वः संप्रसारणमित्यतः संप्र

श्वयुवमघोनामतद्धिते। ६।४।१३३। अन्नन्तानाम्भसंज्ञकानामेषामतद्धिते परे सम्प्रसारणं स्यात्। सम्प्रसारणाच्च। आद्गुणः। मघोनः। अन्न
न्तान्ङीप्। मघवन्तः। मघवन्तं। स्त्रियां मघवती। अतद्धिते किं। माघवनं। मघोना। मघवभ्यामित्यादि। शुनः। शुना। श्वभ्यामित्यादि। युवन्
शब्दे वस्योत्वे कृते। न सम्प्रसारणे सम्प्रसारणं। ६।१।३७। सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न स्यात्। इति यकारस्य नेत्वं। अत
एव ज्ञापकादन्त्यस्य यणः पूर्वं सम्प्रसारणं। यूनः। यूना। युवभ्यामित्यादि। अर्वा। हे अर्वन्। अर्वणस्त्रसावनञः। ६।४।१२७। नञा रहितस्या
र्वन्नन्तस्याङ्गस्य तृ इत्यन्तादेशः स्यान्न तु सौ। उगित्वान्नुम्। अर्वन्तौ। अर्वन्तः। अर्वन्तं। अर्वन्तौ। अर्वतः। अर्वता। अर्वद्भ्यामित्यादि। अनञः

सारणमित्यनुवर्तमानेपि पुनः संप्रसारणग्रहणात् प्रदेशांतरस्थं श्वयुवमघोनामित्यपि संप्रसारणं निषिध्यते। [illegible]। इति यकारस्य नेत्वमि ॥ किं अनर्वा यज्ववत्
ति। यून इति। ननु उकारेण व्यवधानात्कथमत्र निषेधः। त्रिव्याथविव्यथेत्यादावव्यवधानेपि निषेधस्य चरितार्थत्वात्। न च सवर्णदीर्घे कृते नास्ति व्यवधानमिति वा
च्यं। अचः परस्मिन्निति स्थानिवत्वात्। अत्राहुः। विदेशस्थ निषेधार्थात्पुनः संप्रसारणग्रहणादेव व्यवधानेप्यत्र निषेधो भविष्यतीत्यदोषः। न च व्यथो लिटी
ति विदेशस्थेन यकारस्य संप्रसारणे कृते नकारस्य तदभावाय न संप्रसारण इति। सूत्रं प्रवर्त्य पुनः संप्रसारणग्रहणं चरितार्थमिति व्यवधाने निषेधो न भविष्यतीति
वं केशा व्यथो लिटीत्येतद्धलादिशेषापवाद इत्याकरे स्पष्टत्वात्। [illegible]र्गसंदेशस्थापवाद इति परस्यैव संप्रसारणं भवति। न पूर्वस्येति कैयटेन व्याख्यातत्वाच्चेति। ॥

अर्वणस्त्र। अंगस्येति वर्ततेतच्चार्वणा विशेष्यते अनञ इत्यनेनापि तद्ग्रहात्। आरहितस्येत्यादि। असाविति पर्युदासे विभक्तौ परत एव स्यात्। ततश्चार्वन्तीत्यादौ न स्यादि
त्यर्थः। ए॰ना हा नतु साविति। न चैवमर्वाप्रियइत्यादावतिप्रसंगः। अंगानस्वनिमित्तस्य प्रत्ययस्य लोपाल्लुकालुप्तत्वेनात्र प्रत्ययलक्षणाभावात्। एतेन वा हेरलुप्यते स
हस्वदृगर्वगर्व— इति श्रीहर्षप्रयोगोव्याख्यातः। नन्वेवं प्रत्ययो निर्देशा देशइति सूत्रे धात्वंगकृत्तद्धिताव्ययसुप्तिङुपदादेशस्यानिवर्तस्युरितिप्राचोग्रंथमनूद्यतत्
किं परिगणनमुदाहरणमात्रं वेति विकल्प्यनान्त्यः। अव्ययस्यांगपदाभ्यां पृथग्ग्रहणवैयर्थ्यादिति मनोरमायां यदुक्तं तन्न कथं संगच्छेत। अव्ययस्योक्तरीत्या
नंगत्वात्। न च न लुमतेत्यनेनांगकार्यनिषेधेप्यंगसंज्ञाया अनिषेधान्नोक्तदोषइति वाच्यं। प्रत्ययेपरतः पूर्वस्य यत्कार्यं माम गमनांगं वा तत्सर्वं न लुमतेत्य
नेन निषिध्यते इति पञ्चेचिचेति सूत्रस्थमनोरमाग्रंथपर्यालोचनया लुमता शब्देन लुप्ते अंगसंज्ञापि मा भूदित्यस्य कार्यत्वात्। तस्या अपि प्रत्यये परतः पूर्वस्य
कार्यत्वात्। यदि लुकालुप्तेप्यंगत्वं स्वीक्रियते तदा अयं ग्रंथोपचिमं वृषण्वस्वश्वयोरित्यत्र वृषवर्षुकं घनं यस्य स वृषण्वसुः। वृषा अश्वो यस्य वृषणश्व इत्युदा
हृत्य भत्वादिह न लोपो न भवति अल्लोपस्तु अनंगत्वान्नेति मूले वैदिकप्रक्रियायां वक्ष्यमाणग्रंथेन सह विरुध्येत। न चाल्लोपो न इत्यत्रांगावयवोऽसर्वनामस्था
नयजादिस्वादिपरोयोऽनिति व्याख्यानात् अल्लोपस्य तत्र प्राप्त्यभावादनंगत्वादिति समाधानं व्यर्थमिति भ्रमितव्यं। भसंज्ञैव यजादिस्वादिपरोयोऽनिति व्याख्या
नवत् वं सश्वयोः परतो योऽनिति व्याख्याने स्वस्यापि लाभात्। तस्मात्पदात्पृथगित्येव वक्तव्ये अंगपदाभ्यामित्यंगग्रहणं भसकृतमेवेति चेत्। अत्राहुः। न लुमते
ति सूत्रे लुमता लुप्ते तन्निमित्तमंगस्यांगसंज्ञकस्य कार्यं न स्यादिति व्याख्यायते तदाऽर्वणस्त्रिस्यांगकार्यप्रवृत्तावप्यंगसंज्ञायानिर्वाधत्वादंगग्रहणं तत्रत्यंस
म्यगेवेत्यर्थलिंगमनांगं वेत्यादि मनोरमाग्रंथस्यानंगत्वादिति मूलग्रंथस्य चस्वारस्यपर्यालोचनयालाघवादव्ययस्यांगत्वे फलाभावाच्च प्रत्ययेपरतः पूर्वस्य का
र्यं निषिध्यत इति मनोरमाग्रंथश्च स्वरसतः संगच्छत इति। ननु कृधातोर्विचिगुणे च अरिति रूपं तस्मान्मतुपि अर्वन्निति वेत्यादि सेत्स्यति। क्वरसी वनिपाविति व
निपि वेदे अर्वशब्दः सेत्स्यति। कृधातोरेवस्मादिप्रघनीत्यादिना वनिपि तु लोकेप्यर्वेति सेत्स्यति। रूढिशब्दश्चायं। वाजिवाहार्वगंधर्वहयसैंधवसप्तय इत्यमरको
शात्तत्श्चार्थोपि नभिद्यते इति किमनेन सूत्रेणेति चेत्। अत्राहुः। नांतनांतयोः सर्वत्र प्रयोगे प्राप्ते सौ परे नञुपपदे च नांतस्य प्रयोगो न भवत्यन्यत्र तु नांतस्य प्रयोगो न भवति।
इतरत्व विशेषेण अङ्गसंज्ञया अपि निशेधादङ्गग्रहणं तत्र भस्मात्कृतमेव न च न लुमतेत्यनेन अङ्गसंज्ञानिषेधे पुर्वोरनाकाविति सूत्रस्थभाष्यकैयटाभ्यां विरोधः स्यादिति वाच्यमतयोस्तु

कः वृतिसूत्रे सुपथीतिभाष्याच्च नपूजनादिति निषेधस्यानुनायं दिषयः। सच सुप्रथीनेष्वेव स इति वक्ष्यमाणत्वात्। पथिमथीन्यात्वं योन्य सर्वलिंगविशिष्टपरिभाष
याप्राप्तं विभक्तौ लिंगविशिष्टाग्रहणान्न भवति। अत्रेदं बोध्यं। पंथानमातः नइच्छतिपथीयतिततः क्विप्। अल्लोपयलोपौ। एकदेशविकृतस्यानन्यत्वात्पथिम
थीत्यात्वं। न्थः। पंथाः। इतोत्सर्वनामस्थाने इत्यत्वं न भवति। इत इतितपरकरणात्। एरनेकाच इतियणं बाधित्वा परत्वान्नित्यत्वाच्च थोन्थः। संयोगपूर्वकत्वान्न
यणं। पथियौ। पथियः। पथियं। पथियौ। भस्य टेर्लोपः। पथः। पथा। पथीभ्यां। पथिभिरित्यादि। एवं मथीयतेः क्विपि मंथाः। मंथियौ। मंथियः। ऋभुक्षाः। ऋभुक्षियौ
ऋभुक्षियः इत्यादि। एतेन इतोत्सर्वनामस्थाने इत्यत्र स्थानिन्यादेशे च तपरकरणं सुखमुखार्थमिति हरदत्तः प्रत्युक्तः। आदेशे तपरकरणस्यानावश्यकत्वेपि स्थानि
नि तु पथियौ इत्यादिसिद्धये तस्यावश्यकत्वात्। ननु नलोपस्यासिद्धत्वात्पथिमथ्यृभुक्षामिति नस्यात्वे पथ्याः मंथ्याः ऋभुक्ष्याः इत्येव भवितव्यं। ननु पंथाः इत्यादि इति चे

त्सान्तावद्दाप्यःस्या षान्ता नान्ता च संख्या षट्संज्ञा स्यात्। षड्भ्यो लुक्। पञ्च। संख्या किं। विप्रुषः। पामानः। शतानि सहस्राणीत्यत्र संनिपा
तपरिभाषया न लुक्। सर्वनामस्थानसंनिपातेन कृतस्य नुमस्तद्विघातकत्वात्। पञ्चभिः। पञ्चभ्यः। षट्चतुर्भ्यश्चेति नुट्॥ नोपधायाः। ६।४।
७। नान्तस्योपधाया दीर्घः स्यान्नामि परे। नलोपः। पञ्चानां। पञ्चसु। परमपञ्च। परमपञ्चानां। गौणत्वे तु न लुक् नुटौ। प्रियपञ्चा। प्रियपञ्चानौ। प्रियपञ्चानः। प्रियप

तो। अत्राहुः। नलोपस्यांतर्वर्तीं सुब्वि मित्तं आलस्य तु बहिर्वर्तीं सुप्। प्रत्यासन्त्या हि यत्र एक एव सुप् निमित्तभूतः तत्रैव न १९ ष्वां। एवं समनन्तवन् दृशान्। ०॥
लोपः सुप्स्वरेति नलोपस्यासिद्धत्वे वा यत्रेति नात्र नकारस्यात्वं किं त्वीकारस्येति॥ ॥ ष्णांताषट्। स्त्रीलिंगानिर्देशः संख्यां विशेषयितुं तत्सामर्थ्याच्च पूर्वत्र संज्ञापर मपि संख्या
ग्रहणमिह संबध्यते। इत्याशयेनाह। संख्येति। प्राचा नूपदेशकाले षांतानांताचेत्युक्तं तत्पंचेत्यत्र नलोपे कृते पीत्यादि वक्ष्यमाणस्वग्रंथविरुद्धं। संप्रत्यनांतत्वेपि उपदेशेन
तत्वमासीदिति किंमसिद्धत्वे नेति दिक्। संनिपातेति। तथा उपदेशकाल इति व्याख्यानं निष्फलमपीति भावः। यत्त्वाहुः। परिभाषाया अनित्यत्वाल्लुक् स्यादिति। तत्सहस
मांत्रा इत्यस्यलेप्यप्रवृत्तौ परिभाषाया अकिंचित्करत्वापत्तेः। यदप्याहुः। उपदेशग्रहणमिह कृतः सुमागतमित्याशंक्य षांतेत्यंतग्रहणसामर्थ्यादौपदेशिकत्वं ल
भ्यत इति। तदपि न। संख्येत्यस्याकर्षणेन संज्ञिपरत्वसंपादनेन च सामर्थ्योपक्षयात्। नोपधायाः नेति लुप्तषष्ठीकमंगस्य विशेषणं। नलोपस्यासिद्धत्वान्नामीति दी

दिति वाधित्वा अल्लोपोऽनमित्यस्य प्रवृत्तेः। षट्त्रिचतुर्भ्यो हलादिविभक्तेरिति तेन परे उपोत्तममुदात्तत्वं स्यादिति तदर्थः। ननु प्रियाष्टः प्रियाष्टन्यादौ विभक्तेरुदात्त
त्वनिवारणाय दीर्घग्रहणमिहावश्यकमिति कथमस्यात्वविकल्पज्ञापकत्वमिति चेन्न। अत्राहुः। अष्टनो दीर्घादित्यत्रांतोदात्तादित्यनुवर्त्यांतोदात्तादष्टनः परेत्यादिव्या
ख्यानादष्टाभिरित्यादौ विभक्तेरुदात्तत्वं सिध्यति। घृतादित्वेनाष्टनोंतोदात्तत्वात्। प्रियाष्टन्त्यादिवहुव्रीहौ तु पूर्वपदप्रकृतिस्वराभ्युपगमेन अष्टनोंतोदात्तत्वाभा
वाद्विभक्त्युदात्तत्वं न प्रवर्तत इति दीर्घग्रहणं व्यर्थं सत् उक्तार्थज्ञापकमेवेति। अष्टानामिति। नुटः पश्चादेव संनिपातपरिभाषाया अनित्यत्वादात्वं न तु ततः प्रागिति
तु मनोरमायां स्थितं। अत्र नव्याः। संनिपातपरिभाषया आत्वाभावेऽप्यत्र न क्षतिः। नोपधाया इति दीर्घे नलोपे पंचानां सप्तानामितिवद्रूपसिद्धेः। न चाष्टनो दी
र्घादिति विभक्त्युदात्तत्वमात्वविधेः प्रयोजनमिति वाच्यं। षट्त्रिचतुर्भ्यो हलादिरित्यनेनैव तत्सिद्धेरिति। पूर्वस्मादपीति। न चात्र पूर्वत्रासिद्धीयेन स्थानिवदिति निषेधः
शंक्यः। तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति उक्तत्वादिति दिक्। प्राधान्य एवेति। औ श्वं हि लुग्नुदाविव प्राधान्य एव भवति। न तु गौणत्वे। अष्टाभ्य इति बहुवचन

ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च। ३।२।५९। एभ्यः क्विन् स्यात्। अलाक्षणिकमपि किंचित्कार्यं निपातनाल्लभ्यते। निरुपपदाद्युजेः क्वि
न् कनावितौ। कृदतिङ्। ३।१।९३। सन्निहिते धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञः स्यात्। वेरपृक्तस्य। ६।१।६७। अपृक्तस्य वस्य लोपः। ङृ

निर्देशात्। अन्यथा हि कृतात्वानुकरणेऽप्येकवचनेनैव निर्दिशेत्। अष्टा औ शिति अष्ट इति वा एतच्च ष्ठ्यांना ((स्यात्। कृत्तद्धितेति प्रातिपदिकत्वात् स्वाद
यडिति सूत्रे भाष्यकैयटयोः स्पष्टं। तथा चौ श्वविधौ कृतात्वनिर्देशबलेनानुमीयमानमात्वं प्राधान्य एवोचितमिति भावः। प्रियाष्टा इति प्रथमैकवचनं। उक्तार्थसं
गृह्णाति । प्रियाष्टो राजवदिति। नांताः। भुदिति। बुध्यतेः क्विप्। धांताः॥ ॐ॥ ऋत्विग्दधृक्। किंचिदिति। ऋतावुपपदे यजेः क्विन्। धृष्णोतेर्द्वित्वमंतोदात्तत्वं च।
सृजेः कर्मणि क्विन्। अमागमश्चादिशेः कर्मणि क्विन्। उत्पूर्वात् स्निहेः क्विन्। उपसर्गांतलोपः षत्वं च। अंचेः सुप्युपपदे क्विन् इत्यर्थः। निरुपपदाद्युजेरिति। क्रुंचेरा
स्यैवं नलोपाभावस्त्वधिकः। कनाविताविति। इकार उच्चारणार्थ इति भावः। संनिहित इति। प्राचा तु नतीये धात्वधिकार इत्युक्तं। तदसत्। धातोः कर्मण इति सा
न्विधौ धातुग्रहणस्यात्र तत्रानुवृत्तेरभावेनाधिकारत्वाभावात्॥ ॥

युजेरसमासे। उगिदचामित्यतः सर्वनामस्थान इत्यनुवर्तते। इदितो नुम् धातोरित्यतो नुम् चेत्याशयेनाह। सर्वनामस्थाने नुम् स्यादिति। क्विन्प्रत्ययस्य। क्विनः कुरित्युक्ते।
प्रत्ययग्रहणे तदन्तग्रहणात् क्विन्नन्तस्य सिद्धं प्रत्ययग्रहणं बहुव्रीहिविज्ञानार्थमित्याशयेन व्याचष्टे। क्विन् प्रत्ययो यस्मादिति। बहुव्रीह्याश्रयणफलं तु स्पृक् स्रगित्यादि स्फुटीभ
विष्यति। सुयुगिति। सुष्टु युनक्तीति विग्रहे सत्सूद्विषेति क्विप्। तेनेह नेति। नुमित्यर्थः। क्विन्प्रत्ययस्तु स्यादेव ऋत्विगित्यादिसूत्रे युजीति इकानिर्देशात्। खन्निति। खं

युजेरसमासे। ७।१।७१। युजेः सर्वनामस्थाने नुम् स्यादसमासे। सुलोपः। संयोगान्तस्य लोपः। क्विन्प्रत्ययस्य कुः। ८।२।६२। क्विन्प्रत्ययो यस्मात्तस्य कवर्गो
ऽन्तादेशः स्यात्पदान्ते। नस्य कुत्वेनानुनासिको ङकारः। युङ्। नश्चापदान्तस्येति नुमोऽनुस्वारः परसवर्णः। तस्याऽसिद्धत्वाच्चोःकुरिति कुत्वं न। युञ्जौ।
युञ्जः। युञ्जम्। युञ्जौ। युजः। युजा। इत्यादि। असमासे किम्। चोः कुः। ८।२।३०। चवर्गस्य कवर्गः स्याज्झलि पदान्ते च। इति कुत्वं। क्विन्प्रत्ययस्येति कुत्वस्याऽ
सिद्धत्वात्। सुयुक्। सुयुग्। सुयुजौ। सुयुजः। युजिरिति धातुपाठपठितेकारविशिष्टस्याऽनुकरणं न तु इकानिर्देशः। तेनेह न युज्यते समाधत्त इति युक्।
युज समाधौ दैवादिक आत्मनेपदी। संयोगान्तलोपः। खन्। खञ्जौ। खञ्जः। इत्यादि। व्रश्चेति षत्वं। जश्त्वचर्त्वे। राट्। राड्। राजौ। राजः। राट्सु। राट्त्सु। ए
वम् विभ्राट्। देवेट्। देवेजौ। विश्वसृट्। इह यजिसृज्योः कुत्वं नेति क्वौ विवक्ष्यते। परिमृट्। षत्वविधौ राजिसाहचर्यात् टुभ्राजृ दीप्ताविति फणादे
र्गृह्यते। यस्तु एजृ भ्राजृ दीप्ताविति तस्य कुत्वमेव। विभ्राक्। विभ्राग्भ्यामित्यादि। परौ व्रजेः षः पदान्ते॥ परावुपपदे व्रजेः क्विप् स्याद्दीर्घश्च पदान्ते वि
षयेऽत्वम्। परित्यज्य सर्वं व्रजतीति परिव्राट्। परिव्राजौ। परिव्राजः॥ ॥ २२

जतीति खन्। खजि गतिवैकल्ये। एवं विभ्राडिति। फणादित्वं
विशेषेण भ्राजते। इति विभ्राट्। देवान् यजतीति देवेट्। क्विपि यजादित्वात्संप्रसारणे। आद्गुणः। विश्वं सृजतीति विश्वसृट्। क्विवन्तः। क्विन् प्रत्ययो यस्मादिति बहुव्रीह्याश्र
यणात्। कुत्वं कस्मान्न भवतीत्याशंक्याह नेति क्वौ विवक्ष्यत इति। रज्जुसृड्भ्यामिति भाष्यकारप्रयोगात्। यद्वा व्रश्चादिसूत्रे सजियज्योः पदान्ते षत्वं कुत्वापवाद इति तस्य
नरस्यर्थः। परिमार्ष्टीति परिमृट्। परौ व्रजेः। क्विब्वचिप्रच्छिश्रीस्रुद्रुप्रुज्वां दीर्घोऽसंप्रसारणं चेत्यौणादिका। पूर्वसूत्रादिह क्विप् दीर्घश्चानुवर्तेते। तदाह। क्विप् स्याद्दीर्घश्चेति।

विश्वस्य वसु। दृढ़त्वो वरत्वनो नुवर्तनादाह। विश्वशब्दस्य दीर्घः स्यादिति। स्कोः पदस्येत्यनुवर्तते झलो झलीत्यतो झलीति वा। संयोगेति लुप्तषष्ठीकं झलं ताभ्यां विशेष्यते तत्
देतदाह। पदांते झलि च परे इति। झलि किं। भ्रष्टा। भृज्जतीति भृट्। क्विप्। ग्रहिज्येति संप्रसारणं। व्रश्चेति षत्वं। ऊर्गिति। ऊर्ज बलप्राणनयोः। अस्माच्चुरादिण्यन्तात्
जभासेत्यादिना क्विप् णिलोपः सचचोः कुत्वेनस्यानिवत्वात्पदांतविधित्वान्न पूर्वत्रासिद्धत्वाच्च। इह जांतेषु अवयाः। अवयाजौ। अवयाजः इति। नोदात्तता। मंत्रे श्वेत
वहोक्थेति मनकृत्य अवेयज इति विहितस्य ण्विनस्तदपवादस्य पदांतेऽउस श्छं दस त्वेन वैदिकप्रक्रियायामेव वक्तुमुचितत्वात्। तदोः सः सावनन्त्ययोः। त्यदादी
नामः इत्यतोऽनुवर्तनादाह त्यदादीनामिति त्यदादीनामिति किं आतपः तारकः। तदोरिति किं। यः अनंत्ययोः किं। हेस ॥ अत्र परत्वात्त्यदाद्यत्वं बाधित्वा दस्य सकारे सस इति

विश्वस्य वसुराटोः। ६।३।१२८। विश्वशब्दस्य दीर्घस्याद्वसौ राट्शब्दे च परे। विश्वं वसु यस्य विश्वावसुः। राड़िति पदान्तोपलक्षणार्थं। चर्त्वम
विवक्षितम्। विश्वाराट्। विश्वराजौ। विश्वराजः। विश्वाराड्भ्यामित्यादि॥ स्कोः संयोगाद्योरन्ते च। ८।२।२९। पदान्ते झलि च परे यः संयोगस्तदाद्योः स
कारककारयोर्लोपः स्यात्। भृट्। भृड्। सस्य श्चुत्वेन शः। तस्य जश्त्वेन जः। भृज्जौ। भृज्जः। ऋत्विगित्यादिना ऋतावुपपदे यजेः क्विन्। क्विन्नन्तत्वात्कु
त्वम्। ऋत्विक्। ऋत्विग्। ऋत्विजौ। ऋत्विजः। रात्सस्येति नियमान्न संयोगान्तस्य लोपः। चोः कुः। ऊर्क्। ऊर्ग्। ऊर्जौ। ऊर्जः। त्यदाद्यत्वं पररूपत्वं। तदोः सः
सावनन्त्ययोः। ७।२।१०६। त्यदादीनां तकारदकारयोरनन्त्ययोः सः स्यात्सौ। स्यः। त्यौ। त्ये। त्वं। त्यौ। त्यान्। सः। तौ। ते। परमसः। परमतौ। परमते॥
द्विपर्य्यन्तानामित्येवानेहा। त्वं। न च तकारोच्चारणसामर्थ्यान्नेति वाच्यं। अतित्वमिति गौणे चरितार्थत्वात्। संज्ञायां गौणत्वे चात्यसत्वेनात्यदान्त्यदौ
त्यदः। अतित्यदः। अतित्यदौ। अतित्यदः। यः। यौ। ये। एषः। एतौ। एते। अन्वादेशे तु एनं। एनौ। एनान्। एनेन। एनयोः २।

सगौ स्यातां। तथा च हेसः। इति रूपं स्यात्। किं च स्त्रियां सेति रूपं न स्यात्। यदा तु अंत्यस्य सकारे जातेपि पुनः प्रसंगविज्ञानात्त्यदाद्यत्वं सकारस्य स्वीक्रियते तदा न किं
चिदनिष्टमित्यनंत्ययोरिति त्यक्तुं शक्यं। यदि तु तदोः सः सावित्यस्यानंतरं अदस औसुलोपश्चेत्यत्र दस इति योगं विभज्य। दस एव दकारस्य सत्वं नान्यस्य दस्ये
ति नियमः क्रियते तदा सकृद्गतौ विप्रतिषेधेन यद्बाधितं तद्बाधितमेवेति न्यायेनाप्यनंत्ययोरिति त्यक्तुं शक्यं। न चैवं हे। बात्मन इच्छति ह्यीयति ततः क्विपि स्व इति रूपं न स्यात्। किं तु द इति रूपं स्यादिति फले

१ हलङ्यादिना सुलोपे रुत्ववि

शस्तथापि अस्मदो अहादेशार्थमिदं किं च त्वमावितिसूत्रेण युवां युष्मान् वाऽतिक्रांतोऽतित्वमिति न सिध्यति। एकार्थवाचित्वाभावात् युष्म इति भावः। युष्मदस्मदोरिति। एत
च युष्मदस्मदोरनादेश इत्यतो लभ्यते। शेषे। उक्तादन्यः शेषः आत्वयत्वं च प्रागुक्तं तद्विषयादन्यविभक्तिरिह शेषशब्दार्थस्तदेतद्व्याचष्टे। आत्वयत्वनिमित्तेतरेति। अंत्यस्येति॥ अ
लोंऽत्यपरिभाषयेति भावः। अतो गुण इति। नन्वाम्सुत्वाहौसावित्यत्र त्वाहादेशयोरंत्याकार उच्चारणार्थ एवास्तु किमनेन पररूपकरणप्रयासेनेत्याहुः। त्वं अहमिति। ननु युष्मान
तिक्रांतः अतित्वमित्यादौ त्वाहौ सावित्यस्यावकाशोऽस्ति त्वामतिक्रांते नातित्वयेत्यादौ त्वमावेकवचने इत्यस्यावकाशः। त्वमहमित्यत्र तूभयोः प्रसंगे त्वमावेकवचन इत्यनेन प
रत्वाद्भाव्यं। नैष दोषः। त्वमावपि प्रबाधेते पूर्वविप्रतिषेधतः इति वक्ष्यमाणत्वात्। अधिकरणत्वविवक्षयेति। यदि तु शेष इति विभक्तिविशेषणं स्यात्तर्हि व्यर्थमेतत्। आत्व

युवावौ द्विवचने ७।२।९२। द्वयोरुक्तौ युष्मदस्मदोर्मपर्यन्तस्य युवावौ स्तो विभक्तौ। प्रथमायाश्च द्विवचने भाषायां। ७।२।८८। इह युष्मदस्मदोराकारोऽन्ता
देशः स्यात्। औङ्येवमुवचां भाषायां किं। युवम्वस्त्राणि। युवां। आवां। मपर्य्यन्तस्य किं। साकच्कस्य मा भूत्। युवकां। आवकां। त्वयामयेत्यत्र चान्त्यस्य
ति माभूत्। युवकाभ्यामावकाभ्यामिति च न सिध्येत्। यूयवयौ जसि। ७।२।९३। स्पष्टं। यूयं। वयं। परमयूयं। परमवयं। अतियूयं। अतिवयं। इह शेषे लोपोऽ।
न्त्यलोप इति पक्षे जसः शी प्राप्तः। अङ्गकार्ये कृते पुनर्नाङ्गकार्यमिति न भवति। ङे प्रथमयोरित्यत्रेमकारान्तरं प्रश्लिष्य अमुमान्त एवावशिष्यते। न

यत्वाभ्यां विशेषविहिताभ्यां स्वविषये लोपस्य बाधसंभवात्। न चैवमंत्यलोप इति पक्षस्य निरालंबनतापत्त्या युष्मदस्मदोरंत्यलो ऽनुविक्रियत इति व्याख्यानाद्वा
पः स्यादिति यंथोः युक्त इति वाच्यं। साम आकमिति ससुट्कनिर्देशेन तस्यापि पक्षस्य ज्ञापितत्वादिति भावः। अतो गुणे कृते प्रवर्त्तेत इति। वार्णादांगं बलीय इति तु स
मानाश्रये एव भवति। न तु व्याश्रये इह तु शेषे लोपस्य विभक्तिनिमित्तं पररूपस्य त्वकार इति व्याश्रयत्वमिति भावः। समानाश्रये उदाहरणं तु कारक इत्यादि बोध्यं
तत्र हि यण्वृद्ध्योः प्राप्तयोः वृद्धिरेव भवति। आंगत्वान्नदंतविधिरित्याह परमत्वमित्यादि॥ ॐ॥ युवावौ द्विवचने। उक्तिर्वचनं द्वयोर्वचनं द्विवचनं तदेतदाह
द्वयोरुक्ताविति। न चात्र कृत्रिमन्यायविरोधः शंक्यः वचनग्रहणसामर्थ्यादेव तद्बाधात्। अन्यथा द्वित्व इत्येव ब्रूयात्। अष्टन आ विभक्तावित्यतो विभक्तावित्य
धिकारात् द्वित्वया विभक्तिस्तस्यां परत इति व्याख्यानसंभवात्। युवं वस्त्राणीति। शेषे लोपः। मपर्यंतस्य किमिति अधिकारसूत्रं किमर्थमिति प्रश्नः। युवकां आव

युष्मदस्मदोरनादेशे। अनादेशे किं। युष्मभ्यं। नचाभ्यम् पक्षे आदेशे हलादिर्नित्यनादेशग्रहणं त्यक्तुं शक्यमिति वाच्यं। योचीत्यत्रानुवृत्त्यर्थं तस्यावश्यकत्वात्। हला
दौ परइति। योचीत्यजग्रहणात्परिशेषसिद्धमिदं। रायो हलीत्यतोनुवृत्त्यालब्धं वा पक्षद्वयेपि साधुरिति। नन्वेवं तलोपपक्षे पररूपं बाधित्वा सवर्णदीर्घः स्यादकारोच्चा

युष्मदस्मदोरनादेशे।७।२।८६। अनयोराकारस्स्यादनादेशे हलादौ विभक्तौ। युवाभ्यां। आवाभ्यां। युष्माभिः। अस्माभिः। तुभ्यमह्यौ ङयि।७।२।९५। अन
योर्मपर्य्यन्तस्य तुभ्यमह्यौ स्तो ङयि। अमादेशः। शेषेलोपः। तुभ्यं। मह्यं। परमतुभ्यं। परममह्यं। अतितुभ्यं। अतिमह्यं। युवाभ्यां। आवाभ्यां। भ्यसोभ्यम्
।७।१।३०। भ्यसोभ्यम् अभ्यम् वा आदेशस्स्यात्। आद्ये शेषे लोपस्यान्त्यलोप एवात्रात् इति वृत्तपरिभाषया एत्वन्न। अभ्यम् तु पक्षद्वयेपि साधुः। युष्मभ्यं
अस्मभ्यं। एकवचनस्य च।७।१।३२। आभ्यां पञ्चम्येकवचनस्य अत्स्यात्। त्वत्। मत्। ङसेश्चेति सुवचं। युवाभ्यां। आवाभ्यां। पञ्चम्या अत्।७।१।३१। आ
भ्यां पञ्चम्या भ्यसोत्स्यात्। युष्मत्। अस्मत्। तवममौ ङसि।७।२।९६। अनयोर्मपर्य्यन्तस्य तवममौ स्तो ङसि। युष्मदस्मद्भ्यां ङसोश्।७।१।२७। तवमम
युवयोः। आवयोः। साम आकम्।७।१।३३। आभ्याम्परस्य साम आकम् स्यात्। भाविनस्सुटो निवृत्त्यर्थं ससुट्कनिर्देशः। युष्माकं। अस्माकं। त्वयि। मयि
युवयोः। आवयोः। युष्मासु। अस्मासु। समस्यमाने द्व्येकत्ववाचिनी युष्मदस्मदी। समासार्थोन्यसंख्यश्चेत्तौ युवावौ त्वमावपि।१। सुजसङेङस्सुप
रतः आदेशास्स्युस्सदैव ते। त्वाहौ यूयवयौ तुभ्यमह्यौ तवममावपि।२। एते परत्वाद्बाधन्ते युवावौ विषये स्वके। त्वमावपि प्रबाधन्ते पूर्वविप्रतिषेधतः।३।
द्व्येकसंख्यस्समासार्थो बह्वर्थे युष्मदस्मदी। तयोरद्व्येकतार्थत्वान्न युवावौ त्वमौ न च।४। त्वां मां वा अतिक्रान्त इति विग्रहे। अतित्वं। अत्यहं। अतित्वां। अ
तिमां। अतियूयं। अतिवयं। अतित्वां।२। अतिमां।२। अतित्वान्। अतिमान्। अतित्वया। अतिमया। अतित्वाभ्यां।३। अतिमाभ्यां।३। अतित्वाभिः। अतिमाभिः
अतितुभ्यं। अतिमह्यं। अतित्वाभ्यां। अतिमाभ्यां। अतित्वभ्यं। अतिमभ्यं। ङसिभ्यसोः। अतित्वत्।२। अतिमत्।२। भ्यामिभ्याम्वत्। अतितव। अतिमम। अतित्वयोः
अतिमयोः। अतित्वाकं। अतिमाकं। अतित्वयि। अतिमयि। अतित्वयोः। अतिमयोः। अतित्वासु। अतिमासु। युवां आवां वा अतिक्रान्त इति विग्रहे ॥

रणसामर्थ्याद्स्तिति चेत्। अत्राहुः। बहुवचने हल्यपदित्येत्वनिवृत्त्यः कारोच्चारणस्य चरितार्थत्वादिति। यद्यप्यंग वृत्तपरिभाषया एत्वं सुपरिहरं तथापि तस्यानित्यत्वे इदम

प्यकारोच्चारणं ज्ञापकमिति तत्वं। युष्मदस्मद्भ्यां ङसोऽश्। शित्वं सर्वादेशार्थं। अन्यथा त्यादेः परस्येति स्यात्। न चाकारस्य अकारविधाने वैयर्थ्यं आदेशव्यपदेशेन यत्व
निवृत्त्यर्थत्वात्। न चैवं यत्र त्यादेशे सत्यपि विभक्तेरनादेशता स्यैवेति वाच्यं। सर्वे सर्वपदादेशा इति सिद्धांतात्। इदमेव शित्वं ज्ञापयति सर्वे सर्वपदादेशा इति। अर्थ
वंत्यवस्थोऽर्थादेशभावविश्रांतिरित्यर्थः। सिद्धडादयस्तु वचनसामर्थ्यादनर्थकस्यापि भवंतीति मनोरमायां स्थितं। तवममेति। ननु अत्रांत्यलोपपक्षे अशः स्यादि
शः स्यात् त्यत्वनिवृत्त्यर्थतया अशवचनस्य चरितार्थत्वात्। न च स्यादेशस्यापवादोऽशिति वाच्यं। अशादेशप्रवृत्तिकाले शेषेलोपाभावेन स्यादेशस्याप्रवृत्तेः। अ
त्राहुः। अंगवृत्तपरिभाषया स्यादेशो वारणीयः। यदि तु अंगस्य यत्कार्यं तद्विषयिण्येव सा परिभाषा न त्वंगाधिकारपरेति दुराग्रहस्तर्हि शित्यत्रातो गुण इति पर
रूपेण अकारं तरं भक्षिष्य अकाररूपेणाव भवति न तु विक्रियत इति व्याख्येयमिति। नन्वाकमादेशात्पूर्वमनादेशत्वाद्योचीति यत्वेन भाव्यं ततश्च शेषे लोपाभा
वाद्वर्णे नादिति विधीयमानस्य सुडागमस्याप्रसक्त्या साम इति समुट्क निर्देशो व्यर्थ इत्यत आह। भाविन इति। कृते हि शेषे लोपे अकारांतत्वात् प्राप्तः सुट् समुट्
कस्य स्यानित्वेन निर्देशसामर्थ्यान्निवर्तत इति भावः। शेषे लोपः टिलोप इति पक्षे तु सुड्ग्रहणं व्यर्थमेव। आकमिति दीर्घोच्चारणं सवर्णदीर्घार्थं अन्यथा पररूपं
स्यात्। न चाकारोच्चारणसामर्थ्यं एत्वनिरासायैवं चरितार्थत्वात्। इह युवावौ द्विवचने त्वमावेकवचने इति सूत्रद्वयेपि द्विवचनैकवचनशब्दावर्थपरौ न
तु प्रत्ययपरावित्याख्यातं। तत्फलं दर्शयति। समस्यमान इत्यादिना। द्व्येकत्ववाचिनी इति। पंचकं प्रातिपदिकार्थ इति पक्षाभिप्रायेणेदमुक्तं। अस्मिंस्तु पक्षे सं
ख्याया अपि प्रातिपदिकार्थत्वात्। त्रिकपक्षे तु द्व्येकार्थवाचिनी इति पाठ्यं। संख्याया विभक्त्यर्थत्वेपि संख्येयस्य प्रातिपदिकार्थत्वानपायात्। अन्यसंख्यश्चेदिति
युष्मदस्मदर्थगतसंख्यातः संख्यायुक्तश्चेदित्यर्थः। त्वदिति। अर्थपरत्वाश्रयणसामर्थ्यादेवभूतगतेरपि स्वीकाराद्युवावौ त्वमावपि स्तः। प्रत्ययपरत्वे तु न स्या
तामिति व्याप्तिः स्यादिति भावः। एवं चतुर्थश्लोकेपि युवावौ त्वमौ न चेत्युक्त्या प्रत्ययपरत्वेऽतिव्याप्तिर्ध्वनिता। एवं चाव्याप्त्यतिव्याप्तिपरिहारायार्थपरत्वमा
श्रितमिति फलितं। नन्वेवं सुजसङेङस्स्वपि युष्मदस्मदोर्द्व्यर्थत्वे युवावौ स्यातामेकार्थत्वे तु त्वमावित्याशंकायामाह॥ ॥ ॥

सु॰
सि॰कौ॰
टी॰त॰
८२

सुजसङेङसुपरत इति। केते आदेशा इत्यत आह। त्वाहौ यूयवयावित्यादि। अस्त्वेवं त्वाहादिभिर्युवावयोर्बाधस्त्वमौ तु तेभ्यः परौ कथं तैर्बाध्येतामित्यत आह॥ त्व
मावपीति विप्रतिषेधे परमित्यत्र पर शब्दस्येष्टवाचित्वादिति भावः। अतित्वा मिति त्वां मां वा अतिक्रान्ताविति विग्रहः। अतियूयं। अतिवयमिति। त्वां मां वा अति
क्रान्ता इति विग्रहः। एवमग्रेप्यूह्यं। अतित्वाकमतिमाकमिति। अत्रान्त्यलोपपक्षे अंगवृत्तपरिभाषयानुडागमो निवार्यः। ह्रस्वनद्यापइत्यत्र ह्रस्वान्ताद्धि हितस्यामो
नुडिति व्याख्यानाद्वा। नन्वेवं भिन्नविषयतया सुटो नुडपवादत्वाभावेनावर्णान्तसर्वनामभ्यो विहितस्यामो नुडेव परत्वात्स्यात् न तु सुडागमस्तस्यैषां केषा
मित्यादौ सावकाशत्वादिति चेत्। अत्राहुः। त्यदादेशमिसुडिति वक्तव्ये आमिसर्वनाम्नः इति सर्वनामग्रहणसामर्थ्याद्धलि सर्वेषामित्यादिनिर्देशाच्च अवर्णान्तस

सुजसङेङस्सु प्राग्वत्। औअम् औट्सु अतियुवां २ अत्यावां २ अतियुवान्। अत्यावान्। अतियुवया। अत्यावया। अतियुवाभ्यां। अत्यावाभ्यां
३ अतियुवाभिः। अत्यावाभिः। भ्यसि अतियुवभ्यं। अत्यावभ्यं। ङसिभ्यसोः। अतियुवत्२। अत्यावत्२। ओसि। अतियुवयोः। अत्यावयोः २। अ
तियुवाकं। अत्यावाकं। अतियुवयि। अत्यावयि। अतियुवासु। अत्यावासु। युष्मानस्मान्वाऽतिक्रान्त इति विग्रहे। सुजसङेङस्सु प्राग्वत्। औ
अमौट्सु। अतियुष्मां ३। अत्यस्मां ३। अतियुष्मान्। अत्यस्मान्। अतियुष्मया। अत्यस्मया। अतियुष्माभ्यां ३। अत्यस्माभ्यां ३। अतियुष्माभिः। अ
त्यस्माभिः। भ्यसि। अतियुष्मभ्यं। अत्यस्मभ्यं। ङसिभ्यसोः। अतियुष्मत्। अत्यस्मत्। ओसि। अतियुष्मयोः २। अत्यस्मयोः २। अतियुष्माकं। अत्यस्माकं
अतियुष्मयि। अत्यस्मयि। अतियुष्मासु। अत्यस्मासु॥ ॥

र्वनामभ्योप्या मः सुडेव भवति न तु नुट्। शास्त्रभृतिष्विति च विषयसप्तमी तेन प्र
दादिष्वप्याम्नि नुडिति। एवं च सामइति ससुट्कनिर्देशेन युष्माकमस्माकमित्यत्र सुडागमाभावेपि नुडागमो दुर्वार इत्याशंकाया अपि निरवकाश एवेति बोध्यं। य
त्तु वदंति। सामआकमित्यत्र यद्यपि सुट्ग्रहणं न स्थानिविशेषणं बाधात्। तथापि उपलक्षणं तु भवति। तेन यस्यामः सुडग्रे भावी तस्यैवामः आकमा भवित
व्यं न चैतद्द्वैणत्वे संभवतीत्याकन्न प्रवर्तते। तथाच अतित्वया अतिमयामित्येवरूपं न त्वतित्वाकमतिमाकमिति। तदसत्। आकमापत्तस्यामः सुडन्वयाभा
वात्। आकमः सुडभावी चेत्तर्हि तमेवोपलक्षयेत्। आदेशा द्वारकेणपरंपरासंबंधेन स्थानिनमुपलक्षयति चेदेवं तर्हि युष्माकमित्यादौ सुट् श्रूयेत सामइति।

८२

निर्देशसामर्थ्यान्नश्रूयतेतिचेन्न।निर्देशस्यगौणमुख्याचरितार्थत्वेनसामर्थ्याभावादित्यन्यत्रविस्तरः।गुणीभूतयोर्युष्मदस्मदोरेकार्थत्वेउदाहरणमुक्त्वासंप्रतिद्व्यर्थवाचि
त्वेउदाहरति।युवामावांवा।अतिक्रांतइत्यादिना।बह्वर्थयोस्तुउदाहरति।युष्मानस्मांश्चेति॥ ॥पदस्य।अपदांतस्यमूर्द्धन्यइतिविरोधनिर्देशात्प्राक्पदस्येत्ययमधिकारस्ते
तेनराजाराजभ्यामित्यादौनलोपःप्रातिपदिकांतस्येतिनलोपःसिध्यति।ननुराजाराजानौराजानइत्यत्रापितथा।गोमान्यवमानित्यादौसंयोगांतलोपेननुगोमंतौयवमंतावित्यादौ
तथामोनोधातोरितिनत्वप्रशान्भ्यामित्यादौभवतिनतुप्रशामौप्रशामइत्यत्र।तथाहरिंवंदेइत्यादौमोनुस्वारःप्रवर्तते।ननुगम्यतइत्यादौनचउञिचपदेइत्यतःपदेइत्यधि
कारात्पदपरतोमस्यानुस्वारःस्यात्ननुगम्यतइत्यत्रेतिकिमिहपदस्येत्यधिकारेणेतिवाच्यं।पुंस्वितिरूपासिद्धिप्रसंगात्।तस्मान्मोनुस्वारइत्यत्रपदस्येत्यनुवर्तनीयमेव
पदेइत्यस्योत्तरसूत्रेष्वुपयोगोनास्तीत्युञिचपदेइत्यत्राप्येवं।चामइहपदस्येतिसंबंधसामान्येषष्ठीसानूत्तरेषूपयोगसंबंधविशेषेअवतिष्ठते।क्वचित्स्थानेषष्ठीक्वचित्

पदस्य।८।१।१६॥पदात्।८।१।१७॥अनुदात्तंसर्वमपादादौ।८।१।१८॥इत्यधिकृत्य।युष्मदस्मदोःषष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ।८।१।२०॥
पदात्परयोरपादादौस्थितयोरनयोःषष्ठ्यादिविशिष्टयोर्वान्नावित्यादेशौस्तस्तौचानुदात्तौ।बहुवचनस्यवस्नसौ।८।१।२१॥उक्तविधयोरनयोःष
ष्ठ्यादिबहुवचनान्तयोर्वस्नसौस्तः।वान्नावोरपवादः।तेमयावेकवचनस्य।८।१।२२॥उक्तविधयोरनयोःषष्ठीचतुर्थ्येकवचनान्तयोस्तेमेएतौस्तः।त्वा
मौद्वितीयायाः।८।१।२३॥द्वितीयैकवचनान्तयोस्त्वामाएतौस्तः॥ ॥

११ अवयवषष्ठीति।तत्रसंयोगांतस्यलोपः।मोनोधातोः।मोनुस्वारः।इत्यादौपदस्ये
तिस्थानषष्ठी अवयवषष्ठ्यांमूलातिप्रसंगात्।नाभादुपधायाइत्यादौत्ववयवषष्ठी।अन्यथाहस्ववानित्यत्रैवमनुपोमस्यवत्वंस्यान्नतुहस्ववंतौहस्ववंतइत्यत्र।एतच्चानुपदमे
वोपपादयिष्यते।यद्यपिषष्ठीस्थानेयोगेतिपरिभाषयापदस्येत्यत्रस्थानषष्ठ्येवलभ्यतेनत्ववयवषष्ठी।तथापिनलोपसूत्रेअंतस्येतिग्रहणात्ज्ञापकादवयवषष्ठ्यपिलभ्य
ते।यदिपदस्येतिस्थानषष्ठ्येवस्यात्तर्हि नांतस्यपदस्यलोपोभवन्नलोंत्यस्यस्यादिति अंतग्रहणमनर्थकंस्यात्।अवयवषष्ठ्यंगीकारेतुअंतस्येतिग्रहणंसार्थकं।तथाहि
नलोपसूत्रेप्रातिपदिकांतस्येत्यसमासनिर्देशः।प्रातिपदिकसंज्ञकस्यपदस्यअंतोवयवोयोनकारस्तस्यलोपइतिसूत्रार्थइति।नन्वेवमंतस्येतिग्रहणमवयवषष्ठीत्वज्ञा
पनार्थमितिस्वीकारात्पदस्येत्यत्रकथंनामस्थानषष्ठीलाभःसंबंधविशेषस्यनिर्द्धारितत्वेनस्थानषष्ठीपरिभाषायाअनुपस्थितेः।अत्राहुः।प्रयोगमूलत्वाद्व्याकरणस्य

तेर्लम्याऽनुरोधेन स्थानषष्ठ्यपि स्वीक्रियते ज्ञापकसिद्धा अवयवषष्ठी तु न सर्वत्र स्वीक्रियते इति न लोपसूत्रे मनोरमायामंतग्रहणं त्यक्तुं शक्यमित्युक्तं। भाष्ये दाऽनुपदस्य न्यधिकृतस्यावयवषष्ठ्यंतत्वमप्यभ्युपगम्यते न तु स्थानषष्ठ्यंतत्वमेवेति ज्ञापनार्थमंतग्रहणं तेन वृक्षवं तौ वृक्षवेत इत्यत्र मादुपधायाः इति वत्वं सिध्यति। पदावयवस्य मतुप सत्वात्। अन्यथा पदस्येत्यविशेष्यत्वे मतुपात्तदंतविधौ मत्वंतं यत्पदं तदवयवस्य मतुपो मादुपधायाः परस्य मस्य वत्वं भवतीत्यर्थः स्यात्॥ तथा च। वृक्षवानित्यत्रैव स्यात् न तु वृक्षवंतौ वृक्षवंत इत्यत्रेति स्थितं। पदात्। कुत्सने च सुप्यगोत्रादाविस्यतः प्रागयमधिकारः। यदि तु कुत्सने च सुपीत्यत्रापि पदादित्यनुवर्तेत नदा

श्रीशस्त्वाऽवतु मापीह दत्तात्ते मेपि शर्म सः। स्वामी ते मेपि स हरिः पातु वामपि नौ विभुः॥ १॥ सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः। सोऽव्याद्वो नः शिवं वो नो दद्यात्सेव्योऽत्र वः स नः २ पदात्परयोः किं। वाक्यादौ मा भूत्। त्वम्पातु माम्पातु। अपादादौ किं। वेदैरशेषैः संवेद्योऽस्मान् कृष्णः सर्वदाऽवतु। स्थग्रहणं श्रूयमाणविभक्तिकयोरेव। नेह। इति युष्मत्पुत्रो ब्रवीति। इत्यस्मत्पुत्रो ब्रवीति। समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः। एकतिङ् वाक्यं तेनेह न। ओदनं पच तव भविष्यति। इह तु स्यादेव। शालीनां ते ओदनं दास्यामीति। एते वांनावादय आदेशा अनन्वादेशे वा वक्तव्याः। अन्वादेशे तु नित्यं स्युः। धाता ते भक्तोऽस्ति। धाता तव भक्तोऽस्तीति वा। तस्मै ते नम इत्येव। न चवाहाहैवयुक्ते। ८।१।२४॥ चादिपञ्चकयोगे नैते आदेशाः स्युः। हरिस्त्वां मां च रक्षतु। कथं त्वां मां वा न रक्षेदित्यादि। युक्तग्रहणात्साक्षाद्योगे ऽयं निषेधः। परम्परासम्बन्धे तु। आदेशः स्यादेव। हरो हरिश्च मे

देवः। तः पचति पूतीत्यत्रैव निघातः स्यान्न तु पचति पूतीत्यत्र। अनुदात्तं सर्वमपादादौ। इदं पदत्रयमापादपरिसमाप्तेरधिक्रियते। षष्ठी चतुर्थीति। अल्पाच्तरमिति षष्ठीत्यस्य पूर्वनिपातः। षष्ठ्यादिविशिष्टयोरिति। ननु युष्मदस्मदोरित्युक्तत्वात्तयोरेव वांनावादय आदेशाः स्युः। न च पदस्येत्यधिकाराद्विभक्त्यंतस्यैव पदत्वात्षष्ठ्यादिविशिष्टयोरेव स्युरिति वाच्यं। उक्तरीत्या वसन्सादौ दोषाभावेपि भ्यामादौ परतो युष्मदस्मदोः पदत्वात्केवलयोर्वांनावादेशप्रसंगस्य दुर्वारत्वात्। तथा च सुखं वां नौ ददात्वीश इति प्रयोगो न संगच्छेत्। नापि द्वितीयास्थयोरिति स्थग्रहणसामर्थ्याद्विभक्तिविशिष्टयोरेव आदेशा भवेयुरिति वाच्यं। स्थग्रहणं श्रूयमाणविभक्तिकयोरेवेति वक्ष्यमाणतया तत्सामर्थ्यस्योपक्षयात्। मैवं। अनुदात्तं सर्वमिति सर्वग्रहणमधिकारात् सर्वस्यैव विभक्तिविशिष्टस्य आदेशा भवंतीति आकरे स्पष्टत्वात्। यदि तु सर्वस्य द्वे इत्यतः सर्वस्येति पदमनुवर्तेत तदा सर्वग्रहणमिह त्यक्तुं शक्यमित्याहुः। उक्ता नादेशान्वचनक्रमेणोदाहरति॥ ∴ ॥ श्रीश इत्यादिना॥

सि

स्वामी ते मेपीति। स्वामीश्वराधिपतीति षष्ठी[illegible]मन्मयोर्विधानादिह षष्ठी। द्विवचनांतयोरुदाहरणमाह। पातु वामित्यादिना। बहुवचनांतयोस्तु सोऽस्माद्दोन इत्यादि। सेव्यो त्र वः स्व
न इति। अर्हे कृत्यतृचश्चेति प्रयत्न। कृत्यानां कर्तरि वेति षष्ठी वेदैरशेषैरिति। युष्मान् रक्षतु गाविंद इति प्राचः पाठस्तूपेक्षितः। युष्मानित्यस्य पदात्परत्वाभावादेवाप्राप्तेः। अस्मानि
संस्य तु पदात्परत्वेपि समानवाक्यस्थपदात्परत्वाभावात्। ननु युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयानामिति सूत्रस्थानां विशेषणेन तदंतविधौ षष्ठ्याद्यंतयोर्युष्मदस्मदोः पर्यव
स्यति। न च स्थग्रहणाभावे युष्मदस्मदोः संबंधिनीनां षष्ठीचतुर्थीद्वितीयानामित्यर्थः स्यादिति वाच्यं। सर्वस्य पदस्येत्यनुवर्तनादंतो व्याचष्टा स्थग्रहणादिति। तिष्ठन्तिरि
हाहानैवर्तते। यथा समयं तिष्ठ सुग्रीवेति समयं माहासीरिति गम्यते। तेन षष्ठ्यादीन विजहतोरेव युष्मदस्मदोरादेशा इत्यर्थः। इति युष्मत्पुत्र इति। युवयोः पुत्रो युष्माकं
पुत्र इति [illegible] विग्रहः। ननु तव पुत्र इति। तथा हि सति त्वत्पुत्र इत्येव स्यात्। एवमस्मत्पुत्र इत्यत्राप्यूह्यं। पदात्परत्वं संपादयतमिति शब्दः। ननु राज्ञोः पुरुषो राज्ञां पुरुष इति वि
ग्रहे राजपुरुष इति न व्यल इति सिद्धं तद्विरोधो युष्मत्पुत्रोऽस्मत्पुत्र इत्यत्र युवयोर्युष्माकमित्यादिविग्रहो न संभवतीति चेत्। अत्राहुः। यत्र द्वित्वं संख्याविशेषबोधकं
प्रमाणं नास्ति तत्रैवैकत्वं स्वाश्रीयते यथा राजपुरुष इति। नहि राजपुरुष इत्यत्र विभक्तौ निवृत्तायां राजपदार्थे द्वित्वादिप्रत्यायकं किंचिदस्ति यत्र पुनः संख्याभेदग
मकं त्वे प्रकरणादि भवति तत्र द्विवचनबहुवचनयोरपि प्रवृत्तिः। प्रवृत्ते त्वेकवचनांतेन विग्रहे प्रत्ययोत्तरपदयोश्चेति त्वमादेशप्रसंगो दुर्वारः। द्विवचनबहुवचनांते
नेति विग्रहे वृत्तिर्भविष्यतीति। अर्थः सामर्थ्यं। अर्थो यथा मुद्गैः क्रीतो मौद्गिकः। न त्वेकेन मुद्गेन द्वाभ्यां वा मुद्गाभ्यां क्रयणं संभवति। प्रकरणं यथा। भवद्भिरामवसरप्रदानाय वक्त्वा
स्मिनः। भवतोर्गिरामिति तत्रत्यर्थः। [illegible] वाक्य इति [illegible] अस्य पदं [illegible] नत्पूर्ववाक्यस्थमिति समानवाक्यस्थत्वाभावादामंत्रितनिघातो न भवति। एक
तिङ इति। एकं तिङ् तिङंतं यत्रेति व[illegible]ः। ननु ओदनं पच तव भविष्यतीत्यादौ [illegible] सन्नित्यध्याहारेण भिन्नवाक्यतासमर्थनेपि पश्य मृगो धावतीत्यादावे
[illegible]वाक्यत्वस्य व्यवहारो न स्यात्। सत्यां प्रकृतौपयोगित्वेन मुक्तौ पश्य मृग इत्यादौ तत् कृत्वा दर्कं वाक्यं साकांक्षं चेद्विभागः स्यात्॥

दिति शास्त्रांतरप्रसिद्धत्वमेवेत्यर्थः। अन्ये तु आख्यातं सविशेषणं वाक्यमिति वार्तिककारवचनपर्यालोचनया एकतिङित्यत्र तिङंतविशेष्यसमर्पकं विवक्षितं। तत्र श्वः पश्य
मृगो धावतीत्यत्र तिङंतद्वये सत्यपि पश्येत्यस्यैव विशेष्यसमर्पकत्वान्नोक्तदोष इत्याहुः। एकशब्दः समानवचनो न तु संख्यावाची। बहुव्रीहिश्चायं तेन ब्रूहि ब्रूहि देवदत्ते
त्यत्र वाक्यत्वादामंत्रितनिघातः [illegible] यतीति समर्थसूत्रे कैयटः। युष्मदस्मदोर्विभाषा अनन्वादेश इति वार्तिकमर्थतः पठंति। एतेवांनावादय इति। यद्यपि सपूर्वायाः प्रथ
मायाविभाषेत्यत्रैतन्न भाष्ये पठ्यते [illegible] थाप्यविशेषेण विकल्पोऽयं विधीयत इत्याशयेन सपूर्वत्वाभावेऽपि विकल्पमुदाहरंति। धाता ते भक्त इति। अन्वादेशे तु नित्यमुदाहर
ति। तस्मै ते नम इत्येवेति। तुल्यार्थैरित्यादिवन्न च वा हा हैवैरिति तृतीयानिर्देशो [illegible] पि युक्तार्थलाभे युक्तग्रहणमनर्थकमित्यत आह। युक्तग्रहणादिति। यत्र यु
ष्मदस्मदर्थगतान् समुच्चयादीन् चादयो द्योतयंति तत्र चादिभिस्सहार्थद्वारा युष्मदस्मदोः साक्षाद्योगस्तत्रायं निषेध इत्यर्थः। हरो हरिश्चेति अत्र चशब्दो हरह

पश्यार्थैश्चानालोचने। ८।१।२५॥ अचाक्षुषज्ञानार्थैर्धातुभिर्योगे एते आदेशा न स्युः। चेतसा त्वां समीक्षते। परम्परासम्बन्धेऽप्ययं निषेधः।
भक्तस्तव रूपं ध्यायति। आलोचने तु भक्तस्त्वा पश्यति चक्षुषा। सपूर्वायाः प्रथमाया विभाषा। ८।१।२६॥ विद्यमानपूर्वात्प्रथमान्तात्पर
[illegible]योरन्वादेशेऽप्येते आदेशा वा स्युः। भक्तस्त्वमप्यहं तेन। हरिस्त्वां त्रायते स मां त्वा मेति वा॥

रिगतसमुच्चयमाह। हरिहराभ्यां युष्मदः सं
बंधो न तु समुच्चयेनेति न साक्षाद्योगः। किंतु परंपरायोग इति तेन निषेध इति भावः॥ ॥ पश्यार्थैश्चाना। अत एव निपातनाज्ज्ञावेपाघ्राध्माधेडिति शः। दृशेः पश्यः तेनेह ज्ञानमात्रं अदर्शनं लोप इत्य
त्रयधानतु चाक्षुषज्ञानमेव अनालोचन इति निषेधात तदेतदाह। अचाक्षुषज्ञानार्थैरिति। परंपरासंबंधेपीति। पूर्वसूत्रस्थयुक्तग्रहणेन ज्ञापितमेतद्भवत्यत्र परंपरासंबंधेपि निषेध इति। स
पूर्वायाः। सहशब्दोऽत्र सलोमक इत्यत्रेव विद्यमानवचनः तेन सहेतीत्यत्र तुल्ययोगवचनं प्रायिकमिति वक्ष्यमाणत्वाद्विद्यमानवचनस्यापि सहस्य समासः। वोपसर्जनस्येति सभावः। प्रथ
माया इति च [illegible] सुप्यग्रहणं नेदं तविधिरित्यालोच्याऽऽह। विद्यमानपूर्वादित्यादि। एतेवान्नावादय आदेशा इत्यविशेषोक्त्यैव विभाषया सिद्धेः किमर्थमिदं वचनमित्याशंक्य परिहरन्नाह।
अन्वादेशेपीति। भक्तस्त्वमित्यादि। त्वं भक्तोऽहमपि। तेन हरिस्त्वां मां वा त्रायत इति संबंधः। एवं च प्रक्रांतत्वान्न यच्छब्दापेक्षा येन कारणेन हरेस्त्वं भक्तस्तेनैव कारणेनाहमपीति व्याच
क्षाणानां तु यच्छब्दाध्याहारः क्लेश इति बोध्यं। अत्र तेनेति पूर्वं विद्यमानं परं

ततो हरिरिति प्रथमा। तं ततः परस्य युष्मच्छब्दस्यादेशः। तथात्रायते इत्यस्मात्परं स इति प्रथमां तं ततः परस्यास्मच्छब्दस्यादेशः॥ ॥ सामंत्रितं। संबोधने चत्यतः संबोधने
इत्यनुवर्तते। सा इत्यनेन प्रथमा निर्दिश्यते। महासंज्ञाकरणसामर्थ्यात्संज्ञाविधावपि तदंतग्रहणं। आमंत्रणमामंत्रितमुपचारात्तत्साधने वृत्तिः विभक्त्यंतेन चामंत्र्य
तेन तु केवलया विभक्त्येत्याशयेनाहा तदंतमिति। इहेति। अग्ने तव। देवास्मानित्यत्र युष्मदस्मदोर्न भवत्यादेशः। अग्ने नयेत्यत्र तिङतिङ इति न तिङ्निघातः। अग्न
इंद्र वरुणेत्यत्र त्वामंत्रितस्य चेत्यामंत्रितनिघातो नेति विवेकः। सर्वेषां निघात इति। अयं च निघातः। पदकाले श्रूयते न तु संहिताकाले। स्वरितात्संहितायामनुदात्तानां
मिति संहितायामेकश्रुतिविधानात्। अग्नेः तेजस्विन्निति। इह पदात्परत्वात्तेजस्विन्नित्यस्यामंत्रितस्य चेत्याष्टमिकनिघातः सर्वानुदात्तः। सुपादिति। शोभनौ पादौ य

सामन्त्रितं। २।३।४८॥ सम्बोधने या प्रथमा तदन्तमामन्त्रितसंज्ञं स्यात्। आमन्त्रितम्पूर्वमविद्यमानवत्। ८।१।७२॥ स्पष्टं। अग्ने तव देवास्मान्पा
हि। अग्ने नय। अग्न इन्द्र वरुण। इह युष्मदस्मदोरादेशस्तिङ् नतिनिघात आमन्त्रितनिघातश्च न। सर्वदा रक्ष देव न इत्यत्र तु देवेत्यस्याविद्यमा
नवत्त्वाभावेऽपि ततः प्राचीनं रक्षेत्येतदाश्रित्यादेशः। एवं इमं मे गङ्गे यमुने इति मन्त्रे यमुने इत्यादिभ्यः प्राचीनामन्त्रिताविद्यमानवत्त्वेऽपि मेश
ब्दमेवाश्रित्य सर्वेषां निघातः॥ नामन्त्रिते समानाधिकरणे सामान्यवचनं। ८।१।७३॥ विशेष्यं समानाधिकरणे विशेषणे आमन्त्रिते परे नाऽ
विद्यमानवत्स्यात्। हरे दयालो नः पाहि अग्ने तेजस्विन्। सुपात्। सुपादौ। सुपादः। सुपादं। सुपादौ। पादः पत्। ६।४।१३०॥ पाच्छब्दान्तं य
द्भं तदवयवस्य पाच्छब्दस्य पदादेशः स्यात्। सुपदः। सुपदा। सुपाद्भ्यामित्यादि। अग्निमथ्यतीत्यग्निमत्। अग्निमदौ। अग्निमथौ। अग्नि
मथः। अग्निमद्भ्यामित्यादि। ऋत्विगादिसूत्रेण क्वेः सुप्युपपदे क्विन्॥ ॥

स्पादिति बहुव्रीहिः। संख्यासुपूर्वस्येति पादस्यांतलोपः। पादः पत्। तदंत
पवस्येति। एतच्च निर्दिश्यमानस्यादेशा भवंतीति परिभाषया लभ्यते। इयं च परिभाषा षष्ठीस्थानेयोगेत्यनेन ज्ञापिता। तथाहि। अस्तेर्भूरिको यणचीत्यादौ सामीप्यादिसंबंध
प्रसंगेऽपि लक्ष्यानुरोधेन व्याख्यानादंतरंगत्वात्स्थानित्वादादेश इति ज्ञापकाच्च स्थानेयोगत्वसिद्धेः प्रारभ्यमाणेन षष्ठीस्थानेयोगेत्यनेन षष्ठ्यंतमुच्चार्यमाणमेकस्थाने
नयुज्यते न तु प्रतीयमानमित्यर्थो लभ्यते। तथा च निर्दिश्यमानस्यादेशा भवंतीति सिद्धं। अलोंत्यस्यादेः परस्येति योगौ तु आरंभसामर्थ्यान्निर्दिश्यमानपरिभाषाया बाध

कौतेनपुमः स्वप्नम परे उरः स्यात्सेभोरित्यादौन दोष इति दिक्॥ दंता॥ अग्निर्मंथितिा मश्नाते र्मथते श्वक्विपिएत रेवरूपं। इदित्त्वनलोपाभावादग्निमत्। अग्निमंथौ॥ अग्निमंथः॥ मंता॥ ङः॥ अनिदितां। इह हस्वेकार इत्संज्ञको येषांतानि इदिंति। न इदिंति अनिदिंति तेषामनिदितां। एतच्च अंगस्य विशेषणं हल इत्य पित दा हा ह लंतानामनिदितामिति। उपधायाम् [illegible]ते। श्नान्नलो प इति सूत्रान्नेति लुप्तषष्ठीकं पदमनुवर्तते तच्चोपधाग्रहणेन विशेष्यत इति भावः। अनिदितामिति किं। नंद्यते। हलः किं। नीयते। उपधायाः किं। हन्यते। अचः। अल्लोपोन इत्यतो ल्लोप इत्यनुवर्तते। भस्येति च। तदाह। भस्याकारस्य लोपः स्यादिति। अत्र न व्याः। यद्यत्रांचतेर्भस्येति सामानाधि करण्येनान्वयः स्वीक्रियते तर्हि प्रतीचः प्रतीचेत्यादि न सिध्येत्। उपसर्गसहितस्यैव भत्वेन केवलस्यांचतेर्भत्वाभावात्। भस्यावयवस्यां चतेरिति वैय्यधिकरण्येन।

अनिदितां हल उपधायाः क्ङिति। ६।४।२४॥ हलन्तानामनिदितामङ्गानामुपधायानस्य लोपः स्यात्किति ङिति च। उगिदचामिति नुम्। संयोगान्त लोपः। नुमो नकारस्य क्विन्प्रत्ययस्य कुरिति कुत्वेन ङकारः। प्राङ्। अनुस्वारपरसवर्णौ। प्राञ्चौ। प्राञ्चः। प्राञ्चं। प्राञ्चौ। अचः। ६।४।१३८। लुप्त नकारस्याञ्चतेर्भस्याकारस्य लोपः स्यात्॥ चौ। ६।३।१३८॥ लुप्ताऽकारनकारेऽञ्चतौ परे पूर्वस्याणो दीर्घः स्यात्। प्राचः। प्राचा। प्राग्भ्यामित्यादि। प्र [illegible]अन्यञ्चौ। प्रत्यञ्चः। प्रत्यञ्चं। प्रत्यञ्चौ। अच इति लोपस्य विषये नाऽङ्गोऽपि यण् न प्रवर्तते। अकृत व्यूहा इति परिभाषया। प्रतीचः। प्रतीचा। अमुमञ्चतीति विग्रहे। अदस् अञ्च इति स्थिते॥

((न्वेपेतु प्रत्यगात्मनेत्यादावंचतेरकारस्य लोपः स्यात्। अंचत्यंतस्य भस्याकारस्य लोप इ तिव्याख्यायां प्राचः। प्राचेति प्रशब्दाकारस्यापि लोपः स्यात्। तत्राहृत्यादिना अंचत्यंतस्य भस्यांचतेरकारस्येति व्याख्यानेपि प्रत्यञ्चमं चति प्रत्यगञ्जतनः शासादिषु प्रत्यङ्चः प्रत्यङ् चेत्यादावंतिप्रसंग एव। तस्मादल्लोपेन इत्यत्रेवात्रापि अंगावयवो सर्वनामस्थानयजादिस्वादिपरो यो अंचतिस्तस्याकारस्य लोपः स्यादिति व्याख्येयं। घुप्रागपागुदक् प्रतीच इति। निर्देशश्चेह व्याख्याने लिंगमित्याहुः॥ चौ॥ तेजो रितिनिर्देशाच्चवर्गाग्रहणं न भवति इत्याह। लुप्ताकारनकारे चताविति। अत्राकारलोपेन नकारलोपस्यासिद्धत्वात्कथनंथ्य र्थमेव किंतु लुप्ताकारचताविन्येव सुवचमित्याहुः। इल्लोप इति सूत्रादलो दीर्घ इत्यस्य चानुवर्तनादाह। अलो दीर्घः स्यादिति। प्राचः। प्राचेति। प्रतीच इत्याद्यर्थमेव स्पष्टं स्वी कार्यो तो लोपेकृते नेन दीर्घो विधीयत इति भावः। प्राग्भ्यामिति। चोः कुरिति कुत्वं न तु क्विन्प्रत्ययस्येत्यनेनन स्यासिद्धत्वात्॥ ॥ ॥

विष्वग्देवयोश्च। चकारेण सर्वनाम्न इत्यतः सर्वनाम्न इति लभ्यते इत्याह। अनयोः सर्वनाम्नश्चेति। अप्रत्ययान्तेऽञ्चताविति। अविद्यमानः प्रत्ययो यस्य यः क्विन्क्विबादिः अं
चतौ वप्रत्यय इति पाठे तु वप्रत्ययान्ते च ताविति व्याख्येयं। विष्वग्देवयोरुदाहरणं। विष्वगञ्चतीति विष्वद्र्य ङ्। देवानञ्चतीति देवद्र्यङ्। इति बोध्यं। अदसोऽसेः
असेरिति। इकारउच्चारणार्थ इत्याह॥ अदसोऽसान्तस्येति। असान्तस्येति किं। अमुमात्म न इच्छति अदस्यति। ततः परस्य किं अमुया अमुयोरित्यत्रान्त्यकारस्य मा
भूत्। ह्रस्वव्यञ्जनयोरिति। व्यञ्जनस्य हि ह्रस्व ईषत्सदृशो दीर्घस्तु विसदृश इति भावः। प्राचस्तु ह्रस्वदीर्घयोः समाहारद्वन्द्वः मत्वे विधीयमानोऽप्यण् क्वचित्स

विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये। ६। ३। ९२॥ अनयोस्सर्वनाम्नश्च टेरद्र्यादेशस्स्यादप्रत्ययान्तेऽञ्चतौ परे। अदद्रि अच् इति स्थिते यण्॥
अदसोऽसेर्दादु दो मः। ८। २। ८०॥ अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च। उ इति ह्रस्वदीर्घयोस्समाहारद्वन्द्वः। आन्तरतम्याद्ध्रस्वव्यञ्ज
नयोर्ह्रस्वो दीर्घस्य च दीर्घः। अमुमुयङ्। अमुमुयञ्चौ। अमुमुयञ्चः। अमुमुयञ्चं। अमुमुयञ्चौ। अमुमुईचः। अमुमुईचा। अमुमुयग्भ्यामित्या
दि। मुत्वस्यासिद्धत्वान्न यण्। अन्त्यबाधेऽन्त्यसदेशस्येति परिभाषामाश्रित्य परस्यैव मुत्वमित्येके। अदमुयङ्। असेः सकारस्य स्थाने यस्य
सः। असेरिति व्याख्यानात्। सेदाद्यत्वविषय एव मुत्वं नान्यत्रेति पक्षे अदद्र्यङ्। उक्तं च। अदसोऽद्रेः पृथङ्मुत्वं केचिदिच्छन्ति लत्ववत्। केचि
दन्त्यसदेशस्य नेत्येकेऽसेर्हि दृश्यत इति। विष्वग्देवयोः किं। अश्वाची। अञ्चतौ किं। विष्वग्युक्॥ अप्रत्यये किं। विष्वगञ्चनं। अप्रत्ययग्रहणं ज्ञा
पयति। अन्यत्र धातुग्रहणे तदादिविधिरिति। तेनाऽयस्कारः। अतःकृकमीति सः। उदङ्। उदञ्चौ। उदञ्चः। शसादावचि॥ ॥

वर्णान् गृह्णातीति स्वीकृत्य आन्तरतम्यात् ह्रस्वं व्यञ्जनयोर्ह्रस्वः दीर्घस्य दीर्घः इति व्याचक्षते मतं परास्तं। सूत्रे अदस इति नावयवषष्ठी किंतु स्थाने षष्ठी एवं हि अलोन्त्यपरिभा
षोपतिष्ठते। तथा च अदसो योऽन्त्यः स उपरोऽनभवति दात्परो यः स अदसोऽन्त्यो न भवतीत्येवमन्त्यबाधेऽन्त्यसमीपस्य भवतीति तेषामाशयः। उक्तं चेति। वार्तिककृतेति शे
षः। एवं च अमुमुयङ् इति केषांचिदुदाहरणं भाष्यानुक्तत्वादुपेक्ष्यमिति भावः। लत्ववदिति। चलीकॢप्यत इत्यत्र कृपो रो ल इत्युभयोर्यथा लत्वं तथेत्यर्थः। नन्वप्रत्यय
ग्रहणाभावेऽप्यन्तरपदाधिकारस्थत्वात् विष्वद्र्यङ् देवद्र्यङ् इत्यञ्चत्युत्तरपदेऽद्र्यादेशः स्यान्न तु विष्वगञ्चनमित्यत्रातो व्यर्थम्। अप्रत्ययग्रहणं ज्ञापयतीति।

अन्यत्रेति। अतः कृकमीत्यादौ। तेनेति। अव्ययानित्यसमास इत्यतोऽनुवृत्तेन सत्त्वग्रहणेनोत्तरपदस्यासेपादतः कृकमीति कृधातुग्रहणे कृधातूत्तरपदकएवायस्कादित्या
दौ सत्वं स्यान्न त्वन्तेनोत्तरपदके यस्कार इत्यत्रेति भावः॥ ॥ उदईत॥ अचइत्यस्यापवादः। इह अचइत्यनुवर्तते भस्येति च तदाह। उच्छब्दात्परस्य लुप्तनकारस्य
त्यादि भस्येति किं। उदंचौ। उदंचः। उदग्भ्यां॥ लुप्तनकारस्येति किं पूजायां उदंचः। उदंचेति। यथास्यादिति। समः समि। समीत्यविभक्तिको निर्देशः। एवं सिसमिरीत्यपि
संगतमंचतीति सम्यक्। समीच इति॥ अल्लोपेचाविति दीर्घः। सहअंचतीति सध्र्यङ्। भविषये अल्लोपदीर्घौ सध्रीच इत्यादिति। तिरसः नविद्यते लोपो यस्य सः अलो

उद ईत्। ६।४।१३९॥ उच्छब्दात्परस्य लुप्तनकारस्याञ्चतेर्भस्याकारस्य ईत्स्यात्। उदीचः। उदीचा। उदग्भ्यामित्यादि। समः समि। ६।३।
९३॥ अप्रत्ययान्तेऽञ्चतौ परे। सम्यङ्। सम्यञ्चौ। सम्यञ्चः। समीचः। समीचा। सहस्य सध्रिः। ६।३।९५॥ अप्रत्ययान्तेऽञ्चतौ परे। सध्र्यङ्। तिरस
स्तिर्य्यलोपे। ६।३।९४॥ अलुप्ताऽकारेऽञ्चतावप्रत्ययान्ते परे तिरसस्तिर्यादेशः स्यात्। तिर्यङ्। तिर्यञ्चौ। तिर्यञ्चः। तिर्यञ्चं। तिर्यञ्चौ। तिरश्चः।
तिरश्चा। तिर्यग्भ्यामित्यादि। नाञ्चेः पूजायां। ६।४।३०॥ पूजार्थस्याञ्चतेरुपधाया नस्य लोपो न स्यात्। अलुप्तनकारत्वान्न नुम्। प्राङ्। प्राञ्चौ।
प्राञ्चः। नलोपाऽभावादकारलोपो न। प्राञ्चः। प्राञ्चा। प्राङ्भ्यां। प्राङ्क्षु। प्राङ्षु। एवम्पूजार्थे प्रत्यङ्ङादयः। क्रुञ्च कौटिल्याल्पीभावयोः। अ
स्मात् क्विन्नादिना नलोपाभावोऽपि निपात्यते। क्रुङ्। क्रुञ्चौ। क्रुञ्चः। क्रुङ्भ्यामित्यादि। चोः कुः। पयोमुक्। पयोमुग्। पयोमुचौ। पयोमुचः। व्रश्चे
ति षत्वं। स्कोरिति सलोपः। जश्त्वचर्त्वे। सुवृट्। सुवृड्। सुवृश्चौ। सुवृश्चः। सुवृट्सु। सुवृट्त्सु। महपूजायां। वर्तमाने पृषन्महद्बृहज्जगच्छतृव
च्च॥ एते निपात्यन्ते शतृवच्चैषां कार्यं स्यात्। उगित्वान्नुम्। सान्तमहत इति दीर्घः। महत्यते पूज्यते। महान्। महान्तौ। महान्तः। हे महन्। महतः। म

पः इति बहुव्रीहिः। अंचताविति अनुवर्तमानमन्यपदार्थः। अवयवव्यहारकश्चलोपः समुदाये उपचर्यत इत्यभिप्रेत्याह। अलुप्ता ॥ हता। महद्भ्यामित्यादि॥
कार इत्यादि। अकारलोपे सतीति नोक्तव्याख्यानात्। वप्रत्ययान्ते किं। तिरोंचनमित्यादौ माभूत्। तिर श्च इति। लुप्ताकारत्वात्तिर्यादेशाभावे सस्य श्चुत्वेन शः। न चा
लोपस्यस्थानिवत्वान् श्चुत्वं न स्यादिति वाच्यं। पूर्वत्रासिद्धे तदभावात्परान्तविधित्वाच्च॥ नांचेः। नुमैव सिद्धे प्राचः प्राचेत्यादौ नुमोभावेपि नकारः श्रवणार्थः। प्रङ्क्ति

प्रकर्षेण अंचतीति पूजयतीति पूजार्थादंचेः क्विन्॥ प्राङ्स्विति। अः कुक्दुगितिवा कुक् चयोद्वितीया इति पक्षे खकारो बोध्यः। एवमिति। शसादिषु प्रत्यंचः। प्रत्यङ्भ्यां
अमुमुयङ्ङः अमुमुयङ्भ्यां। उदंचः उदङ्भ्यामित्यादि। द्वेधे कुंचतीति क्रुङ्। सलोप इति। श्चुत्वस्यासिद्धत्वादिति भावः। सुष्टु वृश्चतीति सुवृट्। क्विपि ग्रहिज्येति संप्रसारणं। मु
हृद्रुह्स्विति। वत्वस्यासिद्धत्वात्पूर्वं ढः सीति वा धुट् ततश्चर्त्वं। चांताः निपात्यंत इति। षुष सेचने। वृह वृद्धौ। अत्र गुणाभावः। महेः कर्मणि प्रत्ययः। अत एव मत्वेन पूज्यते
समहानिति व्याचष्टे। गमेर्गुजगादेशः। चत्वारोप्यति प्रत्ययांताः। एतच्च उणादिषु स्फुटीकरिष्यते॥ ॥ अत्वसंतस्य चाधातोः॥ हलोप सूत्राद्दीर्घस्यातोपधाया इत्यु
पधाग्रहणस्य चानुवर्तनादाह। उपधाया दीर्घः स्यादिति। इह अधातोरिति योगो विभज्यते तत्सामर्थ्यादनंतरस्यासंतस्यैव प्रतिषेधं नात्वंतस्येति कैयटादयस्तदे
तद्दूषयंति। धातुभिन्नासंतस्य चेति। धात्ववयवभिन्नो योऽसंतस्तदंतस्येत्यर्थः। तेन उखास्रत् पर्णध्वत् इत्यादि सिद्धं धातुभिन्नो योसंतस्तस्येति व्याख्यायां उखास्रत् पर्ण

अत्वसन्तस्य चाऽधातोः। ६।४।१४। अत्वन्तस्योपधाया दीर्घः स्याद्धातुभिन्नाऽसन्तस्य चाऽसम्बुद्धौ सौ परे। परन्नित्यश्च नुमम्बाधित्वा वचनसाम
र्थ्याद्दीर्घः। ततो नुम्। धीमान्। धीमन्तौ। धीमन्तः। हे धीमन्। शसादौ महद्वत्। धातोरप्यत्वन्तस्य दीर्घः। गोमन्तमिच्छति गोमानिवाच
रति वा क्यजन्तात् क्विप् वा क्विबन्ताद्वा कर्तरि क्विप्। उगिदचामिति सूत्रेऽञ्ग्रहणं नियमार्थं। धातोश्चेदुगित्कार्यं तर्ह्यञ्चतेरेवेति। तेनास्य
न ध्वत् इत्यादौ न। अधातोरिति तु अधातुभूतपूर्वस्याऽपि नुमर्थं। गोमान्। गोमन्तौ। गोमन्तः। इत्यादि। भातेर्डवतुः। भवान्। भवन्तौ। भवन्तः। श
त्रन्तस्य त्वत्वन्तत्वाऽभावान्न दीर्घः। भवतीति भवन्। उभे अभ्यस्तं। ६।१।५। षाष्ठद्वित्वप्रकरणे ये द्वे विहिते ते उभे समुदिते अभ्यस्तसंज्ञे स्तः॥

ध इत्यत्र सिद्धं नेदीर्घाभावेप्यत्र तु स्यादेवेति दिक्। अत्र सर्वनामस्थाने चेति सूत्रादसंबुद्धावित्यनुवर्तते सौ चेत्यतः साविति च तदाह। असंबुद्धौ सौ परे इति। अत्वंत
त्वाभावादिति। अतु इत्युकारानुबंधस्यानुकरणाच्छत्रंतस्य न भवतीत्यर्थः। उभे शब्दरूपापेक्षया नपुंसकनिर्देशः। षाष्ठद्वित्वेति। अनंतरस्य विधिर्वा भवति प्रति
षेधो वेति न्यायादिति भावः। इहत्यनंतरस्यैव सिद्धे उभयग्रहणं समुदायप्रतिपत्त्यर्थमिति व्याचष्टे। उभे समुदिते इति। अन्यथा नेनिजतीत्यत्र अभ्यस्तानामादिरित्या
द्युदात्तत्वं प्रत्येकं पर्यायेण स्यात्॥ ॥

नाभ्यस्ताच्छतुः। व्यवहितेऽपि नुमेवात्र निषिध्यते। अन्ये त्वाम् प्रसक्तेरित्यभिप्रेत्याहुः नुम्नस्यादिति। ददर्दिति। ददातीति ददत्। दाञोऽलटः शत्रादेशः। शपः श्लुः। श्लाविति द्विर्वे
अभ्यासस्य ह्रस्वः। श्नाभ्यस्तयोरात इत्यालोपः। जक्षित्यादयः षट्। जक्षितिपृथक्पदं इति शब्देन जक्षिरेव परामृश्यते। इति आदर्येषामित्यतद्गुणसंविज्ञानबहुव्रीहिः। दत्त
दा ह्रा षट् धातवोऽन्ये इति। तांताः। गोपायतीति गुपू क्विपि विवक्षिते आयादय आर्द्धधातुके वेति विकल्पिकत्वादिहाय् प्रत्ययाभावः। आय् प्रत्ययपक्षे तु तेनो लोपे यलो
पे च गोपा इति रूपं बोध्यं। पांताः। त्यदादिषु कञ्चेत्यस्य तूदाहरणं ताद्दृशो याद्दृश इत्यादि। तच्चात्र नोक्तं हलंतेष्वनुपयोगात्। अनालोचने किं। तं पश्यतीति त

नाभ्यस्ताच्छतुः ७।१।७८। अभ्यस्तात्परस्य शतुर्नुम न स्यात्। ददत्। ददद्। ददतौ। ददतः। जक्षित्यादयः षट्। ६।१।६। षड् धातवोऽन्ये ज
क्षितिश्च सप्तम एतेऽभ्यस्तसंज्ञाः स्युः। जक्षत्। जक्षद्। जक्षतौ। जक्षतः। एवं जाग्रत्। दरिद्रत्। शासत्। चकासत्। दीधीवेव्योर्ङित्वेऽपि
छांदसत्वाद्धात्वयनपरस्मैपदं। दीध्यत्। वेव्यत्। गुप्। गुब्। गुपौ। गुपः। गुब्भ्यामित्यादि। त्यदादिषु दृशोऽनालोचने कञ्च। ३।२।६०। त्यदा
दिषूपपदेष्वज्ञानार्थाद्दृशेर्धातोः कञ् स्याच्चात् क्विन्। आ सर्वनाम्नः। ६।३।९१। सर्वनाम्न आकारोऽन्तादेशः स्यात् दृग्दृशवतुषु। कुत्वस्यासि
हत्वा ... व्रश्चेति षः। तस्य जश्त्वेन डः। तस्य कुत्वेन गः। तस्य चर्त्वेन पक्षे कः। तादृक्। तादृग्। तादृशौ। तादृशः। षत्वापवादत्वात् कुत्वेन खकार इति।
कैयट ... हरदत्तादिमते तु चर्त्वाभावपक्षे खएव श्रूयते। न तु गः। जश्त्वं प्रति कुत्वस्यासिद्धत्वात् क्विन्प्रत्ययस्य कुरिति निर्देशान्नासिद्धत्वमितिवा
बोध्यं। व्रश्चेति षत्वं। जश्त्वचर्त्वे। विट्। विड्। विशौ। विशः। विशं। नशेर्वा। ८।२।६३। नशेः कवर्गोऽन्तादेशो वा स्यात्पदान्ते। नक्। नग्। नट्। नड्।
नशौ। नशः। नग्भ्यां नड्भ्यामित्यादि॥ ॥

११ दृशेः। कर्मण्यण्। तादृशादयस्तु रूढिशब्दत्वादसत्यप्यवयवार्थेन व्युत्पाद्यंते। अतएव अज्ञा
नार्थाद्दृशेरिति क्विन्निर्देशः संगच्छते। भाष्ये तु कर्मकर्तरि व्युत्पत्तिर्दर्शिता। तमिवेमं पश्यंति जनाः स इवायं पश्यति ज्ञानविषयो भवतीत्यर्थो दृश्यानार्थादिति तु संगच्छते।
तत्र दृशेर्ज्ञानविषयत्वापत्तिमात्रवृत्तित्वेऽपि विषयीकरणवृत्तित्वात्। अकारांतादेश इति। अकारादेशे सति त्वतो गुणः स्यात्। न चाकारोच्चा
रणसामर्थ्याद्दीर्घस्यादेवेति वाच्यं। अकारस्याविधौ हल एव श्रवणप्रसंगात्। विडिति। विशप्रवेशने इत्यस्मात् क्विप्। नशेर्वा। केचिदिह अलीत्यनुवर्त्य झलि

परांते चेति व्याचक्षते। तन्न नष्टमित्यादावतिप्रसंगात्। नगिति। षड्गकाः प्रागवत्॥ ॐ॥ स्पृशोनुदके क्विन्। ककारो गुणाभावार्थः। नकारस्तु क्विन्प्र
त्ययस्य कुरिति विशेषणार्थः। वस्तुतस्तु व्यर्थ एव सः। क्विन्प्रत्ययस्य कुरित्युक्ते पितदनुबंधपरिभाषया क्विवंतस्य कुत्वाप्रसक्तेः नचाद्युदात्तत्वं प्रयोजनं क्विनः
प्रकृतीनामेकाच्त्वाद्धातुस्वरेणापि तत्सिद्धेः। दधृगित्यत्र त्वंतोदात्तत्वनिपातनादाद्युदात्तत्वं नापेक्षितमेवेति दिक्। अत्र सुपीत्यनुवर्तने कर्मणीति
तु निवृत्तमित्याशयेनाह। अनुदके सुप्युपपदे इति। घृतस्पृगिति। घृतं घृतेन वा स्पृशतीति विग्रहः। अनुदके किं। उदकं स्पृशतीति उदकस्पर्शः। निषे

स्पृशोऽनुदके क्विन्। ३।२।५८॥ अनुदके सुप्युपपदे स्पृशेः क्विन् स्यात्। घृतस्पृक्। घृतस्पृग्। घृतस्पृशौ। घृतस्पृशः। क्विन्प्रत्ययो
यस्मात् हुह्नीह्याश्रयणात् क्विप्यपि कुत्वं। स्पृक्। षड्गकाः प्रागवत्। ञिधृषा प्रागल्भ्ये। अस्मादृत्विगादिना क्विन्। द्वित्वमन्तोदात्त
त्वं च निपात्यते। कुत्वात् पूर्वं ञ्णत्वं नङः गः कः। धृष्णोतीति। दधृक्। दधृग्। दधृषौ। दधृषः। दधृग्भ्यामित्यादि। रत्नानि मुष्णातीति रत्नमुट्। र
त्नमुड्। रत्नमुषौ। रत्नमुषः। षड्भ्यो लुक्। षट्। षड्। षड्भिः। षड्भ्यः २। षट्चतुर्भ्यश्चेति नुट्। अनामिति पर्युदासान्न ष्टुत्वनिषेधः॥ य
रोऽनुनासिक इति विकल्पं बाधित्वा प्रत्यये नित्यमिति नित्यवचनान्नित्यमनुनासिकः। षण्णां। षट्सु। षट्त्सु। तदन्तविधिः। परमष
ट्। परमषण्णां। गौणत्वे तु प्रियषषः। प्रियषषां। रुत्वं प्रति षत्वस्यासिद्धत्वात् ससजुषो रुरिति रुत्वं॥ र्वोरुपधाया दीर्घ इकः। ८।२।७६।
रेफवान्तस्य धातोरुपधाया इको दीर्घः स्यात् पदान्ते। पिपठीः। पिपठिषौ। पिपठीर्भ्यां। वा शरीति वा विसर्जनीयः॥ ॥

धसामर्थ्यात् ऋत्विक्शिवपि न भवति। तस्मिन् हि सति क्विन्प्रत्ययो यस्मादिति बहुव्री ह्याश्रयणेन कुत्वस्यावर्जनीयतया अनुदक इति निषेधस्य फलाभावा
त्। केचित्तु उदकस्पृडिति प्रत्युदाहरंति। निषेधसामर्थ्यात् कुत्वं मा भूत् क्विप् स्यादेवेति तेषामाशयः। शांताः। गौणत्वे त्विति। षड्भ्यो लुक् षट्चतुर्भ्यश्चेति बहु
वचनमनर्थं षण्णात् षडर्थप्राधान्ये एव लुग्नुटौ भवत इति भावः। पिपठिषतेः क्विप्यतो लोपे कृते दंतत्वात् स्वाद्युत्पत्तौ पिपठिष् स् इति स्थिते सो हल्ङ्यादिलोपः प्र
त्ययलक्षणेन पदांतत्वात् ससजुषोरुत्वं। न च रुत्वे कर्तव्ये अल्लोपस्य स्थानिवत्त्वं शंक्यं। पूर्वत्रासिद्धे न स्थानिवदिति निषेधात्॥ ॥

नुमविसर्जनीयाद्रणकोरिति पंचमीनिर्देशाद्व्यवहितस्याप्राप्तौ वचनं। छुत्वेन पूर्वस्येति। सनः सस्य रुत्वविसर्गयोः कृतयोर्वा शरीति विकल्पात्तूपदेशसकारस्तेन शर्व्य
वायेऽपि सस्य षत्वं पूर्वस्य ष्टुत्वेन त्वादेशप्रत्यययोरिति षः। अपदान्तस्येति निषेधादिति भावः। एवं स्थिते शर्ग्रहणेन न प्रयोजनं किंतु नुमविसर्जनीयसव्यवा
नुम्विसर्जनीयशर्व्यवायेऽपि। ८। ३। ५८॥ एतैः प्रत्येकं व्यवधानेऽपि इण्कुभ्यां परस्य सस्य मूर्द्धन्यादेशः स्यात्। ष्टुत्वेन पूर्वस्य षत्वमपि
पिपठीःषुपिपठिष्षु प्रत्येकमिति व्याख्यानाद् अनेकव्यवधाने षत्वं न। निंस्स्व। निंस्से। नुमग्रहणं नुमस्थानिकानुस्वारोपलक्षणार्थमिति व्या
ख्यानान्नेह। सुहिन्सु। पुंसु। अत एव नुग्रहणेन गतार्थता। रात्सस्येति सलोपे विसर्गः। चिकीः। चिकीर्षौ। चिकीर्षः। रोः सुपीति नियमात् विसर्गः। चिकीर्षु। दमेर्डोसिडित्वसामर्थ्याट्टिलोपः। षत्वस्यासिद्धत्वाद्रुत्वविसर्गौ। दोः। दोषौ। दोषः। पद्दन्निति वा दोषन्। दोष्णः। दोष्णा
दोषा। विश प्रवेशने। सन्नन्तात् क्विप्। षत्वस्यासिद्धत्वात् संयोगान्तलोपः। व्रश्चेति षः। जश्त्वचर्त्वे। विविट्। विविड्। विविक्षौ। विविक्षः
स्कोरिति कलोपः। तट्। तड्। तक्षौ। तक्षः। गोरट्। गोरड्। गोरक्षौ। गोरक्षः। तक्षिरक्षिभ्यां ण्यन्ताभ्यां क्विपि तु स्कोरिति न प्रवर्त्तते। णिलोपस्य
स्थानिवद्भावात्। पूर्वत्रासिद्धे न स्थानिवदिति तु रहहनास्ति। तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति निषिद्धं। तस्मात्संयोगान्तलोप एव
सतीति सुपीः। सुपिसौ। सुपिसः। सुपिसा। सुपीर्भ्यां। सुपीर्ष्षु। सुपीःषु। एवं सुतूः। तसखण्डने। विद्वान्। विद्वांसौ। विद्वांसः। हे विद्वन्। विद्वांसं। विद्वं
सौ। वसोः सम्प्रसारणं। ६। ४। १३१॥ वस्वन्तस्य भस्य सम्प्रसारणं स्यात्। पूर्वरूपत्वं षत्वं। विदुषः। विदुषा। वसुस्रंस्विति दत्वं। विद्वद्भ्यां
त्यादि। सेदिवान्। सेदिवांसौ। सेदिवांसः। सेदिवांसं। अन्तरंगोऽपीडागमः सम्प्रसारणविषयेन प्रवर्त्तते। अकृतव्यूहा इति परिभाषया। सेदुषः। सेदु
षा। सेदिवद्भ्यामित्यादि। सान्तमहतः। इत्यत्र सान्तसंयोगोऽपि प्रातिपदिकस्यैव गृह्यते न तु धातोः। महच्छब्दसाहचर्य्यात्। सुहिन्नित्सौ। सुहिन्। सुहिंसौ
सुहिंसः। सुहिन्भ्यां। सुहिन्सु। सुहिन्त्सु। ध्वत्। ध्वद्। ध्वसौ। ध्वसः। ध्वद्भ्यां। एवं स्रत्॥ एयपीत्येव सूत्रं युक्तमित्येके नुमः शर्व्यवायेपीत्येव न्यक्तं सूत्रयितुं शर्ग्रहणेन
विसर्जनीयस्यालाभादिति नोनिंस्स्वेति। आद्यसकारस्य प्रत्येकं व्यवधानेपि आरे॥ ॥

शप्रत्ययावयवत्वाभावान्नषत्वं न भवति। न चादेशप्रत्यययोरित्यनुवृत्त्यभावान्नुम्विसर्जनीयेत्यनेन धातुसकारस्य षत्वं स्यादिति वाच्यं। तस्य स्वातंत्र्येण विधायक-
त्वानंगीकारात्। अपदांतस्य मूर्द्धन्यः इणकोरितिवत् नुम्विसर्जनीय इत्यस्याप्यधिकारसूत्रत्वात्। कर्तुमिच्छति चिकीर्षति चिकीर्षतेः क्विप्प्रत्ययः। चिकीः। ए-
का च उपदेश इति [illegible] ग्रहगुहोश्चेति वा सन इडभावे इको झलिति कित्त्वाद्गुणाभावे अज्झनगमां सनीति दीर्घे ऋत इद्धातोरिति इत्वे रपरत्वे तनो द्वित्वे हलादिः शेषः कुहो-
श्चुः अल्लोपः योर्हल्ल्यादिलोपे पदांतत्वात् र्वोरुपधाया इति दीर्घः रोरिति। दाम्यतीति रोः। संयोगांतलोप इति। न चास्मिन् कर्तव्ये वहिरंगत्वेनाल्लोपस्यासि-
द्धत्वं शंक्यं। वहिर्निमित्तापेक्षपदसंज्ञासापेक्षत्वेन संयोगांतलोपस्यैव वहिरंगत्वादिति। दिकू विच्छिदिति। विशेः सनएकाच इतीण्निषेधे हलंताच्चेति कित्त्वान्न गुणा-
भावः। द्वित्वाभ्यासकार्यान्तडिति। तस्य लक्षुतं नूकरणे इत्यस्मात् क्विप् गां रक्षतीति गोरक्। कर्मण्युपपदेवा सरूपन्यायेन क्विप्। कुत्वस्यासिद्धत्वादिति। इतरथा
स्कोरिति कलोपः स्यादिति भावः। पिपगिति। पक्तुमिच्छति पिपक्। वक्तुमिच्छति विवक्। दादेरिति घः। एकाचो वश इति भष्भावः। दग्धुमिच्छति दिधक्॥ षो-
तान् सुतूरिति। सुष्टु नोसतीति सुतूः। विन्नीति विद्वान्। विदेः शतुर्वसुः। अदादित्वाच्छपो लुक्। सार्वधातुकमपिदिति ङित्वान्नोपधागुणः। उगित्वान्नुम्। सांतमहत
इति दीर्घः। संयोगांतलोपस्यासिद्धत्वान्नलोपो न। वसोः प्रत्ययग्रहणे तदंतग्रहणमित्याह। वस्वंतस्येति। सेदिवानिति। भाषायां सदवसश्रुव इति लिटः क्वसुः
लिटि धातोरिति द्वित्वं। हलादिः शेषः। अतएकहल्मध्ये इत्येत्वाभ्यासलोपौ। वस्वेकाजाद्घसामितीट्। नुम्। सांतेति दीर्घः। सेदुष इति। ननु तदनुवंधकग्रहणेनातदनु-
वंधकस्येति परिभाषया विदेः शतुर्वसुरित्यस्यैव वसोः संप्रसारणं युक्तं न तु क्वसोः। सत्यं। वसोरुकारानुवंधकरणं क्वसोः सामान्यग्रहणार्थं। उगित्वस्यास्यानि-
वृत्त्येनापि सिद्धेः। इहगमिप्रभृतिभ्यः क्वसुर्नेदादौ इतः। छांदसत्वात्। अतएव वैदिकप्रक्रियायां तस्थिवान् जग्मिवान् इत्याद्युदाहर्तव्यं नात्रेत्याहुः। कथं यमुपयं-
स्नेतो श्रेयांसि [illegible] पेय्यघिजग्मुषस्तो नतस्थिवांसं नगरोपकंठे इत्यादि। अत्र वदंति। छंदसि अप्येते प्रत्यय इत्यर्थः क्वचित् भाषायामपि भवंति। मासश्छंदसीत्यस्य सामान्या-
पेक्ष [illegible] पकत्वा [illegible] यथं चित्समाधेयमिति। सुहिन्निति। संयोगांतलोपस्यासिद्धत्वान्नोपधादीर्घः। सुहिन्त्विति। न श्चेति सस्य वा धुट्। ध्वंसत इति ध्वत्। स्रंसत इति
स्रत्। स्रसु ध्वंसु अवस्रंसने। ध्वंसु गतौ च। आभ्यां क्विप्। अनिदितामिति नलोपः। वसुस्रंस्विति दत्वं॥ ॥ ७ ॥

गु.
सि॰कौ॰
टी॰न॰
८८

पुंसोऽसुङ् इतोत्सर्वनामस्थाने इत्यनुवर्तनादाह। सर्वनामस्थाने इति। विवक्षिते इति। तेन परमपुमानित्यत्र परत्वादसुङि कृते समासांतो टाजन्तत्वं भवत्सुङ् एवं अ
कारस्य भवति। पूर्वं तस्मिंस्तु नैतत् सिध्येत्। सर्वनामस्थानोत्पत्तेः प्रागेव पुमन्शब्दोकारस्योदात्तत्वे कृते स्वरसनधर्मेण हलः स्थाने तद्धर्मत्वेनोदात्तस्यैवादेशस्य प्रसंग
। नचोक्तदर्शके कृतेपि स्वरोनंत्यत्वान्निवर्तयिष्यते असुङ् श्चान्यत्वात्करिष्यत इति वाच्यं। अंतरंगे स्वरे कर्तव्ये बहिरंगस्यासुङोऽसिद्धत्वादिति भावः। वस्तुतस्तु अकृत
व्यूहपरिभाषया अंतरंगपरिभाषापवादत्वात्परसप्तमीपक्षोपि सूपपादः। एतच्च मनोरमायां स्पष्टं पूत्र इति। यद्यप्युणादिषु पातेर्डुमसुन्निति वक्ष्यति तथापि पा

पुंसोऽसुङ्। ७।१।८९॥ सर्वनामस्थाने विवक्षिते असुङ् स्यात्। उकार उच्चारणार्थः। बहुपुंसी इत्यत्र उगितश्चेति ङीवर्थं कृतेन पूत्रोऽडुमसुन्निति प्र
त्ययस्योगित्त्वेनैव नुम् सिद्धेः। पुमान्। हे पुमन्। पुमांसौ। पुमांसः। पुंसः। पुंसा। पुम्भ्यां। पुम्भिः। पुंसु। ऋदुशनेत्यनङ्। उशना। उशनसौ। उशनसः।
अस्य संबुद्धौ वा नङ् नलोपश्च वा वाच्यः॥ हे उशनन्। हे उशन। हे उशनः। उशनोभ्यामित्यादि। अनेहा। अनेहसौ। अनेहसः। हे अनेहः। अनेहो
भ्यामित्यादि। वेधाः। वेधसौ। वेधसः। हे वेधः। वेधोभ्यामित्यादि। अधातोरित्युक्तेर्न दीर्घः। सुष्टु वस्ते। सुवः। सुवसौ। सुवसः। पिण्डं ग्रसते। पिण्डग्रः।
पिण्डग्लः। ग्रसु ग्लसु अदने। अदस औ सुलोपश्च। ७।२।१०७॥ अदस औकारोऽन्तादेशः स्यात्सौ परे सुलोपश्च। तदोस्सः सावितिदस्य सः। अ
सौ। औत्वप्रतिषेधः साकच्कस्य वा वक्तव्यः सादुत्वं च॥ प्रतिषेधसन्नियोगशिष्टमुत्वमदभावेन प्रवर्तते॥ असुकः। असकौ। त्यदाद्यत्वम्पररू
पं वृद्धिः। अदसोसेरिति मत्वोत्वे। अमू। जसः शी। आदुणः॥ ॥

॥ एतान्तरमनुसन्त्याज्यत्वोक्तमिति बोध्यं। हे पुमन्निति। असंबुद्धावित्युक्तेः सांतेतिन
दीर्घः। पुंस्विति। संयोगान्तलोपमोनुस्वारः। नुम्स्थानिकस्यैवानुस्वारस्योपलक्षणं नुम्विसर्जनीयेति नत्वं। उशनेति। वशेः कनसिः ग्रहिज्येति संप्रसारणं। अस्य सं
बुद्धाविति। एतच्च वैचनिकं। हरदत्तादयस्त्वाहुः। सोऽर्दिति वाच्ये अनङ् सावितिवचनेन क्वचिदनङ् एव अङ्गज्ञस्य ज्ञापितत्वादेतत्सिद्धमिति। यद्यपि सोडिंकृते डित्वसा
मर्थ्याद्विलोपे सर्वनामस्थाने चासंबुद्धाविति दीर्घे उशनेत्यनिष्टरूपं प्रसज्यते तथाप्यंगवृत्तपरिभाषया दीर्घो न तिकृत्वा ज्ञापकत्वं संगच्छत इति तेषामाशयः। अनेहा वे
धा इति। असुन्प्रत्ययेन निष्पन्नः। एह च विधाञ्जो वेध च नियुत पादनादसंतत्वेन दीर्घः। अनेहा कालः। वेधा विश्वसृट्। अदस औ सुलोपश्च। अदस इति षष्ठी। तदोः सः सा।

८८

वित्यतः सावित्यनुवर्तनेनतराह। औकारांतादेशः स्यात्सौ परइति। नन्वदसइतिपंचम्येवास्तु ततः परस्य सोरौवौकारो विधीयतां त्यदाद्यत्वेन असाविति रूपं सिध्यति। किं सुलो
पविधानेन। न च स्वरभेदः। उदात्तेन सहैकादेश औकारस्योदात्तत्वात्। मैवं। असकौ स्त्रीइत्यत्रापि प्रत्ययस्थादितीत्वप्रसंगात्। असुक इति। औत्वाभावे त्यदाद्यत्वं सादु
त्वांस्त्रियां तु असुका। अमुक इत्यमुकीइति च प्रयोगोऽसाधुरेव। एवममुकशर्मेत्यादिरपि। अदकः शर्मेत्यादेरेवन्याय्यत्वात्॥ ॥ एतईद्बहुवचने॥ पारिभाषिकस्य
बहुवचनस्य ग्रहणे अमीभिरित्यादिसिद्धावपि जसि अमी इति न सिध्येत्। न ह्यत्र एकारस्य बहुवचनपरतास्ति अतो व्याचष्टे॥ बह्वर्थोक्ताविति। विभक्ति कार्यं
प्रागिति। त्यदादीनामर इत्यादि सपादसप्ताध्यायीप्रत्यदसोसेरिति त्रैपादिकशास्त्रस्यासिद्धत्वादिति। कृते तु विभक्तिकार्ये सांतत्वात् उत्वयत्वयोरप्रवृत्तेश्चेति भावः॥
यदि तु पूर्वत्रासिद्धमित्यत्र कार्यासिद्धत्वमिष्येत तर्हि। अमू अमुमित्यादि न सिध्येत्। त्यदाद्यत्वे पररूपात्प्रागेव उत्वमत्वयोः कृतयोः पश्चान्मुत्वकार्यस्यासिद्धत्

एतईद्बहुवचने। ८।२।८१॥ अदसोदात्परस्यैतईत्स्याद्दस्य चमो बह्वर्थोक्तौ। अमी। पूर्वत्रासिद्धमिति विभक्तिकार्य्यम्प्राक्पश्चादुत्व
मत्वे। अमुम्। अमू। अमून्। मुत्वे कृते घिसंज्ञायान्नाभावः। न मु ने। ८।२।३। नाभावे कर्त्तव्ये कृते च मुभावो नाऽसिद्धः स्यात्। अमुना। अ
मूभ्यां ३। अमीभिः। अमुष्मै। अमीभ्यः। अमुष्मात्। अमुष्य। अमुयोः २। अमीषां। अमुष्मिन्। अमीषु॥ इति हलन्ताः पुल्लिङ्गाः॥

या अतो गुण इति पररूपे अमी इत्यादिरूपसिद्धिप्रसंगात्। किंच। चर्मवसे चर्मवः। सुष्टुवसे सुवः। अत्र परत्वात् स्कोरिति सलोपे तस्यासिद्धत्वाद्धल्ङ्यादिलोपे उ
कारःपुं न सिध्यतीति कार्यासिद्धिपक्षो हेय एव। अत्र वदंति। सपादसप्ताध्याय्यां विहितं कार्यं प्रति त्रिपाद्यां विहितमसिद्धमिति प्रक्रियाग्रंथोक्तकार्यासिद्धिपक्षस्या
मनोरथः अमूनित्यादि न सिध्येदिति केचित्। तन्न। प्रक्रियाग्रंथोक्ते हि कार्यं प्रति कार्ये कर्तव्ये असिद्धं पूर्वमेव न जातमित्यर्थः। पूर्ण स्त्रासिद्धत्वेप्यपमेव फलितं।
...। तस्य ...केन। यच्चास्य मुत्वारितं तस्यासिद्धत्वमप्राकं कर्तुमित्यसिद्धवचनातिदेश आश्रीयत इति। तथा चातिदेशेन कार्याप्रवर्तकत्वरूपोऽसिद्धधर्मः।
शास्त्रे तिदिश्यम ३ कार्यासिद्धत्वएव फलति। एवं च मनोरथ इत्यत्र उत्वे कर्तव्ये रेफलोपस्य पूर्वमेवाप्रवृत्तौ रोरुत्वस्याप्रतीघातान्मनोरथासिद्धिरप्रसंगात्। तथा अमु
मित्यादि। तद्धीरिति कार्यासिद्धिपक्षेन काप्यनुपपत्तिरिति। नमु ने नेति विषयसप्तमीत्याह नाभावे कर्तव्य इति। अन्यथा घेः परत्वाभावान्नाभावो न स्यादिति भावः ॥

सि॰ कौ॰
टी॰ त॰
९०

नन्वेवमपि कृते नाभावे सुपि चेति दीर्घः स्यात् दीर्घं प्रति मुत्वस्यासिद्धत्वादत आह। कृते चेति। एतच्च नेदं त्यस्यावृत्त्या लभ्यते। एकत्र विषयसप्तमी परत्र तु सत्सप्तमीत्याश्र
यणात्। वस्तुतस्तु कृते चेति व्याख्यानं व्यर्थं सन्निपातपरिभाषया सुपि चेति दीर्घस्य समाधेयत्वात्। नन्वधुनेनिवदमुनेत्येवोच्यतां किमनेनासिद्धत्वनिषेधेनेति चे
दत्राहुः नमुने इति योगविभागार्थो तेन रामः रामेभ्य इत्यादि सिध्यति अन्यथा हि रोरसिद्धतया उकारस्येत्संज्ञालोपौ कथं स्याताम्॥ ॥ ॥
ताम्। नचानुनासिकनिर्देशसामर्थ्यादित्संज्ञालोपौ प्रति रुत्वं नासिद्धमिति वाच्यं। नरमूलं देवरु हीत्यादौ हशि चेत्यस्य व्यावृत्तये अतो रोरित्यत्रानुनासिकस्यैव नि
र्देशो न तत्रैव चरितार्थत्वात्। एवं चस्यानिवत्सूत्रस्यापि प्रवृत्तौ परत्वाद्धि सर्गो लभ्यते। प्रत्ययः परश्चेत्यादिनिर्देशाच्चेह लिंगमिति दिक्॥ इति हलंताः पुल्लिंगाः
॥ ः॥ नहो धः॥ दरित्येव तु नोक्तं। लघ्वाहि सति न हुमित्यत्र रदाभ्यामिति नत्वं स्यात्। रुषस्योरिति च न स्यात्। नहो हस्येति। हाढ इत्यतोऽनुवृत्तेरलोऽन्त्यस्येत्यने
न वा हस्यैवादेश इति भावः। झलो झलि परस्य स्कोः संयोगाद्योरंते चेत्यतो झलपदांतग्रहणान्यनुवर्तंते तदाह। झलीत्यादि। झलि परतः पदांते वा विद्यमानस्येत्यर्थः। उपानदि

नहो धः।८।२।३४॥ नहो हस्य धः स्याज्झलि पदान्ते च। उपानत्। उपानद्। उपानहौ। उपानहः। उपानद्भ्याम्। उपानत्सु। उत्पूर्वात् स्निह प्री
ता। विस्पसा इत्विगादिना क्विन्निपातनात्तत्लोपषत्वे। क्विन्नंतत्वात्कुत्वेन हस्य घः। जश्त्वचर्त्वे। उष्णिक्। उष्णिग्। उष्णिहौ। उष्णिहः। उष्णि
ग्भ्याम्। उष्णिक्षु। द्यौः। दिवौ। दिवः। द्युषु। गीः। गिरौ। गिरः। एवं पूः। चतुरश्चतस्रादेशः। चतस्रः २ चतसृणाम्। किमः कादेशे टाप्। का। के। काः सर्वा

ञि। उपपूर्वान्नहेः संपदादित्वात् क्विप्। नहिवृतीति पूर्वपदस्य दीर्घः। सोर्हल्ङ्यादिलोपे धत्वं। जश्त्वचर्त्वे अत्रेदं बोध्यं। सुहृदनड्वाहो यस्यामिति बहुव्रीहौ स्वनड्वानिति
पुंवद्भावः रूपं। केचित्तु गोरादि ङीषं कृत्वा स्वनड्वाही इत्युदाजह्रुः। तदसत्। अनुपसर्जनाधिकारविरोधात्। गीरिति। गॄ निगरणे गृशब्दे इत्यस्माद्धातोः क्विप्। ॠत इद्धा
तोरितीत्वे रपरत्वे र्वोरुपधाया दीर्घ इति दीर्घः। पूरिति। पॄ पालनपूरणयोः। उदोष्ठ्यपूर्वस्येत्युत्वं। चतस्र इति। इह चतुरनडुहोरित्याम्न भवति। परत्वाद्रामं बाधि
त्वा चतस्रादेशे कृते सकृद्गताविति न्यायेन पुनस्तस्याप्रवृत्तेः। चतसृणामिति। न तिसृचतसृ इति न दीर्घः। सर्ववदिति। तेन तुल्यमिति वति सर्वनाम्नो वृत्तिमात्रे इति॥

॥ पुंवद्भावः॥

९०

यः सौ। यत्वमिदं स्त्रियामेव परिशेषात्। इदो य् पुंसीति पुंस्त्वप्रवचनात् क्लीबे सोर्लुक्कालुप्तत्वाच्च। एवमिति। सा। ते। ताः। या। ये। याः। एषा। एते। एताः। इत्यादी त्य
र्थः। वागिति। वचेः क्विब्वचिप्रच्छ्यादिना क्विप् दीर्घोऽसंप्रसारणं च। चोः कुः। अप्शब्द इति। आप्। तेर्ह्रस्वश्चेति ह्रस्वश्चकारात् क्विप्। अच उपसर्गात्त इत्यतो नुवर्त्ती
नादिहात्कारः स्यादित्यादिशिगिति क्विन्नन्तत्वात्कुत्वं। षडगंकाः प्रागवदृत्याः॥ अन्यत्रापीति। त्यदाद्युपपदत्वाभावेपीत्यर्थः। त्विडिति। त्विषदीप्तौ। विन्यस्मात्क्वि

यस्सौ। ७।२।११०॥ इदमो दस्य यस्स्यात्सौ। इदमोमः। इयं। त्यदाद्यत्वं टाप्। दश्चेति मः। इमे। इमाः। इमां। इमे। इमाः। अनया। हलि लो
पः। आभ्याम् ३। आभिः। अस्यै। अस्याः। अनयोः २। आसां। अस्यां। आसु। अन्वादेशे तु। एनां। एने। एनाः। एनया। एनयोः २। ऋत्वि
गादिना सृजेः क्विन्। अमागमश्च निपातितः। स्रक्। स्रग्। स्रजौ। स्रजः। स्रग्भ्यां। स्रक्षु। त्यदाद्यत्वं टाप्। स्या। त्ये। त्याः। एवं तद् यद् एत
द्। वाक्। वाग्। वाचौ। वाचः। वाग्भ्याम्। वाक्षु। अप्शब्दो नित्यं बहुवचनान्तः। अप्तृन्निति दीर्घः। आपः। अपः। अपो भि। ७।४।४८॥
अपस्तकारस्स्याद्भादौ प्रत्यये परे। अद्भिः। अद्भ्यः २। अपां। अप्सु। दिक्। दिग्। दिशौ। दिशः। दिग्भ्याम्। दिक्षु। त्यदादिष्विति दृशेः क्विन्वि
धानादन्यत्रापि कुत्वं। दृक्। दृग्। दृशौ। दृशः। त्विड्। त्विट्। त्विषौ। त्विषः। त्विड्भ्यां। त्विट्सु। त्विट्त्सु। सह जुषत इति सजूः। सजुषौ। सजु
षः। सजूर्भ्यां। सजूष्षु। सजूः षु। षत्वस्यासिद्धत्वादुत्वं। आशीः। आशिषौ। आशिषः। आशीर्भ्यां। असौ। त्यदाद्यत्वं टाप्। औङः शी। उत्व
मत्वे। अमू। अमूः। अमूम्। अमू। अमूः। अमुया। अमूभ्यां। अमूभिः। अमुष्यै। अमूभ्यां। अमूभ्यः। अमुष्याः २। अमुयोः २। अमूषां। अमुष्यां।
अमूषु॥ इति हलन्ताः स्त्रीलिङ्गाः॥

१ जश्त्वचर्त्वे। सजूरिति। जुषी प्रीतिसेवनयोरित्यस्मात् क्विप्। ससजुषो रुरिति षस्य रुत्वं। र्वोरिति दीर्घः। आशिषाविति॥ १।
आङ्पूर्वाच्छासेः क्विबुपसंख्यानमित्युपधाया इत्वं। शासिवसीति षत्वं। अमाविति अदसः त्यदाद्यत्वं पररूपत्वं टाप्। एकादेशस्य पूर्वान्तत्वेन ग्रहणात्। अदस औ सुलोप
श्चेति नेति सत्वमित्येके। अन्ये तु परत्वाद्विशेषविधेश्च पूर्वमौत्वं तन्नीत्वनात्वटायाविन्याहुः॥ इति हलन्ताः स्त्रीलिङ्गाः॥ ॥

इत्वमिति । असुसंज्ञा इति । इत्वमनडुच्छब्दान्तेऽपि प्रवर्तते । पदाधिकारस्थत्वादिति भावः । पूर्वपदस्येवेति । अन्यथा राजपुरुषो वा गार्ग्यीरित्यादौ नलोपकुत्वादिकं या

स्वमोर्लुक् । दत्वं । स्वनडुत् । स्वनडुही । चतुरनडुहोरित्याम् । स्वनड्वांहि । पुनस्तद्वत् । शेषं पुंवत् । दिवउत् । विमलद्यु अहः । अ
सर्वनामनी विभक्तिमाश्रित्य पूर्वपदस्य वोत्तरस्य वेड्स्यात् पिपरसंज्ञायामप्राप्तायां । उत्तरपदत्वे चाऽपदादिविधौ प्रतिषेध इति प्रत्ययलक्षण
न । विमलदिवी । विमलदिवि । अपदादिविधौ किं । दधिसेचौ । इह षत्वनिषेधकर्तव्ये पदत्वमस्त्येव । चकारस्य कुत्वे तु न । वाः वारी । अप्लन्त
त्वान्नुम् । वारि । चत्वारि । अल्लुमतेति कादेशेन । किं । के । कानि । इदं । इमे । इमानि । अन्वादेशे नपुंसके एनद्वक्तव्यः ॥ एनत् । एने । एनानि । एने
ना । एनयोः ॥ ब्रह्म । सम्बुद्धौ नपुंसकानां नलोपो वा वाच्यः ॥ हे ब्रह्मन् । हे ब्रह्म । हे ब्रह्मणी । हे ब्रह्माणि । रोऽसुपि । अहर्भाति । विभाषा ङिश्योः । अह्नी
अहनी । अहानि । अहन् । ८ । २ । ६८ ॥ अहन्नित्यस्य रुः स्यात्पदान्ते । अहोभ्यां । अहोभिः । इह अहः । अहोभ्यामित्यादौ । रत्वरुत्वयोरसिद्धत्वान्न
लोपे प्राप्ते । अहन्नित्यावर्त्य नलोपाभावं निपात्य द्वितीयेन रुर्विधेयः । तदन्तस्यापि रत्वरुत्वे दीर्घाण्यहानि यस्मिन् दीर्घाहा निदाघः । इह हल्ङ्या
दिलोपे प्रत्ययलक्षणेनाऽसुपीति निषेधाद्रत्वाभावे रुत्वस्याऽसिद्धत्वान्नान्तलक्षण उपधादीर्घः । सम्बुद्धौ तु हे दीर्घाहो निदाघ । दीर्घाहाणौ ॥ दी
र्घाहाणः । दीर्घाह्णा । दीर्घाहोभ्याम् । दण्डि । दण्डिनी । दण्डीनि । स्रग्वि । स्रग्विणी । स्रग्वीणि । वाग्मि । वाग्मिनी । वाग्मीनि । बहुवृत्रहा । बहुवृत्रघ्नी
बहुवृत्रहाणि । बहुपूषाणि । बह्वर्यमाणि । असृजः पदान्ते कुत्वं सृजेः क्विन्विधानात् । विश्वसृडादौ न । सृजिदृशोरिति सूत्रे रज्जुसृड्भ्यामिति भा
ष्यप्रयोगात् । सृट् । व्रश्चादिसूत्रे सृजियज्योः पदान्ते षत्वं कुत्वापवादः । स्रग्घृत्विक्शब्दयोस्तु निपातनादेव कुत्वं । असृक्शब्दस्तु असेरौ
णादिके सृजिप्रत्यये बोध्यः । असृक् । असृग् । असृजी । असृञ्जि । पद्दन्निति वा असन् । असानि । असृजा । अस्ना । असृग्भ्याम् । असभ्याम्

थासंभवं नस्यादिति भावः । उत्तरपदत्वे चेति । उत्तरशब्देनोत्तरपदमुच्यते । उत्तरपदस्य पदत्वे पदव्यपदेशो कर्तव्ये प्रत्ययलक्षणं न भवतीत्यर्थः ॥ ० ॥

मृं॥ ऊर्क्। ऊर्ग्। ऊर्जी। ऊर्ञ्जि। नरजानां संयोगः। बहूर्ञ्जि नुम्प्रतिषेधः॥ अन्त्यात्पूर्वो वा नुम्॥ बहूर्ञ्जि। बहूर्जि वा। कुलानि। त्यत्। त्यद्। त्ये। त्यानि। तत्।
तद्। ते। तानि। यत्। यद्। ये। यानि। एतत्। एतद्। एते। एतानि। अन्वादेशे तु एनत्। वेभिद्यतेः क्विप्। वेभित्। वेभिद्। वेभिदी। अल्लोपस्य स्थानिवत्त्वा
न्नलन्तत्वान्न नुम्। अजन्तलक्षणस्तु नुम् स्वविधौ स्थानिवत्त्वाऽभावात्। वेभिदि। ब्राह्मणकुलानि चेच्छिदि। गवाक्‌शब्दस्य रूपाणि क्लीबेऽर्चागतिभेद
तः। असंध्यवङ्पूर्वरूपैर्नवाऽधिकशतं मतं १ स्वमसुप्सु नव षड्भादौ षट्के स्युरिति जश्शसोः चत्वारि शेषे दशाके रूपाणीति विभावय १ तथाहि
गामञ्चतीति विग्रहे। ऋत्विगादिना क्विन्। अनिदितामिति नलोपः। अवङ्स्फोटायनस्येत्यवङ्। गवाक्। गवाग्। सर्वत्र विभाषेति प्रकृतिभावे। गोअक्। गोअग्। पू
र्वरूपे। गोक्। गोग्। पूजायां न्तस्य कुत्वेन ङः। गवाङ्। गोअङ्। गोङ्। अम्यपि एतान्येव नव। औङः शीभत्वाद् अचः इत्यल्लोपः। गोची। पूजायां तु। गवाञ्ची॥ गो
अञ्ची। गोञ्ची। जश्शसोः शिः शेः सर्वनामस्थानत्वान्नुम्। गवाञ्चि। गोअञ्चि। गोञ्चि। गतिपूजनयोस्त्रीण्येव। गोचा। गवाञ्चा। गोञ्चा। गोअञ्चा। गवा
ग्भ्याम्। गोअग्भ्याम्। गोग्भ्याम्। गवाङ्भ्याम्। गोअङ्भ्याम्। गोङ्भ्याम्। इत्यादि। सुपि तु ङमन्तानां पक्षे ङ्णोः कुक्टुगिति कुक्। गवाङ्क्षु। गोअङ्क्षु।
गोङ्क्षु। गवाङ्षु। गोअङ्षु। गोङ्षु। गवाक्षु। गोअक्षु। गोक्षु। न चेह चयो द्वितीया इति पक्षे। ककारस्य खकारे रूपसाम्याधिक्यं शङ्क्यम्। चर्त्वस्या
ऽसिद्धत्वात्। कुक्पक्षे तु। तस्याऽसिद्धत्वाज्जश्त्वाऽभाव। पक्षे चयो द्वितीया इति शास्त्रीयरूपाणि वर्द्धन्त एव। ऊह्यमेषां द्विर्वचनानुनासिकविक
ल्पनात्। रूपाण्यश्वाऽसिभूतानि ५२७॥ भवन्तीति मनीषिभिः १ तिर्य्यक्। तिरश्ची। तिर्य्यञ्चि। पूजायां तु। तिर्य्यङ्। तिर्य्यञ्ची। तिर्य्यञ्चि। यकृत्।
यकृती। यकृन्ति। पद्दन्निति वा। यकन्। यकानि। यक्ना। यकृता। शकन्। शकृती। शकृन्ति। शकानि। शक्ना। शकृता। ददत्। ददती। वा नपुंसकस्य
।७।१।७९॥ अभ्यस्तात्परो यः शता तदन्तस्य क्लीबस्य नुम्वा स्यात्सर्वनामस्थाने। ददन्ति। ददति। तुदत्॥ ॥ ॥

सु.
सि.कौ.
टी.त.
८२

एतेन सुधियौ सुधियः इत्यत्रांतर्वर्तिसुपा पदत्वात्यणो ऽशाकल्यप्रसंग इत्याशंका परास्ता। उक्तरीत्या प्रत्ययलक्षणप्रतिषेधात्। उत्तरपदत्वे किं। राजपुरुष इत्यादौ नलोपो
यथा स्यात्। पश्यतिरधीत्यादावपि दधिशब्दस्य पदत्वे प्रत्ययलक्षणं भवत्येव। उत्तरपदस्य समासावयवे रूढत्वात्। दधिसेचाविति। सिंचत इति सेचौ। अन्येभ्यो
पि दृश्यंत इति विच्। दध्नः सेचौ इति षष्ठीसमासः। उपपदसमासे तु प्राक् सुबुत्पत्तेः समासविधानात् सेच्शब्दस्य पदसंज्ञा नास्तीति पदादित्वे सकारस्य न स्या
त्। नन्वेवमुपपदसमासे षत्वं दुर्वारमिति चेत्। अत्राहु कैय्यटः। अनभिधानात् सोपपदाद्विजभावः। दधिसेचाविति प्रयोगाभावात्। वस्तुतस्तु पदादा
दिः पदादिरिति पक्षे तु उपपदसमासे पि षत्वं सुपरिहरं॥ अन्वादेश इति। अस्यैवेदं विधीयते न त्वौट्शसादिषु फलाभावात्। स्वमोर्नपुंसकादित्यमो लु
कालुप्ते पि प्रत्ययलक्षणमिह प्रवर्तते वचनसामर्थ्यादित्याहुः। वस्तुतस्तु द्वितीयाटौस्स्विति सूत्र एव एनदुक्तव्यः। एनं। एनौ। एनानित्यादिस्तु त्यदा
दात्वेन सिद्धं। क्लीबे अमि लुंकालुप्तत्वेपि तकारोच्चारणसामर्थ्यादेनदादेशः। न चैवमेनच्छ्रितमित्यत्राप्येनदादेशापत्तिः। द्वितीयाश्रितेति समासे कृते सुपो लुकि
द्वितीयादिविभक्तिपरत्वाभावात्। न च तकारोच्चारणसामर्थ्यादेनदादेश इत्युक्तमिति वाच्यं। एकपदाश्रयत्वेनांतरंगे स्वमोर्लुकि चरितार्थत्वेन बहिरंगे सामासिके लुकि न दप्रवृत्तिरि
ति मनोरमायां स्थितं। ब्रह्मणि इति। इह विभाषा ङिश्योरित्यल्लोपो न, न संयोगाद्वमंतादिति निषेधात्। रोसुपि। अहर्भातीति। अहन्निति रुत्वे कृते तु हशि चेत्युत्वप्रसक्त्या।
अहोभातीति स्यादिति भावः। नलोपाभावं निपातयेति। अहन्नित्यत्र नकारांतरं प्रश्लिष्य नांतस्य अहन्शब्दस्य रुरिति व्याख्ययापि रुत्वरत्वयोर्नकारस्यानिकत्वं सेत्स्यतीति
बोध्यं। अहंतस्यापीति। पदाधिकारत्वादिति भावः। न चात्र प्रत्ययलक्षणन्यायेन अंतर्वर्तिनीं विभक्तिमाश्रित्य समासैकदेशस्याप्यहन्शब्दस्य पदत्वाद्रुत्वं स्यादेव किमनेनेन तरंत
दिध्याश्रयत्वेनेति शंक्यं। उत्तरपदत्वे चापदादिविधाविति प्रतिषेधेन प्रत्ययलक्षणाप्रवृत्तेः। सृजिदृशोरिति सूत्र इति। एतच्चोपलक्षणं। मृजेर्वृद्धिरिति सूत्रेपि तत्प्रयोगात्।
रज्जुसृड्भ्यामिति। ननु भ्याम्प्रत्ययो झलादिरकिन् भवतीति सृजिदृशोरित्यमागमः स्यात्। मैवं। धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्। नचैवमपि अनुदात्तस्य चर्दुपध
स्येति वैकल्पिकः प्राप्नोति न हि धो धातोः स्वरूपेणानुपादानादिति शंक्यं। धातोरुच्यमानं कार्यं तत्प्रत्यय एवेति परिष्कारात्। एवं च प्रसृड्भ्यां। प्रसृड्भिरित्यादौ नायं दोषः प्र
सज्यते। एतच्च मृजेर्वृद्धिरिति सूत्रे भाष्ये स्पष्टं। ननु धातोरुच्यमानं कार्यं तत्प्रत्यय एवेति चेत् धियौ धियः। भुवौ। भुव इत्यादावियङुवङौ न स्यातां। किंतु धियिधिपतुः लुलुवतुरित्या

८२

दादेवस्यानां। स्नस्यं। वस्नु गत्याधातोरेवोच्यच्यमानं कार्यमेयङादिकं न भवति। किंतु अंगस्योच्यमानमिति वैषम्यात्। कुत्साप्रवाद इति। षत्वसूत्रे स्नमुजयजेति विशिष्यप
हलादिति भावः। असृक् शब्दस्त्विति। एतच्च सीरस्वामिग्रंथे स्पष्टं। ऋजुप्रत्यये बोध्य इति। यद्यप्यस्मिन्पक्षे स्वरो भिद्यते तथापि लोके स्वरस्यानादराद्दैतुवा हुलकादि
ष्ठ स्वरः सिध्यतीति भावः। वहूर्जाति। इदं अंत्यादिति चवाचनिकं। तथा च वार्तिकं। बहूर्जि प्रतिषेधः अंत्यात्पूर्वं नुममेके इति। भाष्ये तु अचः परो यो झल् तदंतस्य
मुश्रित्याश्रित्य प्रथमवार्तिकं प्रत्याख्यातं। एवं च अन्नर्जि इत्यत्र नुम् दुर्लभः। किंच। उर्दमाने क्रीडायां च। गर्हे गर्हायामित्यादीनां क्विंवतानां भाष्यमते नुमानभा
व्यमेवेति बोध्यं। अल्लोपस्य स्थानिवत्वादिति। क्वौलुप्तं न स्थानिवदिति तु नेहाश्रीयते। तस्य क्वाचित्कत्वात्। क्वौ विधिं प्रति न स्थानि
वदित्यस्यैव सार्वत्रिकत्वादिति भावः। जायंते नवसौ तथा [illegible] चन नभ्यां भिस्भ्यसां संगमेषु इः संख्यानि न वै वसुप्यथ जसि त्रीण्येवत हृच्छसि। चत्वार्थेन्य वच
सः कस्यैव बुधाः शब्दस्य रूपाणि तज्ज्ञानं तु प्रतिभासि चेल्लिखादि तुं पाण्मासिकोत्रावधिरिति नरपतिसभायां क्वचित् केनचित्प्राचीनेन कृतस्यास्य पद्यस्य प्रा
चीनैरेव पंडितैः कैश्चिद्गवाक् शब्दस्यत्यादिना विभाव ये त्यंत [illegible] श्लोकद्वयेन समाधानमुक्तं। तदेव श्लोकद्वयं प्रकृतोपयोगादाह। गवाक् शब्दस्य रूपाणीति। अंच
तेर्गतावनलोपः पूजायां तु न त्याग्यनाह। अर्चा गतिभेद तदिति। आद्यादिक्लान्नसि न पूजार्थगत्यर्थभेदेन असंध्यवङादिभिर्नवाधिकशतं रूपाणि बोध्यानीत्यर्थः।
उक्तसंख्यामेव व्यवस्थापयति। सु [illegible] सु न वेति। प्रत्येकमिति शेषः। एवमग्रेपि षट्। त्रीणि चत्वारीत्यत्रापि बोध्यं। रूपाणीति। संकलनया नवाधिकशतं रू
पाणीत्यर्थः। इह च यो [illegible] या इति वार्तिकमनाश्रित्य नवा [illegible] एकशतमित्युक्तमिति बोध्यं। तदाश्रयणे तु त्रीणि रूपाणि वर्द्धंते इत्यनुपदमेव वक्ष्यमाणत्वा
त्। इत्यादीति। आदिशब्देनान्यान्यपि ज्ञेयानि। तद्यथा। गवाग्भिः। गोअग्भिः। गोग्भिः। गवाङ्भिः। गोअङ्भिः। गोङ्भिः। अपि। गोचे। गवांचे। गोअंचे। गोंचे। भ्यामि प्राग्वत
भ्यसि गवाग्भ्यः। गोअग्भ्यः। गोग्भ्यः। गवाङ्भ्यः। गोअङ्भ्यः। गोङ्भ्यः। गोचः। गवांचः। गोअंचः। गोंचः। भ्यामि भ्यसि च प्राग्वत्। ङसि पंचम्येकवचनवत्। ओसि। गोचो
गवांचोः। गोअंचोः। गोंचोः। आमि। गोचां। गवांचां। गोअंचां। गोंचां। ङौ तु गोचि। गवांचि। गोअंचि। गोंचि। ओसि प्राग्वत्। सुपि तु गवाङ्क्षु। गवाङ्षु। गोअङ्
क्षु। गोअङ्षु। गोङ्क्षु। गोङ्षु। गवाक्षु। गोअक्षु। गोक्षु। ननु नाम [illegible] भ्यस् द्वये ङसिङसोः ओसि द्वये च समानरूपत्वात् कथमिह नवाधिकशतमित्युक्तमिति

अर्थभेदेन रूपभेदेन भिन्नत्वं तयोक्तमिति। षण्मासाधिकंषण्मासमिति। नवसु मध्ये ककारस्य नैपातिक खकार प्रवृत्त्या रूपषट्काधिकं न संख्यामित्यर्थः। चर्त्वस्या सिद्धत्वाच्छितितथा च शास्त्रदृष्ट्या ककारो नास्त्येव किंतु गकार एवास्तीति भावः तस्यासिद्धत्वादिति। कुको असिद्धत्वादित्यर्थः। वर्द्धत एवेति। एवं च त्रयाणां ना धिकं सप्तवास्तु पिद्वादशरूपाणि भवंतीति संकलनया द्वादशाधिकशतं मतं। ननु नवाधिकशतमिति भावः। अभ्यासि भूतानीति। सप्तविंशत्यधिकानि चशता न्यर्थः। सोनवानामंसमस्य त्वेअष्टादश। औङि चतुर्णां मध्ये पूजार्थानां त्रयाणांत्रहित्वे सप्त। अलोपप्रगृह्य इत्यनुनासिकत्वनास्ति प्रगृह्यत्वात् तसिन्हित्व स्यानुनासिकेस्य च विकल्पात षट्दश। संकलनया सप्तत्रिंशत्। एवंद्वितीयायामपि विभक्तौ सप्तत्रिंशत्। तथा च संकलनया चतुःसप्ततिः। टायां चतुर्णां मध्ये पूजार्थानांत्रयाणांत्रहित्वे सप्त तेषां ... आनामनुनासिकां वैकल्पे चतुर्दश संकलनया अष्टाशीतिः। भ्यामि षट्सु रूपेषु भान्पूर्वस्य हित्वे द्वादश तेषां द्वा दशानामपि यलोपः यरतिर्यग्हित्वे चतुर्विंश तिः। तेषामपि मकारस्य हित्वे ऽष्टचत्वारिंशत्। संकलनया षट्त्रिंशदधिकं शतं। भिसि चतुर्विंशतिः भान् पूर्वस्य विसर्गस्य च हित्वात्। संकलनया षष्ट्युत्तर शतं। ङपि चतुर्णां मध्ये पूजार्थानांत्रयाणांत्रहित्वे सप्त अनुनासिकत्वनास्ति। एकारस्यानण्त्वात्। संकलन या सप्तोत्तरषष्ट्यधिकं शतं। भ्यामि प्राग्वदेवाष्टचत्वारिंशत्। तथैव भ्यसि भान्पूर्वस्य यविसर्गयोश्च हित्वात्। संकलनया त्रिषष्ट्यधिकं शतद्वयं। ङसौ च तुर्णां मध्ये त्रहित्वे सप्त। तेषां तु सप्तानां विसर्गहित्वे चतुर्दश।। संकलनया सप्तोत्तरसप्तत्यधिकं शतद्वयं। भ्यां भ्यसोः प्राग्वदेव प्रत्येकमष्टचत्वारिंशत्। संक लनया त्रिसप्तत्यधिकं शतत्रयं। ङसि वि वङस ओस आमङि ओस इत्यत्रापि प्रत्येकं चतुर्दश। चतुर्षु रूपेषु मध्ये त्रहित्वे सप्तानामप्यंत्यस्य हित्वात्। ङौ तु सप्तानामप्यंत्यस्यालोपप्रगृह्यस्येति वैकल्पिकानुनासिकप्रवृत्तेः। संकलनया त्रिचत्वारिंशदधिकं शतचतुष्टयं। सुपि त्वत्यर्थे त्रयाणां कहित्वे षट् तेषां तु खयः श रतिषहित्वे द्वादश उकारस्यानुनासिके चतुर्विंशतिः संकलनया सप्तोत्तरषष्ट्यधिकं शतचतुष्टयं। पूजायां तु कुगभावे त्रयाणां ङकारहित्वे ऽनुनासिके च द्वादश कुक्पक्षे तु चयो द्वितीयादेशेन षट्। षण्णां ङषयोर्हित्वे ऽनुनासिके च अष्टचत्वारिंशत्। संकलनया सप्तविंशत्यधिकानि पंचशतानीत्यर्थः। तिरश्चीरुग्मि। भत्वाद्च इत्य ल्लोपः। अलोपे इति वचनात्तिर्यादेशाभावः। इदर्दिमि। पुंल्लिंगेप्ययं वृत्त्यादितः।। शनेति।। ऋदुशनेत्यनङ्।। शतृप्रत्यय इत्यर्थः ।।   ।।   ।।

आदिशब्देनस्फुर्ज्जिर्वीरादयो ग्राह्याः। सुपुमांसीति। पुंसोअसुङिति सूत्रे सुटी तिव्याचक्षाणस्यमाचोमते जसीष्टसिद्धावपिशसिनैतत्सिध्येत्। औङि चातिप्रसंगः इतो त्सर्वनामस्थानइत्यस्नो नुवृत्तिं पर्यालोच्यसर्वनामस्थान इतियन्ना श्रुतं ब्रुवतां तु सर्वेष्टसिद्धिः॥ इति हलन्ताः नपुंसकलिंगाः॥ ॥ः॥ स्वरादिनिपातम व्ययं। स्वरादयश्चनिपात। इति समाहारद्वंद्वः। ननु चादिष्वेव स्वरादीन्पठित्वाप्रक्षं तसूत्रं परित्यज्यतद्धितश्चासर्वैन्यादि सूत्रचतुष्टयमपि चादयोऽसत्व इत्यस्मात् ऊर्ध्वंकृतां अव्ययप्रदेशेषु निपातशब्देनैव व्यवह्रियतां। मिति चेन्न। स्वस्ति वाचयति स्वः पश्यति स्वः पतनीत्यादौ क मीदिकारक योगेनसत्ववाच कत्वा

स्वरादिनिपातमव्ययं॥१।१।३७॥ स्वरादयोनिपाताश्चाव्ययसंज्ञाः स्युः। स्वर्। अन्तर्। प्रातर्। पुनर्। सनुतर्। उच्चैस्। नीचैस्। शनैस्। ऋधक्। ऋते। युगपत्।
आरात्। पृथक्। ह्यस्। श्वस्। दिवा। रात्रौ। सायं। चिरं। मनाक्। ईषत्। जोषं। तूष्णीं। वहिस्। अवस्। समया। निकषा। स्वयं। वृथा। नक्तं। नञ्। हेतौ। इद्धा। अद्धा। सा।
मिवत्। ब्राह्मणवत्। क्षत्रियवत्। सना। उपधा। सनत्। स। नाते। तिरस्। अन्तरा। अन्तरेण। ज्योक्। कं। शं। सहसा। विना। नाना। स्वस्ति। स्वधा। अलं। वषट्। श्रौ
षट्। वौषट्। अन्यत्। अस्ति। उपांशु। क्षमा। विहायसा। दोषा। मृषा। मिथ्या। मुधा। पुरा। मिथो। मिथस्। प्रायस्। मुहुस्। प्रवाहुकं। प्रवाहिका। आर्य्यहलं। अभीक्ष्णं।
साकं। सार्द्धं। नमस्। हिरुक्। धिक्। अथ। अम्। आम्। प्रताम्। प्रशान्। प्रतान्। मा। माङ्। आकृतिगणोयं। च। वा। ह। अह। एव। एवं। नूनं। शश्वत्। युगपत्। भू
यस्। कूपत्। कुवित्। नेत्। नेत्। चेत्। चण्। कच्चित्। यत्र। तत्र। नह। हन्त। माकिं। माकीं। नकिं। नकीं। आकीं। माङ्। नञ्। यावत्। तावत्। त्वै। द्वै। रै। श्रौषट्। वौ
षट्। स्वाहा। स्वधा। वषट्। तुम्। तथाहि। खलु। किल। अथ। सुष्ठु। स्म। आ। इह। उपसर्गस्वरविभक्तिप्रतिरूपकाश्च। अवदत्तं। अहंयुः। अस्ति क्षीरा।
अ। आ। इ। ई। उ। ऊ। ए। ऐ। ओ। औ। पशु। शुकम्। यथा कथा च। पाट्। प्याट्। अङ्ग। है। हे। भोः। अये। द्य। विषु। एकपदे। युत्। आतः। चादिरप्याकृतिगणः॥

न तेषां निपातसंज्ञाना पत्तेः। चादीनां ह्यसत्ववाचिनामेव निपातसंज्ञा न तु सत्ववाचिनां। स्वरादीनां तु सत्ववाचिनामसत्ववाचिनां चाव्ययसंज्ञेष्यत इति व्यवस्थानां
दत्तेश्च। अथ प्राग्रीश्वरान्निपाताः स्वरादीनि। चादयोऽसत्व इति सूत्ययतां। तथाहि सति स्वरादीनां सत्ववचनानामपि निपातसंज्ञा से त्स्यतीति चेन्न। एवं हि ति
निपात एकाजनाङिति प्रगृह्यसंज्ञा स्वरादीनामपेक्षाचां प्रसज्येत। सो हि स्वरादिषु किमोत् दक्षिणादाजित्यदाचावेकाचौत द्विमौ केन्त्रभृत यएकाचः। कृतप्रत्य

प्राश्नसंतिानसिलारिस्त्रहितएधार्च्येर्यंत इतिसूत्रस्य कृन्मकोरसंध्यक्षरांत इतिसूत्रस्यचस्वरादिगणपठितत्वात्। यद्यप्यत्रमूलेस्वरादिषुगणसूत्रद्वय
मिदंनपठितंतथापि प्राचांपाठेत्वस्तीत्यनुपदमेवस्फुटीकरिष्यते॥ स्वरादीनुदाहरति। स्वरित्यादिना। स्वरितिस्वर्गेपरलोकेच। अंतरितिमध्ये। प्रातरिति
प्रत्यूषे। पुनरित्यप्रथमेविशेषेच। सनुतरित्यंतर्द्धाने। स्वराद्याः पंचरेफांताः। तेनस्वर्यातिप्रातरत्रेत्यादावुत्वंनभवति। सांतत्वेहिस्यादेवदोषः। उच्चैसमह
ति। नीचैस्अल्पे। शनैस्क्रियामांद्ये। ऋधक्सत्येपि। वियोगशीघ्रसामीप्यलाघवेष्वित्यन्ये। ऋतेवर्जने। युगपदित्येककाले। आरात्दूरसमीपयोः। पृथक्
भिन्ने। ह्यस्अतीतेऽन्हि। श्वोऽनागतेऽन्हि। दिवादिवसे॥ रात्राविति निशि। सायमितिनिशामुखे। चिरमितिबहुकाले। मनाक्ईषत्इमावल्पे। जोषंसुखेमौ
नेच। तूष्णीमितिमौने। बहिस्अवमरमौवाद्ये। समयेतिसमीपेमध्येच। निकषेत्यंतिके। स्वयमितिआत्मने त्यर्थो। वृथेतिव्यर्थो। नक्तमितिरात्रौ। नञितिनि
षेधे। हेतौविति निमित्तार्थे इद्धेतिप्राकाश्ये। अद्धेतिस्फुटावधारणयोः। तत्वातिशययोरित्यन्ये। सामीत्यर्द्धजुगुप्सितयोः। वत्। तेनतुल्यमित्यादिभिर्वि
हितो यो वतिप्रत्ययः सइहगृह्यते। तदाह। ब्राह्मणवत्। क्षत्रियवत्। इति। प्रत्ययमात्रस्यसंज्ञाप्रयोजनाभावात्प्रत्ययांतमुदाहृतं। यस्तुउपसर्गाच्छंद
सिधात्वर्थेविहितः सइहनगृह्यते। यद्वुदूतोनिवतो यासीत्यत्रसत्वधर्मस्यलिंगसंख्यान्वयस्यदर्शनात्। अत्रवदंति। तद्धितश्चासर्वविभक्तिरित्यत्रतसि
वतीइतिवृत्तिप्रत्ययोर्विपरिगणने तिच्चनकर्तव्यं। स्वरादिपाठेनैवगतार्थत्वात्। स्वरादिषुवावदितिनपठनीयमिति। सनासनत् सनात्एतेनित्ये। उपधेतिभेदोति
रस्अंतर्द्धौ। तिर्यग् — पार्श्वेच। अंतरेतिमध्येविनार्थेच। अंतरेणेतिवर्जने। ज्योगितिकालभूयस्त्वप्रश्नेरीत्यार्थे स प्रत्यर्थेच। कमितिवारिमूर्द्धनिदा
सुखेष्व ।शमितिसुखे। सहसेत्याकस्मिकाविमर्शयोः। विनेतेवर्जने। नानेत्यनेकविनार्थयोः। स्वस्तीतिमंगले। स्वधापितृदाने। अलंभूषणपर्याप्तिश
क्तिवारणनिषेधेषु। वषट्वौषट्श्रौषट्एतेहविर्दानेअन्यदित्यन्यार्थे। अस्तीतिसत्तायां। उपांश्वित्यप्रकाशोच्चारणरहस्ययोः। क्षमेतिक्षांतौ। विहायसेतिवियदर्थे। दोषेतिरात्रौ। मृषा
मिथ्येत्येतौवितथे। मुधेतिव्यर्थे। इतऊर्ध्वंक्त्वातोसुन्कसुनः। कृन्मकारसंध्यक्षरांतः। अव्ययीभावश्चेति। गणसूत्रत्रयं अष्टाध्यायीस्थत्रिसूत्रीसमानार्थकमिहनपठितंचे
दपिप्राचीनगणपाठेतदस्तीतिबोध्यं। वैयर्थ्यंतुपरिहरिष्यते। पुरेत्यविरतेचिरातीतेभविष्यदासन्नेच। मिथोमिथसएतौरहःसहार्थयोः। प्रायसितिबाहुल्ये। मुहुसितिपु

सु· सि·कौ· टी·त· ७५

प्रवाहुकमिति प्युनकाले। उर्ध्वार्थे च। प्रवाहिकेति पाठांतरं। आर्यहलमिति वलात्कारे। शाकटायनस्तु। आर्येति प्रतिवंधे। हलमिति प्रतिषेधविवादयोरित्या
हा। आभीक्ष्णमिति पौनःपुन्ये। साकं सार्द्धमेतौ सहार्थे। नमस नतौ। हिरुक् वर्जने। धिग्निंदाभर्त्सनयोः। इतऊर्ध्वं तसिलादयस्तद्धितएधाचूपर्यंतः। शस्तसी
कृत्व सुच् सुच आस्थालौ च्व्यर्था श्चेति। प्राचीनगणपाठे स्त्रीतिबोध्यं। तसिलादीत्यादेरयमर्थः। पंचम्यास्तसिलित्यारभ्य एधाच्चेत्येतदंतैः सूत्रैरुक्ता ये तद्धितास्त
स्ताः स्वरादिषु बोद्धव्याः। तथा वह्वल्पार्थाच्छस्। प्रतियोगे पंचम्यास्तसिः। तेनैकदिक्। तसिश्चेत्ययमपि तसिः। क्रियाभ्यावृत्तिगणने कृत्वसुच्। द्वित्रिचतुर्भ्यः सु
च्। इण आसिरित्युणादिसूत्रैणविहित आसिप्रत्ययपूर्वविध्येमात्या लच्छंदसि संपद्यकर्तरि च्विः। विभाषासातिकार्त्स्न्ये इत्येताचेत्येतदंता अपि ग्राह्या इति। अ
मशैच्यैः स्वैच। आम् अंगीकारे। अम् च्छंदसि। किमेत्तिङव्ययेति कामप्रत्ययादि भिश्च विहिता अपि अ मामौ गृह्येते इत्येके। प्रतंनयप्रतरां यथा च तरांकार
यामास। प्रताम् ग्लानौ। प्रशान् समानार्थे। प्रतान् विस्तारे। म माङ् एतौ निषेधाशंकयोः। आकृतिगणाइति। तेनान्येपि ज्ञेयाः। तथाहि। कामं स्वाच्छंद्ये प्रकाममित्यति
शये। भूयस्इति पुनरर्थे। सांप्रतमिति न्याय्ये। परमिति किंत्वर्थे। साक्षात्प्रत्यक्षे। साचीतिर्यगर्थे। सत्यमित्यर्द्धांगीकारे। मंक्षु आशु एतौ शीघ्र्ये। संवत् वर्षे। अ
वश्यं निश्चये। उषेति रात्रौ। ओमित्यंगीकारे ब्रह्मणि च। भूरिति पृथिव्यां। भुवइत्यंतरिक्षे। झटिति झगिति तरसा एते शीघ्रे। सुष्ठु प्रशंसायां। दुष्ठु निकृष्टे। सुपूजा
यां। कु इति कुत्सिते। ब्रदर्थयोः। अंजसेति तत्वशीघ्रार्थयोः। मिथु इति द्वावित्यर्थे। अस्तमिति विनाशे। स्थाने इति युक्ते। वरमिति ईषदुत्कर्षे। सुदि शुक्लपक्षे
वदि कृष्णपक्षे इत्यादि। चादीनुदाहरति। चेत्यादिना। चेति समुच्चयान्वाचयेतरेतरयोगसमाहारेषु। वा स्याद्विकल्पोपमयोरिवार्थेपि समुच्चये। हेति प्रसिद्धौ॥
अहेति पूजायां। एवेत्यवधारणे। अनवक्लृप्तौ च। एवमित्युक्तपरामर्शे। नूनमिति निश्चये तर्के च। शश्वदिति पौनःपुन्ये नित्ये सहार्थे च। युगपदित्येककाले। भू
यस् पुनरर्थे। आधिक्ये च। कूपदिति प्रश्ने प्रशंसायां च। कुविदिति भूयर्थे प्रशंसायां च। नेदिति शंकायां प्रतिषेधविचारसमुच्चयेषु च। चेदिति यद्यर्थे। चण अ
प्रश्चेदर्थे णानुवंधस्तु निपातैर्यद्यदिहंतकुविन्नेच्चेच्चण् इति विशेषणार्थः। समुच्चयादौ त्व ननुवंधकः। कच्चिदितीष्टप्रश्ने। यत्रेति अनवक्लृप्त्यमर्षगर्हाश्चर्ये
षु। नावकल्पयामि न मर्षये गर्हे आश्चर्यं वा यत्र भवान् वृषलं याजयेत्। नहेति प्रत्यारंभे। हंतेति हर्षविषादे अनुकंपायां वाक्यारंभे च। माकिः माकीं नकिरिति त्र

८

योऽपि वर्जने। माङ् नञौ स्वसदृशौ प्रोक्तौ। इह पाठस्तु निपातत्वार्थोऽलिनाद्युदात्तत्वं फलं सिध्यतीति केचित्। तदसत्। फिट्स्वरेणापीष्टसिद्धेः। अन्ये त्वाहुः। सत्ववचना
नामप्यव्ययसंज्ञार्थस्त्वरादिपाठ इति। तदप्यसत्। लक्ष्मीवाचकस्यापि माशब्दस्याव्ययत्वापत्तेः। तस्मा दुभयत्र पाठश्चिंत्यप्रयोजनः। यावत्तावदेतौ साक
ल्यावधिमानावधारणेषु। साकल्ये। यावत् कार्यं तावन् न कृतं। अवधौ। यावद्गंतव्यं तावन्निष्ठा। माने। यावद्दत्तं तावद्भुक्तं। अवधारणे। यावदमत्रं तावद्ब्राह्मणानामंत्रयस्व।
त्वैविशेषवितर्कयोः। द्वैवितर्के। न्वैइति पाठांतरं। रे हाने अनादरे च। रे करोति दहातीत्यर्थः। त्वं रे किं करिष्यसि। श्रौषट् वौषट् एतौ हविर्दाने। स्वाहा देवताभ्यो
दाने। स्वधेति पितृभ्यः। श्रौषडादीनामनेकाचामुभयत्रपाठः स्वरभेदार्थः। तुमिति तुंकारे। गुरुं तुं कृत्य हुं कृत्य। नथाहीति निदर्शने। खल्विति निषेधवाक्यालंका
र निश्चयेषु। किलेति वार्तायामलीके च। अथेति मंगलानंतरारंभप्रश्नकार्त्स्न्याधिकारप्रतिज्ञासमुच्चयेषु। अयं स्वरादावपि तेन मंगलवाचकस्य सत्वार्थस्याव्य
यत्वं सिध्यति। अतएव श्रीहर्षः उदस्य कुंभीरथ शातकुंभजाश्चतुष्कचारुत्विषि वेदिकोदरे। यथाकुलाचारमथावनींद्रजा पुरंध्रिवर्गः स्नपयांबभूव तां।
[illegible] अत्र हि अथशब्दस्यावमृत्वेन्यस्य मंगलं स्वरूपं न चेकार इत्यर्थः। निपातस्तु स्वरूपेणैव मंगलं मृदंगध्वनिवत्। सुष्ठुस्वरभेदार्थपाठः। स्मेत्यतीते पादपूरणे च। आ
दर्हत्युपक्रमहिंसाकुत्सनेषु। आद्दह स्वधामग्निरित्यत्र [illegible] परकारा आदिति पृथक् पदं पठंति। अ वदत्तमिति। इह अवस्यानुपसर्ग
त्वाद् चरुपसर्गात्त इति न भवति। अहमिति सुवंतप्रतिरूपकमहंकारे। एवं गेयेके न विनीतौ वामिति युवामित्यर्थे। सुवंतप्रतिरूपकमव्ययं। अस्तीति तु
तिङंतप्रतिरूपकं। एवं त्वामस्मि वच्मीत्यत्रास्मीत्यहमर्थे तिङंतप्रतिरूपकं। आहेत्युवाचेत्यर्थे। आसेति बभूवेत्यर्थे इत्यादि बोध्यं। अहंयुरिति। अहं शु
भमौ युस्। यदि तु त्वाहौ सौ वितिमपर्यंतस्याहादेशे येलोपे च कृते निष्पन्नो योऽहंशब्दस्तस्माद्युस्यात्यपः क्रियेत तर्हि सुपो लुकि अस्मद्युरिति स्यात् ते मदीय इत्यत्र
वमपर्यंतस्य मादेशे सति मद्युरिति स्यादिति भावः। अस्ति क्षीरा। तिङंतत्वे तु बहुव्रीहिसमासोऽयं नोपपद्यत इति भावः। अ इति संबोधनेऽधिक्षेपे निषेधे च। आ
इति वाक्यस्मरणयोः। इति संबोधने जुगुप्साविस्मयेषु। [illegible] संबोधने। पशु सम्यगर्थे। पशु मन्यमानाः। शुकं शोच्य्या। यथाकथा चेत्यनादरे। पाट्
प्रभृतयः संबोधने। घेति हिंसाप्रातिलोम्यपादपूरणेषु। [illegible] नानार्थे। एकपदे इत्यकस्मादित्यर्थे। युत कुत्सायां। आत इति इतोपीत्यर्थे। आकृतिगण इति।

नद्यथा यत्नः शिरि इदं तौ। आहोस्विद्विकल्पे। सीमः सर्वतोभावे। सुकं अतिशये। अनुकं वितर्के। शंवद् अन्तःकरणे आभिमुख्ये च। वषाट् पूरणे स्वार्थे च। दिष्ट्ये
त्यानन्दे। चटु चाटु प्रियवाक्ये। कुमिति भर्त्सने। स्वेति सारस्ये। अद्यत्वेति इदानीमित्यर्थे। इत्यादि। अत्र स्वरादिचाद्योराकृतिगणत्वाद्विशेषविधेयं निपातस्वरद्रष्ट
स्ते चादिषु। अन्ये तु स्वरादिर्विकस्वरद्वयमाजलमुभयत्र बोध्यम्॥ ॥ तद्धितश्चासर्वविभक्तिः॥ सर्वेति वचनत्रयात्मिकेत्यर्थः॥ नोत्पद्यत इति। किं त्वेकवचनमेवोत्प
द्यत इति भावः। तद्धितः किम्। एकः। द्वौ। त्रयः। असर्वेत्यादि किम्। औपगवः। ननु पञ्चालाः गोदौ वरणा इत्यादावतिप्रसंगः। न च लुब्योगाप्रख्यानादिति वदतां नैषां त
द्धितांतत्वमंगीकृतमिति नातिप्रसंग इति वाच्यम्। एवमपि पचतिकल्पं पचतिरूपमित्यादावतिव्याप्तेर्दुर्वारत्वादित्याशंक्याह। परिगणनं कर्तव्यमिति। तसिलादय
इति। पंचम्यास्तसिलिति विहितो यस्तसिल् तदादयो याप्ये पाशविति विहितपाशप्प्रत्ययपर्यन्ता इत्यर्थः। शस्प्रभृतय इति। बहुल्पार्थादिति विहितो यः श

तद्धितश्चासर्वविभक्तिः। १।१।३८॥ यस्मात्सर्वा विभक्तिर्नोत्पद्यते स तद्धितान्तोऽव्ययं स्यात्। परिगणनं कर्तव्यम्। तसिलादयः प्राक्पाशपः॥
शस्प्रभृतयः प्राक्समासान्तेभ्यः। अम्। आम्। कृत्वोर्थाः॥ तसिवती। नानाञाविति। तेनेह न। पचतिकल्पम्। पचतिरूपम्। कृन्मेजन्तः। १।१।
३९। कृद्यो मान्त एजन्तश्च तदन्तमव्ययं स्यात्। स्मारं स्मारम्। जीवसे। पिबध्यै। क्त्वातोसुन्कसुनः। १।१।४०॥ एतदन्तमव्ययं स्यात्। कृत्वा। उ

दयनाद्यपः समासान्ता इति सूत्रपर्यन्ताः। कृत्वोर्था इति। संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुजिति विहिताः। कृत्वसुजादयस्त्रयः॥ ॥ १ देतौः विसपः॥
तसिवती। इति। न च तसेः परिगणनं व्यर्थं शस्प्रभृतित्वादेव प्रतियोगे पंचम्यास्तसिरित्यस्य लाभादिति वाच्यम्। तेनैकदिक्। तसिश्चेत्येतदर्थं तथा तस्यावश्यकत्वात्। तेन तुल्या
मिति वतिः। नानाञाविति। विनञ्भ्यां नानाञौ नसहेति विहितौ। पचतिकल्पमिति। अव्ययसंज्ञायां हि सत्यां सुपो लुक् स्यादिति भावः। कृन्मेजन्तः। अत्र मेजन्त इत्येतच्छ्रु
तत्वात् कृत एव विशेषणम्। न तु कृदन्तस्याश्रुतस्य। अन्यथा प्रतामौ प्रतामः। लवमाचष्टे लवयतेः क्विप् णिलोपे वस्योठि लौ लौ अत्रापि प्रसज्येतेति भावः। भवति त्वेतन्मत्वे
पेलुस्मरो न कृदन्तमेजन्तं च श्रूयत इति तदाह। कृद्यो मान्त एजन्त इति। स्मारं स्मारमिति। स्मरतेराभीक्ष्ण्ये णमुल् चेति णमुल्। द्विरुक्तिः परत्वं नित्यवीप्सयोरिति द्वि
त्वम्। जीवसे इति। तुमर्थे सेसेनित्यसेप्रत्ययः। पिबध्यै इति। तुमर्थे इत्यनेनैव शध्यै प्रत्ययः पाघ्रेति पिबादेशः। येन विधिस्तदन्तस्येत्यनेनैव सिद्धे सूत्रे अन्तग्रहणमौ

पदेशिकं प्रतिपत्त्यर्थाः तेनेह न। आधये। चिकीर्षते। लक्षणप्रतिपदोक्तसंन्निपातपरिभाषाभ्यां सिद्धे तयोरनित्यत्वज्ञापनायेदमिति मनोरमायां स्थितं। एतच्च अव्ययादाप्सुपः
सूत्रे अव्ययात्परस्य सुपो लुगिति यथाश्रुतव्याख्यानमभिप्रेत्योक्तं। अव्ययाद्विहितस्येति व्याख्याने त्वाधये इत्यादौ अव्ययसंज्ञायामनिष्टांतरमूह्यं। क्त्वातोसुन्कसुनः। कृत्वेति
सप्तम्यर्थकर्तृकयोरित्यादिना क्त्वा। उदेतोरिति। उत्पूर्वादिणो भावलक्षणे स्थेणि त्यादिना तोसुन्। विसृप इति। सृपितृदोः कसुन्॥ ॐ ॥ अव्ययीभावश्च। अव्यय
त्वेनः स्यात्। इह लुकि मुखस्वरोपचारयोर्निवृत्तौ चेति परिगणनं कर्तव्यं लुक्युदाहरणं। उपाग्नि। अव्ययादिति सुपो लुक्। मुखस्वरनिवृत्तौ उदाहरणं। उपाग्निमुखः। प्रत्य
ग्निमुखः। मुखं स्वांगमित्युत्तरपदांतोदात्तत्वं प्राप्तं नाव्ययदिक्शब्देत्यादिना प्रतिषेधः। तथा च बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृतिस्वर एव भवति। पूर्वपदं च समास

अव्ययीभावश्च।१।१।४१। अधिहरि। अव्ययादाप्सुपः।२।४।८२। अव्ययाद्विहितस्यापस्सुपश्च लुक् स्यात्। तत्र शालायां। अथ। विहितविशेष
णान्नेह। अत्युच्चैसौ। अव्ययसंज्ञायां यद्यपि तदन्तविधिरस्ति। तथापि न गौणे। आवग्रहणं व्यर्थमलिङ्गत्वात्। सदृशं त्रिषु लिङ्गेषु सर्वासु च विभ
क्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययमिति श्रुतेः। लिङ्गकारकसंख्याभावपरा। वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः। आपं चैव हल
न्तानां यथा वाचा निशा दिशा। १ वगाहः। अवगाहः। पिधानं। अपिधानं॥ इत्यव्ययानि॥ स्त्रियां।४।१।३। अधिकारोऽयं समर्थानामिति यावत्

स्वरेणांतोदात्तं। विसर्गस्यानिकृत्स्य सकारस्य उपचार इति भाषा। वां संज्ञा तन्निवृत्तावुदाहरणं। उपपयः कारः। उपपयः कामः। इह अतः कृकमीति प्राप्तं सत्वं अनव्ययस्येति
पर्युदस्य तो परिगणनं किं उपाग्न्यधीयान। इह सुबामंत्रिते इति परांगवद्भावेन षष्ठ्यामामंत्रितस्य चेत्याद्युदात्तत्वं यथा स्यात्। परांगवद्भावे हि। अव्ययानां प्रतिषेध
उपसंख्यातः। उपाग्न्यधीयानेत्यादौ मा भूदिति। तथा उपाग्नि कम्मित्यादावव्ययसर्वनाम्नामित्यकच्च न। उपकुंभमन्यः। खित्यनव्ययस्येति वर्तमाने अरुर्द्विषदजंतस्ये
ति विहितो यो मुम् तस्येह प्रतिषेधान उपकुंभंभूतः। इह अस्य च्वाविती त्वस्य प्रतिषेधोन॥ इत्वविधौ हि अव्ययस्य च्वावित्वं नेति प्रतिषेध उच्यते। दोषाभूतमहः। दिवा
भूता रात्रिः। इत्यत्र मा भूदिति। स्यादेतत्। स्वरादित्वेनैव सिद्धत्वात् तद्धितश्चेत्यादि चतुःसूत्री व्यर्था। तत्र हि तसिलादिस्तद्धित एधाच्पर्यंत इत्यादिना च्व्यर्थाश्चेत्यंते
ने आसि प्रत्ययमाम् एकं वर्जयित्वा तद्धितश्चासर्वविभक्तिरित्यस्यार्थः संगृह्यते। कृन्मकारसंध्यक्षरांत इत्यनेन कृन्मेजंत इत्यस्यार्थः। संगृह्यते। क्त्वातोसुन्कसु

नोव्ययीभावश्चेतिसूत्रद्वयंतुस्वरूपेणैवपठ्यतइति।अत्राहुः।पुनर्वचनमनित्यत्वज्ञापनार्थं।तेनप्रागुक्तलुङ्मुखस्वरोप.चाराइतिपरिगणनंलभ्यते।पुरासूर्य-
स्योदेवनोराधेषः।पुराक्रूरस्यविसृपोविरप्शिन्नित्यादिसिद्धयेनलोकाव्ययेत्यत्राव्ययप्रतिषेधेतोसुन्कसुनोरप्रतिषेधइतिवक्ष्यजेतद्व्यनेनैवलभ्यतइति॥अ-
व्ययादाप्सुपः।एच्यसात्रियार्थेतिसूत्राल्लुगित्यनुवर्ततइत्याह।लुक्स्यादिति।अव्ययमितिमहासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थं।नव्येतिविविधंविकारंन
गच्छतिसत्व धर्मान्लिंगसंख्यादीन्नगृह्णा तीतियावत्।तेनात्युच्चैसौ।अत्युच्चैसइत्यादिसिद्धं।अतिक्रांतप्रधानत्वेनसत्वधर्मपरिग्रहादव्ययसंज्ञायाअभा-
भावात्।नन्वेवमुच्चैःशब्दस्याव्ययत्वानपायात्सुपोलुक्दुर्वारइत्यतआह।विहितविशेषणादिति।अत्युच्चैसाविति।नन्वत्यादयःक्रांताद्यर्थेद्वितीयांते
नसमस्यते।उच्चैःशब्दस्त्वधिकरणशक्तिप्रधानइतिकर्मत्वायोगान्नतस्यद्वितीयांतता।सत्यं।शक्तिप्रधानान्यपिकानिचिदव्ययानि।वृत्तिविषयेशक्तिमत्प्र-
धानानिकानिचित्भवंति।यथादोषामन्यमहः।दिवामन्यारात्रिरिति।ततश्चप्रक्रियादशायामुच्चैःशब्दस्य द्वितीयांतत्वंसंभवतीतिदिक्।ननुस्व-
रादिषुउच्चैःशब्दःपठ्यतेतत्रकथंतदंतस्यप्रसंगइतिचेन्न।अन्वर्थसंज्ञयैवतदंतविधेरपिज्ञापनात्।अन्यथाउपसर्जनेप्रसंगाभावेनतन्निवृत्त्यर्थायाअन्व-
र्थसंज्ञायावैयर्थ्यापत्तेः।हेनुपरमस्वःमरमोच्चैरित्यादौसत्वधर्मापरिग्रहादव्ययत्वंसिद्धंतदेतदाह अव्ययसंज्ञायांयथार्थत्वादिति।अव्ययादापोलुग्वचनान-
र्थक्यंलिंगाभावादितिवा।तत्क्रमेणसन्निधायाह।आद्यग्रहणंव्यर्थमिति।सूत्रस्योक्तिसंभवस्त्वियामितिसूत्रेस्त्रीसमानाधिकरणादितिपक्षग्रहीत्वेतिबोध्यः।स-
वनास्थितः।भूतमियंत्राह्वणीत्यादावतिव्याप्तेः।यदितुआमइतिसूत्रानंतरंसुपोधातुप्रातिपदिकयोः अव्ययादितिसूत्र्यतेतदासुब्ग्रहणमपिव्यर्थंसुपइत्यनुवृ-
त्तिसंभवादितिनव्याः।अलिंगते[illegible]प्यर्वणप्रणवविद्यागतश्रुतिविरोधमाशंक्याह।सदृशमिति।एतेषुयन्नव्येतिकिंतुसदृशंएकप्रकारंतदव्ययमितियोजना
।कथं।यस्मान्नव्येतितदव्ययं।लिंगकारकेति।विभक्तिवचनशब्दौसंख्याकारकपराविति भावः।यद्यप्यव्ययीभावस्यलिंगसंख्याकारकयोगोस्ति।तथापिवचनादव्य-
यत्वं।अव्ययविशेषकार्यांतरमाह।वष्टीति।भागुरिराचार्यः।आप्ंचैवेति।वष्टीत्यनुषज्यते।यथावाचेति।परिगणनमिदमित्येके।अन्येतूदाहरणमात्रमित्याहुः
॥ ॥वगाहइति।अपिनासाहचर्यादपेरिवाकारोलुप्यतेनांत्यइतिभावः॥इत्यव्ययानि॥ ॥

मु॰

सि॰कौ॰
टी॰ल॰
९८

व्दासु लौकिकपुंस्त्वविशिष्टे शास्त्रीये पुंस्त्वे शक्ताः लौकिकत्वस्त्रीत्वविशिष्टे च शास्त्रीयस्त्रीत्वे। कथमन्यथा कुमारी कुमार इत्यादयः प्रयोगा व्यवतिष्ठेरन्। करेणुरिभ्यां स्त्री
नेभेइत्यमरस्याप्ययमेवार्थः। नन्वेवं पशुनेति पुंस्त्वविवक्षितमिति मीमांसकोद्घोषः कथं योज्यः। पारिभाषिकस्याव्यावर्तकतया न हि विवक्षाया अकिंचित्करत्वात्। लौकिकस्य तु
लिंगस्य पशुशब्दादप्रतीतेरिति चेत्। अत्राहुः। छागो वा मंत्रवर्णादिति षष्ठांत्याधिकरणन्यायेन पुंस्त्वस्य नियमो बोध्यः छागशब्दस्य लौकिकपुंस्त्वविशिष्टपारिभाषिक
शक्तत्वादिति तच्च जातित्रसमित्येके। उक्तं च हरिणा तिस्रो जातय एवैताः। केषांचित्समवस्थिताः। अविरुद्धा विरुद्धाभिर्गोमनुष्यादिजातिभिः। भाष्ये तु प्रकारांतरमुक्तं। सं
स्त्यानप्रसवौ लिंगमास्थेयौ स्वकृतांततः। संस्त्यानेस्त्यायतेर्ड्रट् स्त्री सूतेः सप् प्रसवे पुमान्। उभयोरंतरं यच्च तदभावे नपुंसकमिति। अस्यायमर्थः। संस्त्याने स्त्री सत्वरजस्तमो
लक्षणानां गुणानां नौ[illegible]पचयः प्रसवो गुणानामुपचयः स पुमान्। सूतेर्ड्लोः सप् सकारस्य पकारादेश इत्यर्थः। औणादिको मसुन्प्रत्ययो ह्रस्वश्च बाहुलकादिति
कैयटः। सुङोङ् म्सुन्निति माधवः। तयोरुपचयापचययोरभावे सति यदुभयोरंतरं सदृशं तन्नपुंसकं। नभ्राण्नपादिति निपातनादिति भावः। तथा च स्थितिर्नपुं
सकं। अत एवाविर्भावतिरोभावयोरपि स्थितिमात्रान्यविवक्षासंभवान्नपुंसकं। लिंगसर्वनाम्नेति सिद्धांतः। स्त्री पुमान्नपुंसकमिति शब्दाः शब्दाश्च शक्त्यादि[illegible]
णि च वर्तंते। स्वकृतांतत इति वैय्याकरणसिद्धांत इत्यर्थः। कृतांतो यमसिद्धांतावित्यमरः। पंचाजीति। पंचानामजानां समाहार इति [illegible] इत्यादिना [illegible] अकारांतो
त्तरपद इति स्त्रीत्वे द्विगोरिति ङीप्। न चात्र प्रत्ययविधौ तदंतविधिविरहादेव टापो प्रवृत्तौ ङीवेव स्यादिति वाच्यं। अमहत्पूर्वग्रहणेन अनुपसर्जनाधिकारेण च [illegible]
त्ययेषु मदंतविधिज्ञापनात् [illegible] प्रमाणेः सत्वात्। समासार्थसमाहारनिष्ठमिति। नन्वजहत्स्वार्थायां वृत्तौ समाहारोप्यजाद्यर्थ एवेति चेत्। मैवं। तथापि तस्य पदांतरसमभिव्याहा
रापेक्षया बहिरंगत्वात्। टाब्विधेस्त्वंतरंगे चरितार्थत्वात्। कथं तर्हि परमाजेति चेत्। प्रागुत्पन्नस्यैव टापस्तत्र श्रवणात्। अल्पजानिरजेत्यत्र तु अदंतं प्रत्युक्तं प्राप्तावित्यवेहि। न
च पंचाजीत्यत्रापि तथास्त्विति वाच्यं। द्विगोरिति ङीपा बाधितत्वात्। चटकेति। न चात्राप्यस्यादितीकारः शंक्यः। चटकाया ऐरगिति लिंगादिहैव निपातनाद्यांतरप्रवृत्तेः। न
त्वं क्षिपकादिषु चटकेति पठनं नानीवावश्यकमिति नव्याः। मूषिकेति। वृश्चिकृषोः किकन्नित्यधिकारे मुषेर्दीर्घश्चेति किकन्निकारमध्यो मूषिकाशब्दः। यस्तु मूषस्ते
य इति दीर्घोपधात्संज्ञायां कन्निति मूषकशब्दः साधवे नोक्तस्तेनाप्ययं टाप् प्रत्ययस्यादितीत्वं तु विशेषः। केचित्तु कुन्नंतो सौ अजादिगणे पाठं न प्रयुंक्ते गणे तत्पाठस्य जाति

९८

त्वस्यान ङीम्बाधनार्थत्वात्संज्ञायाश्च जातित्वात्। तथा चाहुःसत्वादेवकु [..] ता टापसिध्यतीत्याहुस्तच्चिंत्यं। व्याघ्रीत्यादिवत्संज्ञात्वेपि जातित्वानपायात्। भस्त्रफलेति। भस्त्रेव फलानि
यस्या इति विग्रहः। क्यापोरिति। एतच्च फलनिष्पत्ताविति धातौ माधवग्रंथे स्थितं। पाककर्णेत्यत्र भाष्ये तु दीर्घ एव दृश्यते। सदच्कांडेति सत्रा कांडेति पाठो नादर्त्तव्य इति ध्वनयन्नु
दाहरति। प्रत्यक्पुष्पेति। अत्र नव्याः संभस्त्रेत्यादिवचनद्वयं मूलान्नञ इति वक्ष्यमाणं रूपा [..] कर्णेत्यनेन प्राप्तस्य ङीषो निषेधार्थं। तत्रैव सूत्रे भाष्ये पठितमपि फलविशेषा
भावादिहैव ग्रंथकारैः पठितं। न चैतावता आचांतर्गणसूत्रत्वमिति भ्रमः कार्यस्तथात्वे मानाभावात् किंतु वार्तिकान्येवेमानीत्याहुः। शूद्रा चेति। शूद्रशब्दष्टापमुत्पादयति जा
तिश्चेत्। महत्पूर्वस्तु न जातिश्चेदिति तीहापि संबध्यते। तेन महती शूद्रा महाशूद्रेति भवत्येव। पुंयोगे त्विति। पुंयोगश्चेदापत्यरूप एवेति न नियमः। किंतु जन्यजनकभावोपि
गृह्यते। तथा च स्मृतिः। वैश्यात् शूद्र्यां तु राजन्यान्माहिष्योग्रौ सुतौ स्मृताविति। महाशूद्रीति। आभीरी तु महाशूद्री जातिपुंयोगयोः समेत्यमरः। इहा महत्पूर्वेति व्याख्या म

उगितश्च। ४। १। ६। उगिदन्तात्प्रातिपदिकात्स्त्रियां ङीप्स्यात्। भवती। पचन्ती। शप्श्यनोरिति नुम्। उगिदचामिति सूत्रेऽचग्रहणेनधा
तोश्चेदुगित्कार्यं तर्ह्यंचतेरेवेति नियमार्थत्वात्। तेनेह न। उखास्रत्। अनिदितामिति नलोपः। पर्णध्वत्। अञ्चतेस्तु स्यादेव। प्राची। प्रतीची।

हाशूद्रशब्दो हि समुदित एवाभीरजातौ वर्तते। तत्रावयवस्यानर्थकतया शूद्रशब्दस्यार्थसमवेतस्त्रीत्वाभावेन टापः प्रसक्त्यभावात्। न च तदंतविधिज्ञापनाय तदिति
वाच्यं। अनुपसर्जनाधिकारेणैव तदंतविधिज्ञापनादिति दिक्। अत्र नव्याः शूद्रा चेत्यादिवचनमजाद्यत इति सूत्रस्थं वार्तिकमेव न त्विदं गणसूत्रमित्याहुः। क्रुंचेत्यादित्रयो
मी हलंता इत्येके। भाष्ये तु क्रुंचादयः अदन्ता अभिमताः। उष्णिहककुभावित्यादिवत् [..] समुदायाः दंता अपि स्वीकृताः। पचाद्यच्प्रत्ययोपधलक्षणेन कप्रत्ययेन यथासंभवमदंत
त्वात्। पुंयोगेपीति। यदा ज्येष्ठादयः प्रथमजातादौ वर्तते तदा अदंतत्वात्टापसिद्धः। यदा तु ज्येष्ठस्य स्त्रीत्यादिविवक्षा तदा पुंयोगलक्षणो ङीष्प्राप्तः सोप्यनेन बाध्यत
इति सूचयितुमपिशब्दः। मूलान्नञः। नञः किं। शतमूला। अमूलेति। आ वपि जातिरियं॥ ॥ उगितश्च। उगिच्छब्देन प्रातिपदिकं विशेष्यते विशेषणेन तदंतविधिः॥ न
नव प्रत्ययविधौ प्रतिषेधः शंक्यः। अनुपसर्जनादित्यनेन स्त्रीप्रत्यये तु तदंतविधि [..] ज्ञापनात् उगिद्वर्णग्रहणवर्जमिति येन विधिरिति सूत्र एवोक्तत्वाच्चेत्याशयना

अगिदंतादिति। तत्रोगित्प्रातिपदिकं प्रत्ययश्चेति द्विविधं संभवति। आद्ये उगिदंता भवंतं महांतं चातिक्रांता अतिभवती अतिमहती इत्युदाहरणं। सर्वादिगणे भवतु इति पाठाद्भ
वच्छब्दस्योगित्वव्यपदेशः। महच्छब्दस्य तु शतृवद्भावात्। न चैवं व्यपदेशिवद्भावोऽप्रातिपदिकेनेति निषेधात्केवलाभ्यां भवन्महच्छब्दाभ्यां ङीप् न स्यादिति वाच्यं। प्रा
तिपदिकाप्रातिपदिकसाधारणेन शब्दमात्रमुगित्पदाभिधेयमिति उक्तनिषेधाप्रवृत्तेरित्याशयेनोदाहरति। भवंती इति। द्वितीयमगिदंतमुदाहरति। पचंती इ
ति। पचेर्लटः शतरि कर्तरि शप्। यदि तु सर्वादिगणे भवतु इति उगित् पठितः स्यात्तदा भवतीति द्वितीयोगिदंतस्याप्युदाहरणं भवत्येव। शत्रं
तात्तु भवतेर्ङीपि शप्श्यनोर्नित्यमिति नित्यं नुम्। भवंती। उखास्रदित्यादि। उखायाः स्रंसते पर्णेभ्यो ध्वंसते। स्रंसु ध्वंसु अवस्रंसने। वसुस्रंस्विति दत्वं॥ ः॥ वनो र च।

वनो र च। ४।१।७। वन्नंतात्तदंताच्च प्रातिपदिकात्स्त्रियां ङीप् स्यात् नारश्चांतादेशः। वनिति ङ्वनिप् क्वनिप् वनिपां सामान्यग्रहणं। प्रत्ययग्रहणे यस्मा
त्स विहितस्तदादेस्तदंतस्य ग्रहणं। तेन प्रातिपदिकाविशेषणात्तदंतात्तदंतमपि लभ्यते। सुत्वानमतिक्रांता अतिसुत्वरी। अतिधीवरी। शर्वरी। वनो न [illegible]
श इति वक्तव्यं॥ हशंताद्धातोर्विहितो यो वन् तदंतात्तदंतांताच्च प्रातिपदिकान्ङीप् रश्च नेत्यर्थः। ओण् अपनयने वनिप्। अवावनोरित्यात्वं। अवावा ब्राह्मणी
राजयुध्वा। बहुधीवरी॥ बहुधीवरी। बहुधीवा। पक्षे डाबपि वक्ष्यते। पादोऽन्यतरस्यां। ४।१।८। पाच्छब्दः कृतसमासांतस्तदंतात्प्रातिपदिकात् ङी
ब्वा स्यात्। द्विपदी। द्विपात्॥ ॥ ९९ वन्निति प्रत्ययेन तदंतं प्रातिपदिकं गृह्यते। वन्नंतेन त्वधिकृतप्रातिपदिकविशेषणात्तदंतविधिरित्याशये
नाह। वन्नंतात्तदंताच्चेति। येन विधिस्तदंतस्येत्यत्र स्वं रूपमिति सूत्रात्स्वमिति अनुवर्त्य स्वस्य चेति व्याख्यानादुभयं लभ्यत इति भावः। यदि तु वन्नंतेमेव व्यपदेशिवद्
भावेन तदंतमिति उच्यते तर्हि येन विधिरित्यत्र स्वमित्यनुवर्त्य स्वस्य चेति न व्याख्येयं। न चात्र व्यपदेशिवद्भावोऽप्रातिपदिकेनेति निषेधः शंक्यः। तस्य प्रत्ययमात्र
विधिविषयत्वात्। वन्नंतस्य वस्तुतः प्रातिपदिकत्वेपि सूत्रे गृहीतस्य वन इत्यस्य प्रातिपदिकत्वाभावाच्चेत्याहुः। सामान्यग्रहणमिति। सूत्रे वन इत्यनुबंधरहितस्य ग्रह
णा [illegible] तदनुबंधपरिभाषा नोपतिष्ठते इति भावः। वनग्रहणे वन्नंते वन्नंतांतं च कथं लभ्यत इत्याशंकायामाह। प्रत्ययग्रहणे इत्यादि। तेनेति। उ
न्नंतेनेत्यर्थः। तदंतांतमपि लभ्यत इति। स्त्रियामित्यधिकारे [illegible] ग्रहणं वता प्रातिपदिकेनेति निषेधो न प्रवर्तते। अमहत्पूर्वेत्यादिज्ञापकादिति भावः॥ अन्ये त्वाहुः ॥

स्यावश्यकत्वात्। तथा चानेन ङीपि निषिद्धे तत्संनियोगेन प्राप्तो वनो र चेति योरेफः सोपि दुर्लभ एवेति वनो न हश इति वार्तिकमबहुव्रीह्यर्थमिति फलितं वहुयज्वानाविति। न संयोगादिति निषेधान्नायमुपधालोपी। तेनात्र अन उपधालोपिन इति वक्ष्यमाणो विकल्पो न प्रवर्तते॥ ॥ डाबुभाभ्या। उभाभ्यां ग्रहणं व्यर्थ मन्नंतानंतयोरनुवृत्त्यैव तत्फलसिद्धेरित्येके। उभयोरप्यनुवृत्तिसूचनाय तद्ग्रहणमावश्यकमन्यथा संन्निहितस्यान्नंतस्यैवानुवृत्तिरिति शंका स्यादित्यन्ये। अन नुनिषेधडापोर्वचनसामर्थ्यात्पर्यायः सिध्यतिननु किमन्यतरस्यां ग्रहणेन। सत्यं अन्यतरस्यामिति योगो विभज्यते। तत्र मन इति निवृत्तं। अनो बहुव्रीहेः ङीबा स्यात्। पूर्वेणैव डाबाद्विसिद्धे पुनर्विधानमिदं मन्नेभ्य इति ङीपा सह विकल्पार्थं अन उपधालोपिन इति सूत्रं तु नियमार्थं। अनो यो सौ विकल्पः स उपधालोपिन एवेति। एवं च बहुधीवर्यौ बहुधीवानौ बहुधीवेत्युक्तरूपत्रयं सिद्धमिति बहुव्रीहौ वेत्येतन्नापूर्ववचनमिति बोध्यं। उपधालोपिन एवेति नियमात्तु सुपर्वा चारुपर्वा इत्यादाव

डाबुभाभ्यामन्यतरस्यां।४।१।१३। सूत्रद्वयोपात्ताभ्यां डाब्वा स्यात्। सीमा। सीमे। सीमानौ। दामा। दामानौ। दामे। नपुंसि दामेत्यमरः। बहुयज्वा। बहुयज्वानौ। बहुयज्वे। अन उपधालोपिनोऽन्यतरस्यां।४।१।२८। अन्नन्ताद्बहुव्रीहेरुपधालोपिनो वा ङीप् स्यात्॥ पक्षे डाप्ङीन्निषेधौ। बहुराज्ञी। बहुराज्ञ्यौ। बहुराजे। बहुराजानौ॥ ॥ नुपधालोपिनि ङीप् न भवति किंतु डाप्निषेधावेव भवतः। अयं च योगविभागोऽवश्यमभ्युपेयः। अन्यथा बहुधीवरीत्यत्र प्रकरणांतरस्थेन अन उपधालोपिन इति वक्ष्यमाणेन पाक्षिके ङीपि कृते पि मन्नेभ्य इति निपातं ङीपमनूद्य तत्संनियोगेन हि विधीयमानो यो वनो र चेति रेफः स न सिध्येत। ननु वनो र चेति सूत्रमेव ङीप्रौ विधत्तामिति चेन्न उभयविधौ गौरवात्। किंच। उभयविधायकत्वेप्यनो बहुव्रीहेरित्यनेन। ङीपि निषिद्धे रोपि दुर्लभः संनियोगशिष्टत्वात्। भाष्ये तु अनो बहुव्रीहेरित्यस्यानंतरं उपधालोपिनो वेति सूत्रमस्तु अन उपधेत्यादि प्रदेशांतरस्थं सूत्रं डाप्सूत्रे अन्यतरस्यां ग्रहणं च मास्त्वित्युक्तं अन उपधा। बहुव्रीहेरूधसो ङीषित्यतो बहुव्रीहि ग्रहणं संख्याव्ययादेर्ङीबित्यतो ङीप् चानुवर्तत इत्याशयेनाह। अन्नंतादित्यादि। नियमार्थमिदमित्युक्तं। नु चैवं पूर्वेणैव विकल्पसिद्धौ विहान्यतरस्यां ग्रहणं व्यर्थमिति वाच्यं। असति त्वन्यतरस्यां ग्रहणे नित्यार्थो विधिरेवायं स्यान्न तु नियम इति ॥ ॥

प्रत्ययस्थात्कात्पूर्वस्य । कादित्यकार उच्चारणार्थः व्यञ्जनमात्रं विवक्षितं । अन्यथा एतिकाश्वरतीत्यादावकचि इत्वं न स्यात् । तत्र हि अकारविशिष्टककारस्य प्रत्ययस्थत्वा-
भावात् । न चाकच्यपि अकारान्तककार एव प्रत्ययस्थो भवतु । अतो गुणे इति पररूपेण त्वेतिका इत्यादिरूपसिद्धेरिति वाच्यं । पचतकीत्यादि विवक्ष्यमाणे रूपासिद्धिप्रसङ्गादि-
त्याशयेनाह । ककारादिति । वर्णनिर्देशे कारप्रत्ययो विहितः । क्वचित्समुदायात् प्रयोगस्तु उच्चैस्तरां वा वषट्कार इत्यादिनिर्देशात् । रूपं तु साध्यमिति भावः । आपि परे इति
एतच्चाकारविशेषणं । तत्सामर्थ्यात्ककाराकाराभ्यां व्यवायेपि भवति । ननु पुत्रकाम्यां रथकाम्यत्यादौ त्रिचतुरादिव्यवाये । अत एव सर्विकेत्यादावाद्याकारस्य

प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः ७।३।४४ ॥ प्रत्ययस्थात्ककारात्पूर्वस्याकारस्येकारः स्यादापि परे स आप् सुपः परो न चेत् । सर्विका ।
कारिका । अतः किं । नौका । प्रत्ययस्थात्किं । शक्नोतीति शका । असुपः किं । बहुपरिव्राजका नगरी । कात्किं । नन्दना । पूर्वस्य किं । परस्य मा भूत् । कटु-
का । तपरः किं । राका । आपि किं । कारकः । मामकनरकयोरुपसंख्यानं ॥ मामिका । नरान्कायतीति नरिका । त्यक्त्यपोश्च । दाक्षिणात्यिका । इह-
त्यिका । न यासयोः ७।३।४५ ॥ यत्तदोस्तपो न स्यात् । यका । सका । यकां तकां । त्यकनश्च निषेधः ॥ अधित्यका । उपत्यका । आशिषि वुनश्च न ॥ जी-
वका । भवका । उत्तरपदलोपेन ॥ देवदत्तिका । देवका । क्षिपकादीनां च ॥ क्षिपका । ध्रुवका । कन्यका । चटका । तारका ज्योतिषि ॥ अन्यत्र तारि-
का । वर्णका तान्तवे । अन्यत्र वर्णिका । वर्तका शकुनौ प्राचां ॥ उदीचां तु वर्तिका । अष्टका पितृदैवत्ये ॥ अष्टिकान्या । सूतकापुत्रिकावृन्दारिका-
णां वेति वक्तव्यं ॥ इह वा अ इति छेदः । कात्पूर्वस्य वा अकारादेशः इत्यर्थः । तेन पुत्रिकाशब्दे ङीन इवर्णस्य पक्षे अकारः । अन्यत्रेत्वबाधनार्थमकार-
स्यैव पक्षे इकारः । सूतिका । सूतका इत्यादि ॥ ॥ ९

न भवतीति तदेतदुक्तमकारस्येकारः स्यादापि परत इति । यदि तु आपीति ककारविशेषणं स्यात्त-
र्हि रथकाम्येत्यादावतिप्रसङ्गः [illegible] स्यादिति तस्याः पिपरत्वान्पायात् । न च निर्दिष्टपरिभाषया निस्तारः । अनुवादे परिभाषाणामनुपस्थितेः । न चापीत्यस्याकारविशेषण-
त्वेपि तद्दोषतादवस्थ्यमिति वाच्यं । अनुवादे परिभाषाणामित्यस्यानूद्यमानविशेषणेष्वित्यर्थाभ्युपगमात् । कात्पूर्वस्यात इदित्यत्र हि अत इत्यनूद्यत्वविधाना-
दनुवाद्यत्वमेवात इत्यस्य न तु अनूद्यमानविशेषणत्वं । कादित्यस्य त्वनूद्यमानविशेषणत्वं स्पष्टमेवेति न तत्र निर्दिष्टपरिभाषोपतिष्ठते इति वैषम्यात्

अनुच्चमानविशेषणेलोपरिभाषानोपतिष्ठत इत्येतदुदीचामात इति सूत्रस्थस्थानेयग्रहणेन ज्ञापयिष्यते। यद्यसुप इति पर्युदासः स्यात्। तर्हि बहुपरिव्राजकेत्यत्रापि स्या देव। उत्तरपदस्य सुबन्तत्वेपि समुदायस्यासुबन्तत्वात्। ततः प्रसज्यप्रतिषेध इत्याह। सचापसुपः परो न चेदिति। सुबन्तात्परो न चेदित्यर्थः। सर्विकेति। अव्ययसर्वनाम्नामकच्प्राक्टेः। अकच्। कारिकेति। करोतेर्ण्वुल्। णित्वात् वृद्धिः। नौकेति। नौशब्दात्स्वार्थे कः। ततष्टाप्। शाकेति। शक्नोतीति विग्रहः। पचाद्यच्। ततष्टाप्। बहुपरिव्राजकेति। परिपूर्वात् व्रजेर्ण्वुल्। बहवः परिव्राजका यस्यामिति बहुव्रीहौ तदवयवस्य सुपो लुकि कृतेपि प्रत्ययलक्षणेनोत्तरपदस्य सुबन्तत्वाद्दो षः सुबन्तात्परत्वमस्तीति इत्वमत्र न भवति। नन्दनेति। नन्दिग्रहेति ल्युः। वस्तुतस्तु सूत्रे प्रत्ययस्थेति कीति सप्तमीनिर्देशमेव कृत्वा पूर्वस्येति ग्रहणं सुत्यजमित्याहुः। पूर्वस्येति किमिति। अर्थादेवेदं लभ्यते। टावेकादेशे कृते परत्र ह्रस्वाकाराभावादिति प्रश्नः। इतरो निर्दिष्टपरिभाषया कात्पूर्वस्येति न लभ्यते किंतु टावेकादेशं वा

उदीचामातः स्थानेयकपूर्वायाः। ७।३।४६। यकपूर्वस्य स्त्रीप्रत्ययाकारस्य स्थाने योऽकारस्तस्य कात्पूर्वस्येद्वास्यादापि परे। केऽण इति ह्र स्वः। आर्यका। आर्यिका। चटकका। चटकिका। आतः किं। साङ्काश्ये भवा। साङ्काश्यिका। यकेति किं। अश्विका। स्त्रीप्रत्ययेति किं॥ शुभं यातीति शुभंयाः। अज्ञाता शुभंयाः। शुभंयिका॥ धात्वन्तयकोस्तु नित्यं॥ सुनायिका॥ सुपाकिका॥ ॥

धित्वा कात्परस्यैवाकारस्य स्यादित्याशयेनाह। परस्यैत्यादि। कटुकेति। कटुरत्र कटुरसवति। अज्ञातादौ कः। राकेति। रादाधाराच्चिक् लिम्पः कः। बाहुलकादित्सं ज्ञाभावः। संज्ञापूर्वकविधेरनित्यत्वात्केऽण इति ह्रस्वो न। मामकनरकयोरिति। ककारस्य प्रत्ययस्थत्वाभावादप्राप्ते वचनं। मामिकेति। ममेयं मामिका। युष्मदस्मदोर न्यतरस्यां खञ्चेत्यण्। तवकममकावेकवचने इति ममकादेशः। आदिवृद्धिः। केवलमामकेत्यादिना संज्ञाछन्दसोरेवेति नियमान्न ङीप्। नरिकेति। कै शब्दे। आदे च उपदेशे इत्यात्वं। आतोनुपसर्गे कः। आतो लोप इटि चेत्यालोपः। टाप् इत्वं। त्यकन्त्यपोश्च। उपसंख्यानमित्यनुवज्यते॥ ॥उदीचामातः॥ इति विकल्पापवादः। दाक्षिणात्यिकेति। दक्षिणस्यां दूरे दक्षिणा। दक्षिणादाच्। दक्षिणा भवेति विग्रहे दक्षिणापश्चात्पुरसस्त्यक्। किति चेत्यादि वृद्धिः। टाप्। ततोऽज्ञातार्थे कः। केऽण इति

साहचर्यादाजंतस्यैव दक्षिणाशब्दस्य ग्रहणं ॥ अन्यथा सर्वनाम्नो वृत्तिमात्रे पुंवद्भावापत्तेश्चेति ॥ इहत्यिकेति अव्ययात्त्यप् ॥ २ त्र्ण ॥
ह्रस्वः टाप् । प्रावातु दक्षिणस्यां दिशि भवेति विगृहीतं । तच्च मनोरमायां दूषितं । त्यब्विधौ अव्ययं ॥ नयासयोः प्रत्ययस्थादिति मात्रेनिषे— धोयं । यासेति यत्तदोरुपलक्षणं
मित्याशयेनाह । यत्तदोरिति । यकामकेति । यत्तदोः क च । त्यदाद्यत्वे टाप् । स्वरूपस्याविवक्षायां फलमाह । यकांतकामिति । यद्यपि नयत्त— दोरित्येव सूत्रयितुमुचितं तं ।
यापि संनिपातपरिभाषाया अनित्यत्वज्ञापनार्थं नयासयोरित्युक्तमित्याहुः । वस्तुतस्तु नयत्तदोरित्युक्तेप्यनित्यत्वं सिध्यत्येव ॥ अन्यथा अनयोरकारस्याप्यरत्वे दुर्ल
भमिति किमनेन निषेधेनेति । त्यकन्श्च निषेध इति । ननु मृदस्तिकन्निति तन्प्रक्रियालाघवाय त्यकन्निति वक्तव्ये त्यकन्नियकारनिर्देशसामर्थ्यादित्वाभावे सिद्धे किमनेन
निषेधवचनेन । मैवं । पंचभिरुपत्यकाभिः क्रीतः पंचोपत्यक इत्यादौ तद्धितलुकि स्त्रीप्रत्ययस्यापि लुकि अकारस्य श्रवणार्थत्वात्तस्यापि— कन्नित्युक्ते हि पंचोपत्यिक इ
ति स्यात् । इष्यते तु पंचोपत्यक इति । तस्मादावश्यकमेव निषेधवचनं । मृदस्तिकन्नित्यत्रापि इकारोच्चारणं तद्धितलुकि श्रवणार्थं । ननु प्रक्रियालाघवार्थं । अन्यथा पं
चभिर्मृत्तिकाभिः क्रीत इत्यर्थे [illegible] ठको अध्यर्धेति लुकि कृते लुक्तद्धितलुकीति टापो लुकि निमित्ताभावात् प्रत्ययस्थादितीत्वं न स्यात् पंचमृत्तिक इत्यत्रान
वलुकः प्रागेव अंतरंगत्वात् प्रत्ययस्थादितीत्वं सिध्यत्येवेति वाच्यं । अंतरंगानपि विधीन् बहिरंगो लुक् बाधत इति अभ्युपगमात् । अत एव सनीस्रंसतद
त्यादौ नलोपाभावः सिध्यति । पंचभिः खट्वाभिः क्रीतः पंचखट्व इत्यादौ टापा सह एकादेशोपि न भवति । अन्यथा एकादेशस्यादिवद्भावात् टापग्रहणेन ग्रहणं
स्यात् लुक्तद्धित० ॥ इत्यनुपसर्जनस्त्रीप्रत्ययस्य लुकि कृते अकारस्य श्रवणं न स्यात् । एतच्च भाष्यकैयटयोः स्पष्टं । उपत्यकेति । उपाधिभ्यां त्यकन्नासन्नारूढयोः
आशिषीति । आशीरर्थे विहितस्य वुन्प्रत्ययस्यात इत्वं न भवतीति वक्तव्यमित्यर्थः । जीवकाभवकेति । जीवतात् भवतादित्यर्थे जीवतिभवतिभ्यामाशिषि वुन् तस्या
कादेशः कृते टाप् । स्वकेति । देवदत्तशब्दात् स्वार्थिकः कः । अनजादौ विभाषा लोपो वक्तव्य इति प्रागिवीये वक्ष्यमाणत्वात् द्वितीयादच ऊर्ध्वस्य दत्तशब्दस्य लोपः ।
देवदत्तिकाशब्दस्यापन्यासस्तु दत्तलोपमभिव्यक्तुं न दभादित्वेन निषेधाभावं दर्शयितुं । क्षिपकादीनां चेति । नेत्यनुषज्यते । क्षिपकेत्यादि । क्षिपेरिगुपध
लक्षणः कः । एवं ध्रुवस्थैर्ये इत्यस्मादपि कः । यद्वा ध्रुगतिस्थैर्ययोः पचाद्यच् । कुटादित्वान्ङित्वेन गुणाभावे उवङ् । चटभेदेने । पचाद्यच् । ततष्टाप् । अज्ञाता
दौ कः । केण इति ह्रस्वः । पुनष्टाप् । तारकेति एवुल् अकादेशः ॥ क्षत्रं नेत्रकनीनिका ज्योतिः । वर्णकेति । प्रावारविशेषः । वर्णवर्णक्रियाविस्तारगुणवचनेष्विति

सु·
सि·कौ·
टी·
१०२

चौरादिकात् तण्डुलात् तनूनां विकारः तालतवं। अन्यत्र वर्णिकेति। ग्रंथविशेषस्य व्याख्या सौत्र कर्त्रीच। वर्नकेति। वर्तयतीति वर्तका। शकुनावेव वाच्येऽयं विकल्पः। अन्यत्र तु
नित्यमेवेत्वमिति बोध्यं। अष्टकेति पितरः अस्य देवता अपि तृदेवताः। तदर्थं कर्म पितृदेवत्यं। देवतांतात् तादर्थ्ये यत्। अश्नंति ब्राह्मणा यस्यां सा अष्टका। इष्टका भ्यां तकन्।
अष्टिकान्येति। अष्टौ परिमाणमस्याः संख्याया अतिशदंतायाः कन्। सूतकेति। सूतशब्दात् स्वार्थे कन्। वृंदमस्यास्तीति मत्वर्थे। शृंगवृंदाभ्यामित्यारकन्। देवताकाचि
वृंदारकशब्दस्य [illegible] लिंगत्वेऽपि [illegible] पिमुख्यवाचिनः स्त्रीलिंगत्वं संभवत्येव। अत एव त्रिषु नर इत्युपक्रम्य वृंदारकौ रूपिमुख्यावित्यमरेणोक्तं। उदीचां। यकः पूर्वाय
स्याः सा। [illegible] स्त्रीत्वमाकारे आरोप्य यकपूर्वाया इति स्त्रीलिंगनिर्देशः। तेन स्त्रीप्रत्ययो लभ्यत इत्याह। स्त्रीप्रत्ययाकारस्येति। अत्र नयासस्योरित्यतो नेति वर्त
ते। यकपूर्वस्य [illegible] प्रत्ययाकारस्य स्थाने योकाररस्य कात्पूर्वस्यात् दीचां मते इत्वं नेत्यक्षरार्थः। एवं स्थिते फलितमाह। इहास्यादिति। एवमग्रेप्यूह्यं। षष्ठीस्थानेयो
[illegible]न्येनेन [illegible] इत्यस्य स्थाने ग्रहणमनूद्यमानविशेषणेषु परिभाषा नोपतिष्ठत इ ति ज्ञापनार्थं। फलं तु वृद्धसंज्ञायामिक्परिभाषानुपस्थानाच्छालीयादि सिद्धिः। य
दि तत्रेक्परिभाषोपतिष्ठेत तदा औपगवीय इत्यादावेव वृद्धाच्छः स्यात् न तु शालीयो मालीय इत्यादौ। तत्र ह्याकारवृद्धेरिक्स्थानिकत्वाभावात्। तथा अतो गुण
इत्य[illegible] परिभाषोपस्थितौ एधेप्रचेयजे इत्यत्र [illegible] पररूपं स्यात्। टित आत्मनेपदानामिति इट एत्वे कृते इकः स्थानिकत्वादेकारगुणस्य भवतिपचंतीत्यादौ तु
[illegible] तत्रेकस्थानिकत्वाभावादकारगुणस्येत्यपि बोध्यं। नव्यास्तु वृद्धाच्छं बाधित्वा एटगयनादिभ्य इत्यण् प्रत्ययो यथा स्यादित्येतदर्थमृगयनादिगणे व्याकरणशब्दः
पठ्यते। यद्यनूद्यमानविशेषणेषु परिभाषा उपतिष्ठेरन् तर्हि तत्पाठं व्यर्थं स्यात्। आकारवृद्धेरिक्स्थानिकत्वाभावेन वृद्धसंज्ञाया अभावात् छस्याप्रवृत्तेः। तथा च तस्मा
देव पाठात् [illegible] ज्ञापनसंभवे स्थाने ग्रहणमिह स्पष्टार्थमित्याहुः। सांकाश्यकेति। संकाशेन निर्वृत्तं नगरं सांकाश्यं वुञ्छणादिसूत्रेण संकाशादिभ्यो ण्यः। ततो भवार्थे
धन्वयोपधाद्वुञ्। अकादेशः। स च सांकाश्यमवंस्त्रियमाहेति। तदकारस्यापि वैकल्पिकमित्त्वं स्यात्। तस्मादात इत्युक्तं। अत्र वदंति। यथा यमकारो नाकारस्थानिकः एवं स्त्रीप्रत्य
यस्थानिकोपि नेति द्वितीयविकल्पमेतत्। अकेति समुदायस्य स्त्रीवाचकत्वात् स्थानिकत्वेप्यकारमात्रस्य तथात्वात् तस्मादात इति स्पष्टार्थमेवेति। शुभंयाइति। अन्येभ्योपि
पि दृश्यत इति विच्। शुभमिति मांतो निपातः। सुनयिकेति। सुष्ठु नयो यस्याः सुनया ततः कः। केण इति ह्रस्वः। एवं सु[illegible]केयं।

म्याः सा। भस्त्रैषा। लुप्तनञ्कामिति। केचित्तु इह स्याद्भस्त्रिकेति छित्वा यद्यपि अन्यस्यामेवास्यामन्यस्यापि केवलस्य पुंवद्भावेन [illegible]मिति व्याचक्षते। प्रत्ययस्थादित्यतोनुवर्तनादाह। अत इहास्यादिति॥ ननु॥
ननञ्पूर्वाणामपीत्यपिशब्देन केवलानां संग्रहः क्रियते न तु नञ्भिन्नपूर्वाणामपि तथा च निर्भस्त्रिकेत्यादि न सिध्येदन्तरंगत्वविधिरावश्यक इत्याशयेनाह। तदन्तविधिनैवे
त्यादि आगतत्वादिति भावः। एवं च नञ्पूर्वाणामित्यस्य निरर्थकत्वशंका। निरस्ता निर्भस्त्रिकेत्यादावव्याप्तिप्रसंगात्। अन्यस्यापीति। अनुपसर्जनस्य त्वभाषितपुंस्कत्वेन
[illegible]सिद्धमित्यर्थः। [illegible]कोमलिति। भस्त्राजाज्ञाद्वानां तु सपूर्वाणामपि इत्वं भवत्येवा तत्र टापः परत्वेन सुपः परत्वाभावादसुप इति निषेधाप्रवृत्तेरिति भावः। सपूर्वयोरि
[illegible]विद्यमानपूर्वपदयोरित्यर्थः। अन्तर्वर्तिनीमित्यादि। नन्वेतदसुप इति स्थिते अकचि कृते अकचः प्रागेव वा नञ्तत्पुरुषे कृते अन्तरंग
[illegible]सप्तम्येकवचनं सामासिकं [illegible]विशिष्टं पुनः सुपित्यपरत्वे पररूपे च कृते ततष्टापा स च आद्यसुपः पर इति भावः। अनेषकेति। अ
[illegible]अनयका। अ[illegible]अनेषा अनेषकेति वा लौकिकविग्रहोऽत्र बोध्यः। एवमग्रेपि बोध्यं। स्वशब्दस्यान्तो विशेषणमिति॥ यद्यपि इह स्व
[illegible]इत्येन स्वशब्दस्य विशेषणमित्युक्तं तथापि तत्र स्वशब्दस्येत्यनन्तरमत इति विशेषो बोध्य इति भावः। अर्थान्तरे त्विति। आत्मज्ञातिधने
[illegible]नेति। स्विकेत्यादावकचि कृते आतः स्थाने यो अकारो दुर्लभ इति प्रकृतसूत्रस्याविषयत्वात्प्रत्ययस्थादिति नित्यत्वप्रवृत्तेः। एवं च हंसं तनौ स
निहितं चरन्तं मुनेर्मनोवृत्तिरिवास्विकायामिति श्रीहर्षश्लोके॥ ॥ ॥ ॥

सु

सि॰कौ॰ टीका १०२

भस्त्रैषेति वैकल्पिकमित्त्वमिति केषांचित् व्याख्यानं नादर्तव्यमिति भावः। वस्तुतो हंसं तनाविति श्लोके स्विकायामिति प्रयोगो ऽसाधुरेव। आत्मीयायां स्वशब्दस्य सर्वनाम त्वात्
स्त्रियामप्रकृतेरिति न्यासः प्रत्युदाहरणानि उक्तानि उदाहरणान्याह। निर्भस्त्रिके त्यादि। निष्क्रान्ता भस्त्राया निर्भस्त्रा निरादयः क्रान्ताद्यर्थे पंचम्येति समासः। उपसर्ज
नह्रस्व इत्याप्। ततो ऽज्ञातादौ कः। केऽण इति ह्रस्वः पुनष्टाप्। सूत्रे एवेति विकृतनिर्देशो विवक्षितविषयो न तु यासयोरिति इत्युपलक्षणमित्यभिप्रेत्याह। कृतवत्त्वनिर्देश
दिति। इहअजकादीति स्त्रीलिङ्गनिर्देशादजादयः स्त्रीलिङ्गा एव गृह्यन्ते तेनेह विकल्पो न। सुभ्रो ऽजो यस्याः शुभ्राजिका। जानातीति ज्ञः। इगुपधेति कः। प्रियो ज्ञो यस्याः सा

भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि। ७।३।४७॥ स्वेत्यन्तं लुप्तषष्ठीकम्पदं। एषामतइद्वा स्यात्। तदन्तविधिनैव सिद्धे नञ्पूर्वाणामपीति स्पष्टा
र्थं। भस्त्रा... णामुपसर्जनार्थं। अन्यस्य तूत्तरसूत्रेण सिद्धं। एषाद्वा एतयोस्तु सपूर्वयोर्नेत्वं। अन्तर्वर्तिनीं विभक्तिमाश्रित्याऽसुप इति निषे
धात्। अनेषका। परमैषका। अद्वके। परमद्वके। स्वशब्दग्रहणं संज्ञोपसर्जनार्थं॥ इहहि। आतः स्थाने इत्यनुवृत्तेः। स्वशब्दस्यातो विशेषणं
न तु ईषयोः सम्भवात्। नाप्यन्येषामव्यभिचारात्। स्वशब्दस्त्वनुपसर्जनमात्मीयवाची अकजर्हः। अर्थान्तरे तु नस्त्री। संज्ञोपसर्जनीभूत
... प्रत्ययान्तत्वाद्द्वेत्युदाहरणं। एवञ्चात्मीयायां स्विका। परमस्विकेति नित्यमेवेत्वं। निर्भस्त्रिका। निर्भस्त्रका। एषका। एषिका। कृतव
...निर्देशान्नेह विकल्पः। एतिके। एतिकाः। अजका। अजिका। ज्ञका। ज्ञिका। द्विके। द्वके। निःस्विका। निःस्वका॥ अभाषितपुंस्काच्च। ७।३।४८॥ एतस्माद्वि
हितस्यातः स्थाने ऽत इद्वा स्यात्। गङ्गका। गङ्गिका। बहुव्रीहेर्भाषितपुंस्कत्वात्ततो विहितस्य नित्यं। अज्ञाता अखट्वा। अखट्विका। शेषिके कपि तु विकल्प
एव॥ आदाचार्याणां। ७।३।४९॥ पूर्वसूत्रविषये आ द्वा स्यात्। गङ्गाका। उक्तपुंस्कात्तु। शुभ्रिका। अनुपसर्जनात्। ४।१।१४॥ अधिकारोऽयं। यूनस्ति
रित्यभिव्याप्य॥ अयमेव स्त्रीप्रत्ययेषु तदन्तविधिं ज्ञापयति॥ ॥

प्रियज्ञिकेति। निःस्वकेति। स्वस्याः निष्क्रान्तेति विग्रहो नात्विह स्विकस्याः
निष्क्रान्तेति तथात्वेप्युपसर्जनेपि निःस्विकेत्येकमेव रूपं स्यात्। आतः स्थानिकाकारस्य दुर्लभत्वेन प्रकृतसूत्राविषयत्वात्। अभाषितेति। एतस्मादिति। नित्यस्त्रीलिङ्गादि
त्यर्थः। विहितविशेषणतया व्याख्यानस्य फलमाह। बहुव्रीहेरिति। ततो विहितस्य नित्यमिति। अविद्यमाना खट्वा यस्याः सा अखट्वा तत्र शेषाद्विभाषेति समासान्तस्य

९२

स्यादेवङीविति विस्यति। अन्येतु ढादयएव प्रत्ययाः टिदिति तु प्रत्ययाप्रत्ययसाधारणं। तेन टित् यत्प्रातिपदिकं तदाद्यं तं च यत्प्रातिपदिकमित्यर्थः। टित्वं तु प्राति[illegible]कस्य
कोचित्प्रत्ययद्वारं क्वचित्स्वतः क्वचित्प्रकृतिकृतं भवत्यवयवधर्मस्य समुदाये उपचारात्। तत्र आद्यस्योदाहरणं कुरुचरीति। द्वितीयस्योदाहरणं नदडिति। प्र[illegible]
दिपुटितोः स्यपात्। तस्तत एव टित्वं। तृतीयं तु घेटष्टित्वात् तन्तनंधयीति। कुरुंनेउदाहरिष्यतीत्याहुः। कुरुचरीति। कुरुषु चरतीत्यधिकरणोपपदे चरेष्ट इति कर्तरि टः। उ-
पसर्जनत्वान्ने हेति। बहवः कुरुचराः यस्यां सा बहुकुरुचरेति बहुव्रीहिरन्यपदार्थप्रधानस्तथा च टिद् तस्योपसर्जनत्वान्ङीन्नेत्यर्थः। वक्ष्यमाणेति। नृनो ल्युट्टिल्
टः सहेतिथानञ्। शुशोवचिरितिवच्यादेशः। वच परिभाषणेऽस्य स्मात् कर्मणि वा ल्युट् थानञ्चास्यताम्सीति स्यः। कुत्वषत्वे आने मुगिति मुग् टित्वाद्दगित्वात्रैति। स्या-
निवद्भावेनेत्यर्थः। न चाल्विधित्वात् कथमिह स्थानिवद्भाव इति शंक्यं। नल्पीति ज्ञापकादनुबंधकार्येष्वनल्विधाविति निषेधस्याप्रवृत्तेः। अत एव रमायामित्यादौ
[illegible]श्वात् ङेरामित्कृते स्थानिवत्भावेनाम्याङित्वाद्याडापइति याडागमः सिध्यति। ज्ञापकान्नभवतीति। लिङ्गादेशपरस्मैपदानां स्थानिवद्भावेनैव ङित्त्वलाभान्नदागम
स्यपासुडोङित्वं स्थर्थं स्यप्त्या अया नुबंधकार्यमादेशानां नेति सामान्यतो ज्ञापयतीति भावः। पिच्च ङिन्नेत्यदादिगणे वक्ष्यमाणत्वान्तिबादिष्वोपदेशिकेन पित्त्वेना
ने[illegible] ङित्वं बाध्यत इति। सुटो ङित्वस्य वैयर्थ्याभावान्न तत्ज्ञापयतीति शंक मानं प्रत्याह। श्यः श्रानचः शित्वेनेत्यादि। सोपर्णेयीति। कद्रूश्च वै सुपर्णी चेति श्रुतिः। सुप-
र्णी[illegible]स्यापत्यं स्त्रीभ्यो ढक्। आयनेयीत्यादेशः। नन्वत्र निरनुबंधपरिभाषया शि- लायाढः यश्च तत्र साधुरित्यधिकारे सभायायः ढश्छंदसीति विहितस्तयोरेव ढयोर्ग्र-
हणेन भवितव्यं न तु ढकः सत्यं शिला- याढस्य स्वभावान्नपुंसक एव प्रवृत्तेः स्त्रियामसंभवात्। सभायाढस्य च संभवेपीति स्त्रियां छंदसि प्रयोगदर्शनादन्यस्य हि निरनुबंधस्या-
[illegible]वाद्गम्यासानुबंधकोगृह्यते। ऐंद्रीति। इंद्रो देवता अस्याः साऽस्य देवतेत्यण्। इंद्रस्येयमिति वा विग्रहस्तस्येदमित्यण्। अत्र व्याचक्षते। कृतग्रहणं गतिकारकपूर्वस्याप्यस्य
ग्रहणं भावेपि अत्रं तस्य प्रातिपदिकविशेषणात्तदंतं तमपि गृह्यत इति कुंभकारशब्दात् ङीप् स्यादेव। असत्वाकारशब्दादेव ङीप्। तथापि कुंभकारीति रूपं सिध्यत्येव। न च का-
रशब्दान्ङीपि तदंतात् स्त्रीभ्यो ढगिति ढक् प्रत्यये कौंभकारेयो न सिध्येदिति वाच्यं अनुपसर्जनस्त्रीप्रत्ययतदादिनियमाभावान्न सिद्धेः। नापि नियमाभावे कारीशब्दात् कदाचित् ढ-
कि कुंभकारेयइति रूपं स्यादिति शंक्यं। समर्थः पदविधिरिति वक्ष्यमाणत्वेनासमर्थात्तद्धितानुत्पत्तेरिति मनोरमायां तु इह सूत्रे अनेकं वाक्यं तत्र अनुपसर्जनमण्यो।

कारस्तरं तारिति व्याख्यानं। नेह। आपिशलमधीते आपिशला ब्राह्मणीति। अत्र हि प्रोक्तार्थे योऽण् श्रूयमाणस्स उपसर्जनं। यस्तु प्रधानोऽध्येत्रण् सोऽत्र लुगिति
स लुप्तः। वर्णप्राधान्यान्न प्रत्ययलक्षणमत्र प्रवर्त्तत इति स्थितं। नन्वेवमापिशलेति रूपसिध्यर्थमनुपसर्जनग्रहणस्यावश्यकत्वेन सामर्थ्यापादनात्कथमेतन्
ज्ञापकमिति चेदत्राहुः। स्वरितत्वप्रतिज्ञया अधिकारोऽयमित्यधिकारत्वाश्रयणादनुपसर्जनग्रहणस्य ज्ञापकत्वं संभवत्येवेति। औत्सीति। उत्सभवा
उत्सादिभ्योऽञ्। नन्वञैव सिद्धे शार्ङ्गरवाद्यञ इत्यत्राञ्ग्रहणं व्यर्थं। अत्र तस्याद्युदात्तत्वेन ङीप्ङीनोः स्वरविशेषाभावात्। मैवं। उत्सस्यापत्यं स्त्री औत्सीत्य
त्राकारान्तलक्षणं ङीपं बाधित्वा परत्वाज्जातिलक्षणो ङीष् प्राप्तः तद्बाधनार्थं तस्यावश्यकत्वात्। न चैवं शार्ङ्गरवाद्यञ इति ङीना सिद्धमिदं रूपमित्यञ्ग्रहणमिह
न कर्तव्यमिति वाच्यं। तत्र जातेरित्यनुवृत्तेः। अन्यथा शार्ङ्गरवस्य स्त्री शार्ङ्गरवी औत्सस्य स्त्री औत्सीत्यादौ पुंयोगविषयत्वान्ङीन स्यान्न तु ङीष्। इष्यते तु पुंयोगे ङीषेवात
स्मात् शार्ङ्गरवाद्यर्थस्य जातित्वं तां परिभाषणाद्वा द्यर्थे ङीवर्थमिहाप्यञ्ग्रहणमावश्यकमेवेति दिक्। ऊरुद्वयसीत्यादि। ऊरुः प्रमाणमस्याः सा। प्रमाणे द्वयसज्दघ्नञ्मा
त्रचः। [illegible] तनलोके तिस्रः [illegible] इति वद्द्वयसजिति मात्रच [illegible] ग्रहणं गृह्यते तदा दघ्नञ्मात्रच्ग्रहणमिहाकर्तुं शक्यं। पंचतयीति। पंच अवयवा अस्याः सं
ख्याया अवयवे तयप्। आक्षिकीति। तेन दीव्यतीति ठक्। लावणिकीति। लवणं पण्यमस्याः। लवणाट्ठञ्। ठक्ठञोर्भेदेनोपादानं ठन्निवृत्त्यर्थं। तेनेह न दण्डोऽस्त्यस्या द
ण्डिका। अत इनीति ठन्। अत एव त्रिष्वपि ङीप्। काशिषु भवा काशिका। काश्यादिभ्यष्ठञ्ञिठौ। यादृशीति। त्यदादिषु दृश इति कञ्। आ सर्वनाम्न इत्यात्वं। इत्वरी
ति। इण्नशजिसर्तिभ्यः क्वरप्। ह्रस्वस्य पिति कृति तुक्। क्वरपोऽन्यतरानुबन्धोपादानं स्पष्टार्थं। एकेनैव वरचो व्यावृत्तिसिद्धेः। विन्यस्तमंगलमहौषधिरीश्व
राया इति भारविः। तत्रं स्थेशभासेति वरच्। ईश्वरीति। तुत्रेधा पुंयोगलक्षणो ङीष्। [illegible] ईचोपधाया इत्यनुवृत्तौ अश्नोतेराशुकर्मणि वरट्। डित्यो लादिके वरटि टित्वा
न्ङीपि मध्योदात्तमदर्शं ईश्वः [illegible] पिवनिपिबाङीत्रयोराद्युदात्तमन्यतात्। [illegible] केति। अयं भावः शीलं छत्रादिभ्यो ण इति योऽण् तस्मिन्नण्कार्यं भवति [illegible]
इति ज्ञापकात्। तत्र हि अनित्यणि विहितं प्रकृतिभावं बाधितुं टिलोपो निपात्यते यदि तु णप्रत्यये अण्कार्यं न स्यात्। तर्हि किं तेन। ताच्छीलिके एव अण्कार्यं ज्ञापना
न्नेह दण्डः प्रहरणमस्यां क्रीडायां दाण्डा। तदस्यां प्रहरणमिति णः। छत्रादिभ्यो ण इत्येव सूत्रमस्तु किमनया कुसृष्ट्येति तु बहवः। चौरीति। चुरा शीलमस्याः। नत्र [illegible]

कृत्तिकृता। त्वत्र त्यं ख्युनग्रहणं सूत्रे प्रक्षिप्य कर पूर्व ख्युनामिति पठितं। तच्च भाष्यविरुद्धमित्युत्तरत्र स्फुटी भविष्यति। स्त्रैणी। पौंस्नीति। स्त्रीपुंसाभ्यामिति नञ्स्नञौ। शाक्ति
कीति। शाक्तिः प्रहरणमस्याः शाक्तियष्ट्योरीकक्। आढ्यंकरणीति। अनाढ्यः आढ्यः क्रियते अनयेत्यर्थे आढ्यसुभगेत्यादिना करणे ख्युन्। युवोरित्यनादेशः। अरुर्द्वि
षदिति मुमात्। रुणमित्तलुनीत्रि। तरुणतलुनयोर्गौरादिषु पाठात् ङीप् ङीषोः पर्यायो बोध्यः। स्वरे विशेषः कृवृदारिभ्य उरन्। त्रो रश्च लो वेति। तरुणतलुनयोरुरन्प्रत्ययान्त
त्वेऽनित्त्वाद्याद्युदात्तत्वं। सेवङीपि ङीषि स्वरे नोदात्तनेति। ॥ यञश्च ॥ योगविभाग उत्तरार्थः। प्राचां ष्फ तद्धित इत्यत्र यञ एवानुवृत्तिर्यथा स्यात्। हलस्तद्धितस्य। हल उ
त्तरपंचमी। यस्येति चेति सूत्रो [illegible] इत्यनुवर्तते। न स्तद्धित इत्यत स्तद्धित इति नानुवर्तते आपत्यस्य चेत्युत्तरसूत्रे पुनस्तद्धितग्रहणात् तदाह। हल उत्तरस्येत्यादि। तद्धि
त इत्यनुवृत्तेरिह न। पिस्योत। [illegible]। कापित्यकः। संकाशादिभ्यो ण्यः। ततो धन्वयोपधादिति वुञ्। उपधाभूतस्येति। सूर्यतिष्येत्यतउपधायाऽनुवर्तन्तेऽ

यञश्च।४।१।१६। यञन्तात्स्त्रियां ङीप् स्यात्। अकारलोपे कृते। हलस्तद्धितस्य।६।४।१५०॥ हल उत्तरस्य तद्धितयकारस्योपधाभूतस्य
लोपः स्यात् ईति परे। गार्गी। अनपत्याधिकारस्थात्र ङीप्। द्वीपे भवा द्वैप्या। अधिकारग्रहणान्नेह। देवस्यापत्यं दैव्या। देवाद्यञञौ। वि
तेहि यञ् प्रागदीव्यतीयो न त्वपत्याधिकारे पठितः॥ प्राचां ष्फ तद्धितः।४।१।१७॥ यञन्तात् ष्फो वा स्यात् स्त्रियां स च तद्धितः॥ . ॥

तिभावः। ननु यस्येति च नियमञो अकारलोपे कृते यकारस्य ईकारपरत्वमस्त्येव किमुपधाग्रहणानुवृत्त्या। न च अल्लोपस्य स्थानिवद्भावः। यलोपे तन्निषेधात्। अत्राहुः। यलोपे कर्त-
व्ये अल्लोपस्याभीयत्वेनासिद्धत्वादुपधाग्रहणानुवृत्तिरभ्युपगन्तव्येति। अन्ये त्वाहुः। सूत्रारंभसामर्थ्यादल्लोपस्यासिद्धत्वं न भवति। तथा चोपधाग्रहणं विनापि नात्र क्षतिः। ए
वं च सूर्यतिष्येति सूत्रेष्वपुपधाग्रहणं त्यक्तुं शक्यं मक्षपङ्क्तिरिति। गार्गीति। गोत्रप्रत्ययान्तस्य जातित्वेपि यो - पधत्वादजजातेरिति ङीष्न भवति। तथा च आद्युदात्तमेवेदं पदं
अनपत्याधिकारेति। यद्यपि। अपत्यग्रहणं कर्तव्यमित्येव वार्तिकं तथापि अपत्याधिकारविहितपरं तत्। तादृशश्च गर्गादियञेव न तु देवाद्यञ्। तस्य अपत्याधिकारात्॥
प्रागेव पाठात्। अत एव भाष्यकृता यञश्चेत्यत्र कर्तृकरणयोः। अत्र श्चेति गर्गादिभ्यो यञित्यत्रान्त्य ञ इति च अकारप्रश्लिष्टः। एवं यञञोश्चेति सूत्रेपि यस्कादिभ्यो गोत्रे अय
ञोश्च त्यकारः प्रश्लिष्टः। एतच्च मनोरमायां ग्रन्थानुरोधेनोक्तं। न त्वास्तु अधिकारग्रहणमिहानर्थकं यथाश्रुत वार्तिकेनैव द्वीपे भवा द्वैप्येति रूपसिद्धेः। न च देवस्यापत्यं दैवी इ॥

ण्येति रूपासिद्धिः शंक्या। अत एव प्रश्लेष इति भाष्यकारीयनिष्कर्षात्तद्धितः। न हि देवायत्त्राविति यत्राय त्रेत्यकारः प्रश्लिष्टुं शक्यते। किंच अधिकाकारग्रहणे अभिजितोऽपत्यं स्त्री त्यणं तान्स्वार्थी
अभिजिद्विदभृदित्यादिना यञि आभिजितीति रूपं न सिध्येत् श्रमरणायञित्यकारप्रश्लेषेण भाष्यकारीत्याचाहर्डीपः संभवादित्याहुः। स्यादेतत्। अकारं प्रश्लिष्य गार्ग्यादिभ्यात्प
ञि कृते गार्ग्ये इति रूपं न सिध्येत्। मैवं। वार्तिकप्रत्याख्यानाय भाष्यकृता अकारप्रश्लेषे कृते पितस्य तत्संज्ञा कृत्त्वेन लुप्तत्वादिष्टसिद्धेः। एवं च कारपरख्युनामिति पाठः करणाऽय
त्र श्लेषेति भाष्यविरुद्ध इति स्पष्टमेव। प्राचां ष्फ तद्धितः। तद्धितग्रहणं ष्फप्रत्ययांतस्य प्रातिपदिकसंज्ञार्थं तेन षिद्गौरेति ङीष् सिध्यति। ननु प्रातिपदिकसंज्ञां विनापि
षित्करणसामर्थ्यादेव ङीष् भविष्यति किमनेन तद्धितग्रहणेन। न च यञ्ञेतेयस्येति चेति लोपार्थं तद्धितेति वाच्यं। सवर्णदीर्घेणापि रूपसिद्धेर्लोपस्यानावश्यकत्वात्। एवं न

षः प्रत्ययस्य। १।३।६। प्रत्ययस्यादिः षः इत्स्यात्। आयनेयीनीयियः फढखछघां प्रत्ययादीनां। ७।१।२। प्रत्ययादिभूतानां फकारादीनां क्रमादायन्ना
देश आदेशा स्युः। तद्धितान्तत्वात्प्रातिपदिकत्वं॥ षित्त्वसामर्थ्यात्ष्फेणान्तेऽपि स्त्रीत्वविवक्षायां षिद्गौरेति वक्ष्यमाणो ङीष्। गार्ग्यायणी। सर्वत्र लोहितादिकतन्ते
भ्यः। ४।१।१८। लोहितादिभ्यः कतशब्दान्तेभ्यो यञन्तेभ्यो नित्यं ष्फः स्यात्। लौहित्यायनी। कात्यायनी। कौरव्यमाण्डूकाभ्यां च। ४।१।१९। आभ्यां ष्फः स्या
त्। क्रमेण टाप्ङीषोरपवादः। कुर्वादिभ्यो ण्यः। कौरव्यायणी। ढक् च मण्डूकादित्यण्। माण्डूकायनी। आसुरेरुपसंख्यानं॥ आसुरायणी॥

हितत्तद्धितग्रहणं स्वार्थं तादृशे क्वचित्ष्फो भवतीति ज्ञापनार्थं तेन आसुरेरुपसंख्यानमिति वक्ष्यमाणं सिध्यति॥ ॥ षः प्रत्ययस्य। आदिर्ञिटुडव इत्यत आदिरित्यनुव
र्तते इत्यभिप्रेत्याह। प्रत्ययस्यादिरिति। प्रत्ययस्य किं। षोडश षषु उत्वमित्यत्र उपदेशे स्थो षकारः। एतच्च कौस्तुभे स्थितं। आदिः किं। अविषः। महिषः। अविमह्योष्टिषच्। नन्वत्र
प्रयोजनाभावादेव षकारस्येत्संज्ञा न भविष्यति टित्वादेव ङीप् [illegible] हि षीति रूपसिद्धेः। न च पक्षे ङीष्यन्तोदात्तः प्रयोजनमिति वाच्यं। अनुदात्तस्य च यत्रोदात्तलोप इत्युदा
त्तनिवृत्तिस्वरेणापि तः परस्य ङीपोऽप्युदात्तत्वात्। अत्राहुः। निर्निगमनाभावेन पदेऽकारस्यापि श्रवणं स्यात्। तथा च षित्वान्ङीष्यविटीत्यादिरूपसिद्धिः स्यात्। अतः षकारस्यैव
श्रवणं भवतु मा कदाचिन्नटकारस्य श्रवणं भूदित्येतदर्थमादिग्रहणमावश्यकमिति। आयने। आयनी नोर्नकारस्य नेत्वं॥ फिनोनि नकरणसामर्थ्यात्। फकारादिप्रकारउच्चा
रणार्थः। तेन ढुक्फिनादीनामादेशः सिध्यति। आदिग्रहणं किं। ऊरुदघ्नमित्यादौ मा भूत्। प्रत्यये इति किं। धातोरादीनां मा भूत्। फक्कति। ढौकते। खनति। छादयति। घूर्णते।

ध्व्यादिषु तु यञोः कुषिण्यतोरित्यादिनिर्देशेन उक्तज्ञापकाभाव्यमित्यादेशाभावः। शामर्दः। शंढ इत्येवमादीनामेते आदेशा न भवंति। उणादयो बहुलमिति बहुलवचनादिति दिक्। क्र
मादिति। फा। आयनादा एया। खा ईना। छा ईया। घा इय् इत्यर्थः। स्त्रियामेव ष्फप्रत्ययविधानादत्र ङीषन्स्यादित्याशंक्याह। षित्वसामर्थ्यादिति। एकमेव स्त्रीत्वमुभाभ्यां उच्यत
इति भावः। सर्वत्रग्रहणमनंतरसूत्रादिहापकृष्यते बाधकबाधनार्थं तेनाल्पाच्चेति वस्यमाणं परमपि चापं बाधित्वा प्राचामते आवट्यशब्दादपि ष्फ एव भवति। चाविधे
सूत्रीचां मते सावकाशे तां तु। आवट्यायनी एवं चाय्यत्र ष्वाविषयेपि प्राचां ष्फ एव शार्कराक्ष्यायणीति यथा। सर्वत्र सर्वेषां मत इत्यर्थस्तदेतत्फलितमाह। नित्यं ष्फः स्यादिति। न
न्वारंभसामर्थ्यान्नित्यत्वे सिद्धे सर्वत्रग्रहणं व्यर्थमिति चेदत्राहुः। पूर्वसूत्रे बाधकबाधनोपयुक्तस्य तस्येह स्पष्टार्थमभ्युपगमान्न वैयर्थ्यमिति यञ इत्यनुवर्तनादाह। यञंते
भ्य इति। लोहितादिर्गर्गाद्यंतर्गणः [illegible] लौहित्यायनीति। शांसित्यायनी। वाभ्रव्यायणी। इत्यादयोपि ज्ञेयाः। ननु गर्गादौ कतक एव शकले निपठ्यते तथा च शाकल्या
यनीति रूपं न सिध्येत्। परितु लोहितादिकार्यार्थं कतशब्दात्प्रागेव शाकलशब्दः पठ्येत तर्हि शाकल्यस्य छात्राः शाकला इत्यत्र कण्वादिभ्यो गोत्रे इति कण्वादिकार्यं अण्
न सिध्येत्। उच्यते कतक एव शकले ति गणपाठे कण्वशब्दात् पूर्वं शाकलशब्दः पठितव्यः। कतंतेभ्य इत्यत्र कतस्यां ॥
न्तः कर्मंतः कतो नीता येषां ते कतंताः। शाकंध्वादित्वात्पररूपं। कतंतश्च कतंताश्चेति बहुव्रीहितत्पुरुषयोरेकशेषोभ्युपेयस्तथा कण्वादिभ्य इत्यत्रापि कण्वस्यादिः क
ण्वादिः। कण्व आदिर्येषामिति बहुव्रीहितत्पुरुषयोरेकशेषस्तथा च सर्वेष्टसिद्धिरिति। कौरव्य। टाप्ङीषोरिति। योपधत्वेन जातेरिति ङीषः प्राप्त्यभावात्कौरव्यशब्दा
ट्टाप् मांडूकात्तु ङीषिति भावः। यद्यपीह टाप्ङीषोरिति पाठः प्रायेण दृश्यते। तथापि तत्र ङीषिति लेखकप्रमाद एव। पारिभाषिकस्य पौत्रप्रभृतिगोत्रस्येव जातित्वान्ङी
षः प्राप्तिर्नेति मतांतराभिप्रायेण वा तथोक्तमिति बोध्यं। कौरव्यसाहचर्यान्मांडूकशब्दोप्यपत्यप्रत्ययांत एवेह गृह्यते। न तु तस्येदमित्यणंतस्तेन यद्यसौ कूपमांडूकि त
वेति मद्विप्रयोगः सिद्धः। तत्र हि मंडूकस्येयं भार्येति विवक्षया तस्येदमित्यण्॥ ॥ ॥ ॥ ॥ ॥ ॥

वयसि। कालकृतावस्थाशरीरावस्था वयः। यस्त्वर्थप्रकरणादिकमनपेक्ष्य श्रवणमात्रेण वयः प्रतिपादयति स वयोवाचीत्युच्यते। अन्तरङ्गत्वात्तेनेह। उत्तानशया। लोहितपादा। इ
ह प्रकरणादिना वयसः प्रतीता अपि शब्दस्य प्रवृत्तेः। अबालापि हि व्याध्यादिवशादुत्तानाशेते अलक्तकेन च रक्तचरणा भवति। प्रथमे इति किं। वृद्धा। कुमारीति। प्रथमवयोवचन
एवायं शब्दो नत्वमूढत्वप्रयुक्तः। पुंस्यपि कुमार इति प्रयोगात्। वृद्धकुमारीति गौणः प्रयोगः। वयस्यचरम इति। यौवनं न प्रथमवयः किं तु द्वितीयं इति वार्त्तिकारम्भः। उ प्रवया
ऽपचयलक्षणो द्वे एव वयसी इति पक्षे यौवनस्यापि प्राथम्यात् सूत्रेणैव सिध्यतीति बोध्यं। वयांसि चत्वारीत्येके यदाहुः। आद्ये वयसि नाधीतं द्वितीये नार्जितं धनं। तृतीये

वयसि प्रथमे। ४।१।२०। प्रथमवयोवाचिनोऽदन्तात् स्त्रियां ङीप् स्यात्। कुमारी। वयस्यचरम इति वाच्यं॥ वधूटी। चिरण्टी। वधूटचिरण्टशब्दौ यौ
वनवाचिनौ। अतः किं। शिशुः कन्याया। ना। कन्यायाः कनीन चेति निर्देशात्। द्विगोः। ४।१।२१। अदन्ताद् द्विगोर्ङीप् स्यात्। त्रिलोकी। अजादित्वात्त्रिफ
ला। त्र्यनीका। सेना। अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि। ४।१।२२। अपरिमाणान्ताद् बिस्ताद्यन्ताच्च द्विगोर्ङीप् न स्यात् तद्धितलुकि सति। प
ञ्चभिरश्वैः क्रीता पञ्चाश्वा। आर्हीयष्ठक्। अध्यर्द्धेति लुक्। द्वौ बिस्तौ पचति द्विबिस्ता। द्व्याचिता। द्विकम्बल्या। परिमाणात्तु। द्व्याढकी। तद्धितलु
कि किं। समाहारे पञ्चाश्वी। काण्डान्तात्क्षेत्रे। ४।१।२३। क्षेत्रे यः काण्डान्तो द्विगुस्ततो न ङीप् तद्धितलुकि। द्वे काण्डे प्रमाणमस्याः द्विकाण्डा क्षेत्रभ
क्तिः। प्रमाणे द्वयसज्जिति विहितस्य मात्रचः प्रमाणे लो द्विगोर्नित्यमिति लुक्। क्षेत्रे किं। द्विकाण्डी रज्जुः। पुरुषात्प्रमाणेऽन्यतरस्यां। ४।१।२४। प्रमा
णे यः पुरुषस्तदन्ताद् द्विगोर्ङीब्वा स्यात् तद्धितलुकि। द्वौ पुरुषौ प्रमाणमस्याः सा द्विपुरुषी द्विपुरुषा वा परिखा॥ रे नतपसन चतुर्थे किं करिष्यसि

ति १ त्रीण्यपीत्यन्ये। यदाहुः। पिता रक्षति कौमारे भर्त्ता रक्षति यौवने। पुत्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति इति १ त्रिलोकीति। त्रयाणां लोकानां समाहारे तद्धितार्थे द्वि
गुः अकारान्तोत्तरपदो द्विगुरिति स्त्रीत्वं। त्रिफलेति। अत्र द्विगुत्वात् ङीप् प्राप्नोति। ननु पाककर्णेति ङीष्। तत्र जातेरित्यनुवृत्तेः। त्र्यनीकेति। अनीकमग्रजा। त्रयाणामनी
कानां समाहारः। अजादेरा कृतिगणत्वाट्टाबिति त्र्यनीकाधिकरणे मीमांसकाः पंचाश्वेति। नन्वत्र द्विगोरिति ङीप् प्राप्नोति गन्तृत्वात्तु स्यादेत्रान्नापरिमा
णेति। इषे धस्य निरवकाशत्वेति वाच्यं। पंचानामजानां निमित्तं धनपतिसंयुक्तिः पंचाजापचोष्ट्रत्यादौ सावकाशत्वात्। तत्र हि गोद्वयोसंख्येति यत्... घस्या

अध्यर्धपूर्व इत्यादिना लुगिति चेत्। अत्राहुः। उकोर्यो कार इति व्याख्यानात्। ठगंतलक्षणो ङीब्नेति। द्विविस्तेति। सुवर्णविस्तौ हेम्नो क्षे इत्यमरः। आचितो दश भाराः स्युः। द्विकंब
लैति। कृष्यायां कंबलाभ्यां क्रीता। कंबल्यमूर्णपलशतं कंबलाच्च संज्ञायामिति यत्। ततः क्रीतार्थस्य ठञो लुक्। द्व्याढकीति। द्वावाढकौ पचतीति विग्रहे आढकाचितपा
त्रात्खोऽन्यतरस्यां द्विगोष्ठंश्चेति खठनौ विहितौ ताभ्यां मुक्ते प्राग्वतीयष्ठञ् तस्याध्यर्धेति लुक्। एतेन व्याचिता। व्याख्याता। स्यादेतत्। काण्डान्तादित्युत्तरसूत्रे परि
तः सर्वतोऽयेन मीयते तत्परिमाणमाढककुडवादि। न तु परिच्छेदकमात्रमिति मनोरमायां स्थितं। तथा चापरिमाणत्वादेव सिद्धे विस्तादिग्रहणमिह व्यर्थं स्यात्।
अत्राहुः। उन्मानस्य निषेधार्थं विस्तादीनामेवेति नियमार्थं तद्ग्रहणं। तेनाद्विकार्षापलीव्द्यसीत्यादि सिध्यतीति। काण्डान्तात्। षोडशहस्तप्रमाणो दण्डः काण्डः। यद्यपि
विशेषणेन तदन्तविधिसिद्धस्तथाप्यसत्यं तद्ग्रहणे क्षेत्रे इत्येतन्नश्रुतत्वात् काण्डस्यैव विशेषणं स्यान्न तु काण्डान्तस्य। ततश्च द्वाभ्यां काण्डाभ्यां काण्डप्रमिताभ्यां क्षेत्रा
भ्यां क्रीता द्विकाण्डी वडवेत्यत्र निषेधः स्यात्। इह तु निषेधो न स्यात्। द्विकाण्डा क्षेत्रभक्तिरिति। अत्र हि काण्डप्रमाणे वर्तते काण्डान्तस्तु क्षेत्रे अतस्तद्ग्रहणं कृतं। इ
ह द्विगोरित्यनुवर्तते न तु तद्धितलुकीति च। तदाह द्विगुस्तस्मान्ङीबित्यादि॥ मात्रच इति। द्वयसचो लुगिति प्राचोक्तं नादर्तव्यं। प्रथमश्च द्वितीयश्च ऊर्ध्वमाने
मतौ ममेति सिद्धान्तादिति भावः। द्विकाण्डी रज्जुरिति॥ द्वे काण्डे प्रमाणमस्याः। पूर्ववत्तद्धितलुक्। द्विगोरिति ङीप्। नन्विहापरिमाणान्तादिति पूर्वेणैव निषेधः स्यात्॥
काण्डशब्दस्यायामपरतया अपरिमाणार्थत्वात्। परितः सर्वतः। आरोहतः परिणाहतश्च येन मीयते तद्धि परिमाणं आढककुडवादि। न तु यथा कथंचित्प
रिच्छेदकमात्रं। यदाहुः। ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः। आयामस्तु प्रमाणं स्यात्संख्या बाह्या तु सर्वत इति। अत एव द्विहस्ता द्विभित्तिरित्यत्र ङीप्
न भवतीति चेत्। अत्राहुः। नियमार्थमिदं क्षेत्र एव निषेधो यथा स्यादिति। तथा च द्विकाण्डी रज्जुरित्यत्र ङीबेव सूत्रारम्भफलमिति। पुरुषात्प्रमाणेऽपरिमाणा
न्तत्वान्निषेधे प्राप्ते विकल्पार्थं वचनं। पुरुषशब्दो यद्यपि लोके जातिवचनस्तथापि द्वौ पुरुषौ प्रमाणमस्या इति वाक्ये प्रमाणशब्दसामानाधिकरण्यात्प्रमाणे
वर्तत एव। वृत्तौ तु शब्दशक्तिस्वाभाव्यादेव। तथा च शुल्बसूत्रं पंचारत्निः पुरुष इति। द्विपुरुषीति। अत्र प्रमाणे लो द्विगोर्नित्यमिति द्वयसचो लुगिति न्यासकारः। नन्वि
ह तद्धितलुग्दुर्लभः। पुरुषशब्दस्य प्रमाणवाचित्वाभावेन प्रमाणे ल इति श्लोकवार्तिकस्याप्रवृत्तेः। यो हि रामादिवत् प्रमाणत्वेन प्रसिद्धस्तत्रैव तत्प्रवर्तते

रसुसुत्तांनात्कः स्त्रियामित्युपसंख्यानादिति। नन्विहैवलाघवार्थं बहुव्रीहेरूधसोऽङीषृन् श्चेतिसूत्र्यतां। अनङ्‌ चेतिवा। समासांतेषुऊधसोनङितिचत्यत्काधनुषो नङित्येवव
न्यतामितिचेत् कवभावेसावकाशस्यास्यवसेकपावाधापत्तेः। सिद्धांतेतुअनङः। समासांतनयाशेषत्वमेवेहनास्तीतिनकप्। संख्याव्यया। आदिग्रहणान्यदांतरव्यवधाने
पिस्यादेवाहिविधोघ्नी। दामा। वहुव्रीहिविशेषणत्वादेवसिद्धे अंतग्रहणंस्पष्टप्रतिपत्त्यर्थं। संख्यादेरिति। समासनिर्देशोपिस्वरितत्ववलादेकदेशएवानुवर्तत इतिभावः
अननुवृत्तेरिति। भाष्यकृताः नन्नुवर्तितत्वांदितिभावः। एवंचोद्दामेत्यत्र दामहायनांताच्चेत्यस्य प्रसक्त्यापूर्वांतेषुडापूङीपनिषेधेषुप्राप्तेषुवहुराज्ञीवद्रूपत्रयं।

नित्यंसंज्ञाछन्दसोः। ४। १। २९॥ अन्नन्ताद्बहुव्रीहेरुपधालोपिनोङीप्। सुराज्ञीनामनगरी। अन्यत्रपूर्वेणविकल्पएव। वेदेशतमूर्ध्नी। केवलमा
मकभागधेयपापाऽपरसमानाऽऽर्यकृतसुमङ्गलभेषजाच्च। ४। १। ३०॥ एभ्योनवभ्योनित्यंङीप्स्यात्संज्ञाछन्दसोः। अथोतइन्द्रकेवलीर्विशःभा
गधेयी। पापी। अपरी। समानी। आर्यकृती। सुमङ्गली। भेषजी। अन्यत्रकेवलाइत्यादि। मामकग्रहणन्नियमार्थं। अणन्तत्वादेवसिद्धेः तेनलो
केऽसंज्ञायां। मामिका। अन्तर्वत्पतिवतोर्नुक्। ४। १। ३२॥ एतयोःस्त्रियान्नुकस्यात्। ऋन्नेभ्योङीप्। गर्भिण्यां जीवद्भर्तृकायाञ्चप्रकृतिभागौनि
पात्यते। तत्राऽन्तरस्त्यस्यामितिविग्रहेअन्तश्शब्दस्याऽधिकरणशक्तिप्रधानतयाऽस्तिसामानाधिकरण्याऽभावाद्प्राप्तोमतुप्निपात्यते। पति
वत्नीत्यत्रतुवत्वन्निपात्यते। अन्तर्वत्नी। पतिवत्नी। मतुवाहरणन्तुअन्तरस्त्यस्यांशालायांघटः। पतिमती। पृथिवी। पत्युर्नोयज्ञसंयोगे। ४। १। ३३॥ प
तिशब्दस्यनकारादेशस्स्याद्यज्ञेनसम्बन्धे॥ वसिष्ठस्यपत्नी। तत्कर्तृकयज्ञस्यफलभोक्त्रीत्यर्थः। दम्पत्योस्सहाऽधिकारात्॥ ॥ ॥

भवत्यतोव्याचष्टेडापनिषेधावपीति॥ ॥ नित्यंसंज्ञा अन्नउपधालोपिनइतिविकल्पस्यापवादः। आरंभसामर्थ्यात्सिद्धेपिनित्यग्रहणमुत्तरत्रविकल्पा।
ननुवृत्तिसूचनायकृतमित्याहुः। शतमूर्ध्नीति। इहपंचदाम्नीतिक्वचित्पाठः॥ सचायुक्तः। दामहायनांताच्चेत्यनेनैवसिद्धत्वात्। केवल। छंदसि। मामकीतनू। मित्राव
रुणयोर्भागधेयी। तन्वं संसृपापीः। उतापरीभ्यः। समानीवआकूतिः। आर्यकृती। सुमंगली। सुमंगलीरियंवधूरित्यत्रतुछंदसीवनिपावितिमत्वर्थेईप्रत्ययोवो
ध्यः। शिवाहृद्रस्यभेषजी। अन्यत्रकेवलेत्यादीति। मामकनरकयोरुपसंख्यानादित्वंमामिका। भागशब्दात्पुल्लिंगात्स्वार्थेधेयप्रत्ययः। स्वार्थिकाःक्वचित्प्रकृति

नोलिंगवचनान्यतिवर्तन्त इति स्त्रीत्वं। भागधेया। अभेदोपचारान्नद्वति वर्तमानः पापशब्दो विशेष्यनिघ्नः। पापा अपरा समाना। आर्येण कृषे इति प्राक् सु उत्पत्तेः। कृदन्ते न समासः। टाप्। आर्यकृता भिषजस्यमित्यत्र आदिवृद्धिः। रपवादोः स्मादेव निपातनादेकारः। संज्ञाछन्दसोरिति नियमादन्यत्र भेषजा। प्रत्युदाहरणं त्विति। अन्तर्वत्नी पतिवत्नीति प्राचीनोक्तं प्रत्युदाहरणमयुक्तमिति भावः। आद्ये अस्ति सामानाधिकरण्याभावान्मतुपो संभवात्। द्वितीये तु वत्वासंभवादिति भावः।

विभाषा सपूर्वस्य। ४।१।३४॥ पतिशब्दान्तस्य सपूर्वस्य प्रातिपदिकस्य नो वा स्यात्। गृहस्य पतिः। गृहपतिः। गृहपत्नी। अनुपसर्जनस्येति होहार्थमनुवृत्तमपि नान्यविशेषणं। किन्तु तदन्तस्य। तेन बहुव्रीहावपि। दृढपत्नी। दृढपतिः। वृषलपत्नी। वृषलपतिः। अथ वृषलस्य पत्नीति कथमिति चेत्। पत्नीव पत्नी उपचारात्। यद्वा। आचारक्विबन्तात्कर्तरि क्विप्। अस्मिन्पक्षे। पत्नियौ। पत्नियः॥ इतीयङ्विषये विशेषः। सपूर्वस्य किं। गवां पतिः स्त्री। नित्यं सपत्न्यादिषु। ४।१।३५॥ पूर्वविकल्पापवादः। समानस्य सभावो निपात्यते समानः पतिर्यस्याः सा सपत्नी। एकपत्नी। वीरपत्नी। पूतक्रतोरै च। ४।१।३६॥ अस्य स्त्रियामैआदेशो ङीप् च। इयं त्रिसूत्री पुंयोग एवेष्यते। पूतक्रतोः स्त्री। पूतक्रतायी। यया तु क्रतवः पूताः क्रतुरेव सा। वृषाकप्यग्निकुसितकुसिदानामुदात्तः। ४।१।३७॥ एषामुदात्तऐआदेशः स्यात् ङीप् च। वृषाकपेः स्त्री वृषाकपायी। हरविष्णु वृषाकपी इत्यमरः। वृषाकपायी श्रीगौर्योरिति च॥ अग्नायी। कुसितायी। कुसिदायी। कुसिदशब्दो ह्रस्वमध्यो न तु दीर्घमध्यः। मनोरौ वा। ४।१।३८॥ मनुशब्दस्यौकारादेशः स्यादुदात्तैकारश्च वा। ताभ्यां सन्नियोगशिष्टो ङीप् च। मनोः स्त्री मनावी। मनायी। मनुः॥ ०॥

———— ॥ ॐ ॥ विभाषा सपूर्वस्य। अत्र तु विभाषेयं। अत्र तदन्तग्रहणं गत्वात्। पूर्वेण सहितः सपूर्वस्तस्य। यस्य समुदायस्य पूर्वो वयवो विद्यते तस्येत्यर्थः। स च समुदायः पतिशब्देन भवतीति पतिशब्देन तदन्तविधिरित्याह। पतिशब्दान्तस्येति ननु पत्युरिति प्रातिपदिकविशेषणेन तदन्तलाभात्संज्ञस्य सेवास्तु किमनेन सपूर्वग्रहणेन। अत्राहुः केवलपतिशब्दस्यापि व्यपदेशिवद्भावेन पत्नीतत्वा इति प्रसंगः स्यात्तद्वारणाय सपूर्वग्रहणमिति। अत्र पूर्वशब्दः पूर्वावयवपर इति ध्व

नपन्यग्नुसह इति। गवां पतिः स्त्रीति। पातीति पतिरिति क्रियाशब्दस्य त्रिलिंगत्वादिह स्त्रीत्वं। तथा च तैत्तिरीये नपुंसकेपि प्रयुज्यते। अन्नं साम्राज्यानामधिपति तन्मावत्विति। व्यस्तेकथमिति। मध्वं चानुसमस्तेप्युपचारादित्युक्तं तद्वथैवेति भावः। नित्यं सपत्न्यादिषु। आरंभसामर्थ्यादेव सिद्धे नित्यग्रहणं स्पष्टार्थं। निपात्यत इति। इह गणे समान एक वीर भ्रातृपुत्रेति समानादय एव पठ्यं तेन तत्र समानादिष्विति न कव्ये सपत्न्यादिष्वित्युक्तिसंभावनिपातनार्थेति भावः। सपत्न्यादिषु बहुव्रीहिराश्रीयत इत्याशयेनाह। समानः पतिर्यस्याः सेति। पूतक्रतोरै च। ऐकार आदेशो न तु प्रत्ययः। उत्तरसूत्रे उदात्तग्रहणात्तनन्त्विति अन्यथा लघावं तरिति मध्योदात्तो वृषाकपिशब्द उदात्तत्वं प्रयोजयेत्। अग्न्यादिषु त्रिषु स्थानेतरतम इत्येकस्मिन्नह्मिति हन्यादिग्रंथाविरुध्येरन्निति भावः। उदात्तैकार इति। शृस्वृस्निहीत्यादिना मनेरुप्रत्ययविधौ धान्येति दिव्यधि

वर्णादनुदात्तात्तोपधात्तो नः। ४।१।३९॥ वर्णवाची यो नुदात्तान्तस्तोपधस्तदन्तादनुपसर्जनात्प्रातिपदिकाद्वा ङीप्स्यात्तकारस्य नकारादेशश्च। एनी। एता। रोहिता। रोहिणी। वर्णानां तणेतिनितान्तानामिति फिट्सूत्रेणाद्युदात्तः। त्र्येण्या शलल्येति गृह्यं। त्रीण्येतान्यस्या इति बहुव्रीहिः॥ अनुदात्तात्किं। श्वेता। घृतादीनां चेत्यन्तोदात्तोयं। अत इत्येव। शितिः स्त्री। पिशङ्गादुपसंख्यानं। पिशङ्गी पिशङ्गा असितपलितयोर्न। असिता। पलिता। छन्दसि क्नमेके॥ असिक्नी। पलिक्नी। अवदातशब्दस्तु न वर्णवाची किं तु विशुद्धवाची। तेन अवदाता इत्येव। अन्यतो ङीष्। ४।१।४०॥ तोपधभिन्नाद्वर्णवाचिनोऽनुदात्तान्तात्प्रातिपदिकात्स्त्रियां ङीष्स्यात्। कल्माषी। सारङ्गी। लघावन्ते द्वयोश्च बह्वषो गुरुरिति मध्योदात्तावेतौ। अनुदात्तात्किं

कारन्मभृश्वेत्याद्युदात्तः। समासनिर्देशेन एतद्दर्शयति। उदात्त इत्यनुवर्तमानं संबधानुवृत्तेरैकारेणैव संबध्यते नत्वौकारेणापीति। ततश्चैकारौकारावुदात्तौ स्त इति प्राचोक्तं वृत्तिपरसंज्ञान्यायादि विरोधादुपेक्ष्यमिति भावः। मनायीति। मध्योदात्तमिदं। इतरत्पदद्वयमाद्युदात्तं। एताकर्बुरा॥ ॥ वर्णानामिति। एतः। श्रोणः। शितिः। पृश्निः। पृषदिति क्रमेणोदाहरणानि। आद्युदात्त इति। अनुदात्तं पदमेकवर्जमिति शेषनिघातेनानुदात्तांत एतशब्द इति भावः। त्र्येण्येति। अत्र एतशब्दस्योपसर्जनत्वापि तदंतसमासस्यानुपसर्जनत्वमिति भावः। पूर्वपदात्संज्ञायामिति णत्वं। गृह्यमिति। गृहूग्रहणे ऋदुपधाच्चाक्लृपिचृतेरिति क्यप्। त्रीण्येतान्यस्या इति। ननु चित्रकिर्मीरकल्माषशबलैताश्च कर्बुरे इति चित्रपर्याय एतशब्दः तथा च शलल्यां चित्रत्वाभावाद्यासंगतिरित्याशंक्य केचिदिह व्याचक्षते। एतशब्दोत्र एतावयवपर इति। नास्त्यत्रार्थासंगतिः न चैव

मपि गुणविषयेन नपुंसकप्रयोगेन संगच्छते। गुणे शुक्लादयः पुंसि इत्युक्तेरिति वाच्यं। एतानि एतावयवाधिकरणानीति व्याख्यया गुणलिंगपरत्वादेतच्छब्दस्य नपुंसकत्वम् उपपद्यते इति दिक्। आदिति। लघावंत इति पिशंगशब्दस्य मध्योदात्तत्वादन्यतो ङीषिति ङीषि प्राप्ते ङीबुपसंख्यायते। स्वरे विशेषः। क्नमेक इति। असितपलितयोस्तकारस्य वर्णे नुस्नादिति नकारे प्राप्ते तं बाधित्वा नकारस्थाने क्नमादेशं तत्संनियोगेन ङीपं चेच्छंत्येके आचार्या इत्यर्थः। अत्र छंदसि के इत्यन्वयात् भाषायां क्नो भवत्येव। छंदस्येवेके इ... अन्ये तु भाषायामपीत्यर्थपर्यवसानात्। अन्यथा एकग्रहणं भाष्यकारो न कुर्यात् नहि छंदसि पलिक्नीरिद्युवतय इत्यादिप्रयोगेषु कश्चिद्विप्रतिपद्यते। एवं च गतो गणाः सूर्णमसिक्निकानामिति प्रयोगो नानुपपन्नः विशुद्धवाचीति। दैपशोधन इत्युक्तेः। अमरेण तु विशुद्धत्वसाधर्म्यादवदातः सितो गौर इत्युक्तमसितभावः श्यामवंत इति। अंते नाम एकस्मिन् लघौ हस्वो वलघ्वोः परतः वन्हषो वन्हव कस्य गुरुरुदात्तः स्यात्। अषित्यचः प्राचां संज्ञा। कृष्णेत्यादि। कृषेश्चेति प्रत्यये कपेश्चेति सौनागस्य तोरोणादिके इलचि च कृष्णकपिलावंतोदात्तौ॥ ॥ षिद्गौरादि। नर्तकीति। नृतूधातोः शिल्पिनि ष्वुन्। पुनः षित्वमवयवः चरितार्थत्वात् दन्त

षिद्गौरादिभ्यश्च ॥४।१।४१॥ षिद्भ्यो गौरादिभ्यश्च ङीष् स्यात्। नर्त्तकी। गौरी। अनडुही। अनड्वाही। पिप्पल्यादयश्च॥ आकृतिगणोयं॥

स्य प्रातिपदिकस्याविशेषकं। त्रपुणः षित्वस्याङ्गि धौ चरितार्थत्वाच्च येत्यत्र तु न ङीष् मजेः षित्वमनार्थमिदादौ मजेतिपाठादित्याहुः मजेः शित्वादेवाऽभिदादौ मजेति पाठ सत्वनाम्ये वर्णवाचित्वेपि प्रातिपदिकस्वरेणांतोदात्तत्वादन्यतो ङीषिति ङीष् न प्राप्नोतीति इह गणे पाठः। अनड्वाही अनडुहीति अनकारांतत्वाज्जातिलक्षणस्य पुंयोगलक्षणस्य वा ङीषोऽप्राप्तत्वात् गणे पठ्यते। प्रत्ययसंनियोगपठः लुडें ङीषि परे आम् विकल्पार्थः। गौर मत्स्य मनुष्य शृंग। गवय। हय। मुकय गौतम। अनड्वाही अनडुही तरुण तलुन। श्वन्। पिप्पल्यादयश्च। पिप्पली। हरीतकी। कोशातकी। पृथिवी। मातामही। इत्यादि। यत्तु प्राचा बाह्नन्नेभ्यो ङीबित्यत्र शुनीत्युदाहृतं तन्न गौरादिगणे श्वन्शब्दस्यादर्शनपठ्युक्तमित्याहुः॥ अत्र केचित् नित्यस्त्रीत्वाज्जातेरस्त्रीविषयादित्यप्राप्ते ङीषि पिप्पल्यादयो गौरादिषु पठ्यंते ङीषं तत्पाठ सुचित्यप्रयोजनः। नच पिप्पली भार्या यस्य स पिप्पलीभार्य इत्यादौ पुंवद्भावं बाधित्वा ङीषः श्रवणाय पाठस्यादित्येतदर्थः स इति वाच्यं। भावितपुंस्कत्वाभावादेव पुंवद्भावनिषेधसिद्धेः। किंच। अवांतरगणत्वाभ्युपगमोपि पिप्पल्यादेर्व्यर्थ एव। नचैवं जाताधिकारे चित्रा रेवती रोहिणीभ्यः स्त्रियामुपसंख्यानमित्यत्र पिप्पल्यादेराकृतिगणत्वात्पुनर्ङीषिति वक्ष्यमाण

सूर्यतिष्य। अत्र भस्येत्यनुवर्तमानमपि न संबध्यते। विषयपरिगणनेनैवातिप्रसंगनिवारणात्। मत्स्यस्य ङ्यामिति। नेह मत्स्यस्येदं मात्स्यं। छे च ङ्यां चेति। सूरीयः। सू
री। आगस्तीयः। आगस्ती। नेह सौर्यं चरुं। आगस्त्यं। नक्षत्राणीति। नक्षत्रसंबंधी योण् नक्षत्रेण युक्तः काल इति संधिवेलादिषु नक्षत्रेभ्योणिति चविहितस्तस्मिन्
त्यर्थः। तत्र तिष्यस्य यलोपो नैयमिको पुष्यस्य तु अप्राप्तो विधीयते। तिष्येन युक्तः कालस्तैषः। पुष्येण युक्तः पौषः। तथा तिष्ये भवस्तैषः। पुष्ये भवः पौषः। नेह। तिष्यस्या

सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः ६।४।१४९॥ अङ्गस्योपधाया यस्य लोपस्स्यात् स चेद्यः सूर्या द्यवयवः। मत्स्यङ्यां। सूर्यागस्त्ययोश्छे च ङ्यां च।
तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यं॥ मत्सी। मातरि षिच्चेति षित्वादेव सिद्धे गौरादिषु मातामहीशब्दपाठ इनित्यः षितां ङीषादृष्टा। जानपद
कुण्डगोणस्थलभाजनागकालनीलकुशकामुककबरा द्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाके
शवेशेषु ४।१।४२॥ एकादशभ्यः प्रातिपदिकेभ्यः क्रमाद्वृत्त्यादिष्वर्थेषु ङीष् स्यात्। जानपदी वृत्तिश्चेत्। अन्या तु जानपदा। उत्सादित्वादञ्जले
न हि द्वित्वीप्याद्युदात्तः। कुण्डी। अमत्रं चेत्। कुण्डान्या। कुडि दाहे। गुरोश्च हल इत्यप्रत्ययः। यत्तु अमृते जारजः कुण्ड इति मनुष्यजातिवाचन
त्वात् जातिलक्षणो ङीषप्रवृत्तेरेव। अमत्रे हि स्त्रीविषयत्वाभावात् प्राप्तो ङीष् विधीयते। नतु नियम्यते। गोणी आवपनं चेत्। गोणान्या। स्थली अकृत्रि
मा चेत्। स्थलान्या। भाजी श्राणा चेत्। भाजान्या। नागी स्थूला चेत्। नागान्या। गजवाची नागशब्दः स्थौल्यगुणयोगादन्यत्र प्रयुक्त उदाहरणं। सर्प
वाची तु दैर्घ्यगुणयोगादन्यत्र प्रयुक्तः प्रत्युदाहरणं। काली वर्णश्चेत्। काल्यान्या। नीली अनाच्छादनं चेत्। नीलान्या। नील्या रक्ता शाटीत्यर्थः।
नीलस्य पुनः क्वचित्यनु। अनाच्छादनेपि सर्वत्र न। किन्तु। नीलादोषधौ॥ निली। प्राणिनि च॥ नीली गौः। संज्ञायां वा॥ नीली। नीला। कुशी अयोवि
कारश्चेत्। कुशान्या। कामुकी मैथुनेच्छा चेत्। कामुकान्या। कबरी केशानां सन्निवेशविशेषः। कबरान्या चित्रेत्यर्थः॥ ॥
यतैष्यः। मत्सीति। योपधत्वाज्जातेरस्त्रीविषयादित्यप्राप्ते गौरादिपाठान्ङीष्। मातरि षिच्चेति। पितृव्यमातुलमातामहेति सूत्रस्थमिदं वचनं तच्च पितामहीति
रूपसिध्यर्थमवश्यं वक्तव्यमिति न वार्तिकस्य वैयर्थ्यं यत्तु पितामहशब्दमपि गौरादिषु पठंति तन्मते वचनमिदं स्वरमात्रोनसंगच्छते। यदि तु अनित्यत्वज्ञापना

मेववचनस्य फलमिति ब्रूषे तर्हि षिद्गौरादिभ्यश्चेति सूत्रे एवास्तु नित्यं षित इति वक्तव्यं किमनेन वक्रमार्गेणेति दिक्। दंश्यते ऽनेनेति दंष्ट्रा। दाम्नीशसित्यादिना करणे
ष्ट्रन्। जानपदीति। जानपदे भवा। वृत्तिश्चेदिति। वर्तते ऽनयेति वृत्तिर्जीविका। कुंडीति। अस्त्री कमंडलुः कुंडी त्यमरः। कुंडा ऽन्येति। क्रियाशब्दो ऽयं। अत एवाहाकुं
डिका हरस्यारिरायुक्तु घटपर्यायः कुंडशब्दः सन प्रत्युदाहरणं पिठरस्थाल्युखा कुंडमिति। तस्य नपुंसकत्वात्। अग्न्यालयादिपर्यायोऽपि कुंडशब्दो न पुंसकलिं
गो निध[illegible]मन्व्यालयेमानभेदे देव जलाशये इति मेदिनीकोशात्। आवपनं चेदिति। आङ्पूर्वाद्वपेरधिकरणे ल्युट्। ओप्यते निक्षिप्यते धान्यमस्मिन्नागो
णान्येति। स्थूलायां हस्तिकं नाम। अकृत्रिमेति। यथा सैषा स्थलीयत्र विचिन्वता त्वामिति। स्थलान्येति। कृत्रिमा पुरुषेण संस्कृता। श्रोणापकां अयोविकार इति॥ फा
ल इति प्रसिद्धः। कुशान्येति। छंदोगाः स्तोत्रीयाः गणनार्थानौदुंबरान शकून कुशा इति व्यवहरंति। अतः कृकमीति सूत्रे प्रसिद्ध एवायं। कामुकान्येति मैथुना

कामेत्या वा॥४।१।४२॥ शोणात्। शोणी। शोणा। वोतो गुणवचनात्॥४।१।४४॥ उदन्ताद्गुणवाचिनो वा ङीष्स्यात्। मृद्वी। मृदुः। उतः किं। शुचिः। गुणे
ति किं। आखुः। खरुसंयोगोपधान्न॥ खरुः पतिंवरा कन्या। पाण्डुः॥ बह्वादिभ्यश्च॥४।१।४५॥ एभ्यो वा ङीष्। बह्वी। बहुः॥ कृदिकारादक्तिनः
रात्रिः। रात्री॥ सर्वतोऽक्तिन्नर्थादित्येके॥ शकटी। शकटिः। अक्तिन्नर्थात्किं। अजननिः। क्तिन्नन्तत्वात् प्राप्ते विध्यर्थमप्यइति शाब्दोगणेपठ्यते॥
हिमकाषिहतिषु चेति पद्भावः॥ ॥ रे दन्य तु धनादिकं कामयितुं यस्याः शीलं सेत्यर्थः। लषपतेत्युकञ्॥ ॥ शोणात्। शोणः कोकनदच्छविरि
ति कोशः। शोणशब्दस्य वर्णवाचित्वात्। वर्णादनुदात्तात्तोपधात्तो न इति ङीष्सिद्धे ऽपि वा च मेव ङीष्वान्येषामिति नियमार्थमिदं। वोतो गुणवचनात्। गुणो नाम ने
हाऽदेश्रूपः। उत इत्यनिते [illegible] पहरणाच्चा नोपाव[illegible]मात्रमिदं आखुर्द्रव्यमित्यादावतिप्रसंगादिति चेत्। अत्राहुः संज्ञा जाति क्रियाशब्दान्हित्वा अन्यगु
णवाचिनः। चतुष्टयी शब्दानां प्रवृत्तिरित्याकरग्रंथनिष्कर्षादेव निर्णय इति॥ भाष्ये तु सत्वे निविशते ऽपैति पृथग्जातिषु दृश्यते। आधेयश्चाक्रियाजश्च सो ऽसत्वप्रकृतिर्गु
ण इति स्थितं। सत्वं द्रव्यं। सत्व एव निविशत इति सावधारणं व्याख्येयं। एतेन सत्ता व्यावर्त्यते। सा हि न केवलं द्रव्ये वर्तते किंतु द्रव्यगुणकर्मसु। न तु द्रव्य एव द्रव्यत्वं वर्तत
इति। तद्व्यावृत्तिमित आह। अपैतीति। अपगच्छतीत्यर्थः। अर्थात्सत्वादेव। यथा पीततायां जातायां फलादेर्नीलता। अपैतीति नैवं द्रव्यत्वं द्रव्यादपैति। एवमपि रूपत्वं गाद्

वर्तते अन्यत्रास्वाश्रयेन तत्रातिव्याप्तिरत आह। पृथग्जातिषु दृश्यत इति। गोत्वं हि द्रव्यान्तरे नाजातिषु न दृश्यते। गुणस्तु दृश्यते। यथा अभ्रे दृष्टा नीलता तृणादिष्वपि
दृश्यते। एतेन पूर्वार्द्धे न सकले जातेर्व्यवच्छेदः। एवं तर्हि कर्म द्रव्ये वर्तते तन्नोऽपैति पृथग्जातिषु दृश्यते चेति तत्रातिव्याप्तिरत आह। आधेयश्चाक्रियाजश्चेति
उत्पाद्योऽनुत्पाद्यश्च द्विविधः। आधेयो यथा घटादेः पाकजो रूपादिः। अक्रियाज अनुत्पाद्यः स यथा आकाशादेर्महत्त्वादिः। क्रिया तु सर्वाप्युत्पाद्यैव न नित्येति तस्या
द्विविधाभावाद्गुणत्वाभावः। एवमपि द्रव्यस्य गुणत्वं प्राप्नोति। अवयविद्रव्यं हि अवयवद्रव्येषु निविशते। असमवायिकारणसंयोगनिवृत्तौ विनाशात्ततोऽपैति भि
न्नजातीयेषु च हस्तपादादिषु दृश्यते हि द्विविधं च भवति। नित्यानित्यभेदेन निरवयवस्याऽत्मपरमाण्वादेर्नित्यत्वादवयविद्रव्यस्य तु घटादेरनित्यत्वादत आह॥ अ
सत्त्वप्रकृतिरिति। अद्रव्यस्वभाव इत्यर्थः॥ पतिंवरेति। एवं च पाणिग्रहणं त्वं कंठाभिधायित्वाद्गुणवचनोयमिति भावः। बह्वादिभ्यश्च। बहुशब्दस्य गुणवाचि
त्वान्ने पूर्वेणासिद्धेप्युत्तरार्थं ग्रहणं नित्यं छंदसीत्युत्तरसूत्रेण बहुशब्दादपि छंदसि नित्यं यथा स्यादिति। वस्तुतस्तु बहुशब्दो नित्यं छंदसीति सूत्रे च व्यर्थमेव
सर्वविषये [illegible] छंदसि व्यवस्थितत्वात्। गणसूत्रमाह। कृदिकारादिति। सर्वतोक्तिन्नर्थादित्यपि गणसूत्रमेव व्यवस्थितविभाषात्वादिह न। सुगंधिः। प्रियक
ातिर्वंश्या। अजननिरिति। आक्रोशे मन्यनिरिति जनेरनिप्रत्ययः। इह अन्यान्यपि गणसूत्राणि संति। शक्तिः शस्त्रे। शक्तिः। शक्ती शस्त्रे किं। शक्तिः सामर्थ्यं। शक्तिश
स्त्रीति पाठे तु शब्दद्वयं। शस्त्रिः शस्त्री। इतः प्राण्यंगात्। धमनिः। धमनी। चंद्रभागान्नद्यां। चंद्रभागी। चंद्रभागा। अहन्शब्दोऽत्र पठ्यते। सामर्थ्यान्नदंतं [illegible] बहुव्रीहि
रुद्राहीयेने अनुपसर्जनाधिकारबाधश्च। दीर्घान्हीप्रावृट्। पसेडापड्डीव्रि षेधाः। बहु। पद्धति। यष्टि। विकट। विशाल। कल्याण पुराण चंड कृपाण। अहन।
॥ इत्यादि॥ ॥

पुंयोगादाख्या[illegible]यां। इह पुमिति लुप्तषष्ठीकं पृथक्पदं। तच्चावर्तते। पुंयोगादिति हेतौ पंचमी। आख्यायामिति तु पंचम्यर्थे सप्तमीत्याशयेनाह। या पुमाख्येत्यादि। पुमाख्या पुंवाचकः शब्दः। पुंयोगात् स्त्रियां वर्तते इत्यनेन गौणीवृत्तिरुक्ता। यदा तु मुख्यार्थो न स्येदमित्यण। तदा गोपीत्येव भवति। योगः संबंधः। स चेह दंपतिभाव एवेतिनाग्रहः। किंतु अन्य जनकभावोपि गृह्यते संज्ञो चेमानाभावात्। तेन कौसल्यया सा विमुखेन रामः प्राक्कैकयीतो भरतस्ततो भूदिति भट्टिप्रयोगः संगच्छते। [illegible] कयस्य [illegible] हता केकयी। जनपदशब्दात् क्षत्रियादञ् इत्यपत्यप्रत्यये तु कैकयीति स्यात्। नन्वेह अतश्चेति तद्राजाकारस्य लुक् [illegible] क्यः। [illegible] व्यभ[illegible]

पुंयोगादाख्यायां॥४।१।४८॥ या पुमाख्या पुंयोगात् स्त्रियां वर्त्तते ततो ङीष् स्यात्। गोपस्य स्त्री गोपी। पालकान्तान्न॥ गोपालिका। अश्वपालिका। सूर्य्याद्देवतायां चाब्वाच्यः। सूर्य्यस्य स्त्री देवता। सूर्य्या। देवतायां [illegible]। सूरी। कुन्ती। मानुषीयं। इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्य्याणामानुक्॥४।१।४९॥ एषामानुगागमः स्यात् ङीष् च। इन्द्रादीनां षण्णां मातुलाचार्य्ययोश्च पुंयोग एवेष्यते। तत्र ङीषि सिद्धे आनुगागममात्रं विधीयते। इतरेषां त्वनुभयं। इन्द्राणी। हिमारण्ययोर्महत्वे॥ महद्धिमं। हिमानी। अरण्यानी। यवाद्दोषे॥ दुष्टो यवो यवानी। यवनाल्लिप्यां॥ यवनानां लिपिर्यवनानी। मातुलोपाध्याययोरानुग्वा॥ मातुलानी। मातुली। उपाध्यायानी। उपाध्यायी। या तु स्वयमेवाध्यापिका। तत्र वा ङीष् वाच्यः। उपाध्यायी। उपाध्याया। आचार्य्याद् णत्वञ्च। आचार्य्यस्य स्त्री आचार्य्यानी। पुंयोग इत्येव आचार्य्या स्वयं व्याख्यात्री। अर्य्यक्षत्रियाभ्यां वा स्वार्थे। अर्य्याणी। अर्य्या। स्वामिनी वैश्या वेत्यर्थः। क्षत्रियाणी। क्षत्रिया। पुंयोगे तु। अर्य्यी। क्षत्रियी। कथं ब्रह्माणीति। ब्रह्माणमानयति [illegible]। [illegible] कर्म्मण्यण्॥ ॥

[illegible] तिप्रतिषेधात्। तथा च कालिदासः। कैकेयि कामाः फलितास्तवेति। एतेन देवकी व्याख्याता। पुंयोगादि[illegible]। अयं हि संज्ञा शब्दः स्वभावात् स्त्रियमाह न तु पुंवाचकशब्द[illegible] योगात्। आख्यायां किं। प्रसूता। अयं हि [illegible] प्रसवमाह स च प्रसवो गर्भधारणादिः पुंयोगनिमित्तक इत्यस्तीह पुंयोगः। किंतु नायं पुंसो वाचक इति न ङीष्। सूर्याद्देवतायामिति। ङीषोपवादः। सूरीति। सूर्येति ष्ये ति यलोपः। आनुगिति। ननु हलादिरेव [illegible] वा इन्द्रवरुणः किमनेन दीर्घोच्चारणेन। अत्राहुः। अनुकि कृते अतो गुण इति पररूपं स्यात्। न चाकारोच्चारण[illegible] ख्यादी

सु
सि·कौ·
टी·त·
११२

र्घो भविष्यति। अन्यथा हि नुकमेव कुर्यादिति वाच्यं। अल्लोपो न इत्यस्य बाधनचरितार्थत्वात्। यत्तु नेति वदादेशे कर्तव्ये आमलिंगककारोच्चारणसामर्थ्या
देव अल्लोपो न भविष्यतीति चिंत्यं। सर्वत्रापि ककारस्य चारितार्थ्यात्। न हि तत्र लोपोस्ति। न संयोगादिति निषेधात्। तस्मात् ककाराकारयोः सामर्थ्याविरहे य
रूपबाधनार्थं दीर्घोच्चारणमावश्यकमिति। केचित्तु नुकि कृते लघ्वक्षराणि कत्वादल्लोपो न इत्यस्याप्रवृत्त्या सवर्णदीर्घ एव अनुकि कृते भविष्यत्यकारोच्चारण
सामर्थ्यात्। एवं सत्यानुगिति दीर्घोच्चारणसामर्थ्यात् आ अनुगिति पदं विभज्यते। तत्रेंद्रादीनामनुकेव सिद्धे आकारादेशविधानसामर्थ्यान्नकोपि दन्यतोपि वि
धानमनुमीयते तेन ब्रह्माणस्त्री ब्रह्माणीति सिध्यतीत्याहुः। अत्र नव्याः अलुउक्तुरीत्या दीर्घोच्चारणमन्यतो विधानार्थमेव परं तु आ अनुगिति पदं विभज्य नका
रव्याकारादेशे कृते दीर्घग्रहणसामर्थ्यादनदंतस्याप्यनुकि ब्रह्माणीति सिध्यतीति न व्याख्येयं। उभयविधौ वाक्यभेदापत्तेः। किंतु इंद्रमाचक्षाणः इंद्रः त
त्वाचेति तदाचष्टे इति ण्यंतात्क्विपा तस्य इंद्रः स्त्री इंद्राणीति सिध्यतीत्येवं व्याख्येयं। दीर्घोच्चारणसामर्थ्यादत इत्यधिकारो नुपसर्जनादिति काऽस्य बाध्यत इति।
एवं चेत्साधारण उभयबाधाभ्युपगमापेक्षया तत इत्यधिकारबाधमात्राभ्युपगमेन ब्रह्माणः स्त्री ब्रह्माणीति रूपसिद्धये आकारादेशोनुकृ चमवनीत्येव व्याख्या[illegible]मितिवाच्यं।
वाक्यभेदापेक्षया उभयबाधने गौरवस्य सुसहत्वात्। एवं च ब्रह्माणमानयति जीवयतीत्यादिवक्ष्यमाणग्रंथोपि स्वरसतः संगच्छत इत्याहुः। हिमानीति॥ महत्
त्वविशिष्टो हिमारण्ययोः स्त्रीत्वं। दुष्टो यवो यवानीति। जात्यंतरमेवानेनाभिधीयते। अयमेव चास्य दोषो यस्माद्दिपवत्वजातेरभावेपि नदाकारानुकृतिः। यवनानीति। त
कोङीष्। वा ऑ षा च्य इति। इदं च इङ् श्चेति षग्विधायकसूत्रस्थं वार्तिकं। वक्ष्यति च तत्र अपादाने स्त्रियामुपसंख्यानं तदंताच्च वा ङीषिति। उपाध्या
यिसा अस्या अधीयत इति विग्रहः। स्वार्थ इति। यदि तु पुंयोग एवायं विधिः स्यात् शूद्रापि क्षत्रियस्य भार्या क्षत्रियाणी स्यात् [illegible] क्षत्रिया
क्षत्रियाणी न स्यादिति भावः। वैश्यावेत्यर्थ इति। अर्यः स्वामिवैश्ययोरित्यर्थद्वये निपातनादिति भावः। अत्रामरस्य संग्रहः। आर्याणी स्वयमर्या स्यात् क्षत्रिया क्षत्रि
याण्यपि। उपाध्यायाप्युपाध्यायी स्यादाचार्यापि च स्वतः। आचार्यानी तु पुंयोगे स्यादर्यी क्षत्रियी तथा। उपाध्यायान्युपाध्यायीति। कथमिति। सूत्रे ब्रह्मन् शब्दस्या
ग्रहणादानुगनुपपन्न एवेति प्रश्नः। उत्तरं तु ब्रह्माणमानयतीत्यादि। ण्यंतादनप्राणन इत्यस्मात्कर्मण्यणि णेरनिटीति णिलोपे टिड्ढाणञिति ङीपि पूर्वपदा[illegible]

क्रीतात्। इहत्यकरणेत्यनुवर्त्तते प्रातिपदिकादिति च तदाह। अदन्तादिति। प्रातिपदिकादिति शेषः। वस्त्रक्रीतीति। वस्त्रेण क्रीत इति स्थिते प्राक् सुबुत्पत्तेः कर्तृ
करणे इति समासे अदन्तत्वान् ङीष्। क्वचिन्नेति। कर्तृकरणे कृता बहुलमिति बहुलग्रहणात् गतिकारकोपपदेति वक्ष्यमाणस्य क्वचिदप्रवृत्तौ सुबन्तेन समासः। तत्र सु
पः श्रवणे वा अन्तरंगत्वात् तताऽदन्तत्वाभावान् ङीषिति भावः। करणपूर्वादिति किं। गवा क्रीता। अश्वेन क्रीता इत्यादि विग्रहे मा भूत्। पूर्वशब्दोऽत्रावयववचनः। समा
सप्रातिपदिकं चान्यपदार्थः। करणं पूर्वं यस्मिन् प्रातिपदिके तदिदं करणपूर्वं तस्मादित्यर्थः। क्तादल्पाख्यायां। अत्रव्याचख्युः अल्पाख्यायामिति समुदायोपा
धिः। अल्पैरवलिप्ता अभ्रलिप्ती। कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति समुदायस्यापि क्तान्तत्वान् ङीष्। यद्यपि पूर्वपदार्थस्य अभ्रस्यैव अल्पत्वं गम्यते

क्रीतात्करणपूर्वात्॥४।१।५०॥ क्रीतान्तादन्तात् करणादेः स्त्रियां ङीष् स्यात्। वस्त्रक्रीती। क्वचिन्न। धनक्रीता। क्तादल्पाख्यायां॥४।१।५१॥ करणादेः
क्तान्तादन्तात् स्त्रियां ङीष् स्यादल्पत्वे द्योत्ये। अभ्रलिप्ती द्यौः॥ बहुव्रीहेश्चान्तोदात्तात्॥४।१।५२॥ बहुव्रीहेः क्तान्तादन्तोदात्तादन्ता
त्स्त्रियां ङीष् स्यात्। जातिपूर्वादिति वक्तव्यं॥ तेन बहुनञ्सुकालसुखादिपूर्वान्न। ऊरुभिन्नी। नेह बहुक्रीता। जाता। नान्ना। दन्तजाता। पाणि
गृहीती भार्यायां॥ पाणिगृहीताऽन्या॥ अस्वाङ्गपूर्वपदाद्वा॥४।१।५३॥ पूर्वेण नित्ये प्राप्ते विकल्पोऽयं। सुरापीती सुरापीता। अन्तोदात्तात्किं।
वस्त्रछन्ना। अनाच्छादनादिति दान्तनिषेधः। अत एव पूर्वेणापि न ङीष्। स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्॥४।१।५४॥ असंयोगोपधमुप
सर्जनं यत्स्वाङ्गं तदन्तादन्तात् प्रातिपदिकाद्वा ङीष्। केशानतिक्रान्ता। अतिकेशी। अतिकेशा। चन्द्रमुखी। चन्द्रमुखा। संयोगोपधात्तु सु
गुल्फा। उपसर्गजनात्किं। शिखा। शोभना शिखा। तुशिखा॥ ॥

१ तथापि न दल्पत्वे सति तद्विलेपनस्याप्यल्पत्वमवश्यं भवतीति समुदायोपा
धित्वमल्पत्वस्य संगच्छत इति भावः। वहुव्रीहेः। अन्तभावार्थं वहोर्नञ्वदुत्तरपदभूम्नि। नञ्सुभ्यां। जातिकालसुखादिभ्योनाच्छादनात् क्तोऽकृतमितप्रतिपन्ना इति तथान्तोदा
त्तविधायकानि। तत्र जातिपूर्वादित्युक्ते बन्धादिपूर्वकस्याप्यतिव्याप्तिः ... सत इति। सुखादिपूर्वान्नेति। सुखादिभ्यः कर्तृवेदनायामित्यत्र ये पठिताः। सुख दुःख कृच्छ्र
लित्र गृत्यं ते। सुखयातादुःखयानामुक्तं दुःखेनयानं प्राप्तमनयेति विग्रहः। अस्वाङ्गपूर्वपदाद्वेति विकल्पस्य वक्ष्यमाणत्वादिह स्वाङ्गपूर्वपदत्वोदाहरणमाह। ऊरुभिन्नी

भिन्नोरूरुयस्या इति बहुव्रीहौ भिन्नशब्दस्य निष्ठेति पूर्वनिपाते प्राप्ते जातिकालसुखादिभ्यः परा निष्ठा वाच्येति परनिपातः। बहुकृतेति। बहूनि कृतानि यया सा।
जाता तान्तेति। वर्णादनुदात्तादिति वत्। बहुव्रीहेरुदात्तादित्येव सिद्धे अंतग्रहणं नित्यत्वप्रतिपत्त्यर्थं। वा जातेति तु वैकल्पिक उदात्तो न तु नित्य इति भावः। पाणि
गृहीतीति। यस्याः पाणिरग्निसाक्षिकं गृह्यते तस्यां वाच्यायां पाणिगृहीतशब्दान्ङीष् वक्तव्य इत्यर्थः। अन्येति। कौतुकादिना पाणिर्गृहीतो यस्याः सस्यादेः सा पा
णि गृहीता। पूर्वेणानित्ये प्राप्त इति। एतेन विकल्पोऽप्यसंज्ञातपूर्वादेवेति ध्वनितं। कथं तर्हि पुत्रहतीत्यत्र अस्वांगपूर्वपदाद्वेति वा ङीषिति कैय्यटः। पुत्रशब्द
स्य जातिवाचकत्वादन्यथा पुत्रादिनीत्यत्रैतस्य सुप्यजातावितिणिनिर्न स्यात्। यदि त्वदनमादः सोऽस्यास्तीति आदिनी पुत्राणामादिनीति विगृह्य कथंचित्साधि
तेऽपि जातिकालसुखादिभ्य इत्यंतोदात्तविधायके सूत्रे जातेः किं पुत्रजात इति वक्ष्यमाणमूलग्रंथो विरुध्यत एवेति चेदुच्यते॥ प्रादुर्भावविनाशाभ्यां सत्त्वस्य
युगपद्गुणैः। असर्वलिंगां बह्वर्थां तां जातिं कवयो विदुः १ इति भाष्ये लक्षणांतरमुक्तं॥ सत्त्वस्य द्रव्यस्य प्रादुर्भावविनाशाभ्यामाविर्भावतिरोभावौ प्राप्नोति या
च द्रव्यभाविनीत्यर्थः। गुणैर्गुणपदं द्रव्येण संबध्यते। बह्वर्थां सर्वव्यक्तिव्यापिनीमित्यर्थः। गांजातिमित्यादिकैय्यटेन व्याख्यातं। एवं च पुत्रत्वस्याविर्भावद्रव्यभा
वित्वेनोक्तलक्षणलक्षितत्वाभावाज्जातिवाचक एव पुत्रशब्द इत्यस्वांगेति वा ङीषिति ग्रंथस्तत्र न विरुध्यते। आकृतिग्रहणा जातिरित्यादिमुख्यपक्षाश्रयणे तु पुत्र
त्वस्य अजातित्वाज्जातेः किं पुत्रजात इति ग्रंथोऽपि संगच्छत इति दिक्। केचिदर्वाचीनास्तु पुत्रहतीपुत्रजग्धीत्यत्र क्तादल्पाख्यायामित्यनेन ङीष् समूढः। सुरापी
तीति। पीता सुरा यया सा। जातिकालेति सूत्रवार्तिकाभ्यां निष्ठाया अंतोदात्तत्वपरनिपातौ। वस्त्रछन्नेति। बहुव्रीहिस्वरेण पूर्वपदप्रकृतिस्वरे [illegible]निघाति
त कृते अनुदात्तान्तोऽयं स्वांगाच्चेति। इह बहुव्रीहिरिति नानुवर्तत इति ध्वनयन्नुदाहरति। अतिकेशीति। शिखेति। शीङः खो ह्रस्वश्चेति ह्रस्वस्तदंतादप्॥ अ
न्यथा टाबंतत्वाभावात् ङीष् स्यादिति भावः। केचित्तु सुशिखेत्यपि प्रत्युदाहरंति। तच्चिंत्यं। टाबंतेन समासे अनदंतत्वेन ङीषः प्राप्त्यभावात्। अन्यच्च टापः प्रागेव कृते तेनै
व समासादुदंतत्वमस्तीति वाच्यं। तथा हि सति शोभना शिखा सुशिखेत्यर्थे स्यालाभादिति न व्याः। यद्यत्र स्वमंगं गृह्येत न बर्हिसुकुमारशालेत्यत्रापि स्यान्न तु
खस्य शालां गत्वाना सुकेशीरथ्येत्यत्र न स्यात्। केशानां रथ्यां गत्वाभावात्। अतोऽव्याप्त्यतिव्याप्तिपरिहारार्थमाह॥ ॥ ॥

स्वाङ्गविधेति। मूर्त्तिमदिति। स्पर्शवत्त्वद्रव्यपरिमाणं मूर्त्तिः प्राणीति। मुखनासिकासंचारी वायुः प्राणः। सुमुखा शालेति। एवं च फलमुखी कारणमुखी चान्ये।

स्वाङ्गं त्रिधा। अद्रवन्मूर्त्तिमत्स्वाङ्गं स्यात् प्राणिस्थमविकारजं। सुस्वेदा। द्रवत्वात्। सुज्ञाना। अमूर्त्तत्वात्। सुमुखा शाला। अप्राणिस्थत्वात्। सुशो-
फा विकारजत्वात्। अतत्स्थं तत्र दृष्टं च। सुकेशी। सुकेशा वा रथ्या। अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात्। तेन चेत्तत्प्रायुतं। सुस्तनी। सुस्तना वा
प्रतिमा। प्राणिवत्प्राणिसदृशे स्थितत्वात्। नासिकोदरोष्ठजङ्घादन्तकर्णशृङ्गाच्च। ४।१।५५। एभ्यो वा ङीष् स्यात्। आद्ययोर्बह्वच्त्वलक्षणो निषेधो बा-
ध्यते पुरस्तादपवादन्यायात्। ओष्ठादीनामस्वाङ्गानामनु असंयोगोपधादिति पर्युदासे प्राप्ते वचनं मध्येऽपवादन्यायात्। सहनञ्लक्षणस्तु प्रतिषेधः
परत्वादस्य बाधकः। तुङ्गनासिकी। तुङ्गनासिका। इत्यादि। नेह। सहनासिका। अनासिका। अत्र वृत्तिः। अङ्गगात्रकण्ठेभ्यो वक्तव्यं। स्वङ्गी। स्वङ्गे-
त्यादि। एतच्चानुक्तसमुच्चयार्थेन चकारेण संग्राह्यमिति केचित्। भाष्याद्यनुक्तत्वादप्रमाणमिति प्रामाणिकाः। अत्र वार्त्तिकानि। पुच्छाच्च। सुपुच्छी
सुपुच्छा। कबरमणिविषशरेभ्यो नित्यं। कबरं चित्रं पुच्छं यस्याः सा कबरपुच्छी मयूरी इत्यादि। उपमानात्पक्षाच्च पुच्छाच्च। नित्यमित्येव। उलूकपक्षी
शाला। उलूकपुच्छी सेना। न क्रोडादिबह्वचः। ४।१।५६। क्रोडादेर्बह्वचश्च स्वाङ्गान्न ङीष्। कल्याणक्रोडा। अश्वानामुरः क्रोडा। आकृतिगणोऽयं। सुजघ-
ना। सहनञ्विद्यमानपूर्वाच्च। ४।१।५७। सहेत्यादित्रिकपूर्वान्न ङीष्। सकेशा। अकेशा। विद्यमाननासिका। नखमुखात्संज्ञायां। ४।१।५८। ङीषन्न
स्यात्। शूर्पणखा। गौरमुखा। संज्ञायां किं। ताम्रमुखी। कन्या। दिक्पूर्वपदान्ङीप्। ४।१।६०। दिक्पूर्वपदात्स्वाङ्गान्तात्प्रातिपदिकात्परस्य ङीषो ङीवा
देशः स्यात्। प्राङ्मुखी। आद्युदात्तमपदं। वाहः। ४।१।६१। वाहन्तात्प्रातिपदिकात् ङीष् स्यात्। ङीषेवानुवर्त्तते न ङीप् आदित्यवाड्चमेदिन्यौ ही चमेरुर्बु-
सख्यशिश्वीति भाषायां। ४।१।६२। आदित्यवाट् प्रकारे भाषायामित्यस्याः न न्तरं दृष्टव्यं छन्दस्यपि क्वचित्। सखी। अशिश्वी। आधेनवो धुनयन्तामशि-
श्वीः। अपि नयोगाः वामादिकारत्ति भावः। प्रतिनियोगत स्तनस्य प्राणिन्यदृष्टत्वात् स्वाङ्गत्वं न प्राप्नोतीति तृतीयलक्षणमाह। तेन चेदिति। येनाङ्गेन प्राणिरूपं वस्तु यत्प्रायुतं

तेनन स्वदृशेनांगेनन तनु अप्राणिस्थं वस्तु तथा प्राणिवद्युतं युक्तं चेन तद्व्य प्राणिनि दृष्टं स्वांगमित्यर्थः। मध्ये ऽपवाद इति। मध्ये ऽपवादाः पूर्वान् विधीन् बाधंते नोत्तरानिति न्या-
यादित्यर्थः। ङः। क्रोडेति। स्त्रीलिंगोयमिति हरदत्ताद्यः। तत्रोपसर्जन ह्रस्वत्वे कृते अदंतत्वान्ङीष् प्राप्तिः। अमरस्तु। ननाक्रोडं भुजांतरमित्याह। रत्नपतिस्तु पुल्लिं-
गतामाह। गलोच्च क्रोडेति प्रातिपदिकमात्रं पठ्यते न तु टाबंतमिति गणरत्नमहोदधिकारः। एवं चाऽविशेषाल्लिंगत्रयेऽप्युदाहरणं बोध्यं। माधवस्तु [illegible]
मज्जन इति धातावाह। क्रोडः। घञ्। क्रोडः। अश्वानामुरः। टाबंतो ऽदंतस्वभावतो विशेषविषयः। क्रोडादिषु टाबंतमात्रस्य पाठात्। भुजांतरमात्रवचनस्य क्रोडशब्दस्य बहु-
व्रीहौ स्वांगलक्षणो ङीष् विकल्पो भवत्येव। कल्याणक्रोडा कल्याणक्रोडीमपूरीति केशैः सहवर्तत इति सकेशा। अविद्यमानाः केशाः यस्याः सा अकेशा। [illegible] पूर्व

जातेरस्त्रीविषयादयोपधात्॥ ४।१।६३॥ जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततः स्त्रियां ङीष् स्यात्। आकृतिग्रहणा जातिः। अनुगतसंस्था-
नव्यंग्येत्यर्थः। तटी। लिङ्गानां च न सर्वभाक्। सकृदाख्यातनिर्ग्राह्या। असर्वलिङ्गत्वे सत्येकस्यां व्यक्तौ कथनाद्व्यक्त्यन्तरे कथनं विनापि सुग्रहा।
जातिरिति लक्षणान्तरं। वृषली। सत्यन्तं किं। शुक्ला। सकृदित्यादि किं। देवदत्ता। गोत्रं च चरणैः सह॥ अपत्यप्रत्ययान्तः शाखाध्येतृवाची च
शब्दो जातिकार्यं लभत इत्यर्थः। औपगवी। कठी। बह्वृची। ब्राह्मणीत्यत्र तु शार्ङ्गरवादिपाठान्ङीष् बाध्यते। जातेः किं। मुण्डा। अस्त्रीविषया-
त्किं। बलाका। अयोपधात्किं। क्षत्रिया। योपधप्रतिषेधे हयगवयमुकयमनुष्यमत्स्यानामप्रतिषेधः। हयी। गवयी। मुकयी। हलस्तद्धितस्येति य-
लोपः। मनुषी। मत्स्यस्य ङ्यां॥ मत्सी॥ ॥

९ पदान्तसंज्ञायामिति णत्वं। यदा तु शूर्पवन्नखा नियस्या इति योगमात्रं विवक्ष्यते न तु संज्ञा तदा ऽसंज्ञा-
त्वान्न ङीष् निषेधो न वा णत्वं तेनरा क्षसस्य वियोगवृत्त्या शूर्पनखीति भवतीत्याहुः। ङीषो ङीबादेश इति। अन्यतो ङीषित्यतो ङीषित्यनुवर्तते। दिक्पूर्वपदादिति पंच-
म्या ङीषिति प्रथमायाः श्च्वी कल्प्यते इति भावः। यदि तु स्वतंत्रो ङीप् स्यात्तर्हि प्राग्गुल्फा प्राक्क्रोडेत्यत्रापि प्रसज्येत। पूर्वोक्तासंयोगोपधादित्यस्य निषेधानां चानुवृत्तौ प्र-
तिपत्तिगौरवमिति भावः। वाहः। ण्वि प्रत्ययांतस्य वहेरनुकरणमिदं। वहश्चेत्यनेन कर्मण्युपपदे एव वहेर्ण्वि प्रत्ययविधानात्केवलस्य संभवो नास्तीति सामर्थ्यात्तदंतवि-
धिरित्यभिप्रेत्याह। वाहंतादिति। न ङीबिति अस्वरितत्वादिति भावः। दित्यौहीति। ङीषि संज्ञायां वाह ऊठ् संप्रसारणं चेति पूर्वरूपं। एत्येधत्यूठ्स्विति वृद्धिः सत्यपि श्चीनि

स्यजे। अर्थे कार्यासंभवात्। स्वरूपं तु न गृह्यते। अस्त्रीविषयत्वादित्यादेर्वैयर्थ्यापत्तेरित्याशयेनाह। जातिर्वा चियदिति। आकृतिग्रहणेति। ग्रहणमिति करणे
ल्युट्। सामान्येन नपुंसकं। आकृतिर्ग्रहणं यस्या इति बहुव्रीहिस्तदेतत्फलितमाह। अनुगतसंस्थानेत्यादि। वृषलेब्राह्मणादिव्यावृत्तसंस्थानाभावादव्याप्तिरिति
लक्षणांतरमाह। लिंगानां चेत्यादि। चकारो भिन्नक्रमः निर्ग्राह्येत्यस्यानंतरं बोध्यः। लिंगानामिति कर्मणि षष्ठी। न सर्वभाक् सर्वाणि लिंगानि न भजतीत्यर्थः। सर्व
शब्दस्य लिंगापेक्षत्वेपि गमकत्वाद्वृत्तोप्ययं समासश्च भवत्येवेति नात्र सामर्थ्याभावः शंक्यः वृषलीति। एकस्यां हि व्यक्तौ वृषलत्वे कथिते तदपत्यं तत्सहोदरा
दौ कथनं विनापि तस्य सुग्रहत्वादिति भावः। देवदत्तेति नन्वत्र परिमाणभेदेन द्रव्यभेदाभ्युपगमे स्यादेवातिप्रसंगः। एकस्यां व्यक्तौ देवदत्तत्वे कथिते व्यक्त्यंतरे कथनं
विनापि तस्य सुग्रहत्वात्। मैवं। परिमाणभेदेन द्रव्यभेदस्य प्रामाणिकैरनभ्युपगमात्। अभ्युपगमे वा समानकालतया व्यक्त्यंतरस्य विशेषणात्। तथा च यस्यां व्य
क्तौ देवदत्तत्वं कथ्यते तत्समानकालमन्या देवदत्तव्यक्तिरप्रसिद्धेति न देवदत्तत्वं जातिः। वृषलत्वादिस्तु भवत्येव तदीयपितृभ्रात्रादिषु तस्य सुग्रहत्वादिति। ऋक्। उ
क्तलक्षणद्वयानाक्रांतत्वात्तृतीयं लक्षणमाह। गोत्रं च चरणैः सहेति। अपत्याधिकारादन्यत्र लौकिकं गोत्रं। चरणः शाखाध्येता तदेतत्फलितमाह। अपत्य
प्रत्ययांतमित्यादि। अत्र व्याचख्युः। नाडायनं बह्वृचमिदमिति नपुंसकप्रयोगदर्शनात्सर्वलिंगौ गोत्रचरणौ अतः पृथक् लक्षणं कृतं। तेनात्र लिंगानां च न सर्वभागि
ति द्वितीयलक्षणेन गतार्थता न शंक्येति। औपगवीति। अनंतलक्षणङीपं परत्वादयं बाधते। एवं चापत्याधिकारे औपगवीति प्रतीकमुपादाय टिड्ढाणञित्यादिना ङीप्
बिति व्याख्यानमुपेक्ष्यमिति भावः। केचित्तु अपत्याधिकारादन्यत्रैव लौकिकगोत्रं गोत्रशब्देन गृह्यते नान्यत्र पारिभाषिकगोत्रप्रत्ययांत एव जातिकार्यं लभते
न त्वपत्यप्रत्ययांतः। गोत्रं च चरणैः सहेति वचनस्यापत्याधिकारात्पूर्वभावि त्वात्। तथा चापत्यार्थे औपगवीति ङीबेवं तदिति प्राचामुक्तिः सम्यगेवेत्याहुः।
कठीति। कठेन प्रोक्तमधीयाना वा कलापिवैशंपायनांतेवासिभ्यश्चेति वैशंपायनांतेवासित्वाण्णिनिस्तस्य कठचरकाल्लुगिति लुक्। अध्येतृणां तु प्रोक्ताल्लुगित्य
नेन। बह्वृचीति। बह्व्यः ऋचोऽध्येतव्या यया सेति बहुव्रीहिः। अनृचबह्वृचावध्येतर्येवेति वचनादृक्पूरब्धूरिति अप्रत्ययः समासांतः यद्यपि स्त्रीणामध्य

यनंप्रतिषिद्धंतथापिपुराकल्पेत्स्येन दासीना। नदाहृयमः। पुराकल्पेषुनारीणांमौंजीवंधनमिष्यते। अध्यापनंचवेदानांसावित्रीवचनंतथेति १। यद्यमानामाधिगीष्टतद्धंस्यत्वान्ता च्छुद्धं भविष्यतियथाऽनधीयानेपिमाणवके। ब्राह्मणीत्यत्रेति। एवंचप्राचोऽङ्गेषुदाहरणंग्रामादिकमितिभावः। मुंडेति। मुंडगुणयोगान्मुंडा। वलाकाविसकंटिका। क्षत्रियेति। क्षत्राद्घइत्यपत्येविधानाद्गोत्रलक्षणालिंगानांचनसर्वेत्यादिलक्षणंवा। जातिः। योपधप्रतिषेधइत्यादि। गौरादिषुगवयादयइदानीं तन्नैःप्रक्षिप्ता इत्यस्मादेववार्तिकाद्विज्ञायतइतिकैयटादयः॥ ॥ पाककर्णी। जातेरित्यनुवृत्तेर्नेह। बहुपुष्पा। बहुफलाशाखा। एवंहिपूर्वेणैवसिद्धेकिमनेनसूत्रेण। त्याशंक्याह। स्त्रीविषयादपीति। इतोमनुष्य। इतःकिं॥ वेट् दरद्विट्शब्दात्जनपदशब्दात्क्षत्रियादित्यत्रादस्वृद्धात्तुव्यञ्जमगधेत्यणातयोरतश्चेतिलुक्। यस्तुवैश्यपर्या

पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च। ४।१।६४। पाकाद्युत्तरपदाज्जातिवाचिनः स्त्रीविषयादपिङीष्स्यात्। ओदनपाकी। शङ्कुकर्णी। शालपर्णी। शङ्खपुष्पी। दासीफली। दर्भमूली। गोवाली। ओषधिविशेषेरूढाएते। इतोमनुष्यजातेः। ४।१।६५। ङीष्स्यात्। दाक्षी। योपधादपि। उदमेयस्यापत्यं। औदमेयी। मनुष्येतिकिं। तित्तिरिः। ऊङुतः। ४।१।६६। उकारान्तादयोपधान्मनुष्यजातिवाचिनःस्त्रियामूङ्स्यात्। कुरूः। कुवो ऽ दिभ्योण्यः तस्यस्त्रियामवन्त्यादिनालुक्। अयोपधात्किं। अध्वर्युः। अप्राणिजातेश्चारज्ज्वादीनामुपसंख्यानं। रज्ज्वादिपर्युदासादुवर्णान्तेभ्यएव। अलाबूः। कर्कन्धूः। अनयोर्दीर्घान्तत्वेऽपिनोङ्धात्वोरितिविभक्त्युदात्तत्वप्रतिषेधऊङःफलं। प्राणिजातेस्तु। कृकवाकुः। रज्ज्वादेस्तु। रज्जुः। हनुः। बाह्वन्तात्संज्ञायां। ४।१।६७। स्त्रियामूङ्स्यात्। भद्रबाहूः। संज्ञायांकिं। वृत्तबाहुः॥

योविट्शब्दःसोपिप्रत्युदाहरणमित्याहुः। दासीति। अतइञ्। गोत्रलक्षणाजातिः। अदंतत्वाभावादप्राप्तोङीष्विधीयते। योपधादपीति। जातेरित्यनुवर्तमानेपुनर्जातिग्रहणादितिभावः। उदमेयस्येति। उदकमेयंयस्यउदमेयः। उदकस्योदःसंज्ञायामित्युदादेशः। इञउपसंख्यानं। अजात्यर्थं। सौतंगमी। निर्देशाद्यर्थेवुञ्छणादिसूत्रेणसुतंगमादिभ्यइञ्। नचायमिञन्तोजातिः ऊङुतः। ऊकारोनोङ्धात्वोरितिविशेषणार्थः। अन्यथायवाग्वायवागेवइत्यत्रापिसनिषेधःस्यात्। दीर्घोच्चारणंतुश्वश्रूशब्दार्थम। न्यत्रसवर्णदीर्घेणापिसिद्धेः। कुरूरिति। लिंगविशिष्टपरिभाषयास्वादयः। अत्रव्याचक्षते। यद्येकादेशस्यपूर्वान्तत्वेनग्रहणात्स्वादयः इतिव्याख्यायेततर्हिक्राङ्कुऊ

सु॰

सि॰कौ॰ बो॰त॰ २९६

संहितादिपूर्वपदमूरूत्तरपदं यत्प्रातिपदिकं तस्मादूङ् स्यात्। शफाविति। यद्यप्यमरेण शफं क्लीबे खुरः पुमानिति नपुंसकतोक्ता तथापि शफशब्दस्य पुंस्त्वमपि प्रामाणिकमेव। शफाविव जभ्रुराणेति श्रुतेः। शफः खुरे गवादीनां मूले विटपिनामपीति हेमचन्द्रकोशाच्च। वामोरूरिति। वामौ सुन्दरौ ऊरू यस्याः इति विग्रहः। कथं तर्हि पीवरोरु पिबती वबर्हिण इति कुमारः। ऊङभावे हि पीवरोरोरिति स्यात्। ऊङश्चेह विधायकं नास्ति। अत्राहुः। संज्ञापूर्वकविधेरनित्यतया संबुद्धिगुणाभावा इति स्थितस्य गतिरुन्नेयेति। हितेन सहेति। समौ वा हिततनयोरिति लुम्पादितः सहितशब्दस्तु नेह गृह्यते एकदेशविकृतनयो सन्निहितग्रहणादेव नास्तीति भावः। कमण्डलुरिति। चतुष्पाज्जातिवाचकोऽयं। अत एव चतुष्पाद्भ्यो ढञित्यत्र कामण्डलेय इत्युदाहरिष्यति। पात्रपर्यायस्तु न प्रत्युदाहरणं तस्य स्त्रीलिङ्गाभावात्। अच्छोदार्थमिति। वेदे तु कद्रुकमण्डल्वोः छन्दसीत्यनेन संज्ञायामसंज्ञायां च ऊङ् सिध्यतीति भावः। अणोऽकार इति। अणा अकारविशेषणं किं। शूरसेनी। जनपदशब्दादित्यञः अत श्चेति लुकि जातिलक्षणोऽत्र न ङीष्॥ ॥ शार्ङ्गरवीति। शृङ्गरुशब्गादपत्येऽण्। आदिवृद्धिरोर्गुणः। टिड्ढाणञिति ङीपं बाधित्वा परत्वाज्जातेरिति ङीषि प्राप्ते ङीन्वि-

शार्ङ्गरवाद्यञो ङीन्॥४।१।७३॥ शार्ङ्गरवादेरञो योऽकारस्तदन्ताच्च जातिवाचिनो ङीन् स्यात्। शार्ङ्गरवी। वैदी। जातेरित्यनुवृत्तेः पुंयोगे ङीषेव। नृनरयोर्वृद्धिश्चेति गणसूत्रं। नारी। यङश्चाप्॥४।१।७४॥ यङन्तात्स्त्रियां चाप् स्यात्। यङ्श्च ङ्यसामान्यग्रहणं। आम्बष्ठ्या। कारीषगन्ध्या। षा-द्यञश्चाप्वाच्यः॥ पौतिमाष्या॥ ॥

धीयते॥ शार्ङ्गरव कापटव। ब्राह्मण। गौगुग्गुलव। गौतमेत्यादि। शृङ्गरुकपटुब्राह्मणगुग्गुलुशब्देभ्यः प्राग्दीव्यतोऽण्। गौतमशब्दस्त्वृष्यण्णन्तः। अयं गौरादिष्वपि पठित इति पक्षे अत्र ङीषपि भवति। ङीषेवेति। जातेरित्यननुवृत्तौ तु शार्ङ्गरवस्य स्त्री वैदस्य स्त्रीति पुंयोगविवक्षायामपि परत्वान्ङीनेव स्यादिति भावः। नृनरयोरिति। नृशब्दान्नन्नेभ्य इति ङीपि नरशब्दाज्जातिलक्षणे ङीषि प्राप्ते वचनं। वृद्धिविधानार्थं च। ननु नरशब्दे अलोऽन्त्यस्य वृद्धिः स्यात्। अत्राहुः। वार्णादाङ्गं बलीय इत्यकारस्य यस्येति चेति लोपेनापहारात्। अनन्त्यस्यापि अकारस्य वृद्धिर्भवतीति। यद्वा। नरस्य अः नरः। अनेन तपरत्वं। ना च नरश्च तयोर्नृनरयोः। परस्य च प्रथम एवाकारो गृह्यते न तु द्वितीयः प्रश्लेषसामर्थ्यादिति। इह नरस्येत्यर्थवतो ग्रहणाद्वा नरशब्देनातिप्रसंग इति बोध्यं। यद्यप्यन्यतरेणोपादानेनापि नारीति रूपं सिध्यति तथाप्यन्यतरस्यानिष्टरूपनिवृत्त्यर्थं द्वयोरुपादानं। कथं तर्हि किंनरीणां नरीणामित्यादिप्रयोगाः

१९

अत्राहुः। नरस्यर्द्धो नरीयं गौरादिलक्षणो ङीष्। केचित्तु अनिर्दिष्टस्थानिकत्वात् कृत्परिभाषोपस्थितेर्नृशब्दस्यैव वृद्धेर्नारीति भवति। नरशब्दस्य ग्रहणं तु ङी-
नर्थमेव तत्राविकृतस्याभावान्नरीत्येव भवितव्यमित्याहुः। तदपरे न क्षमन्ते। यदि ङीनर्थमेव नरशब्दग्रहणं स्यात्तर्हि शार्ङ्गरवादिगणे पृथगेव पठेत्। वृद्धि-
विधायके तु कृताःसूत्रे तत्पाठस्य वैयर्थ्यापत्तेरिति। पुत्रशब्दोऽत्र गणे पठ्यते ततः। स्त्रियां ङीन्। पुत्री। न च पुत्रशब्दः कन्यायां नास्तीति शंक्यं। आत्मजस्तन-
यः सूनुः सुतः पुत्रः स्त्रियां त्वमी। आहुर्दुहितरं सर्वे इत्यमरोक्तेः। तेन पुत्रीव हर्षं त्वदयतगोति। कुर्वेत दुर्वीपतिपुत्रि सर्वमित्यादिप्रयोगा निर्बाधा एव। यत्त्वत्र हर-
दत्तेनोक्तं। केवलः पुत्रशब्दः स्त्रियां नास्तीति। तदुपेक्ष्यं। उदाहृतकोशविरोधात्। मूतिका पुत्रिकेत्यत्र स्वग्रन्थविरोधाच्च। एवं च सूतोग्रराजभोजकुलमेरुभ्यो दु-
हितुः पुत्रड्वेति कोऽसत्यागदस्येति सूत्रस्थवार्त्तिकं व्यर्थमिति मनोरमायां स्थितं। पड्श्चापूपकारोऽत्र हलन्त्यादिति सामान्यग्रहणार्थः। चकारस्तद्विघातनचारि-
नार्थत्वेऽपि परत्वाच्चित्स्वरः ष्पित्स्वरं बाधते॥ ॥ आंबष्ठ्येति॥ आंबष्ठस्यापत्यं स्त्री वृद्धेत्कोसलेति ञ्यङ्। कारीषगंध्येति। करीषस्येव गंधोऽस्य करीषगंधिः। उ-

आवट्याच्च॥४।१।७५॥ अस्माच्चाप् स्यात्। यञश्चेति ङीपोऽपवादः। अवटशब्दो गर्गादिः। आवट्या। तद्धिताः॥४।१।७६॥ आपञ्चमसमाप्तेर-

पमानाच्चेति गंधस्येत्त्वे देशः। तस्य गोत्रापत्यं स्त्री अण्। अणि ञोर्नार्षयोरिति ष्यङादेशः। स च यद्यपि स्त्रियामेव विहितस्तथापि ङितकरण ((धिकारोऽयं॥
सामर्थ्यात्तदन्तादप्यपत्ये चाप्। वावटनरत्नि। एतच्च अवटाच्चेति चकारस्यानुक्तसमुच्चयार्थत्वाल्लभ्यत इत्याहुः। पौतिमाष्येति। पूतिमाषशब्दो गर्गादिः। तद्धिताः। बहु-
वचनमनुक्तानामपसंख्येयानां संग्रहार्थं। महासंज्ञाकरणं तु लेभ्यः प्रयोगेभ्यो हिताः तद्धिताः इत्यन्वर्थत्वलाभाय। तेन यथाप्रयोगमेव स्युः। ननु टापः प्रागेवायमः
धिकारोऽस्तु ष्फविधौ तद्धितग्रहणं यस्येति लोपे ईङ्ग्रहणं च मास्त्विति चेन्मैवं। पञ्चोगुणीत्यादावोर्गुणप्रसंगात्। यदि तु यस्येति चेत्यत्र ईङ्ग्रहणमेव ङीषि तद्धितत्वा-
भावेऽप्यापयतीति स्वीक्रियते तर्हि टापः प्राक्तद्धिताधिकारेऽपि न कश्चिद्दोष इति वचित्तच्चिंत्यं। कुरूरित्यादौ ओर्गुणादिति प्रसंगादिति नव्याः॥ ।

यूनस्तिः। अन्तेभ्य इति ङीपोऽपवादः। युवतिरिति। स्वादिष्विति पदत्वान्नलोपः। कथं तर्हि युवतीकरनिर्मथितं मिथ्येति मिति प्रयोगः। अत्र केचित्। सर्वतोऽक्तिन्नर्थादिति वह्वादिगणसूत्रात् केचिदपि कोऽङीष्। न च तिप्रत्ययेनैव स्त्रीत्वस्योक्तत्वान्ङीष् न भविष्यतीति शंक्यं। उक्तेऽपि भवत्येव इति भाष्यात्। न चैवमपि युवतीनां समूहो यौवनमिति न सिध्येत् किंतु तस्य समूहः इत्यणि भस्याढे तद्धित इति पुंवद्भावेन यौवनमित्येवस्यादिति वाच्यं। बाहुलकात् यौतेरौणादिके कतिप्रत्यये। सति युवतिशब्दमादाय तत्सिद्धेरिति। इमं ञ्जे शोषीर्हस्ताह। शत्रंतादिति। यौति मिश्रीकरोतीति प्रत्येति विग्रहे लटः। शतृशानचाविति शतरि उगितश्चेति ङीप्

यूनस्तिः। ४। १। ७७॥ युवन्शब्दात्तिप्रत्ययः स्यात्स च तद्धितः। लिङ्गविशिष्टपरिभाषया सिद्धे तद्धिताऽधिकार उत्तरार्थः। युवतिः। अनुपसर्जनादित्येव। बहवो युवानो यस्याः सा। बहुयुवा। युवतीति तु यौतेः शत्रन्तात् ङीपि बोध्यं॥ इति स्त्रीप्रत्ययाः॥ प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा। २। ३। ४६॥ नियतोपस्थितिकः। प्रातिपदिकार्थः। मात्रशब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये परिमाणमात्रे संख्यामात्रे च प्रथमा स्यात्। उच्चैः। नीचैः। कृष्णः। श्रीः। ज्ञानं। अलिङ्गानियतलिङ्गाश्च प्रातिपदिकार्थमात्र इत्यस्योदाहरणं। अनियतलिङ्गास्तु लिङ्गमात्राद्याधिक्यस्य। तटः। तटी। तटं। परिमाणे द्रोणो व्रीहिः। द्रोणरूपं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरित्यर्थः। प्रत्ययार्थपरिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणं। प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहौ विशेषणमिति विवेकः। वचनं संख्या। एकः। द्वौ बहवः। इहोक्तार्थत्वाद्विभक्तेरप्राप्तौ वचनं॥ सम्बोधने च। २। ३। ४७॥ इह प्रथमा स्यात्। हे राम। कारके। १। ४।

एवं हि यौवतमिति प्रयोगोऽपि सुलभः। त्वं नारणिर्गुवङ्गावाद्यौवनमित्येवा॥ भिक्षादिपाठसामर्थ्यान्नपुंवदिति वृत्तिकारोक्तिरयुक्तेति भिक्षादिभ्योऽणित्यत्रैवापपादयिष्यामः॥ इति स्त्रीप्रत्ययाः॥ स्वौजसमौडित्यादिना तावत्स्वादयोङ्याप्प्रातिपदिकाद्दर्शिताः। तेषामर्थविशेषव्यवस्थां दर्शयितुमारभते। प्रातिपदिकार्थेत्यादिना। प्रथमादयः सप्तम्यंताः प्राचां संज्ञाः ताभिरिहापि व्यवहारः इति स्वौजसमौडिति सूत्रे मूल एवोक्तं। कौस्तुभे तु इह प्रथमादयः शब्दाः सुपां त्रिके प्रवर्तन्ते समं स्यादश्रुतत्वादिति न्यायादित्युक्तं। तथा चान्यायसिद्धत्वादस्मिन् शास्त्रे प्रथमादिसंज्ञा नामकरणेऽपि न क्षतिरिति तत्त्वं। पञ्चाहि पंचकं प्रातिपदिकार्थ इति गृह्यते ततो लिंगवचनग्रह

त्रिकपक्षे पि लिंगग्रहणमनर्थकमेवेत्याशंक्याविवक्षितं दर्शयति। नियतोपस्थितिक इति। यस्मिन्प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेनोपस्थितिः स प्राति
पदिकार्थ इत्यर्थः। उच्चैरिति यावत्। नन्वेवं सिंहो माणवक इत्यादौ प्रथमा न स्यात्। अत्राहुः। शक्यार्थमादाय प्रथमाविभक्तावुत्पन्नायां पश्चात्पदान्तरसमभि
व्याहारे लक्ष्यार्थबोधेऽपि क्षत्यभावादिति। मात्रशब्दस्येति। तस्य चात्रावधारणमर्थः। मात्रं कार्त्स्न्येऽवधारणे इत्यमरः। प्रातिपदिकार्थलिंगपरिमाणवचना
न्येव प्रातिपदिकार्थलिंगपरिमाणवचनमात्रमित्येवकारेणास्वपदविग्रहः। समासस्तु मयूरव्यंसकादित्वाद्बोध्यः। प्रत्येकमिति। द्वंद्वांते श्रूयमाणत्वादिति भा
वः। ननु वीरः पुरुष इत्यादौ अभेदसंसर्गस्याधिक्यस्य भानात्प्रथमा न स्यात्। न च पूर्वापरेत्यादिना वीरशब्दस्य समासविधानं प्रथमोत्पत्तौ लिंगमिति वाच्यं। द्वि
तीयादितानामपि वीरं पुरुषमानयेत्यादौ तद्विधानस्य चरितार्थत्वादिति चेन्न। संसर्गस्य वाक्यार्थत्वेन बहिरंगत्वात्प्रथमं प्रवृत्तसंस्कारबाधानुपपत्तेः पदसंस्का
रपक्षस्यैवेहाभ्युपगमात्। मात्रपदेन धर्माद्याधिक्ये प्रथमा न भवेदपि लिंगपरिमाणग्रहणं लिंगाधिक्ये परिमाणाधिक्ये च भवेदेवेत्याह लिंगमात्राद्याधिक्य इति। यद्यपि लिं
मात्रे परिमाणमात्रे ऽपि। सत्तार्थस्तथापि प्रातिपदिकार्थं विना लिंगादिप्रतीतेरसंभवादिति द्राधिक्य इत्युक्तं। उच्चैरिति। परत्वादिह रुत्वविसर्गौ भवतः। किंच।
अत्र प्रथमान्तत्वात्प्राग्उच्चैस्त्वं स्वयमुच्चैस्त्वमिति सपूर्वायाः प्रथमाया इति सूत्रेणास्मदादेशयोर्विकल्पासिद्धिरपि फलं। कृष्ण इति। यद्यपि नीलद्रव्येऽयमनियतलिंगस्तथापि वासु
देवे नियतमेव। नियतपुंलिंग इति भावः। ज्ञानमिति। भावे ल्युट्। टिड्ढाणञिति टीप्। द्विकपक्षे नियतलिंगं न प्रकृत्यर्थस्त्रिकपक्षे तु यद्यपि प्रकृत्यर्थस्तथापि तत्तल्लिंग
स्य प्रातिपदिकोपस्थितिकत्वान्न प्रातिपदिकार्थत्वमनेन गतार्थता। द्रोण इति। न चेह प्रातिपदिकार्थमात्र इत्येव प्रथमास्त्विति वाच्यं। तथा सति परिच्छेद्यपरिच्छेदकभा
वस्य संसर्गविधया भानायोगात्। नामार्थयोरभेदसंसर्गस्य व्युत्पन्नत्वात्। व्रीहिरिति। जातावेकवचनं। व्यक्तिविवक्षायां तु द्रोणो व्रीहय इति भवत्येव। अभेदेने
ति। न च प्रकृतिप्रत्ययार्थयोरभेदान्वयो दुर्लभः दन्रातपावकः। औपगव इत्यादौ सर्वत्र भेदान्वयस्यैव दृष्टत्वादिति वाच्यं। देवतार्थकतद्धितादावभेदान्वयस्य दृ
ष्टत्वात्। ऐन्द्रं हविरित्यत्र हि इन्द्रदेवताकं हविरिति बोधः सर्वैरभ्युपगम्यत इति नास्ति शंकावसर इति भावः। वचनं संख्येति। वाच्यवाचकयोरभेदाध्यवसा
येन तथैव पूर्वाचार्याणां व्यवहारादिति भावः। अत्रामोवचनमिति। सूत्रे वचनग्रहणमित्यर्थः। वस्तुतस्तु सूत्रे मात्रग्रहणं व्यर्थं। विशेषविहितैः कर्मणि द्वितीया

न्यादिभिर्बोधितत्वेन कर्मादौ प्रथमाया अप्रवृत्तेः कर्मणि द्वितीयेत्यादिषु कर्मणि द्वितीयैव कर्तृकरणयोस्तृतीयैव नान्या विभक्तिरित्येवमर्थनियमाभ्युपगमात् न च कर्मण्येव द्वितीया कर्तृकरणयोरेव तृतीया नान्यत्रेति प्रत्ययनियमपक्षे प्रथमाया अपि कर्मादौ प्रवृत्तिसंभवान्नात्र ग्रहणमावश्यकमेवेति वाच्यं। प्रत्ययनियमपक्षे हि प्रातिपदिकार्थ एव प्रथमा नान्यत्रेत्यर्थपर्यवसानात्कर्मादौ न प्रथमाया अपि प्रवृत्तेः। वचनग्रहणमपि व्यर्थं। न केवला प्रकृतिः प्रयोक्तव्येति निषेधादेव प्रथमोत्पत्तिसिद्धेः। न चैवं द्विशब्दात् बहुशब्दाच्चैकवचनं एकशब्दाद्द्विवचनमित्येवमव्यवस्था स्यादिति वाच्यं। अनन्विनार्थकविभक्तिप्रयोगापेक्षया अनुवादकविभक्तिप्रयोगस्य। न्याय्यत्वात्। गौर्वाहीक इतिवत् द्रोणशब्दस्य तत्परिमिते उपचारात् द्रोणो व्रीहिरित्यपि सिद्धमिति मनोरमायां परिमाणग्रहणमपि प्रत्याख्यातं। नन्वस्मिन् पक्षे द्रोणपरिच्छिन्नाभिन्नो व्रीहिरित्यभेदान्वयः। नामार्थयोरभेदान्वयात्। परिमाणं प्रत्ययार्थ इति पक्षे तु द्रोणरूपं यत् परिमाणं तत्परिच्छिन्नो व्रीहिरिति प्रत्यापार्थेनार्थयोर्भेदात् यत्पाच फलभेदे कथं प्रत्याख्यानमिति चेत्। अत्राहुः। शब्दबोधप्रयुक्तं वैलक्षण्यमिह नादृत्य परिमाणग्रहणं प्रत्याख्यातं। अत एव औपगवादौ तस्या[illegible]पत्येनैव णप्रत्ययसिद्धेस्तस्यापत्यमिति सूत्रं किमर्थमित्याक्षेपो मत्वर्थीयनिनैव सिद्धे परिवृत्तो रथ इत्यधिकारे पाण्डुकंबलादिनि इनिप्रत्ययविधानं किमर्थमित्याक्षेपश्च श्रवस्यमाणाः संगच्छते। यदि तु सर्वत्र शब्दबोधप्रयुक्तं वैलक्षण्यं स्वीक्रियते तर्हि बाधनार्थं कृतं भवेदिति समाधानस्य [illegible] बाधनार्थं मिनिप्रत्ययविधानमिति समाधानस्य च वैयर्थ्यापत्तेरिति। ननु क्वचित् पंचकं प्रातिपदिकार्थः क्वचित् त्रिकं क्वचिद्द्विकं प्रातिपदिकार्थ इत्यादिव्यवस्थितेः। एते पक्षाः केषामभिमताः कथं वाऽमीषामुपपत्तिरिति चेत्। अत्र व्याचख्युः। स्वार्थद्रव्यलिंगसंख्याकारकात्मकः पंचकं प्रातिपदिकार्थः। दधि मध्वित्यादौ विनापि विभक्तिं प्रातिपदिकादेव नावगतानामर्थानां प्रतीतेः। वृक्षौ वृक्षाः। वृक्षं वृक्षेणेत्यादौ यद्यपि विभक्त्यन्वयेपि प्रतीयंते न इयता प्रकृत्यर्थत्वहानि द्योतकत्वेनैवोपयोगादिति भाष्यकारो मन्यते। आदिनश्चतुष्कमिति कैयटः। तत्रोपपदं समर्थमीस्थ्यमित्यत्र चतुष्कपक्षे पंचकपक्षे वा प्रातिपदिकार्थ इत्यभिधानात्। आदिनस्त्रिकमिति वृत्तिकारः। अन्वयव्यतिरेकाभ्यां संख्याकारकादेर्विभक्त्यर्थत्वनिश्चयात्। यद्यपि दधि मध्वित्यादौ विनापि विभक्तिं संख्याकारकं च प्रतीयते। तेयथा वृक्षौ वृक्षा इत्यादावपि विभक्त्यर्थत्वं हीयते। न हि गर्गा इत्यादौ विनापि यत्र अपत्यं गम्यत इति तदपि प्रकृत्यर्थः। न चाऽविभरित्यादौ अंतरेणापि प्र

प्यंकर्मा[illegible]नीयतइतिमेनेत्यादावपिकर्तप्रकृत्यर्थएवोपयुज्यतेवक्तुं। अतस्त्रिकमेवप्रातिपदिकार्थः संख्याकर्मादयस्तुविभक्त्यर्था इतिलिंगं टावादिवाच्यमितिपक्षे आदिनो
द्विकमेवेत्यन्ये। तत्रस्वार्थोविशेषणं। द्रव्यंविशेष्यं। लिंगस्त्रीत्वादि। संख्याएकत्वादिः। कारकंकर्मादि। संबोधनेच॥ मात्रग्रहणात्तत्प्रत्याख्यानपक्षेपिप्रातिपदिकार्थेल
प्रथमेतिनियमात्सहासंबोधनाधिक्येः प्रामावस्या[illegible] इहसंबोधनंप्रकृत्यर्थेप्रतिविशेष्यंक्रियांप्रतिविशेषणं। तथाचव्रजानिदेवदत्तेत्यादावेकतिङ्वाक्यमितिवाक्
त्वेसिद्धे आमंत्रितस्यचेतिनिघातोभवति। क्रियाप्रत्यविशेषणत्वेतुभिन्नवाक्यत्वान्नैतत्सिध्येत्। समानवाक्येनिघातयुष्मदस्मदादेशावक्तव्याइतिवार्तिकात्। त
थाचोक्तं। संबोधनपदंयच्चतत्क्रियायाविशेषणं। व्रजानिदेवदत्तेतिनिघातोत्रतथासति इति। एवंचराममांपाहीतिवाक्यस्यरामसंबंधिसंबोधनविषयोमत्कर्मकंर
क्षणकर्म[illegible]व्रजानिदेवदत्तेत्यत्रतुदेवदत्तसंबंधिसंबोधनविषयोमत्कर्तृकंगमनमर्थः॥ इतिप्रथमा॥ ॥ कर्तुरीप्सिततमंकर्म। कर्तुरितिक्तस्यचवर्तमान
[illegible]कर्तरिषष्ठी आप्नोतेःसन्। इत्वं। आपज्ञप्यृधामीत्। अत्रलोपोभ्यासस्येत्यभ्यासलोपः। मतिबुद्धिपूजार्थेभ्यश्चेतिवर्तमानेक्तः। मतिरिहेच्छा नतुबुद्धिः। पुन

कर्तुरीप्सिततमं कर्म। १।४।४९॥ कर्तुःक्रियया आप्तुमिष्टतमङ्कारकङ्कर्म्मसंज्ञंस्यात्। कर्तुः किं। माषेष्वश्वम्बध्नाति। कर्म्मण ईप्सितामाषान
तु कर्तुः। तमब्ग्रहणं किं। पयसा ओदनंभुङ्क्ते। कर्मेत्यनुवृत्तौ कर्म्मग्रहणमाधारनिवृत्त्यर्थं। अन्यथा गेहं प्रविशतीत्यत्रैव स्यात्॥

र्बुद्धिग्रहणे तु ज्ञानात्मकेनाप्ययनेनतमविष्ठनोदृत्यतिप्रायेतमप्। एवंचकर्त्रा प्राप्तुमिष्यमाणतमंकर्मेत्यर्थः। कर्ताचधातूपात्तव्यापाराश्रयः। सचकेनाप्तुमिच्छति
इतिकारणाकांक्षायांविशेषणीभूतेनव्यापारेणेत्यर्थाल्लभ्यतेतदेतदाह। क्रिययेति। क्तप्रत्ययेनोपस्थितंवर्तमानत्वंचेहनविवक्षितंतेनकटंकृतवान्करिष्यती
त्यादिसिद्धं। कारकमिति। एतच्चकारकेइत्यधिकाराल्लभ्यते। तच्चहिव्यत्ययेनप्रथमार्थेसप्तमी। प्रतिसूत्रं वाक्यमित्वाकारकसंज्ञानेनविधीयते। तथेया। अपा
यध्रुवंकारकसंज्ञंस्यात्। ततोऽपादाने। उक्तंकारकमपादानंस्यात्। पुनःकारकशब्दानुवृत्तिसामर्थ्याद्विशेषसंज्ञाभिःसहसमावेशसिद्धिः। तेनसंवेरमइत्यत्राधि
करणत्वात्सप्तमी। कारकत्वाद्गतिकारकोपपदात्कृदितिकृदुत्तरपदप्रकृतिस्वरश्चसिध्यति। अन्यथातत्पुरुषेतुल्यार्थेत्यादिनापूर्वपदप्रकृतिस्वरःस्यात्। न
चात्रोपपदस्वरेणान्यथासिद्धिः। ष्ट्रं क्वासंवकर्णयोरितिनिर्देशात्प्रातिपदिकस्योपपदत्वेपिसप्तम्यंतस्यातथात्वात्। यद्यपिइहथाथादिस्वरेणैवांतोदात्तत्वंसिध्यति

सु॰
सि॰ कौ॰
टी॰ त॰
११९
ब ५

तथाप्यप्रत्ययसाहचर्येण लाघवात्रोपादानान्नास्ति थाथादिस्वरेण तत्सिद्धिरित्याहुः। अन्वर्था चेयं संज्ञा करोतीति कारकमिति। तेन ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यत्र क्रि
या अनन्वयिनो न भवति। ब्राह्मणो ह्यत्र पुत्रविशेषणं न तु क्रियान्वयीति। पयसेति। भुजिक्रियां प्रति पयसः प्रकृष्टोपकारकत्वेपि ओदन एवात्रेप्सिततमः पयस्तु संस्कार
कत्वात्करणं न त्वसौ केवलपयसः पानेन संतुष्यति। किं तु तत्संस्कृतेनौदनेन। यदा तु पय एवेप्सिततममस्य भवति तदा कर्मत्वं भवत्येव पयः पिबतीति। कर्म
ण्यनुवृत्तावपीति। अधिशीङ्स्थासां कर्मेति सूत्रात् ॥ अनभिहितेति। ननु बहुपटुरित्यादौ बहुच्प्रत्ययेनोक्तार्थत्वात् कल्पबादयो यथा न प्रवर्तन्ते तथा क्रि
यते कट इत्यादौ च तिङादिभिरुक्तार्थत्वाद्द्वितीया न भवति। किं च कटं करोतीत्यादौ सावकाशा द्वितीया कृतः कट इत्यादौ निरवकाशया प्रथमया बाध्यते। न च
वृक्षः प्लक्ष इत्यादिः प्रथमाया अवकाशः। तत्रापि प्रतीयमानामस्ति क्रियां प्रति कर्तृत्वेन तृतीयाप्रसंगात्। अथोच्यते। नीलमिदं न तु रक्तमित्यादौ विशेषणं न

अनभिहिते। २।३।१। इत्यधिकृत्य। कर्मणि द्वितीया। २।३।२। अनुक्ते कर्मणि द्वितीया स्यात्। हरिं भजति। अभिहिते तु कर्मणि प्रातिपदि
कार्थमात्र इति प्रथमैव। अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैः। तिङ्। हरिः सेव्यते। कृत्। लक्ष्म्या सेवितः। तद्धितः। शतेन क्रीतः शत्यः।
समासः। प्राप्त आ... प्राप्तानन्दः। क्वचिन्निपातेनाभिधानं। यथा विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतं। साम्प्रतमित्यस्य हि युज्य
त इत्यर्थः। तथायुक्तं चानीप्सितं। १।४।५०। ईप्सिततमवत्क्रियया युक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्यात्। ग्रामं गच्छन् तृणं स्पृशति। ओद
नं भुञ्जानो विषं भुङ्क्ते॥

र्न निर्दिष्टतात्पर्यके अस्ति क्रियायां प्र...नावश्यकत्वात् प्रथमाया अस्त्येवावकाश इति। तर्हि उभयोः सावकाशत्वे परत्वात् प्रथमैव स्यात्। न
या च अनभिहिताधिकारो वृथैवेति चेदत्राहुः। संख्याविभक्त्यर्थ इति पक्षे सूत्रारंभ आवश्यकः। तथा हि सूत्रारंभे कर्मणि द्वितीयेत्यस्यानभिहिते कर्मणि यदेकत्वं
तत्र द्वितीयैकवचनं ... एवं सूत्रानारंभे च कर्मणि यदेकत्वं तत्र द्वितीयैकवचनमिति हि वाक्यार्थः। तथा च सति कृतः कट इत्यादौ उक्तेन कर्ममात्रोक्तावपि
एकत्वस्यानुक्ततया अमुत्पत्तिः स्यात्। न च परत्वात् प्रथमैव स्यादिति वाच्यं। कर्तव्यः कट इत्यादौ तत्रापि परत्वेन कृद्योगलक्षणषष्ठीप्रसंगात्। कारकं विभ
क्त्यर्थ इति पक्षे तु कारकस्योक्तप्रत्ययादिनैवोक्तत्वात् प्रातिपदिकार्थमात्रतायाः प्रथमाया एकत्वादिबोधनसंभवाद् द्वितीयादिविभक्तेरप्रवृत्तावनभिहित इति।

१२०

अत एव व्यापकत्वाव्रजतीति वस्य च जि ब्रजतीति मैकं वाक्यं पाककर्तृकर्तृकं गमनं हि पाचके। व्रजतीत्यस्यार्थः ४॥

सूत्रं प्रत्याख्यातमाकरे इति। कारकशक्तिविशेषकार्थं इतिपदेन अनभिहित इत्यस्य द्योत्य इत्यर्थः। तथा च क्तप्रत्ययादिभिर्द्योत्ये कर्मणि द्वितीयेत्यादि वाक्यार्थः। तत्रापि एके न द्योतितेष्वर्थान्तरं न प्रवर्तत इत्यभ्युपगमे च अनभिहिताऽधिकारो नातीवोपयुज्यत इति दिक्। हरिं भजतीति। भजनक्रियया हरौ प्रीते इत्यर्थः। प्रीतिविशिष्टतया। क्रियाव्याप्यत्वेन हरेः कर्मत्वं द्वितीया... जनं वाक्यार्थः। हरिनिष्ठप्रीत्यनुकूल एकदेवदत्तादिनिष्ठो वर्तमानो व्यापार इति निष्कृष्टोर्थः। हरिः सेव्यत इत्यत्राप्येवमेव क्रियाप्रधानमाख्यातमिति मि... नात्। धातूपस्थाप्यत्वात् क्रियायास्तिङर्थं प्रति विशेष्यानन्तरत्वादर्थप्रतीव विशेषणमिति हि तस्यार्थः॥ एककर्तृकापचिक्रिया एककर्तृका गमनक्रियेति पचति व्रजत्योः प्रथमा...र्थः। एवं च प्रथमान्तविशेष्यको बोध इति नैयायिकोद्घोषो भाष्याद्यनुसारिभिर्नादर्तव्यः। तन्मते हि पाककर्ता व्रजनानुकूलकृतिमानिति पाचको व्रजतीत्यस्यार्थः। पचति व्रजत्योः सुप्तैकानुकूलकृति... व्रज... त्यर्थ एवं रूपेण वाक्यार्थपर्यवसानात् तस्य च भाष्यादिग्रन्थविरोधात्। किं च हरिं भजति देवदत्तः हरिः सेव्यते देवदत्तेनेत्यत्र चैकरूप एव शाब्दबोध इत्युक्तं नैयायिकानां मतं तु भिद्यत एव हरिनिष्ठप्रीत्यनुकूलकृत्याश्रयो देवदत्तः देवदत्तनिष्ठकृतिजन्यप्रीत्याश्रयो हरिरित्युभयत्र भेदेन वाक्यार्थपर्यवसानात्। तस्मात् प्रथमान्तविशेष्यकबोधो भाष्याद्यनुसारिभिर्नादर्तव्य एव। यास्कोप्याह॥ भावप्रधानमाख्यातं सत्वप्रधानानि नामानीति। पश्य मृगो धावतीत्यादौ तु मृगकर्तृकं गमनं दृशिक्रियायां कर्म प्रधानं तु दृशिक्रियैव। उक्तं च। सुबन्तं हि यथाऽनेकं तिङन्तस्य विशेषणं। तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषणमिति। न च लौकिकप्रयोगेषु तिङन्तस्य तिङन्तविशेषणत्वं दुर्लभमिति मन्तव्यं। पुरीमवस्कन्द लुनीहि नन्दनं हर्म्यमिमां ... कमप्युपर्यवस्कन्दन नन्दनलवनादिरूपा अस्वास्थ्यक्रियेत्यर्थ इति समुच्चयेन्यतरस्यामिति सूत्रे मूले स्फुटीभविष्यमाणत्वात्। एवं पुनाति भवतीत्यस्य पचिक्रिया भवतीत्यर्थो भाष्यमते बोध्य इति दिक्। अभिहिते त्विति। नन्वेवं पक्वमोदनं भुंक्त इत्यत्रापि द्वितीया न स्यादिति चेत्। मैवं। इह हि पचिभुजिनिरूपिते द्वे कर्मत्वशक्ती तत्र प्रधानीभूत भुजिक्रियानिरूपितां अनभिहितां शक्तिमादाय द्वितीयोत्पत्तेः। अत एव आसने आस्त इत्यत्र सप्तमी संगच्छते। ल्युटाऽधिकरणस्योक्तत्वेपि तिङा परस्या व्यक्तिमा निरूपिताधिकरणत्वस्यानुक्तत्वात्। शत्य इति। शताच्च ठन्यतावशते इति यत्। प्राप्तानन्द इति। इह गत्यर्थाकर्मकेति कर्तरि क्तः। आनन्दकर्तृकप्राप्तिकर्मीभूत इत्यर्थः। यदुक्तं प्रायेणेति तस्य फलमाह। क्वचिन्निपातेनेति। विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतमित्यत्र चार्थो हि विषवृक्षमिति गम्यत इति ध्येयं। पूज्यत इत्यर्थ

मूल-८ देवदत्तं शतं मुष्णाति ग्राममजां नयति हरति कर्षति वहति वा अर्थनिबंधनेयं संज्ञा बलिं भिक्षते वसुधां॥

अकथितं च। केनाकथितमित्याकांक्षायामाह। अपादानादिविशेषैरिति। अपादानं संप्रदानमधिकरणं कर्म करणं कर्त्ता हेतुरित्येतैर्विशेषैरित्यर्थः। अविवक्षितमि
ति। अपादानादिविशेषविवक्षा यदा तु गोर्दोग्धि पयः बलिर्याचते वसुधां व्रजेऽवरुणद्धि गामित्येवं पंचम्यादय एव भवंतीति भावः। एतेन पाणिनाकांक्षस्य पाठ्या दोग्धी
त्यत्र करणाधि[illegible]रणयो[illegible] [illegible]गः। तयोस्तु दंडेन करोति कटे तिष्ठत्यादिरवकाशो दुहादिपरिगणनादित्याक्षेपो निरस्तः। करणाधिकरणसंज्ञयोरिह निवाक्षि
तत्वात्। यदि तु सूत्रे कथितं [illegible] दाअप्रधानपर्यायो न त्वनुक्तपर्याय इत्यभ्युपगम्येत तदा स्यादेवायमाक्षेपो न त्वन्यथा। कारकमिति। तत श्च त्राह्मणस्य पुत्रं

अकथितं च। [illegible] अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्। दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमन्थमुषां
कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहां १ दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्युज्यते तदेवाऽकथितं कर्मेति परि
गणनं कर्तव्यमित्यर्थः। गां दोग्धि पयः। बलिं याचते वसुधां। अविनीतं विनयं याचते। तण्डुलानोदनं पचति। गर्गान् शतं दण्डयति। व्रजम
वरुणद्धि गां। माणवकं पन्थानं पृच्छति। वृक्षमवचिनोति फलानि। माणवकं धर्मं ब्रूते शास्ति वा। शतं जयति देवदत्तं। सुधां क्षीरनिधिं मथ्नाति
[illegible] माणवकं धर्मं भाषते। अभिधत्ते वक्तीत्यादि। कारकं किं। माणवकस्य पितरं पन्थानं पृच्छति। अकर्मकधातुभिर्योगे देशः कालो भावो गन्त
व्योऽध्वा च कर्मसंज्ञक इति वाच्यं॥ कुरून्स्वपिति। मासमास्ते। गोदोहमास्ते। क्रोशमास्ते॥ ॥११ पृच्छतीत्यत्र नातिप्रसंगः। इत्यांजिति। दं
डदंडनिपातनेनचुरादेः इह तु दंडिग्रहणार्थो न तु निग्रहार्थः। प्रच्छीत्यागं तु केनेकारेणानिर्देशो न त्विका। ग्रहिज्येति संप्रसारणप्रसंगात्। कर्मयुगिति। कर्मणा युज्यते क
र्मयुक्। सत्सूद्विषेत्यादिना क्विप्। कर्मणा युज्यत इति। मुख्यकर्मणा सह क्रियया संवध्यमानं कारकमेवापादानादिविशेषैरकथितं सत्कर्मसंज्ञकं भवतीत्यर्थः। एतेन
दुहादीनां द्विकर्मकत्वं सूचितं। अन्ये त्वाहुः। कर्मयुगित्यत्र कर्मशब्देन क्रियोच्यत इति। तेन क्रियान्वयीत्यर्थः। परिगणनमिति। तेन नटस्य शृणोति गाथामित्यादौ नातिप्र
संग इति भावः। इह हि गां याकर्मकं नटसंबंधि श्रवणं वाक्यार्थः। तेन क्रियान्वयित्वान्नटस्य कारकत्वमस्त्येव। गां दोग्धि पयः कर्मकं गोसंबंधिदोहनमर्थः। पयोऽत्र
मुख्यकर्मकर्तरीप्सिततमत्वात्। गौस्तु पयसो निमित्तमात्रेणोपात्ता न तु वस्तुसत्या अवधिभावेनेत्यपादानसंज्ञाया अप्रवृत्तेरनेन कर्मसंज्ञिका भवति। तदुक्तं हर

दत्तेन यद्यपि गोरवधिभावो विद्यते तथाप्यविवक्षिते तस्मिन्निमित्तमात्रविवक्षायामुदाहरणोपपत्तिरिति एतेनावधिविवक्षायां गोरिति पंचम्येवेति स्पष्टम् यदा तु गोरित्येतन्न्यायसासं
बध्यते तदा गोशब्दात्षष्ठ्येव भवतीत्यपि बोध्यम् यत्तु प्राचा दुह्याच्यर्थरुधिप्रच्छिचिब्रूशासुजिकर्मयुक्नीहृकृष्मंथवहदंडग्रहमुष्यादिकर्मभागिति पठितं तत्र ग्रहेः पाठोऽप्रामाणिकः
इतरेषां तु द्विकर्मकत्वं यद्यपि प्रामाणिकं तथापि संदर्भाशुद्धिः तथा हि दुह्यादीन्न्यादींश्च द्वैराश्येन पठित्वा भावकर्मप्रक्रियाशेषे लक्षणमेतत्खल्वर्थाः किं द्विकर्मकेभ्यो मुख्ये कर्मणि लस्तु
गौणे वेत्याशंकायां स्वयमेव पठितं न्यादयोः ण्यन्ता निष्कर्मगत्यर्था मुख्यकर्मणि प्रत्ययं यान्ति दुह्यादिर्गौणेऽन्ये तु यथारुचि इति एवं च दंडिमंथिभ्यामपि मुख्ये स्यात् न चेष्टापत्तिः गर्गाः
शतं दंड्यंतामिति भाष्यविरोधात् शतं स्वत्र प्रधानं न तु गर्गाः अर्थिनश्च राजानो हिरण्येन भवंतीति वाक्यशेषात् दंडिरत्र ग्रहणार्थो न तु निग्रहार्थ इत्युक्तम् अत एवात्र समुदाये वाक्यप
रिसमाप्तिः गुणानुरोधेन प्रधानादत्तेरसंभवात् तथा मंथेरपि प्रधाने स्यादिष्यते तु गौणे तथा च भारविः येनापविद्धसलिलस्फुटनागसद्मा देवासुरैरमृतमंबुनिधिर्ममंथे इति अत्रामृतं
मुख्यं उद्देश्यत्वात् अंबुनिधिस्तु गौणः बलिं याचत इति अत्र प्रार्थनार्थस्य याचेर्वसुधा मुख्यं कर्म तेन युक्तो बलिर्वसुनो वधिरपि तदविवक्षायामनेन कर्म भवति अविनीतमिति
अनुनयार्थस्य याचेरविनीतो मुख्यं कर्म अविनीतं विनयाया नुनयतीत्यर्थः विनयस्य तादर्थ्याविवक्षायामकथितं चेति कर्मसंज्ञा तंडुलानीति निर्वर्तनार्थस्य पचेरोदनो मुख्यं कर्म ओ
दनं निर्वर्तयतीत्यर्थः तंडुलास्तु करणत्वाविवक्षायामकथितं कर्म अन्ये त्वाहुः द्व्यर्थः पचिरिति भाष्यपर्यालोचनया तंडुलानोदनं पचतीत्यस्य तंडुलान्विक्लेदयन्नोदनं निर्वर्तय
तीत्यर्थः इत्यादिगुपचेः परिगणनमप्रामाणिकं भाष्येऽदृष्टयोरनुक्तत्वादिति गर्गानिति ग्रहणार्थस्य दंडेः शतं मुख्यं कर्म गर्गास्त्वपादानत्वाविवक्षायामकथितं कर्म व्र
जमिति अत्र गौर्मुख्यं कर्म व्रजं त्व[illegible]करणत्वाविवक्षायामकथितं चेति कर्म भवति एवमग्रेऽप्यूह्यम् अर्थानिबंधनेति ननु स्वरूपाश्रया अहमहमपीदमचोद्यम् चोद्य इति न
दासूत्रभाष्यपुष्ठिपर्यायस्य चुदेर[illegible]कर्मकत्वदर्शनादिति भावः अत एव स्थाणुं [illegible] रणेऽस्मरमुखो जगाद मरीमुच्चैर्वचनं महार्थमिति भट्टिः प्रायुंक्त एवं च नाथत्यादयो वह
वो द्विकर्मका ज्ञेयाः [illegible] सत्यम[illegible]र्थो [illegible] धनासंज्ञा तर्हि नीवह्योरन्यतरो न पठनीयः उभयोरप्येकार्थत्वादिति चेत् सत्यं भारं वहति भारं नयतीत्यत्र यदि विलक्षणोऽर्थोऽनुभूयते
तदा द्वयमपठनीयमेव यदि तु नानुभूयते तर्ह्यन्यतरो न पठनीयः उभयथापि लक्ष्यस्य निर्बाधत्वात् अत्र वदंते जयाह घृतरुशक्तमित्युदाहरणमप्ययुक्तमिति मनोरमोक्तम
चिंत्यमेव संज्ञाया अर्थनिबंधनत्वाद् दंडेर्ग्रहणार्थत्वाच्चेति बलिं भिक्षत इति भिक्षभिक्षायामलाभे लाभे च भिक्षतेर्याचत इत्यर्थः देशा इति कुरुपंचालादिरिह गृह्यते तेनाधिशा[illegible]स्या

सांकर्म्यस्य नवैयर्थ्यं अधिपूर्वाणामेषामाधारः कर्मेति नियमार्थत्वाभ्युपगमेऽपि वैकुण्ठे वर्त्तते इत्यादिष्वतिप्रसंगः स्यादेवेत्याशयेन तथैवोदाहरति कुरूनिति गोदोहमिति नचे
हकालत्वात्सिद्धिः लोके कालत्वेन प्रसिद्धस्य मासादेरेव कालशब्देन ग्रहणात् तेन घटमास्ते इत्यादि न भवति जन्यमात्रं कालोपाधिरिति घटादेरपि कालत्वात् यत्तु प्राचा अकर्म
कधातुभिर्योगे देशकालाध्वभावेभ्यो द्वितीयेति केचिदित्युक्त्वा नदीमास्त इत्युदाहृतं तन्न तदसंगतम् ग्रामसमूहः कुर्वादिरेव देशो गृह्यते न तु प्रदेशमात्रं तेन ग्रामं स्वपितीति न भवतीत्याक
रात् अध्वेति च न्यूनं अध्वानं स्वपितीत्यपि संगात् अतएव आकरेऽध्वा गन्तव्यत्वेन विशेषितः गन्तव्यत्वेन प्रसिद्धो नियतपरिमाणः क्रोशादिरिति च व्याख्यातं द्वितीयेत्यप्यसंगतं क

गतिबुद्धिप्रत्यवसानार्थशब्दकर्म्माऽकर्म्मकाणामणिकर्त्ता स णौ। १।४।५२॥ गत्याद्यर्थानां शब्दकर्म्मकाणामकर्म्मकाणाञ्चाणौ यः कर्त्ता स णौ कर्म्म
संज्ञः स्यात्। शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत्। आशयच्चामृतं देवान्वेदमध्यापयद्विधिम्॥ १॥ आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः॥ २॥ ग
तीत्यादि किं। पाचयत्योदनं देवदत्तेन। अण्यन्तानां किं। गमयति देवदत्तो यज्ञदत्तं तमपरः प्रयुङ्क्ते गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः। नीवह्योर्न।
नाययति। वाहयति वा भारं भृत्येन। नियन्तृकर्त्तृकस्य वहेरनिषेधः। वाहयति रथं वाहान् सूतः। आदिखाद्योर्न। आदयति खादयति वाऽन्नं बटुना।
भक्षेरहिंसार्थस्य न। भक्षयत्यन्नं बटुना। अहिंसार्थस्य किं। भक्षयति बलीवर्द्दान् सस्यं। जल्पतिप्रभृतीनामुपसंख्यानं। जल्पयति भाषयति पुत्रं
देवदत्तः। दृशेश्च। दर्शयति हरिं भक्तान्। सूत्रे ज्ञानसामान्यार्थानामेव ग्रहणं न तु तद्विशेषार्थानामित्यनेन ज्ञाप्यते। तेन स्मरति जिघ्रतीत्यादीनां
न। स्मारयति घ्रापयति देवदत्तेन। शब्दायतेर्न। शब्दाययति देवदत्तेन। धात्वर्थसंगृहीतकर्म्मत्वेनाऽकर्म्मकत्वात्प्राप्तिः। येषां देशकालादिभिन्न
ङ्कर्म्म न सम्भवति तेऽत्राऽकर्म्मकाः। न त्वविवक्षितकर्म्माणोऽपि। तेन मासमासयति देवदत्तमित्यादौ कर्म्मत्वम्भवति। देवदत्तेन पाचयतीत्यादौ तु न

र्मसंज्ञाया अविहितत्वात्कर्मणि लादयो न स्युरित्यास्यते मासः इत्यादिप्रयोगाभावप्रसंगात् केचिदित्युक्तिस्तन्मतदौर्बल्यसूचनायेति कथंचिद्व्याख्याय पूर्वोक्तपरिहारेऽपि नदीमास्ते
इत्युदाहरणे स्वासांगत्यदोषस्तदवस्थ एवेति ध्येयम्॥ ॥ गतिबुद्धि प्रत्यवसानं भक्षणं शब्दकर्मकाणामिति शब्दः कर्मकारकं येषां तेषामित्यर्थः कर्मशब्दोऽत्र कार
कपरः ननु कर्तरि कर्मव्यतिहारे इत्यत्रेव क्रियापरः कृत्रिमकार्यसंप्रत्ययात् कर्मग्रहणसामर्थ्याच्च अन्यथा हि गतिबुद्धिप्रत्यवसानशब्दार्थाकर्मकाणामि ॥

त्येव ब्रूयात्। अणौ यः कर्तेति। अनुत्पन्ने णिचि शुद्धधातुवाच्यां क्रियां प्रति यः कर्ता स ण्यन्तधातुवाच्यां क्रियां प्रति कर्मसंज्ञः स्यादित्यर्थः। नियमार्थमेतत्सूत्रमिति प्राञ्चः। णिजर्थे।
नाप्यमानस्य यदि भवति तर्हि गत्यर्थादीनामेव कर्तुरिति। तेन पाचयति देवदत्तो यज्ञदत्तेनेत्यत्र प्रयोज्ये कर्तरि प्रकृत्यर्थं प्रति कर्तृत्वस्यैव निरपवादत्वेनावस्थानात्तृतीया सिध्य
ति। उक्तं च। गुणक्रियायां स्वातन्त्र्यात्प्रेषणे कर्मतां गतः। नियमात्कर्मसंज्ञायाः स्वधर्मेणाभिधीयत इति। कर्तुः स्वधर्मेण तृतीययेत्यर्थः। ननु णिजर्थं प्रति कर्मत्वं बाधि
त्वा प्रकृत्यर्थं प्रति कर्तृत्वं परत्वादेव सिद्धम्। अन्तरङ्गत्वाच्च स्वकारकविशिष्टा हि क्रिया णिजर्थेन संबध्यते हेतुमति णिज्विधानात्। कर्तृप्रयोजकस्य हेतुत्वात्। अत एव
उपजीव्यापि कर्तृसंज्ञा। एवं च परत्वादन्तरङ्गत्वादुपजीव्यतयापि च प्रयोज्यस्यास्तु कर्तृत्वं गत्यादेर्विधिनोचिता यद्यपि विधिपक्षेऽपि लक्ष्यं निर्बाधमेव तथापि नियमसूत्रमि
दमिति किं चायं थाः विरुध्यत इति चेत्। अत्राहुः। णिजर्थस्य प्राधान्यं पुरस्कृत्य प्रधानानुरोधिन्याः कर्मसंज्ञायाः प्राबल्यात् विप्रतिषेध एव नास्तीति परत्वात्कर्तृत्वसि
द्धिरित्येतन्न संगच्छते। अन्तरङ्गत्वोपजीव्यत्वेऽपि प्रधानं प्रति न प्राबल्यं प्रयोजयतः। ततश्च नियमार्थत्वोक्तिः प्राचां निर्बाधैवेति। गत्यादिण्यन्तानां क्रमेणोदाहरति।
शत्रूनिति। शत्रवः स्वर्गमगच्छन्। तान् श्रीहरिः स्वर्गमगमयदिति। गमरण्यन्तावस्थायां शत्रवः कर्तारः। ण्यन्तावस्थायां कर्म अभवन्। स्वर्गकर्मकं शत्रुनिष्ठं यद्गमनं तदनु
कूलो यन्निष्ठो व्यापारः स श्रीहरिः मे गतिरिति वाक्यार्थः। एवमग्रेऽप्यूह्यम्। वेदार्थमिति। स्वे स्वकीया वेदार्थमविदुस्तान् श्रीहरिर्वेदार्थमवेदयत्। तथा देवा अमृतमाश्नन्
तानाशयत्। विधिः वेदमध्यैत तं ब्रह्माणं वेदमध्यापयत् अपाठयत्। सलिले पृथ्वी आस्त। तां यो हरिरासयत् स्थापयति स्म स हरिर्मे गतिरित्यन्वयः। ननु शत्रूणां गमनेन
कर्मत्वे कृते कर्मण ईप्सिततमो स्वर्गो न तु कर्तुरिति कर्तुरीप्सिततमत्वाभावात् स्वर्गस्य कर्मत्वं न स्यात्। अत्र केचित्। गतिबुद्धीति कर्मत्वस्य बहिरङ्गत्वेन ततः पूर्वमेव धा
त्वर्थव्यापारप्रयुक्तं कर्मत्वं स्वर्गस्य निर्बाधमित्यदोष इति। अन्ये तु कर्तुरीप्सिततममित्यत्र कर्तृग्रहणं स्वतन्त्रस्योपलक्षणं स्वातन्त्र्यं च धातूपात्तव्यापाराश्रयत्वमेव तत्
प्रयोजकसंनिधानेऽपि प्रयोज्यस्यास्त्येवेति न काप्यनुपपत्तिः। न च स्वतन्त्रे संकेतितस्य कर्तृपदस्य तन्त्रेण लक्षणेन संगच्छते। एकस्यैकस्मिन्नेवार्थे शक्तिलक्ष
णोभयाभ्युपगमस्य शास्त्रकारासंमतत्वादिति वाच्यम्। संज्ञान्तरानुपहितस्वतन्त्रे संकेतितस्य संज्ञान्तरोपहिताऽनुपहितसाधारणे स्वतन्त्रे लक्षणाभ्युपगमे बाधकाभा
वात्। अत एव जिधातोर्जयप्राप्तिः। प्रकृष्टजये लक्षणा। प्राका दन्येन रूपेण ज्ञाते भवति लक्षणेति। तेन प्रजयतीत्यत्र प्रशब्दो द्योतकः प्रकृष्टजयस्तु जिधातोरे

वअर्थ इति नैय्यायिकोक्तिः संगच्छते। नापि कर्तृपदस्य स्वतंत्रलक्षणायां प्रमाणाभावः शंक्यः। प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणां अप्रधाने दुहादी
नामित्युक्त्वा ण्यंते कर्तुश्च कर्मण इत्थं इति भाष्यकारस्यैव प्रमाणत्वात्। नहि लक्षणां विना णिजंतानां हि कर्मकर्तृता लभ्यते येन ण्यंते कर्तुरिति वचनं साव
काशं स्यादित्याहुः। नीवह्योरिति॥ यद्यप्यनयोः प्रापणमर्थो न गतिस्तथापि गतिरपि विशेषणीभूय प्रापणमध्ये प्रविष्टेत्येतावन्मात्रेण प्राप्तिमत्वात्प्रतिषेध उक्तः।
नियंत्रिति। नियंता पशुप्रेरकः। ननु सारथिरेव जितेन वाहयति बलीवर्दान् यवानिति सि ध्यति। असादेव भाष्योदाहरणात् रूढियोगमपहरतीति न्यायोऽत्र न।
स्वीक्रियते। अनिषेध इति। प्रयोज्यः कर्मेति वक्तव्यमिति फलितोऽर्थः। येस्तु प्रापणं गतिशब्देन गृह्यते। यैर्वा न गृह्यते उभयेषामपीदं वचनं आवश्यकं। नी
वह्योर्नेति वचनं तु यैः प्रापणं गतिशब्देन न गृह्यते तेषामनावश्यकमिति बोध्यं। सूत इति नियंता प्राजिता यंता सूतः। क्षत्ता च सारथिरित्यमरः। प्रत्यवसानार्थत्वात्कर्मत्वे
प्राप्ते निषेधमाह। आदिखाद्योरिति। अद भक्षणे। खाद भक्षणे। प्राचा तु आदीति पठ्यते तत्र ण्यंतानुकरणमिति बोध्यं। आदयतीति। इह निगरणचल
नार्थेभ्यश्चेति परस्मैपदनियमो न प्रवर्तते। अतेः प्रतिषेध इति तस्य निषिद्धत्वात्। तेनाकर्त्रभिप्राये क्रियाफले शेषात्कर्तरीति परस्मैपदं। कर्त्रभिप्राये तु
णिचश्चेत्यात्मनेपदं भवत्येवेति बोध्यं। भक्षेरिति। ननु गतिबुद्धीति सूत्रेणाणौ कर्तुर्णौ कर्मत्वं विधीयते न तु णौ कर्तुरिति प्राप्तेरेवाभावान्निषेधोऽयं व्यर्थ इति चे
त्। अत्राहुः। हेतुमण्णिजंते विधिरिति निषेधोऽप्यणावित्यस्य संन्निधानाद्धेतुमण्णिज्विषय एव तेन चुरादिणिजंतेपि भक्षयतेः प्राप्तिमत्वान्निषेध उपसंख्यात
इति। भक्षयतीति। बलीवर्दाः सस्यं भक्ष तितान्भक्षयतीत्यर्थः। क्षेत्रस्थानां यवानां भक्षमाणानां हिंसात्वेया। तस्यामवस्थायां तेषां चेतनत्वात् जल्पतिप्रभृतीनामिति।
जप जल्प व्यक्तायां वाचि। पुत्रो धर्मं जल्पति तं देवदत्तो जल्पयतीत्यण्यंतावस्थायां पुत्रः कर्ता। ण्यंतावस्थायां कर्म अभवत्। तथा पुत्रो धर्मं भाषते तं भाषयति दे
वदत्तः। न च जल्पतिभाषत्योः शब्दक्रियत्वेन गतिबुद्धीति सूत्रेणैव सिद्धेरुपसंख्यानमिदं व्यर्थमिति भ्रमितव्यं। शब्दकर्मणामित्यस्य शब्दकर्मकारकं येषां
मित्यर्थात् अन्यथा वेदमध्यापयद्विधिमित्यादेरसिद्धिप्रसंगात्। एवं पुत्रो यत्किंचिद्विलपति तं विलापयतीत्याद्यप्यूह्यं। स्मारयतीति। आध्यानार्थकस्यैव स्मरतेर्घटादि [illegible]
निमित्वं न चिंतार्थकस्येति भावः। देवदत्तेनेति। स्मारयत्येनं वनगुल्म इत्यत्र तु लोरणाविति सूत्रे भाष्यप्रयोगादेव कर्मत्वं बोध्यं। शब्दाययतीति। शब्दं करोतीत्यर्थे शब्दवैरत्यादि

नाकाङ्क्षा। ततो हेतुमण्णिच्। धात्वर्थसंगृहीतेति। एतेन शब्दायपतिसेनिके रिपूनिति कर्म प्रयुंजानाः परास्ताः। नत्वविवक्षितकर्मा णोपीति। यथा लः कर्मणि चेति सूत्रअ
विवक्षितकर्मा णोप्यकर्मकाः इति गृह्यंते तथैवेहापि यदि गृह्येरन् तदा ओदनादिकर्मणो विवक्षायां पाचयति देवदत्तमिति स्यात् न तु देवदत्तेन पाचयतीति। एवं गत्य
र्थाकर्मकेति सूत्रेप्यविवक्षितकर्मा णोः कर्मकाः इति न गृह्यंते। दत्तवान् पक्कवान् इत्यर्थे दत्तः पक्कः इत्यापत्तेः। यत्तु प्राचा अयक्रंदशब्दाय द्धे गां नेत्युक्तं तदयुक्तं। अ
यंते निषेधस्य निर्मूलत्वेन अणौ कर्तुर्णौ कर्मत्वस्य तत्रेष्टत्वात्। कं दद्धे गोमुशब्दक्रियत्वेपि शब्दः कर्मकारकं नेति प्रासेरेवाभावाच्चेति स्थितं मनोरमायां। यदपि श्रु
ग्रहदृशामिति कर्मत्वमुक्तं तत्र दृशिग्रहणं प्रामाणिकमेव। शृणोते स्तु शब्दकर्मकत्वात् सिद्धं। ग्राहेर्ह्रि कर्मकत्वं यद्यप्यजिग्रहत्तं जनको धनुरिति भट्टि प्रयोगस्य अयावि
तारं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाकेति कालिदासप्रयोगस्य चानुगुणं तथापि बहूनामसंमतमेव। अत एव तं धनुरजिग्रहत् बोधितवान्। सुतां ग्राहयितु
ं ग्राहित्वेन बोधयितुमित्येवमुक्तप्रयोगं समर्थयांचक्रिरे। न च बुध्यर्थत्वं विनापि यथाश्रुतार्थे एव ग्राहेर्ह्रि कर्मकत्वमस्त्विति वाच्यं। तथा हि सति जाया प्रतिग्राहि
तं गंधमाल्यामित्यत्र क्त प्रत्ययेनाभिधानं प्रयोज्यकर्मीभूतधेनोः स्यात्। न तु गंधमाल्यकर्मणः। एयंते कर्तुश्च कर्म इत्युक्तेः। जाया प्रेरिता हि धेनुर्गंधमाल्यं प्रतिगृ
ह्णातीति भवत्येव। धेनुः प्रयोज्यकर्म तत्रश्च जायया गंधमाल्यं प्रतिग्राहितामिति स्यात्। प्रत्ययानभिहितत्वेन गंधमाल्यकर्मणि द्वितीयायाः प्रवृत्तेः। सिद्धांते तु जा
यया प्रतिग्राहितं गंधमाल्यं ययेति विग्रहः। द्विकर्मकत्वाऽभावेन गंधमाल्यस्यैव क्त प्रत्ययेनाभिहितत्वात्। ययेति तृतीया तु णिजर्थं प्रति जायायाः कर्तृत्वेपि णिच्प्र
कृत्यर्थं प्रतिग्रहं प्रति धेनोः कर्तृत्वादुपपद्यते। एवं चेह जाया निष्ठप्रेरणविषयीभूतं गंधमाल्यकर्मकं यत्प्रतिग्रहणं तत्कर्त्रीमिति वृत्त्यर्थः। यद्यपि धेनुकर्तृ
कं जाया निष्ठप्रेरणविषयीभूतं यत्प्रतिग्रहणं तत्कर्मीभूतगंधमाल्या इति विग्रहार्थस्तथाप्यन्यपदार्थान्तर्भावेण विशेषणविशेष्यभाववैपरीत्येन एकार्थीभावः क
ल्पत इति नास्त्यत्रानुपपत्तिरिति दिक्॥

हृक्रोः। हाश्च क्राश्च हृक्रौ तयोरिति विग्रहः। हृश्च कृश्च हृक्रौ इति वा प्रथमान्तेन परिनिष्ठितविभक्त्या वा विग्रह इति सिद्धान्तः। गतिबुद्धीत्यादीह नानुवर्तते तेन उभयत्र
विभाषेयं। अभ्यवपूर्वस्य हरतेर्भक्षणार्थत्वान्न विकारार्थस्य करोतेश्चाकर्मकत्वात्। गतिबुद्धीत्यादिना अणौ कर्तुर्णौ कर्मत्वे प्राप्ते अर्थान्तरे चानयोः सकर्मकत्वा
दप्राप्ते अस्यारंभात्   अप्राप्तावुदाहरणमाह। हारयतीति। हरति करोति वा कटं भृत्य इत्यण्यन्तावस्थायां भृत्यः कर्ता स एव ण्यन्तावस्थायां कर्माऽभूत्।
प्राप्ते तूदाहरणं तृणमभ्यवहारयति सैंधवान् तृणम् अभ्यवहारयति सैंधवैर्विकारयति सैंधवं वा विकारयति सैंधवैरिति बोध्यं। ननु यदि गतिबुद्धीत्यादिरिह नानु
वर्तेत तदैतदेव स्यात्। तत्रैव मानं न पश्याम इति चेन्नैवं। नवेति विभाषेति सूत्रे उभयत्रविभाषा इति भाष्यकृताऽस्यापि सूत्रस्य गणितत्वेनोक्तशंकाया अनव
हृक्रोरन्यतरस्यां। १।४।५३॥ हृक्रोरणौ यः कर्त्ता स णौ वा कर्म्मसंज्ञः स्यात्। हारयति कारयति वा भृत्यं भृत्येन वा कटं। अभिवादिदृशोरात्मनेपदे वेति वा
च्यं। अभिवादयते दर्शयते देवं भक्तं भक्तेन वा। अधिशीङ्स्थासां कर्म्म। १।४।४६। अधिपूर्वाणामेषामाधारः कर्म्म स्यात्। अधिशेते। अधिति
ष्ठति। अध्यास्ते वा वैकुण्ठं हरिः॥ अभिनिविशश्च। १।४।४७। अभिनीत्येतत्संघातपूर्वस्य विशतेराधारः कर्म्म स्यात्। अभिनिविशते सन्मार्गं। परिक्र
यणे सम्प्रदानमिति सूत्रादिह मण्डूकप्लुत्याऽन्यतरस्यां ग्रहणमनुवर्त्य व्यवस्थितविभाषाश्रयणात् क्वचिन्न। पापेऽभिनिवेशः। उपान्वध्या
ङ्वसः। १।४।४८॥ उपादिपूर्वस्य वसतेराधारः कर्म्म स्यात्। उपवसति। अनुवसति। अधिवसति। आवसति वा वैकुण्ठं हरिः। अभुक्त्यर्थस्य न ॥
तारात्। अभिवादीति वदसंदेशवचने चुरादिः। धृषीयः अभिपूर्वत्वान्नमस्कारार्थता। अभिवादयतेरप्राप्ते दृशेस्तु प्राप्तेऽयं विकल्पः। अभिवदति देवं भक्तः सं प्रेरयत्यन्यः अभिवादयते। णिचश्च
श्चेत्यात्मनेपदं परस्मैपदे तु अभिवादयति देवं भक्तेनेत्येव। तथा पश्यति देवं भक्तः दर्शयते देवं भक्त इत्यादि। अभिनिनि   त्याच्तरत्वेन पूर्वनिपाते कर्तव्ये विप
रीतोच्चारणमीदृशसंघातविवक्षार्थमित्याह। संघातपूर्वस्येति। तेनेह न। निविशते यदि शूकशिखा पद इति। क्वचिन्नेत्येवमर्थमभिनिविष्टानामिति समर्थसू
त्रस्थभाष्यप्रयोगोऽत्र मानमिति भावः। उपान्वा। लुग्विकरणादलुग्विकरणं बलीय इति। वसनिवास इति भौवादिक एव गृह्यते न तु वस आच्छादन इत्यादादिक इति अ
भिप्रेत्य शपा निर्देशमाह। उपादिपूर्वस्य वसतेरिति। वसेरश्यर्थस्य प्रतिषेध इति वार्तिकमर्थतो व्याचष्टे। अभुक्त्यर्थस्य नेति। वार्तिके अश्यर्थशब्दो निवृत्तिवचनः। भोज

वनेउपवसतीति। कथंतर्हिगत्यर्थाकर्मकेतिसूत्रेहरिदिनमुपोषितइत्युदाहरणंसंगच्छतइतिचेदत्राहुः। वसेरत्रस्थितिरर्थः भोजननिवृत्तिस्त्वार्थिकीतिनदोष
इति। उपपदविभक्तिमाह। उभसर्वतसोरित्यादिना। उभसर्वयोस्तसौउभसर्वतसौतदंतयोर्योगेद्वितीयाकार्येत्यर्थः। प्रकृतिद्वित्वेनतसोरितिद्वित्वनिर्देशः। अत्रउभ शब्दा
दयचूनकृतः। अनुकरणशब्दत्वेनअसंख्यावाचित्वात्। तथाचउभशब्देनउभयशब्दोलभ्यतेकेवलात्परत्रतसिलोऽसंभवादित्येके। वस्तुतस्तुवृत्तिविषयेअयचूप्रवृ
ताविपउभशब्दाद्धिहितोयस्तसतदंतमस्त्येवेतियथाश्रुतेसाधुरिति नुमनोरमायांस्थितं। धिगिति। धिक्शब्दयोगेपिद्वितीयाकार्येत्यर्थः। अत्रभाष्यंचः। धिगित्यविभक्ति
कोनिर्देशोगवि त्ययमाहेतिवदित्याहुस्तन्न। तथासत्यपदांतेनयाइष्टोनेति लोपः शाकल्यस्येवदाष्टौनिकेजश्त्वस्याप्यप्रवृत्तिप्रसंगात्। नचायंगकारांतएवास्त्वि
तिशंक्यं। कस्यचदइतिसूत्रेधकिदित्युदाहरणस्यासंगतिप्रसंगात्। कस्यचदइत्य—नेनहिकांतान्ययस्यअकच्सन्नियोगेनदत्वंविधीयते। तस्माद्धिगितिविभक्त्यंतमे

कृष्णं उपवसति। उभसर्वतसोः कार्य्याधिगुपर्य्यादिषुत्रिषु॥ द्वितीयाम्रेडितान्तेषुततोऽन्यत्रापिदृश्यते १ उभयतः कृष्णंगोपाः। सर्वतः कृष्णं। धिक्
कृष्णंऽभक्तं। उपर्युपरिलोकंहरिः। अध्यधिलोकं। अधोऽधोलोकं। अभितःपरितस्समयानिकषाहाप्रतियोगेऽपि। अभितः कृष्णं। परितः कृष्णं। ग्रा
मंसमयानिकषा। हाकृष्णाऽभक्तं। तस्यशोच्यतइत्यर्थः। वुभुक्षितन्नप्रतिभातिकिञ्चित्। अन्तराऽन्तरेणयुक्ते। २।३।४। आभ्यांयोगेद्वितीयास्यात्।
अन्तरात्वांमांहरिः। अन्तरेणहरिन्नसुखं॥ ॥ व परंतुप्रकृतिवदनुकरणमित्यतिदेशेनाव्ययत्वात्सुपोलुक्यदितुधिगित्यविभक्तिकोनिर्दे
श इत्येतावानेवप्राचांग्रंथस्तदासम्यगेवा। अव्ययत्वात्सुपोलुकि अविभक्तिकोनिर्देशइतिवक्तुंशक्यत्वात्। उभयतः कृष्णमिति। कृष्णस्यपार्श्वद्वयेपीत्यर्थः। आद्यादि
त्वात्तसिः षष्ठ्यर्थेद्वितीया। एवंमुपपदविभक्तौसर्वत्रबोध्यं। अत्रव्याचक्षते। उभसर्वतसोरित्यत्रउभसर्वयोर्गणपरस्परसाहचर्यात्तसिलेवगृह्यतेनत्वाद्यादिभ्यस्तसि
स्तथाचोभयतइत्यादौतसेश्चैत्यनेनतसिलादेशोऽवगंतव्यस्तेनयत्रसंज्ञायांतसेस्तसिलादेशाभावस्तत्रनद्वितीयाकिंतुषष्ठ्येवतसिल भावस्तुतसेश्चेत्यत्रकिंसर्वना
मबहुभ्यइत्यनुवर्तनादिति। धिक्कृष्णमभक्तमिति। तस्यनिंद्यतइत्यर्थः। षष्ठ्यर्थेद्वितीया। सनिंद्यइत्यर्थः। प्रथमार्थेद्वितीयेत्येके। कथंधिक्मूर्खेति। संबोधनपदस्य
क्रियान्वयइतिप्रागेवोक्तत्वाद्धिक्शब्दयोगाभावान् द्वितीयानप्रवर्ततइतिसंबोधनेचेतिप्रथमैवभवतीति। क्रियापदंचक्वचिच्छ्रुतंक्वचिदाक्षिप्तंतथाचधिक्मू

खं निषिद्धाचरणमित्यत्र इह कस्यां मूर्खसंबोध्यकनिषिद्धाचरणस्य निंद्यत इति नु वाक्यार्थः। प्रथमार्थे धिग्योगे द्वितीयेति वादिनां तु मूर्खसंबोध्यकं निषिद्धाचरणं निंद्यमिति
वाक्यार्थः। यत्तु उपपदविभक्तेः कारकविभक्तिर्बलीयसीति संबोधने प्रथमैव भवति संबोधनपदस्य कर्तृकारकवाचित्वादित्याहुः। तच्चिंत्यं। संबोधनस्य कर्तृकारकत्वे उक्तिसंभ
वान्नात्मनेपदे त्वं भसीत्यादौ वस्तुगत्या देव एव कर्तेत्यस्यैव उक्तिसंभव इति वाच्यं। वास्तवकर्तृत्वेपि कारकविभक्तित्वस्य अलाभात्। किंचा देव त्वां भजे त्वां मजतिमकारस्या
प्यध्यस्य देवस्य वा तत्त्वमपि कर्तृत्वं नास्तीति आलां तावत्। उपर्युपरीति। कथं तर्हि उपर्युपरि बुद्धीनां चरंतीश्वरबुद्धय इति। अत्राहुः। उपरि बुद्धीनां उन्नतबुद्धीनां उप
रीत्यर्थः। तेनाऽऽम्रेडितत्वाभावान्न द्वितीया। यत्तु प्रतिपदोक्तस्योपर्यध्यधसः सामीप्य इति कृतद्वित्वस्य वार्तिके ग्रहणादिह च वीप्साद्विर्वचनत्वान्नास्ति द्वितीया
सक्तिरिति। अभितःपरित इति। एतच्चान्यत्रापि दृश्यत इति पूर्वोक्तस्यैव प्रपंचभूतमिति व्याचख्युः। अभितः कृष्णमिति। पर्यभिभ्यां चेति तसिल्। समयानिकषाशब्दौ
मी. प. चनाव्ययौ। विलंघ्य लंकां निकषा हनिष्यतीति माघः। हेति खेदे तदेतदाह तस्य शोच्यत इति। बुभुक्षितमिति। बुभुक्षितस्येत्यर्थः। एष प्रतिशब्दः क्रियाविशेषक
ादुपसर्गः। न तु कर्मप्रवचनीयः। तेनात्र कर्मप्रवचनीययुक्त इत्यनेन गतार्थतानाशंक्या। अंतरां अंतरेण। अव्ययदोक्तत्वान्निपातयोरेव ग्रहणं न तु टावंततृतीयांतयोः पर
स्परसाहचर्याच्चात एव गुरुभार्गवाविव्युक्तौ ग्रहयोरेव प्रतीतिर्न त्वाचार्यपरशुरामयोः। तेन किमनयोरंतरेण गतेनेति सिद्धं। किमनयोर्विशेषेण ज्ञानेनेत्यर्थः। अंतरा त्वां
मामिति। त्वं मम च मध्य इत्यर्थः। हरिशब्दान्न द्वितीया न भवति। अंतरं गतया प्रथमायाः एवोत्पत्तेः। अंतरेण हरिमिति। हरिं विनेत्यर्थः। मध्य इत्यर्थेप्यंतरेणशब्दो वर्ततेम
णाल सूत्रामलमंतरेण स्थितश्चलच्चामरयोर्द्वयं स इति। चलच्चामरयोर्द्वयस्य मध्य इत्यर्थः। युक्तग्रहणान्नेह। अंतरा त्वां मां कृष्णस्य मूर्तिः। इह कृष्णान्न द्वितीया। अंतरा
शब्दप्रयोगेपि अंतरेत्यनेनानन्वयात्।

कर्मप्रवचनीया इत्यधिकृत्येति। ईश्वरात्प्राग्निति बोध्यं। गुरुसंज्ञाकरणं अन्वर्थत्वाय। कर्मेति क्रियां प्रोक्तवंतः कर्मप्रवचनीयाः बाहुलकात् भूते कर्तर्यनीयर्। तेन संप्रति क्रियां न द्योतयंतीति लभ्यते। तथा च हरिः क्रियाया द्योतको नायं संबंधस्य न वाचकः। नापि क्रियापदाक्षेपी संबंधस्य तु भेदक इति। तथा हि। जपमनु प्रावर्षत् इत्यत्र अनुना न क्रियाविशेषो द्योत्यते। अनुभूयते सुखमित्यादौ यथा। नापि षष्ठ्येव संबंध उच्यते द्वितीयैव तस्योक्तत्वात्। नापि प्रादेशं विलिखतीतिवत् विशब्देन। मानक्रियेव क्रियांतरमाक्षिप्यते। कारकविभक्तिप्रसंगात्। किं तु जपसंबंधि वर्षणमिति द्वितीयया वगतः संबंधो लक्ष्यलक्षणभावरूपेणेति अवगमात्। संबंधरूपेण वाऽनुना विशेषे व्यवस्थाप्यते। क्वचित्तु क्रियागतविशेषद्योतकेऽपि इयं संज्ञा वचनात् प्रवर्तते। सुः पूजायां अतिरतिक्रमणे चेति यथा। उक्तसंज्ञ इति। कर्मप्रवचनीय इत्यर्थः। गत्युपसर्गसंज्ञापवाद इति। ननु जपमनु प्रावर्षदित्यत्र दृष्टिमन्त्यनोर्योगाभावेन क्रियायोगाभावादेव तयोः संज्ञयोः प्राप्त्यभावात् कथं तदपवादत्वं अस्याः

कर्मप्रवचनीयाः। १।४।८३॥ इत्यधिकृत्य। अनुर्लक्षणे। १।४।८४॥ लक्षणे द्योत्येऽनुरुक्तसंज्ञः स्यात्। गत्युपसर्गसंज्ञाऽपवादः। कर्मप्रवचनीययुक्ते द्वितीया। २।३।८॥ एतेन योगे द्वितीया स्यात्। जपमनु प्रावर्षत्। हेतुभूतजपोपलक्षितं वर्षणमित्यर्थः। परापि हेतौ तृतीयाऽनेन बाध्यते। लक्षणेत्थंभूतेत्यादिना सिद्धे पुनः संज्ञाविधानसामर्थ्यात्। तृतीयार्थे। १।४।८५॥ अस्मिन् द्योत्येऽनुरुक्तसंज्ञः स्यात्। नदीमन्ववसिता सेना। नद्या सह

संबद्धेत्यर्थः॥ षिञ् बन्धने क्तः॥

इति चेत् अत्राहुः। गम्यमाननिश्चमनक्रियामपेक्ष्य तयोः प्राप्तिरस्तीति संभावनामात्रेण मूलस्य निर्मितमप्यु।

हेतौ वाऽस्य संबंधविवक्षायां कर्मत्वाभावेन तृतीयायां प्राप्तायां तदारंभात्। न चैवमपि जपमनुनिशम्य देवः प्रावर्षत् इत्यर्थावगमात् ल्यब्लोपे पंचम्यपवादार्थैव संज्ञाऽस्त्विति वाच्यं। ल्यब्लोपे हि कर्मणि अधिकरणे च पंचमी जपस्य तु कर्मत्वादिना विवक्षाभावादिति। परापि हेतौ तृतीयेत्यादि। अयं भावः। लक्षणे कर्मप्रवचनीयसंज्ञाया अवकाशः यो न हेतुः वृक्षमनु विद्योतते विद्युदिति। हेतुतृतीयाया अवकाशो धनेन कुलमित्यादि। जपमनु प्रावर्षदित्यत्र तु हेतुभूते लक्षणे परत्वात्तृतीयास्यात्तां बाधित्वा अनुर्लक्षणे इति पुनः संज्ञाविधानसामर्थ्याद्द्वितीयैव भवतीति। न च तृतीयार्थे इति सूत्रेण हगतार्थता शंक्या तस्य पुरस्तादपवादन्यायेन सहयुक्तेऽप्रधान इत्येतावन्मात्रबाधकत्वात्। सामर्थ्यादिति। अत एव हेतुत्वपर्यंतमपि शाब्दबोधविषय इति स्वीक्रियतेऽ इति भावः। नदीमन्वेति। द्वितीयाबोधत्वात् न चैवं कर्मत्वादेव द्वितीयासिद्धौ किमनया संज्ञयेति वाच्यं जपस्य निशइ॥

हीना। उत्कृष्टाद्देवद्वितीयान्तत्वपक्षेऽपकृष्टाच्छक्तिस्वभावादित्याशयेनोदाहरति। अनु हरिमिति। उपोऽधिके च। चकारेण हीने इत्यनुकृष्यते तदाह। अधिके हीने चेति। अधिके संज्ञावि-
धानं न तु द्वितीयार्थमित्याह। सप्तमी वक्ष्यत इति। यस्मादधिकमित्यनेनेति भावः। तस्मिन्नपि सूत्रे कर्मप्रवचनीयादित्यनुवृत्तेरधिके संज्ञाविधानमावश्यकमेवेति ध्येयं। उपहरि-
ति। पूर्ववदुत्कृष्टादेव द्वितीया। लक्षणेत्थं। वृक्षं प्रतीति। वृक्षसंबंधिद्योतनमर्थः। संबंधश्च लक्ष्यलक्षणभाव इति प्रत्यादयो द्योतयंति। भक्तो विष्णुं प्रतीति। विष्णोर्भक्तेश्च वि-
षयविषयिभावः प्रत्यादिद्योत्यः। भक्तः कंचित्प्रकारं प्राप्त इत्यर्थः। लक्ष्मीर्हरिं प्रतीति। लक्ष्मीरूपस्य भागस्य हरिणा सह स्वस्वामिभावः। वृक्षं वृक्षमिति। इह वीप्सा द्विर्वचने

हीने। १।४।८६॥ हीने द्योत्येऽनुः प्राग्वत्। अनु हरिं सुराः। हरेर्हीना इत्यर्थः॥ उपोऽधिके च। १।४।८७। अधिके हीने च द्योत्ये उपेत्यव्ययं प्राक्संज्ञं स्यात्। अ-
धिके सप्तमी वक्ष्यते। हीने उप हरिं सुराः। लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः। १।४।९०॥ एष्वर्थेषु विषयभूतेषु प्रत्यादय उक्तसंज्ञाः स्युः।
लक्षणे। वृक्षं प्रति पर्यनु वा विद्योतते विद्युत्। इत्थंभूताख्याने। भक्तो विष्णुं प्रति पर्यनु वा। भागे। लक्ष्मीर्हरिं प्रति पर्यनु वा। हरेर्भाग इत्यर्थः। वीप्सा-
यां। वृक्षं वृक्षं प्रति पर्यनु वा सिंचति। अत्रोपसर्गत्वाऽभावान्न षत्वम्। एषु किं। परिषिंचति। अभिरभागे। १।४।९१॥ भागवर्जे लक्षणादावभिरुक्तसंज्ञः
स्यात्। हरिमभि वर्तते। भक्तो हरिमभि। देवं देवमभि सिंचति। अभागे किं। यदत्र ममाभिष्यात्तद्दीयतां। अधिपरी अनर्थकौ। १।४।९३। उक्तसंज्ञौ स्तः।
कुतोऽध्यागच्छति। कुतः पर्यागच्छति। गतिसंज्ञाबाधात् गतिर्गताविति निघातो न। सुः पूजायां। १।४।९४॥ सुसिक्तं। सुस्तुतं। अनुपसर्गत्वान्न षः॥
पूजायां किं। सुसिक्तं किं तवाऽत्र। क्षेपोऽयं॥ ॥

((नैव द्योत्यते। प्रत्यादिशब्दस्तु क्रियया संबध्यते। कर्मण्येव द्वितीया कर्मप्रवचनीयसंज्ञया उपसर्ग-
संज्ञाया बाधान्न षत्वं न णत्वं इत्यर्थमिव लक्षणादयो विषयतयोपात्ता इति व्याख्यातमाकरे। पंचम्यपाङ्परिभिरिति तु न भवति। वर्जनार्थेनापेनेन साहचर्यात्। परिषिंचकु-
तीति। सर्वतः सिंचतीत्यर्थः। उपसर्गत्वान्नित्यं षत्वं। ममाभिष्यादिति। मम भागः स्यादित्यर्थः। प्रांचस्तु मामभिष्यादिति पठन्तु दाहरंति तत्र मां प्राप्नुयादित्यर्थः। उपस-
र्गवशेन सः सकर्मकत्वान्मामिति द्वितीया अत्र च मम भाग इत्यर्थतः पर्यवसानादभागे इति कर्मप्रवचनीयत्वे निषिद्धे उपसर्गप्रादुर्भ्यामिति षत्वं। कुतोऽध्यागच्छती-
ति। इह अजयति पराभवति इत्थं प्रति विद्योतत इत्यत्र प्रादेर्विशेषद्योतकत्ववदधिपर्योरिह विशेषद्योतकत्वाभावादानर्थक्यं धात्वर्थमात्रद्योतकत्वेन त्वनर्थकत्वात्।

॥ ९ अवयवावयवीभाव इति सर्पिरवयवी बिंदुरवयवः इयमेवेति बिंदुदौर्लभ्यप्रयुक्तदौर्लभ्यद्योतकतैवेत्यर्थः॥
मतिर्गतावित्यत्र परादित्यधिक्रियत इति पदान्तरत्वसंपत्त्ये कृत इति युक्तं॥ ः ॥ अतिरतिक्रमणे च॥ चकारेण पूजायामित्यनुकृष्यत इत्याह। पूजायां चेति। अतिक्रमण मुचितादधिकस्यानुष्ठानं। अर्थद्वयेप्येकमेवोदाहरति। अतिदेवान् कृष्ण इति। अन्ये तूदाहरन्ति। अतिसिक्तमतिस्तुतमिति बहुतरं समीचीनं वा सिक्तं स्तुतं चेत्यर्थः। बहुतरार्थ अतिक्रमण समीचीने पूजेति विवेकः। अपिः पदार्थ। सर्पिषोपि स्यादिति। सर्पिर्बिंदुः स्यादित्यर्थः। अपेः कर्मप्रवचनीयत्वे फलमाह। अनुपसर्गत्वान्न ष इति। अपसर्गसंज्ञाभावादुपसर्गप्रादुर्भ्यामस्तिरिति षत्वं न प्रवर्त्तत इति भावः संभावनायामिति। संभाव्यत इति संभावना। अस्या सप्तम्यर्थो युच्। भवनक्रियासंभावनायां भवनस्य विषयत्वादाह। तस्या एवेति। संभावनाया एवेत्यर्थः कर्तृदौर्लभ्येत्यादि। कर्तृदौर्लभ्याद्भवनक्रियाया दौर्लभ्यं तद्दौर्लभ्यं द्योतयन्नपि शब्दो भवनक्रियां वा विनाऽस्यादित्यूने
अतिरतिक्रमणे च। १।४।९५। अतिक्रमणे पूजायां चातिः कर्मप्रवचनीयसंज्ञस्यात्। अतिदेवान् कृष्णः। अपिः पदार्थसम्भावनाऽन्ववसर्गगर्हासमुच्चयेषु। १।४।९६। एष्वर्थेष्वपिरुक्तसंज्ञस्यात्। सर्पिषोऽपिस्यात्। अनुपसर्गत्वान्न षः सम्भावनायां लिङ्। तस्या एव विषयभूते भवने कर्तृदौर्लभ्यप्रयुक्तं दौर्लभ्यं द्योतयन्नपिशब्दः स्यादित्यनेन सम्बध्यते। सर्पिष इति षष्ठी तु अपिशब्दबलेन गम्यमानस्य बिन्दोरवयवावयविभावसम्बन्धे इयमेव ह्यपिशब्दस्य पदार्थद्योतकता नाम। द्वितीया तु नेह प्रवर्त्तते। सर्पिषो बिन्दुना योगो न त्वपिनेत्युक्तत्वात्। अपिस्तुयाद्धिलुम्। सम्भावनं शक्त्युत्कर्षमाविष्कर्तुमत्युक्तिः। अपिस्तुहि। अन्ववसर्गः कामचारानुज्ञा। धिग्देवदत्तमपिस्तुयाद्वृषलं। गर्हा। अपिसिञ्च अपिस्तुहि समुच्चये॥ ॥
कर्तृदौर्लभ्यमित्यर्थः। द्वितीयेति। कर्मप्रवचनीययुक्ते इत्यनेन विहिता। नत्वपिनेति। न च बिंदुना योगे तद्द्योतकापिशब्देनापि योगो जात एवार्थद्वारा शब्दानां योगस्याभ्युपगमादिति शंक्यं। अपिशब्दस्य बिंदुद्योतकत्वाभावात्। कथं तर्हि बिंदुप्रतीतिरिति चेत्। शृणु। अपिना द्योत्यं भवनदौर्लभ्यमेव कर्तृदौर्लभ्यमाक्षिपति कर्ता त्विह बिंदुरेवेति स प्रतीयते। अत एवापिशब्दबलेन गम्यमानस्येत्युक्तं न त्वपिना गम्यमानस्येति। उक्तत्वादिति। उक्तप्रायत्वादित्यर्थः। अपिशब्दः स्यादित्यनेन संबध्यत इत्युक्तेः स्यादित्यस्यापिना योगो न तु सर्पिष इत्यस्येत्यर्थपर्यवसानात्। अपिस्तुयादिति। अवाङ्मनसगोचरं विष्णुमपिस्तुयादिति अधिकोक्तिः। एतादृशस्यान्यदीयस्तवने सामर्थ्यमस्तीत्यत्र किं वक्तव्यमिति भावः। इह संभावनाद्योतकोपि शब्दः पूर्वत्र तु संभावनाविषयदौर्लभ्यद्योतक इति महानभेदः। उपसर्गात्सुनोतीत्यादिना षत्वं न भवति

कर्मप्रवचनीयसंज्ञया उपसर्गसंज्ञाया बाधात्। एवमुत्तरत्रापि बोध्यं। अपि सिंच अपि स्तुहि इति। सिंच स्तुहि चेत्यर्थः॥ ॥ कालाध्वनोः। अंतं विराममतिक्रांतो ऽत्यंतः स चासौ सं-
योगश्चात्यंतसंयोगः निरंतरसन्निकर्ष इत्यर्थः। केनेत्याकांक्षायां गुणक्रियाद्रव्यैरित्यौचित्यात् बोध्यं। द्वितीया स्यादिति। श्रुतत्वात्कालाध्ववृत्तिभ्यामेव। स्वरूपग्रहणं तु वि-
हितं न भवति। कालाः अत्यंतसंयोगे चेति समासविधायके काला इति बहुवचननिर्देशेन द्वितीयाविधौ स्वरूपविधिर्नेति ज्ञापनात्। अत एव मासप्रमितः मुहूर्तसुखमिति
द्वितीयासमासविधावुदाहरिष्यति। मासं कल्याणीत्यादि। अकर्मकधातुभिर्योग एव देशकालादीनां कर्मसंज्ञाविधानात्। नेह कर्मणि द्वितीयेति द्वितीयाप्राप्तो नीतिभा-

कालाध्वनोरत्यन्तसंयोगे। २।३।५॥ इह द्वितीया स्यात्। मासं कल्याणी। मासमधीते। मासं गुडधानाः। क्रोशं कुटिला नदी। क्रोशमधीतो क्रोशं गिरिः
अत्यन्तसंयोगे किं। मासस्य द्विरधीते। क्रोशस्यैकदेशे पर्वतः॥ स्वतंत्रः कर्ता। १।४।५४॥ क्रियायां स्वातंत्र्येण विवक्षितो ऽर्थः कर्ता स्यात्। साधकतमं कर-
णं। १।४।४२॥ क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्। तमपग्रहणं किं। गङ्गायां घोषः। कर्तृकरणयोस्तृतीया। २।३।१८॥ अनभिहिते कर्तरि कर-
णे च तृतीया स्यात्। रामेण बाणेन हतो वाली। प्रकृत्यादिभ्य उपसंख्यानं॥ प्रकृत्या चारुः। प्रायेण याज्ञिकः। गोत्रेण गार्ग्यः। समेनैति विषमेणैति। द्विद्रोणे-
न धान्यं क्रीणाति। सुखेन दुःखेन वा यातीत्यादि। दिवः कर्म च। १।४।४३॥ दिवः साधकतमं कारकं कर्मसंज्ञं स्याच्चात्करणसंज्ञं। अक्षैरक्षान्वा दीव्यति॥ अपव-
र्गे तृतीया। २।३।६॥ अपवर्गः फलप्राप्तिस्तस्यां द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात्। अन्हा क्रोशेन वा ऽनुवाको ऽधीतः। फलप्राप्तिः किं॥
किः। मासस्य द्विरधि॥ कृत्वोर्थप्रयोगे कालेऽधिकरणे इत्यनेन षष्ठीति प्राञ्चः। तत्र शेषग्रहणानुवृत्त्या द्विरह्नो भोजनमिति कृदंतेन सह समासप्र- [॥ मासमधीतो नायातः॥]
त्तेस्स्वफलत्वात्। तस्मादिह षष्ठी शेष इति सूत्रेणैव षष्ठी भवत्यंतरंगत्वादित्याहुः। अन्यार्थमारब्धस्यापि कृत्वोर्थप्रयोग इति सूत्रस्य द्विरह्नो भुंक्त इत्यत्र विशेषविहि-
तत्वात्प्रवृत्तौ बाधकं नास्तीति केचित्। इति द्वितीया॥ ॥ स्वतंत्रः कर्ता। प्रधानीभूतधात्वर्थाश्रयत्वं स्वातंत्र्यं। आह च। धातुनोक्तक्रियेनित्यं कारके कर्तृतेष्य-
त इति। स्थाल्यादीनां वस्तुतः स्वातंत्र्याभावेपि स्थाली पचति काष्ठानि पचंतीत्यादिप्रयोगोपि साधुरेवेति ध्वनयति। विवक्षितो ऽर्थ इति। साधकतमं करणं। प्रकृष्टेति। य-
द्व्यापारानंतरं फलनिष्पत्तिस्तत्प्रकृष्टं। उक्तं च। क्रियायाः फलनिष्पत्तिर्यद्व्यापारादनंतरं। विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतं॥ विवक्ष्यत इत्यनेन स्थाल्यादीना-

म्पि करणत्वमस्तीति सूचितं। आह च। वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितं। स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यत इति। अयं भावः। कारकत्वेन व्याप्यकर्तृ
त्वादिषट्कं च वस्तुविशेषविशेषणविषयाभाववन्नियतं। किंतु वैवक्षिकं न हि गोः सर्वं प्रति गौरेव न तु कंचित्प्रत्यगौरिति वह्निः शोषणं सर्वं प्रति विशोषणमेवेति व
क्तुं शक्यं। तथा च कर्मधातुव्यक्त्या उपस्थापिते ऽर्थे किं कर्त्रादि कमिति प्रश्ने प्रकृतधात्वर्थव्यापाराश्रयतया विवक्षितः कर्ता व्यापारव्यधिकरणफलाश्र
यः कर्म। कर्तृकर्मद्वारकसंबंधेन व्यापारस्य फलस्य वा आश्रयोऽधिकरणमिति स्थितं। पच्यर्थो व्यापारश्चानेकधा। एवं च पचेरधिश्रयणतंडुलावपनैधोपकर्षण
दितात्पर्यकत्वे तदाश्रयो देवदत्तः कर्ता। ज्वलनतात्पर्यकत्वे एधाः कर्तारः। तंडुलधारणादिपरत्वे स्थाली कर्त्री। अवयवविभागपरत्वे तंडुलाः कर्तारः। स्थाल्यां पच
तीत्यत्र तृतीयोपात्तव्यापाराश्रयोपि स्थाली करणमेव न तु कर्त्री देवदत्तादिव्यापारस्यैव तद्द्वारोपात्तत्वात्। तथा आदिखादिभ्यामुपात्तेऽर्थे प्रयोज्यः कर्तेति सि-
वार्थे भक्षयतिनोपात्ते प्रयोज्यः कर्म। अधिपूर्वैः शीङ्स्थासिभिरुपात्तेऽर्थे आधारः कर्म। केवलैरुपात्ते अधिकरणमित्यादि ज्ञेयं। एतेन ज्ञानस्य स्वप्रकाशत्वे कर्तृकर्म
विरोध इति केषांचिदुक्तिः परास्ता। यद्वा नूनं ज्ञानक्रियायां यदा यस्य स्वातंत्र्यं विवक्ष्यते तेन तदा न तत्क्रियायां स कर्ता। यदुपात्तया कर्तुः क्रियया यदा आप्तुमिष्टतमत्वेन यद्विवक्ष्यते तेन त
दा तत्कारकं तत्क्रियायां कर्तेत्येवं शब्दविशेषोपाधिकस्य कर्तृत्वादेः प्रत्यक्षे उक्तिसंभवाभावात्। यत्तु केचित्परसमवेतक्रियाजन्यफलशालित्वं कर्मत्वं चेत्तर्ह्यात्मानं पश्यती
त्यादौ स्वसमवेतक्रियाजन्यविभागादिफलशालिनि कर्तर्यतिव्याप्त्यभावेप्यपादानेऽतिव्याप्तिः स्यादेव तत्तश्च धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमित्यवाभ्यु
पगम्यं। एवं च सति ग्रामं गच्छतीत्यादि सकर्मकेषु गमनजन्यसंयोगादाविष्टानुरोधेन धात्वर्थतावच्छेदकत्वाभ्युपगमेपि वृक्षात्पर्णं पततीत्याद्यकर्मकेषु पतनादिजन्य
विभागादौ तदवच्छेदकत्वाकल्पनान्नापादानेतिव्याप्तिर्न वा ग्रामं गच्छतीत्यादौ कर्तर्यतिव्याप्तिः संयोगादिफलजनकीभूतधात्वर्थस्य परसमवेतत्वविशेषणात्कर्मत्वे
नाभिमतं यत्तद्भिन्नस्य परशब्देनात्राविवक्षितत्वादित्याहुः तदप्येतेन प्रत्युक्तं। ग्रामं गमयति देवदत्तमित्यादौ गन्तर्यव्याप्तेः। णिजर्थप्रेरणाजन्यप्रयोज्यव्यापारे गम-
नादौ धात्वर्थतावच्छेदकत्वाभावात्। तत्त्वाभ्युपगमे तु देवदत्तेन पाचयतीत्यादौ प्रयोज्यकर्तर्यतिव्याप्तेः। गतिबुद्धीत्यादिशास्त्राभ्युपगमं विना क्वचित् प्रयोज्यक-
र्तरि कर्मत्वं क्वचित्तु कर्तृत्वमिति निर्द्धारयितुमशक्यत्वात्। हृक्रोरन्यतरस्यामिति शास्त्रमन्तरेण हारयति कारयति वा कटं भृत्येन भृत्यमित्यत्र वैकल्पिककर्मत्वस्य दुरु-

एवाद्यंशेषु वैय्याकरणोक्त्यैव निर्वाह इति चेन्न तर्हि आकडारादेका संज्ञा या परानवकाशा चेत्युक्तत्वान्निरवकाशया अपादानसंज्ञया सावकाशायाः कर्मसंज्ञाया बाधा
न्नोक्तातिव्याप्तिरिति किमनेन धात्वर्थतावच्छेदकेत्यादिपरिश्रमेण। स्यादेतत्। आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मनेत्यादिप्रयोगः कथं संगच्छते एकस्यैव वस्तुनो
युगपदेकक्रियानिरूपितकर्तृत्वकर्मत्वादेरसंभवात् परया कर्तृसंज्ञया कर्मकरणादिसंज्ञाया बाधात् नैष दोषः। अहंकाराद्युपाधिभेदेनात्मनोऽपि भेदमाश्रित्यात्मा
नमात्मा हन्तीत्यादिप्रयोगस्याकरे समर्थितत्वात्। ननु साधकं करणमित्येवास्तु कारकाधिकारस्य दिह कारकमिति विवर्तते साधकं कारकं हि पर्यायस्तथा चोभयोपाद
नेन प्रकर्षो लभ्यत इत्याशयेन पृच्छति। तमब्ग्रहणं किमिति। इतरस्तु कारकप्रकरणे गौणमुख्यन्याय एतत्सूत्रादन्यत्र न प्रवर्तत इति ज्ञापनाय तमब्ग्रहणमि
त्याशयेन ज्ञापनफलमुदाहरति। गंगायां घोष इति। उक्तज्ञापनानंगीकारे त्विहाधिकरणसंज्ञा न स्यात्। तिलेषु तैलं दधिनि सर्पिरित्यादौ मुख्याधारे तस्यां च रि
ताथत्वादिति भावः। अत्र व्याचख्युः। यदा च तीरधर्म आधारत्वं सामीप्यात् प्रवाहे उपचर्यते तदेदं प्रयोजनं यदा तु गंगाशब्द एव तीरे वर्तते तदा तु न प्रयोजनं ती
रस्य मुख्याधारत्वात् तत्राद्यपक्षे विभक्तिर्लाक्षणिकी द्वितीये तु प्रकृतिर्लाक्षणिकीत्यादि रामेणेति। यद्यपि विभक्त्युपस्थितानां कारकाणां क्रियां प्रति विशेषणतै
व तथापि कृदुपस्थितानां विशेष्यतैव सत्त्वप्रधानानि नामानीत्युक्तेः। धातूपस्थाप्ययोः फलव्यापारयोर्हन्यत इत्यादिकर्माख्यातसमभिव्याहारे विशेषणविशेष्य
भावव्यत्यासो भावेऽपि हन्तीत्यादिकर्तृसमभिव्याहारे व्यत्यासोऽस्त्येव तथा च रामनिष्ठो यो व्यापारो धनुराकर्षणादिस्तद्विषयीभूतो यो बाणव्यापारः शरीरभेद
नादिस्तज्जन्यप्राणवियोगाश्रयो वालीति वाक्यार्थः। वालिनं हन्ति वाली हन्यत इत्यादौ तु वालिनिष्ठः प्राणवियोगानुकूलो यः शरीरभेदनादिर्बाणव्यापारस्तद्वि
षयको रामनिष्ठधनुराकर्षणादिव्यापार इत्यर्थो बोध्यः। अत्रेदमवधेयं। फलव्यापारयोर्धातुराश्रये तु तिङः स्मृतः। फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणं। इह।
धातुः स्मृत इत्यन्वयः। वाचकत्वेनेति शेषः। आश्रये तु तिङ इति विभक्तिविपरिणामेन स्मृता इति संबध्यते। वाचकत्वेनेति पूर्ववत्। तिङ इत्युपलक्षणं द्वितीया
तृतीयादीनामपि आश्रयमात्रार्थकत्वात्। नन्वेवमाधारार्थकत्वे द्वितीयातृतीयासप्तमीनां सांकर्यं स्यात्। मैवं। निरूपकभेदेनाधारभेदात्। फलनिरूपितआ
धारभेदो द्वितीयार्थः। व्यापारनिरूपितस्तु तृतीयार्थः। स्वाश्रयद्वारा व्यापारनिरूपितः फलनिरूपितश्च सप्तम्यर्थ इति त्वभ्युपगम्यते। फले प्रधानमिति। इह न त्वयापि

कर्मकृत्समभिव्याहारे तु व्यत्यासोऽस्त्येवेति उक्तत्वात्। हरिं भजति देवदत्त इत्यादौ तु व्यापारस्य प्राधान्यमस्त्येव। प्रकृतिप्रत्ययार्थयोर्हर्याधारयोर्देवदत्तेति आख्या-
धारयोश्चाभेद इह संसर्गः। तथा च हर्याधारिका या प्रीतिस्तदनुकूल एकदेवदत्ताधारको वर्तमानो यो व्यापार इति वाक्यार्थः। न चाधारतैव वाच्येति मंतव्यं।
तन्निष्ठधर्मत्वस्याधारत्वस्य वाच्यतावच्छेदकत्वापत्त्या गौरवात्। कर्मणि द्वितीयेत्यादिसूत्रस्वरसभंगापत्तेश्च। अत एव भाष्यकारो व्याह। सुपां कर्मादयो
प्यर्थाः संख्या चैव तथा तिङामिति। अनभिहिते किं। हरिः करोति। पाचकः। कर्तरि ण्वुल्। शाब्दिकः। शब्ददर्दुरं करोतीति ठक्। कृतं विश्वं येन कृतविश्वः।।
विश्वकर्मकृत्याश्रय इत्यर्थः। जीवंत्यनेनेति जीवनः करणे ल्युट्। प्रकृत्यादिभ्य इति। आकृतिगणोयं। तेन नाम्ना सुतीक्ष्णश्चारित्रेण दांत इत्यादि सिद्धं। चारु-
रिति। सुभिक्ष इत्यर्थः। क्रियाया अश्रवणात्। कर्तृकरणयोरभावात् षष्ठी ह प्राप्ता। एतच्च गम्यमानकरोतिक्रियाकरणत्वात्सिद्धं। करणेन रम्यतासा यहि प्र-
कृतेरेव करणत्वं विवक्षितं स्वभावेनायमभिरूपः कृतो न त्वलंकारादिनेत्यर्थात्।। प्रायेण याज्ञिक इति। एतदपि गम्यमानज्ञानक्रियां प्रति करणत्वा-
त्सिद्धं। आधारादिकाकुत्स्नेन याज्ञिकोयमिति जने ज्ञायत इत्यर्थात्। गोत्रेण गार्ग्य इति। गार्ग्योऽस्य गोत्रमित्यर्थः। प्रथमात्र प्राप्ता गोत्रेणाहं ज्ञाये इत्यर्था-
त् इहापि तृतीया सिद्धा। समेनेत्यादि। सममेतीत्याद्यर्थे समविषमाभ्यां कर्मणि द्वितीया प्राप्ता। इहापि तृतीया सिद्धा। पथोपि गमने करणत्वाभ्युपगमात्। द्वि-
द्रोणेनेति। द्वयोर्द्रोणयोः समाहारो हि द्रोणं। पात्रादित्वात् स्त्रीत्वाभावः। द्रोणद्वयसंबंधि धान्यमित्यर्थः। इह षष्ठी प्राप्ता। द्विद्रोणपरिमितधान्यार्थमूल्ये द्विद्रो-
णशब्दस्य चक्रयं प्रति करणत्वमितीहापि तृतीया सिद्धेति दिक्। चादिति। करणशब्दानुवृत्त्या परिक्रयणे संप्रदानमन्यतरस्यामित्युत्तरसूत्रस्थान्यतरस्यां
ग्रहणापकर्षेण न वा संज्ञयोः पर्यायत्वे लब्धे च ग्रहणं समुच्चयार्थं। तेन मनसा दीव्यतीति मनसा देव इत्यत्र कर्मण्यण् करणे तृतीया चोभयं युगपत्सिध्यति।
मनसः संज्ञायामित्यलुक्। किंच। अक्षैर्दीव्यते देवदत्तेनेत्यत्र सकर्मकत्वात् अणिकर्तुर्णौ गतिबुद्धीत्यनेन कर्मत्वं न। अणावकर्मकादिति परस्मै-
पदमपि न भवति। ननु कर्मकरणसंज्ञासमावेशस्य मनसा देव इत्यत्र कृतार्थत्वात् दीव्यतीत्यत्र परत्वात्तृतीयैव स्यान्न तु द्वितीयेति चेदत्राहुः। कार्यकाल-
पक्षे कर्मणि द्वितीयेत्यत्र परस्योपस्थानं तस्यानवकाशत्वान्न द्वितीयेति। स्यादेतत्। दीव्यंते अक्षा इत्यत्राभिहितेपि कर्मणि करणत्वस्यानभिधानात्तृतीया स्यात्

तथादेवनाक्षसारस्वत्रस्फुटांकरणत्वस्याभिधानेपि कर्मत्वानभिधानात् द्वितीया स्यादेव॥ एकैव ह्यत्र शक्तिः संज्ञाद्वयोपयोगिनी तथा चैकस्यांशक्तावभिहितायामन्यस्या अप्यभिधानादुभयत्राप्यभिधानमेव न त्वनभिहितत्वं॥ ॐ ॥ सहयुक्तेति। सहेनाप्रधान इत्यत्र वाच्ये युक्तग्रहणं दर्थग्रहणमित्याह। सहार्थेनेति। सहार्थकशब्देन सह साकं सार्धमित्यादिनेत्यर्थः। पुत्रेणेति। पितुरेवागमनक्रियासंबंध इत्यर्थः। पुत्रस्य तु तादर्थ्यमित्येतावतैव तस्याप्राधान्यमुच्यते। अप्रधानग्रहणं त्यक्तुं शक्यं। न चैवं पितुरपि तृतीया स्यादिति वाच्यं। तत्र प्रातिपदिकार्थमात्रे अंतरंगत्वात्प्रथमोपपत्तेः। न च यत्र प्रथमा न प्राप्नोति पुत्रेण सह पितुरागमनमित्यादौ तत्र प्रधाना

सहयुक्तेऽप्रधाने।२।३।१९॥ तृतीया स्यात्। पुत्रेण सहागतः पिता। एवं साकंसार्द्धंसमंयोगेऽपि। विनापि तद्योगं तृतीया। वृद्धो यूना इत्यादिदर्शनात्।
येनाङ्गविकारः।२।३।२०॥ येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततस्तृतीया स्यात्। अक्ष्णा काणः। अक्षिसम्बन्धिकाणत्वविशिष्ट इत्यर्थः। अङ्गविकारः किं। अक्षि काणमस्य। इत्थंभूतलक्षणे।२।३।२१॥ कञ्चित्प्रकारं प्राप्तस्य लक्षणे तृतीया स्यात्। जटाभिस्तापसः। जटाज्ञाप्यतापसत्वविशिष्ट इत्यर्थः। संज्ञोऽन्यतरस्यां कर्मणि।२।३।२२॥ सम्पूर्वस्य जानातेः कर्मणि तृतीया वा स्यात्। पित्रा पितरं वा संजानीते॥ हेतौ।२।३।२३॥ हेत्वर्थे तृतीया स्यात्। द्रव्यादिसाधारणं निर्व्यापारसाधारणं च हेतुत्वं। करणत्वं तु क्रियामात्रविषयं व्यापारनियतं च। दण्डेन घटः। पुण्येन दृष्टो हरिः। फलमपीह हेतुः। अध्ययनेन वसति। गम्यमानापि क्रिया विभक्तौ प्रयोजिका॥ अलं श्रमेण। श्रमेण साध्यं नास्तीत्यर्थः। इह साधनक्रियां प्रति श्रमः करणम्। शतेन शतेन वत्सान्पाययति पयः। शतेन परिच्छिद्येत्यर्थः। अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया। दास्या संयच्छते कामुकः। धर्म्ये तु भार्यायै संयच्छति।

२१ न पितुरपि तृतीया स्यात् अतस्तद्वा

रणाय अप्रधानग्रहणमावश्यकमिति न वाच्यं। कारकविभक्तेर्बलीयस्त्वात् कर्तृकर्मणोः कृतीति षष्ठ्या एव तत्र प्रवृत्तेरिति दिक्। येनाङ्ग। येनेति सर्वनाम्ना प्रकृतार्थभूतो वयव एव गृह्यते सन्निधानात्। स चार्थाद्विकृत एव। न त्वविकृतेनावयवेन शरीरस्य विकारः संभवतीत्येतदाह॥ येनाङ्गेन विकृतेनेति। अङ्गिन इति। सूत्रे गशब्दोऽङ्गिप द्यजं न इति भावः। जटानामित्थंभूतलक्षणत्वमुपपादयति। जटाज्ञाप्येति। जटाभिर्ज्ञाप्यं यत्तापसत्वं तद्विशिष्ट इत्यर्थः। संज्ञो। ज्ञा अवबोधने इत्ययमेव गृह्यते। गृह्यते

प्रादुर्भाव इति तस्याकर्मकत्वात्। उः सः प्राम्भागस्य तृ इत्यस्यालोपेन इत्यलोपेन निष्पन्नतया लाक्षणिकत्वाच्चेत्याशयेनाह। जानातेरिति। संजानीत इति। संप्रतिभ्यामनाध्याने इ
ति तङ्। कृद्योगपरत्वात् कर्तृकर्मणोः कृतीति षष्ठ्येव पितुः संजानाः। आध्याने तु पित्रा पितरं वा संजानाति। हर इत्यस्त्वाह। आध्यानपरत्वादधीगर्थेति षष्ठी। मातुः संजानातीति। तत्र
तत्र शेषाधिकारात् दिनिमनोरमायां स्थितं। हेतौ। हेतुरिह लौकिकः फलसाधनीभूतो गृह्यते। न तु तत्प्रयोजको हेतुश्चेति कृत्रिमः। तस्य च कारणकर्तृसंज्ञाविधानात् कर्तृ
त्वादेव तृतीयासिद्धेरत आह। हेत्वर्थ इत्यादि। ननु लौकिकहेतोरपि करणत्वादेव तृतीयासिद्धौ किमनेनेत्याशंक्य हेतुत्वकरणत्वयोर्भेदमाह। द्रव्यादीति। अत्र हेतुशब्देन गु
णक्रियेयग्राह्य द्रव्यगुणक्रियानिरूपितं निर्व्यापारसव्यापारवृत्ति च यत्तद्धेतुत्वमित्यर्थः। करणत्वं त्विति। क्रियामात्रनिरूपितं व्यापारवद्वृत्ति च यत्तत्करणत्वमित्यर्थः। एवं च
हेतुकरणयोर्भेदादन्यतरेणान्यस्यान्यथासिद्धिर्न शंक्येति भावः। उक्तं च। द्रव्यादिविषयो हेतुः कारकं नियतक्रियं। अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्यत इति। द्रव्यविषये हेतु
त्वमुदाहरति। दंडेन घट इति। दंडहेतुको घट इत्यर्थः। अत्र हि व्यापारोऽस्तु वा मास्तु साक्षात्क्रियान्वयित्वाभावान्न करणत्वं नास्तीति भावः। क्रियाविषये उदाहरणमाह।
पुण्येन दृष्ट इति। पुण्यशब्देनेह परमापूर्वमुच्यते। तस्य च हरिदर्शनरूपक्रियान्वयित्वसंभवेऽपि व्यापारवत्त्वाभावान्न करणत्वमिति भावः। यदा यागादिकमेव पुण्य
शब्देन विवक्ष्यते तदा तस्य व्यापारवत्त्वमस्त्येवेति कर्तृकरणयोरित्यनेनैव तृतीयासिद्धा। गुणविषये तु पुण्येन गौरवर्ण इत्याद्युदाहार्यं। जटाभिस्तापस इत्यादौ तु लक्ष
लक्षणभावविवक्षायां हेतुत्वाविवक्षणादनेनाप्राप्ता तृतीये इत्थंभूतलक्षण इत्यारब्धमित्याहुः। अत्र केचिदुत्प्रेक्षंते। द्रव्यादिसाधारणत्वाद्धेतुत्वस्य हेत्वा
वित्यनेनैव बाणेन हत इत्यादिप्रयोगसिद्धेः कर्तृकरणयोरिति सूत्रे करणग्रहणं त्यक्तुं शक्यं। करणसंज्ञा तु आवश्यकी करणाधिकरणयोश्चेत्याद्यर्थमिति। अ
न्ये तु। क्रियासाधकतमं यत्र व्यापारवत्त्वेन विवक्षितं चेत्करणं नो चेद्धेतुः। द्रव्यसाधकतमस्य दंडादेस्तु व्यापारवत्त्वेऽपि हेतुत्वमेव। एवं च रामेण बाणेन हत इत्यादौ
हनने बाणस्य हेतुर्निमित्तमित्येतावदेव यदा विवक्ष्यते तदा हेतावित्यनेनैव तृतीया। बाणव्यापारसाध्यप्राणवियोगाश्रय इत्येवं व्यापाराविष्टत्वेन विवक्षायां तु हेतु
त्वाविवक्षणात् कर्तृकरणयोरिति करणे तृतीया आरब्धेत्याहुः। फलमपीति। एतच्च प्रत्यय इति सूत्रे कैय्यटे स्पष्टं। अध्ययनेनेति। तादर्थ्यविवक्षायां तु चतुर्थ्यपि
भवतीति चतुर्थ्या सह ये तृतीया विकल्प्यते। अध्ययनाय वसति। अत्र केचित्परिष्कुर्वंति। अध्ययनेन वसतीत्यत्र दंडहेतुको घट इतिवदध्ययनहेतुको निवास

इत्यर्थस्वीकारे ऽप्ययं विशेषः। अध्ययनस्य फलेन महाभेदः संमृतः उपकारकत्वेन सह निरूपकता। ततश्च फलाभिन्नाध्ययननिरूपितोपकारकत्वाश्रयनिवसनानुकू
लो व्यापार इत्यर्थः। दंडेन घट इत्यत्र तु दंडनिष्ठोपकारकत्वनिरूपितोपकार्यत्वाश्रयो घट इत्यर्थः। उपकार्ये हि साध्यं फलमपि तदेवेति। गम्यमानापीति। अपिशब्देन श्रू
यमाणक्रियासमुच्चीयते न केवलं श्रूयमाणैव क्रिया विभक्तौ प्रयोजिका किंतु गम्यमानापीति भावः। साधनेति। साध्यमित्यत्र प्रकृतिभूतो यो धातुस्तदर्थं प्रतीति॥
भावः। अभिप्रैति। एतच्च दाणश्च सा चेच्चतुर्थ्यर्थ इत्यनेन ज्ञाप्यत इति मनोरमायां स्थितं। केचिदिह परिष्कुर्वंति। अशिष्टव्यवहार इत्यंशे वा च निक एवा अन्यांशे तु ज्ञापक
सिद्धमिति। दास्याः संयच्छते इति। दाण्श्च सा चेदिति तङ्। पाघ्राध्मेति यच्छादेशः। कामुक इति। लषपतपदेत्यादिना कमेरुकञ्। इति तृतीया॥ ॥ कर्मणा। महासंज्ञा
करणमन्वर्थसंज्ञाविधानार्थं। सम्यक् प्रदीयते यस्मै तत्संप्रदानमिति अत एवाह। दानस्येति। दानक्रियाकर्मणा कर्त्ता यमभिप्रैति संबध्नातीत्यस्मात्तिवा ततः कारकं सं

कर्मणा यमभिप्रैति स सम्प्रदानम्। १।४।३२। दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः स्यात्॥ चतुर्थी सम्प्रदाने। २।३।१३॥ विप्राय गां
ददाति। अनभिहित इत्येव। दानीयो विप्रः। क्रियया यमभिप्रैति सो ऽपि सम्प्रदानम्॥ पत्ये शेते। कर्म्मणः करणसंज्ञा सम्प्रदानस्य च कर्म्मसंज्ञा
पशुना रुद्रं यजते। पशुं रुद्राय ददातीत्यर्थः॥ रुच्यर्थानां प्रीयमाणः। १।४।३३॥ रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणो ऽर्थः सम्प्रदानं स्या
त्। हरये रोचते भक्तिः अन्यकर्तृको ऽभिलाषो रुचिः॥ हरिनिष्ठप्रीतेर्भक्तिः कर्त्री। प्रीयमाणः किं। देवदत्ताय रोचते मोदकः पथि॥ ॥

प्रदानसंज्ञकमित्यर्थः। तेन अजां नयति ग्रामं। हस्तं निदधाति हस्ते इत्यादौ नातिप्रसंगः। दानं चापुनर्ग्रहणाय स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनं। अ... स्व... जकस्य
वस्त्रं ददातीत्यादौ न भवति। तत्र हि ददातिर्भाक्तः एतच्च वृत्तिमतं। भाष्यमते तु नान्वर्थतायामाग्रहः। खंडिकोपाध्यायः शिष्याय चपेटां ददाति इत्यादिप्रयोगात्। र
जकस्य ददातीति प्रयोगस्तु शेषत्वविवक्षायां भविष्यति। न चैवमजां नयति ग्राममित्यादावतिप्रसंगः शंक्यः। अजां प्रति ग्रामस्य शेषित्वाभावात्। यमभिप्रैतीत्युक्त्या
ह्रियमिति निर्दिष्टस्य शेषित्वं कर्मणश्च शेषत्वं लभ्यते। ग्रामं प्रति तु विप्रस्य शेषित्वमस्तीति भवति तस्य संप्रदानसंज्ञा अत्र अभिप्रैतीत्यनन्यदित्ययं न तु समासः। उदात्ते ऽनागतमि
त्याचाति ङागतेः समासो वक्तव्य इति वार्तिकस्य छंदोविषयत्वादिति हरदत्तः भाषाविषयत्वे तु यत्प्रकृत इत्यादौ समासत्वात् सो ऽरुत्पत्तिः स्यात्। लिंग... वेनामतपुं

सि॰ कौ॰ टी॰ त॰ १३०

दानस्यानर्थत्वान्नादर्थ्ये चतुर्थीसिद्धेः किमनया संप्रदानसंज्ञयेति चेत् एवं॥

सकृतामभ्युपेत्य स्त्रमो नर्पुसकादिति लुकि कृतेऽपि ह्रस्वो नपुंसक इति ह्रस्वः स्यात्। यत्प्रकृतिरिन्नित्यत्र तु न लोपः स्यात् तस्मादुक्तवार्त्तिकस्वच्छन्दो विषयत्वं युक्तमेव। दानीय
इति। बाहुलकात्संप्रदाने अनीयर्। क्रियये ति। क्रियायाः कृत्रिमकर्मत्वाभावान्न तया अभिप्रेयमाणस्य सूत्रेण संज्ञा न प्राप्नोतीति वचनं। एतच्च क्रियाग्रहणं यद्युपपदस्य च
कर्मणि स्यादिति न स्यादित्येतन्न सिद्धं। पत्ये शेते इत्यादौ पतिमनुकूलयितुं शेते इत्याद्यर्थाभ्युपगमे बाधकाभावात्। भाष्यकारमते तु कर्मणा यमभिप्रैतीति सूत्रेणैव सिद्धं। संद
र्शनप्रार्थनाध्यवसायैराप्यमानत्वात् क्रियापि कृत्रिमं कर्मेति तेन हि क्तत्वात्। न चैवमप्यददातीति कर्मत्वात् क्रियया यमभिप्रैतीत्येतद्वचनं कर्तव्यमेवेति वाच्यं। भाष्ये अ
न्वर्थसंज्ञात्वास्वीकारात्। नन्वेवं कटं करोति ओदनं पचतीत्यादावपि संप्रदानत्वप्रसंगस्तथा च वचनद्वयबलात् कर्मसंप्रदानयोः पर्यायत्वे कटाय करोतीत्याद्यनिष्टप्रयो
गोऽपि स्यादिति चेदत्राहुः॥ पत्ये शेते इत्यकर्मकस्थले सावकाशया संप्रदानसंज्ञया निरवकाशया कर्मसंज्ञया बाधितत्वान्नैवानिष्टप्रसक्तिः। न चैवं मत्यर्थकर्मणि
द्वितीयाचतुर्थ्याविति सूत्रमावश्यकमेवेति तत्प्रत्याख्यानं भाष्यस्थं न संगच्छत इति वाच्यं। भाष्ये तत्प्रत्याख्यानस्य प्रौढिवादमात्रत्वादित्यादि स्यादेतत्। दानक्रिया

श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः १।४।३४॥ एषां प्रयोगे बोधयितुमिष्टः संप्रदानं स्यात्। गोपी स्मरात् कृष्णाय श्लाघते। ह्नुते। तिष्ठते। शपते वा। ज्ञी

र्थे हि संप्रदाने न तु दानक्रिया तदर्था। कारकाणां क्रियार्थत्वात्। कर्मणः करणसंज्ञेत्यादिरिहाँ द समेतत्। अत एव ॥ ज्ञीप्स्यमानः किं॥ देवदत्ताय श्लाघते पथि॥
वसुवृत्त्यर्थे नसिद्धत्वादिति प्रत्याख्यापने। इच्छार्थानां परिचरयेयिषां तेऽ इच्छार्थासेवां प्रीयमाण इति। प्रीञ् तर्पणे अस्मात्कर्मणि लट्। हरये रोचत इति। हरिं प्री
णयतीत्यर्थः। कर्मसंज्ञायां प्राप्तायां वचनं। यद्यपि हरिर्दीप्तः [illegible] तेन यापि हरौ दीप्तिर्नविवक्षितेत्याह। अन्यकर्तृकोऽभिलाष इति। अत एवादित्यो रोचते इत्यत्र
स्वरदीप्त्यर्थसत्वान भवतीहा [illegible] एतेन अन्यकर्तृकत्वमिह [illegible] यथान्यकर्तृकत्वमित्युक्तं भवति। मोदकः पथीति। देवदत्तस्यैव प्रीयमाणत्वं न तु पथ इति न तस्य संप्रदानत्वं॥
प्रीयमाणपदाभावे तु पथ्यापि स्यादिति भावः॥ ॥ श्लाघह्नुङ्। श्लाघ कत्थने। ह्नुङ् अपनयने। ष्ठा गतिनिवृत्तौ। शप उपालंभे। कृष्णाय श्लाघत इति। कृष्णं स्तौतीत्यर्थः।
कर्मत्वे प्राप्ते वचनमिदं। अन्ये त्वाहुः कृष्णाय आत्मानं परं वा श्लाघ्यं ज्ञापयतीत्यर्थ इति। अस्मिन् पक्षे शेषषष्ठ्यां प्राप्तायां वचनं। ह्नुत इति। सपत्नीभ्यः कृष्णं ह्नुवाना तमे
वार्थं कृष्णं बोधयतीत्यर्थः। यस्य कस्यचित् स्तुतिं बोधयन्तीति वा। तिष्ठत इति। स्थित्या स्वाभिप्रायं कृष्णं बोधयतीत्यर्थः। प्रकाशनस्थेयाख्ययोश्चेति तङ्। शपत इति। उपाल

धारेरुत्तमर्णः। धृङ् अवस्थाने। हेतुमण्ण्यन्तः। उत्तमर्णो धनस्वामी। उ[illegible]क्तः। ऋणम्। ऋणमाधमर्ण्ये इत्यत्र व्यवहारविशेषोपलक्षणार्थमाधमर्ण्यग्रहणमिति व्याख्यानादुत्तमर्णे
ऽपि निष्ठानत्वं भवति। अस्मादेव निपातनादक्कवृत्ती हि निष्ठान्तस्य निपातो बोध्यः। भक्ताय इत्यादि। इह भक्त उत्तमर्णो हरिरधमर्णः। धृङो कर्मकत्वाण्णौ कर्तुर्मोक्षस्य णौ
कर्मत्वात्प्राप्ते धारयतिर्योगे मरूतिपरत्वादिहाप्यधिकरणसंज्ञा भविष्यतीति चेदुत्तमर्णेऽपि तर्हि हेतुसंज्ञा स्यादिति हरदत्तः। तन्न। श्वोत्तमर्णग्रहणाभावे हेतुसंज्ञाया इवाधिकरणस्य
संज्ञाया अप्ययमपवादः स्यात्। तद्वारणाय उत्तमर्णग्रहणमिति भावः। एवं चक्तेऽप्युत्तमर्णग्रहणेन तत्प्रयोजको हेतुश्चेति हेतुसंज्ञायां प्राप्तायां न द्वधनार्थमिदं संप्रदा
नसंज्ञावचनमिति निष्कर्षमाहुः। मनोरमायां तु षष्ठ्यां प्राप्तायां इदं वचनमिति स्थितं। स्पृहेरीप्सितः। स्पृह ईप्सायां चुरादावदन्तः। तेन स्पृहयतीत्यत्र लघूपधगुणोऽप्राप

धारेरुत्तमर्णः। १।४।३५॥ धारयतेः प्रयोगे उत्तमर्ण उक्तसंज्ञः स्यात्। भक्ताय धारयति मोक्षं हरिः॥ उत्तमर्णः किं। देवदत्ताय शतं धारयति ग्रा
मे। स्पृहेरीप्सितः। १।४।३६। स्पृहयतेः प्रयोगे इष्टः सम्प्रदानं स्यात्। पुष्पेभ्यः स्पृहयति। ईप्सितः किं। पुष्पेभ्यो वने स्पृहयति। ईप्सितमात्रे
इयं संज्ञा। प्रकर्षविवक्षायां तु परत्वात्कर्मसंज्ञा। पुष्पाणि स्पृहयति। क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः। १।४।३७॥ क्रुधाद्यर्थानां प्र
योगे यं प्रति कोपः स उक्तसंज्ञः स्यात्। हरये क्रुध्यति। द्रुह्यति। ईर्ष्यति। असूयति। यं प्रति कोपः किं। भार्यामीर्ष्यति। मैनामन्योऽद्राक्षीदिति। क्रो
धोऽमर्षः। द्रोहोऽपकारः। ईर्ष्याऽक्षमा। असूया गुणेषु दोषाविष्करणं। द्रुहादयोऽपि कोपप्रभवा एव गृह्यन्तेऽतो विशेषणं सामान्येन यं प्रति कोप इति

रत्वादिति। तेन परत्वेन स्पृहणीयशोभं। स्पृहणीया गुणा महात्मभिरित्यादौ कर्मण्यनीयर् सिध्यति। शेषत्वविवक्षायां तु कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च [illegible] षष्ठ्यपि
ध्यतीति हरदत्तादयः। वाक्यपदीयहेलाराजीयग्रन्थयोस्तु स्पृहयतियोगे कर्मसंज्ञायाः शेषषष्ठ्याश्च बाधिकेयं संप्रदानसंज्ञेति स्थितं। युक्तं चैतत्। किं पयायमभिप्रेतीत्यनेन
विष्टसिद्धेः। स्पृहेरीप्सित इत्येतत्सूत्रस्य हरदत्तादिमते वैयर्थ्यप्रसंगात्। तस्माद्वाक्यपदीयादिग्रन्थानुरोधेन परत्वेन स्पृहणीयशोभमित्यादौ दानीयो विप्र इतिवत्त्वा
हुलकात्संप्रदानेऽनीयर् इति व्याख्येयं। कुमार्य इव कान्तस्य त्रस्यन्तीत्येतदर्थतया कृतार्थस्य कान्तस्येति षष्ठ्यन्तस्य विभक्तिविपरिणामेन कान्ताय स्पृहयन्तीति व्या
ख्येयमिति केचित्॥

सु·
सि·कौ·
टी·त·
१३९

क्रुधद्रुह। क्रुध क्रोधे। द्रुह जिघांसायां। ईर्ष्य ईर्ष्यायां। असूयतिः कण्ड्वादियगन्तः। एषामर्थ इवार्थो येषां तेषां धातूनामित्यर्थः। द्रोहोऽपकार इति। द्रुह द्रोहे इति पाठो भे
प्रायेणोक्तं जिघांसा द्रोह एवेत्यर्थतोऽनुभाषणं वा। असहमेति। परसंपत्त्यसहनमित्यर्थः। क्रुधद्रुहोरकर्मकत्वात्तद्योगे षष्ठी प्राप्ता। अन्ययोस्तु सकर्मकत्वाद्द्वितीया प्रा
प्ता। ननु चित्तदोषार्थानामित्येवास्तु किं क्रोधादीनां विशिष्योपादानेनेति चेत्। अत्राहुः हेयादाविति प्रसंगवारणाय विशिष्योपादानं तेन योऽस्मान्द्वेष्टि यं च वयं द्विष्म इ
त्यत्र चतुर्थी न भवति। तत्रत्यनभिनन्दनं द्विषेरर्थः। अत एवाचेतनेष्वपि द्विषधातुः प्रयुज्यते। ओषधं द्वेष्टीति। कोपप्रभवा एवेति। कथं तर्हि कुप्यसि कस्मैचिन्नर

क्रुधद्रुहोरुपसृष्टयोः कर्म्म। १।४।३८॥ सोपसर्गयोरनयोर्यं प्रति कोपस्तत्कारकं कर्म्मसंज्ञं स्यात्। क्रूरमभिक्रुध्यति अभिद्रुह्यति। राधी
क्ष्योर्यस्य विप्रश्नः। १।४।३९॥ एतयोः कारकं सम्प्रदानं स्यात्। यदीयो विविधः प्रश्नः क्रियते। कृष्णाय राध्यति ईक्षते वा। पृष्टो गर्गः शुभाशुभम
र्य्यालोचयतीत्यर्थः। प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्ता। १।४।४०॥ आभ्यां परस्य शृणोतेर्योगे पूर्वस्य प्रवर्त्तनरूपव्यापारस्य कर्त्ता सम्प्रदानं स्यात्। वि
प्राय गां प्रतिशृणोति। आशृणोति वा। विप्रेण मह्यं देहीति प्रवर्त्तितस्तस्मै प्रतिजानीत इत्यर्थः। अनुप्रतिगृणश्च। १।४।४१॥ आभ्यां गृणातेः कारकं पू
र्वव्यापारस्य कर्त्तृभूतमुक्तसंज्ञं स्यात्। होत्रेऽनुगृणाति प्रतिगृणाति। होता प्रथमं शंसति तमध्वर्युः प्रोत्साहयतीत्यर्थः। परिक्रयणे सम्प्रदानम
न्यतरस्याम्। १।४।४४॥ नियतकालं भृत्यास्वीकरणं परिक्रयणं तस्मिन्साधकतमं कारकं सम्प्रदानसंज्ञं वा स्यात्। शतेन शताय वा परिक्रीतः।
तादर्थ्ये चतुर्थी वाच्या। मुक्तये हरिं भजति। क्लृपि सम्पद्यमाने च। भक्तिर्ज्ञानाय कल्पते सम्पद्यते जायते। इत्यादि। उत्पातेन ज्ञापिते च। वाता
य कपिला विद्युत्। हितयोगे च। ब्राह्मणाय हितं॥ ॥

ति। नहि कोपः कोपप्रभवः। अत्र व्याचख्युः। कुपिरत्र द्रोहार्थ इति पत्येशो तेरर्थिवत्क्रि
यया यमित्येव सिद्धे क्रुधद्रुहोर्ग्रहणं चिन्त्यप्रयोजनमित्याहुः। राधीक्ष्योः। राध संसिद्धौ। ईक्ष दर्शने। अनयोस्त्विह शुभाशुभपर्यालोचनमर्थस्तच्च प्रश्नपूर्वकमित्याशयेन वि
वृणोति। पृष्टो गर्ग इति। शुभाशुभरूपयोः कर्मणोः धात्वर्थेनोपसंग्रहादकर्मकावेतौ। अत एव राध्यतीति श्यन् राधोऽकर्मकाद्वृद्धावेवेति दिवादि श्रुवश्यमात्तेन गणसू
त्रेण कर्मकादेव तद्विधानात्। कृष्णसंबंधि शुभाशुभमित्यर्थाऽपगमात् षष्ठ्यां प्राप्तायां वचनमिदं। अनुप्रतिगृण इति। शंसतेरनुकरणशब्दात्षष्ठी। प्रत्याङ्

ध्यामिति पूर्वं तु द्विवचननिर्देशान्न प्रत्येकमेव धातुसंबंध इति निर्द्धारितं तत्राह चर्यादिह्रापि प्रत्येकमेव धातुसंबंध इति सूचयन्नाह। आभ्यां गृणन्तोरेति। होत्रे इति। कर्म
त्वमात्रेवचनी। परिक्रयणे। द्रव्यदानेनात्यंतस्वीकारः क्रयः। तस्य समीपं परिशब्द आचष्टे अनियतकालमनुक्रयणं तत्परिक्रयणं तस्य न्यूनकालत्वादित्याशयेनाह। नियते
ति। भृत्यावेतनादिना। तादर्थ्य इति। तस्मै कार्यायेदं तदर्थं कारणं तस्य भावस्तादर्थ्यं। ब्राह्मणादित्वात्ष्यञ्। कृत्तद्धितसमासेभ्यः संबंधाभिधानं भावप्रत्यये नेति सिद्धा
न्तात्ष्यञ्। असंबंधोऽभिधीयते स च संबंधोऽनेकविधो न तु कार्यकारणभाव एव तेन ब्राह्मणयद्धीत्याद्यपि सिद्धं। ब्राह्मणस्य जन्यत्वेपि तत्संस्कार्यत्वात्। नचैवं
यूपाय दारु इत्यपि चतुर्थी स्यादिति शंक्यं संबंधस्य हि नित्यत्वेपि षष्ठीव द्विशेषणादेव भवतीत्याकरे अभ्युपगमात्। एवं यूपाय दारु इत्यत्र दारुरूपाद्वार्यपि न भवति। भ
वितौ विजितत्तृतीयापि षष्ठी किं स्वरूपं भवतीति वसोपी हन भवति। किंतु प्रातिपदिकार्थे प्रथमैव। न चैतद्वार्तिकस्यावश्यकत्वे चतुर्थी संप्रदाने इति सूत्रं व्यर्थमिति भ्र
मितव्यं। हरये रोचते इत्याद्यर्थं तस्यावश्यकत्वात्। विप्राय गामित्यत्रापि तादर्थ्ये चतुर्थ्याः प्राप्तिर्नास्तीति प्रागेवोक्तत्वाच्चेति दिक्। क्लृपि। संपद्यादित्वाद्भावे
क्विपि तद्गतात्सप्तमी संपत्तिरिहाभूतप्रादुर्भावः। क्लृप्यर्थकधातुप्रयोगे यः संपद्यते तत्र चतुर्थी विकारवाचकाच्चतुर्थीत्यर्थः। स हि संपद्यते तादृग्भवतीति तदु
दाहरति। भक्तिर्ज्ञानायेति। ज्ञानात्मना परिणमत इत्यर्थः। प्रकृतिविकृत्योर्भेदविवक्षायां विकृतिवाचकाच्चतुर्थी। अभेदविवक्षायां तु परत्वात्प्रथमैव भ
क्तिर्ज्ञानं कल्पत इति। यदा तु जनिकर्तुरिति भक्तेरपादानत्वं विवक्ष्यते तदापि ज्ञानस्याभिहितकर्तृत्वात्प्रथमैव भक्तेर्ज्ञानं कल्पते। क्लृपीत्यर्थग्रहणमि
त्याशयेनाह। संपद्यत इत्यादि॥ यद्यपि तादर्थ्ये चतुर्थ्यैव भक्तिर्ज्ञानायेत्यादिप्रयोगाः सिध्यन्ति तथापि परिणमत्वप्रकारकबोधार्थमिदं वचनमित्याहुः॥
प्राणिनां शुभाशुभसूचको भूतविकार उत्पातः तेन ज्ञापिते अर्थे वर्तमानाच्चतुर्थी वाच्येत्यर्थः। वातायेति। वातस्य ज्ञापिकेत्यर्थः। हितेति। चतुर्थी समासविधा
नात्तज्ज्ञापकादेतल्लभ्यमिति भावः। एवं सुखयोगेपि चतुर्थी बोध्या॥

सु॰
सि॰कौ॰
टी॰त॰
१३२

क्रियार्थोपपदाक्रियाअर्थःप्रयोजनंयस्याःसाक्रियार्थासाक्रियार्थाक्रियाउपपदंयस्य।यद्यपिक्रियायाउपपदत्वंनसंभवतितथापीहस्ववाचकशब्दद्वारातं
द्बोध्यं।क्रियाफलकक्रियावाचकमित्यर्थः।क्रियावाचकस्यापिधातोरुपोच्चारितपदरूपो पपदत्वंयद्यपिनसंभवतिसुप्तिङंतस्यैवपदत्वात्तथापीहक्रियावा
चकप्रकृतिकमित्यर्थोविवक्षितः।तादृशमुपपदंयस्यतुमुन्नंतस्यतस्यकर्मणिचतुर्थीभवतीतिनिष्कृष्टोर्थः।तुमुन्ण्वुलौक्रियायांक्रियार्थायामितिसूत्र

क्रियार्थोपपदस्यचकर्मणिस्थानिनः।२।३।१४॥क्रियार्थाक्रियाउपपदंयस्यतस्यस्थानिनोऽप्रयुज्यमानस्यतुमुनः।कर्मणिचतुर्थी
स्यात्।फलेभ्योयाति।फलान्याहर्तुंयातीत्यर्थः।नमस्कुर्मोनृसिंहाय।नृसिंहमनुकूलयितुमित्यर्थः।एवंस्वयम्भुवेनमस्कृत्येत्यादावपि।तु
मर्थाच्चभाववचनात्।२।३।१५।भाववचनाच्चेतिसूत्रेणयोविहितस्तदन्ताच्चतुर्थीस्यात्।यागाययाति।यष्टुंयातीत्यर्थः।नमःस्वस्तिस्वा
हास्वधाऽलंवषड्योगाच्च।२।३।१६॥एभिर्योगेचतुर्थीस्यात्।हरयेनमः।उपपदविभक्तेःकारकविभक्तिर्बलीयसी।नमस्करोतिदेवान्।प्र
जाभ्यःस्वस्ति।अग्नयेस्वाहा।पितृभ्यःस्वधा।अलमितिपर्याप्त्यर्थग्रहणं।तेनदैत्येभ्योहरिरलंप्रभुःसमर्थःशक्तइत्यादि।प्रभ्वादियोगे
षष्ठ्यपिसाधुः।तस्मैप्रभवति।सएषांग्रामणीरितिनिर्देशात्।तेनप्रभुर्बुभूषुर्भुवनत्रयस्येतिसिद्धं।वषडिन्द्राय।चकारःपुनर्विधाना
र्थः।तेनाशीर्विवक्षायाम्परामपि।चतुर्थीचाशिषीतिषष्ठीम्बाधित्वाचतुर्थ्येवभवति।स्वस्तिगोभ्योभूयात्।मन्यकर्मण्यनादरेविभाषाऽ
प्राणिषु।२।३।१७।प्राणिवर्जेमन्यतेःकर्मणिचतुर्थीवास्यात्तिरस्कारे।नत्वांतृणंमन्येतृणायवा।श्यनानिर्देशात्तनादिकयोगेन।नत्वा
तृणंमन्वे।अप्राणिष्वित्यपनीयनौकाकान्नशुकशृगालवर्ज्येष्वितिवाच्यं।तेननत्वांनावंअन्नंमन्येइत्यत्राप्राणित्वेऽपिचतुर्थीन।नत्वां
शुनेश्वानंवामन्येइत्यत्रप्राणित्वेऽपिभवत्येव॥ ॥९ महिम्नाक्रियार्थकमुपपदंक्रियावाच्यंवफलतीत्याशयेनाह।क्रियार्थाक्रियेति।स्था
निनइत्यस्यैवार्थकथनमप्रयुज्यमानस्येति।तुमुनइति।ण्वुलोऽप्युपलक्षणं।फलेभ्योयातीत्यस्यफलान्याहारकइतिविवरणेबाधकाभावात्।कर्मणीति।त
थाचद्वितीयापवादोऽयमितिभावः।यत्तुप्रसादकृतागौरव्यातःअप्रयुज्यमानस्यैवकर्मणियथास्यात्।प्रयुज्यमा नस्यकर्मणिमाभूदितिनियमार्थंसूत्रमि

१३२

तस्मात्। अप्र[illegible]स्यानियमायोगात्। नचेह तादर्थ्य इति[illegible]यानक्रियायाः फलार्थत्वाभावात्। आहरणार्था हि यानक्रिया आहरणं तु फलकर्मकमित्यन्य
देवत्। क्रियार्थोपपदस्य किं। प्रविश पिंडीं गृहं प्रविशानंदस्य[illegible]सरणार्थं तथापि भक्षिं प्रति कृत्रिमोपपदत्वं नास्ति। न च तुमुनः कर्मणीत्युक्तत्वात् भक्षिकर्मणि
चतुर्थ्याः प्रसक्तिरेव नास्तीति प्रत्युदाहरणमिदं न संगच्छत इति वाच्यं। सति तत्क्रियार्थोपपदस्येति पदे तुमुन्ण्वुलौ क्रियायामित्येतद्विषयकमेवेदं सूत्र
मिति तुमुन्प्रत्ययतनान्यथेति प्रत्युदाहरणस्यासंगतत्वाभावात्। तुमर्थात्। अव्ययकृतो भावे इति तुमुनो भावे एव विधानात्तदर्थस्य भाववचनत्वसिद्धेः पुनर्भाववचनग्रहणं
सूत्रविशेषपरिग्रहार्थमित्याह भाववचनाश्चेतीति। न च तादर्थ्य इत्येव गतार्थता शंक्या क्रियार्थक्रियोपपदस्के भाववचनाश्चेति घञ्त्रा तुमुनेव तादर्थ्यस्य द्योतितत्वात्त्यातिपदि
का[illegible]प्रथमा[illegible]तस्त्वारंभात्। यत्तु प्रसादकृतोक्तं। भाववचनादेव यथा स्यात्। पाचको व्रजतीति ण्वुलं तन्माभूदिति नियमार्थमिदं सूत्रमिति। तन्न। ण्वुलः कर्तृवाच
[illegible]तया तुमर्थकत्वाभावेन नियमार्थेना[illegible]गात् ण्वुलंते कर्तुः प्राधान्यात् कर्तारं प्रति चतादर्थ्याभावात्। गुणीभूतं तया कं प्रति तादर्थ्यसंभवेपि पाकवाचकधातोश्चतुर्थ्ये
[illegible]भागाद्वा[illegible]र्थानकिं। पर्चनं वर्तते। भाववचनात् किं। पाकः त्यागः। अत्र वदंति। क्रियार्थोपपदस्येत्यनुवर्त्य पंचम्या विपरिणमय्य व्याख्यानेबाधकाभावात् भाववचनादिति
कुशक्यं। न चैवं तुमर्थादित्येव न्यूनत्वमिति वाच्यं। वर्णान्नाघवसंभवे गौरवाश्रयणायोगादिति। बलीयसीति। हरये नमः इत्यत्र तु देशानक्रियाद्वारा हरिनमस्कारयोः संबंध
स्य दृश्यको नमस्कार इति। एवं चादेशानक्रियावगतौ विलंब इति कारकविभक्तेर्बलीयस्त्वमित्येके। अन्ये तूपपदविभक्त्या संबंधसामान्यमवगम्यते तद्विशेषावगमस्त्व
र्थप्रकरणादिपर्यालोचनाधीनः। कारकविभक्त्या तु कर्मत्वादिसंबंधविशेषो झटित्येवावगम्यत इति तस्या बलीयस्त्वमित्याहुः। षष्ठ्यपीति। ननु प्रभ्वादियोगे षष्ठ्येवास्
अलं[illegible]सुपर्याप्ती तदर्थं च[illegible]त्यस्य[illegible]इति शंक्याह। तस्मै प्रभवतीति। न त्वां तृणमित्यादि। ननु तृणादिवत् युष्मच्छब्दादपि पक्षे चतुर्थ्या भाव्यं। मैवं। अनादर इत्यस्य
मविशेषणत्वेन अनादरद्योतकं यत्कर्म तत्र चतुर्थीति व्याख्यानात्। तृणं त्वत्र नादरद्योतकं न तु युष्मदर्थः स्यादेतत्। त्वां तृणं मन्ये तृणाय वेत्युदाह्रियतां किमनेन न
नञः प्रयोगेण। अत्राहुः यत्कल्पकास्ति तद्ग्रहणं कर्तव्यमिति वार्तिके नास्ति तेन यद्यपि न[illegible]तर्थी विधीयते ततो निकृष्टत्वेन यदि कुत्सा प्रतिपाद्यते तदा चतुर्थी भवति।
ननु साम्यविवक्षायां तादृशी चेत्कुत्साप्रतीतिर्नञः प्रयोगमिति त्येव भवतीति न त्वामित्युक्तमिति। श्वयनानिर्देशादिति। न च मन्य इति यकानिर्देशः किंन्न स्यादिति वाच्यं

अनभिहित इत्यधिकारात्। नहि यकायोगे अनभिहितं कर्म संभवति। ध्यनपि देवादिक धातूपलक्षणमात्रं नतु स्वयं विवक्षितः। तेन नृत्यमत्वा रघुनंदनोपि बालो नरः सः
प्रधनाग्निरास्थदिति भट्टिप्रयोगः संगच्छते। नौकाकान्नेति। व्यवस्थितविभाषाविज्ञानं तस्येति भावः॥ ॥ गत्यर्थकर्मणि। गत्यर्थेति किं। ओदनं पचति। कर्मणीति किं।
अश्वेन व्रजति। अनध्वनीत्यत्राध्वनीति न स्वरूपग्रहणं तथाहि सत्यनध्वन इत्येवावक्ष्यत्। किं त्वर्थग्रहणसप्तमीनिर्देशात् कर्मणीत्यनेन सामानाधिकरण्यात्। अ
र्थस्यैव हि कर्मत्वं संभवति न शब्दस्वरूपस्य तेनाध्ववाचिनां सर्वेषामेव निषेधस्तथा च वार्तिकमध्वन्यर्थग्रहणमिति। गंत्राधिष्ठितएवेति। आस्थितप्रतिषेधोव
क्तव्य इति वार्तिकादिति भावः। आस्थितः संप्राप्तः अध्वानं गच्छतीत्यत्र हि पंथाः प्राप्त एवेति न पक्षे चतुर्थी। यदा त्वप्राप्तत्वेन विवक्षा तदा पक्षे भवत्येव सा। इह अनध्व
गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि। २।३।१२॥ अध्वभिन्ने गत्यर्थानां कर्मणि एते स्तश्चेष्टायां। ग्रामं ग्रामाय वा गच्छति। चेष्टायां
किं। मनसा हरिं व्रजति। अनध्वनीति किं। पन्थानं गच्छति। गन्त्राधिष्ठिते अध्वन्येवायं निषेधः यदा तूत्पथात्पन्थानमेवाक्रमितुमिष्यते तदा च
तुर्थी भवत्येव। उत्पथेन पथे गच्छति॥ ध्रुवमपायेऽपादानं। १।४।२४॥ अपायो विश्लेषस्तस्मिन्साध्ये यद्ध्रुवमवधिभूतं कारकं तदपादानं स्यात्
अपादाने पञ्चमी। २।३।२८॥ ग्रामादायाति। धावतोऽश्वात्पतति। कारकं किं। वृक्षस्य पर्णं पतति। जुगुप्साविरामप्रमादार्थानामुपसंख्यानं
पापाज्जुगुप्सते। विरमति। धर्मात्प्रमाद्यति। भीत्रार्थानां भयहेतुः। १।४।२५॥ भयार्थानां त्राणार्थानां च प्रयोगे भयहेतुरपादानं स्यात्। चौरा
द्बिभेति। चौरात्त्रायते। भयहेतुः किं। अरण्ये बिभेति त्रायते वा॥ ॥ १९ नीत्यपनीयां संग्राम इति पूर्यते तेन स्त्रियं गच्छतीत्यत्र स्त्री प्राप्तैवेति न चतुर्थी॥
अत्र व्याचक्षते। अजां नयति ग्राममित्यत्र तु भवत्येव चतुर्थी। अगत्यर्थत्वात्। आक्षेपादिना त्वत्र प्रतीयते गतिर्न त्वसौ नयतेरर्थः। प्रापणवाचित्वादिति। गत्यर्थकर्मणि च
तुर्थी वेति वक्तव्ये द्वितीयाग्रहणम पवादविषयेपि द्वितीयायः प्राप्त्यादित्येतदर्थं। तेन ग्रामं गंतेत्यत्र कृद्योगलक्षणषष्ठी न भवतीति वृत्तिकृतोक्तं॥ इति चतुर्थी। ध्रुवमपा
ये। ध्रुगतिस्थैर्ययोः। अस्मात्पचाद्यचि कुटादित्वान्न ङित्वे उवङ्। ध्रुव स्थैर्ये इति केचित्पठंति तत्रेगुपधेति कः। ध्रुवं स्थिरं। अपायशब्देन विवक्षितमाह। विश्ले
ष इति। एवं च कृतधात्वर्थानाश्रयत्वे सति तज्जन्यविभागाश्रयो ध्रुवमिति फलितं। तच्चार्थादवधिरेवेत्याह। अवधिभूतमिति। धावंत इति। इह धावनक्रिया

विश्लिष्टस्यापि स्वस्यप्रकृत धातूपात्तक्रियां प्रत्यवधित्वं न। ध्यते परस्परस्मान्मेषावपसरत इत्यत्र तु सृधातुना गतिद्वयस्याप्यपादानादेकनिष्ठां गतिं प्रति
इतरस्याप्यपादानत्वं न विरुध्यते। उक्तं च हरिणा। अपाये यदुदासीनं चलं वा यदि वाऽचलं। ध्रुवमेवातदावेशात्तदपादानमुच्यते १ पततो ध्रुव एवाश्वो यस्मा-
दश्वात्पतत्यसौ। तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमिष्यते २ मेषांतरक्रियापेक्षमवधित्वं पृथक् पृथक्। मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक् इति
३। पर्वतात्पततोऽश्वात्पततीत्यत्र तु पर्वता वधिकपतनाश्रयोऽश्वस्तदवधिकं देवदत्तादिनिष्ठं पतनमर्थः। पंचम्यर्थोऽवधौ अभेदेन संसर्गेण प्रकृत्यर्थः प-
रिविशेषणं। प्रत्ययार्थश्चानुपतनक्रियायां। स चावधिरूपो धर्मो न तु धर्ममात्रं। उद्धृतौदनास्थालीत्यत्रोदनकर्मकोद्धरणावधिभूता स्थालीति सामानाधिकरण्य-
दर्शनादेतन्मनोऽनुपपन्नं स्थितं। नन्विह ध्रुवग्रहणं किमर्थं न च ग्रामादागच्छति शकटेनेत्यत्र शकटेति व्याप्तिवारणाय तदिति वाच्यं। परत्वात्तत्र करणसं-
ज्ञाप्रवृत्तेः। न च संज्ञानिर्देशार्थं ध्रुवग्रहणं कारकाधिकारात्कारकमिति लभ्यत इति ध्रुवग्रहणं चिंत्यप्रयोजनमिति चेत्। अत्र वदंति कारकत्वरूपव्या-
पकधर्ममात्रविवक्षायां साधकतमत्वेनाविवक्षायाश्च शकटस्य करणसंज्ञाऽप्रसंगेन शकटस्यापादानत्वं स्यात्तन्मा भूदित्येतदर्थं ध्रुवग्रहणमिति। जुगुप्से-
ति। जुगुप्सा निंदा विरामो विरतिः प्रमादोऽनवधानता एतदर्थकानां धातूनां कारकमपादानसंज्ञं स्यादित्यर्थः। संयोगपूर्वको विश्लेषो विभागः स चेह नास्ति बु-
द्धिकृतमुख्यगौणत्वान्नेह गृह्यत इति सूत्रणं प्राप्तो वार्तिकारंभः। भाष्यकारस्तु कारकप्रकरणे गौणमुख्यन्यायो नाश्रीयत इति तमपूग्रहणेन ज्ञापितत्वान्न जु-
गुप्सादीनां तत्पूर्वकनिवृत्तिवाचित्वमाश्रित्येदं वार्तिकं भीत्रार्थानामित्यादि च सूत्राणि प्रत्याचख्यौ। पूर्वं हि बुद्ध्यापायं संप्राप्य ततो दोषदर्शनान्निवर्तत इ-
त्यस्त्येवात्र बुद्धिकृतोऽपायः। भीत्रा॥ कस्य बिभ्यंति देवाश्च जातरोषस्य संयुगे इति। रामायणे तु कस्येत्यस्य संयुगेनान्वयान्नास्ति भयहेतुत्वमिति षष्ठी प्रयो-
गः संगच्छत एव। नैवं संयुगस्यापायाभावात्प्राप्तिरिति वाच्यं। परया अधिकरणसंज्ञया अपादानसंज्ञाबाधात्। अधिकरणत्वाविवक्षायां तु इष्टापत्तेः। भीत्रार्थेति
किं। व्याघ्रं पश्यति। न च कर्मत्वेन बाधः शंक्यः। कर्मत्वाविवक्षायां शेषषष्ठी वाऽवधित्वात्पंचमी प्रसंगादित्याहुः। भयहेतुग्रहणं चिंत्यप्रयोजनं अरण्ये बिभेतीत्यत्र परत्वादधि-
करणसंज्ञाप्रवृत्तेरिति चेन्न। अत्र वदंति। भयहेतुग्रहणाभावे कारकशेषविवक्षायामतिप्रसंगः स्यात् तथा च अरण्यस्य चोरान् बिभेतीति प्रयोगो न स्यादिति। ५

पराजेः अध्ययनादिति। अध्ययनसंबंधिनी ग्लानिरित्यर्थः। कारकशेषत्वेन षष्ठ्यां प्राप्तायामिदं। पराजयत इति। विपराभ्यां जेरिति तङ्। असोढ इति क्तार्थो भूतकालो न विवक्षितस्तेनाध्ययनात्पराजेष्यत इत्यादि सिद्धं। न च सोढग्रहणं व्यर्थं। शत्रून्पराजयत इत्यत्र परत्वात्कर्मसंज्ञासिद्धेः। अत्रापि वदंति। कर्मत्वाविवक्षायां शेषषष्ठीं बाधित्वा पंचमी स्यात् सा मा भूदिति कर्तव्यमेवासोढग्रहणं। वारणार्थानां। यवेभ्य इति। यवसंयोगात्प्रागेव गां निवारयतीति ध्रुवमपायेऽन्येनासिद्धावयमारंभः बुद्धिपरिकल्पितापायमंगीकुर्वतो भाष्यकारस्य मते तु वैयर्थ्यमेतस्य स्फुटमेव। गां वारयतीति। इत्रवरणे चुरादिः। गामित्यत्रेप्सितत्वप्रयुक्तापादानसंज्ञा न भवति। ईप्सितत्वमत्वविवक्षायां परत्वात् कर्मसंज्ञाप्रवृत्तेः। तन्वेवमीप्सितग्रहणमेव व्यर्थं। क्षेत्रे वारयतीत्यत्र परत्वादधिकरणसंज्ञाप्रवृत्तेः। सत्यं। अधिकरणस्य शेषत्वविवक्षायामिदं

पराजेरसोढः। १।४।२६॥ पराजेः प्रयोगेऽसह्योऽर्थोऽपादानं स्यात्। अध्ययनात्पराजयते। ग्लायतीत्यर्थः। असोढः किं। शत्रून्पराजयते। अभिभवतीत्यर्थः। वारणार्थानामीप्सितः। १।४।२७॥ प्रवृत्तिविघातो वारणम्। वारणार्थानां प्रयोगे ईप्सितोऽर्थोऽपादानं स्यात्। यवेभ्यो गां वारयति। ईप्सितः किं। [illegible] गां वारयति क्षेत्रे। अन्तर्धौ येनादर्शनमिच्छति॥ १।४।२८॥ व्यवधाने सति यत्कर्तृकस्यात्मनो दर्शनस्याभावमिच्छति तदपादानं स्यात्। मातुर्निलीयते कृष्णः। अन्तर्धौ किं। चौरान्न दिदृक्षते। इच्छतिग्रहणं किं। अदर्शनेच्छायां सत्यां सत्यपि दर्शने यथा स्यात्। आख्यातोपयोगे। १।४।२९॥ नियमपूर्वकविद्यास्वीकारे वक्ता प्राक्संज्ञः स्यात्॥ उपाध्यायादधीते॥ उपयोगे किं॥ नटस्य गाथां शृणोति॥

[illegible]दाहरणमितिपूर्वोक्तरीत्या पदद्वयोजनस्येहापि कल्पितुं शक्यत्वात्। अंतर्धौ। येनेति कर्तरि तृतीया। नं च कृद्योगषष्ठीप्रसंगः। उभयप्राप्तौ कर्मण्येवेति नियमात्। अत्र स्यामेति गम्यमानत्वादित्युभयाः प्राप्तिः। निलीयत इति। लीङ् श्लेषणे दैवादिकः। नन्वंतर्द्धाविति व्यर्थः। न दिदृक्षते चौरानित्यत्र परत्वात्कर्मसंज्ञासिद्धेः। अत्राहुः। चौराः आत्मानं मा द्राक्षुरिति बुध्या चौरान्न दिदृक्षत इत्ययमर्थोऽत्र विवक्षितस्तत्र कर्मणः शेषत्वविवक्षायामिदं पूर्ववत्प्रत्युदाहरणमिति। शाब्दकौस्तुभे तु अंतर्द्धाविति [illegible]योजनमितिस्थितं। आख्यातोपयोगे नियमपूर्वकेति। नत्वेवोपयोगशब्दो रूढ इति भावः। आख्यातेत्येतन्न तु जंतमित्याह। वक्तेति। उपाध्यायादिति अस्मा अक्षर[illegible]धीयत इति उपाध्यायः। इङ श्चेति घञ्। अध्ययनं तु गुरूच्चारणानूच्चारणं नियमपूर्वकं। नटस्येति। गाथाकर्मकं नटसंबंधिश्रवणमित्यर्थः। नट

जनिकर्तुः [illegible]नं जनिरुत्पत्तिः । इण्[illegible]रिति जनेर्भावे इ[illegible] जनिवध्योश्चेति वृद्धिप्रतिषेधः । तस्याः कर्त्रेति शेषषष्ठ्या समासो न तु कारकषष्ठ्या । तृजकाभ्यामिति निषे-
धात् । एतच्चोपलक्षणम् प्रयत्नस्य यो हेतुस्तदपादानमित्यर्थात् तावता नरयोगेऽप्यपादानत्वं भवत्येव । अंगादंगात्संभवतीति यथा तदेतदाह । जायमानस्येति । एतेन इक्श्तिपौ ।
धातुनिर्देशे इति इक्श्तिपौ निर्देशोऽयं जनिरिति व्याश्रित्य महता त्रयुपधालोपसमर्थ्यासंगतिं समासानुपपत्तिं चोद्भाव्य व्याकरणाधिकरणे गर्जयन्तो मीमांसकाः समाहिता इ-
ति भावः । [illegible]कृतिग्रहणं हेतुमात्रपरमिति हरिदत्तमतं । पुत्रात्प्रमोदो जायते इत्युदाहरणात् । उपादानमात्रपरमिति तु भाष्यकैयटमतं तदुभयसाधारणं उ-
[illegible]रणमाह । ब्रह्मण इति । ब्रह्मा हिरण्यगर्भः । स च हेतुरेव न तूपादानं । किं च मायोपहितं चैतन्यं ब्रह्म तद्धि सर्वकार्योपादानमिति वेदान्तसिद्धान्तः ॥ भुवः ॥ भवनं भू-
रिति । संपदादित्वात् क्विप् । पूर्वसूत्रे समासनिर्दिष्टमपि कर्तृग्रहणमनुवर्तते स्वरितत्वादित्याह । भूकर्तुरिति । प्रभवत्यस्मादिति प्रभवः । अकर्तरि च कारके इत्य

जनिकर्तुः प्रकृतिः ।१।४।३०॥ जायमानस्य हेतुरपादानं स्यात् । ब्रह्मणः प्रजाः प्रजायन्ते । भुवः प्रभवः ।१।४।३१॥ भवनम्भूः । भूकर्तुः प्रभव
स्तथा । हिमवतो गंगा प्रभवति । तत्र प्रकाशत इत्यर्थः । ल्यब्लोपे कर्मण्यधिकरणे च । प्रासादात्प्रेक्षते । आसनात्प्रेक्षते । प्रासादमारुह्य आसने उपविश्य प्रेक्षत इत्यर्थः । श्वशुराज्जिह्रेति । श्वशुरं वीक्ष्येत्यर्थः । गम्यमानाऽपि क्रिया कारकविभक्तीनां निमित्तमित्युक्तं । कस्मात्त्वं नद्याः । यत
[illegible]ध्वकालनिर्माणं तत्र पञ्चमी तद्युक्तादध्वनः प्रथमासप्तम्यौ कालात्सप्तमी च वक्तव्या । वनाद्ग्रामो योजनं योजने वा । कार्तिक्या आग्रहायणी

धि[illegible]पादानार्थे सूत्रे [illegible] जनिकर्तुरित्येव सिद्धे निरर्थकमिदमित्याशंकां परिहरन्नाह । तत्र प्रकाशत इति । प्रथमं दृश्यत इत्यर्थः । एषां चार्थो धातूनामनेकार्थ-
त्वाल्लभ्यते । तथा चाभूतप्रादुर्भावो जनिः । अन्यतः सिद्धस्य प्रथममुपलंभः प्रभव इत्यर्थभेदोऽस्तीति भावः । भीत्रार्थानामित्यारभ्येयं सप्तसूत्री भाष्ये प्रत्याख्याता । तत्रेत्थमुप-
पत्तिः संभवति । चौरेभ्यो बिभेति भयान्निवर्तत इत्यर्थः । त्रायतेरक्षणेन चौरेभ्यो निवर्तयतीत्यर्थः । पराजयतेर्ग्लान्या निवर्तत इत्यर्थः । वारयति । प्रवृत्तिं प्रतिबध्नन्निवर्त-
यतीत्यर्थः । निलीयते । दर्शनेन निवृत्तिरित्यर्थः । अधी[illegible]ते । उपाध्यायान्निःसरन्तं शब्दं गृह्णातीत्यर्थः । ब्रह्मणः प्रपञ्चो जायत इत्यत्रापि तन्तोपक्रामति निर्गच्छतीत्य-
र्थः । प्रभवतीत्यत्रापि भवनपूर्वकं निःसरणमर्थस्तथा च ध्रुवमपाय इत्यनेनैवेष्टरूपसिद्धिरिति । वस्तुतस्तु निवृत्तिनिःसरणादिधात्वन्तरार्थे विशिष्टे स्वार्थे वृत्तिमाश्रि-

स्यपथा कथंचिदुक्तप्रयोगाणां समर्थनेऽपि मुख्यार्थपुरस्कारेण षष्ठीप्रयोगो दुर्वारः। नटस्य शृणोतीतिवत्। नत्वुपाध्यायनटयोः क्रियानुकूलव्यापारांशे विशेषो वक्तुं शक्यः
अनभिधानत्वहानस्वमाश्रित्य प्रत्याख्यानं तु नातीव मनोरमं। एवं जुगुप्साविरामेत्यादिवार्तिकमवश्यारंभणीयं। तथा च सूत्रवार्तिकमतमेवेह प्रबलं। तथा ध्रुवं
भयहेतुः सोढ इत्यादि संज्ञानिर्देशो [illegible] सार्थकः। परत्वान्नन्तसंज्ञा प्राप्तावपि शेषत्वविवक्षायां नमाधाराणाम श्रीयादित्यादाविव षष्ठ्या इष्टतयात्रापादानसं
ज्ञायाधारणीयत्वात्। एतच्च शब्दकौस्तुभे स्पष्टं। ल्यब्लोप इति। ल्यबंतस्य गम्यमानार्थत्वादप्रयोग इत्यर्थः। ल्यब्ग्रहणमिह ल्यबर्थपरं तेन क्त्वोऽपि लोपे सिध्य
ति। आसने स्थित्वा प्रेक्षते। आसनात्प्रेक्षत इति। यतश्चेति। यदवधित्वेनाश्रित्याध्वनः कालस्य वा निर्माणं परिच्छेदः प्रतिपाद्यते ततः पंचमी इत्यर्थः। [illegible] पंचम्य
न्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते। २।३।२९॥ एतैर्योगे पञ्चमी स्यात्। अन्य इत्यर्थग्रहणं। इतरग्रहणं प्रपञ्चार्थं। अन्यो भिन्न इ
तरो वा कृष्णात्। आराद्वनात्। ऋते कृष्णात्। पूर्वो ग्रामात्। दिशि दृष्टः शब्दो दिग्शब्दः। तेन सम्प्रति देशकालवृत्तिना योगेऽपि भवति। चैत्रात्पूर्वः।
फाल्गुनः। अवयववाचियोगे तु न। तस्य परमाम्रेडितमिति निर्देशात्। पूर्वं कायस्य। अञ्चूत्तरपदस्य तु दिक्शब्दत्वेऽपि षष्ठ्यतसर्थेति षष्ठी वा
धितुं पृथग्ग्रहणं। प्राक्प्रत्यग्वा ग्रामात्। आच् दक्षिणा ग्रामात्। आहि दक्षिणाहि ग्रामात्। अपादाने पञ्चमीति सूत्रे कार्तिक्याः प्रभृतीति भा
ष्यप्रयोगात्। प्रभृतियोगे पञ्चमी॥ भवात्प्रभृति आरभ्य वा सेव्यो हरिः॥ अपपरिबहिरिति समासविधानाज्ज्ञापकाद्बहिर्योगे पञ्चमी। ग्रामाद्बहिः
[illegible] द्वारायुक्तान्निर्मीक्षना[illegible] वाचिनः प्रथमासप्तम्योस्तः। कालादिति। इहापि तद्युक्तादित्यपेक्षते। आग्रहायणीति। अग्रे हायनमस्याः सा प्रज्ञादेराकृतिगणत्वात्स्वा
र्थे को [illegible] पदात्संज्ञायामिति णत्वं। अन्यारात् अर्थग्रहणमिति। व्याख्यानादिति भावः। प्रपञ्चार्थमिति। नच इतरत्वमन्यनीचयोरित्यमरोक्तनीचार्थस्येदं ग्रहणमस्ति
[illegible] वाच्यं। असामञ्जस्यं भवति [illegible] पंचमीविभक्तेरित्यनेनैव सिद्धत्वात्। अन्यो भिन्न इतरो वेति। नचैवं घटः पटो नेत्यत्रातिप्रसंगः। नञोऽपि भेदशक्तत्वादिति वाच्यं। निपातानां द्योत
कत्वमेव [illegible] मित्यभ्युपगमात्। आराद्वनादिति। इह दूरान्तिकार्थैः षष्ठ्यन्यतरस्यामिति प्राप्तौ। ऋते कृष्णादिति। कथं तर्हि फलति पुरुषाराधनमृते इति प्रयोग इति
वेषा प्रमाणमिति हरदत्तः। अन्ये तु [illegible] ऽन्यत्रापि दृश्यत इति दृशिग्रहणाच्चैत्रं यावच्छीनमित्यादाविवक्षृते योगे द्वितीयापि साधुरित्याहुः। अस्मिन्व्याख्याने कृते हित्वी

पारे।तिवंद्रमसं परनुकूलं।दिशिदृष्टशब्दः॥रूढ्वतिशेषः।तेनेंद्रा दयानात्रगृह्यंते।नन्वेवं ककुभादिग्रहणप्रसंगइतिचेत्।अत्राहुः।अन्येतरसाहचर्यान्न्याख्यानाद्वादि
ग्भिन्नेऽर्थेनान दृष्टः सोऽत्रगृह्यतइति। दिक्शब्दत्वेपीति। यथाऽर्दिक्शब्दोऽयंचूत्तरपदमस्तिसध्याङित्यादिलिष्यापिदिक्शब्दसाहचर्यादुत्तरपदेनप्रागित्यादिदिक्
शब्दग्रहणात्यते।तेनसध्यङ्देवदत्तेत्यत्रनातिप्रसंगइतिभावः॥दक्षिणाग्रामादिति।दिक्शब्दत्वेनैवसिद्धेअजादिग्रहणंचिंत्यप्रयोजनमित्याहुः।प्रभृतियोगेति।
प्रभृत्यर्थयोगइत्यर्थः।तथाचकार्तिक्याःप्रभृतीतिभाष्यंविवृण्वताकैयटेनततआरभ्यइत्यर्थइतिप्रयुक्तं।ग्रामाद्बहिरिति। ज्ञापकसिद्धंनसर्वत्रतेनकरस्यकरभोवहि
रितिसिद्धं॥ ॥अपपरीति।वर्जनंकिं। परिषिंचतिसर्वतइत्यर्थः।अत्रोपसर्गत्वात्षत्वंवचनग्रहणादिति।विनातेनेतिमर्यादासहतेनेत्यभिविधिरित्यत्रयउ

अपपरीवर्ज्जने।१।४।८८॥एतौवर्ज्जनेकर्म्मप्रवचनीयौस्तः। आङ्मर्य्यादावचने।१।४।८९। आङ्मर्य्यादायामुक्तसंज्ञस्स्यात्।वचनग्रहणा
दभिविधावपि।पञ्चम्यपाङ्परिभिः।एतैःकर्म्मप्रवचनीयैर्योगेपञ्चमीस्यात्।अपहरेः।परिहरेः।संसारः।परिरत्रवर्ज्जने।लक्षणादौतुहरिम्प
रि।आमुक्तेःसंसारः।आसकलाद्ब्रह्म।प्रतिःप्रतिनिधिप्रतिदानयोः।१।४।९२।एतयोरर्थयोःप्रतिरुक्तसंज्ञस्स्यात्।प्रतिनिधिप्रतिदानेचयस्मात्।२।
३।११।अत्रकर्म्मप्रवचनीयैर्योगेपञ्चमीस्यात्।प्रद्युम्नःकृष्णात्प्रति।तिलेभ्यःप्रतियच्छतिमाषान्।अकर्त्तर्य्यृणेपञ्चमी।२।३।२४। कर्त्तृवर्ज्जि
तंयदृणंहेतुभूतंततःपञ्चमीस्यात्।शताद्बद्धः। अकर्त्तरिकिं।शतेनबन्धितः।विभाषागुणेऽस्त्रियां।२।३।२५।गुणेहेतावस्त्रीलिङ्गेपञ्चमीवा।
स्यात्।जाड्याज्जाड्येनवाबद्धः।गुणेकिं।धनेनकुलं। अस्त्रियांकिं।बुद्ध्यामुक्तः।विभाषेतियोगविभागादगुणेस्त्रियांञ्चक्वचित्।धूमादग्निमा
न्।नास्तिघटोऽनुपलब्धेः॥ ॥ ११ षष्ठीविशेषोविवक्ष्यते।अतःसाहचर्यात्।त्वेनवचनग्रहणसामर्थ्यात्किंतुअवधिमात्रंविवक्ष्यतेइत्यर्थःहय
मग्रहणंयत्रमर्यादाशब्दोयस्मिन्नुच्यतेतत्मर्यादावचनं।नहिआङ्मर्यादाभिधायीतिनिसूत्रंनत्वयआङ्दृष्टःसउक्तसंज्ञइत्यर्थः। परिहरेरिति।हरिंवर्जयित्वेत्यर्थः।
वर्जनेनवावचनान्निषिद्धात्कात्पञ्चमीवचनाभावः।परित्रेति। अत्रयंचमीविभक्तेर्नार्थेनापवनसाहचर्यादितिभावः।आमुक्तेरिति। मुक्तिंमर्यादीकृत्येत्यर्थः
आसकलादिति।सकलमभिव्याप्येत्यर्थः।प्रतिनिधिप्रति दाने। अस्मान्निर्दिष्टाल्लिंगाभ्यांयोगेपंचमी। ज्ञापकसिद्धंनसर्वत्रेतिकृष्णस्यप्रतिनिधिरित्यपि

मुख्यस्याभावे सतितत्सदृशः उपादीयते स प्रतिनिधिः। दत्तस्य प्रतिनिर्यातनं प्रतिदानं। अकर्तरि। हेतुभूतमिति। हेतावित्यनुवर्तत इति भावः। पंचमी स्यादिति॥ तृ
तीयापवादोयं। ज्ञानेनेति। ज्ञानमिह उत्तमर्णाय धार्यमाणत्वादृणं तत्प्रयोजको हेतुश्चेति चकारात् कर्तृसंज्ञं चाबाधित इति। एवं तु प्रयोजककर्तुः ज्ञानस्य हेतुसं
ज्ञाप्यस्तीति तथापि अन्यस्याभावात्। अकर्तरीत्युक्तमिति भावः। योगविभागादिति। एतच्च हेतुमनुष्यभ्य इति सूत्रे पदमंजर्यां स्पष्टं। स्त्रियां चेति। बाहुलकं प्रकृतेस्तद
नुदृष्टेरिति वार्तिकनिर्देशोपीह ज्ञापकः॥ ॰ ॥ पृथग्विनानानु तृतीयाभावपक्षे एनपा द्वितीयेति प्रकृता द्वितीयैव स्यात्। यदि तु द्वितीया विकल्पेन भवेत्
तदा त्वम्यपि स्यात्। सा तु नित्यैव तस्माद्विभक्तित्रयसमावेशो दुरुपपाद इत्यत आह। अन्यतरस्यांग्रहणं समुच्चयार्थमिति। निपातानामनेकार्थत्वादिति
भावः। पंचमीति। तत्र मेद्रूकस्तु स्यात्पंचमी द्वितीयानुसंनिहितैव। इह पृथगर्थैरिति सूत्रे पितव्ये पर्यायत्रयोपादानं पर्यायांतरनिवृत्त्यर्थं तेन हिरुग्वदन्तस्ये

पृथग्विनानानाभिस्तृतीयाऽन्यतरस्यां॥२।३।३२॥ एभिर्योगे तृतीया स्यात्पंचमी द्वितीये च। अन्यतरस्यांग्रहणं समुच्चयार्थं पंचमी द्वितीये च।
नुवर्तते। पृथग्रामेण। रामात्। रामं वा। एवं विनानाना। करणे च स्तोकाऽल्पकृच्छ्रकतिपयस्याऽसत्ववचनस्य॥२।३।३३॥ एभ्योऽद्रव्यवचनेभ्यः
करणे तृतीयापंचम्यौ स्तः। स्तोकेन स्तोकाद्वा मुक्तः। द्रव्ये तु स्तोकेन विषेण हतः। दूरान्तिकार्थेभ्यो द्वितीया च॥२।३।३५॥ एभ्यो द्वितीया स्याच्चात्पंचमी
तृतीये स्तः। प्रातिपदिकार्थमात्रे विधिरयं। ग्रामस्य दूरं दूरात् दूरेण वा॥ अन्तिकं। अन्तिकात्। अन्तिकेन वा। असत्ववचनस्येत्यनुवृत्तेर्नेह। दूरः

स्यत्रैनत्यादुः। पृथग्विनाना अभिस्तृतीयान्यतरस्यामिति सुवचं। नानात्रिति प्रत्ययग्रहणे तदंतयोर्विनानानाशब्दयोर्लाभात्। नानेति। हिरुग्नानाच वर्जने इत्यमरः। नाना
नारीर्निष्फला लोकयात्रेति प्रयोगः। करणे च। अन्यतरस्यामितिवर्तते पंचमीति चतेन करणे तृतीयायां प्राप्तायां पक्षे पंचमी विधीयते तया मुक्ते करणत्वादेव तृतीया
सिद्धेत्याशयेनाह। तृतीयापंचम्यौ स्त इति। स्तोकेनेति। अनायासेन मुक्त इत्यर्थः। दूरं दूरात् दूरेण वेति। इह सप्तम्यपि वक्ष्यते। किंच दूरांतिकार्थेभ्य इति सूत्रस्य सप्त
म्यधिकरणे चेत्युत्तरसूत्रेप्यनुवर्तनात् दधिकरणेप्येभ्यो विभक्तिचतुष्टयं बोध्यं। तथा च प्रयुज्यते। दूरादावसथान्मूत्रं दूरात्पादावसेचनमिति। आवसथस्य दू
रेत्यर्थः। असत्ववचनस्येति। सत्व॰ ॰नत्वमिह सत्वविशेषकत्वं। एवं च सामानाधिकरण्येन प्रातिपदिकार्थविशेषकं व्युदस्यते तदाह। दूरः पंथा इति। एतेन

कारणे धात्वोर्कोते सूत्रे करणे किं [illegible] विशेषणे कर्मणि मा भूत्। स्तोकं पचति। क्रिया न द्रव्यमिति प्राचां ग्रंथोपि व्याख्यातः। न च क्रियाया विशेष्यत्वेन द्रव्यत्वावश्य
भावात् नैतत् सूत्रोदाहरणं युक्तमिति वाच्यं। धातुवाच्यायाः क्रियायाः असत्वरूपत्वस्याकरे प्रसिद्धत्वात्। न च विशेष्यत्वे तदनुपपत्तिः। कर्तृकर्मेतरकारक
लिंगानन्वयित्वमात्रेणासत्वरूपत्वोपपत्तेः। उक्तं च। क्रिया न युज्यते लिंगं क्रिया नाधारकारकैः। असत्वरूपता तस्या इयमेवावधार्यतामिति। फलं व्यापारश्च
क्रियाः फलाधारकारकं कर्म। व्यापाराधारकारकं कर्त्रेति विवेकः॥ इति पंचमी ॥ ॐ ॥ षष्ठी शेषे। उपयुक्तादन्यः शेषः कर्मादयश्च प्रातिपदिकार्थपर्य
न्ता उपयुक्तास्तत्र द्वितीयादीनां विधानादतो व्याचष्टे। कारकप्रातिपदिकार्थव्यतिरिक्त इति। राज्ञः पुरुष इति। प्रत्ययार्थस्य प्रकृत्यर्थं प्रति प्राधान्याद प्र

षष्ठी शेषे। २।३।५०॥ कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिस्सम्बन्धश्शेषस्तत्र षष्ठी स्यात्। राज्ञः पुरुषः। कर्म्मादीनामपि सम्बन्ध
मात्रविवक्षायां षष्ठ्येव। सतां गतं। सर्पिषो जानीते। मातुः स्मरति। एधोदकस्योपस्कुरुते। भजे शम्भोश्चरणयोः। फलानां तृप्तः। षष्ठी हेतुप्रयो
गे। २।३।२६॥ हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात्। अन्नस्य हेतोर्वसति। सर्व्वनाम्नस्तृतीया च। २।३।२७। सर्व्वनाम्नो हेतुशब्दप्रयोगे हेतौ द्यो
त्ये तृतीया स्यात् षष्ठी च। केन हेतुना वसति। कस्य हेतोः। निमित्तपर्य्यायप्रयोगे सर्व्वासां प्रायो दर्शनं॥ किन्निमित्तं वसति। केन निमित्तेन। कस्मै नि
मित्ताय इत्यादि। एवं कारणं। को हेतुः। किम्प्रयोजनमित्यादि। प्रायग्रहणादसर्व्वनाम्नः प्रथमाद्वितीये न स्तः। ज्ञानेन निमित्तेन हरिस्सेव्यः

धानादेव षष्ठी। प्रत्ययार्थस्त्विह पुरुषविशेषणं। राजनिरूपितसेवकत्वसंबंधवान् पुरुष इत्यर्थविवक्षायां प्रधानात् पुरुषशब्दान्न ॥ ज्ञानाय निमित्ताय इत्यादि॥
षष्ठी। उक्तन्यायविरोधात्। शेषत्वाभावाच्च। राज्ञः पुरुषस्तिष्ठतीत्यादौ पुरुषशब्दो हि प्रातिपदिकार्थमात्रवृत्तिः। राज्ञः पुरुषेण कृतमित्यादौ कारकार्थकः। यदा तु
पुरुषनिरूपितसेव्यत्वसंबंधवान् राजेत्यर्थविवक्षा तदा पुरुषशब्दादपि षष्ठी भवत्येव पुरुषस्य राजेति। यत्तु अप्रधानं शेष इति केश्चिदुक्तं तन्न। प्रातिपदि
कार्थमात्रे शुक्लः पटः। श्यामो घट इत्यादौ विशेषणे षष्ठीप्रसंगात्। न च प्रथमया बाधः तस्याः प्रधाने चरितार्थत्वात्। कर्मादीनामपीति। यथा विशेष्याविवक्षायां
रूपवानिति प्रयुज्यते विशेषविवक्षायां तु नीलः पीत इत्यादि तथा इदमपि न्यायसिद्धमिति भावः। सतां गतमिति। सत्पुरुषसंबंधि गमनमित्यर्थः। सतो ग

ष्ठं गीत्यत्र व्याख्याते न कर्मत्वसंबंधस्योक्तत्वात्। संबंधमात्रविवक्षा कर्तुं न शक्यत इति षष्ठी ह न भवति। किंतु प्रातिपदिकार्थमात्रे प्रथमैवेत्याहुः। सर्पिषो जा
नीते रूपं॥ वस्तुतः करणस्य संबंधमात्रविवक्षया षष्ठी। सर्पिः संबंधि प्रवर्तनमित्यर्थः। अकर्मकाच्चेत्यनुपसर्गादित्य नेन वा जानातेस्तङ्। अन्ये तु व्याचख्युः
कर्मणः शेषत्वविवक्षया षष्ठी। सर्पिः संबंधि ज्ञानमित्यर्थ इति। एधोदकस्येति। एधाश्च उदकं च तेषां समाहारः एधोदकं। जातिरप्राणिनामित्येकवद्भावः
पक्षे एधांसि च उदकं चेति विग्रहे पूर्ववदेकवद्भावः। उदकपर्यायोदकशब्दोऽप्यस्ति। तथा च। हलायुधः। भुवनममृतं जीवनीयं दकं चेति। उपस्कुरुते इ
ति। गंधनादिसूत्रेण आत्मनेपदं उपात्प्रतियत्नेति सुट्। न चैवं ज्ञोविदर्थस्य करणे। अधीगर्थदयेशां कर्मणि। कृञः प्रतियत्ने। रुजार्थानां भाववचनानामज्व
रेः। आशिषि नाथः। जासिनिप्रहणनाटक्राथपिषां हिंसायां। व्यवहृपणोः समर्थयोः। कृत्वोर्थप्रयोगे कालेऽधिकरणे इति शेषषष्ठीविधानार्थेयमष्टसूत्री
निष्फला स्यादिति वाच्यं। सर्पिषो ज्ञानमित्यादौ तस्याः समासनिवृत्तिफलकत्वात्। तथाहि। ज्ञोविदर्थस्येत्यादौ शेष इत्यनुवर्तते। शेषत्वे विवक्षिते तु कारका
दौ षष्ठी सिद्धैव। तदयमर्थः। इह षष्ठ्येव न तु तल्लुक्। तथा च लुकः प्रयोजकीभूतस्समास एव न भवतीति। न चाष्टसूत्र्या लुकमात्रनिवृत्तिफलकत्वमेवा
स्तु समासस्तु स्वीक्रियतामिति वाच्यं। इष्टानुरोधेन समास एव न भवतीति व्याख्यानस्योचितत्वात्। तथा च वार्तिकं प्रतिपदविधाना षष्ठी न समस्यत इति। हरि।
श्चाह। कारकं व्यपदिष्टं च श्रूयमाणक्रियेपुनः। प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये इति। एवं च शेषत्वविवक्षायां सर्पिषो ज्ञानं मातुः स्मरणमित्यादीन्यसमस्ता
न्येव साधूनि। हरिस्मरणमित्यादौ तु शेषत्वाविवक्षायां कृद्योगषष्ठ्या समासे बोध्यानि तत्र च कारकपूर्वकत्वात् गतिकारकेत्यादिना कृदुत्तरपदप्रकृतिस्वरेण मध्यो
दात्तत्वं भवति। शेषषष्ठ्या समासे तु अंतोदात्तत्वं स्यात्तच्चानिष्टं। तथा च स्वरार्थेयमष्टसूत्रीति निष्कर्षः। किंच मातुः स्मृतमित्यादौ समासाभावोऽपि फलं। न हि तत्र कारकष
ष्ठी लभ्यते न लोकेति निषेधात्। आह चो निष्ठायां कर्मविषया षष्ठी च प्रतिषिध्यते। शेषलक्षणया षष्ठ्या समासस्तत्र नेष्यत इति। एतच्च मनोरमायां स्थितं। षष्ठी हेतु
[illegible] हेतावित्यनुवर्तते तदाह हेतौ द्योत्य इति। अन्नस्येति। हेताविति तृतीयायां प्राप्तायामनेन षष्ठी। हेतुप्रयोगे किं। अन्नेन वसति। हेतौ द्योत्ये किं। अन्नशब्दात् षष्ठी
यथा स्यादिति किं। अन्नस्य हेतोः [illegible] नमः इत्यत्र युष्मद्शब्दान्मा भूदित्यन्ये। सर्वनाम्नस्तृतीया च। इह सर्वनाम्न इति प्रयोगापेक्षया षष्ठी। पंचम्या तु हेतुशब्दात् षष्ठी

तृतीयेन स्यातामित्याशयेनाह। सर्वनाम्नो हेतुशब्दस्य चेति। कस्मान्न भवतीत्यपेक्षायां अर्थात् सर्वनामहेतुभ्यामिति संबध्यते। अत्र व्याचख्युः। यद्यपि सर्वनाम्न
इति पदस्य पंचम्यंतत्वेऽपि हेतुशब्दस्य विशेषणत्वे सामानाधिकरण्यादप्युपपद्यत इति न क्षतिस्तथापि विशेष्यत्वे त्वयं विधिर्न स्यादिति बोध्यमिति। निमित्तपर्या
यति। पर्यायग्रहणस्य फलमाह। एवमित्यादिना। एतद्वार्तिके न षष्ठी हेतुप्रयोगे सर्वनाम्नस्तृतीया चेति सूत्रद्वयं गतार्थमिति बोध्यं॥ ॥ षष्ठ्यतसा दक्षि
णोत्तराभ्यामतसुजिति अस्य योऽर्थो दिग्देशकालरूपः सोऽर्थो यस्य प्रत्ययस्य सो तसर्थप्रत्ययः अस्तातिप्रभृतिरयं च तद्धितेन योगे इत्यर्थः। अतसुचोऽस्तात्यनंतरत्वेऽपि
लाघवानुरोधेन अस्तात्यर्थ इति नोक्तमित्याहुः। पंचम्या अपवाद इति। ततः पश्चात् स्रंस्यते ध्वंस्यते चेति भाष्यप्रयोगात् पश्चात्शब्दयोगे तु पंचम्यपि साधु। अस्मा

षष्ठ्यतसर्थप्रत्ययेन। २।३।३०॥ एतद्योगे षष्ठी स्यात्। दिक्शब्देति पञ्चम्याः पवादः। ग्रामस्य दक्षिणतः। पुरः पुरस्तात्। उपरि उपरिष्टात्। एन
पाद्वितीया। २।३।३१। एनबन्तेन योगे द्वितीया स्यात्। एनपेति योगविभागात् षष्ठ्यपि। दक्षिणेन ग्रामं ग्रामस्य वा। एवमुत्तरेण। दूरान्तिकार्थैः
षष्ठ्यन्यतरस्याम्। २।३।३४। एतैर्योगे षष्ठी स्यात् पञ्चमी च। दूरं निकटं ग्रामस्य ग्रामाद्वा। ज्ञोऽविदर्थस्य करणे। २।३।५१। जानातेरज्ञानार्थस्य कर
णे शेषत्वेन विवक्षिते षष्ठी स्यात्। सर्पिषो ज्ञानं॥ अधीगर्थदयेशां कर्मणि। २।३।५२। एषां कर्मणि शेषे षष्ठी स्यात्। मातुः स्मरणं। सर्पिषो द
यनं ईशनं वा॥ कृञः प्रतियत्ने। २।३।५३॥ कृञः कर्मणि शेषे षष्ठी गुणाधाने। एधोदकस्योपस्करणं॥ ॥ ते देवभाष्यप्रयोगात् पश्चाच्छब्देना

व्ययीभावो न भवतीति वक्ष्यते। प्रत्ययग्रहणं किं। इह मा भूत् प्राक् ग्रामात् प्रत्यग्ग्रामात्। कृतेऽपि प्रत्ययग्रहणे कुतो नेति चेत् अत्राहुः। कैयटादयः प्रत्ययग्रहणं अ
धिकं क्रियमाणं श्रूयमाणप्रत्ययग्रहणार्थं विज्ञास्यत इति लुप्ते अस्तातौ षष्ठ्यभावः। अन्यारादीत्यत्रांचूत्तरपदस्यापीदं प्रयोजनमुक्तं। तत्रान्यतरच्छक्यमवक्तु
मेकप्रयोजनत्वादिति। प्रत्ययग्रहणं चिंत्यप्रयोजनमिति नु मनोरमायां स्थितं। पुर इति। पूर्वाधरावराणामित्यसिप्रत्यये पुरादेशः। पुरस्तादिति। दिक्शब्देभ्य इत्यादि
ना अस्तातिः। अस्ताति चेति पूर्वस्य पुरादेशः। एनपा। कथं तर्हि तत्रागारं धनपतिगृहादुत्तरेणास्मदीयमिति। उत्तरेणेत्येतत् दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणे
नेति तोरणसमानाधिकरणं तृतीयांतं न त्वेनबंतमित्याहुः। धनपतिगृहानुत्तरेणेति केचित्पठंति तदा तु सम्यगेव। दक्षिणेनेति। दक्षिणस्यामदूर इत्यर्थः॥

एनवृं न्यतरस्यामित्यादिकरणेनप्। दूरान्तिकार्थैः। षष्ठ्यां प्राप्तायां पक्षे पंचम्यर्थं वचनं रहान्यतरस्यांग्रहणं समुच्चयार्थं तेन विप्रकृष्टापि पंचमी समुच्चीयते व्याख्यानात्। नतु सं
निहितेऽपि द्वितीयस्तृतीये। तदेतदाह। पंचमीचेति। सर्पिषो ज्ञानमिति। वस्तुतः करणीभूतं यत्सर्पिः तत्संबंधिनी प्रवृत्तिरित्यर्थः। ज्ञानपूर्विकायां प्रवृत्तौ जानातेर्लक्षणा। अ
धीगर्थ॰ अधिशब्दोच्चारणमिङिकावध्युपसर्गं न व्यभिचरत इति ज्ञापनार्थं अन्यथा स्मृत्यर्थदयेशामित्येव ब्रूयात् इगर्थेति वा रूडः प्रोनेदं ज्ञापकमिति चेत्तर्हि तदंशेऽलरध्या
यनेऽपि तेऽत्यत्राधिशब्दोच्चारणं ज्ञापकमस्तु। अत्र व्याचख्युः कर्मणीति किं। करणे शेषत्वविवक्षायां मा भूत्। मातुर्गुणस्मरणं अत्र माता कर्म गुणास्तु करणं। उभयत्र शे

रुजार्थानां भाववचनानामज्वरेः। २। ३। ५४॥ भावकर्तृकाणां ज्वरिवर्जितानां रुजार्थानां कर्मणि शेषे षष्ठी स्यात्। चौरस्य रोगस्य रुजा। अज्वरिसन्ता
प्योरिति वाच्यं॥ रोगस्य चौरं ज्वरः। चौरं सन्तापो वा। रोगकर्तृकं चौरसम्बन्धि ज्वरादिकमित्यर्थः। आशिषि नाथः। २। ३। ५५॥ आशीरर्थस्य नाथते
शेषे कर्मणि षष्ठी स्यात्। सर्पिषो नाथनं। आशिषीति किं। माणवकनाथनं। तत्सम्बन्धिनी याच्ञेत्यर्थः। जासिनिप्रहणनाटक्राथपिषां
हिंसायां। २। ३। ५६॥ हिंसार्थानामेषां शेषे कर्मणि षष्ठी स्यात्। चौरस्योज्जासनं। निप्रौ संहतौ विपर्यस्तौ व्यस्तौ वा। चौरस्य निप्रहणनं। प्रणि
हननं। निहननं। प्रहणनं वा। नट अवस्यन्दने चुरादिः। चौरस्योन्नाटनं। चौरस्य क्राथनं। वृषलस्य पेषणं। हिंसायां किं। धानापेषणं। व्यव
हृपणोः समर्थयोः। २। ३। ५७॥ शेषे कर्मणि षष्ठी स्यात्। द्यूते क्रयविक्रयव्यवहारे चानयोस्तुल्यार्थता। शतस्य व्यवहरणं। पणनं वा। सम

षत्वविवक्षायामपि मातृशब्दादनानेन सूत्रेण षष्ठी गुणशब्दात्तु षष्ठी शेष इत्यनेनातेन गुणस्मं ॥ र्थयोः किं। शलाकाव्यवहारः। गणनेत्यर्थः। ब्राह्मणपणनं
रणमिति समासो भवतीति॥ ॥ रुजार्थानां। रुजो भंगे। भिदादिपाठादत एव निपातनाद्वा अङि टाप्। रुजा व्याधिरर्थो येषां तेषां रुजार्थानां धातूनां भाववा
चकत्वाव्यभिचारात् भावशब्देनात्र घञादिवाच्यः सिद्धरूपो भाव उच्यते। वक्तीति वचनः बाहुलकात् कर्तरि ल्युट्। प्रकृत्यर्थस्तु न विवक्षितः। न हि भावो वक्ता
संभवति तस्मात् प्रत्ययस्य साधुत्वनिर्वाहायैव वचिरिति बोध्यम् तथा चायमर्थः। भावो वचनः कर्ता येषां तेषां भाववचनानामिति तदेतद्व्याचष्टे। भावकर्तृका
णामिति। रुजार्थानां भावकर्तृकाणामित्येव सूत्रयितुं युक्तं। चौरस्येति। चुराशीलमस्य चौरः। अत्र यां अनेन षष्ठी। रोगस्येति। परं रुजे

कर्मणि शेषत्वविवक्षा १

नि॰ग्रारोगाभावोऽभिधीयते स च रुजायाः कर्ता। कर्तृकर्मणोरिति नियोग शब्दात् षष्ठी। भावकर्तृकाणां किं। श्लेष्मणश्चौररुजा। मायुः पित्तं कफः श्लेष्मेत्यमरः। चौरज्वर इति। इ
ह चौरशब्दात् शेषार्थनामिति षष्ठ्या अप्रवृत्तौ षष्ठी शेष इत्यनेन षष्ठी षष्ठीति समासो भवत्येवेति भावः। सर्पिषो नाथनमिति। सर्पिर्मे भूयादित्याशासनमित्य
र्थः। माणवकनाथनमिति। यद्यपि कर्मत्वविवक्षायां कर्तृकर्मणोरिति यदा षष्ठी तदा आशिष्यपि समासोऽस्त्येव तथापि तत्र गतिकारकोपपदात् कृदिति कृदु
त्तरपदप्रकृतिस्वरः सेमासांजोऽस्ति त्वं तु या ब्रा तावेव न त्वाशिष्यपीति निष्कर्ष इति कौस्तुभे स्थितं। जासि। जसु ताडने जसु हिंसायामिति च चुरादिस्तस्येदं ग्रहणं न
तु दैवादिकस्य जसु मोक्षण इत्यस्य जासीति निर्देशाद्धिंसायामिति वचनाच्चानिग्रहणेनमिति हृतेरनपूर्वस्येति णत्वं। प्रणीति। नेर्गद इति णत्वं। चुरादिरिति। नटनृ
त्तौ क्वित इति तु नाट्यते दीर्घनिर्देशादिति भावः। क्राथनमिति। क्रथ हिंसायामिति घटादौ पठ्यते तस्य मित्त्वेऽपि इह निपातनाद्वृद्धिः मित्त्वफलं तु निपातनात्परत्वाच्चि।

दिवस्तदर्थस्य। २।३।५८॥ द्यूतार्थक्रयविक्रयरूपव्यवहारार्थस्य च दिवः कर्म्मणि षष्ठी स्यात्। शतस्य दीव्यति। तदर्थस्य किं। ब्राह्मणं दी
व्यति स्तौतीत्यर्थः। विभाषोपसर्गे। २।३।५९॥ पूर्वयोगापवादः। शतस्य शतं वा प्रतिदीव्यति। प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने। २।३।६१।
देवतासम्प्रदानेऽर्थे वर्त्तमानयोः प्रेष्यब्रुवोः कर्म्मणो हविर्विशेषस्य वाचकाच्छब्दात् षष्ठी स्यात्। अग्नये छागस्य हविषो वपाया मेदसः प्रे

णमुलोरिति दीर्घे चरितार्थमिति घटादौ वक्ष्यति॥ यत्तु हरदत्तेनोक्तं। घटादिपाठः घटादयः षित इत्यातिदेशिकत्वे अङ् यथा स्या ॥८८ ष्य अनुब्रूहि वा
दित्यैतदर्थ इति। तन्न। घटादयः षित इति हि मध्ये सूत्रितं तेन पूर्वेषां त्वरत्यन्तानामेव षित्त्वं न तु ज्वरादीनां परेषामिति। अत एव त्वरत्यन्तानामस्त्रियो दृष्णानुदा
त्तः षित्वश्चेति घटादौ वक्ष्यति। पणनमिति। स्तुतावेवेति वक्ष्यमाणत्वादायस्याभावः। ब्राह्मणपणनमिति। आयादय आर्द्धधातुके वेत्यायस्य विकल्पः
॥ ॥ दिवस्तदर्थस्य। तच्छब्देन व्यवहृपणोः परामृश्यते तौ च द्यूते क्रयविक्रयव्यवहारे च तुल्यार्थौ पूर्वसूत्रे गृहीताविस्पाशयेनाह। द्यूतेति पूर्वसूत्र एव दिवेः पाठे तदर्थ
स्येति न कर्तव्यमिति यद्यपि लाघवं तथापि योगविभाग उत्तरार्थः। कर्मणीति। इह शेष इति न संबध्यते उत्तरसूत्रे विकल्पारंभसामर्थ्यात्। अन्यथा षष्ठ्या विक
ल्पितत्वात्तया मुक्ते शेषे विभक्त्यंतरस्याप्राप्त्या वृथैव विकल्पारंभः स्यादिति भावः। अन्ये त्वाहुः। लाघवात् पूर्वसूत्र एव दिवो ग्रहणे कर्तव्ये पृथग्योगकरणं।

सामर्थ्यात् इत्यत्र शेष इति न संबध्यते। न चोत्तरार्थत्वात्पृथग्योगस्य नोक्तार्थज्ञापकत्वमिति वाच्यं। संकोचे मानाभावेन फलद्वयस्यापि सुवचत्वादिति शेष इत्यस्यासंबंधादिहत्रि सूत्र्यांतिङं तमुदाहरति। ग्रतस्य दीव्यतीति। प्रेष्यब्रुवोः इष्यते देवादिकस्य लोटो मध्यमपुरुषैकवचनं। प्रेष्येति। तत्साहचर्यात्तु विरपितथाभूत एव गृह्यते। अत एवेह शेषग्रहणं न संबध्यते ति ङं तेन सह समासस्याप्रसक्तत्वात्। प्रेष्यब्रुवोः किं। अग्नये छागस्य हविर्वपां मेदो जुहुधि। हविषः किं। अग्नये गोमयानि प्रेष्य देवजोसे प्रदाने किं। माणवकाय पुरोडाशान प्रेष्य। हविषः। प्रस्थितत्वेन विशेषणे प्रतिषेधो वक्तव्यः इंद्राग्निभ्यां छागस्य हविर्वपां मेदः प्रस्थितं प्रेष्य ॥ ॐ ॥ कृत्वोर्थ। कृत्वसुचोर्थ इवार्थो येषां प्रत्ययानां ते कृत्वोर्थाः। शेष इति। इह दिवस्तदर्थस्येत्यादिसूत्रत्रये विच्छिन्नमपि शेषग्रहणमनुवर्तत इत्याख्याना

कृत्वोर्थप्रयोगे कालेऽधिकरणे। २।३।६४। कृत्वोर्थानां प्रयोगे कालवाचिन्यधिकरणे शेषे षष्ठी स्यात्। पञ्चकृत्वोह्नो भोजनं। द्विरह्नो भोजनं शेषे किं। द्विरहन्यध्ययनं। कर्तृकर्मणोः कृति। २।३।६५। कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात्। कृष्णस्य कृतिः। जगतः कर्त्ता कृष्णः। गुणकर्म णि वेष्यते॥ नेतास्वस्य सुघ्नं सुघ्नस्य वा। कृतिकिं। तद्धिते मा भूत्। कृतपूर्वी कटं। उभयप्राप्तौ कर्मणि। २।३।६६॥ उभयोः प्राप्तिर्यस्मिन्कृति तत्र कर्मण्येव षष्ठी स्यात्। आश्चर्यो गवां दोहोऽगोपेन। स्त्रीप्रत्यययोरकाकारयोर्नायं नियमः। भेदिका बिभित्सा वा रुद्रस्य जगतः। शेषे विभा षा। स्त्रीप्रत्यय इत्येके। विचित्रा जगतः कृतिर्हरेर्हरिणा वा। केचिदविशेषेण विभाषामिच्छन्ति। शब्दानामनुशासनमाचार्येणाचार्यस्य वा क्तस्य च वर्तमाने। २।३।६७। वर्तमानार्थस्य क्तस्य योगे षष्ठी स्यात्। नलोकेत्यस्यापवादः॥ राज्ञां मतो बुद्धः पूजितो वा॥ ॥

नाप्येव कृत्व इति। संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुचा द्वित्रिति। द्वित्रिचतुर्भ्यः सुच्। कर्तृकर्मणोः कृति। शेष इति निवृत्तं कर्तरि च कृतौ जिसूत्रे कृते चकारेण अधीगर्थेति सूत्राच्चतुर्थ्यर्थे बहुलं छंदसीति पर्यंतमनुवृत्तमानस्य कर्मणीत्यस्यानुकर्षणसंभवेपि पुनरत्र कर्मग्रहणं दिग्याद्युत्तरमर्थं संन्निहितस्याधिकरणस्यानुकर्षणप्रसंगेनत न्नि वृत्तये कर्मग्रहणं समवायतस्मात्स्वाख्यातमेवात्र शरणमित्यपरे। कर्तृकर्मणोः किं। शस्त्रेण भेत्ता। कृतिरिति। करणे कृतिः स्त्रियां क्तिन्। कृष्णोत्र कर्ता। कर्मण्युदाहरति जगत इति। कृष्णस्य तु चाभिहितत्वान्न तः षष्ठी न भवति। कृतिकिमिति। नन्विह कर्तृकर्मभ्यां क्रिया आक्षिप्यते तद्वाची तु धातुरेव। धातोश्च द्वये प्रत्ययाः कृतस्तिङश्च

तत्रा ...ङ्प्रयोगे कटं करोतीत्यादौ न लोकेति प्रतिषेधेन भाव्यं ततश्च परिशेषात् कृद्योग एव षष्ठी भविष्यति तस्मात्किं कृद्ग्रहणेनेति प्रश्नः। कृतपूर्वी कटमिति। अत्र क
रोतिक्रियापेक्षमनभिहितं कर्मत्वं कटस्यास्त्येवेति षष्ठी स्यात्तद्धिताधिक्ये तु सा माभूदित्येतदर्थं कृद्ग्रहणमिति भावः। ननु कृतः कटः पूर्वमनेनेत्यस्मिन्विग्रहे क्त
स्य कर्मणि विधानात्तेनैवाभिहितं कर्मेति नैव द्वितीया प्राप्नोति तदपि तदपवादभूता षष्ठी इहाप्यनभिहिताधिकारात्। किंच। कृतशब्दस्य कटसापेक्षतया समासो दु
र्लभ एव तद्धितोऽपीति चेदत्राहुः। पूर्वं कृतमनेनेति विग्रहे अविवक्षितकर्मतया भावे क्तप्रत्यये कृते कृतशब्दस्य कटसापेक्षत्वाभावात्। समासतद्धितौ भवत एव तथा च
कृतपूर्वीत्ययं पूर्वं कृतवानित्यनेन समानार्थः। संपद्यते गुणभूतयापि क्रियया कारकाणां संबंधस्य कटं कृतवानित्यादौ दर्शनात्। अत्रापि करोतिक्रियापेक्षं कर्मत्वं
कटस्याभ्युपगम्यते। तच्च कर्मत्वं न केनाप्यभिहितं। भावे क्तस्य कर्तरि इनिप्रत्ययस्य च विधानात्। अतो असति कृद्ग्रहणे षष्ठी स्यादेवेति। एवं च ओदनस्य पाच
कतमः इत्यत्र षष्ठ्या असाधुत्वे इष्टापत्तिरेव शरणं। कृतपूर्वीत्यत्र समासतद्धितौ भवत एवेत्युक्तं। तत्र समासः सुप्सुपेति बोध्यः। तद्धितस्तु पूर्वादिनिः सपूर्वाच्चेति कर्तरि
इनिः तद्विधौ श्राद्धमनेनेति सूत्रा ------ दनेनेत्यनुवृत्तेः। स्यादेतत्। भिदर्ण्यंतातपर्यायार्हणोत्यनिषुषिति खुचि भेदिकायत्र दनस्य देवदत्तस्य काष्ठानामित्युभा
भ्यामप्यनेन कृद्योगषष्ठी जायते। तत्र मुख्यामुख्यसन्निधौ मुख्यस्यैव कार्यसंप्रत्ययात् प्रयोजककर्तृवाचकादेव स्यादन्यथा पाचयत्योदनं देवदत्तेन यज्ञदत्त इ।
त्यत्र प्रयोज्यप्रयोजकयोरुभयोरपि लकारवाच्यत्वे उभाभ्यामपि कर्तृवाचकाभ्यां प्रथमा स्यात्। मैवं। प्रयोज्यप्रयोजकवाचकाभ्यां भेदेन षष्ठी जायते न त्वेकैवेति नेह मुख्या
मुख्यन्यायप्रवृत्तिः। तत्र तु लकारस्यैकत्वात् कर्मसद्वच्च लकल्पनायां मुख्यां यं प्रवर्तेल इति वैषम्यात्। एवं च ओदनः पाच्यते देवदत्तेन यज्ञदत्तेनेत्यादावुभाभ्यामपि
तृतीया स्यादिष्टैवेति बोध्यं अत एव व्याचक्षते। तदर्हमिति निर्देशात् कर्तृकर्मणोः कृतीत्येतत् नित्यं तथा च धर्यैरामोदमुत्तममिति भट्टिप्रयोगः संगच्छत इति। उभयप्राप्तौ
कृतीत्यनुवर्तते। तेनान्यपदार्थलाभाद्बहुव्रीहिरित्याह। उभयोः प्राप्तिर्यस्मिन्निति। उभयशब्देन कर्तृकर्मणी परामृश्येते। तेन कस्मिन् कृतिकर्तृकर्मणोः
प्राप्तिरिति लाभादाश्चर्यमिदमोदनस्य पाको ब्राह्मणानां च प्रादुर्भाव इत्यत्र नायं नियमः प्रवर्तते तत्र पुरुषे तु स्यादेवात्रातिप्रसंग इति भावः। पूर्वसूत्रेणैव सिद्धे
नियमार्थमिदमिति ध्वनयति। कर्मण्येवेति। एवं च कर्तरि षष्ठीप्रतिषेधोऽस्य सूत्रस्य फलं न तु कर्मणि षष्ठीविधानमिति स्थितं। स्त्रीप्रत्यययोरिति। स्त्रियांक्ति

नित्यधिकारे विहितयोरित्यर्थः। नायं नियम इति। अकाऽकारयोः प्रयोगे कर्मण्येव षष्ठी न तु कर्तरीति यो नियम उक्तः स न प्रवर्तते किं तु कर्तर्यपि षष्ठी प्रवर्तत इति फ
लितोऽर्थः। कथं तर्हि सुट्तिथ्योरिति सूत्रे सुटासीयुटो बाधो नेति वृत्तिः। अत्राहुः। कर्तुः करणत्वविवक्षायां तृतीया बोध्येति। भेदिकेति। भिदनं भेदिका। पर्यायार्हर्ण
त्यत्रिषु ण्वुच् धात्वर्थनिर्देशे ण्वुल्वक्तव्य इत्यनेन ण्वुलित्येके। युवोरनाकाविति यां टापि प्रत्ययस्थादिति इत्वं। विभित्सेति। भेत्तुमिच्छा। भिदेस्सनि हलन्ताच्चेति कित्वा
द्गुणाभावः। अप्रत्ययादित्यकारप्रत्यये टाप्। शेषे इति। अकाऽकाराभ्यामन्यस्मिन् क्तिनादावित्यर्थः। कर्तरि षष्ठी निषेधफलकस्योभयप्राप्ताविति सूत्रस्य तत्रै
व कर्तरि षष्ठी संपादनफलकस्य स्त्रीप्रत्यययोरकाकारयोरिति वचनस्य च प्राक्स्थितत्वात् कर्तर्येव विभाषा अनेन शेषवचनेन क्रियते न तु कर्मणीत्याशये

अधिकरणवाचिनश्च। २।३।६८। क्तस्य योगे षष्ठी स्यात्॥ इदमेषामासितं॥ न लोकाव्ययनिष्ठाखलर्थतृनां। २।३।६९॥ एषां प्रयोगे षष्ठी न स्या
त्। लादेशाः। कुर्वन् कुर्वाणः सृष्टिं हरिः। उ। हरिं दिदृक्षुः अलङ्करिष्णुर्वा। उक। दैत्यान् घातुको हरिः। कमेर्न निषेधः। लक्ष्म्याः कामुको हरिः। अ
व्ययं। जगत् सृष्ट्वा। सुखं कर्तुम्। निष्ठा। विष्णुना हता दैत्याः। दैत्यान् हतवान् विष्णुः। खलर्थः। ईषत्करः प्रपञ्चो हरिणा। तृन्निति प्रत्याहारः। शतृशानचा
विति तृशब्दादारभ्य तृनो नकारात्। शानन्। सोमं पवमानः। चानश्। आत्मानं मण्डयमानः। शतृ। वेदमधीयन्। तृन्। कर्ता लोकान्। द्विषश्शतु
र्वा॥ मुरस्य मुरं वा द्विषन्॥ सर्वोऽयं कारकषष्ठ्याः प्रतिषेधः। शेषषष्ठी तु स्यादेव। ब्राह्मणस्य कुर्वन्। नरकस्य जिष्णुः॥ ॥ ॥

[illegible] इति। जगतः कृतिर्हरेर्हरिणा वेति। अविशेषेणेति। अकाकारभिन्ने कृन्मात्र इत्यर्थः। अनुशासनमिति। अनुशिष्यन्ते असाधुशब्देभ्यः प्रविभज्य बोध्यं
।येनेति करणे ल्युट्। सतां ज्ञातः सतां मत इत्यादि। मतिबुद्धिपूजार्थेभ्यश्चेति वर्तमाने क्तः। पूजितो यः सुरासुरैरित्यादौ तु भूते क्तो न तु वर्तमाने तेन न तृतीया तत्रोपपद्यते। न च
मतिबुद्धीति सूत्रेण बाधः शंक्यः तेन नेत्यधिकारे उपज्ञात इति लिंगेन बाधज्ञापनात्॥ ॐ ॥ अधिकरण। अयमपि निषेधापवादः। आसितमिति। आस्यतेऽस्मि
न्निति आसितं क्तोऽधिकरणे चेत्यधिकरणे क्तः। इदमेषामिति। कर्तरि षष्ठीयं। सकर्मकेभ्यस्त्वधिकरणे क्ते कृते कर्तृकर्मणोर्द्वयोरपि षष्ठी अनभिहितत्वाविशेषात्। इ
दं [illegible] भुक्तमोदनस्य। उभयप्राप्तौ कर्मणीत्ययं नियमस्तु नेह। प्रवर्तते कर्तृकर्मणोः कृतीत्यनन्तरस्यैव षष्ठ्याः तन्नियमाभ्युपगमात्। एतच्च कौस्तुभे स्पष्टं। न लोके

भजिघृ ... रिल्वदिना शप्रसंगात् तृन्नामिति स्पष्टम्। लत्वं न कृतं। उश्च उकश्च उः उकौ, लश्च उकौ चेति विग्रहः। लइति लडादीनां सामान्यग्रहणं तेषां च साक्षात् प्रयोगो न संभवतीति
तदादेशा गृह्यन्त इत्याह। लादेशा इति। उदाहृतिष्वेते इति शेषः। कटं कारयांचकारेत्यत्र कृत्संज्ञकलिङन्तामन्तेन योगेपि कटस्य कर्तृकर्मणोः कृतीति षष्ठी न भवति। आमनु
तिसु न पिलादेशत्वादित्याहुः। नन्वेवमपि वभ्रिर्वज्रं पपिः सोमं ददिर्गा इत्यत्र न लोकेति निषेधाप्रवृत्तेः षष्ठी दुर्वारैवा नहि किकिनौ लकारौ नापि तदादेशौ नैषदो
षः किकिनौ लिट् चेत्यनेन लिट्कार्यातिदेशः क्रियते न तु लिट्संज्ञा तथा च विशेषातिदेशे च सामान्यमप्यतिदिश्यत इति नानुपपत्तिः। दिदृक्षुरिति। सनाशं
समिक्षुः। उकारेण कृतो विशेषणान्न तदन्तमपि लभ्यत इत्याशङ्क्याह। अलंकरिष्णुरिति। अलंकृञ् निराकृञित्यादिना इष्णुच्। घातुक इति। लषपतेत्यादिना।
उकञ्। ईषत्कर इति। ईषद्दुःसुष्वित्यादिना खल्। अर्थग्रहणादीषत्पानः सोमो भवतेत्यप्युदाहार्यम्। अव्याप्तिपरिहर्तुमाह। प्रत्याहार इति। पचमान इति

अकेनोर्भविष्यदाधमर्ण्ययोः। २।३।७०॥ भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थेन श्चयोगे षष्ठी न स्यात्। सतः पालकोऽवतरति। व्रजं गामी
शतं दायी। कृत्यानां कर्तरि वा। २।३।७१॥ षष्ठी वा स्यात्। मया मम वा सेव्यो हरिः। कर्तरीति किं। गेयो माणवकः साम्नां। भव्यगेयेति कर्तरि
यद्विधानादनभिहितं कर्म। अत्र योगो विभज्यते। कृत्यानाम् उभयप्राप्ताविति नेति चानुवर्तते। तेन नेतव्या व्रजं गावः कृष्णेन। ततः कर्तरि

पूङ्यजोः शानन्। मंसूयमान इति। मडि भूषायामित्यस्मात्। ताच्छील्यवयोवचनेति चानश्। अधीयन्निति। इङ्धार्योरिति शतृ। ॥ खलर्थः
ननौ दिषु लट इत्यनेन कृतत्वाल्लादेशा इत्यसिद्धेः प्रत्याहारग्रहणमाश्रीयत इति भावः। तृन्निति। न च्छीलादिषु तृन्निति विहितस्तृन्प्रत्ययः। तृन्निति प्रत्याहारग्रहण
णान्नित्यं निषेधे प्राप्ते विकल्पमाह। द्विष इति। द्विष अप्रीतावित्यस्मात् द्विषोऽमित्र इति विहितोयं शतृप्रत्ययः। तत्प्रयोगे वा षष्ठीनिषेध इत्यर्थः। सर्वोयमि
ति। अनन्तरस्येति न्यायादिति शेषः। शेषषष्ठी त्विति शाब्दबोधवैलक्षण्यमस्तीति भावः। एवं चाश्चर्यो गवां दोहोऽगोपेनेत्यत्र शेषत्वविवक्षायां कर्तर्यपि षष्ठी
भवत्येवेति बोध्यं॥ ॥ अकेनोः। आधमर्ण्ये अकस्यासंभवादाह। भविष्यत्यकस्येति। इनस्तु उभयोः संभवादाह। भविष्यदाधमर्ण्यार्थेन श्चयोग इति।
यथासंख्यं तु न भवति। भाष्ये अकस्य भविष्यति इन आधमर्ण्ये चेति योगं विभज्य व्याख्यानात्। इह भविष्यदिति स्वर्यते तेन भविष्यति गम्यादय इत्यधिकारे विहि

नलुमुनण्वुलावितिण्वुलेवगृह्यतरस्मात्क्रियेनोदाहरतिसतः पालकइति। सनइतिशत्रन्तं तयसुकालसामान्ये ण्वुल् तृचावितिण्वुलुक्तः सत्र न निषेधः। ओदनस्यपाक: पुत्रपौत्राणां
दर्शक इतीतिभावः। व्रजंगामीति। आवश्यकाधमर्ण्ययोर्णिनिरित्यावश्यके णिनिः। यद्यप्ययंकालसामान्ये विहितस्तथापि भविष्यतिगम्यादय इत्युक्तेर्भवि
ष्यदर्थकः। गम्यादयः केचिदुणादयः केचिदष्टाध्यायीगता इति हरदत्तः। ननु गत्यर्थकर्मणि चतुर्थीविधेरेवसिद्धे द्वितीयाग्रहणमपवादविषयेपि द्वितीयार्थ
मित्यर्थमिति व्रजंगामीति सिध्यत्येवेति चेदत्राहुः। इहैवसूत्रे ग्रामंगामीति भाष्योदाहरणान्न तु सूत्रेणांगीक्रियते तेन ग्रामस्य गन्तेति षष्ठ्येव साध्वी। ननु ग्रामंगन्तेति द्वितीयेति। श
तंदायीति। आवश्यकेआधमर्ण्ये णिनिः। भविष्यदाधमर्ण्यार्थेन शतयोग इत्युक्तत्वान्नेह निषेधः। अवश्यंकरोत्यवश्यंकारी कटस्य। गम्यादित्वाभावाद्वर्तमानेप्ययं। कृत्या
नां कर्तरिकर्मणि णेरिति नित्ये प्राप्ते विभाषेयं। सेव्यइति। षष्ठ्यन्तसेवायां कृत्यस्य हरिरिति। कर्मणि ण्यत्। योगो विभज्यत इति भाष्यकारैरिति शेषः। उभयप्राप्ताविन्यनेन कर्तरि निष

तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्॥२।३।७२॥ तुल्यार्थैर्योगे तृतीया वास्यात्पक्षे षष्ठी। तुल्यस्सदृशस्समो वा कृष्णस्य। कृष्णेन वा। अतुलो
पमाभ्यां किं। तुला उपमा वा कृष्णस्य नास्ति। चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः॥२।३।७३॥ एतदर्थैर्योगे चतुर्थी वास्यात्पक्षे षष्ठी
आशिषि। आयुष्यं चिरंजीवितं कृष्णाय। कृष्णस्य वा भूयात्। एवं मद्रं भद्रं कुशलं निरामयं सुखं शं अर्थः प्रयोजनं हितं पथ्यं भूयात्। आशि
षि किं। देवदत्तस्यायुष्यमस्ति। व्याख्यानात्सर्वत्रार्थग्रहणं मद्रभद्रयोः पर्यायत्वादन्यतरो न पठनीयः॥ ॥

॥ शेषसिद्धे कर्मणि निषेधार्थमिदं। गु
णकर्मणि विवक्षित इति तूभयप्राप्तिरहितस्थलेनेनाश्वस्यान्यादौ न्यक्कृतार्थमिति दिक्॥ ॥ तुल्यार्थैः। शेषषष्ठ्यां प्राप्तायां विकल्पेन तृतीयाऽनेन विधीयते तयामु
क्तेषष्ठ्येव भवति तदाह। पक्षे षष्ठीति। बहुवचननिर्देशादेव पर्यायग्रहणे सिद्धे तुल्यार्थैरित्यर्थग्रहणं पदान्तरनैरपेक्ष्येण ये तुल्यार्थास्तेषां ग्रहणार्थं तेन गौरिव गवय इ
त्यादौ न षष्ठ्याहुः। कथं तर्हि तुलां यदारोहति दन्तवाससेति कालिदासः। स्फुटोपमं भूतिसितेन शंभुनेति माघश्च। उच्यते। सहयुक्तेप्रधान इति तृतीया नु चात्र सहशब्द
योगे नेति शंकां विनापि तद्योगे तृतीयेत्यभ्युपगमात्। वेति वर्तमाने अन्यतरस्यांग्रहणमुत्तरसूत्रे चकारेण स्वस्यानुकर्षणार्थं। अन्यथा हि। तृतीयैवानुकृष्येत स
न्निधानात्। तुल्य इति। तुलया संमितस्तुल्यः। नौवयोधर्मेत्यादिना यत्। तुला उपमा वेति। तोलनं तुला। अस्मिन्नेव सूत्रे तुलागङो निपातनात्साधुरिति माधवः। उपमिति

रूपम्। आतश्चोपसर्ग इत्यङ्। ह्वितमिति। ह्वि तु योगे चेत्यनाशिषि चरितार्थमित्याशिष्ययं विकल्प इति भावः। व्याख्यानादिति। सूत्रे अर्थशब्दात् पृथङ्निमित्तं तथा च ह्वं ह्वणं वा न तु अर्थशब्देन बहुव्रीहिरिति भावः। इति षष्ठी॥ ❁ ॥ आधारः। आध्रियतेऽस्मिन्नित्याधारः। अध्यायन्यायेति सूत्रे अवहाराधारस्योपसंख्यानादधिकरणे घञ्। तदाधारः कस्येत्याकाङ्क्षायां कारकाधिकारात् क्रियाया इति लभ्यते। इयं च संज्ञा साक्षात् क्रियाधारयोर्न संभवति पराभ्यां कर्तृकर्मसंज्ञाभ्यां बाधितत्वात्। अतो व्याचष्टे कर्तृकर्मद्वारेति। एवं च भूतले घट इत्यादौ अस्तीति क्रियाध्याहारो बाध्यः। त्रिधेति। एतच्च संहितायामिति सूत्रे भाष्ये स्पष्टं। नचामालेऽङ्गुल्याद्य र्थसामीपिकमधिकरणं च तुर्थमपि केचिदिच्छन्ति। कटे आस्त इति। कर्तृद्वारा क्रियाधारस्योदाहरणमिदं। कर्मद्वारा क्रियाधारस्य तु स्थाल्यां पचतीति। वैषयिकाधारमुदाहरति। मोक्ष इति। अभि

आधारोऽधिकरणम्। १।४।४५॥ कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञं स्यात्। सप्तम्यधिकरणे च। २।३।३६॥ अधिकरणे सप्तमी स्यात्। चकाराद्दूरान्तिकार्थेभ्यः। औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा। कटे आस्ते। स्थाल्यां पचति। मोक्षे इच्छाऽस्ति। सर्वस्मिन्नात्माऽस्ति। वनस्य दूरेऽन्तिके वा। दूरान्तिकार्थेभ्य इति विभक्तित्रयेण सह चतस्रोऽत्र विभक्तयः फलिताः। क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्। अधीती व्याकरणे। अधीतमनेनेति विग्रहे। इष्टादिभ्यश्चेति कर्तरीनिः। साध्वसाधुप्रयोगे च। साधुः कृष्णो मातरि। असाधुर्मातुले। निमित्तात्कर्मयोगे। निमित्तमिह फलं योगः संयोगसमवायात्मकः। चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्। केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः॥ १॥ हेतौ तृतीयाऽत्र प्राप्ता तन्निवारणार्थम्। सीमाऽण्डकोशः। पुष्कलको गन्धमृगः। योगविशेषे किम्। वेतनेन धान्यं लुनाति॥ ॥

व्यापकस्य तु सर्वस्मिन्निति तिलेषु तैलमित्याद्यप्यभिव्यापकस्योदाहरणमाहुः। चतस्र इति। प्रातिपदिकार्थमात्रे इत्यर्थः। दूरान्तिकार्थेभ्य इत्यस्येहानुवर्तनादधिकरणेऽप्येते बोध्याः। क्तस्येन्विषयस्येति। इन् इन्नन्तः शब्दो विषयो वर्तनभूमिर्यस्य क्तान्तस्य तस्येत्यर्थः। अन्ये त्वाहुः। इनो विषय इति षष्ठीसमासः विषयशब्देनेहाप्रकृतिरुच्यते क्तान्तस्य नः प्रकृतत्वादिति। अधीती व्याकरणे इति। भावे क्तप्रत्यये तत इष्टादिभ्यश्चेति कर्तरी नौ कृते पश्चाद्गुणभूतक्रियया संबध्यमानं व्याकरणमनभिहितकर्मेति कृतपूर्वी कटमितिवद्द्वितीया प्राप्ता सा मा भूत्। समधीती व्याकरणे इत्यादौ त्वकर्मकतुर्योगनिमित्तकस्य कालकर्मणो बहिरङ्गत्वादिहाग्रहणमिति सप्तम्यभावः। न चैवं

तत्र द्वितीयापि न स्यादिति वाच्यं। लक्ष्यानुरोधेन द्वितीयाविधाने व्यक्तिपक्षाश्रयणात्। साध्वसाधुप्रयोगे च। यत्रार्चा न विवक्षिता किं तु तत्त्वकथनमात्रं तत्रापि स-
प्तम्यर्थं वार्त्तिकेऽस्मिन् साधुग्रहणं। साधुर्भृत्यो राज्ञीत्यादि। यथा साधुनिपुणाभ्यामिति सूत्रे साधुग्रहणं त्वर्चायां विवक्षितायां प्रतियोगे सप्तमीनिवृत्त्यर्थमिति विवेकः।
निमित्तमिह फलमिति। यदि तु कारणमित्युच्येत तर्हि जाड्येन बद्ध इत्यादावतिप्रसंगः स्यादिति भावः। चर्मणीति। चर्म द्वीप्यादीनां समवायः संबंधः। हेतुतृतीये-
ति। तादर्थ्ये चतुर्थ्यपि बोध्या। सीमा उकोश इति। तथा च मेदिनीकारः। सीमाघाटस्थितिक्षेत्रेष्वंडकोशे च स्त्रियामिति। अथ पुष्कलको गंधमृगे क्ष णकीलयो-
रिति च। हरदत्तस्तु पुष्कलकः शंकुः। सीम्नि सीमज्ञानार्थं हतो निहतः निखात इत्याह। अस्मिंस्तु पक्षे सीमपुष्कलकयोः संयोगसंबंधः॥ ○ ॥ यस्य च। निर्ज्ञातका-
लाद्धि क्रिया अनिर्ज्ञातकालायाः क्रियायाः कालपरिच्छेदकत्वाल्लक्षणं तत्र प्रसिद्धक्रियाश्रययोः कर्तृकर्मणोर्वाचकात् ब्राह्मणादिशब्दाल्लक्ष्यलक्षणभाव

यस्य च भावेन भावलक्षणम्। २।३।३७॥ यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी स्यात्। गोषु दुह्यमानासु गतः। अर्हाणां कर्तृत्वेऽनर्हाणाम-
कर्तृत्वे तद्वैपरीत्ये च॥ सत्सु तरत्सु असन्त आसते। असत्सु तिष्ठत्सु सन्तस्तरन्ति। सत्सु तिष्ठत्सु असन्तस्तरन्ति। असत्सु तरत्सु सन्तस्तिष्ठन्ति। षष्ठी च
चानादरे। २।३।३८॥ अनादराधिके भावलक्षणे षष्ठीसप्तम्यौ स्तः॥ रुदति रुदतो वा प्राव्राजीत्॥ रुदन्तं पुत्रादिकमनादृत्य संन्यस्तवानित्य

संबंधे षष्ठ्यां प्राप्तायामियं सप्तमी। लक्षकत्वं क्रियायाः साक्षादाश्रयस्य तु ब्राह्मणादेः क्रियाद्वारेणेति बोध्यं। ब्राह्मणेष्वधीयानेषु गत इति कर्त्रुदाहरणं। कर्मण्याह।
गोष्विति। अर्हाणामित्यादि। यस्यां क्रियायां ये उचितास्ते अर्हाः। तेषां कर्तृत्वे विवक्षिते सति तत्र सप्तमी वाच्या। तथा यस्यां क्रियायां येषां कर्तृत्वमनुचितं तेषामकर्तृ-
त्वे विवक्षिते च सप्तमी वाच्या। तथा तद्वैपरीत्ये येषां कर्तृत्वमुचितं तेषामकर्तृत्वे येषां तु नोचितं तेषां कर्तृत्वे च सप्तमी वाच्येत्यर्थः। आद्यमुदाहरति। सत्सु तरत्सु इति
सन्तो हितकरणक्रियार्हाः कर्तारश्च। द्वितीयमुदाहरति। असत्सु तिष्ठत्सु इति। अत्र तरणक्रियायां असतामनर्हत्वमकर्तृत्वं च तिष्ठत्स्विति पदेन प्रतीयते तद्वैपरी-
त्ये प्रथममुदाहरति। सत्सु तिष्ठत्स्विति। सतां हितकरणमुचितं तेषां चाकर्तृत्वं तिष्ठत्स्वित्यनेन बोध्यते। द्वितीयमुदाहरति असत्सु तरत्स्विति असतां हितकरणमनुचितं
तेषां कर्तृत्वं तरत्स्वित्यनेन गम्यते। यद्यपीदं यस्य च भावेनेत्येव सिद्धं तथापि लक्ष्यलक्षणभावाविवक्षायां सप्तम्यर्थमिदमिति कैयटादयः। तत्त्वतस्तु व्यर्थमेवे-

दमित्यन्ये। षष्ठी चानादरे। अनादर इति। यस्य च भावेनेत्यनेन सप्तमी। अनादरे सति यो भावस्तस्य यन्नाति   तदेतत्फलितमाह। अनादराधिक्य इति। केचित्तु [illegible]
सम्बन्धे अनादराधिक्ये तु षष्ठीसप्तम्याविति निष्कर्षः॥ ॥ स्वामीश्वरा। स्वाम्यर्थेति वक्तव्ये स्वाम्यादित्रयग्रहणं पर्यायान्तरनिरासार्थं। विरूपाणामपि समानार्थानामित्येक-
शेषोऽत्र न भवति स्वरूपपरत्वेन समानार्थकत्वाभावात्। दायमादत्ते इति दायादः। सोपसर्गाद्दाधातोः अत एव निपातनात्कः। गवां गोषु वा दायाद इत्यत्र यद्यपि
गवामित्येतत् समुदायस्य विशेषणं तथापि दीयते इति दायो व्युत्पत्त्या अवयवार्थभूतमंशं स्पृशत्येव तथा चात्र गवात्मकस्यांशस्य आदातेति फलितोऽर्थः

स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च। २।३।३९। एतैस्सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः। षष्ठ्यामेव प्राप्तायां पाक्षिकसप्तम्यर्थं वच-
नं। गवां गोषु वा स्वामी। गवां गोषु वा प्रसूतः। गा एवानुभवितुं जात इत्यर्थः॥ आयुक्तकुशलाभ्यां चासेवायां। २।३।४०॥ आभ्यां योगे षष्ठी-
सप्तम्यौ स्तस्तात्पर्येऽर्थे। आयुक्तो व्यापारितः। आयुक्तः कुशलो वा हरिपूजने हरिपूजनस्य वा। आसेवायां किं। आयुक्तो गौः शकटे ईषद्यु-
क्त इत्यर्थः। यतश्च निर्धारणं। २।३।४१। जातिगुणक्रियासंज्ञाभिस्समुदायादेकदेशस्य पृथक्करणं यतस्ततः षष्ठीसप्तम्यौ स्तः। नृणां नृषु वा
ब्राह्मणः श्रेष्ठः। गवां गोषु वा कृष्णा बहुक्षीरा। गच्छतां गच्छत्सु वा धावन् शीघ्रः। छात्राणां छात्रेषु वा मैत्रः पटुः॥ पञ्चमी विभक्ते। २।३।४२।
विभागो विभक्तं निर्धार्यमाणस्य यत्र भेद एव तत्र पञ्चमी स्यात्। माथुराः पाटलिपुत्रकेभ्य आढ्यतराः। साधुनिपुणाभ्यामर्चायां सप्तम्य-
प्रतेः। २।३।४३। आभ्यां योगे सप्तमी स्यादर्चायां न तु प्रतेः प्रयोगे। मातरि साधुर्निपुणो वा। अर्चायां किं। निपुणो राज्ञो भृत्यः। इह तत्त्वकथने ता-
त्पर्यं। अप्रत्यादिभिरिति वक्तव्यं॥ साधुर्निपुणो वा मातरं प्रति पर्यनु वा॥

९ पंचमीविभक्ते। भेद एवेति। न तु शब्दोत्तरोपात्तसामान्याक्रान्तत्वेनेति भा-
वः। तत्र पंचमी स्यादिति। नन्वेवं माथुरा इत्यत्रापि पंचमी स्यात्। मैवं। पूर्वसूत्रमिहानुवर्तते तेन यतो निर्धार्यते तत एवेत्यर्थात् निर्धारणावधेरेव पंचमी प्रवृ-
त्तेः। अनभिहिताधिकारान्माथुरा इत्यत्र नातिप्रसंग इत्यन्ये। माथुरा इति। न त्वत्र निर्धारणावधेर्निर्धार्यमाणस्य च गवां कृष्णेत्यादाविव सामान्यविशे-
षभावोऽस्ति। किंतु शब्दोपात्तयोर्धर्मयोर्विरोध एव। इदं च सूत्रं बुद्धिपरिकल्पितापायमाश्रित्यापादानप्रकरणे भाष्ये प्रत्याख्यातं। साधुनिपुणाभ्यामर्चायां॥

पुणकर्मणि। शुभे अस्मान्निपूर्वाद्दिगुपधलक्षणः कः। अर्च पूजायामस्माद्गौवादिकात्। गुरोश्च हल इत्यप्रत्यये टाप्। चौरादिकाण्णुच्यासश्रंथ इति युच्यर्चनेति स्यात्। निपुणे
रात्रइति। साधुशब्दप्रयोगेत्वर्चाविनासप्तमीभवत्येवसाध्व साधुप्रयोगेचेतिवार्त्तिकात्। अप्रत्यादिभिरिति। लक्षणेत्थमितिसूत्रोपात्ताः प्रत्यादयः॥ ॥ प्रसितोत्सु
कातत्परेप्रसितासक्ताविन्यमरः। उत्सुकसाहचर्यात्प्रसितोपितत्परएवहगृह्यतेरूढ्याचतेनप्रकर्षेणसितः शुक्ल इत्यर्थेनभवति। नक्षत्रेचलुपि। लुपशब्दोत्रार्थ
विशेषेलाक्षणिकइत्याशयेनाह। योलुपसंज्ञयेत्यादि। अधिकरणइति। एतच्चसप्तम्यधिकरणेचेत्यतोमंडूकप्लुत्यानुवर्त्ततइतिभावः। अधिकरणेकिं। मूलंप्रतीक्षते।

प्रसितोत्सुकाभ्यांतृतीयाच।२।३।४४॥ आभ्यांयोगेतृतीयास्याच्चात्सप्तमी। प्रसितउत्सुकोवाहरिणाहरौवा। नक्षत्रेचलुपि।२।३।४५॥
नक्षत्रेप्रकृत्यर्थेयोलुप्संज्ञयालुप्यमानस्यप्रत्ययस्यार्थस्तत्रवर्त्तमानात्तृतीयासप्तम्यौस्तोऽधिकरणे। मूलेनावाहयेद्देवींश्रवणेनविसर्जये
त्। मूलेश्रवणेइतिवा। लुपिकिं। पुष्येशनिः। सप्तमीपंचम्यौकारकमध्ये।२।३।७॥ शक्तिद्वयमध्येयौकालाध्वानौताभ्यामेतेस्तः। अद्यभुक्त्वायंद्व्य
हेद्व्यहाद्वाभोक्ता। कर्तृशक्त्योर्मध्येऽयंकालः। इहस्थोयमिष्वासःक्रोशाल्लक्ष्यंविध्येत्। कर्तृकर्मशक्त्योर्मध्येऽयंदेशः। अधिकशब्देनयोगेसप्त
मीपंचम्याविष्येते। तदस्मिन्नधिकमितियस्मादधिकमितिचसूत्रनिर्देशात्। लोकेलोकाद्वाऽधिकोहरिः। अधिरीश्वरे।१।४।९७॥ स्वस्वामिस
म्बन्धेऽधिः कर्मप्रवचनीयसंज्ञःस्यात्। यस्मादधिकंयस्यचेश्वरवचनंतत्रसप्तमी।२।३।९॥ अत्रकर्मप्रवचनीययुक्तेसप्तमीस्यात्। उपपरा
र्द्धेहरेर्गुणाः परार्द्धादधिकाइत्यर्थः। ऐश्वर्येतुस्वस्वामिभ्यांपर्यायेणसप्तमी। अधिभुविरामः। अधिरामेभूः। सप्तमीशौण्डैरितिसमासप

मूलायस्पृहयति। मूलेनेति। नक्षत्रेणयुक्तः कालइत्यणोलुबविशेषइतिलुप्। नक्षत्रइतिकिं। पंचालेषुतिष्ठतिइहजनपदेलुपितिलुप्। सप्तमीपंचम्यौ। कालाध्वनोर
त्यंतसंयोगइत्यतः कालाध्वनोरित्यनुवर्त्ततेतच्चपंचम्याविपरिणम्यतेतदाह। यौकालाध्वानौताभ्यामिति। इहकालाध्वभ्यांविभक्त्योर्यथासंख्यंनभवत्यस्वरितत्वा
त्। अद्यभुक्त्वायमिति। नन्वत्रकर्ताएकएवतत्कथंकारकयोर्मध्येकालः। सत्यं। नात्रशक्त्याश्रयंद्रव्यंकारकमितिव्यवह्रियतेकिंतुशक्तिरेव। साचकालभेदात्भि
द्यतएव। एकाहेऽद्यभुजेःसाधनंअपराह्णेहेतीतेभुजेस्तदेतव्याचष्टेकर्तृशक्त्योर्मध्येऽयंकालइति। यस्मादधिकं। उपपरार्द्धेइति। उपोधिकेचेत्यनेनउपेत्यस्य

कर्मप्रवचनीयसंज्ञा। प्रत्ययं च स्वरं च वचनमित्यस्य तं त्वादिना अर्थद्वयं विवक्षितं। तथा हि। यस्येत्यनेन स्वं निर्दिश्यते यस्य स्वस्य संबंधी ईश्वर उच्यते ततः सप्तमीति व्यां।
ख्याने स्ववाचकात् सप्तमीत्येकोर्थः। ईश्वरशब्दो भावप्रधानः। यन्निष्ठमीश्वरत्वमुच्यते ततः सप्तमीति व्याख्याने स्वामिवाचकात् सप्तमीत्यपरः। एवं स्थिते फलि
तमाह। स्वस्वामिभ्यां पर्यायेणेति। अन्यतरस्मादित्यनेनैव सप्तम्या इतरनिष्ठसंबंधस्याप्युक्तत्वाद्युगपदुभाभ्यां न सप्तमी स्यादिति भावः।

रामाधीना। अषडक्षेत्यादिना खः॥ विभाषा कृञि ।१।४।९८॥ अधिः करोतौ प्राक्संज्ञो वा स्यादीश्वरार्थे। यदत्र मामधिकरिष्यति
विनियोक्ष्यत इत्यर्थः। इह विनियोक्तुरीश्वरत्वं गम्यते। अगतित्वात् तिङि चोदात्तवतीति निघातो न॥ इति विभक्त्यर्थाः॥

कृञोर्थः स्वाम्याभावे त्वधिरामं। यदत्रेति। यो मामधिकरिष्या। विनियोक्ष्यते तस्य मह्यं नियोक्तुरीश्वरत्वं गम्यत इत्यर्थः॥ तिङि चोदात्तेति। उदात्तवति तिङि परे ग
तिर्निहन्यत इति सूत्रार्थः॥ अत्र करिष्यतीति तिङन्त उदात्तवान्। तिङ्ङतिङ इति निघातस्य निपातैर्यद्यदी इत्यादिना निषेधात् निघातो नेति। मामिति द्वितीयात्तुक
॥ भौसद्वितीयेत्यनेनैव सिध्यतीति भावः॥ इति सप्तमी ॥ ॥ ॥ ॥

धः परस्परसंबंधः सा व्यपेक्षा सैव वाक्ये राज्ञः पुरुष इत्यादौ न तु वृत्तौ विषक्ष। या सत्यां योग्यः संनिहितो योग्यश्चानन्तरेन संबंधो भ्युपेयते पृथा राज्ञः पुरुषोऽश्व १ ऋ
समर्थः पदविधिः॥ सामर्थ्यं च द्विविधं व्यपेक्षालक्षणमेकार्थीभावलक्षणं चेति। तत्र स्वार्थपर्यवसायिनां पदानामाकांक्षादिवशात् यश्च राज्ञो देवदत्तस्य च पुरुष इति।
एकार्थीभावस्तु राजपुरुष इत्यादि वृत्तावेवास च प्रक्रियादशायां पृथगर्थत्वेन प्रथममगृहीतस्य विशिष्टैकार्थत्वरूपः। अत एव राजपुरुष इत्यत्र राज्ञि ऋद्धस्येति विशेषणं
नान्वेति पदार्थैकदेशत्वात्। न चैवं देवदत्तस्य गुरुकुलमित्यादावनन्वयापत्तिः। तत्रापि देवदत्तीत्तरषष्ठ्यर्थस्य गुरुणाऽन्वयादिति वाच्यं। देवदत्तस्य प्रधानभूतकु
लेनैवान्वयात्। संबंधसामान्यस्थितं गुरुद्वारक एव षष्ठ्यर्थो न तु तदितरः। उक्तं च। समुदायेन संबंधो येषां गुरुकुलादिना। संस्पृश्यावयवांस्ते तु युज्यंते तद्वतां सह
इति। संबंधिशब्दसंबंधिकपदार्थस्यैकदेशत्वेऽपि भवत्येव विशेषणान्वयः उक्तं च। संबंधिशब्दः सापेक्षो नित्यं सर्वः समस्यते। वाक्यवत्सा व्यपेक्षा हि वृत्तावपि न हीयते
इति। नन्वेवं तापि नित्यसापेक्षत्वादेकदेशत्वेऽपि ऋद्धस्येति विशेषणेनान्वयोऽस्तु। मैवं। राजद्दशितुरीशितव्यं प्रति साकांक्षत्वेऽपि ऋद्धं प्रत्यनाकांक्षत्वात्। ननु वाक्ये

समर्थः पदविधिः॥२।१।१॥ पदसम्बन्धी यो विधिः स समर्थाश्रितो बोध्यः॥ प्राक्कडारात्समासः॥२।१।३॥ कडाराः कर्मधारय इत्यतः प्राक्स
मास इत्यधिक्रियते॥ सह सुपा॥२।१।४॥ सहेति योगो विभज्यते। सुबन्तं समर्थेन सह समस्यते। योगविभागस्येष्टसिध्यर्थत्वात्क्वचित्पदयति
ङ्न्तोत्तरपदोऽयं समासः सच छन्दस्येव। पर्य्यभूषत्। अनुव्यचलत्। सुपा॥२।१।४॥ सुप्सुपा सह समस्यते। समासत्वात्प्रातिपदिकत्वं। सुपो
धातुप्रातिपदिकयोः॥२।४।७१॥ एतयोरवयवस्य सुपो लुक्स्यात्। भूतपूर्वे चरडिति निर्देशात्पूर्वनिपातः। पूर्वम्भूतः भूतपूर्वः। इवेन समा

लोप यैवाव्ययत्वशक्योपपत्तौ विशिष्टार्थविषयकशक्त्यंतरमेवमास्तु। सत्यं बहूनां वृत्तिधर्माणां वचनैरेवासो विभक्त्यलोपश्च। जीमूतस्येव। अव्ययीभावः॥२।१।५॥
साधने स्यान्महन्नौरवतस्मादेकार्थीभाव एवआस्थितः वकारादिनिषेधो यथवद्व्युत्पत्तिभजनं कर्तव्यं तेन्यापसिद्धत्वस्माकं तदिति स्थितं तथा हि। धवखदिरावितिद्व
न्द्वे व कोडीकृतार्थत्वाच्चकारो न प्रयुज्यते तथा चित्रगवादौ पदत्वरात्वपातु वचनं कर्तव्यं निरूढलक्षणं तु शक्तितो नातीव भिद्यते। किं च प्राप्तमुदकं [illegible]मिति व्यस्ते समर्थी
चीनमुदकमिद्धिविशेषण व समस्तेऽपि उदकविशेषणप्रयोगः प्राप्तः स च वृत्तस्य विशेषणयोगो नेति वचनेनैव वारणीयः नामार्थयोरभेदान्वयः प्रत्ययार्थः प्र
धानमिति व्युत्पत्तिस्त्यागश्च प्राप्तौदक इत्यादौ उदककर्तृकप्राप्तिकर्मत्वाद्यर्थाभ्युपगमात्। एकार्थीभावे तु लाघवमिति दिक्। परग्रहणं किं। वर्णविधौ समर्थप

अव्ययंविभक्ति। विभक्तिरिहकारकशक्तिः। विभज्यते। अनयाप्रातिपदिकार्थ इतिव्युत्पत्तेः। अतएववक्ष्यतिविभक्त्यर्थादिषुविद्यमानमव्ययमिति। प्रथमानिर्दिष्टा। अत्र समास
पदंतद्विधायकेलाक्षणिके अन्यथा विकीर्षितेसमासेयत्प्रथमांतमितिव्याख्यानप्रसक्त्याकृत्स्नंश्रितइत्यादौश्रितादिष्वतिप्रसंगइत्याशयेनाह। समासशास्त्र इति। विग्रह
इति। अनुवर्तमानेनसमासग्रहणेनत्र[illegible]गृहीलक्ष्यत इतिभावः। नतुतस्येति। अनंतरस्येतिन्यायात्पूर्वसूत्रेणविहितस्यपूर्वनिपातत्वंननिषिद्ध्यते। तेनकुमारिश्रितइत्या
दौनदोषः। गोस्त्रियोः। उपसर्जनस्येतिगोस्त्रियोर्विशेषणमेकवचनंतुप्रत्येकाभिप्रायेण। गोस्त्रीभ्यांतुप्रातिपदिकंविशेष्यते। विशेषणेनतदंतविधिरित्याशयेनाह। [illegible]

अव्ययंविभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु। २।१।६।।
अव्ययमितियोगोविभज्यते। अव्ययंसमर्थेनसहसमस्यते। सोऽव्ययीभावः। प्रथमानिर्दिष्टंसमासउपसर्जनं। १।२।४३।। समासशास्त्रेप्रथमानि
र्दिष्टंउपसर्जनसंज्ञंस्यात्। उपसर्जनम्पूर्वं। २।२।३०।। समासउपसर्जनम्प्राक्प्रयोज्यं। एकविभक्तिचाऽपूर्वनिपाते। १।२।४४।। विग्रहेयन्नियतं
विभक्तिकन्तदुपसर्जनसंज्ञंस्यात्। नतुतस्यपूर्वनिपातः। गोस्त्रियोरुपसर्जनस्य। १।२।४८।। उपसर्जनंयोगोशब्दः स्त्रीप्रत्ययान्तञ्चतदन्तस्य
प्रातिपदिकस्यह्रस्वस्स्यात्। अव्ययीभावश्चेत्यव्ययत्वं। नाव्ययीभावादतोऽम्त्वपञ्चम्याः। २।४।८३।। अदन्तादव्ययीभावात्सुपोनलुक्तस्य
तुपञ्चमींविनाअमादेशः। दिशयोर्मध्यमपदिशं। क्लीबाव्ययंत्वपदिशंदिशोर्मध्यंविदिक्स्त्रियामित्यमरः। तृतीयासप्तम्योर्बहुलं। २।४।८४।। अद
न्तादव्ययीभावात्तृतीयासप्तम्योर्बहुलमम्भावस्स्यात्।। ।। ११ सर्जनंपरइतिउपसर्जननमिहशास्त्रीयंगृह्यतेनत्वप्रधानलक्षणं। तेनकुमारीवाचर
त्वाह्मणः कुमारीत्यत्रनदोषइत्युक्तं। स्त्रीप्रत्ययांतमिति। स्त्र्यधिकारोक्तटाबाद्यंतमित्यर्थस्तेनातिलक्ष्मीरित्यादौनातिप्रसंगः। नन्वेवमपिराजकुमारीपुत्रइत्यादावति
प्रसंगइतिचेदत्राहुः। उपसर्जनस्यससंबंधिकतयायस्यप्रातिपदिकस्यह्रस्वोविधीयतेतदर्थंप्रतियदुत्तरपदभूतयोर्गोस्त्रियोर्गौणीभावस्तस्यैवह्रस्वत्वमितिभाष्या
दावुक्तत्वान्नदोषः भाष्यादावपित्वन्नरपदभूतयोरित्यर्थलाभस्तुकृत्तद्धितेत्यतः समासपदानुवर्तनाद्बोध्यमिति। नाव्ययी। अत्रापंचम्याइतिप्रोतेषे।। ।।

धाअनेनरस्वादमरवनतुव्यवहितस्यालुक्कापि। अमुमेवार्थंद्योतयितुंसूत्रेतुशब्दः। तस्यपंचमींविनेति। एवंचादंतादव्ययीभावात्परस्यपंचमीभिन्नसुपोलुक्। पंचम्यास्तुलुगभा
देशाबुभावपिनभवतइतिस्थितं। अतः किं अधिहरिदिशयोरिति। दिशोरितिहलंतेनविग्रहेपिएतदेवरूपं। दिशाशब्दस्यशरदादिषुपाठात् टच्॥ अपदिशमिति।
पंचमीव्यतिरिक्तविभक्तीनामुदाहरणमिदं। पंचम्यास्तुअपदिशादित्युदाहार्यं। वीभक्तौतावदितितावच्छब्दः क्रमार्थः। लौकिकविग्रहवाक्यंप्रदर्शयति। हराविति। सा चात्रहरौ
अधिकृत्यनिखिगृहीतातरसतु। अधिहरीत्यत्र अधिकृत्यत्यर्थस्याप्रतीतेः। हरि ङीति। अलौकिकेङिशब्दस्यैवप्रवेशउचितः। अंतरंगानपीतिन्यायात्। अन्यथाङिरोवेकृतेअ
धिहरौइतिसमासेहरिशब्देकारोदुर्लभःस्यादितिभावः। इहहरावधीतिस्थितेइतिप्राचोक्तमुपेक्षितं। नित्यसमासेषुअस्वपदविग्रहस्यैवोचितत्वात्। अभिहितेपीत्यर्थः

अपदिशं। अपदिशोन। अपदिशौ बहुलग्रहणात्सुमद्रमुन्मत्तगङ्गमित्यादौसप्तम्यानित्यमम्भावः। विभक्त्यादेरयमर्थः। विभक्त्यर्थादिषुवर्तमानमव्ययं
सुबंतेनसहसमस्यतेसोऽव्ययीभावः। विभक्तौतावत्। हरौइत्यधिहरि। सप्तम्यर्थस्यैवात्रद्योतकोऽधिः। हरि ङि अधि इत्यलौकिकंविग्रहवाक्यं। अ
त्रनिपातेनाभिहितेप्यधिकरणेवचनसामर्थ्यात्सप्तमी। अव्ययीभावश्च। अयंनपुंसकंस्यात्। ह्रस्वोनपुंसकेप्रातिपदिकस्य। गोपायतीतिकिंप्
वाग्निवागोपाः। तस्मिन्नित्यधिगोपं। समीपे। कृष्णस्यसमीपमुपकृष्णं। समयाग्रामं। निकषालङ्कां। आराद्वनादित्यत्रतुनाऽव्ययीभावः। अ
भितःपरितः। अन्यारादितिद्वितीयापञ्चम्योर्विधानसामर्थ्यात्। मद्राणांसमृद्धिः॥ ॥ १९ वचनसामर्थ्यादिति। सुपेत्यनुवर्त्यसुबंतेनसमभि
धानसामर्थ्यात्सप्तमीस्यादेवेतिभावः। नन्वभिहितेधिकरणेप्रातिपदिकार्थमात्रइतिप्रथमैवस्यान्नतुसप्तमीतिचेदत्राहुः। अधीत्यस्यसुबंतेनसमासस्यावश्यकत्वेअ
धिशब्दद्योत्याधिकरणार्थवाचकविभक्तेरेवेहस्वीकर्तुमुचितत्वादिति। यत्तुप्रसादकृताव्याख्यातंतिङ्कृत्तद्धितसमासैरितिपरिगणनादधिनाभिहितेपिसप्तमीस्यादे
वेति। तत्रपरिगणनस्याकरप्रन्थास्थ्यातत्वात्। कर्मणिद्वितीयेतिसूत्रेस्वयमपितथैवोक्तत्वात्। क्रमात्मुनारइत्यवोधिसइतिप्रयोगविरोधाच्च। अत्रव्याचक्षतेव
चनग्रहणंविभक्त्यादिभिःप्रत्येकंसंबध्यते। साकल्यांतेष्वित्येववक्तव्येवचनग्रहणात्। एवंचतत्सामर्थ्याद्विभक्त्यर्थमात्रवृत्तेरव्ययस्येहग्रहणंतेनदृसस्योपरि दस्स

४ अपरणात्समीपरूपाव्ययार्थप्राधान्य एवायं समासः समीपमीपवर्तिप्राधान्ये तु संख्ययाव्ययासन्नेति बहुव्रीहिं वक्ष्यत्युपदशा इति ४॥
स्यपुर इत्यत्र समासो न भवति। उपर्यादयो हि दिग्देशकालेष्वपि वर्तन्ते न तु विभक्त्यर्थमात्रे अत एव क्रमादमुं नारद इत्यबोधि स इत्यादौ नातिप्रसंग इति शब्दस्य सर्वनामवत्प्रकृतपरामर्शकत्वे
न कर्मत्वमात्राभिधायकत्वात्। एवं च विभक्तिशब्दः सप्तम्यां पर्यवस्यति। अत एव परिशिष्टे अधिकरण इत्येव सूत्रितं। पाणिनिस्तु मात्रालाघवमभिप्रेत्य विभक्तिशब्दं प्रायुंक्तेति। अन्ये तु ला
घवात् डि समीपसमृद्धीति वक्तव्ये विभक्तिग्रहणाद्धि भक्तिशब्दो न सप्तम्यां पर्यवस्यति न तत्र कर्मत्वमात्रद्योतकता नार्थामिति नारदमिति समासो भवत्येवेत्याहुः। नपुंसकं स्यादिति एतच्च स
नपुंसकमित्यतो लभ्यते। समीप इति। अव्ययीभाव इत्यन्वर्थसंज्ञादियं यथाविधानसामर्थ्यादिति। ननु समया ग्राममित्यादौ द्वितीयाविधानसामर्थ्यान्मास्त्वव्ययीभावः। आराद्वनात्[illegible]
तु भवेदेव। अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते इति पंचमीविधानस्य दूरार्थेभ्यश्चारात्शब्दयोगे सावकाशत्वादिति चेदत्र केचिदुत्तरमाहुः। दूरान्तिकार्थैः षष्ठ्यन्यतरस्यामिति षष्ठीपंचम्योः प्राप्तयोस्तदपवादत्वेन षष्ठ्यां वा
प्यवसानं विधीयते। तथा चान्तिकार्थकारात्शब्दयोगे षष्ठ्यपवादतया पंचमी विधानं निरवकाशमेवेति तत्सामर्थ्यादव्ययीभावो नेत्युक्तिः सम्यगेवेति। तदपरे न क्षमंते। अंतिकार्थारात्

समुद्धिं यवनानां व्यृद्धिः। दुर्यवनं। विगतानामृद्धिः व्यृद्धिः। मक्षिकाणामभावो निर्मक्षिकं। हिमस्यात्ययो अतिहिमं। अत्ययो ध्वंसः। निद्रा सम्प्रति न युज्यत इ
त्यतिनिद्रं। हरिशब्दस्य प्रकाश इति हरि। विष्णोः पश्चादनुविष्णु। पश्चाच्छब्दस्य तु नायं समासः ततः पश्चात्स्रंस्यत इति भाष्यप्रयोगात्। योग्यतावी
प्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः। अनुरूपं। रूपस्य योग्यमित्यर्थः। अर्थमर्थं प्रति प्रत्यर्थं। प्रतिशब्दस्य वीप्सायां कर्मप्रवचनीयसंज्ञाविधा
नसामर्थ्यात्तद्योगे हि द्वितीया गर्भमवाक्यमपि। शक्तिमनतिक्रम्य यथाशक्ति। हरेः सादृश्यं सहरि। वक्ष्यमाणेन सहस्य सः। ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठं॥
चक्रेण युगपदिति विग्रहे। अव्ययीभावे चाकाले। ६।३।८१॥ सहस्य सः स्यादव्ययीभावे न तु काले। सचक्रं। कालेतु॥ ८ द्योगे विशिष्य पंचमीविधाना
भावाद्न्याराद्इति सूत्रस्यान्यत्र कृतार्थत्वाच्च सामीप्ये आराद्वनमित्यव्ययीभावो दुर्वार एवेति एवं हि व्याकुर्वतां परस्येत्यपकर्षाभावे मूर्ध्न्यार्थे सावकाशाय यङ्पोः पुन्येपरेणाद्वि
वचनेन वाध्येनेति नित्यवीप्सयोरिति सूत्रस्य मनोरमाग्रंथो नुकूल इति दिक्॥ ❁ ॥ सुमद्रमिति। उत्तरपदार्थप्राधान्ये तु कुगतीति तत्पुरुषः॥ समृद्धा मद्राः सुमद्राः
दुर्यवनमिति। [illegible]चार्थाभावे नेह सिद्धिः येन समस्यते तदीयार्थाभावे त्र समासस्वीकारात् न चेह यवनानामभावो येनार्थाभावे समासः स्यात्। किं तु तदीयाया ऋद्धेरभाव इति॥
निर्मक्षिकमिति। संसर्गाभाव इव अयं [illegible]रो न त्वन्योन्याभावे पि अर्थग्रहणसामर्थ्येन समस्यमानपदजन्यप्रतीतिविशेष्यविरोधिन॥ ॥ ॥

एवाभावस्य ग्रहणात्। अन्योन्याभावस्य तु प्रतियोगितावच्छेदकेनैव विरोधात्तस्य च प्रकारत्वेप्यविशेष्यत्वात्। येनु वदंति घटः पटो नेत्यत्रापि पटत्वात्यन्ताभाव एवार्थः। आरोप
विकरणन्यायेन अतः परार्थत्वादिति तेषामपि मते अर्थग्रहणसामर्थ्यादेवाक्षिप्तधर्म्मभावे अयं समासो न तु धर्मीभाव इति न दोषः। अन्यपरतिरस्कृतार्थमेतत्। अर्थाभा
वेनगतार्थत्वात्। अर्थाभावेन संसर्गाभावो विवक्षितः न त्वन्योन्याभावः। घटः पटो नेत्यत्रातिप्रसंगादिति निष्कर्षात्। संप्रतिनेति। संप्रतीत्यव्ययमिदानीमित्यर्थे। एतर्हि संप्र
तीदानीमिति अमरोक्तेः तत्राधिकरणशक्तिप्रधानत्वात् क्रियापरनैवान्वयार्हं। निषेधोपि क्रियायामेवोचितः। तदेतदाह। युज्यत इति। असंप्रतीति सोत्र प्रयोगः। युजि क्रियान्त
र्भावेण नञ्समासः इति बोध्यं। यत्तु प्रसादकृतोक्तं अरं प्रतिसं प्रत्यभाव इत्यर्थः। अनेन उपभोग्यवस्तुनो योवर्तमानकालः स निषिध्यत इति। तन्न आधिकरणशक्तिप्रध
नेत्यक्रियये तन्वयार्हस्य निषेधं प्रति प्रतियोगितेनान्वयस्यायुक्तत्वात्। नहि भूतले घटो नासीत्यनेन भूतलं निषिध्यत इति कश्चिदम्भु॥

॥ सहपूर्वाह्णा सदृशः साख्यासमरवि। यथार्थत्वे नैव सिद्धा पुनः सादृश्यग्रहणं गुणभूतेपि सादृश्ये यथा स्यादित्येवमर्थं। स्वत्रालं
। सम्पत्तिः मद्रस्त्रा। ऋद्धेराधिक्यं। समृद्धिः। अनुरूप आत्मभावः सम्पत्तिरिति भेदः। तृणमप्यपरित्यज्य सतृणमत्ति साकल्येनेत्यर्थः। अ
न्तेऽग्निग्रन्थपर्यन्तमधीते साग्नि। यथाः सादृश्ये। २।१।७। असादृश्येन वयथाशब्दः समस्यते। तेनेह न। यथा हरिस्तथा हरः। हरेरुपमा
। वयथाशब्दो द्योतयति। तेन सादृश्य इति वा यथार्थ इति वा शब्दान्निषिध्यते। यावदवधारणे। २।१।८। यावन्तः श्लोकास्तावन्तोऽच्युतप्रणा
मा इति। अत्र वर्तमानंकाले विशेषे पुनरर्हः स्यात्। इति हरीति। स्वरूपपरेण षष्ठ्यन्तेन हरिशब्देन सहभ्यकार्थस्येति शब्दस्य समासः। ततः पश्चादिति। सतिचाव्य
यीभावे पश्चाच्छब्दस्य पूर्वनिपातः स्यादिति भावः। भाष्यप्रयोगादिति। अनेकमन्यपदार्थ इति सूत्रे सर्वपश्चादिति भाष्यप्रयोगाच्चेत्यपि बोध्यं प्रत्यर्थमिति। व
नैबोध्यं तर्भावान्तहि वचनात्मनि। प्रत्याहः। प्रामस्य सदृशपती प्रत्येकेन समासाभावे द्विताया विधानं सावकाशमिति। तन्नानित्यसमासेषु स
विग्रहस्यानीरति नैनित्यस्याप्रवृत्तेः। आनुपूर्व्येणेति। अनुपूर्वस्य भावः। आनुपूर्व्यं ब्राह्मणादित्वात्ष्यञ्। चक्रेण युगपदिति। अत्र केचित्। युगपच्चक्रमिति स
मासेनैव भवितव्यं। युगपच्छब्दस्याव्ययत्वात्। किंतु चक्रेणैककाल इत्यादि विग्रही तु मुचितमित्याहुः॥ ॥ सहपूर्वाह्णमिति। साकल्ये व्ययीभावः। गुणभूते
पीति। यदि सादृश्य इति नोच्यते तर्हि यत्र सादृश्यं प्रधानं तत्रैव गम्यते॥

तत्रैवास्याद्व्ययार्थप्राधान्यस्याव्ययीभावे औत्सर्गिकत्वादिति भावः। अंतइति। इदानीमेतावान्प्रदेशोऽध्येतव्य इतिवदवतो ग्रंथप्रदेशस्य परिग्रहः कृतस्तद्रूपेक्षा समाप्तिरिहांतशब्देन
विवक्षिता सा चासकलेऽप्यध्ययने भवतीति साकल्यात्पृथगुच्यते। साग्नीति। अग्निशब्दस्तत्प्रतिपादकग्रंथे वर्तते। स च तृतीयांतो नित्यं समस्यते। न चैवमग्निना सहेति प्रयोगो दु
र्लभ इति वाच्यं। साहित्यमात्रविवक्षायां तत्प्रयोगस्योपपत्तेः। अंतत्वविवक्षायां तु समासस्य नित्यत्वादग्निग्रंथपर्यंतमित्यस्वपदविग्रहो दर्शितः। यत्तु केचिदग्निरंतो सोऽतिप्रथमांते
न अग्नेरंतत्वमिति षष्ठ्यंतेन वा विग्रहः [illegible] समासोऽपि प्रथमांतेन षष्ठ्यंतेन वेत्याहुस्तन्न सहशब्दस्यांतवाचकत्वाभावादंतत्वस्य तु सुतरामलाभात्। सहयुक्ते तृतीयापान्वाप्यत्वाच्चासत्
णमती [illegible] साकल्यस्य विवक्षा [illegible] चांतत्वस्यापि साहित्य [illegible] त्वतया तत्र तृतीयांतेन समासस्वीकृत्य परित्यागस्यानिष्प्रमाणत्वाच्च। अत्रेदं बोध्यं। तदधीत इत्यध्येन प्रत्ययस्य
वैकल्पि [illegible] वान् [illegible] त्राणे नोक्तः कृतेऽपि [illegible] त्रणि सर्वादेस्सादेश्चलुग्वक्तव्य इति वक्ष्यमाणत्वात्साग्नीत्येवरूपमिति। यथासांनिः। संदेहापसादृश्यप्यथेत्येव वक्तव्ये विप्लसितो
चारणेनअं [illegible] स्वल्पमार्थमिति व्याचष्टे [illegible] सादृश्य इति यावेन इति। यत्परिमाणमेषांते। यन्नदेतेभ्य इति वतुप्। याव तुल्लोकमिति। यावदित्यव्ययं समस्यते। विग्रहस्तु तद्विनाते

सुप्प्रतिना मात्रार्थे। २।१।९॥ शाकस्य लेशः शाकप्रति। मात्रार्थे किं। वृक्षम्प्रति विद्योतते विद्युत्। अक्षशलाकासंख्याः परिणा। २।१।१०॥ द्यूतव्यवहारे प
राजयेऽयं समासः। अक्षेणविपरीतम्वृत्तं। अक्षपरि। शलाकापरि। एकपरि॥ ॥ ॥ ॥ ॥

नित्यसपदविग्रहत्वमस्त्येव। अवधारणे किं। यावद्दत्तं तावद्भुक्तं। कियद्भुक्तं वा नावधारयतीत्यर्थः॥ ॥ सुप्प्रतिना। सुविन्यनुवर्तमाने पुनः सुब्ग्रहणमव्ययनिवृत्त्यर्थमिति धो
नयन्नुदाहरति। शाकप्रतीति। नन्वारंभसामर्थ्यादव्ययभिन्नमेव सुप्समस्यत इति चेदत्राहुः। पुनः सुब्ग्रहणाभावे दोषामन्यमहर्दिवामन्या रात्रिरिति वृत्तिविषये सत्यप्यधा
नुतादर्शनादाहृष्णां यथान्येवमात्रार्थे प्रतिना समस्येरन्। तथा च ह्रिवसस्य लेशः दिवाप्रति दोषाप्रतीत्यादीनामेवोदाहरणत्वं संभाव्येतेति [illegible] प्रतीति। न तु लक्षणादौ प्रतेः कर्मप्र
वचनीयसंज्ञाविधानसामर्थ्यात् द्वितीयागर्भवाक्यमेवस्यात् न तु समासस्तस्य लेशार्थे सावकाशत्वादिति चेन्मैवं। वृक्षं प्रति सिंचतीत्यादौ षत्वनिवारकत्वेन कर्मप्रवचनीय
संज्ञाविधानस्य चरितार्थत्वान्मात्रार्थग्रहणाभावे लक्षणादावप्यनेन समासप्रसंगात्। वीप्सायामव्ययीभावे तु प्रत्यादेः पूर्वनिपातत्वे प्रत्यर्थो सिंचतीत्यादौ षत्वाप्रसक्त्या
कर्मप्रवचनीयविधानस्य चे [illegible] र्थतयानत्सामर्थ्याद्द्वितीयागर्भवाक्यमपीत्युक्तं मूलकृताप्यव्ययं विभक्तीति सूत्रे। अत्र नव्याः। प्रत्यर्थमित्यव्ययीभावे वीप्सायां द्योतकत्वेन वि

द्यमानमव्ययमस्यत। वीप्साद्योतकस्य परिकर्मप्रवचनीयसंज्ञाविधिः स्वीक्रियते तदापि प्रतिस्लवनं प्रतिष्ठानमित्यादौ षत्वनिवारणाय प्रतीत्यस्य कर्मप्रवचनीयसंज्ञा वश्यंतार्थे च क्लृप्ते तस्मिन्वीप्सायां विशेषभूतायां प्रत्यादेः कर्मप्रवचनीयसंज्ञा न तु वीप्साद्योतकस्यैव। अन्यथा वृक्षं वृक्षं प्रति सिंचतीत्यत्र द्विर्वचनेनैव वीप्साद्योत्यते प्रति शब्दस्तु क्रियया संबध्यते। कर्मणि द्वितीया। कर्मप्रवचनीयसंज्ञया उपसर्गसंज्ञाया बाधात् षत्वं नेत्यादि मनोरमाग्रंथस्य लक्षणेत्थंभूतेति सूत्रस्थस्य रत्नजलांजलिः स्यात्। न न श्चसंख्याविधानसामर्थ्यस्योपक्षीणत्वात् अर्थमर्थं प्रतीत्यादि भाष्यप्रयोगाद्वितीयागर्भं वाक्यमपि भवतीत्येवं व्याख्येयमित्याहुः। पराजयं द्योतयितुमाह। विपरीतवृत्तमिति। पूर्वं जययथा वृत्तं तथा न वृत्तमित्यर्थः। एकपरीति। एकेन विपरीतं वृत्तमित्यर्थः। एवं द्विपरीत्यादि। विभाषापपरिबहिरिति योगं विभज्य व्याचष्टे॥ ॥ विभाषेत्यस्मि इतः प्राचीनानां समासानां द्विगुमादिसंज्ञानामिव वाग्रहणाभावान्नित्यत्वं न्याय्यत एव सिद्धं तच्च लिंगेनापि दृढयति। एतदिति। नन्वेवं सुप्सुपेत्यपि नित्यस्य प्रदिष्ट

विभाषा॥ २।१।११॥ अधिकारोऽयं। एतत्सामर्थ्यादेव प्राचीनानां नित्यसमासत्वं। सुप्सुपेति तु न नित्यसमासः। अव्ययमित्यादिसमासविधानात् ज्ञापकात्। अपपरिबहिरञ्चवः पञ्चम्या॥ २।१।१२॥ अपविष्णु संसारः। अपविष्णोः। परिविष्णु। परिविष्णोः। बहिर्वनं। बहिर्वनात्। प्राग्वनं। प्राग्वनात्। आङ्मर्यादाभिविध्योः॥ २।१।१३॥ एतयोराङ् पञ्चम्यन्तेन वा समस्यते सोऽव्ययीभावः। आमुक्तिसंसारः आमुक्तेः। आबालं हरिभक्तिः। आबालेभ्यः।

पत्तौ न पूर्वं भूतो भूतपूर्वः सुप्सुपेति समास इति वृत्तिग्रंथो विरुध्येत तथा शाकलसूत्रे सिन्नित्यसमासयोः शाकलप्रतिषेध इत्यत्र नित्यग्रहणेन नार्थः। इदमपि सिद्धं भवति वाप्यामश्वो वाप्यश्व इति नाप्यर्थे कैयटो व्याख्य तु। वाप्यश्व इति सुप्सुपेति समासः संज्ञायामिति सप्तमीसमासस्य तु नित्यत्वात्सिद्धः प्रतिषेध इति। सोपि ग्रंथो विरुध्येतेत्याशंक्यामाह। सुप्सुपेति त्विति। नन्वत्रापि प्रमाणमित्यत आह। अव्ययमित्यादीति। सुप्सुपेत्यनेनैव सिद्धे समासे अव्ययमित्यादिसूत्रैः पुनः समासविधानं प्राचीनस्य क्वाचित्कतां ज्ञापयतीत्यर्थः। एवं च इवेन समासस्यापि क्वाचित्कत्वादुहहा हुरिव वामन इत्यादि सिद्धं। इवेनेति वार्त्तिकं तु यद्यपि कुगतीत्यत्र पठ्यते तथापि सुप्सुपेत्यत्राप्यमेव नित्याधिकारे स्मारितमिति कैयटः। एवं स्थिते इव वामन इत्यादि लोकप्रयोगसिद्धये इवेन समासस्य छंदोविषयत्वं कल्पयंतः प्रत्युक्ताः। छंदस्यपि तत्समासस्य नित्यत्वानभ्युपगमात्। जीमूतस्येवेत्यत्र हि बह्वृचैः समासाभ्युपगमेऽपि तैत्तिरीयैर्व्यस्तस्यैव पाठात्। एतच्च मनोरमायां स्थितं। अपपरिबहिः। अपपरियोगे पंचम्यपाङ्परिभिरिति

पंचमीविहिता अंचूत्तरपदयोगेप्यन्यारादित्यादिनाविहितैवतेनात्रपचम्येतिग्रहणं वहिर्योगेपंचमीभवतीतिज्ञापनार्थं। ज्ञापकसिद्धं नसर्वत्रेतिकरस्यकरमोवहिरित्यपिसिद्धं
आवालमिति। आपरमाणोराचभूगोलकमितिकिरणावलीप्रयोगस्तुप्रामादिकः। समासमध्येचशब्दप्रयोगासंभवात् आचभूगोलकादितिपाठःसूचितः॥ ॥ लक्षणेनाभिप्रती
लक्षणवलक्षणमित्यर्थः। लदाहृ चिन्हवाचिनेति। इहाभिप्रती लक्ष्यलक्षणभावं आभिमुख्यंचेत्युभयंद्योतयत इतिफलितं। अग्निमभि अग्निंप्रतीति। अभिरभागे। लक्षणेत्थंभू
तेत्यनेनत्वअभिप्रत्योः कर्मप्रवचनीयत्वाद्द्वितीया। लक्षणेनेतिकिं। स्रुघ्नंप्रतिगतः। स्रुघ्नादागतत्वमेवप्रतिनिर्दिष्टमित्यर्थः। अत्रहिस्रुघ्नः कर्मनेतुलक्षणं। अभिप्रतीकिं। येना
ग्निस्तेनगतः। येनयया अग्निर्गतस्तेनगत इति प्रतीतेर्भवतिगमनस्याग्निर्लक्षणंआभिमुख्यमप्यस्तीतियेनतेनशब्दयोरग्निशब्देनसमासः स्यात्। आभिमुख्येकिं। अभ्यं
कागावः। तं ओ। अभिनवः प्रतिनवश्लोक आसामितिवहुव्रीहिः। अंको ह्यत्रभवतिगवांलक्षणमाभिमुख्यंतुनास्तिननूत्सर्गतअव्ययार्थप्राधान्येऽव्ययीभावस्वी
कारात्कथमिहप्रसंगः। अत्राहुः। इहप्रकरणेवहुव्रीहिविषयेअव्ययीभावोभवतीतिज्ञापनार्थमिदं। तेनसंख्यावंश्येनद्विमुनिव्याकरणमित्यादिसिद्धमिति। अनुर्य

त्लक्षणेनाभिप्रती आभिमुख्ये। २।१।१४॥ आभिमुख्यद्योतकौअभिप्रतीचिन्हवाचिनासहप्राग्वत्। अभ्यग्निशलभाःपतन्ति। अग्निमभिप्रत्यग्नि। अ
ग्निम्प्रति। अनुर्यत्समया। २।१।१५॥ यम्पदार्थंसमयाद्योत्यतेतेनलक्षणभूतेनाऽनुस्समस्यतेसोऽव्ययीभावः। अनुवनमशनिर्गतः। वनस्यस।

त्सं यदीतिसमयायोगेद्वितीयेतिध्वनयति। यंपदार्थमिति। यस्यपदार्थस्यसमीपमित्यर्थः। लक्षणेनेत्यनुवर्त्ततइत्याह। लक्षणभूतेनेति। चिन्ह ((मीपङ्गत इत्यर्थः
वाचिनेत्यर्थः। अव्ययंविभक्तीत्यनेनसिद्धेविभाषार्थंसूत्रंतेनपक्षेवनस्यानुरित्युदाहार्यमितिमनोरमायांस्थितं। अत्रवदंति। वनस्येतिषष्ठीहदुर्लभाकर्मप्रवचनीययुक्तेद्वितीया
यास्स्दुर्वारत्वात्। तत्सामर्थ्यात्समयालंकामितिवत्समासवाधे प्रसक्ते अस्यविध्यर्थत्वात्। नचायमनुःसामीप्यमात्रद्योतकोनलक्ष्यलक्षणभावस्येतिवाच्यं। लक्षणेनेत्यनु
वृत्तिवैयर्थ्यापत्तेः एवमपिलक्षणमात्रद्योतकत्वंनास्तीतिवाच्यं। लक्षणेत्थमित्यत्रमात्रपदाभावादग्निमभिअग्निंप्रतीतिपूर्वसूत्रस्थोदाहरणप्रत्युदाहरणविरोधाच्च। तोत्रपक्षेवनम
नुरित्युदाहार्यंवनस्यसमीपंगत इतिमूलस्थंविवरणवाक्यंतुलक्षणभूतस्यवनस्यसमीपंगत इतिव्याख्येयमिति। अन्वितिकिं। ग्रामंसमया। यत्समयेतिकिं। वृक्षमनुवि
द्योततेविद्युत्। लक्षणेनकिं। अनुवनं। उपकुम्भमितिवदत्रनित्यमव्ययीभावः॥

यस्य चा। इह तृरित्यनुवर्त्य आनृत्यैकं तृतीयान्तत्वेन विपरिणमय्य व्याचष्टे। अनुनेति। लक्षणभूतेनेति लक्षणेनेत्यनुवर्त्तत इति भावः। अनुगंगमिति। इहायामो लक्षणं लंबानुना द्योत्य
ते लक्ष्यं तु समासार्थः। अत एव वाराणस्याः सामानाधिकरण्यं। एवं स्थिते फलितमाह। गंगादैर्घ्येति। वाराणसीति। वरं च तरदनश्च वरानः श्रेष्ठोदकं। अनः क्लीवं जले
शोके मातृस्थ इति योर्द्वयोरिति रूढं महसे। तस्या दूरे भवा। अदूरभवश्चेत्यण्। आदिवृद्धिः। पूर्वपदात्संज्ञायामिति णत्वं। गंगाया अन्विति। समासाभावपक्षे प्रागुक्त
रीत्या गंगामन्विन्युदाहार्यमित्याहुः। तिष्ठद्गुप्रभृतीनि च। चकार एवकारार्थः। तेनैषां वृत्त्यन्तरं न भवति। परमतिष्ठद्गु इत्यादि न भवतीत्यर्थः। तिष्ठद्गु इति। गोस्त्रियोरि
ति ह्रस्वः। प्रथमासमानाधिकरणेऽत्रा इत्यस्य संभवान्नाह। इह शत्रादेश इति। इत्यादीनि। आदिशब्देन खलेयवं खलेबुसं सासमन्या अलुक्। लूनयवं लूयमान
यवमित्यादि ग्राह्यं। पारे मध्ये। निपात्यत इति। यत्र सप्तम्यर्थो न संभवति तदर्थं मकारान्तत्वनिपातनं। सप्तम्यर्थसंभवे तु तत्पुरुषे कृति बहुलमिति। बहुलग्रहणा

यस्य चायामः। २।१।१६॥ यस्य दैर्घ्यमनुना द्योत्यते तेन लक्षणभूतेनानुः समस्यते। अनुगङ्गं वाराणसी। गङ्गाया अनु। गङ्गादैर्घ्यसदृशदैर्घ्यो
पलक्षितेत्यर्थः। तिष्ठद्गुप्रभृतीनि च। २।१।१७॥ एतानि निपात्यन्ते। तिष्ठन्ति गावो यस्मिन्काले स तिष्ठद्गु दोहनकालः। आयतीगवं। इह शत्रा
देशः पुंवद्भावविरहः समासान्तश्च निपात्यते। पारे मध्ये षष्ठ्या वा। २।१।१८॥ पारमध्यशब्दौ षष्ठ्यन्तेन सह वा समस्येते। एदन्तत्वं चानयो
र्निपात्यते। पक्षे षष्ठीतत्पुरुषः। पारेगङ्गादानय। गङ्गापारात्। मध्येगङ्गात्। गङ्गामध्यात्। महाविकल्पेन वाक्यमपि। गङ्गायाः पारात्। गङ्गाया

इद्लुकापि सिद्धे इहात्र सप्तम्यर्थाभावसूचनाय पंचम्यन्तमुदाहरति। पारेगंगादिति। महाविभाषयेति। नन्वपवादे अव्ययीभावे महाविभाषया विकल्पिते पक्षे तत्पुरु
षः षष्ठीतत्पुरुषः प्रवर्तते तस्यापि विभाषाधिकारस्थत्वेन वैकल्पिकत्वात्सेवाक्यमपि सिध्यतीति सूत्रे वाग्रहणं व्यर्थमेवेति चेत्। अत्राहुः। महाविभाषया एकार्थीभावस्य
पाक्षिकत्वे विवक्षिते प्रदाग् [?] एकार्थीभावदशायां षष्ठीसमासं बाधित्वा नित्यमव्ययीभावे प्राप्ते पक्षे षष्ठीसमासस्य समावेशार्थमिह वाग्रहणं। व्यपेक्षासामर्थ्यमेके इति पक्षे तु वचनादपि
व्यपेक्षालक्षणमेव सामर्थ्यमिति वाक्यस्य नित्यं बाधे न सक्ते तयार् [?] इति निर्द्विकल्प्यते। तथा चाव्ययीभावे विकल्पिते पूर्वोक्तरीत्या पक्षे तत्पुरुषस्यापि वैकल्पिकत्वाद्वाक्यमपि सिध्यत्येव
तथापि यत्रोत्सर्गापवादौ महाविभाषया विकल्प्येते तत्रापवादेन मुक्ते पुनरुत्सर्गो न प्रवर्त्तत इति ज्ञापनार्थं इदं। तेन पूर्वं कायस्येत्येकदेशिसमासेन मुक्ते षष्ठीसमासो न भवति।

संख्यावंश्येन। वंश्यः। तानानसत्त्रभवो वंश्यः। दिगादित्वाद्यत्। द्विमुनीति। पाणिनिकात्यायनौ। त्रिमुनीति। तौ द्वौ पतंजलिश्चेति त्रयो वंश्याः। व्याकरणस्येति संबंधे षष्ठी। स्वपदार्थप्रा धान्यएवायंसमासः। यदा त्वन्यपदार्थप्राधान्यविवक्षा त्रयो मुनयो वंश्या यस्येति तदा बहुव्रीहिरेवेत्याहुः। त्रिमुनिव्याकरणमिति। यद्यप्येन द्बहुव्रीहिणाप्युपपन्नं तथापि वि भक्त्यंतरे ऽपि विशेषो ऽस्त्येवेति भावः। वस्तुतस्तु लक्षणेनाभिप्रती तिसूत्रे आभिमुख्यग्रहणाद्बहुव्रीहिविषये ऽप्यव्ययीभावो भवतीति द्विमुनिव्याकरणमित्यादि सिद्धमित्य वोचाम। जन्मनेत्यादि इति। एकविंशतिभारद्वाजमिति। एकविंशतिभारद्वाजवंश्या इति विग्रहः। ननु भरद्वाजाद्विदाद्यञो यञञोश्चेति लुक्प्राप्नोति। न च वर्तिपदानां स्वार्थो पसर्जनैकत्वविशिष्टार्थांतरोपसंक्रमाल्लुगभाव इति कैयटोक्तमार्दवं वाच्यं इति प्रवेशात्प्रागेव प्राप्नुवतोंऽतरंगस्य लुको दुर्वारत्वात्। अन्यथा गर्गाणां कुलं गार्गकुलमित्यपि लु स्यात्। अत्राहुः। भाष्यकारप्रयोगादेव लुगभावोऽत्र बोध्य इति। एतच्च तत्रोपासमस्यो रिति सूत्रे शब्दकौस्तुभे स्पष्टं। नदीभिश्च। स्वरूपस्य संज्ञानद्याश्चेनेह ग्रहणं बहुवचननि

संख्या वंश्येन। २।१।१९॥ वंशो द्विधा विद्यया जन्मना च तत्र भवो वंश्यः तद्वाचिना सह संख्या वा समस्यते। द्वौ मुनी वंश्यौ द्विमुनि। व्याकरणस्य। त्रिमुनि। विद्यातद्वतामभेदविवक्षया। त्रिमुनिव्याकरणं। एकविंशतिभारद्वाजं। नदीभिश्च। २।१।२०॥ नदीभिः संख्या प्राग्वत्। समाहारे चा यमिष्यते। सप्तगंगं। द्वियमुनं॥ अन्यपदार्थे च संज्ञायां। २।१।२१॥ अन्यपदार्थे विद्यमानं सुबन्तं नदीभिः सह नित्यं समस्यते संज्ञायां॥ विभा षाऽधिकारेऽपि वाक्येन संज्ञाऽनवगमादिह नित्यसमासः। उन्मत्तगंगं नाम देशः। लोहितगंगं। समासान्ताः। ५।४।६८॥ इत्यधिकृत्य॥

देशानां किन्त्वर्थस्य। न च तस्य समासः संभवति अतस्तद्वाचिनायं समासस्तेन च न केवलं विशेषशब्दा एव किंतु सामान्यशब्दोऽपि तेन पंचनदं सप्तगोदावरमिति सि द्धं। गोदावर्याश्च नद्याश्चेति वक्ष्यमाणेन समासांतोऽच्। चकारेण संख्येत्यनुकृष्यत इत्याह। संख्येति। स्यादेतत्। पुरस्तादपवादन्यायेन पूर्वकाले कैत्यस्यैवेदं बाधकं स्या त्तत्रश्चैकनदीत्यत्राव्ययीभावे तन्निबंधनस्य नदीपौर्णमास्येति टचः प्रसंगः समाहारे तु परत्वाद्द्विगुरेव स्यादित्यत आह। समाहारे चायमिति। एवकारार्थश्चकारः एवं च द्विगोरपवादोऽयमव्ययीभाव इति फलितं। अन्यपदार्थे च। संख्येति निवृत्तं नदीग्रहणमनुवर्तते तदाह। सुबंतं नदीभिः सहेति। अन्यपदार्थ इति किं॥ कृष्णवेणी। संज्ञानवगमादिति। सम्यक्ज्ञापनत इत्यसत्ता। आतश्चोपसर्गे इति कर्मण्यङ्। संज्ञिनो देशविशेषस्यानवगमादित्यर्थः। अन्यपदार्थानवगमादि

यस्येत्यादिपदान्तरसमभिव्याहारेणान्यपदार्थप्रतीतेः। अत एव बहुव्रीहिर्न नित्यसमास इति भावः। संज्ञायां किं। शीघ्रंगो देशः। अथाव्ययीभावे साधारणान् समा
सान्ताना ह॥ ॥ अव्ययी। शरदादिभ्य इति वक्तव्ये दर्शाय बुलाघवविंतानाद्रियत इति प्रभृतिग्रहणं कृतं। टच्च स्यादिति। राजाहंसखिभ्य इत्यतष्टजनुवर्त्तत इति भावः
समासांत इति। समासस्य समासार्थोत्तरपदस्य वा चरमावयव इत्यर्थः। तेनोपशरदमित्यत्राव्ययीभावादित्यमसिद्ध्यव्ययीभावस्यादंतत्वात् द्विगुरीत्यादौ तु त्र्यं
कपूरब्धूरित्यप्रत्यय उत्तरपदस्यावयव इत्यकारांतोत्तरपदो द्विगुः स्त्रियामिति स्त्रीत्वे द्विगोरिति ङीप्सिध्यतीति बोध्यं। प्रतिविपाशमिति। लक्षणेनाभिप्रती ति
समासः। विपाशमनु विपाट् स्त्रियामित्यमरः। गणे पठति शरदित्यादिना। अत्र यत्र यत्तास्तेषां तत्र इति विकल्पप्राप्तेनित्यार्थं पाठः। इह जरायाजरस् प्रतिपरेति

अव्ययीभावे शरत्प्रभृतिभ्यः।५।४।१०७॥ शरदादिभ्यष्टच्स्यात्समासान्तोऽव्ययीभावे। शरदः समीपमुपशरदं। प्रतिविपाशं। शरद्॥
विपाश्। अनस्। मनस्। उपानह्। दिव्। हिमवत्। अनडुह्। दिश्। दृश्। विश्। चेतस्। चतुर्। त्यद्। तद्। यद्। कियत्। जराया जरस् च। उ
पजरसं। प्रतिपरसमनुभ्योऽक्ष्णः। पक्षस्येति च। प्रत्यक्षं। अक्ष्णः परमिति विग्रहे। समासान्तविधानसामर्थ्यादव्ययीभावः। परोक्षे लिडिति
निपातनात्परस्याकारस्यौकारेशः। परोक्षं। परोक्षा क्रियेत्यादि तु अर्श आद्यचि। समक्षं। अन्वक्षं। अनश्च।५।४।१०८॥ अन्नन्तादव्ययीभावाट्टच्
स्यात्। नस्तद्धिते।६।४।१४४॥ नान्तस्य भस्य टेर्लोपस्तद्धिते। उपराजं। अध्यात्मं॥ ॥ ९ चद्वयं गणसूत्रं। उपजरसमिति। जरायाः समीप

मित्यर्थः। यस्येति चेति। टच्स्तद्धितत्वात्तस्मिन्परे इकारलोप इति भावः। प्रत्यक्षमिति। वीप्सायां यथार्थत्वेन समासः। अक्ष्णोरभिमुख्यमित्यर्थे लक्षणेनाभिप्रती
ति वा समासः। अक्ष्णः परमिति। अविषय इत्यर्थः। वृत्तिविषये अक्षिशब्द इंद्रियमात्रपरः। अव्ययाघटितसमुदायस्य कथमिहाव्ययीभावो विधायकसूत्राभा
वादित्याशंक्याह विधानसामर्थ्यादिति। समक्षमिति। अक्ष्णोर्योग्यं। अन्वक्षमिति। अक्ष्णः पश्चादित्यर्थे अव्ययीभावः। नस्तद्धिते। न इत्यनेन भस्येत्यधिकृतं वि
शेष्यते। विशेषणेन तदंतविधिरत आह। नान्तस्य भस्येति। ननूपराजमित्यत्र नस्तद्धित इति व्यर्थो। अव्ययानां भमात्र इति टिलोपेनैव सिद्धेः। न चाव्ययत्वं टच्वि
शिष्टपर्यायमिति वाच्यं। अव्ययीभावसंज्ञाया उपजीव्यत्वेन टचः पूर्वभागस्याप्यव्ययत्वानपायात्। अत्राहुः। भाष्ये लुङ् मुखस्वरोपचारे षत्विषत्वकार्येषु॥

अव्ययीभावस्याव्ययसंज्ञाविधानान्न दोष इति। युक्तं चैतत्। अन्यथा उपशरदमित्यादौ टिलोपः प्रसज्येत। अध्यात्ममिति। आत्मनि अध्यात्मं। विभक्त्यर्थेव्ययीभावः॥ ः॥
नपुंसकादन्य। नपुंसकग्रहणमन्नंतस्य विशेषणं नाव्ययीभावस्य अव्यभिचारादित्याह अन्नंतं यत्क्लीबमिति। अन्नंतेन चाव्ययीभावविशेषणे तदंतविधिरित्या
हतदंतादिति। उपचर्ममिति। टचिलोपोऽदंतत्वादमभावश्च। नदीपौर्ण। इह स्वरूपस्यैव ग्रहणं न संज्ञायाः। पौर्णमास्याग्रहायण्योः पृथग्ग्रहणात्। उपनदीति। टजा
भावेनपुंसकह्रस्वः अत्र व्याचक्षते। वृत्तिग्रंथमनुरुध्येदं विकल्पकथनं परमार्थतस्तु नेहान्यतरस्यामित्यनुवर्ततेव हुगणेति सूत्रस्थभाष्यविरोधात्। तत्र हि नदी
शब्देन नदीविशेषाणां गंगायमुनादीनां ग्रहणमाशंक्य शरत्प्रभृतिषु विपाट्शब्दपाठान्नेति समाहितं। न चेदं भाष्यं नदीपौर्णमासीत्यत्र टचः पाक्षिकत्वे संगच्छते नित्यार्थत

नपुंसकादन्यतरस्यां। ५।४।१०९॥ अन्नंतं यत्क्लीबं तदंताद्व्ययीभावाट्टज्वा स्यात्। उपचर्मं। उपचर्म। नदीपौर्णमास्याग्रहायणीभ्यः
५।४।११०। वा टच्स्यात्। उपनदं। उपनदि। उपपौर्णमासं। उपपौर्णमासि। उपाग्रहायणं। उपाग्रहायणि। झयः। ५।४।१११। झयंतादव्य
यीभावाट्टज्वा स्यात्। उपसमिधं। उपसमित्। गिरेश्च सेनकस्य। ५।४।११२। गिर्यंतादव्ययीभावाट्टज्वा स्यात्। सेनकग्रहणं पूजार्थं। उपगिरं। उ
पगिरि॥ इत्यव्ययीभावः। तत्पुरुषः। २।१।२२। अधिकारोऽयं प्राग्बहुव्रीहेः। द्विगुश्च। २।१।२३। द्विगुरपि तत्पुरुषसंज्ञः स्यात्। इदं सूत्रं त्यक्तुं श
क्यं। संख्यापूर्वो द्विगुश्चेति पठित्वा चकारबलेन संज्ञाद्वयसमावेशस्य सुवचत्वात्. समासांतः प्रयोजनं। पञ्चराजं॥ ११ पातमाठस्योपपन्नः। अत एव सेनक
ग्रहणमुत्तरत्रार्थवत्। कैय्यटस्तु व्यवस्थितविभाषामाश्रित्य वृत्तिग्रंथं कथंचित्समर्थितवानिति। पूजार्थमिति। अन्यतरस्यामित्यनुवृत्त्या विकल्पसिद्धेरिति भावः। इत्यव्ययी
भावः। चकारबलेन संज्ञाद्वयसमावेशं सेति। न चैवं द्विगुतत्पुरुषयोः पर्यायता स्यादिति शंक्यं योगं विभज्य संख्यापूर्वस्य तत्पुरुषसंज्ञां विधाय पश्चाद्द्विगुसंज्ञाविधानेनैवका
रपाठनमंतरेणापि पर्यायत्वसिद्धेः। नापि द्वौ अन्यौ यस्य इत्यन्यत्रातिप्रसंगः शंक्यः। तद्धितार्थोत्तरपद इति सूत्रमनुवर्त्य तद्धितार्थेत्यत्र उक्तस्त्रिविधः संख्यापूर्व इति व्याख्या
नात्। द्विगोस्तत्पुरुषत्वे फलमाह। समासांत इति। टजवाविस्यर्थः। अचितूदाहरणं तत्पुरुषस्यांगुलेरित्यच् द्व्यंगुलमिति बोध्यं। पंचराजमिति। समाहारद्विगौ राजाहस्स
खिभ्य इति टच् समासस्यैवायमंतावयव इति उत्तरपदस्यानकारांतत्वान्नस्त्रीत्वाभावः। समासार्थोत्तरपदांताः समासांता इति पक्षे तु अकारांतो त्तरपदत्वेपि पात्रादित्वा

न्नेति बोध्यं। काशिकायां तु पंचराजीत्युदाहृतं। स क्वादित्वोपपाठ इति हरदत्तः। अत्र केचित्। पात्रादित्वकल्पने मानाभावात्पंचराजीति काशिकोक्तोदाहरणमपि सम्यगेवे-
त्याहुः॥ ❀ ॥ द्वितीया श्रितातीत। श्र्यादीनां गतिविशेषवाचित्वात्सकर्मकेति कर्तरि क्तः। प्रत्ययग्रहणे तदंतग्रहणमित्याशयेनाह। द्वितीयांतमिति। श्रितादिप्रकृति-
कैरि ति। यद्यपि संबोधने सुबंतत्वं संभवति तथा न्यत्रापि समासस्येष्टत्वात् श्रितादयस्तद्धितसमुदायेला क्षणिका इह गृह्यंत इति भावः। एवं खट्वा क्षेपे गर्गादिभ्यो यञि-
त्यादावप्यूह्यं। न हि खट्वेत्यस्य द्वितीयांतत्वं गर्गादीनां वा प्रत्ययांतत्वं वा संभवति। स्यादेतत्। द्वितीयांतस्य श्रितप्रकृतिकसुबंतेन समासे काष्ठश्रितेयो न सिध्येत्। श्रितशब्दाट्टापि त-
तः सुपि काष्ठश्रिता काष्ठश्रितेति समासे श्रिताशब्दस्यैव टावंतत्वात् ततः स्त्रीभ्यो ढगिति ढकि काष्ठश्रैतेय इति स्यात्। गतिकारकोपपदानामिति सुबुत्पत्तेः प्राक्कृदंतेन समा-
से तु श्रितांतस्य टावंतत्वादिष्टं सिध्यतीति चेन्नैवं। प्रधानस्त्रीप्रत्यये तदादिनियमाभावेन काष्ठश्रैतेयस्य निर्बाधत्वात्। न च कदाचित् श्रिताशब्दादपि ढक् स्यादिति।

द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः॥२।१।२४॥ द्वितीयांतं श्रितादिप्रकृतिकैः सुबन्तैः सह समस्यते वा तत्पुरुषः। कृष्णं श्रितः। कृष्णश्रि-
तः। दुःखमतीतः। दुःखातीतः। गम्यादीनामुपसंख्यानं। ग्रामं गमी। ग्रामगमी। अन्नं बुभुक्षुः। अन्नबुभुक्षुः। स्वयं क्तेन।२।१।२५॥ द्वितीयेति न सम्ब-
ध्यतेऽयोग्यत्वात्। स्वयङ्कृतस्याऽपत्यं। स्वायंकृतिः। खट्वा क्षेपे।२।१।२६॥ खट्वाप्रकृतिकं द्वितीयांतं क्तांतप्रकृतिकेन सुबन्तेन समस्यते निन्दायां।
खट्वारूढो जाल्मः। नित्यसमासोऽयं॥ न हि वाक्येन निन्दा गम्यते॥ सामि।२।१।२७॥ सामिकृतं॥ ॥ वाच्यं। जहत्स्वार्थायां वृत्तौ श्रितांतशब्दस्या-
नर्थकत्वेनाप्रत्ययोगासंभवात्। अजहत्स्वार्थायामपि न दोषः। समुदायावयवसंनिधौ समुदायस्यैव कार्यप्रयोजकत्वात्। अन्यथा सुंदरदुहितुरपत्यं सुंदरदौहित्र इ-
त्यापत्तेरिति दिक्। कृष्णंश्रित इति। न लोकेति षष्ठीनिषेधः। कृष्णंश्रित इति। प्रथमानिर्दिष्टमिति द्वितीयांतस्य पूर्वनिपातः यद्यपीह श्रितशब्दोपि प्रथमानिर्दिष्टस्तथा-
पि समासविधायके प्रथमानिर्दिष्टमुपसर्जनमित्युक्तमिति नातिप्रसंगः। नन्वेवमव्ययादीनामुपसर्जनसंज्ञार्थमव्ययंविभक्तीत्यादिना समासविधानस्यावश्य-
कत्वात् सुप्सुपेति समासस्यानित्यत्वज्ञापकत्वं न संभवत्येव तथा चाव्ययीभावतत्पुरुषादिसमासाभावपक्षे सुप्सुपेति समासप्रवृत्त्या अपविष्णोः परिविष्णोः
कृष्णंश्रितः राजपुरुष इत्यादिविग्रहवाक्यानि न सिध्येरन्निति चेदत्राहुः। पुनः समासविधानेन केवलमुपसर्जनसंज्ञार्थं तस्याः प्रकारांतरेणापि सिद्धेः। तथा

प्राक्कडारात्समास इत्यनंतरं प्रथमानिर्दिष्टमुपसर्जनमेकविभक्ति चापूर्वनिपात इति पठित्वा समासाधिकारे प्रथमानिर्दिष्टमिति व्याख्यायामुपसर्जनसंज्ञा सिध्यत्येव
विभक्त्यर्थादिषु विद्यमानमव्ययं सुवंतेन चेत्समस्यते स समासोऽव्ययीभावः स्याद्द्वितीयांतं चेत्स समासस्तत्पुरुष इत्येवं व्याख्यानादव्ययीभावतत्पुरुषादिसंज्ञापि सिध्यतीति
पुनः समासविधानं व्यर्थं सत् ज्ञापयति। नन्वव्ययं विभक्त्यादीनां समासविधायकत्वे सिद्धे भवद्उक्तमेतत्स्यात्। तत्रैव मानं नपुंसकामद्यामद्यत इति चेदत्र केचित्। उक्तरीत्या
वोपसर्जनसंज्ञायां सिद्धायां प्रथमानिर्दिष्टमिति सूत्रे समासग्रहणं व्यर्थं सत्समासविधायके प्रथमानिर्दिष्टमित्यर्थलाभार्थं तेनामीषां समासविधायकत्वं सिध्य
तीति। अथवा सुप्सुपेति समासस्यानित्यत्वे आकरग्रंथ एव प्रमाणं। अन्यथासिन्नित्यसमासयोरिति वार्त्तिके नित्यग्रहणेन नार्थः। इदमपि सिद्धं भवति वाप्यामश्व
श्वो वाप्यश्व इत्यादि प्रागुक्तभाष्यकैयटग्रंथस्यासामंजस्यापत्तेरिति दिक्। ननु कष्टश्रित इत्यस्य कष्टकर्मकश्रयणकर्त्तेत्यर्थः। स च कष्टः श्रितो पेनेति कर्मणि क्तां
तेन त्र्यहे द्वीहि त्वापि सुलभ इति किमनेन समासारंभेणैवं वा बहुव्रीहौ। श्रितकष्ट इति निष्ठांतस्य पूर्वनिपातप्रसंगात्। शेषाद्विभाषेति समासांतः कप्प्रसज्येतेति दि
क्। दुःखातीत इति। अतिपूर्वकादिणः कर्त्तरि क्तः। अवशिष्टान्यप्युदाहरणान्यूह्यानि। कूपपतितः। यद्यपि पतनियंति दरिद्रातिभ्य इति विकल्पितेट्त्वात् यस्य विभाषेति इण्नि
षेधेन भाव्यं। तथाप्यत एव निपातनादिडित्याहुः। वस्तुतस्तु चुरादावदंतेषु पठितस्य पतगतौ चेत्यस्याश्रयणेन पतितः सिध्यति यस्य विभाषेत्यत्रैकाच इत्यनुवृत्ते
स्सर्वसंमतत्वात्। ग्रामगतः। तुहिनात्यस्तः। अत्यासोव्यतिक्रमस्सोपि गतिविशेष एवेति कर्त्तरि क्तः। आदिकर्मणि क्तो वात्राभ्युपेयः सुखप्राप्तः। दुःखापन्नः। गम्यादी
नामिति। गम्यादयश्च प्रयोगतोऽनुसेयाः। ग्रामगमीति। गमेरिनिरित्यौणादिक इनिः स च भविष्यति गम्यादय इति भविष्यत्काले। अकेनोरिति षष्ठीनिषेधात्कर्मणि द्वितीया। अयोग्यम
त्वादिति स्वयमित्यस्यात्मनेत्यर्थ कस्य कर्त्रर्थतया द्वितीयांतत्वानुपपत्तिरिति भावः। स्वा यं कृतिरिति। असति समासे कार्त्तिरिति स्यादिति भावः। खट्वारूढ इति। जाल्मोऽसमी
क्ष्यकारी स्यादित्यमरः। वेदं व्रतानि च समाप्य समावृत्तेन हि खट्वारोढव्या। ब्रह्मचर्य एव भूमिशयना र्होपि यः खट्वामारोहति स जाल्मः। रूढश्चायं तेन खट्वामारोहणमात्रानि
षिद्धानुष्ठानपरः सर्वोपि खट्वारूढ इत्युच्यते। अत एवाहानित्येति। सामि। सामीत्येतदव्ययमर्धशब्दपर्यायः॥ ॥ ॥ ॥

कालाः। बहुवचननिर्देशः स्वरूपनिरासार्थः। कालवाचिनो द्वितीयान्ताः क्तान्तेन सह वा समस्यन्त इति सूत्रार्थः। ननु कालाः अत्यन्तसंयोगे इत्येवास्तु क्तेनेति निवृत्तं नार्थो यो
गविभागेनेत्यत आह अनत्य-नेति। मासप्रमित इति। माङ् माने। आदिकर्मणि क्तः कर्तरि। इह प्रतिपच्चन्द्रेण नास्त्यत्यन्तसंयोगः। मुहूर्त्तमिति। मुहूर्त्तव्यापीत्यर्थः। कालाध्व
नोरत्यन्तसंयोग इति द्वितीया। तृतीयातत्कृत। लुप्तेति। सौत्रत्वादिति भावः। तच्छब्देन तृतीयान्तपरामर्शो नान्त इत्यर्थो लभ्यते। तदर्थकृतत्वं च गुणवाचकस्यार्थद्वाराऽवि
शेषणं। तृतीयान्तार्थकृतो यो गुणस्तद्वचनेनेति। तदेतद्व्याचष्टे तृतीयान्तार्थेत्यादिना अर्थशब्देन चेति। सोऽपि स्वतंत्रं निमित्तमिति भावः। नन्वर्थेन समासासंभ
वात्तद्वाची शब्दो ग्रहीष्यते किमत्र वचनग्रहणेन। अत्राहुः गुणमुक्तवान् गुणवचनः। कृत्यल्युटो बहुलमिति भूते कर्तरि ल्युट्। गुणमुक्त्वा यो द्रव्यमुक्तवान्

कालाः।२।१।२८॥ क्तेनेत्येव। अनत्यन्तसंयोगार्थमिदं वचनं॥ मासप्रमितः प्रतिपच्चन्द्रः। मासं परिच्छेत्तुमारब्धवानित्यर्थः॥ अत्यन्तसंयोगे च।२
।१।२९॥ कालाः इत्येव। अक्तान्तार्थं वचनं। मुहूर्त्तसुखं मुहूर्त्तं सुखं॥ तृतीया तत्कृतार्थेन गुणवचनेन।२।१।३०॥ तत्कृतेति लुप्ततृतीयाकं तृती
यान्तं तृतीयान्तार्थकृतगुणवचनेनार्थशब्देन च सह प्राग्वत्। शंकुलया खण्डः। शंकुलाखण्डः। धान्येनार्थो धान्यार्थः। तत्कृतेति किं। अक्ष्णा काणः॥
पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः।२।१।३१॥ तृतीयान्तमेतैः प्राग्वत्। मासपूर्वः। मातृसदृशः। पितृसमः। ऊनार्थे। माषोनं कार्षाप
णं। माषविकलं। वाक्कलहः। आचारनिपुणः। गुडमिश्रः। आचारश्लक्ष्णः। मिश्रग्रहणे सोपसर्गस्यापि ग्रहणं। मिश्रंश्चानुपसर्गमसं
धाविति त्वत्रानुपसर्गग्रहणात्। गुडसंमिश्रा धानाः। अवरस्योपसंख्यानं॥ मासेनावरो मासावरः॥

स गुणवचनस्तेन घृतेन पाटवमिति गु
णमात्रनिष्ठेन समासो न भवति गुणश्चात्र सत्त्वे निविशतेऽपैतीत्यादिलक्षणलक्षितो गृह्यते न तु प्रवृत्तिनिमित्तं घटत्वादि तत्कृतत्वासंभवादिति। शंकुलया खण्ड इ
ति। करणे तृतीया। खडि भेदन इत्यस्माद्भावे घञि व्युत्पादितः खण्डशब्दः क्रियारूपा यत्र गुणो वर्त्तित्वा पश्चान्मत्वर्थलक्षणया तद्वति द्रव्ये वर्त्तते इति गुणव
चनो भवति। धान्येनेति। करणे तृतीया। अर्ज्यते इत्यर्थः। याचना। कर्मणि घञ्। अर्थनमर्थः। अभिलाषो वा भावे घञ्। अर्थशब्दस्य रूढत्वे तु धान्येनेति हेतौ
तृतीया कर्तृकरणे कृतेत्यनेन गतार्थत्वशंकैवात्र नेति रूढत्वाभ्युपगमपक्ष एव श्रेयान्। तत्कृतेति किमिति। कर्तृकरणे कृतेति सिद्धमिति प्रश्नः। इतरो गुणव

चनेन चेत्तन्त्रोक्ततैनैवेति नियमार्थमिदमित्याशयेन प्रत्युदाहरति। अक्ष्णेति। न ह्यक्ष्णकाणत्वं कृतं किंतु किर्मादिनैवेति भावः। तृतीयात्विह येनांगविकार इत्यनेन। का
णइति। कणनिमीलन इत्यस्माद्घञ्। गुणवचनत्वं तु कृतीत्याखंडशब्दस्येवास्यापि बोध्यं। गुणवचनेनेति किं। गोभिर्वपावान्। गोसंबंधिदध्यादिभोजनेन देवदत्तस्य
वपावत्त्वमित्यस्ति नन्वत्र तत्कृतत्वं न तु सो गुणवचनः। पूर्वसदृशाद्दहसमसदृशाभ्यां योगे तुल्यार्थैरिति तृतीया। अन्ये योगेत्वेन एववचनाद्वेनाविति वा तृतीया। इह
सदृक्षग्रहणं व्यर्थं षष्ठीसमासेन गतार्थत्वात्। न च तत्पुरुषे तुल्यार्थतृतीयेति पूर्वपदप्रकृतिस्वरार्थमिदमिति वाच्यं। सदृशप्रतिरूपयोस्सादृश्य इति सूत्रेण तत्सि
द्धेरिति मनोरमायां स्थितं। विद्यया सदृशो विद्यासदृश इत्यादौ हेतुत्वप्रकारकबोधार्थं तृतीयासमासोऽप्यावश्यक इति त्वन्ये। पूर्वसूत्रेणैव तन्न्यक्ततत्वात्तृतीयासमासो
पि सिध्यतीत्यपरे। ऊनार्थेति। पूर्वसूत्रेऽर्थशब्देन समासस्योक्तत्वादिहार्थग्रहणमभिधेयपर्यंतत्वोनशब्देनैव संबध्यते न तु पूर्वादिभिः समसदृशयोः पृथगुपादानादिति

कर्तृकरणे कृता बहुलं।२।१।३२।। कर्तरि करणे च तृतीया कृदन्तेन बहुलं प्राग्वत्। हरिणा त्रातो हरित्रातः। नखैर्भिन्नो नखभिन्नः। कृद्ग्रहणे
गतिकारकपूर्वस्याऽपि ग्रहणं। नखनिर्भिन्नः। कर्तृकरणेति किं। भिक्षाभिरुषितः। हेतावेषा तृतीया। बहुलग्रहणं सर्वोपाधिव्यभिचारार्थं
तेन दात्रेण लूनवानित्यादौ न। कृतेति किं। काष्ठैः पचतितरां।। ।। ((भावः। मिश्रं चेति। पणबंधेनैकार्थ्ये संधिस्तत्राप्रयुज्यमानो मिश्रशब्द

उपसर्गरहितेनोदात्त इति सूत्रार्थः। अवरस्येति। अत्र व्याचक्षते। ऊनार्थेत्येव सिद्धत्वादिदं सुत्यजमेव। न चावरशब्दस्यानार्थकत्वमप्रसिद्धमिति वाच्यं। सप्तदशा
वराः सत्रमासीरन्निति श्रुतौ अव्यक्तानुकरणस्याजवरार्धादिति सूत्रे च तत्प्रसिद्धेरिति। कर्तृकरणे। समाहारद्वंद्वात्सप्तमीत्याशयेनाह कर्तरि करणे चेति। अत्र केचित्तु क
र्तृकरणे इति प्रथमाद्विवचनं तृतीयया विशेष्यते। विशेषणेन च तदंतविधिस्तेन तृतीयांते कर्तृकरणे कृदंतेन समस्येते इति व्याख्यांतरमित्याहुः। सर्वोपाधीति। कर्तरि करणे च प्राप्ता तृ
तीया तदंतमपि बहुलग्रहणान्न क्वचिन्न समस्यते क्वचित्तु विभक्त्यंतरमपि समस्यते बहुलग्रहणादेवेत्यर्थः। समासाभावं प्रदर्शयति। दात्रेण लूनवानित्यादाविति। आदिशब्देन दा
त्रेण छिन्नवान् हस्तेन कुर्वन्नित्यादिग्रहणं। विभक्त्यंतरमपि समस्यत इत्यस्योदाहरणं तु पादहारकः। गलेचोपकः। ह्रियत इति हारकः। बाहुलकात्कर्मणि ण्वुल्। पादाभ्यामित्यपादा
नपंचम्यंतस्य समासः। चुप मंदायां गतौ हेतुमण्णिजंतात्कर्मणि ण्वुल्। अमूर्द्धमस्तकादित्यलुक्। कर्तृत्वकरणत्वयोः क्रियानिरूपितत्वेन क्रियासमर्पककृदंतेनैव भवेत्समासः।

सुपेत्यधिकारात्तिङन्तेन तु ना॰ असंगरस्याशयेन पृच्छति। कृतार्किमिति। इतरस्तु तिङन्तप्रकृतिकतद्धितान्तप्रकृतिकसुबन्तेनाऽसमासफलमित्याशयेन प्रत्युदाहरति काष्ठैरिति॥
कृत्यैरधि। पूर्वसूत्रस्यैव प्रपञ्चोऽयं न तु नियमार्थमित्याहुः। काकपेयेति। शकि लिङ्चेति शक्यार्थे कृत्यः पूर्णतोयत्वान्नदीस्थैः काकैरपि पातुं शक्येति स्तुतिः। अल्पतोयत्वेन निन्दा वा। श्व
लेह्यमिति। पूर्ववत्कृत्यः। कोमलत्वाद्धा तेनापि लेढुं शक्यत इति स्तुतिः। वा तेनापि लेढुं शक्यते निर्बलत्वान्निन्दा वा। अन्नेनाभिसिक्तास्त्रीभक्तमन्धोऽन्नमोदनोऽस्त्रीत्यमरः। व्याख्याना
न्नेह स्वरूपग्रहणं तदाह संस्कारकेत्यादि। भक्ष्येण। खरविशदमभ्यवहार्यं भक्ष्यं। खरं कठिनं विशदं विविक्तावयवं खाद्यं भक्ष्यमित्यर्थः। यत्त्वत्यधातस्यरञ्जं तस्य च भक्ष्यपतेस्तत्रैव
प्रयोगात्। अत्र क्षरस्यादिप्रयोगास्तु भाक्ताः। गुडधाना इति। ननु धानानां प्रत्येकं विभक्तावयवत्वाभावात्कथमेतदुदाहरणं संगच्छत इति चेत्। मैवं। भृष्टयवसमुदायस्य धानात्वात्स

कृत्यैरधिकार्थवचने। २।१।३३॥ स्तुतिनिन्दाफलकमर्थवादवचनमधिकार्थवचनं तत्र कर्तृकरणे च तृतीया कृत्यैः सह प्राग्वत्। वातच्छेद्यं तृणम्॥
काकपेया नदी। अन्नेन व्यञ्जनम्। २।१।३४। संस्कारकद्रव्यवाचकं तृतीयान्तमन्नेन प्राग्वत्। दध्ना ओदनो दध्योदनः। इह अन्नभूतोपसेकक्रियाद्वारा सामर्थ्यं
भक्ष्येण मिश्रीकरणम्। २।१।३५। गुडेन धानाः गुडधानाः। मिश्रणक्रियाद्वारा सामर्थ्यं। चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः। २।१।३६। चतुर्थ्यन्तार्था
य यत्तद्वाचिना अर्थादिभिश्च चतुर्थ्यन्तं वा प्राग्वत्। तदर्थेन प्रकृतिविकृतिभाव एव बलिरक्षितग्रहणाज्ज्ञापकात्। यूपाय दारु यूपदारु। नेह रन्धनाय
स्थाली। अश्वघासादयस्तु षष्ठीसमासाः। अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्॥ द्विजायायं द्विजार्थः सूपः। द्विजार्थाय यवागूः। द्विजार्थम्
पयः। भूतबलिः। गोहितम्। गोसुखम्। गोरक्षितम्॥ । १९ मुदायं प्रति समुदायिनामवयवत्वाच्च तदुपपत्तेः॥ चतुर्थी तदर्थ॥ तच्छब्देन प्रकृता चतुर्थी परा

मृश्यते प्रत्ययग्रहणे तदन्तग्रहणात्। तन्तदर्थेन सामर्थ्यात्तदर्थो लक्ष्यत इत्याशयेनाह। चतुर्थ्यन्तार्थाय यदिति। चतुर्थ्यन्तवाच्याय यदुपादेयं द्रव्यादि तद्वाचिना चतुर्थ्यन्तं समस्य
त इत्यर्थः। बलिरक्षितग्रहणादिति। हितसुखग्रहणं तु न ज्ञापकं तद्योगे चतुर्थी चाशिषीति अतादर्थ्येऽपि चतुर्थीसंभवादिति भावः। ननु चतुर्थी चाशिषीति विहिताया चतुर्थ्या त
दन्तस्य समासो न भवति। समासादाशिषोऽनवगमादिति केचिदाहुः इति कैयटेनोक्तं। ततश्च तत्र हितसुखग्रहणमपि बलिरक्षितग्रहणवज्ज्ञापकमेवेति चेदत्र नव्याः। ब्राह्म
णाय हितं ब्राह्मणहितम्। गोहितं। गोसुखमित्यतादर्थ्ये चतुर्थ्यन्तेनापि समासः स्वीक्रियते। सा चातादर्थ्ये चतुर्थी हितयोगे चेति वार्त्तिकाच्चतुर्थी तदर्थे त्यादिना हितसुखश

द्भ्यांसमासविधानात्तज्ज्ञापनाद्दूसंभवतीतिहितसुखग्रहणंनज्ञापकमितितुसम्यगेवेत्याहुः।पुणयेतितादर्थ्येचतुर्थी।एवमग्रेपियथासंभवमूह्यं।अश्वघासादयइति।एतच्च
भाष्यकृतोक्तं।नन्वेवंरंधनायस्थालीत्यत्रापिषष्ठीसमासःस्यादेवेतिप्रकृतिविकृतिभावएवेतिनियमोनिष्फलएवनचस्वरेविशेषः।चतुर्थीतदर्थेइतिपूर्वपदप्रकृतिस्वरस्यापिप्रकृ
तिभावएवेष्यमाणत्वात्।अत्राहुः।संबंधत्वतादर्थ्यत्वकृतवैलक्षण्येनोक्तनियमसाफल्यान्नदोषः।अत्रचमानमेतदेवभाष्यं।नमाषाणामश्नीयात्।दाशरथायमैथिलीत्यादि
प्रयोगाः।अपिरस्यमेवविवक्षाभेदेननिर्वोढव्याः।एवंचपूर्वसदृशेतिसूत्रेसदृशग्रहणंव्यर्थमितिकैयटहरदत्तादीनामुक्तिःप्रामादिकीत्यवधेयं।शब्दबोधकृतवैलक्षण्यस्यतत्रा
पिसत्वादिति।अर्थेननित्येति।अन्यथाविभाषाधिकारात्पक्षेद्विजायार्थइतिप्रयोगःस्यादितिभावः।विशेष्यलिंगताचेति वचनाभावेत्वर्थशब्दस्यनित्यपुंस्त्वात्स्वर्वल्लिंगमिति
सर्वत्रपुल्लिंगप्रयोगएवस्यादितिभावः॥ ❁ ॥पंचमीभयेन।भयेतिस्वरूपग्रहणंनार्थस्यप्रमाणाभावाद्भयभीतेतिवार्त्तिकारंभाच्चातेनवृकात्त्रासइत्यादौसमासोन।कथंतर्हि

पञ्चमीभयेन।२।१।३७॥चौराद्भयं।चौरभयं।भयभीतभीतिभीभिरितिवाच्यं।वृकभीतः॥अपेतापोढमुक्तपतितापत्रस्तैरल्पशः।२।१।३८॥एतैस्स
हाल्पम्पञ्चम्यन्तंसमस्यतेसतत्पुरुषः।सुखापेतः।कल्पनापोढः।चक्रमुक्तः॥स्वर्गपतितः।तरङ्गापत्रस्तः।अल्पशःकिं॥प्रासादात्पतितः॥स्तो
कान्तिकदूरार्थकृच्छ्राणिक्तेन।२।१।३९॥स्तोकान्मुक्तः।अल्पान्मुक्तः।अन्तिकादागतः।अभ्यासादागतः।दूरादागतः।कृच्छ्रादागतः॥पञ्चम्याः
स्तोकादिभ्यइस्सलुक्॥षष्ठी।२।२।८॥राज्ञःपुरुषः॥राजपुरुषः॥ ❁ ॥ ९ भोगोपरतोग्रामनिर्गतइत्यादिप्रयोगाः।अत्राहुः।बहुलग्रहणात्तत्कचिद्भिन्न
क्तांतरमपिक्तान्तेनसमस्यतइतिप्रागेवोक्तत्वात्सुप्सुपेत्यनेनवातदुपपत्तिरिति।अपेतापोढा॥पंचमीतिवर्त्ततेग्रन्थग्रहणात्तदंतग्रहणं।अल्पशइत्यत्रबहुल्पार्थाच्छस्कारकादितिशस
यद्यपिबहुल्पार्थान्मंगलामंगलवचनमितिवक्ष्यतितथाप्यतएवनिपातनाच्छसितिबोध्यं।कारकत्वंतुसमसनक्रियांप्रतिपंचम्यंतस्यकर्मत्वात्तदभिधायित्वाच्चाल्पशब्दस्यतदे
तदाह।अल्पंपंचम्यंतमिति।स्तोकान्मुक्तइत्यादि।करणेचस्तोकाल्पेतिपंचमी॥दूरादागतइत्यादौतुदूरांतिकार्थेभ्यइत्यनेन॥राजपुरुषइति।राजन् अस पुरुषसुइत्यलौ।
किकविग्रहेसमासेकृतेनतुलुकंतवर्तिनीविभक्तिमाश्रित्यपदत्वान्नलोपः॥ ❁ ॥ ॥ ❁ ॥ ॥ राम ॥ कृष्ण ॥ ❁ ॥

याजकादिभिश्च। याजकः पूजकः परिचारकः परिवेषकः। स्नातकः अध्यापकः उत्सादकः होता पोता भर्ता रथगणकः पत्तिगणकः इत्यादि गुणात्तरेणेति। एतच्च वार्त्तिकं सर्वगुणकार्त्स्न्ये र
त्यत्र पठितं। कृद्योगा षष्ठीति [illegible] र्तृकर्मणोः कृतीति कृत्संनियोगेन कृतेत्यर्थः। यद्यनु प्रतिपदविधानेत्यादिनिषेधवचनमारभ्यते तदेदं तद्बाधनायारब्धव्यं तस्यैवानारम्भत्वमनु
परं वक्ष्यामः। इध्मव्रश्चनेऽति। वृश्च्यते छिद्यते अनेनेति व्रश्चनः कुठारादिः करणेल्युट्। इध्मानामिति कर्मषष्ठ्यं तस्यानेन समासः। नृणामिति। यतश्च निर्द्धारणमिति षष्ठी। द्विज
शब्देनात्र समासप्रसंगः। तदपेक्षा हि षष्ठी। श्रेष्ठत्वं हि द्विजेतरमनुष्येभ्यः। तेषां सामान्यशब्देनोपस्थितत्वात्तान्विहायानुपस्थितकल्पनाया अन्याय्यत्वात्। अथ कथं पुरुषो
त्तम इति। यस्मान्निर्द्धार्यते यश्चैकदेशो निर्द्धार्यते यश्च निर्द्धारणहेतुः एतत्त्रितयसन्निधाने सत्येवायं निषेध इति द्विवचनविभज्येति सूत्रे कैय्यटः। अन्ये तु पुरुषेषूत्तम इति
निर्द्धारणे सप्तम्याः संज्ञायामिति समास नचैवं न निर्द्धारणे इति व्यर्थो। स्वरभेदात्। सप्तमीसमासे हि तत्पुरुषे तुल्यार्थेत्यादिना पूर्वपदप्रकृतिस्वरः

याजकादिभिश्च २।२।९॥ एभिः षष्ठ्यन्तं न समस्यते। तृजकाभ्यां कर्त्तरीत्यस्य प्रतिप्रसवोऽयं। ब्राह्मणयाजकः। देवपूजकः। गुणात्तरेणतरब्लोपश्चेति
वक्तव्यं। तरबन्तेन प्रकृतिवाचितेन सह समासस्तरब्लोपश्च न निर्द्धारण इति पूरणगुणेति च निषेधस्य प्रतिप्रसवोऽयं। सर्वेषां श्वेततरः। सर्वश्वेतः। सर्वेषां
महत्तरः। सर्वमहान्। कृद्योगा च षष्ठी समस्यत इति वाच्यं॥ इध्मानां व्रश्चनः। इध्मव्रश्चनः। न निर्द्धारणे। २।२।१०॥ निर्द्धारणे या षष्ठी सा न समस्यते।
नृणां द्विजः श्रेष्ठः। प्रतिपदविधाना षष्ठी न समस्यत इति वाच्यं॥ सर्पिषो ज्ञानं॥ ९९ षष्ठीसमासे तु समासस्येष्टं नोदात्तत्वं स्यात्तच्चानिष्टमित्याहुस्तन्मंदं॥

संज्ञायामिति समासस्य नित्यत्वेन स्वपदविग्रहासंगतिप्रसंगात् तस्मात्कैय्यटोक्तसमाधानमेव समीचीनमिति नव्याः। प्रतिपदविधानेति पदं पदं प्रति विहिता प्रतिपदविधा
ना। षष्ठी शेष इति विहायान्येन ज्ञोविदर्थस्येत्यादिना विहिता सर्वैवेत्यर्थः। धातुकारकविशेषं गृहीत्वैव ज्ञोविदर्थस्येत्यादिना षष्ठी विधीयत इति भवति तस्याः प्रतिपदवि
धानत्वं। नन्वनेनैव गतार्थत्वात् न निर्द्धारण इति व्यर्थमिति चेदत्राहुः यतश्च निर्द्धारणमिति सूत्रं न षष्ठीविधत्ते किंतु सप्तमीमेव षष्ठी तु तया मा बाधीति प्रतिप्रसूयत इत्यन्य
देतत्। एवं स्वामीश्वराधिपतीत्यादिष्वपि। तेन गृहस्वामी सर्वेश्वरः। निषादाधिपतिमित्यादि सिद्धमिति। चेत्सत्तस्तु ज्ञोविदर्थस्येत्यादि चतुर्दशसूत्री मध्ये दिवस्तदर्थस्ये
त्यादिषट्सूत्रीं विहाय अवशिष्टायामष्टसूत्र्यां शेष इति वर्त्तते। तथा च नमाषाणामश्नीयादित्यादाविव षष्ठी शेष इत्येव सिद्धे नियमार्थं प्रकरणमिह षष्ठ्येव न तु तत्सु

तथा च लुकः प्रयोजकीभूतः समास एव नेति फलितोऽर्थः। ततश्च प्रतिपदविधाना नेति वचनं न कर्तव्यं। एवं स्थिते कृद्योगा षष्ठी नेति वचनमपि मास्तु। कर्तृकर्मणोः कृतीत्यत्र हि
शेष इति निवृत्तं तथा चाप्राप्तषष्ठीविधानार्थमेवेदमिति समासनिवृत्तिप्रसंगाभावात् षष्ठीत्यनेनैव समाससिद्धेः। सर्पिषो ज्ञानमिति। वस्तुतः करणस्य संबन्धमात्रविवक्षया ज्ञोऽविद
र्थस्येति षष्ठी। सर्पिःसंबन्धिप्रवर्तनमित्यर्थः। पूरणगुण। अर्थशब्दस्य त्रिषु संबन्धादाह पूरणाद्यर्थैरिति। अत्र प्राचोक्तं एतदर्थैः षष्ठी न समस्यत इति। तन्न्यूनं तथा हि सत्सु हितानां
नामेव ग्रहणं स्यात्तावतामेवार्थशब्देन समस्तत्वादिति ध्वनयन्नाह। सदादिभिश्चेति। षष्ठ इति। षण्णां पूरणः षष्ठः। तस्य पूरणे डट्। षट्कतिकतिपयचतुरां थुक्। कथं तर्हि तान्युञ्छ

पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन। २।२।११॥ पूरणाद्यर्थैः सदादिभिश्च षष्ठी न समस्यते॥ पूरणे सतां षष्ठः। गुणे काकस्य कार्ष्ण्यं ब्रा
ह्मणस्य शुक्लाः॥ यदा प्रकरणादिना दन्ता इति विशेष्यं ज्ञातं तदेदमुदाहरणं। अनित्योऽयं गुणेन निषेधः। तदशिष्यं संज्ञाप्रमाणत्वादित्यादिनिर्दे
शात्। तेनार्थगौरवं बुद्धिमांद्यमित्यादि सिद्धं॥ सुहितार्थास्तृप्त्यर्थाः। फलानां सुहितः। तृतीयासमासस्तु स्यादेव स्वरे विशेषः। सतां द्विजस्य कुर्वन्॥
कुर्वाणो वा किङ्कर इत्यर्थः। अव्ययं। ब्राह्मणस्य कृत्वा। पूर्वोत्तरसाहचर्यात् कृदव्ययमेव गृह्यते। तेन तदुपरीत्यादि सिद्धमिति रक्षितः। तव्य। ब्रा
ह्मणस्य कर्तव्यं॥ तव्यता तु भवत्येव। स्वकर्तव्यं स्वरे भेदः। समानाधिकरणे। तक्षकस्य सर्पस्य। विशेषणसमासस्त्विह बहुलग्रहणान्न। गोर्धे
नोरित्यादिषु पोटायुवतीत्यादीनां विभक्त्यन्तरे चरितार्थानां परत्वाद्बाधकः षष्ठीसमासः प्राप्तस्सोऽप्यनेन वार्यते॥ क्तेन च पूजायां। २।२।१२॥ म
तिबुद्धीति सूत्रेण विहितो यः क्तस्तदन्तेन षष्ठी न समस्यते। राज्ञां मतो बुद्धः पूजितो वा। राजपूजित इत्यादौ तु भूते क्तान्तेन सह तृतीयान्तस्य स
मासः। अधिकरणवाचिना च॥ २।२।१३॥ क्तेन षष्ठी न समस्यते। इदमेषामासितं गतं भुक्तं वा॥

षष्ठाङ्कितसैकतानीति। प्रमाद एवायमित्येके।
उंछेषु षष्ठः उंछात्मकः षष्ठ इति वा व्याख्येयमिति मनोरमायां स्थितं। गुणेति। सत्त्वे निविशतेऽपैतीत्यादिलक्षणलक्षितो गुणोऽत्र गृह्यते। न त्वदेङ् गुणः। अर्थग्रहण
ता नापि संख्या। क्रोशाद्धेशतयोजनशतयोरिति वार्त्तिके निर्देशात्। काकस्य कार्ष्ण्यं ब्राह्मणस्य शुक्ला इति। व्याप्तिन्यायात्केवलगुणवाची गुणोपसर्जनद्रव्यवाची च गु
णशब्देन गृह्यत इति भावः। ननु ब्राह्मणस्य शुक्ला इत्यत्र समासप्रसंग एव नास्ति ब्राह्मणशब्दस्य दन्तैरेवान्वयात् ब्राह्मणस्य ये दन्तास्ते शुक्ला इत्यर्थादत आह यदे

शुक्लशब्द एवेह विशेष्यसमर्पक इति भावः। चंदनगंधः घटरूपमित्यादावनेन निषेधप्राप्ते तत्स्थैश्च गुणैः समासो वक्तव्य इति वार्त्तिकेन समासः प्रतिप्रसूयते। गंधत्वा-
नप्रतीयमानो गंधो न कदापि गुणिसमानाधिकरणः किं तु स्वप्रधानः। इदमेव हि तात्स्थ्यं नाम। ननु पिनष्टि गंधानिति प्रयोगदर्शनात् शुक्लशब्दादितुल्य एव गंधशब्दो न तत्त-
स्थगुणवचन इति चेन्न। पिनष्टीति प्रयोगे हि गंधानिति न गुणशब्दः मालतीकुसुमादिषु गंधशब्दप्रयोगादर्शनात्। किं तु चंदनत्वादिजातिनिमित्तकोऽन्य एव सः। तस्मा-
च्चंदनगंध इत्यादौ तत्स्थत्वं सुस्थमेव। एवं घटरूपमित्यादावपि। नन्वेवमपि बलाकायाः शौक्ल्यं केशस्य नैल्यमित्यादावतिप्रसंग इति चेदत्राहुः। गुणवचनादुत्पन्न-
स्य शुक्लादिगुणस्यैवाभिधानात्तद्वाचकपदानां गुणिसामानाधिकरण्यसत्त्वान्न दोषः। तथा च प्राधान्येनाप्राधान्येन वा द्रव्याप्रतिपादकत्वे सति गुणप्रतिपादकत्वं
तत्स्थगुणवाचित्वमित्यर्थ इति। फलानामिति। करणस्य शेषत्वविवक्षायां षष्ठी। स्वरे विशेष इति। तत्पुरुषे तुल्यार्थेति पूर्वपदप्रकृतिस्वरं बाधित्वा थाथादिसूत्रे-
णांतोदात्तत्वप्राप्ते तदपवादेन तृतीया कर्मणीत्यनेन पूर्वपदप्रकृतिस्वरे सत्याद्युदात्त इष्टः षष्ठीसमासे तु अंतोदात्तत्वं स्यात्तच्चानेष्टमिति भावः। तृपिश्च सकर्मको-
ऽस्ति। पितॄनतार्प्सीत्सममंस्त बंधून् इति भट्टिप्रयोगात्तेनास्मात्कर्मणि क्तो नास्तीति न शंकनीयं। द्विजस्य कुर्वन् कुर्वाण इति। नेयं घटाद्यपेक्षया षष्ठी द्विजस्य घटं कु-
र्वन्निति। तथा हि सत्यसामर्थ्यादेव समासाप्रसक्तौ निषेधो व्यर्थः स्यादितो व्याचष्टे किंकर इत्यर्थ इति। ब्राह्मणस्य कृत्वेति। तादर्थ्यरूपसंबं-
धस्य सामान्यरूपेण विवक्षायां षष्ठी। ब्राह्मणसंबंधिनी या क्रिया तदनंतरमित्यर्थः। कृदव्ययमेवेति। अनेकमन्यपदार्थ इति सूत्रे सर्वपश्चादिति भाष्यप्रयोगादिति
भावः इत्यादीति। तथा च भट्टिः प्रायुंक्त। यत्कृते शत्रून्निगृह्णीमः। आदेयाः किंकृते भोगाः कुंभकर्ण त्वया विनेति। इष्टि न इति कैयटहरदत्तौ तु अव्ययप्रतिषेधे तृसुस्तो-
परिसुदाहरंतौ भक्तुं द्रव्ययेनापि निषेधं मन्येते तौ च क्षागुक्तभाष्यप्रयोगविरोधादुपेक्ष्यावि ति भावः। तव्यता तु भवत्येवेति॥ सूत्रे निरनुबंधग्रहणादिति भावः॥
स्वकर्तव्यमिति। कर्तृषष्ठ्या समासः स्वरे भेद इति। कृदुत्तरपदप्रकृतिस्वरेण तित्स्वरस्यावस्थानादंतस्वरित इष्टः। तव्येन तु समासे मध्योदात्तत्वं स्यात्तच्चानेष्ट-
त इति भावः। सोढव्यंनेनेति। षष्ठीसमासे न पोटायुवतीति समासो वारितः। सोऽपि षष्ठीसमासः पूरणगुणेत्यनेन वार्यत इत्यर्थः। क्तेन च पूजायां। सूत्रोपलक्षणं
पूजाग्रहणं। व्याख्यानादित्याह। मतिबुद्धीति। राज्ञामिति। क्तस्य च वर्तमान इति कर्तरि षष्ठी। भूत इति। न च तत्र कौंडिन्यन्यायेन मत्यादिभ्यः क्तस्य वर्तमानकालो

भूतकालतांबाधत इति वाच्यं। तेनैकादिगित्यतः तेनेत्यधिकारे उपज्ञात इति निर्देशेन भूतकालस्याबाधज्ञापनात्। उपज्ञात इत्यत्र हि भूते क्तो न तु वर्त्तमाने। अन्यथा क्तस्य च वर्त्तमाने इति षष्ठीविधानादुपज्ञातशब्दस्य तेनेति तृतीयायोगो न स्यात्। न चैवमपि ज्ञानार्थ एव ज्ञापकमस्त्विति वाच्यं। पूजितो यः सुरासुरैरिति प्रयोगानुरोधेन सामान्यविषयकज्ञापकत्वस्यैवाभ्युपगन्तव्यत्वात्। अन्ये तु कारकषष्ठ्याएव समासनिषेधोयं शेषषष्ठ्या तु समासः स्यादेवेत्याहुः। एतेन कलहंस रामम हितः कृतवानिति भट्टिप्रयोगो व्याख्यातः। राममहितः सः कलहं कृतवानित्यन्वयः। अधिकरणवाचिना च। वाचिग्रहणं चिंत्यप्रयोजनमिति हरदत्तादयः। इदमेषामासितमित्यत्राधिकरणे चेति क्तः। अधिकरणवाचिनश्चेति कर्त्तरि षष्ठी। अधिकरणे चेत्यत्रैव सिद्धे सूत्रद्वयेपि वाचिग्रहणं स्पष्टार्थमित्याहुः। ननु किंवृत्तं पद्धतमित्यत्र न कर्मणि क्तः वृतेरकर्मकत्वात्। तथा चाधिकरणे क्तो तेन कथमिह समास इति चेन्मैवं। नायमधिकरणे क्तः किं तु गत्यर्थाकर्मकेति कर्त्तरि। किमादत्तं निष्पन्नमित्यर्थः ॥ कर्मणि च क्तेनेति नानुवर्त्तते। क्तेन च पूजायामिति निषेधवैयर्थ्यप्रसंगात्। षष्ठी त्वनुवर्त्तते। किंतु सापि याकाचित्कर्मणि षष्ठी न गृह्यते। अपां स्रष्टेत्यादाव

कर्मणि च। २।२।१४। उभयप्राप्तौ कर्म्मणीति या षष्ठी सा न समस्यते। आश्चर्यो गवां दोहोऽगोपेन॥ ॥ ॥ ॥ ॥ ॥

तेनैव सिद्धौ तृजकाभ्यां कर्त्तरीति निषेधवैयर्थ्यापत्तेः। किंच इध्मव्रश्चन इत्यादौ समाससिद्धये वचनं कर्त्तव्यं स्यात्। नंच कृद्योगलक्षणा षष्ठी समस्यत इति वार्त्तिकस्य स्यैवेति वाच्यं। तस्य सिद्धांते प्रत्याख्यानात्। तत्र चकारनिपातानामनेकार्थत्वादितीत्यर्थे च शब्दोयं। तदाह कर्मणीति या षष्ठीति। सप्तम्येकवचनांतपदमुच्चार्य या षष्ठी विहिता परिशेषिता वेत्यर्थः। नियमसूत्राणां विधिरूपेण निषेधरूपेण वेति द्विधा प्रवृत्तेः स्वीकृतत्वात्। गवां दोह इति। अगोपेनेत्युपन्यासस्त्विह उभयप्राप्तिप्रदर्शनार्थः॥ अथं कथं शब्दानुशासनमिति। अत्र व्याचख्युः शब्दानामितीयं षष्ठी कर्तृकर्मणोरिति विहिता न तूभयप्राप्ताविव्यनेना आचार्यस्य कर्त्तुः वस्तुतः सत्त्वेपि इहानुपादानात्। तात्पर्यतोर्थप्रयोग इत्यतः प्रयोग इत्यनुवर्त्तनात् कर्तृकर्मणोरुभयोरुपादान एवायं नियम इति स्वीकारात्। आश्चर्यो गवां दोह इत्यत्र हि आश्चर्यं प्रतिपाद्यं तच्च यच्च शिक्षितोदोग्धा दुर्दोहाश्च वश्च दोग्धुं व्यासज्यैव निर्वहति न त्वन्यथा। अतः कर्तृकर्मणोर्विशिष्योपादानादत्रोभयप्राप्तिः। इह तु शब्दानामिदमनुशासनं न त्वर्थानामित्यर्थातिरत्रिपरं क्वचिन्नतु कर्त्तृविशेषनिवृत्तिपरमतो नास्त्युभयप्राप्तिः।

अस्तु वा यथा कथंचिदुभयप्राप्तिस्तथापि न क्षतिः। उभयप्राप्ताविति सूत्रे अविशेषेणाविभाषेति पक्षस्यापि विद्यमा-
नत्वात्। नियमपक्षे तु विपक्षे आचार्यस्य शब्दानुशासनमिति प्रयोगसंभवात्। यद्वा शेषलक्षणा षष्ठीति व्याख्यायते तदा तु समासनिषेधशंकैवात्र नास्तीति॥ ॥
तृजकाभ्यां। इह कर्तृषष्ठ्या तृजकाभ्यामिति वृत्तिकारव्याख्यानमयुक्तमिति ध्वनयन्नाह कर्त्रर्थे तृजकाभ्यामिति। कर्तृग्रहणं तृजकयोरेव विशेषणमिति युक्तं तयोः श्रुत-
त्वात्। न तु षष्ठ्या इति भावः। यद्यपि कर्तरीति न चोन विशेषणं व्यभि चारात्तथाप्यकस्य विशेषणत्वेन तदावश्यकमित्याह इक्षुभक्षिकेति। पर्यायाहणेति
भावे एवुच्। कर्मणि षष्ठ्याः समासः। ननु वज्रस्य भर्तेत्युदाहरणमयुक्तं। भर्तृशब्दस्य याजकादित्वेन समासावश्यंभावादित्याशंक्याह। पत्यर्थभर्तृशब्दस्येति। यद्य-
पि याजकादिष्वर्थविशेषविशिष्टतया भर्तृशब्दो न पठितस्तथापि रूढेर्वलीयस्त्वात्पतिपर्यायस्यैव तत्र ग्रहणं न तु यौगिकस्येति भावः। शेषषष्ठ्येति। त्वाष्ट्रकार-

तृजकाभ्यां कर्तरि॥ २।२।१५॥ कर्त्रर्थे तृजकाभ्यां षष्ठ्या न समासः। अपां स्रष्टा। वज्रस्य भर्ता। ओदनस्य पाचकः। कर्तरि किं। इक्षूणां भ
क्षणमिक्षुभक्षिका। पत्यर्थभर्तृशब्दस्य याजकादित्वात्समासः। भूभर्ता। कथं तर्हि घटानां निर्मातुस्त्रिभुवनविधातुश्च कलह इति। शेषष-
ष्ठ्या समास इति कैयटः। कर्तरि च॥ २।२।१६॥ कर्तृषष्ठ्या अकेन न समासः। भवतश्शायिका। नेह तृजनुवर्तते। तद्योगे कर्तुरभिहितत्वेन कर्तृष-
ष्ठ्या अभावात्॥ नित्यं क्रीडाजीविकयोः॥ २।२।१७॥ एतयोरर्थयोरकेन नित्यं षष्ठी समस्यते। उद्दालकपुष्पभञ्जिका। क्रीडाविशेषस्य संज्ञा॥ सं-
ज्ञायामिति भावे एवुल्। जीविकायां दन्तलेखकः। तत्र क्रीडायां विकल्पे जीविकायां तृजकाभ्यां कर्तरीति निषेधे प्राप्ते वचनं॥ ॥

स्तु तन्त्र न भवतु॥ नलोपके इति निषेधस्त्वनित्यः। त्र काभ्यामिति वक्तव्ये तद्वचः सानुबंधग्रहणात् ज्ञापकादित्याह। केचित्तु जनिकर्तुस्तत्प्रयोजको हेतुश्चेति निर्देशाद नित्योऽयं
समासनिषेध इत्याहुस्तन्न रं। शेषषष्ठीसमासेनोक्तनिर्देशोपपत्तेः। नेह तृजिति। न चात्र राघर्थत्वशंक्यं। तृच क्रीडाजीविकयोर्नास्तीति जयादित्येनोक्तत्वादिति भावः। वाम-
नस्तु अके जीविकार्थे इत्यत्राक इति किं रमणीयकर्तेति प्रत्युदाहरन् जीविकायां तृचमिच्छति। भावे एवुलिति। भंजनं भंजिका। पुष्पाणां भंजिका कर्मणि षष्ठी। भाव इत्युप-
लक्षणं अधिकरणे एवुल्यपि बाधकाभावादिति मत्वा संज्ञायामिति सूत्रे कृदन्ते मनोरमायामुक्तं उद्दालकः श्लेष्मातकस्तस्य पुष्पाणि भज्यन्ते यस्यां क्रीडायां सा उद्दाल-

पूर्वापर॥ एकदेशशब्दोऽवयवे रूढः अत एव तस्य कर्मधारयत्वेऽपि तन्नो मत्वर्थीयः। कृष्णसर्पवन्नित्यत्वेन कर्मधारयान्मत्वर्थीय इति निषेधस्य रूढेष्वप्रवृत्तेः। यद्यपीह एक
गो पूर्वादिति ठञ् प्राप्तस्तथाप्यत एव निर्देशाददिन्नित्याह अवयविनेति। नन्विदं सूत्रं व्यर्थं। पूर्वकाय इत्यादिप्रयोगाणां कर्मधारयेणैव सिद्धेः ऊर्ध्वकाय इतिवत् स
मुदाये हि वृत्ताः शब्दा अवयवेष्वपि वर्तन्त इति न्यायादत आह। षष्ठीसमासापवाद इति। तथा च कायपूर्व इत्याद्यनिष्टप्रयोगनिवृत्तये सूत्रमिति भावः। पूर्वं कायस्येति। य

पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे। २।२।१॥ अवयविना सह पूर्वादयः समस्यन्ते एकत्वसंख्याविशिष्टश्चेदवयवी। षष्ठीसमासाऽपवादः।
पूर्वं कायस्य पूर्वकायः। अपरकायः। एकदेशिना किं। पूर्वं नाभेः कायस्य। एकाधिकरणे किं। पूर्वं छात्राणां। सर्वोऽप्येकदेशोऽह्ना समस्यते सं
ख्याविसायेति ज्ञापकात्। मध्याह्नः। सायाह्नः। केचित्तु सर्व एकदेशः कालेन समस्यते न त्वह्नैवेति ज्ञापकस्य सामान्यापेक्षत्वात्। तेन मध्यरात्रः उपारताः
पश्चिमरात्रगोचरा इत्यादि सिद्धमित्याहुः॥ अर्धं नपुंसकं। २।२।२॥ समांशवाच्यर्धशब्दो नित्यं क्लीबे स प्राग्वत्। एकविभक्तावषष्ठ्यन्तवचनं॥
एकदेशिसमासविवक्षायामुपसर्जनसंज्ञानिषेधः। तेन पञ्चखट्वीत्यादि सिध्यति। अर्धं पिप्पल्याः अर्धपिप्पली। क्लीबे किं। ग्रामार्धः॥
द्रव्यैकत्व एव। अर्धं पिप्पलीनां॥ द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम्। २।२।३॥ एतान्येकदेशिना सह प्राग्वद्वा। द्वितीयं भिक्षाया द्विती
यभिक्षा। एकदेशिना किं। द्वितीयं भिक्षाया भिक्षुकस्य। अन्यतरस्यांग्रहणसामर्थ्यात्पूरणगुणेति निषेधं बाधित्वा पक्षे षष्ठीसमासः। भिक्षा
द्वितीयं। प्राप्तापन्ने च द्वितीयया। २।२।४॥ पक्षे द्वितीयाश्रितेति समासः। प्राप्तो जीविकां प्राप्तजीविकः। जीविकां प्राप्तः। जीविकाप्राप्तः। आप
न्नजीविकः। जीविकापन्नः। इह सूत्रे द्वितीयया अ इति छित्त्वा अकारोऽपि विधीयते। तेन जीविकां प्राप्ता स्त्री प्राप्तजीविका। आपन्नजीविका॥

[illegible]दितिसूत्रे दिशि दृष्टः शब्दो दिक्शब्द इति व्याख्यानेन संप्रत्यदिग्वृत्तिनापि योगे पंचमी स्यात् कृतेति षष्ठी हि दुर्लभा तथापि तस्य परमाम्रेडितमिति लिंगादव
यववाचि[illegible] कुत्स्ययोगे पंचमी नेत्युक्तत्वात् षष्ठ्येव भवतीति भावः। पूर्वं नाभेरिति। नाभेर्यः पूर्वो भागः स कायस्यावयव इत्यर्थः। नाभेरिति दिग्योगलक्षणपंचमी तेना
त्र पूर्वस्य भागस्य नाभिरवधिर्न त्वेकदेशिनीति नाभ्या समासो नेत्यर्थः। कायेन तु स्यादेव पूर्वकायो नाभेरिति। पूर्वशब्दस्य नित्यसापेक्षत्वात् प्रधानत्वाच्च। पूर्वं छा

च्चाणा मिति। नासौ निर्द्धार[?]षष्ठी किं तु समुदायसमुदायिसंबंधो बहुवचनं तद्गतावयवभेदसमुदायविवक्षया तन्नश्छात्राणामेकदेशित्वेसत्यप्येकत्ववैशिष्ट्याभावान्न सम
सः। सर्वो [?] पूर्वादिभिन्नोर्थानित्यर्थः। ज्ञापकादिति। अन्यथा अन्हस्यष्टाप पूर्वत्वं न स्यादितिभावः। मध्यान्ह इति। राजाहस्सखिभ्य इति टच्। अन्होन्ह इत्यन्हादेशः। ख्या
पंचाष्टे[?]ः मध्यान्हशब्दयोरुर्ध्वकायवत्कर्मधारयेणनिर्वहति। तस्यैकदेशिसमासप्रयुक्तत्वादत्तोत्र ज्ञापकाश्रयणं युक्तमेवेति बोध्यं। इत्याहुरिति। नचैवं दिनमध्यो
[?]धार इत्यादिन सिद्ध्येदिति वाच्यं। ज्ञापकसिद्धस्यासार्वत्रिकत्वात्। अर्धं नपुंसकं। खंडवाच्यर्धशब्दो न नित्यनपुंसकः। ग्रामार्धेनगरार्धइतियथा। समांशवा
चीतु नित्यनपुंसकस्यैवेह गृह्यते। पूर्वापरेतिपूर्वसूत्र एवार्धशब्दे पठनीये अर्धमितियोगविभागेन निर्देशान्नपुंसकत्वे लब्धे पुनर्नपुंसकग्रहणादित्या[?]
यनन्याचष्टेनिसंज्ञैवेस इति। यो नित्यनपुंसकलिंगस्स इत्यर्थः। प्राग्वदिति एकत्वविशिष्टेनावयविना समस्यत इत्यर्थः। अर्थतुव्याचख्युरर्धमितिनिर्देशात्स्वेन
पुंस्त्वे सिद्धे नपुंसकग्रहणं सूत्रेषु लिंगनिर्देशो न विवक्षित इति ज्ञापयितुं तेन तस्येदमित्यादि लिंगत्रयेपि[?]। अर्धपिप्पलीत्यत्र एकविभक्ति चापूर्वनि
पात इत्युपसर्जनसंज्ञायां गोस्त्रियोरिति ह्रस्वः स्यादित्याशंक्य समाधत्ते। अथ षष्ठ्यंतवचनमिति। तेन पिप्पलीशब्दस्यानुपसर्जनत्वान्न दोष इति भावः। ननु एवं पंचा
नां खट्वानां समाहारः पंचखट्वीतिन सिद्ध्येदुपसर्जनसंज्ञानिषेधेन ह्रस्वादे[?]त्याकारे ह्रस्वाप्रवृत्तेरदंतत्वाभावे ङीगा। इति चेत्प्रवृत्तेरत आह। एकदेशिसमासावि
षयकोयमिति पंचखट्वी इति भाष्योदाहरणमेव अथषष्ठ्यंतेत्यस्य संकोचलिंगमितिभावः। अर्धपिप्पलीति। परवल्लिंगत्वात्स्त्रीत्वं। अर्धं पिप्पलीनामिति॥ स
मासे अर्धपिप्पलीत्येवस्यात्। विशेष्यैकत्वात्। परवल्लिंगमिति लिंगातिदेशोपि वचनातिदेशाभावादितिभावः। अर्धपिप्पल्य इति प्रयोगस्तु अर्धानि पिप्पलीना
मिति विग्रहे असाधुश्चेद्दर्शितसमुच्चये साधुरेव अर्धं पिप्पल्याः। अर्धपिप्पली। अर्धपिप्पलीच अर्धपिप्पलीचेत्यादिविग्रहात्। एकदेशिनाकिं। अर्धं पशोर्देवदत्त
स्य। अत्र देवदत्तः स्वामीनत्ववयवी तेन न समासः। इदं सूत्रं परवल्लिंगमित्यत्र भाष्ये प्रत्याख्यातं। तथा। अर्धपिप्पलीतिहि कर्मधारयेण सिद्धं। समुदाये दृष्टाः श
ब्दाः अवयवेष्वपि वर्तंत इति न्यायात्। समप्रविभागादन्यत्र तु वाच्यैव गतिः। अर्धो ह्यारः अर्धोलमर्धविलोकितमित्यादिप्रयोगदर्शनात्। न च समप्रविभागे षष्ठीसमा
संबाधितुमिदं सूत्रमिति वाच्यं। षष्ठीसमासस्यापीष्टत्वात्तत एव कालिदासः प्रायुंक्त। प्रेम्णा शरीरार्धहरां हरस्येति। द्वितीयतृतीयषष्ठीसमासापवादोयं योग इति ध्वनि

क्तेनोक्तमपुक्तमिति चेन्न यत्नाह निषेधं वाधित्वेति। प्राप्तजीविक इति। गोस्त्रियोरित्युपसर्जनह्रस्वः द्विगुप्राप्तापन्नेति वक्ष्यमाणेन परवल्लिंगनिषेधः। न चैवं बहुव्रीहि
र्लाभेनार्थमिति शंक्यं। स्वरविशेषात्। प्राप्तसुखइत्यादौ निष्ठांतस्य जातिकालसुखादिभ्य इति परनिपातापत्तेः प्राप्तापन्ने चेति चकारेण विधेयसमुच्चयार्थेनाकारप्रश्लेषा
नुमानात् प्राप्तापन्ने समस्येते अच अत्वं च तयोः स्यादिति भाष्ये स्थितं। तत्र चकारात्पूर्वमेवाकारं छित्वा सौत्रत्वान्न कृतिभावो नेति प्राचः। इत्थं केशं परिहरन्नाह द्विती
यया अ इति। प्राप्तास्त्रीति। एकादेशस्य पूर्वांतत्वेन ग्रहणाल्लिंगविशिष्टपरिभाषया वा द्व्यंतयोरपि प्राप्तापन्नयोस्समासः॥ ॥ कालाः परिमाणिना। परिमीयते परि
च्छिद्यते येन तत्परिमाणं परिच्छेदकं तद्वान्परिमाणी तदाह। परिच्छेद्यवाचिनेति। कालाइति। कालविशेषवाचका इत्यर्थः। सूत्रे बहुवचननिर्देशात्कालसामान्यस्याप
रिच्छेदकत्वाच्च। मासोजातस्येति। षष्ठीसमासे प्राप्ते वचनं। ननु जातः पुरुषस्तस्य तु हस्तिवितस्त्यादिकं परिच्छेदकं न तु कालस्तस्य क्रियामात्रपरिच्छेदकत्वादिति चेद

कालाः परिमाणिना।२।२।५॥ परिच्छेद्यवाचिना सुबन्तेन सह कालास्समस्यन्ते। मासोजातस्य यस्य सः मासजातः। द्व्यहजातः। द्वयोरह्नोः समाहा
रो द्व्यहः। द्व्यहो जातस्येति विग्रहे। उत्तरपदेन परिमाणिना द्विगोस्सिद्धये बहूनां तत्पुरुषस्योपसंख्यानम्। द्वे अहनी जातस्य यस्य द्व्यह्नजातः
अह्नोऽह्न आदेशः। पूर्वत्र तु न संख्यादेस्समाहारे इति तन्निषेधः॥ ॥

त्राहुः सः क्रियां परिच्छिंदन्नपि कालस्तद्द्वारा देवदत्तं प
रिच्छिनत्ति। यस्य हि जननादूर्ध्वं मासो गतः स मासजात इति व्यवह्रियते। तत्र व्यवहारे कालजननक्षणयोरंतरालभावी मासो जननद्वारा जातमपि परिच्छिनत्त्येवेति। इह
हि विग्रहे षष्ठीनिर्दिष्टस्यापि वृत्तौ प्राधान्यं द्योतयितुं यस्य स इत्युक्तं। अलौकिके तु प्रक्रियावाक्ये नास्य प्रवेशः। एवं बहुव्रीहावपीति बोध्यं। ननु जातस्य मास इति विग्रहे इत्थं
मासशब्दस्य पूर्वनिपातार्थमेतत्सूत्रारंभस्यावश्यकत्वेपि मासविशेष्यकबोधएवात्रोचित इति किमनेन जातस्य यस्य स इति कथनेनेति चेदत्राहुः मासजातो मृत इत्यादि
प्रयोगानुरोधेन विग्रहे यस्य स इति स्वीक्रियत इति। मासजात इति। यद्यपि मासो जातो यस्येति बहुव्रीहिणापीदं सिध्यति जातिकालसुखादिभ्यः परा निष्ठा वाच्येति वच
नात्। तथापि स्वरे विशेषः। वा जाते इत्यंतोदात्तत्वस्यापि सिद्धेः तथापि षष्ठीसमासापवादार्थमिदमारंभणीयमेव। किंच मासो जातवतो यस्य स मासजातवानित्येतदर्थम
पीदमवश्यारंभणीयमित्यादिक। उत्तरपदेनेति। परिमाणेनोत्तरपदहेतुकद्विगुसिद्धये त्रिपदतत्पुरुषो वक्तव्य इत्यर्थः। सुप्सुपेत्येकत्वस्य विवक्षितत्वादप्राप्ते वचनं।

अस्मादेव वार्त्तिकारंभात् सुप्सुपेत्येकार्थविवक्षितमिति ज्ञापनात्। अन्त्यादेशादिति। त्रिपदतत्पुरुषे सत्युत्तरपदे परतस्तद्धितार्थेत्यत्र तद्धितो सतीति भावः। पूर्वत्रेति। ग्रहजातः
त्यत्रेत्यर्थः॥ ॥ सप्तमी शौण्डैः। बहुवचननिर्देशाद् गणपाठसामर्थ्याच्च आद्यर्थावगतिरित्यभिप्रेत्याह शौण्डादिभिरिति। अक्षशौण्ड इति। शौण्डः प्रवीणः इह आसक्तिमा
रूपाक्षिप्तत्वान्न भवतीति तद्द्वारकं च सामर्थ्यं यथा दध्योदनः गुडधानाः। उपसेचनमिश्रीकरणादिद्वारा सामर्थ्यं। तेन कारकाणां क्रियया एव संबंध इति नियमस्य न व्यभिचा
रः। अधिशब्द इति। आधेयप्रधान इति शेषः। अधिकरणप्रधानस्य त्वव्ययीभाव एव । अधिहरि इति यथा। स्व इति। नित्यमिति प्राप्ते। विभाषां चेरिति विभाषाग्रहणसा

सप्तमी शौण्डैः॥२।१।४०॥ सप्तम्यन्तं शौण्डादिभिः प्राग्वत्। अक्षेषु शौण्डः॥ अक्षशौण्डः। अधिशब्दोऽत्र पठ्यते। अध्युत्तरपदादिति खः। ईश्व
राधीनः॥ सिद्धशुष्कपक्वबन्धैश्च॥२।१।४१॥ एतैः सप्तम्यन्तं प्राग्वत्। साङ्काश्यसिद्धः। आतपशुष्कः। स्थालीपक्वः। चक्रबन्धः॥ ध्वाङ्क्षेण क्षेपे॥२।१।४२॥
ध्वाङ्क्षवाचिना सह सप्तम्यन्तं समस्यते निन्दायां। तीर्थध्वाङ्क्ष इव। तीर्थध्वाङ्क्षः॥ तीर्थकाकः॥ कृत्यैर्ऋणे॥२।१।४३॥ सप्तम्यन्तं कृत्यप्रत्यया
नैः सह प्राग्वत् आवश्यके। मासदेयमृणं। ऋणग्रहणं नियोगोपलक्षणार्थं। पूर्वाह्णे गेयं साम॥ संज्ञायां॥२।१।४४॥ सप्तम्यन्तं सुपा प्राग्वत् संज्ञायां। वा
क्येन संज्ञानवगमान्नित्यसमासोऽयं। अरण्येतिलकाः। वनेकसेरुकाः। हलदन्तात्सप्तम्या इत्यलुक्॥ क्तेनाहोरात्रावयवाः॥२।१।४५॥ अह्नो रात्रेश्चा
वयवाः सप्तम्यन्ताः क्तान्तेन सह प्राग्वत्। पूर्वाह्णकृतं। अपररात्रकृतं। अवयवग्रहणं किं। अह्नि दृष्टं॥ तत्र॥२।१।४६॥ तत्रेत्येतत्सप्तम्यन्तं क्तान्ते
न सह प्राग्वत्। तत्रभुक्तं॥ क्षेपे॥२।१।४७॥ सप्तम्यन्तं क्तान्तेन प्राग्वन्निन्दायां। अवतप्तेनकुलस्थितं त एतत्॥

मध्यादिति वक्ष्यमाणत्वात् अंत
शब्दोऽत्र पठ्यते स चाधिकरणप्रधानः। मध्ये इत्यर्थात्। तथा च अवयविनः आधारत्वविवक्षायां सप्तमी यथा वृक्षे शाखेति। वने अंतर्वनात् वसति। यत्त्वधिकरणत्व
मात्रवृत्तिरंतःशब्दस्तस्य तु विभक्त्यर्थ इति नीत्यमव्ययीभावः। शानरंतः शरीरे तिरणत्वं वनेऽन्तरिति अंतर्वणं। यत्तु तत्पुरुषस्य वैकल्पिकत्वात्पक्षे अव्ययीभावेऽन्तरिति हरदत्तेनोक्तं तच्चि
न्त्यं। तत्पुरुषस्य वैकल्पिकत्वेऽपि अव्ययीभावस्य नित्यत्वात् वनेऽन्तरिति तदुक्तस्य परविग्रहस्यायोगात्। किंच विभक्त्यर्थमात्रवृत्तेरव्ययीभावस्य वचनग्रहणसामर्थ्याद
न्यथा वृक्षस्योपरि न्यायाद्बाल्यतिप्रसंगात् तन्मध्यवाचिनः प्रसंग एव नास्तीति दिक्। शौण्ड। धूर्त। कितव। व्याड। प्रवीण। संवीत। अंतर्। अधि। पटु। पंडित। कुशल।

भवनितुल्यं वहस्रैः। यत्तत्पर्यायेणैव समासः स्यात्। अल्पशः इत्यनुवृत्तेः। बहुवचनं तु प्रकृतिभेदाभिप्रायं। तथैवोदाहरति। मासेदेयमिति। तत्पुरुषे कृतीत्यलुक्। नेह मासे दातव्यं
नियोगे यल्लक्षणार्थमिति। नियोगो निर्द्धारणं। आवश्यकोपलक्षणार्थमित्यर्थः। नित्यसमासोयमिति। अत एव पूर्वसूत्रमइति स्वपदविग्रहः। संगेतरत्यवाचामा। अवनम
इति। नकुलेन स्थितं नकुलस्थितं। कर्तृकरणे कृतेति समासः। कृद्ग्रहणपरिभाषया नकुलस्थितशब्दोपि क्तान्त इति तेन सह समस्यते। तस्य समासस्य तत्पुरुषे कृतीति सप्त
म्या अलुक्। अव्यवस्थितत्वप्रतिपत्त्यात्र निंदावगम्यते॥ ॥ पात्रेसमितादयश्च। संपूर्वादितेः क्तः। गेहेनर्दीति। नर्दशब्दे इत्यस्मात्सुप्यजाताविति णिनिः। घट
कतया प्रवेशनेति। परमाः पात्रेसमिता इति वाक्यमेव भवति। न तु सन्महदित्यादिना समासांतरमिति भावः। एतच्च शब्दकौस्तुभे स्थितं। अन्ये तु केवलाः पात्रेस

पात्रेसमितादयश्च। २। १। ४८॥ एते निपात्यन्ते क्षेपे। पात्रेसमिताः। भोजनसमय एव संगताः। न तु कार्ये। गेहेशूरः। गेहेनर्दी। आकृतिगणोऽयं। चकारोऽवधारणार्थः। तेनैषां समासान्तरे घटकतया प्रवेशो न। परमाः पात्रेसमिताः। पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन। २। १। ४९॥ विशेषणं विशेष्येणेति सिद्धे पूर्वनिपातनियमार्थं सूत्रं। एकशब्दस्य दिक्संख्ये संज्ञायामिति नियमबाधनार्थञ्च। पूर्वं स्नातः। पश्चादनुलिप्तः। स्नातानुलिप्तः। एकनाथः। सर्वयाज्ञिकाः। जरन्नैयायिकाः। पुराणमीमांसकाः। नवपाठकाः। केवलवैयाकरणाः

मिता इति वाक्यमेव। न तु पूर्वकालैकेत्यादिना समासांतरमित्याहुः॥ पूर्वकालै। पूर्वकाल इत्यर्थनिर्देशः। इतरेषां तु पदानां स्वरूपग्रहणं। पूर्वत्वस्य ससंबंधिकत्वात्पूर्वकालो
परकालेन समस्यते। तथैवोदाहरति। स्नातानुलिप्त इति। अत्र क्रियाशब्दत्वात्पाचकपाठकवत्पर्यायः समासः। याज्ञिका इत्यादि। यज्ञमधीयते विदंति वा। याज्ञिकः। क्रतूक्था
दिसूत्रांताट्ठक्। एवं नैयायिकाः। जीर्यतेरतृन्निति भूतेर्थेऽतृन्। जरंतश्च ते नैयायिकाश्च। जीर्णनैयायिका इत्यर्थः। मीमांसा मीमांसकाः। क्रमादिभ्यो वुन्। नवपाठका इति। प
ठंतीति पाठकाः। ण्वुल्तृचाविति ण्वुल्। संख्यावाचीनवशब्दोऽत्र न गृह्यते। दिक्संख्ये संज्ञायामिति नियमात्। समानाधिकरणेनेति किं। एकस्याः क्षीरं। षष्ठीसमा
सोपि इह न भवति। पूरणगुणेति निषेधात्॥ ॥

गितिलुङ्नाविकल्पेप्राप्तइति। महाविभाषयेतिशेषः। ननुश्च तत्पुरुषप्रयुक्तटजभावेपंचगोधन इत्यपिस्यादितिभावः। मनोरमायांतुविकल्पेप्राप्तेनित्यसमासार्थं द्वंद्वतत्पुरुषयोरपि नेन द्वन्द्वमिति मावायं प्रथमनुसम्योक्तं वस्तुतस्तु त्रयाणां समासे कृते अन्यपदार्थोपसंक्रमेणपरस्परसंबंधाभावात् द्वंद्वतत्पुरुषयोरप्राप्तौसत्यांवचनमिदमित्यादिस्थितं। द्वद्वस्योदाहरणंतुवाक्त्वचप्रिये अस्य वाग्दृषदप्रियः। छत्रोपानहप्रियः। इह त्रिपदे बहुव्रीहौ कृते पूर्वयोर्नित्यं द्वंद्वस्तेन द्वंद्वाच्चुदषहान्तादिति समासान्तष्टजपि नित्य एव॥ ॥गोरतद्धितलुकि। अस्य संज्ञायामनुवर्तते टच्। तदाह गोंतादित्यादि। ननु ग्रहणवता प्रातिपदिकेन तदंतविधेरभावात्तत्पुरुषस्यावयवो यो गोशब्दस्तस्मात्टजित्यर्थः स्यात् तथा च गोमूत्रमित्यादावप्यतिप्रसंगः स्यादत आह। समासांत इति। अयंभावः। समासांता इत्यधिकाराद्दृच्चा समासांते न भवितव्यं। गोरिति पंचम्यैवश्रवणात्ततः परेणापि। न चैतत्तदंतविधिमंतरेणोपपद्यत इति सामर्थ्यात्तदंतविधिलाभस्तत्श्च तत्पुरुषस्येति षष्ठ्यंतं पंचम्या नेन विपरिणम्यत इति। ननु तद्धितलुकीति। लुग्विषय इत्यर्थात्तद्धितलुकि सतीति समासांतानामंतरंगत्वात्। अतद्धितलुकीति किं। पंचभिर्गोभिः। क्रीतः। पंचगुः। अत्र तद्धितस्य ठकोऽध्यर्धपूर्वेति लुक्। संख्यापूर्वो द्विगुः अत्रोक्त इति। अयंभावः। पूर्वसूत्रविषय एवेयं संज्ञा। अनंतरस्यैवेति न्या

गोरतद्धितलुकि। ५।४।९२। गोंतात्तत्पुरुषाट्टच् स्यात्समासान्तो न तु तद्धितलुकि। पञ्चगवधनः। पञ्चानां गवां समाहारः। संख्यापूर्वो द्विगुः। २।१।५२। तद्धितार्थेत्यत्रोक्तः संख्यापूर्वो द्विगुः स्यात्। द्विगुरेकवचनं। २।४।१। द्विग्वर्थः समाहार एकवत्स्यात्। स नपुंसकमिति नपुंसकत्वं। पञ्चगवम्॥

स्यात्। एतदर्थमेव हि सूत्रद्वयं कृतमन्यथा दिक्संख्ये संज्ञा तद्धितार्थोत्तरपदसमाहारे चेत्येव ब्रूयात्तेन सप्तर्षय इत्यत्र गंधकपालेत्यादिनापूर्वपदप्रकृतिस्वरो न भवति। किंतु समासांतोदात्तत्वमेव। तथा च लक्ष्यस्य सप्तऋषयः सप्तसे येनि षेदुः। सप्तऋषीणां सुकृतां यत्र लोक इत्यादि। त्रिविधः संख्यापूर्व इति। तद्धितार्थविषये उत्तरपदे च परतः समाहारे वाच्ये संख्यापूर्वोयस्समासः। स इत्यर्थः। तद्धितार्थे यथा। पंचकपालः संस्कृतं भक्षा इत्यणः द्विगोर्लुगनपत्य इति लुक्। उत्तरपदे यथा। पंचनावप्रियः। नावो द्विगोरिति समासांतष्टच्। समाहारे पंचपूली द्विगोरिति ङीप्। द्विगुरेकवचनं। बाहुलकात्कृत्तेरिल्युट्। समान्येन पुंसकं। द्विगुस्समास एकार्थप्रतिपादको भवतीत्यर्थः। न च वस्तुतोऽनेकार्थस्यैकार्थ्यं कथंचिदुपपद्यत इति। सामर्थ्यादिति शेषः। संपद्यत इत्याह। एकवत्स्यादिति। समाहार इति तूपसंख्यानाल्लभ्यते। समाहारे यो द्विगुस्तदर्थ एकवदित्यन्वयः समाहारे किं। तद्धितार्थे माभूत्। पंचसु कपालेषु संस्कृताः पंचकपालाः। पंचभिर्गोभिः क्रीताः पंचगवः पटाः पंचगवे पंचगवानीत्यत्र तु प्रथमं द्विग्वर्थस्यैकवद्भावे कृते योयमेकशेषः कृते द्विग्व॥ ॥ ॥

र्थं समुदायस्य द्वित्वबहुत्वाद्द्विर्गत्वाच्चैकवद्भावो न भवतीति स्थितमाकरे। यदा तद्धितार्थेतिसूत्रे समाहार इति कर्मसाधनस्तदा समाहृतप्रधानो द्विगुरिति बहुत्वे प्राप्ते अने
न एकवद्भावः क्रियते। यदा तु भावसाधन एव समाहारस्तदा समूहप्रधानत्वाद्द्विगोः समूहस्य चैकत्वात्सिद्धमेकत्वमिति नास्य प्रयोजनं। न च स नपुंसकमिति नपुंसकत्वार्थमे
कत्वविधानमिति वाच्यं। समुदायवाचकेषु सामान्येन नपुंसकत्वाभ्युपगमे बाधकाभावादित्याहुः। एवं तर्हि तद्धितार्थेतिसूत्रे समाहार इति भावे घञ् न तु कर्मणि। पंचगवमि
त्यत्र पंचगावः समाहृता इत्यर्थाभ्युपगमे समाह्रियमाणानां बहुत्वेन एकवचनानुपपत्तेः। न च द्विगुरेकवचनमिति सूत्रान्नैवमिति वाच्यं। पंचखट्वीत्यसिद्धेः। तत्र हि पंचखट्वाः
समाहृताः पंचसु खट्वासु समाहृता इत्यस्मिन्नेव विग्रहसंभवेनानियतविभक्तित्वाभावादेकविभक्ति चापूर्वनिपात इत्यप्रवृत्तेरनुपसर्जनत्वाद्गोस्त्रियोरिति ह्रस्वो न स्यात्॥ ततश्चावं

कुत्सितानि कुत्सनैः। २।१।५३॥ कुत्स्यमानानि कुत्सनैः सह प्राग्वत्। वैयाकरणखसूचिः। मीमांसकदुर्दुरूढः। पापाणके कुत्सितैः। २।१।५४॥ पू
र्वसूत्रापवादः। पापनापितः। अणककुलालः। उपमानानि सामान्यवचनैः। २।१।५५॥ घन इव श्यामः। घनश्यामः। इह पूर्वपदं तत्स्थे ला
क्षणिकमिति सूचयितुं लौकिकविग्रहे इवशब्दः प्रयुज्यते। पूर्वनिपातनियमार्थं सूत्रं। उपमितं व्याघ्रादिभिः सामान्याप्रयोगे। २।१।५६॥ उ
पमेयं व्याघ्रादिभिः सह प्राग्वत् साधारणधर्मस्याप्रयोगे सति। विशेष्यस्य पूर्वनिपातार्थं सूत्रं। पुरुषव्याघ्रः। नृसोमः। व्याघ्रादिराकृति
गणः। सामान्याप्रयोगे किं। पुरुषो व्याघ्र इव शूरः॥ ॥ ततो वदति स्त्रीत्वपक्षे द्विगोरित्ययं तत्र लक्षणोऽर्थः स्यात्। भावसाधनत्वे एकविभक्तित्वादुपस

र्जनत्वम्। समाहृतास्वेव समाहारादेः स्वार्थानियमेन वर्तिपदानां स्पष्टत्वात्। तथा च पंचखट्वीत्यादिरूपं निर्बाधमेवेति दिक्। स नपुंसकमिति। एतस्यार्थो मूल एव स्फुटीभ
विष्यति॥ ॥ कुत्सितानि। कुत्स अवक्षेपणे कर्मणि क्तः। स बहुतिवद्वीति सूत्रे चकारस्यानुक्तसमुच्चयार्थत्वाद्वर्तमाने विहित इत्याशयेनाह कुत्स्यमानानीति। तत्रतिपा
दकानीत्यर्थः। उभयत्र बहुवचननिर्देशः स्वरूपविधिनिरासार्थः। वैयाकरणखसूचिरिति। सूत्रं दर्शनेन च दृष्टः। यः पृष्टः सन् प्रश्नं विस्मारयितुं खं सूचयत्यभ्यासवैयर्थ्या
त्स एवमुच्यते न तु वस्तुतो व्याकरणं तदध्ययनं वा कुत्सितं। वेदांगत्वेन तस्य प्रशस्तत्वात्। तथापि। प्रतिभाभावेन निष्फलत्वात्कुत्स्यते। दुर्दुरूढ इति। दुल उत्क्षेपे दुर्पूर्वं

औणादिकः। कुठप्रत्ययः। बहुलमन्यत्रापीति णेर्लुक्। रलयोरेकत्वस्मरणाद्ध्रस्वः। विशेष्यस्य पूर्वनिपातनियमार्थं सूत्रं शब्दप्रवृत्तिनिमित्तकुत्सायामेवायं संनिधानात्ते
नेह न नैयायिको दुराचारः। पापाणके। एतौ कुत्सनाभिधायिनौ। कूपूयकुत्सितावद्यखेटगर्ह्याणकाः समा इत्यमरः। ततश्चानयोः पूर्वसूत्रेण समासे परनिपातः स्यात्त
स्मात्पूर्वनिपातनियमार्थमिदं सूत्रमित्याशयेनाह पूर्वसूत्रापवाद इति। उपमानानि। उपमीयतेऽनेन तदुपमानं। उपपूर्वान्माङः करणे ल्युट्। प्रादिसमासः। उपपूर्वको
माङ् सादृश्यहेतुके परिच्छेदे रूढः। येन वस्त्वन्तरं सादृश्येन परिच्छिद्यते तदुपमानमित्यर्थः। यथा गौरिव गवय इत्यत्र हि गौः करणं सादृश्यं हेतुः पुरुषः परिच्छेत्ता। स हि
गोसादृश्येन गवयं परिच्छिनत्ति। सामान्यवचनैरिति। समानो धर्मः सामान्यं चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्। उपमानोपमेयसाधारणो यो धर्मस्तद्विशिष्टवचनैरित्यर्थः
न तु साधारणधर्ममात्रवचनैरिति। एतच्च वचनग्रहणाल्लभ्यते। सामान्यमुक्तवन्तः सामान्यवचनाः बाहुलकात्कर्तरि भूते ल्युट्। ये पूर्वं सामान्यमुक्त्वा तद्वति द्रव्ये
पर्यवस्यन्ति ते तथोक्ताः तच्च सामान्यविशिष्टं उपमानशब्दस्य संबन्धिशब्दत्वादाक्षिप्तमुपमेयमेव विज्ञायते। लाक्षणिकमिति। अत एव सामानाधिकरण्यान्मृगीव च
पला मृगा चपलेत्यादौ पुंवद्भावः। उत्तरपदोपस्थितश्यामत्वचपलत्वादिद्वारकमेवेह सादृश्यं गृह्यते संनिधानात्। कथं तर्हि उपमानपरतेति चेत्। भूतपूर्वगत्याथ
क्यार्थमादाय परतेत्यवेहि। पूर्वनिपातेति। अन्यथाऽनियमः स्यात् खंजकुब्जवदिति भावः। किंच तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययेति सूत्रे प्रातिपदोक्तस्या
स्यैवोपमानग्रहणे न ग्रहणार्थमपीदं सूत्रे अत एव मयूरव्यंसकादित्वात्समासे उपमानस्वरो न प्रवर्त्तत इति सिद्धान्तः। उपमितं। उपमेयमुपमितं। भूतकालोऽत्र न वि
वक्षितः तच्च संबन्धिशब्दत्वादुपमानमाक्षिपति। तथा चोपमानभूतैर्व्याघ्रादिभिरित्यर्थः। पुरुषो व्याघ्र इव शूर इति। तत्र हि शूरसापेक्षस्यापि पुरुषस्य प्रधानत्वाद्रा
जपुरुषः सुंदर इतिवदत्रापि समासः स्यात्स मा भूदिति सामान्याप्रयोग इत्युक्तमिति भावः। कथं तर्हि भाष्याब्धिः क्वातिगंभीर इति कैयटः। सामान्यप्रयोगसत्त्वेनास्या
प्राप्तेः अत्र केचित् प्रमाद एवायमित्याहुः। इह गांभीर्येण सादृश्यं न विवक्षितं किंतु विततदुरवगाहत्वादिना। तस्य हि विततत्वादेरप्रयोगोऽस्त्येवेति निर्बाधः समास

इति मनोरमायां स्थितं॥

विशेषणं विशिष्यते येन तद्विशेषणं कर्तुः करणत्वविवक्षायां ल्युट् तदाह भेदकमिति। व्यावर्तकमित्यर्थः। विशेषणविशेष्ययोस्संबंधिकतया अन्यतरोपादानमात्रेणेतराक्षे
पसंभवे उभयोपादानं स्पष्टार्थमिति कैयटः। एतच्च कुत्सितानि कुत्सनैरित्यत्रापि तुल्यं हरदत्तस्त्वाह समस्यमानपदद्वयजन्यबोधप्रकारयोर्विशेषणविशेष्यधर्मयोर्यत्र परस्पर
व्यभिचारस्तत्रैव समासो यथा स्यात् नान्यत्रेत्येतदर्थमुभयोपादानं तथा च नीलोत्पलादौ समासो भवति न तु तक्षकः सर्प इत्यादौ। न हि तक्षकत्वं सर्पत्वं व्यभिचरतीति तन्मंदं
कैलासाद्रिर्मंदराद्रिः भावपदार्थस्तर्कोऽनेषा व्याकरणशास्त्रं भो नराज इत्यादिप्रयोगाणामसंगत्यापत्तेः। ननु विशेषणविशेष्यभावे कामचारात्पाचकपाठकादाविव नीलोद्
त्पलादावप्यव्यवस्थितः पूर्वनिपातः स्यादिति चेदत्राहुः। जातिशब्दस्य गुणक्रियाशब्दसमभिव्याहारे विशेष्यसमर्पकतैवातो न नीलोत्पलं पाचकब्राह्मण इति व्यव

विशेषणं विशेष्येण बहुलं। २।१।५७। भेदकं समानाधिकरणेन भेद्येन बहुलं प्राग्वत्। नीलमुत्पलं। नीलोत्पलं। बहुलग्रहणात् क्वचिन्नि
त्यं। कृष्णसर्पः। क्वचिन्न। रामो जामदग्न्यः। पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च। २।१।५८। पूर्वनिपातनियमार्थमिदं। पूर्व
वैयाकरणः। अपरोऽध्यापकः। अपरस्याऽर्द्धे पश्चभावो वक्तव्यः। अपरश्चासावर्द्धश्च पश्चार्द्धः। कथमेकवीर इति। पूर्वकालैकेति बाधित्वा
परत्वादनेन समासे वीरैक इति हि स्यात्। बहुलग्रहणाद्भविष्यति। श्रेण्यादयः कृतादिभिः। २।१।५९। श्रेण्यादिषु च्व्यर्थवचनं कर्तव्यं। अश्रे
णयः श्रेणयः कृताः। श्रेणिकृताः। क्तेन नञ्विशिष्टेनानञ्। २।१।६०। नञ्विशिष्टेन क्तान्तेनानञ् क्तान्तं समस्यते। कृतश्च तदकृतश्च कृता
कृतं। शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानं। शाकप्रियः पार्थिवः। शाकपार्थिवः। देवब्राह्मणः॥ ऽऽस्थित एव प्रयोगः। गुण

शब्दयोः क्रियाशब्दयोः गुणक्रियाशब्दयोश्चानियम एव खंज कुब्जखंजः। पाचकपाठकः। पाठकपाचकः खंजपाचकः पाचकखंज इति। अत्र मूलमुपसर्जनमिति
महासंज्ञा। अप्रधानं ह्युपसर्जनं। गुणक्रिययोश्च द्रव्यं प्रत्यप्राधान्यं स्पष्टमेवेति। अपरस्यार्ध इति। एतच्च पश्चादिति सूत्रे भाष्ये स्थितं बाहुलकादिति। एकेषु मुख्य
र्वीरपते पराक्रमत इति वा बोध्यं। श्रेण्या। आद्य आदिशब्दो व्यवस्थावाची द्वितीयस्तु प्रकारवाची। श्रेण्यादयः पठ्यंते कृतादिराकृतिगण इति भाष्यात् एक। पूग। कुं
दा। राशि। विशिख। निचय। निधन। आदिः। श्रेण्यादिः कृत। मित। मृत। आदिः। कृतादिः पठ्यते तु सिद्ध एव श्रेणयः सम्यक्कृता स तदा समासो नेष्यत इत्याशयेनाह अश्रेणयः ॥

नित्यसमासः परत्वात् श्रेणीकृतं रह्नत्वं चेति दीर्घः क्तेन विशिष्ट शब्दो अवधारणार्थः नञ्मात्राधिकेन नञ्रहितं समस्यत इति॥ सू॰ ८१॥
श्रेणयइति। एकेन शिल्पेन पण्येन वा ये जीवंति तेषां समूहः श्रेणिः च्व्यन्तानां तु कुगतीति सूत्रार्थसेनेह नासिद्धं चाभुक्तं चानुडिडधिकेनापीति वाच्यं। अशितं चानशितं च अशि
तानशितं। क्लिष्टाक्लिशितं। क्लिशः क्त्वानिष्ठयोरिति वेट्। कृताकृतमिति। एकदेशकरणात् कृतं। एकदेशांतरस्याकरणान्न देवाकृतं। शाकपार्थिव इति। पृथिव्या ईश्वरः पार्थिव

सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः। २।१।६१॥ सद्वैद्यः। वक्ष्यमाणेन महत आकारः। महावैयाकरणः। पूज्यमानैः किं। उत्कृष्टो गौः। पङ्कादुद्धृत
इत्यर्थः॥ वृन्दारकनागकुञ्जरैः पूज्यमानम्। २।१।६२॥ गोवृन्दारकः। व्याघ्रादेराकृतिगणत्वादेव सिद्धे सामान्यप्रयोगार्थमिदं वचनं। कतरकतमौ
जातिपरिप्रश्ने। २।१।६३॥ कतरकठः। कतमकलापः। गोत्रं च चरणैः सहेति जातित्वं। किं क्षेपे। २।१।६४॥ कुत्सितो राजा किंराजा। यो न रक्षति
पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः। २।१।६५॥ तत्पुरुषः समानाधिकरणः कर्म
धारयः। १।२।४२॥ पुंवत्कर्मधारयजातीयदेशीयेषु। ६।३।४२॥ कर्मधारये जातीयदेशीययोश्च परतो भाषितपुंस्कात् परमूङभावो यस्मिन्
स्तथाभूतं पूर्वं पुंवत्। पूरणीप्रियादिष्वप्राप्तः पुंवद्भावो विधीयते। महानवमी। कृष्णचतुर्दशी। महाप्रिया। तथा कोपधादेः प्रतिषिद्धः पुंव
द्भावः। कर्मधारयादौ प्रतिप्रसूयते। पाचकस्त्री। दत्तभार्या। पञ्चमभार्या। सौघ्नभार्या। सुकेशभार्या। ब्राह्मणभार्या। एवं पाचकजातीया
पाचकदेशीयेत्यादि। इभपोटा। पोटा स्त्रीपुंसलक्षणा। इभयुवतिः। अग्निस्तोकः। उदश्वित्कतिपयं। गृष्टिः सकृत्प्रसूता। गोगृष्टिः। धेनुर्नवप्र
सूतिका। गोधेनुः। वशा वन्ध्या। गोवशा। वेहद्गर्भघातिनी। गोवेहत्। बष्कयणी तरुणवत्सा॥ गोबष्कयणी। कठप्रवक्ता। कठश्रोत्रियः। क
ठाध्यापकः। कठधूर्तः॥

स्तस्येश्वरः शाकप्रियइति बहुव्रीहिस्तस्य पार्थिवशब्देन समासे कृते पूर्वसमासे यदुत्तरपदं प्रियइति तस्य
लोपः। तथा देवब्राह्मण इत्यत्र देवस्य पूजको देवपूजक इति पूर्वस्मिन् षष्ठीसमासे यदुत्तरपदं पूजक इति तस्य लोपो ज्ञेयः॥ ॥ सन्महत्॥ गुणक्रियाशब्दैः सह समासे सं
दादीनां पूर्वनिपातनियमार्थं सूत्रं। कतरकतमौ। जातिपरिप्रश्ने किं। कतरो देवदत्तः। वा बहूनां जातिपरिप्रश्ने डतमजिति व्युत्पादितेन कतमशब्दसाहचर्यात्तेन शास्त्रे

युवाखलतीति। कृदिकारादक्तिन इति ङीष्। पुंवत्कर्मधारयेति युवतिशब्दस्य पुंवद्भावः। जरतीति। जीर्यतेरतृन्। उगितश्चेति ङीप्। एवं युवपलितः युववलिन इत्युदाहार्यम्। वलि
नशब्दः पामादि। कृत्यतुल्याख्या। तुल्यमहान् सदृशमहानित्यादौ तु परत्वादनेन सन्महदिति बाध्यते। तस्य सत्कृत्य शालिन इति भट्टिप्रयोगे तु सतां कृत्यं सत्कृत्यमिति षष्ठी
समासो बोध्यः। एवं परमपूज्य इत्यादिष्वपि वर्ण्यम्। समानाधिकरणेन वर्णवाचिना वर्णो वा विसमस्यत इत्यर्थः। विशेषणं विशेष्येणेत्यनेनैव सिद्धे पृथग्विधानं वर्णो वर्णेष्वने
त इति पूर्वपदप्रकृतिस्वरे विधीयमाने प्रतिपदोक्तत्वादेतत्समासपूर्वपदस्यैव भवतु नान्यस्येत्यर्थम्। कृष्णसारंग इति। सारंगश्चित्रपर्यायस्स च गुणोपसर्जनद्रव्यपरः कृ
ष्णशब्दोऽपि कृष्णावयवके भाक्तः। एवं च गौणे सामानाधिकरण्ये विशेष्यविशेषणत्वप्रवृत्तौ समासार्थमपीदमारब्धव्यमित्याहुः। ननु तृतीयातत्कृतेत्यनेनैवायं

युवाखलतिपलितवलिनजरतीभिः। २।१।६७॥ पूर्वनिपातनियमार्थं सूत्रम्। लिङ्गविशिष्टपरिभाषया युवतिशब्दोऽपि समस्यते। युवाख
लतिः। युवखलतिः। युवतिः खलती। युवखलती। युवजरती। युवत्यामेव जरतीधर्मोपलम्भेन तद्रूपारोपात्सामानाधिकरण्यम्। कृत्यतुल्या
ख्या अजात्या। २।१।६८॥ भोज्योष्णम्। तुल्यश्वेतः। सदृशश्वेतः। अजात्या किम्। भोज्य ओदनः। प्रतिषेधसामर्थ्याद्विशेषणसमासोऽपि न। वर्णो व
र्णेन। २।१।६९॥ समानाधिकरणेन सह प्राग्वत्। कृष्णसारङ्गः॥ कडाराः कर्मधारये। २।२।३८॥ कडारादयश्शब्दाः कर्मधारये वा पूर्वम्प्र
योज्याः। कडारजैमिनिः। जैमिनिकडारः॥ कुमारश्श्रमणादिभिः। २।१।७०॥ कुमारी श्रमणा। कुमारश्रमणा। इह गणे श्रमणा प्रव्रजिता ग
र्भिणीत्यादयः स्त्रीलिङ्गाः पठ्यन्ते। लिङ्गविशिष्टपरिभाषाया एतदेव ज्ञापकम्बोध्यम्॥ चतुष्पादो गर्भिण्या। २।१।७१॥ चतुष्पाज्जातिवाचि
नो गर्भिणीशब्देन सह प्राग्वत्। गोगर्भिणी। (चतुष्पाज्जातिरिति वक्तव्यम्। नेह। स्वस्तिमती गर्भिणी॥) समासः सिध्यति। सारंगत्वस्य कृष्णादिकृ
तत्वात्। नापि स्वरे भेदः। तत्पुरुषे तुल्यार्थतृतीयेत्यनेनैव पूर्वपदप्रकृतिस्वरसिद्धेरिति चेदत्राहुः। कृष्णशुक्लो हरितशुक्ल इत्याद्यर्थं समासोऽनेनावश्यं विधेयः। न ह्री
हकृतत्वमस्ति। यद्यपीह विशेषणं विशेष्येणेत्यनेन समासः सिद्ध्यति तथापीष्टः स्वरो न सिध्यति। न च प्रतिपदोक्तसमासोऽकिंचित्करः व्यावर्त्यालाभादिति
वाच्यम्। कृष्णशुक्लौ इत्यादेर्व्यावर्त्यसंभवादिति। कडारादय इति। बहुवचननिर्देशादिति भावः। आदिशब्देन गडुलशाण्डिल्यः शाण्डिल्यगडुल इत्यादि। एतच्च भाष्ये

अन्येतुमयूरइवव्यंसकोमयूरव्यंसकइत्याहुः॥ ऋ॥ ५॥

॥५ हिसमासांतरंनभवतिधूर्तइतिएवचगुणवचनत्वात्पूर्वनिपातेप्राप्तेइदंवचनमारब्धमितिभावः अन्येतुमयूरइवव्यंसकोमयूरव्यंसकइत्याहुः॥ नहियुवन्शब्दस्यपुंस्त्वेजरतीसामानाधि
एयदेवेति॥ एवकारःस्फुटमिहत्वद्योतनार्थोनत्ववधारणार्थः। युवाखलतीतिसूत्रेजरतीग्रहणस्यापिज्ञापकत्वसंभवात्। नहियुवन्शब्दस्यपुंस्त्वेजरतीसामानाधि
करण्यंसंगच्छते। चतुष्पादोगर्भिण्या। मंडूकप्लुत्या अत्रजातिरिनुवर्त्ततइत्याह जातिवाचीति। जातिःकिं। कालाक्षीगर्भिणी। चतुष्पात्किं। ब्राह्मणीगर्भिणी। प्रत्युदा
हरणेविशेषणमितिसमासःस्यादेवगर्भिकालाक्षीत्यादि। पूर्वनिपातेविशेषः॥ ॥ मयूरव्यंसकादित्रावधारणार्थस्तेनपरममयूरव्यंसकोमयूरव्यंसकइ
त्यर्थेतुपमानानिसामान्यवचनैरितिसमासस्यापवादोयं॥ तेनसमाससेत्यंतोदात्तत्वमिहसिध्यतितत्पुरुषेतुल्यार्थइत्युपमानपूर्वपदप्रकृतिस्वरस्ये
पमानसंशब्देनविहितेप्रतिपदोक्तसंमासेचरितार्थत्वादित्याहुः॥ अश्नीतपिबतेति। इहक्रियारूपस्यान्यपदार्थस्यप्राधान्यात्। स्त्रीत्वाट्टाप्। एवमग्रेपि

मयूरव्यंसकादयश्च॥२।१।७२॥ एतेनिपात्यन्ते। मयूरव्यंसकः। मयूरव्यंसकः। व्यंसकोधूर्त्तः। उदक्चावाक्च। उच्चावचं। निश्चितंचप्र
चितंच। निश्चप्रचं। नास्तिकिंचनयस्यसः। अकिंचनः। नास्तिकुतोभयंयस्य। अकुतोभयः। अन्योराजाराजांतरं। चिदेवचिन्मात्रं॥ आ
ख्यातमाख्यातेनक्रियासातत्ये॥ ॥ अश्नीतपिबतेत्येवंसततंयत्राभिधीयतेसा। अश्नीतपिबता। पचतभृज्जता। खादतमोदता। एही
डादयोन्यपदार्थे॥ ॥ एहीडइतियस्मिन्कर्मणितदेहीडं। एहियवं। उद्धरकोष्ठादुत्सृजदेहीतियस्यांक्रियायांसाउद्धरोत्सृजा।
जहिकर्मणावहुलमाभीक्ष्ण्येकर्त्तारंचाभिदधाति। जहीत्येतत्कर्मणावहुलंसमस्यतेआ
भीक्ष्ण्येगम्येसमासेनचेत्कर्त्ताभिधीयतइत्यर्थः। जहिजोडः। जहिस्तम्बः। ईषदकृता॥२।२।७॥ ईषत्पिङ्गलः। ईषद्गुणवचनेनेतिवाच्यं। ईषद्र

राज्ञांतरमिति। अंतरशब्दोत्रभिन्नवाची। चिन्मात्रमिति। मात्रंकार्त्स्न्येवधारणइत्यमरः। अंतरमात्रशब्दाभ्यांसहनित्यसमासइत्युभयत्रअस्वपदविग्रहोदर्शि
तः। नित्यसमासत्वंनुअवधारणार्थेकचकारेणलभ्यमित्याहुः। उद्धरकोष्ठादित्यादि। उद्धरउत्सृजेत्येतावानेवविग्रहः। उत्सृजेत्यस्यविवरणंदेहीति। कोष्ठादि
निनूद्धरेत्यस्याकांक्षापूरणार्थमुक्तं। समासेनचेत्कर्त्तेति। जहिजोडमिति आभीक्ष्ण्येनयआहसः जहिजोडः। एवंजहिस्तंवमितियआहसजहिस्तंवः ॥

नञ् इह नलोपो नञः इत्यत्र विशेषणार्थो ञकारः तत्फलं च नैकधेत्यत्रालोपः। अव्ययेन नञ् कृ निपातानामित्यव्ययपूर्वपदप्रकृतिस्वरार्थं ञकारोच्चारणमित्यन्ये। सुपा समस्यत इति। उत्तरपदार्थप्रधानोऽयं समासः। तथाहि। आरोपितत्वं नञा द्योत्यते। तथा च अब्राह्मणशब्दादारोपितो ब्राह्मण इति बोधे अर्थात् ब्राह्मणभिन्न इति पर्यवस्यति। अत एवानुपसर्जनत्वात्तस्मिन् असर्व इत्यादौ सर्वनामकार्यं सिध्यति। तत्पुरुषस्यौत्सर्गिकमुत्तरपदार्थप्राधान्यमप्येवं सति निर्बाधम्। एतत्तदोरिति सूत्रे अनञ्समासे ग्रहणं चेह लिंगमित्यादि मनोरमायामनुसंधेयम्। नलोपो नञः। नञो ञिति वक्तव्ये नलोपवचनं साकच्कार्थं तेन नञोऽकचि अकब्राह्मणः। अकनश्व इत्यादि सिद्धमित्याहुः। उत्तरपदे इति। अलुगुत्तरपदे इत्यधिकारादिति भावः। उत्तरपदे किं। घटो नास्ति पटो नास्ति। नन्वेवमपि त्वं नार्थ इत्यत्र नलोपः स्यादिति चेदत्राहुः। उत्तरपदाक्षिप्तपूर्वपदेन नञ्विशेष्य पूर्वपदभूतस्य नञ इति व्याख्यानान्न भवति स्त्रीपुंसाभ्यामिति विहितस्य नञ्प्रत्ययस्या

नञ्। २।२।६॥ नञ् सुपा सह समस्यते। नलोपो नञः। ६।३।७३॥ नञो नस्य लोपः स्यादुत्तरपदे। न ब्राह्मणः। अब्राह्मणः। तस्मान्नुडचि। ६।३।७४॥ लुप्तनकारान्नञ उत्तरपदस्याऽजादेर्नुडागमः स्यात्। अनश्वः। अर्थाभावेऽव्ययीभावेन सहाऽयं विकल्प्यते। रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति। अदृत्तायामसंहितमिति च भाष्यवार्त्तिकप्रयोगात्। तेनाऽनुपलब्धिरविवादोऽविघ्नमित्यादि सिद्धम्। नञो नलोपस्तिङि क्षेपे। अपचसि त्वं जाल्म। नैकधेत्यादौ तु नशब्देन सह सुप्सुपेति समासः॥

९ पूर्वपरत्वात्। अत एव चात्र प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणमिति परिभाषा नोपतिष्ठते। न च प्रत्ययग्रहणे तदन्तग्रहणान्नञ्प्रत्ययान्तस्य पूर्वपदत्वं संभवत्येवेति प्रत्ययाप्रत्यययोरित्येतदुपतिष्ठत एवेति वाच्यम्। हृदयस्य हृल्लेखेति सूत्रे अण्ग्रहणात्पृथक् लेखग्रहणेनोत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणं नास्तीति ज्ञापनात्। यद्वा। अमूर्द्धमस्तकान्ताविभक्तावप्रथमायां इत्यादिज्ञापकान्नलोपो नञ इत्यत्राव्ययमेव नञ् गृह्यते न तु प्रत्यय इति। तस्मान्नुडचि। उच्छिधुडित्सैवाचीति सप्तम्याः षष्ठी प्रकल्प्यत इत्याह अजादेरिति। अचोत्तरपदविशेषणात् यस्मिन्विधिरिति तदादिविधिर्लभ्यत इति भावः। अनश्व इति। नुटः परादित्वेन अपदान्तत्वात् ङमो ह्रस्वादिति ङमुण्न भवति। ननु विघ्नानामभावोऽविघ्नमित्यत्रापि परत्वात्तत्पुरुषः स्यादव्ययीभावस्य निर्मक्षिकादौ सावकाशत्वादन्यथा अनुपलब्धिरविवाद इति न सिध्येदित्याशंक्याह अर्थाभावेऽव्ययीभावेन सहेत्यादि। अविघ्नमिति। यद्यप्यविद्यमानो विघ्नो यस्मिन्निति बहुव्रीहिणा अविघ्नकर्मेत्यादि प्रयोगः सिध्यति

नुः र्तनादाहक्रियायोगइति ४　　　　५ ज्ञातेनेह नञ्तुरीयत्वात्माधवादिग्रंथे तु आविः प्रादुः शब्दौ मुक्त्वा अन्येषां करोति नैव योगे गतिसं ५

तथाप्युत्तरेऽर्थत्वविघ्नमस्त्वित्यादिप्रयोगा अव्ययीभावं विनास्तु एत्सत्तो नसिध्यंतीतिभावः। नञो नलोप इति। तिङंतेन समासाभावादप्राप्तेवचनं। अपचसीति। कुत्सितं पचसीत्यर्थः। नञ्शब्देनेति। नञा समासे त्वनेकधेवेत्येवस्यादितिभावः॥ ॥ नभ्राडिसत्सुसाधवः सत्याः। तत्र साधुरितियत्। नसत्या असत्याः। नअसत्या नासत्याः। इह बहुवचनमविवक्षितं तेन नासत्यावश्विनौ दस्रावितिसिद्धं॥ नमुचिरिति। सर्वधातुभ्यइन्। इगुपधात्किदितिकित्वान्नगुणः। सरतेः स्रीपतेर्वेति। स्वरसंचलने भ्वादिः स्निविवासे तयोः तुदादिः। कुगति। कुशब्दोत्राव्ययं गृह्यते न तु पृथिवीवाचकः। गत्यादिसाहचर्यात्। ऊर्यादिच्विडाचश्चउपसर्गाः क्रियायोगइत्यतो नुवर्त्तनादाह क्रियायोगइत्यनेनेति डाचो दम्भवतियोगे विहितो नत्साहचर्यादूर्यादीनामपि तत्रैवगतिसंज्ञेति स्थितं। तथैवोदाहरति ऊरीकृत्येति। एतच्च मनोरमानुसारेणोक्तं वस्तुतस्तु ऊरीभूयेति

नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या। ६। ३। ७५॥ पादितिशत्रन्तः। वेदाइत्यसुन्नन्तः। नसत्या असत्या। नअसत्या। नासत्या। नमुञ्चतीति नमुचिः। नकुलमस्य। नखमस्य। नस्त्रीपुमान्। स्त्रीपुंसयोः पुंसकभावो निपातनात्। नक्षरतीति नक्षत्रम्। क्षीयतेः क्षरतेर्वाक्षत्रमिति निपात्यते। नक्रामतीति नक्रः। क्रमेर्डः। नअकमस्मिन्निति नाकः। नगोप्राणिष्वन्यतरस्यां। ६। ३। ७७॥ नगइत्यत्र न प्रकृत्या वा। नगाः। अगाः। पर्वताः। अप्राणिष्विति किं। अगोवृषलः शीतेन। नित्यं क्रीडेत्यतो नित्यमित्यनुवर्त्तमाने॥ कुगतिप्रादयः। २। २। १८॥ एते समर्थेन नित्यं समस्यन्ते। कुत्सितः पुरुषः। कुपुरुषः। गतिश्चेत्यनुवर्त्तमाने ऊर्यादिच्वि भाष्योदाहरणादित्यात्रमुदाहरति। ऊरीकृत्येत्यत्र तरितं युक्तो

संज्ञाफलं समासमन्तरफलं चल्यविति वोध्यं। ऊरी उररी एतावंगीकारे। आविः शब्दस्य तु साक्षात्प्रभृतिषु पठनात्तद्योगे गतिसंज्ञाविकल्पः स्यादितियोगे तेनेन नित्यमिति बोध्यं कथं तर्हि वाहलीमरविंदंकमथाविश्चक्रुस्तम्भवदसाविनुगइति माघ इति चेरत्राहुः। तप्राग्धातोरितिसूत्रस्य प्रयोगनियमार्थत्वप्रकृते अनुपपन्नावपि संज्ञानियमार्थत्वपक्षे दोषलेशोपि नास्तीति। शुक्लीति कृभ्वस्तियोगे संपद्यकर्तरि च्विः। अस्य च्वावितीकारः। पटपटाकृत्येति। डाचि बहुलं द्वेभवत इति पटच्छब्दस्य द्वित्वं। अव्यक्तानुकरणात्घ्यजवरार्धादिति डाचि टिलोपः। नित्यमाम्रेडिते डाचीति तकारपकारयोः पकार एकादेशः। निपातसंज्ञायाः समावेशार्थं सूत्रे चकारः। तेन ऊरीकृतमित्यत्र गतिरनंतर इति पूर्वपदप्रकृतिस्वरे क्रियमाणे निपातप्रयुक्तमाद्युदात्तत्वं भवति॥

कारिकेति। भावे पर्यायार्ह॰णेति ण्वुच्। तदाह क्रियेति। क्रियायोग इत्यनेन कारिकाशब्दस्य विशेषणात् श्लोकवाची कारिकाशब्दोऽत्र न गृह्यत इति भावः। क्रियाशब्दस्यात्र म
र्यादा स्थितिरर्थः। यत्न इत्यन्ये। अनुकरणं चेति। प्राग्धातोरित्यस्य संज्ञानियमपक्षेऽनिनीति व्यर्थमिति मत्वा पृच्छत्यनितिपरं किमिति। इतरस्तु प्रयोगनियमपक्षे खाडित्य
नुकरणस्येतिशब्दे परे गतिसंज्ञाया निवारणायानितिपरमित्यावश्यकमिति प्रत्युदाहरति खाडिति कृत्वेति। सत्यां संज्ञायां एष प्रयोगो नैव स्यात्किं तु इति स्वाहेत्यनेनेव स्या
दिति भावः। [illegible] चेति स्वाहाकृत्येति न भवतीतेः परस्यानुकरणस्य गतिसंज्ञानिषेधादिति वाच्यं। अनितिपरमित्यत्र इतिः परो यस्मात्तदितिपरं न इतिपरमनितिपरमिति बहु

कारिकाशब्दस्योपसंख्यानम्। कारिकाक्रिया। कारिकाकृत्य। अनुकरणं चानितिपरं। १।४।६२। खाट्कृत्य। अनितिपरं किं। खाडिति कृत्वा निरष्ठीवत्।
आदरानादरयोः सदसती। १।४।६३। सत्कृत्य। असत्कृत्य। भूषणेऽलं। १।४।६४। अलंकृत्य। भूषणे किं। अलं कृत्वौदनं गतः। पर्याप्तमित्यर्थः। अ
नुकरणादिस्त्रिसूत्री स्वभावात् कृञ्विषया। अन्तरपरिग्रहे। १।४।६५। अन्तर्हत्य। मध्ये हत्वेत्यर्थः। अपरिग्रहे किं। अन्तर्हत्वा गतः। हतं प
रिगृह्य गत इत्यर्थः। कणेमनसी श्रद्धाप्रतीघाते। १।४।६६। कणेहत्य। पयः पिबति। मनोहत्य। कणेशब्दः सप्तमीप्रतिरूपको निपातोऽभिलाषाऽ
तिशये वर्त्तते। मनश्शब्दोऽप्यत्रैव। पुरोऽव्ययं। १।४।६७। पुरस्कृत्य। अस्तं च। १।४।६८। अस्तमिति मान्तमव्ययं गतिसंज्ञं स्यात्। अस्तङ्गत्य। अ
च्छ गत्यर्थवदेषु। १।४।६९। अव्ययमित्येव। अच्छगत्य। अच्छोद्य। अभिमुखं गत्वा। उक्त्वा चेत्यर्थः। अव्ययं किं। जलमच्छं गच्छति। अदोऽनु
पदेशे। १।४।७०। अदःकृत्य। अदः कृतं। परम्प्रत्युपदेशे प्रत्युदाहरणं। अदः कृत्वा। तिरोऽन्तर्द्धौ। १।४।७१। तिरोभूय। ॥ ॥

व्रीहि[illegible]र्हतेन नञ्तत्पुरुषाश्रयणात्। स्यादेतत्। अनुकरणस्येतिशब्दपरत्वे क्रियायोगाभावान्न गतिसंज्ञाप्राप्तिरिति खाडिति कृत्वेति रूपं निर्बाधं किमनेनानितिपरग्रहणे
नेति चेदत्राहुः। इति कृत्वेति समुदाय एवं कृत्वेत्यर्थे वर्त्तते। तथा चेतिशब्दः क्रियाविशेषक इति तद्घटितसमुदायस्य क्रियावाचकत्वादस्त्येव क्रियायोग इति। हतं परिगृह्ये
ति। हत्वा गामृत्रं द्विधा हतं सपत्नं परिगृह्य चेति। आद्यमुदाहरणं द्वितीयं तु प्रत्युदाहरणं। अपरिग्रहे इति च प्रयोगोपाधिर्न तु वाच्यकोटिनिविष्टमिति भावः। कणेहत्येति
अत्यंतमभि[illegible]लष्यत[illegible]न्निवृत्तिपर्यन्तं पिबतीत्यर्थः। तथा च श्रद्धाया अपगमात्प्रतिघा[illegible]तो गम्यते। प्रत्युदाहरणं तु कणे ह

न पमिव पर्यालोचयमिति तदेव मु[illegible] हरणं अ[illegible]

त्वा गतः। सृ[illegible]ङ्गुलावयवः कराग्रं तस्मिन्कृत्वेत्यर्थः पुरस्कृ[illegible]ति। पूर्वाधरावराणामित्यसिप्रत्ययान्तोयमव्ययं। नमस्पुरसोर्गत्योरिति विसर्गस्य सः। अमुं पुरः पश्यसीत्यत्र तु स्थि-
तमित्यध्याहारेण हृष्टिं प्रत्यगतित्वात्सत्वाभावः। अव्ययं किं। [illegible] पुरौ पुरः कृत्वा गतः। अलं च। अव्ययमिति किं। अलं कृत्वा कांडं गतः। क्षिप्रमित्यर्थः। अच्छमिति। सत्वं
हि गतिसंज्ञापां निपातसंज्ञावत्वेनाव्ययत्वात्सुब्लुक् सा[illegible]भावः। अदः कृत्येति। यदाहुः कृतमिति। गतिरनन्तर इति पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वं। प्रत्युदाहरणं।
मिति। अदः कृत्वा अदः कुर्वित्यादीत्यर्थः। तिरोंतर्द्धौ। अंतर्द्धौ किं। तिरोभूत्वा स्थितः पार्श्वतो भूत्वेत्यर्थः॥ ॥ विभाषा कृञि॥ तिरः कृत्वेति। गतित्वाभावपक्षे तिरसो
न्यतरस्यामिति सत्वमपि न भवति। नहि धोगतिग्रहणानुवृत्तेः। माघवस्तु पराभवेतिरस्कार इति प्रयोगदर्शनात्सत्वविधौ गतिग्रहणानुवृत्तिं केचिन्नेच्छंतीत्याहु

विभाषा कृञि। १।४।७२। तिरः कृत्वा। तिरस्कृत्य। तिरः कृत्वा। उपाजेन्वाजे। १।४।७३। एतौ कृञि वा गतिसंज्ञौ स्तः। उपाजे कृत्य। उपाजे कृत्वा। अन्वा-
जे कृत्य। अन्वाजे कृत्वा। दुर्बलस्य बलमाधायेत्यर्थः। साक्षात्प्रभृतीनि च। १।४।७४॥ कृञि वा गतिसंज्ञानि स्युः। च्व्यर्थ इति वाच्यं। साक्षात्कृत्य॥ सा-
क्षात् कृत्वा। लवणं कृत्य। लवणं कृत्वा। मान्तत्वं नि[illegible]तनात्॥ अनत्याधान उरसिमनसी॥ १।४।७५। उरसिकृत्य। उरसि कृत्वा। अभ्युपगम्येत्यर्थः
मनसि कृत्य। मनसि कृत्वा। निश्चित्येत्यर्थः। अत्या[illegible]नमुपश्लेषणं तत्र न। उरसि कृत्वा पाणिं शेते। मध्ये पदे निवचने च। १।४।७६। एते कृञि
वा गतिसंज्ञाः स्युरनत्याधाने। मध्ये कृत्य। मध्ये कृ[illegible]। पदे कृत्य। पदे कृत्वा। निवचने कृत्य। निवचने कृत्वा। वाचं नियम्येत्यर्थः॥

उपाजेन्वाजे। एतौ विभक्तिप्रतिरूपकौ निपातौ दुर्बलस्य सा[illegible]य्योधाने वर्त्तेते। तदाहुः दुर्बलस्येति। साक्षात्प्रभृ। साक्षात्। मिथ्या। आम। अद्धा। लवणम्। उष्णम्। शीतम्। उद-
कम्। आर्द्रम्। गतिसंज्ञासन्नियोगेन लवणादीनां [illegible]। नाम[illegible]रांतत्वं निपात्यते। प्रादुस्। नमस्। आविस्। इत्यादि। आकृतिगणोयं। साक्षात्कृत्येति। असाक्षाद्भूतं यथा
साक्षाद्भवति तथा कृत्वेत्यर्थः। अत एव तु पूर्वविप्रतिषेधादूर्यादिच्विडाचश्चेति नित्यैव संज्ञा तेन लवणीकृत्येत्यत्र मांतत्वं न भवति नहि पाक्षिकगतिसंज्ञासन्नियोगे
न रह गतौ निपातनात्। भाष्यकृता लवणशब्दस्य लवणंशब्दस्य वा विकल्पेन लवणंशब्द आदिश्यते तस्य च संज्ञाविकल्प इत्युक्तं। उभयथापि द्वैरूप्यं निर्बाधं
अनत्या। उरसिमनसी विभक्तिप्रतिरूपकौ। मध्येपदे वि[illegible]षा कृञीति वर्त्तते चकारादनत्याधान इति चाप्यामनत्याधानरूपार्थविशेषणं तत्त्वमविशेषेण

निपात्यतेनतुगतिसंज्ञासंनियोगेन। अनत्याधानेकिं। परेकृत्वाशिरोनमति। वाचंनियम्येति। निवचनंइति वचनाभावः। अर्थाभावेऽव्ययीभावः॥ ःः ॥नित्यंहस्तेउपयमने पार्थेएवैतयोरिदं तत्वमौरंतलं चनिपात्यतेहस्तेकृत्यपरिणीयेत्यर्थः। उपयमनेकिं। हस्तेकृत्वाकार्षापणंगतः। स्वीकारमात्रमितिपक्षेतुनालमितिबुध्यापराहृत्यदानार्थगतइतियोज्यं। एवंनावद्गतिसमासानुरात्यप्रादिसमासाच्चकुमारमतेप्रादिग्रहणमिति। सुपुरुषइतिक्रियायोगाभावाद्गतित्वाभावः। अव्यवस्थयासमासप्रासक्तौव्यवस्थार्थंवचनानिपठ्यंते। प्रादयइति। आदिशब्दउभयत्रप्रकारे। तेनदुराचारःपुरुषोदुष्पुरुषइत्यादिसिद्धं। प्रगतआचार्यइति। अनेनगतार्थेवृत्तिं अस्वपदविग्रहेणनित्यसमासतांचदर्शयति। एवंप्रगतःपितामहः प्रपितामहः। प्रमातामहइत्यादि। अत्यादयइति। आदिपदादभिगतोमुखमभिमुखः। उद्गतोवे

नित्यंहस्तेपाणावुपयमने।१।४।७७॥ कृञि। उपयमनंविवाहः। स्वीकारमात्रमित्यन्ये। हस्तेकृत्य। पाणौकृत्य। प्राध्वंबन्धने।१।४।७८॥ प्राध्वंकृत्य। बन्धनेनानुकूलं कृत्वेत्यर्थः। प्रार्थनादिनात्वानुकूल्यकरणे। प्राध्वंकृत्वा। जीविकोपनिषदावौपम्ये।१।४।७९॥ जीविकामिवकृत्वा। जीविकाकृत्य। उपनिषदमिवकृत्वा। उपनिषत्कृत्य। औपम्येकिं। जीविकांकृत्वा। प्रादिग्रहणमगत्यर्थं। सुपुरुषः। अत्रवार्त्तिकानि। प्रादयोगताद्यर्थेप्रथमया। प्रगतआचार्यः। प्राचार्यः। अत्यादयःक्रान्ताद्यर्थेद्वितीयया। अतिक्रान्तोमालामतिमालः। अवादयःक्रुष्टाद्यर्थेतृतीयया। अवक्रुष्टःकोकिलया। अवकोकिलः। पर्य्यादयोग्लानाद्यर्थेचतुर्थ्या। परिग्लानोऽध्ययनायपर्य्यध्ययनः। निरादयःक्रान्ताद्यर्थेपञ्चम्या। निष्क्रान्तःकौशाम्ब्याः। निष्कौशाम्बिः। कर्म्मप्रवचनीयानांप्रतिषेधः॥ वृक्षंप्रति॥ ॥

लामुद्वेलः। प्रतिगतोक्षंप्रत्यक्षइत्यादिसिद्धं। अतिमालइति। गोस्त्रियोरितिह्रस्वः। अवादयइति। आदिपदात्परिणद्धोवीरुधापरिवीरुत्। संनद्धोवर्मणासंवर्मेति। पर्य्यादयइति। आदिपदादुद्युक्तःसंग्रामायउत्संग्रामः। अध्ययनायेति। तादर्थ्येचतुर्थी। गुरुकुलवासादिनापरिग्लानोऽध्ययनार्थमित्यर्थः। निरादयइति। आदिपदादुत्क्रान्तःकुलादुत्कुलः॥ निर्गतमंगुलिभ्योनिरंगुलं प्रतिषेधइति। कुगतिप्रादयइतिप्रसक्तसमासस्यवक्ष्यप्रतिषेधस्सचसुराजाअतिसखेतिभाष्यादिप्रयोगात्स्वतिभिन्नानामेवकर्मप्रवचनीयानामित्यर्थः। वृक्षंप्रतीति। लक्षणेत्थंभूतेतिकर्मप्रवचनीयत्वविधिसामर्थ्यादिहसमासोनेति

चेत्तर्हि अपि स्तुतमित्युदाहार्यं अपि स्तुयाद्गुरुमित्यादावपि पदार्थसंभावनेऽयस्य सावकाशत्वात्स्वरे विशेषसत्वाच्चेत्याहुः ॥ ॥ तत्रोपपदं ॥ सप्तमीस्थमित्येतद्व्या
चष्टे सप्तम्यन्त इत्यादिना। तद्वाचकं पदमिति। एतच्चोपपदमित्यन्वर्थसंज्ञाबलाल्लभ्यते। अतएव संज्ञाविधावपि सप्तमीग्रहणेन सप्तम्यन्तं गृह्यते। धातोरिति पृथगधिका
रबलात्सन्निहिते धात्वधिकार इति लभ्यते। तेन स्त्रिलुङीत्यस्य लुङन्ते अभूदित्यादावुपपदे धातोः स्त्रिरित्यर्थो न भवति। तत्रग्रहणं व्याचष्टे तस्मिन्सत्येवेति। उपपदे स
त्येवेत्यर्थः। तत्रग्रहणाभावे तु धः कर्मणि ष्ट्रन्नित्यादाविव कर्मण्यणित्यादावपि कर्मण्यभिधेये अणित्याद्यर्थः स्यात्। तथा च कर्तर्यण् प्रत्ययो न स्यात्। किंच सप्तम्यन्तनि
र्देशस्योपपदसंज्ञार्थतया चरितार्थत्वात्केवलादपि धातोः कर्तर्यण् प्रत्ययः संभाव्येत कृते तु तत्रग्रहणे कुंभाद्युपपदस्य प्रत्ययोत्पत्तौ निमित्तत्वप्रतीत्या केवलादण्प्रत्य

तत्रोपपदं सप्तमीस्थं ॥ ३।१।९२॥ सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं कुम्भादि तद्वाचकम्पदमुपपदसंज्ञं स्यात्॥ तस्मिंश्च सत्येव
वक्ष्यमाणः प्रत्ययस्स्यात्। उपपदमतिङ् ।२।२।१९॥ उपपदं सुबन्तं समर्थेन नित्यं समस्यते। अतिङन्तश्चायं समासः। कुम्भं करोती
ति। कुम्भकारः। इह कुम्भ अस् कार इत्यलौकिकम्प्रक्रियावाक्यं। अतिङ् किं। मा भवान् भूत्। माङि लुङिति सप्तमीनिर्देशान्माङुपपदं।
अतिङ्ग्रहणं ज्ञापयति। सुपेत्येतन्नेहानुवर्त्तत इति पूर्वसूत्रे पिगतिग्रहणं पृथक्कृत्य तिङ्ग्रहणं तत्रापकृष्यते सु[illegible]तथा
च गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति सिद्धं। व्याघ्री। अश्वक्रीती। कच्छपी। अमैवाऽव्ययेन ।२।२।२०। अमैव [illegible] विधा
नं यदुपपदं तदेवाऽव्ययेन सह समस्यते। स्वादुङ्कारं। नेह कालसमयवेला सु तुमुन्। कालस्समयो वेला वा भोक्तुम्। अमैवेति किं। अग्रेभोजं अग्रेभु

यत्नं कैवनाम्नि। एवं स्थिते धः कर्मणीत्यादौ केचिदर्थग्रहणं व्याख्यानादित्याहुः। अन्ये तु तत्र क्त्वा। विभाषाग्रेप्रथमपूर्वेष्विति क्त्वाणमुलौ। अमा चान्येन च तुल्य
पपदमित्यस्य कर्मण्यणित्यादेश्चैकवाक्यतया प्रज्ञानाद्युपपदसंज्ञाया निर्विषयत्वापत्तेस्तत्रग्रहणं विनापीष्टं सिद्ध्यत्येवेत्याहुः। समर्थेनेति। तेन महान्तं कुंभं करोतीत्या
दौ [illegible]ति प्रसंगः। अतिङन्तश्चेति। सुपि तितु अनुवर्तत एवेति। अतिङन्तमिति नोक्तमिति भावः। कुंभ असिति। अमिति तु नोक्तं कृद्योगषष्ठीविधानात्। अतिङ् किमि
ति। सुपेत्यधिकारात्किमनेनेति प्रश्नः। इतरो वक्ष्यमाणं ज्ञापकं मनसि निधाय प्रत्युदाहरति मा भवानिति। समासाभावसूचनाय भवानिति मध्ये प्रयुक्तं। पूर्वसूत्र

इति। कुप्रादयः। गतिः। इति योगं विभज्य कुप्रादयः सुबन्तास्सुबन्तेन समस्यन्ते गतिस्सुबन्तो ऽतिङन्तेन समस्यत इति व्याख्येयमित्यर्थः। तथा चेति। यद्यप्युक्तरीत्या गत्यु-
पपदयोरेवलाभस्तथापि त्रिनयविषयिणी प्राचां परिभाषा एकदेशानुमतिद्वारा इहापि ज्ञाप्यत इति भावः कारकांशे तु कर्तृकरणे कृता इति सूत्रस्थबहुलग्रहणमुक्तार्थसाधक-
मित्यपि मनोरमायां स्थितं। प्रागिति। कृदन्तात् चरमपदात्सुबुत्पत्तेः पूर्वं समास इत्यर्थः। प्रथमान्तसुब्ग्रहणं त्विहानुवर्तत एव। तेन राजदर्शिन्यादौ पूर्वपदेन लोपादिकार्यं सिध्यति
परिभाषाफलं दर्शयन् गतिमुदाहरति व्याघ्रीति। व्याजिघ्रतीति व्याघ्री आतश्चोपसर्ग इति कः। पाघ्राध्माधेड्दृशः श इति शस्तु संज्ञायां न भवति व्याघ्रादिभिरिति निर्देशादिति वक्ष्यते। व्या-
ङ्घ्रशब्देन गतिसमासः। स्यादेतत् घ्रशब्दस्य सुबन्ततामपेक्षते नहि सुबुत्पत्तेः प्रागेव लिङ्गयोग इति लिङ्गनिमित्तप्रत्ययेन टापा भाव्यं न तु ङीषा घ्रशब्दमात्रस्य
जातिवाचित्वाभावात् ततो घ्राशब्देन समास इत्यदन्तत्वाभावाज्जातिलक्षणो ङीषपि न स्यादिति भावः। यद्यप्युपपदत्वेनाप्येतत्सिद्धं तथापि गतिग्रहणम[illegible]शब्देन समासेप-
श्चाद्घ्रशब्देन विशब्दस्य समासार्थं नावश्यकमेव। आङ्पूर्वाद्घ्रामोः कप्रत्ययविधानादाघ्र्युपपदसंज्ञाभ्युपगमेपि विशिष्टेतदनभ्युपगमादिति कर्तृकरणे कृतमुदाहरति। अ-
श्वक्रीतीति। अश्वेन क्रीता कर्तृकरणे कृतेति समासः। क्रीतात्करणपूर्वादिति ङीष्। सुबन्तेन समासे तु टापा भाव्यमि- त्यदन्तत्वाभावात् क्रीतात्करणपूर्वेति ङीष् न स्यादिति ज्ञेयं। उप-
पदमुदाहरति। कच्छपीति। कच्छेन पिबतीति कच्छपी। सुपीति योगविभागात्कः। इहापि समासस्य सुबन्ततापेक्षायां टावेव स्यान्न ङीषित्यादि व्याघ्रीत्यत्रेव बोध्यं। प्राचां तू-
पपदमतिङ् इति समस्यत इत्युक्तं। तदसत् तथा सति प्रथमान्तसुब्ग्रहणनिवृत्त्यापत्त्या राजदर्शी चर्मकार इत्यादौ नलोपो न स्याद् पदान्तत्वात्। प्राड्वितेत्यादावनो गुण इति
पररूपं च स्यात्। स्यादेतत्। कच्छेन साधनेन पिबतीत्यर्थाभ्युपगमे कच्छस्य कारकत्वेन कच्छपीतिरूपसिद्धौ नेदमुपपदस्यासाधारणोदाहरणमिति चेदेवं तर्हि मद्यपावापि
णीत्युदाहर्तव्यं। सुप्यजातावितिणिनोक्तेन मृषोपपदस्य कृदन्तेन समासे प्रातिपदिकान्तेत्यादिना पूर्वपदस्थान्निमित्तात्परस्य समासप्रातिपदिकान्तनकारस्य णत्वं सिध्यति
सुबन्तेन समासे त्वन्तरङ्गत्वान्नान्तलक्षणे ङीप्यपि पश्चाद्घूपिनीशब्देन समासे गर्गभगिनीत्यत्रेव णत्वं न स्यादित्येके। अन्ये तु कच्छेन हेतुना पिबतीत्यर्थविवक्षायां कच्छ-
स्याकारकत्वात्कच्छपीत्युपपदस्योदाहरणं सम्यगेवेत्याहुः। अमैवाव्ययेन। पूर्वेण सिद्धे नियमार्थमिदं। तुल्यविधानमिति। एतच्चाध्याहारेण लभ्यं तदेवेति। यस्मिन्नुपप-
दे येन वाक्येन अमेव विहितस्तदेवोपपदमव्ययेन समस्यते नान्यदित्यर्थः। नियमबललभ्योयमेवकारो न तु सूत्रस्थः। स्वादुङ्कारमिति। स्वादुमि णमुल्। अव्ययेनेति किं।

कुंभकारः। असति त्वव्ययग्रहणे अमैव यत्तुल्यविधानं तदेव केनचित्समर्थेन समस्येत तथा सति स्वादुंकारमित्यत्रैव समासः स्यान्न तु कुंभकार इत्यत्र। अथ पूर्वसूत्रवैयर्थ्यभीत्या
अव्ययविषयक नियम इति चेत्तर्हि अमैवविषयक एवास्तु किं न स्यात् इमं तेनैव समासः सोऽमैव तुल्यविधानस्येति। तथा चाग्रेभोजमित्यत्र समासो मा भूत् अग्रेभुक्त्वा कालो भोक्तु
मित्यत्र तु स्यादेवेति भावः। तद्वेति किं। कालो भोक्तुं। समयो भोक्तुं। अमैवेत्येवकारेण मा चान्येन तुल्यविधानस्योपपदस्य समासनिवारणेऽपि तुमुना तुल्यविधानस्यास्या

तृतीयाप्रभृतीन्यन्यतरस्यां। २।२।२१॥ उपदंशस्तृतीयायामित्यादीन्युपपदान्यमन्तेनाव्ययेन सह वा समस्यन्ते। मूलकेनोपदंशं भुङ्क्ते। मूलकोपदंशं। क्त्वा
च। २।२।२२॥ तृतीयाप्रभृतीन्युपपदानि क्त्वान्तेन सह वा समस्यन्ते। उच्चैःकृत्य। उच्चैः कृत्वा। अव्यये यथाभिप्रेतेति क्त्वा। तृतीयाप्रभृतीनीति किं। अ
लं कृत्वा। खलु कृत्वा। तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः। ५।४।८६॥ संख्याव्ययादेरङ्गुल्यन्तस्य तत्पुरुषस्य समासान्तोऽच् स्यात्। द्वे अङ्गुली प्रमाणम
स्य द्व्यङ्गुलं दारु। निर्गतमङ्गुलिभ्यो निरङ्गुलम्। अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः। ५।४।८७॥ एभ्यो रात्रेरच् स्यात् चात्संख्याव्ययादेः। अहर्ग्रह
णं द्वन्द्वार्थं। अहश्च रात्रिश्चाहोरात्रः। सर्वरात्रः। सर्वरात्रः। पूर्वरात्रः। पूर्वरात्रः। संख्यातरात्रः। पुण्यरात्रः। द्वयो रात्र्योः समाहारः द्विरात्रम्। अति
क्रान्तो रात्रिं। अतिरात्रः। राजाहःसखिभ्यष्टच्। ५।४।९१॥ एतदन्तात्तत्पुरुषाट्टच् स्यात्। परमराजः। अतिराजी। कृष्णसखः। अन्हष्टखोरेव। ६
।४।१४५॥ टिलोपः स्यान्नान्यत्र। उत्तमाहः। द्वे अहनी भृतो द्व्यहीनः क्रतुः। तद्धितार्थे द्विगुः। तमधीष्ट इत्यधिकारे द्विगोर्वेत्यनुवृत्तौ रात्र्यहःस
म्वत्सराच्चेति खः। लिङ्गविशिष्टपरिभाषाया अनित्यत्वान्नेह। मद्राणां राज्ञी। मद्रराज्ञी॥ ॥ ९ देवातत्सन्निवारणाय तदेवेत्युक्तं॥ ॥ तृतीया
प्रभृतीन्यन्यतरस्यां। उभयत्र विभाषेयं। अमैव तुल्यविधानस्य प्राप्ते अमा चान्येन च तुल्यविधानस्याप्राप्ते चारम्भात्। प्राप्ते यथा। उपदंशस्तृतीयायां मूलकेनोपदंशं मूलकोप
दंशं। अप्राप्ते यथा। अव्यये यथाभिप्रेताख्याने इति क्त्वाणमुलौ। उच्चैःकारं इह समासपक्षे कृदुत्तरपदप्रकृतिस्वरः। आदिर्णमुल्यन्यतरस्यामित्याद्युदात्तत्वं। असमासे तु उ
च्चैरित्यन्तोदात्तत्वं [illegible] प्रत्ययस्वरः स्यात् प्रत्ययपक्षे तु फिषइत्यस्य च प्रवृत्तेरित्याहुः। मनोरमायां तु उच्चैरित्यन्तोदात्तस्वरादिश्रुततया पाठादिति स्थितं। अमैवेत्यनु
वर्त्तत इत्याह। अमन्तेनेति तेनेह न। पर्याप्तो भोक्तुं। पर्याप्तिवचनेष्विति तुमुन्। क्त्वा चान्केति तृतीयानां। आन इति योगविभागः॥

द्गलोपः क्रिस्कंदिस्कंदोरिति वदिति हरदत्तः तत्र सवर्णदीर्घत्वमपि तृतीयान्तत्वोपपत्तेः। अलंकृत्वेति। अलंखल्वोः प्रतिषेधयोरिति सूत्रस्योपदंशस्तृतीयायामित्यस्मात्पूर्वं त्वान्नेह समासः तत्पुरुषे असाधारणेन समासान्ता नाह। तत्पुरुषस्येति। अलोन्त्यविधिं बाधित्वा प्रत्ययः परश्चेति परत्वात्तत्पुरुषात्पर एवाच् प्रत्ययो भवति। यथा गापोष्टक्। कित्वेपि मधाभ्यां पर एव टच् भवति न त्वन्त्यावयवः॥ अस्तु अनुबंधकरणसामर्थ्यात्परविधिर्बाध्यते। एवं च लाघवात्तत्पुरुषादंगुलेरिति वक्तव्ये तत्पुरुषस्यांगुलेरिति तु समासान्तविषयं अवयवं प्रष्टीत्याहुः। द्व्यंगुलमिति। तद्धितार्थेति समासः। द्विगोर्लुगनपत्य इति मात्रचो लोप इति वृत्तिकृत्। मनोरमायां तु द्वयसचो लुगिति स्थितं। द्वंद्वार्थमिति। अन्होरात्रिरिति षष्ठीतत्पुरुषस्यासंभवादिति भावः। ननु अहःशब्दस्याहस्तुल्यतायां रात्रितुल्यतायां गौणत्वसंभवादहश्चासौ रात्रिश्चेति कर्मधारयोऽस्त्विति चेन्न मुख्यसंभवे गौणग्रहणायोगात्। हेमंतशिशिरावहोरात्रे चेत्यत्र द्वंद्वसमासान्तदर्शनाच्च।

अहोरात्र इति। जातिरप्राणिनामित्येकवद्भावः। स नपुंसकमित्येतद्बाधित्वा परत्वाद्रात्राह्नाहाः पुंसीति पुंस्त्वं। एतेनैकवद्भावात्क्लीबतेति भ्रान्तोग्रंथः परास्तः। मासेनस्यादहोरात्र इत्यादिग्रंथविरोधाच्च। सर्वरात्र इति। पूर्वकालैकेति समासः। पूर्वरात्र इति पूर्वापराधरोत्तरमित्येकदेशिसमासः। यदा तु रात्रिशब्दस्यैकदेशे लक्षणां स्वीकृत्य कर्मधारयोऽभ्युपगम्यते तदा पूर्वरात्रिरित्येव भवति। द्विरात्रमिति। संख्यापूर्वं रात्रं क्लीबमिति वचनात्। अन्हष्टखोरेवेति नस्तद्धित इत्येव सिद्धे नियमार्थमिदं एवकारस्त्वन्ह एव टखयोरिति विपरीतनियमशंकानिरासार्थः। आत्माध्वानौ ख इति प्रकृतिभावविधानेन तन्निरासे प्रतिपत्तिगौरवं स्यादिति भावः। टखोरेवेति किं। अन्हा निर्वृत्तमाह्निकं। कालादित्यधिकारे तेन निर्वृत्तमिति ठञ्। टिलोपाभावादह्लोपो न इत्यकारलोपः। उत्तमाह इति। सर्वैकदेशसंख्यात इत्यत्र उत्तमशब्दस्यापाठादन्हादेशो न। अह्नीन इति। समासान्तविधेरनित्यत्वान्न टच्। सति तु तस्मिन्नन्हादेशं प्रसज्येत। न च नान्तस्य खे परे टिलोपविधिसामर्थ्यान्न टजिति वाच्यं। अहीन इत्यत्र तस्य सावकाशत्वात्। अनित्यत्वादिति। अत्र च लिंगं शक्तिलांगलांकुशेत्यत्र घटीग्रहणं मद्राज्ञीति। यद्यत्र टच् स्यात्तदा भस्याढे इति पुंवद्भावे टिलोपे च मद्राजीत्यनिष्टरूपं स्यादिति भावः॥

लिमानिर्देशात्स्वतन्त्रप्रमाणं प्राकृतलिङ्गः तु सामानाधिकरण्यप्रत्ययेषु प्रवृत्तौ न तद्विपर्ययापत्तेः अत एव लवणः सूपः लवणा यवागूः इत्यादि॥
अह्नोऽह्न एतेभ्यः। एतच्छब्देनाहः सर्वैकदेशेति सूत्रस्थाः परामृश्यन्ते। सूत्रे तु तस्मिन्नहरादयो निर्दिष्टाश्चकारेण च संख्याव्यये अनुकृष्टे तत्र सर्वेषां बुद्धिस्थत्वाविशेषेऽप्यहः॥
पूर्वस्य [illegible] गृह्यते। संभवादित्याशयेनाह सर्वादिभ्य इति। समासान्तपर इति। एतच्च प्रकरणाल्लब्धं भाष्ये तु अह्नादेशः प्रत्याख्यातः अह्न एभ्यः अच्च स्यात् टचोऽपवाद इति व्याख्या
यामेन्नहष्टखोरेवेति नियमादिल्लोपाभावे अल्लोपोऽन इत्यकारलोपात् सर्वाह्न इत्यादिरूपसिद्धेः रेफादिति। यदि तु लक्ष्ये अहस्सु भव इत्यादिष्वप्यमालसाह्न इत्यपि प्रयोगोऽस्ति तर्हि
ईषादित्वापि बोध्यः रषाभ्यामित्यधिकारात् ठञो लुगिति। अणो लुगिति वृत्तिकारोक्तमयुक्तमिति भावः। प्रसङ्गाद्द्व्यहा हस्त्रियामिति। नन्विह स्त्रीत्वं दुर्लभं रात्राह्नाहाः पुंसीति वचनादिति

अह्नोऽह्न एतेभ्यः ५।४।८८। सर्वादिभ्यः परस्याहन्शब्दस्याह्नादेशः स्यात्समासान्ते परे। अह्नोऽदन्तात् ८।४।७। अदन्तपूर्वपदस्थाद्रेफात्परस्याह्नादेशस्य नस्य णः स्यात्। सर्वाह्णः। पूर्वाह्णः। संख्याताह्नः। द्वयोरह्नोर्भवः। कालाट्ठञ्। द्विगोर्लुगनपत्ये इति ठञो लुक्। द्व्यह्नः। स्त्रियामदन्तत्वाट्टाप्। द्व्यह्ना। द्व्यह्नप्रियः। अत्यह्नः॥ क्षुम्नादिषु च ८।४।३९। एषु णत्वं न स्यात्। दीर्घाह्नी प्रावृट्। एवञ्चैतदर्थमह्न इत्यदन्तानुकरणं क्लेशेन कर्तव्यः। प्रातिपदिकान्तेति णत्ववारणाय क्षुम्नादिपाठस्यावश्यकत्वात्। अदन्तादिति तपरकरणं नेह। परागतमहः पराह्णः। न संख्यादेः समाहारे ५।४।८९। समाहारे वर्तमानस्य संख्यादेरह्नादेशो न स्यात्॥ संख्यादेरिति स्पष्टार्थम्। द्वयोरह्नोः समाहारः। द्व्यहः। त्र्यहः। उत्तमैकाभ्यां च ५।४।९०॥ आभ्यामह्नादेशो न। उत्तमशब्दोऽन्त्यार्थः। पुण्यशब्दमाह। पुण्यैकाभ्यामित्येव सूत्रयितुमुचितम्। पुण्याहम्। सुदिनाहम्। सुदिनशब्दः प्रशस्तवाची। एकाहः। उत्तमग्रहणमुपान्त्यस्यापि संग्रहार्थमित्येके। संख्याताहः॥ ॥

१९ चेत्त्वमेवम्। सर्वमहस्सर्वाह्ण इत्यादावुपसीणस्य तद्धितस्य लुप्तत्वात् द्वितायां प्रवृत्तेः लुपि युक्तवद्व्यक्तिवचने इत्यादौ न क्लीबत्वं किं च द्विगुप्राप्तापन्नेत्यादिना परवल्लिङ्गत्वे प्रतिषिद्धे तदपवादस्य रात्राह्नेत्यस्याप्राप्तिरेवेति द्व्यह्नशब्दोऽयं विशेष्यनिघ्न एव न तु नियतपुल्लिङ्गः। एवं चात्र भवार्थकतद्धिते लुप्तेऽपि प्रकृतिः प्रत्ययेन सह लुप्यमानार्थाभिधायीति न्यायेन भवार्थवृत्तित्वात् स्त्रीत्वाभिधानमपि न्याय्यमेवेति दिक्। टाबिति। ननु एवं अहठञन्तत्वान्ङीप् स्यादिति शंक्यम्। ठञो लुप्तत्वात्। न च प्रत्ययलक्षणम्। वर्णाश्रयत्वात्। ठञो योऽकारस्तदन्तान्ङीबिति तत्र व्याख्यातत्वात्। अत एव वृत्तिकारा पुक्तवाणे लुक्यपि न ङीबल्पोकार इति तत्र व्याख्यातत्वात्। न चैवमपि टजन्तत्वान्ङीप् स्यादेवेति वाच्यम्। टचः समासान्ततया तदन्तस्य तद्धितार्थप्रत्युपसर्जनत्वात्। अत एव हि अ

पिङ्गलिना प्रोक्तमधीयाना त्र्याह्मणी आपिशलेस्तु दात्तनं भाष्ये। द्विगोरिति ङीपुनः शंक्य एव। अपरिमाणेति निषेधात्। अनष्टावे चात्र प्रत्युक्तस्यैवोदाहरति द्व्यन्हेति। अन्होन्ह इ-
तिसूत्रे अन्हादेशं प्रत्याख्याय त्व प्रत्ययान्त्व वेत्यतोऽचमनुवर्त्य टजपवादोऽजिति व्याचक्षाणस्य भाष्यकारस्य मते तु निर्विवाद एवात्र टाप्। कथं तर्हि कालनिर्णयदीपिकायां द्व्य-
न्हीति प्रयोग इति चेदत्राहुः द्वैहनीयस्यांति यावितिवहुव्रीहौ नांतलक्षणो ङीपूर्वोध्यः। द्व्योरन्होर्भव इति व्याख्यानग्रंथस्तु फलितार्थकथनपरतयानेय इति। संख्यादि-
भिन्नस्य तत्पुरुषस्य समाहारे टच् असंभवादाह। स्पष्टार्थमिति। पुण्याहमिति। पुण्यसुदिनाभ्यामिति क्लीवत्वं वक्ष्यति। उपांत्यस्यापीति। यथा प्रथमयोरिति प्रथमाद्विती-

अग्राख्यायामुरसः। ५।४।९३। टच् स्यात्। अश्वानामुर इव अश्वोरसं। मुख्यो ऽश्व इत्यर्थः। अनो ऽश्मायस्सरसां जातिसंज्ञयोः। ५।४।९४। ट-
च् स्याज्जातौ संज्ञायां च। उपानसं। अमृताश्मः। कालायसं। मण्डूकसरसमिति जातिः। महानसं। पिण्डाश्मः। लोहितायसं। जलसरसमिति
संज्ञा। ग्रामकौटाभ्यां च तक्ष्णः। ५।४।९५। ग्रामस्य तक्षा। ग्रामतक्षः। साधारण इत्यर्थः। कुट्यां भवः कौटः स्वतन्त्रः स चासौ तक्षा च। कौटत-
क्षः। अतेः शुनः। ५।४।९६। अतिश्वो वराहः। अतिश्वी सेवा। उपमानादप्राणिषु। ५।४।९७। अप्राणिविषयकोपमानवाचिनः शुनष्टच् स्यात्। आ-
कर्षः श्वेव आकर्षश्वः। अप्राणिषु किं। वानरः श्वेव वानरश्वा। उत्तरमृगपूर्वाच्च सक्थ्नः। ५।४।९८। चादुपमानात्। उत्तरसक्थं मृगसक्थं। पू-
र्वसक्थं। फलकमिव सक्थि। फलकसक्थं। नावो द्विगोः। ५।४।९९। नौशब्दान्ताद् द्विगोष्टच् स्यान्न तु तद्धितलुकि। द्वाभ्यां नौभ्यामागतः। द्विनाव-
रूप्यः। द्विगोर्लुगनपत्ये इत्यत्र अचीत्यस्याऽपकर्षणाद्धलादेर्न लुक्। पञ्चनावप्रियः। द्विनावं। त्रिनावं। अतद्धितलुकीति किं। पञ्चभिर्नौभिः क्री-
तः पञ्चनौः। अर्धाच्च। ५।४।१००। अर्धान्नावष्टच् स्यात्। नावो ऽर्धं। अर्धनावं। क्लीबत्वं लोकात्। खार्याः प्राचां। ५।४।१०१। द्विगोरर्धाच्च खार्या
टज्वा स्यात्। द्विखारं। द्विखारि। अर्धखारं॥ ॥

२२ यथोग्रहणं द्विवचननिर्देशात्तथेहापि उत्तमग्रहणसामर्थ्यादंत्ययोर्द्वयोर्ग्रहणं। उत्तमो चैक-
श्चेति विग्रहे सौत्रं द्विवचनमिति तत्र [illegible] अग्राख्यायां। पंचम्यर्थे सप्तमी। अग्रं प्रधानं। अग्रवाचीय उरः शब्दस्तदन्तात्तत्पुरुषाट्टच् स्यात्। अग्राख्यायां किं। देवद-
त्तस्योरो देवदत्तोरः। ग्रामकौटा। जातिसंज्ञयोरिति नानुवर्तते। ग्रामेति किं। राज्ञस्तक्षा राजतक्षा। अतिश्व इति। श्वानमतिक्रान्तो जवेनेत्यर्थः। अतिश्वीति। नीचेत्यर्थः। आ-
कर्षः श्वेति। उपमितं व्याघ्रादीति समासः। आकृष्यते अनेन खलादिगतं धान्यमित्याकर्षः काष्ठविशेषः। उपमानात्किं। निष्क्रान्तः शुनो निःश्वः। फलकसक्थमिति। अतएव

त्तापकादसामान्यवचनेनाप्युक्तत्वान्नायं समास इति माधवः । द्विनावरूप्य इति । हेतुमनुष्येभ्य इति रूप्यः । पंचनौरिति । आर्हीयष्ठक् । अध्यर्धपूर्वेति लुक् । खार्याः । द्विगोरिति । खारीशब्दान्ताद्द्विगोरि... त्यर्थः ॥ ...॥ अर्द्धखारीति । परवल्लिंगमिति स्त्रीत्वं । अर्धखारमिति । अर्धनावमिव क्लीबत्वं लोकात् । टज्वास्याद्द्विगाविति । द्विगाविति किं ।

अर्द्धखारी । द्वित्रिभ्यामञ्जलेः । ५ । ४ । १०२ ॥ टज्वा स्याद्द्विगौ । द्व्यञ्जलं द्व्यञ्जलि । अतद्धितलुकीत्येव । द्वाभ्यामञ्जलिभ्यां क्रीतः । द्व्यञ्जलिः । ब्रह्मणो जानपदाख्यायां । ५ । ४ । १०४ ॥ ब्रह्मान्तात्तत्पुरुषाट्टच् स्यात्समासेन जानपदत्वमाख्यायते चेत् । सुराष्ट्रे ब्रह्मा । सुराष्ट्रब्रह्मः । कुमहद्भ्यामन्यतरस्यां । ५ । ४ । १०५ ॥ आभ्यां ब्रह्मणो वा टच् स्यात्तत्पुरुषे । कुत्सितो ब्रह्मा । कुब्रह्मः । कुब्रह्मा । आन्महतः समानाधिकरणजातीययोः । ६ । ३ । ४६ ॥ महत आकारोऽन्तादेशः स्यात्समानाधिकरणे उत्तरपदे जातीये च परे । महाब्रह्मः । महाब्रह्मा । महादेवः । महाजातीयः । समानाधिकरणे किं । महतस्सेवा । महत्सेवा । लाक्षणिकमपि विहाय प्रतिपदोक्तस्सन्महदिति समासो ग्रहीष्यत इति चेत् । महाबाहुर्न स्यात् । तस्माल्लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्येति परिभाषा नेह प्रवर्त्तते समानाधिकरणग्रहणसामर्थ्यात् । आदिति योगविभागादात्वं प्रागेकादशभ्य इति निर्देशाद्वा । एकादश । महतीशब्दस्य पुंवत्कर्मधारयेति पुंवद्भावे कृते आत्वं । महाजातीया । महेदात्वे घासकरविशिष्टेषूपसंख्यानं पुंवद्भावश्च । असामानाधिकरण्यार्थमिदं । महतो महत्या वा घासः । महाघासः । महाकरः । महाविशिष्टः । अष्टनः कपाले हविषि । अष्टाकपालं । गवि च युक्ते । गोशब्दे परे युक्त इत्यर्थगम्येऽष्टन आत्वं स्यात् । अष्टागवं शकटं । अच्प्रत्यन्ववेत्यत्राऽजिति योगविभागाद्बहुव्रीहावप्यच् । अष्टानां गवां समाहारः । अष्टगवं । तद्युक्तत्वाच्छकटमप्यष्टागवमिति वा । द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः । ६ । ३ । ४७ ॥ आत्स्यात् । द्वौ च दश च द्वादश । द्व्यधिका दशेति वा । द्वाविंशतिः । अष्टादश । अष्टाविंशतिः । अबहुव्रीह्यशीत्योः किं । द्वित्राः । द्व्यशीतिः । प्राक्शतादिति वक्तव्यं । नेह द्विशतं । द्विसहस्रं । त्रेस्त्रयः । ६ । ३ । ४८ ॥ त्रिशब्दस्य त्रयस् स्यात्पूर्वविषये । त्रयोदश । त्रयोविंशतिः । बहुव्रीहौ तु । त्रिदश । त्रिदशाः ।

द्वयोरञ्जलिः । द्व्यंजलिः । द्व्यंजलमिति । समाहारे द्विगुः । अतद्धितलुकीत्येवेति । एतच्च पूर्वसूत्रेपि बोध्यं । अंजलिभ्यां क्रीत इति । नात्रांजलिः पाणिद्वयं तस्य मूल्यत्वासंभवा

त्किं तु अंजलिपरिमितो व्रीह्यादिविवक्षितस्तत्र स्वपरिमाणत्वात् द्व्यंजलिरित्यत्र ठञ् । तस्य त्वध्यर्धपूर्वेति लुक् । ब्रह्मणो जनपदे भवो जान
पदः द्व्येकयोरिति वद्भावप्रधानो निर्देशस्तस्य व्याख्यायां न्यासकृता समासेनेत्येतल्लभ्यते तदाह समासेन जानपदत्वमिति । कस्येत्याकांक्षायां सन्निधानाद्ब्रह्मण
इति लभ्यते । सुराष्ट्रे ब्रह्म इति । सप्तमीति योगविभागात्समासः । जानपदेति किं । देवब्रह्मा नारदः । कुब्रह्म इति । ब्राह्मणपर्यायो ब्रह्मन्शब्दः । आन्महतः ॥ न
कार उच्चारणार्थो न तु सवर्णदीर्घार्थ इत्याह आकारोऽन्तादेशस्यादिति इहोत्तरपदाधिकारे पूर्वपदमाक्षिप्यते तच्च महता विशेषितमिति तदन्तविधिर्लभ्यते ग्रहणवतेति नि
षेधस्तु मत्पक्षे विधिविषय इत्युक्तत्वात् तेन महाबाहवदन्ति महाबाहुरिति प्रयोगो भवति । परममहत्परिमाण
मित्यत्र तु परममहतो द्रव्यस्य परिमाणमिति षष्ठीतत्पुरुषोऽभ्युपगम्यत इति न तत्रात्वप्रसक्तिरिति हरदत्तः । यत्तु वर्द्धमानेनोक्तं इष्टकेषीकामालानामित्यत्र तदन्त
विध्युपसंख्यानसामर्थ्यादुत्तरपदाधिकारे तदन्तविधिर्नास्ति तेन परममहत आत्वं नेति तद्भाष्यकैयटविरुद्धं । तथाहि । येन विधिरिति सूत्रे पदाधिकारे प्रयोज
नमिष्टकचितं पक्वेष्टकाचितमिति भाष्ये उदाहृतं कैयटेन च परशब्देन उत्तरपदं गृह्यत इति व्याख्यातं । एतदेवार्थतः काशिकायामुपनिबद्धं न तु इष्टकेषीकेत्यत्र
कात्यायनोक्तमुपसंख्यानमस्ति । ननु अत्रेति पदोक्तसमासे यदुत्तरपदं तस्मिन्नेव परे आत्वं स्यान्नान्यत्रेति किमनेन समानाधिकरणग्रहणेनेत्यत आह महाबाहुरि
ति । बहुव्रीहिरयं स च सामान्यशास्त्रनिर्दिष्टत्वाल्लाक्षणिक इति भावः । अष्टनः कपाल इति । कपाले उत्तरपदे हविषि वाच्ये अष्टन आत्वं वक्तव्यमित्यर्थः । अष्टा
कपालं इति । संस्कृतं भक्षा इत्यणः द्विगोर्लुगनपत्य इति लुक् । अध्यर्धपूर्वेत्यणो लुगिति केषांचिद्व्याख्यानं तु प्रामादिकं संस्कृतमित्यणोऽनार्हीयत्वात् त्रेस्त्र
॥ ॥ यः । संधिवेलादिषु त्रयोदशीति पाठात्सांनीयमादेश इति ध्वनयन्नाह । त्रयस्स्यादिति ॥

सुजर्थे बहुव्रीहिरिति [illegible] व्ययेत्यादिनेति शेषः। एकादिरिति। अदुगिति च्छेदः। परत्वं त्वकारोच्चारणसामर्थ्यान्न भवति। धासु वेति। संख्याया विधार्थे इत्यादिना
विहितस्य धाप्रत्ययस्येह ग्रहणं [illegible] अन्ययोरिति परिभाषया। तेनेह न। षट् दधातीति षड्धा। आतोनुपसर्गे कः। टाप्। षोडन्निति षड् दन्ता अस्य षोडन् वय

सुजर्थे बहुव्रीहिः। अशीतौ तु त्र्यशीतिः। प्राक्शतादित्येव। त्रिशतं। त्रिसहस्रं। विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम्॥६।३।४९॥ द्व्यष्टनोस्त्रेश्च प्रागुक्तं वा स्याच्चत्वारिंशदादौ परे। द्विचत्वारिंशत्। द्वाचत्वारिंशत्। अष्टचत्वारिंशत्। अष्टाचत्वारिंशत्। त्रिचत्वारिंशत्। त्रयश्चत्वारिंशत्। एवम्पञ्चाशत्। षष्टिसप्ततिनवतिषु। एकादिश्चैकस्य चादुक्॥६।३।७६॥ एकादिर्नञ् प्रकृत्या स्यादेकस्य चादुगागमश्च। नञो विंशत्या समासे कृते एकशब्देन सह तृतीयेति योगविभागात्समासः अनुनासिकविकल्पः। एकेन न विंशतिः। एकान्नविंशतिः। एकादूनविंशतिः। एको न विंशतिरित्यर्थः। षष उत्वं दतृदशधासूत्तरपदादेः ष्टुत्वं च धासु वेति वाच्यं॥ षोडन्। षोडश। षोढा। षड्धा। परवल्लिङ्गं द्वंद्वतत्पुरुषयोः।२।४।२६॥ एतयोः परपदस्येव लिङ्गं स्यात्। कुक्कुटमयूर्याविमे। मयूरीकुक्कुटाविमौ। अर्द्धपिप्पली। द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः। पञ्चसु कपालेषु संस्कृतः। पञ्चकपालः पुरोडाशः। प्राप्तो जीविकां। प्राप्तजीविकः। आपन्नजीविकः। अलं कुमार्यै। अलंकुमारिः। अत एव ज्ञापकात्समासः। निष्कौशाम्बिः। पूर्ववदश्ववडवौ।२।४।२७॥ द्विवचनमतन्त्रम्। अश्ववडवौ। अश्ववडवान्। अश्ववडवैः। रात्राह्नाहाः पुंसि।२।४।२९॥ एतदन्तौ द्वंद्वतत्पुरुषौ पुंस्येव। अनन्तरत्वात्परवल्लिङ्गतापवादोऽप्ययम्परत्वात्समाहारनपुंसकतां बाधते। अहोरात्रः। रात्रेः पूर्वभागः। पूर्व[illegible]त्रः। पूर्वाह्णः। द्व्यहः। संख्यापूर्वं रात्रं क्लीबं॥ द्विरात्रं। त्रिरात्रं। गणरात्रं॥ [ ] ॥

सिद्धं तस्येति तत्रादेशः। परवल्लिंगं। इतरेतरयोगे द्वंद्वोऽत्र [illegible] तेन समाहारे द्वंद्वः। स नपुंसकमित्यपवादस्य वक्ष्यमाणत्वात्सूत्रे तत्पुरुषयोरिति न सप्तमी द्विव
चनं। तथात्वे द्वंद्वे तत्पुरुषे च यत्परं परं तद्वल्लिंगं पूर्वपद[illegible]तिदिश्यते। परपदस्य संबंधिशब्दत्वेन पूर्वपदसापेक्षत्वात्। ततश्च मयूरीकुक्कुटाविमावित्यत्र पूर्व

पदेऽकारनिवृत्तिप्रसंगः। कुक्कुटमयूर्यावित्यत्र तु एकशेषो न। अत्र तु पूर्वपदे स्त्रीप्रत्यय उत्पद्येत किंतु षष्ठीद्विवचनमित्याशयेनाह। एतयोरिति। द्वंद्वतत्पुरुषार्थयोरित्यर्थः। एवं चानुप्रयोगेऽपि तदेव लिंगं सिद्धं। उपमेयपक्षमभ्युपगमाद्वंद्वतिरपि षष्ठ्यंतादेवेत्याशयेनाह परपदस्येवेति। भाष्ये तु लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्येति प्रत्याख्यातमिदं सूत्रं। अस्मिंश्च प्रत्याख्याते तुल्यन्यायत्वाल्लिंगानुशासनं सर्वमेव प्रत्याख्यातं तथापि तत्सौकर्याद्वि वाऽरमात्रं अन्यथा व्याकरणस्यैव वैयर्थ्यप्रसंगात्। गतिसमासेष्विति। गतिग्रहणं प्रादीनामुपलक्षणं मुख्यस्य गतेरसंभवादित्याशयेनोदाहरति निष्कौशांबिरिति। अतंत्रमिति। अत्र च लिंगं पूर्ववद्ग्रहणं

अन्यथाऽनिपातनादेव सिद्धे किं तेनेति भावः। द्वंद्वसमासार्थस्य वा पूर्ववल्लिंगातिदेशः। उत्तरपदार्थस्य वा। उभयथाप्यश्ववडवौ शोभनावित्यनुप्रयोगेऽपि पुंस्त्वं सिध्यति। ननु समासार्थस्य पुंस्त्वेऽपि स्वाश्रयस्त्रीत्वस्यानिवर्तनाट्टापः श्रवणप्रसंगः। न चातिदेशवैयर्थ्यं। शासिनत्वप्रवृत्त्या अनुप्रयोगे पुंल्लिंगत्वलाभेन चतन्मार्थक्या दितिचेदत्राहुः। इहैव निपातनादश्ववडवपूर्वापराधरोत्तराणामित्यत्र निपातनाद्वा टापो निवृत्तिरिति। अहोरात्र इति। प्राचा तु अहोरात्रमित्युदाहृ

अपथं नपुंसकं २।४।३०॥ तत्पुरुष इत्येव। अन्यत्र तु। अपथो देशः। कृतसमासांतनिर्देशान्नेह। अपन्थाः॥

नन्वेति। प्रागेवोक्तं। अत्र वदंति। रात्राह्नेत्यनेन रात्रादीनामेव पुंस्त्वविधौ यत्नेतरं तस्य तु परवल्लिंगमित्येव सिध्यति। अत एव भिन्नविषयत्वाद्धि प्रतिषेधे परं कार्यमिति न प्रवर्तते। एवं च रात्राह्नेति पुंस्त्वं अनुवृत्त्या समाहारे स नपुंसकमित्येव भवति परवल्लिंगापवादत्वादिति तन्न। उक्तरीत्या द्व्यह त्र्यह द्वावपि नपुंसकत्वप्रसंगात्। न चेष्टापत्तिः। द्व्यहः त्र्यह इति प्राचाप्युदाहृतत्वेन स्वमूलग्रंथेन सह विरोधापत्तेः। ते तु त्रिंशदहोरात्र इत्यादिकोशविरोधाच्च। तस्माद्रात्रा यंतस्येवायं पुंस्त्वविधिर्द्वंद्वतत्पुरुषयोरिति प्रक्रमणं तथा च भिन्नविषयत्वाभावाद्रात्राह्नेति पुंस्त्वं समाहारनपुंसकतांपरत्वेन बाधत एव। संख्यापूर्वमिति। अत्र चापथपुण्याहे नपुंसके संख्यापूर्वा रात्रिरिति लिंगानुशासनसूत्रं मूलं। संख्याग्रहणे तु कृत्रिमाकृत्रिमन्यायो न प्रवर्तते द्व्यष्टनः संख्यायामिति सूत्रे अशीतिपर्युदासादित्याशयेनोदाहरति। द्विरात्रं। गणरात्रमिति। गणानां बहूनां रात्रीणां समाहार इति विग्रहः॥ ❁ ॥ अपथं नपुंसा तत्पुरुष इत्येवेति। द्वंद्वग्रहणं तु नानुवर्तते अयोग्यत्वादिति भावः। अपथो देश इति पथो विभाषेति समासांतविकल्पः। इदं सूत्रं शक्यमवक्तुं। पथः संख्याव्ययादेरिति वक्ष्यमाणवार्तिकेन गतार्थत्वात्। प्रसंगादाह

अर्धर्चादिष्विति। इह केचित् ... व्यवस्थां वक्ष्यन्ते। सा च ... व्यवस्थामघमकरंदमाक्षिकाणां वाची मधुशब्दो द्विलिंगः चैत्रादिवाची तु पुल्लिंगः। भूतः पिशाचे द्विलिंगः क्वि
याव चनस्तु विशेष्यलिंगः ... ॥ ... ॥ अर्धर्चाः पुंसि च स नपुंसकमित्यनयोर्मध्ये जात्याख्यायामिति च तत्सूत्रासंगतिरिह चिंत्या। बहूनां वचनं प्रति

अर्धर्चाः पुंसि च ॥ २।४।३१॥ अर्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः। अर्धर्चः। अर्धर्चं। ध्वजः। ध्वजं। एवं तीर्थशरीरमण्डपीयूषदेहअङ्कुशकलशसू
त्रादि। जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यां ॥ १।२।५८॥ एकोऽप्यर्थो वा बहुवद्भवति। ब्राह्मणाः पूज्याः। ब्राह्मणः। पूज्यः। अस्मदो द्वयोश्च
॥ १।२।५९॥ एकत्वे द्वित्वे च विवक्षिते अस्मदो बहुवचनं वा स्यात्। वयं ब्रूमः। पक्षे अहं ब्रवीमि। आवां ब्रूव इति वा। सविशेषणस्य प्रतिषेधः। पटुरहं
ब्रवीमि। फल्गुनीप्रोष्ठपदानां च नक्षत्रे ॥ १।२।६०॥ द्वित्वे बहुत्वप्रयुक्तं कार्यं वा स्यात्। पूर्वे फल्गुन्यौ। पूर्वाः फल्गुन्यः। पूर्वे प्रोष्ठपदे। पूर्वाः प्रोष्ठप
दाः। नक्षत्रे किं। पूर्वे फल्गुन्यौ माणविके। तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यं ॥ १।२।६३॥ बहुत्वं द्वित्ववद्भवति। तिष्यश्च पुनर्व
सू च तिष्यपुनर्वसू। तिष्येति किं। विशाखानुराधाः। नक्षत्रे किं। तिष्यपुनर्वसवो माणवकाः। स नपुंसकं ॥ २।४।१७॥ समाहारे द्विगुर्द्वन्द्वश्च न
पुंसकं स्यात्। परवल्लिङ्गापवादः। पञ्चगवं। दन्तोष्ठं। अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः। पञ्चमूली। आबन्तो वा। पञ्चखट्वी। पञ्चखट्वं। अ
नो नलोपश्च वा द्विगुः स्त्रियां। पञ्चतक्षी। पञ्चतक्षं। पात्राद्यन्तस्य न। पञ्चपात्रं। त्रिभुवनं। चतुर्युगं। पुण्यसुदिनाभ्यामह्नः क्लीबतेष्टा
पुण्याहं। सुदिनाहं। पथः संख्याव्ययादेः ॥ संख्याव्ययादेः परः कृतसमासान्तः पथशब्दः क्लीबमित्यर्थः। त्रयाणां पन्थास्त्रिपथं। विरूपः प
न्थाः विपथं। कृतसमासान्तनिर्देशान्नेह। सुपन्थाः। अतिपन्थाः। सामान्ये नपुंसकं ॥ मृदु पचति। प्रातः कमनीयं ॥

पादनमिति व्याख्यानात्कलितोऽत्रातिदेश इत्याशयेनाह एकोऽप्यर्थो वा बहुवदिति। एवं च विशेषणेऽपि सिद्धमिति ध्वनयन्नुदाहरति ब्राह्मणाः पूज्या इति जात्या
ख्यायां किं। देवदत्तो यज्ञदत्तः। एकस्मिन् किं। व्रीहियवौ। अस्मदो द्वयोश्च। चादेकस्मिन्बहुवचनमन्यतरस्यामिति च वर्तते तदेतदाह एकत्वे द्वित्वे च विवक्षित इ

फल्गुनीप्रोष्ठपदानां च चकारेण द्वयोरनुकर्षणादाह। द्विलइति फल्गुन्योमाणविके इति। फल्गुनीशब्दान्नक्षत्रेण युक्तः काल इत्यण्। तस्य लुबविशेष इति लुप्। ततो जाता
र्थे फल्गुन्यषाढाभ्यां टानावितिटः टित्वान्ङीप्। न चायं गौणः यौगिकत्वात् तथा च गौणमुख्यन्यायाप्रवृत्त्या नक्षत्रग्रहणमावश्यकमिति भावः तिष्यपुनर्वस्वोः। विशाखा
नुराधा इति। विशाखा चानुराधाश्चेति विग्रहः। तिष्यपुनर्वसव इति। तिष्यपुनर्वसुशब्दाभ्यां पूर्ववन्नक्षत्रेण युक्तः काल इ [gap] त्यण्। लुबविशेष इति च लुप्। ततो जा
तार्थे संधिवेलादिसूत्रेण अण् तस्य तु श्रविष्ठाफल्गुन्यनुराधेत्यादिना लुक्। नक्षत्र इत्यनुवर्तमाने पुनर्नक्षत्रग्रहणं पर्यायाणामपि यथा स्यादित्येतदर्थमित्या
कर। एवं च सिध्यपुनर्वसू [gap] इत्यपि सिध्यतीति दिक्। बहुवचनस्य किं। इदं तिष्यपुनर्वसु। चार्थे द्वंद्व इति समाहारद्वंद्वोयं स नपुंसकं। अतं तरस्येति न्यायोत्र
ना[illegible]श्रीयते तथात्वे द्विगुसंग्रहो न स्यादित्याशयेनाह। द्विगुर्द्वंद्वश्चेति अत्र व्याचक्षते। प्रकरणादेवानुवाद्य लाभे संग्रहण[illegible]करणानुपात्तस्यापि समाहारद्वंद्वस्य
संग्रहार्थं तेन स[illegible]परिभाषमिति सिद्धमिति। पंचगवमिति। तद्धितार्थेत्यादिना समाहारे द्विगुः। दंतोष्ठमिति। द्वंद्वश्च प्राणीत्यादिना समाहारे द्वंद्वः पंचखट्वमिति। नपुंस
कह्रस्वः। पंचखट्वीति। उपसर्जनह्रस्वत्वे सत्यदंतात् द्विगोरिति स्त्रीत्वपक्षे ङीप्। आनो नलोपश्चेति। उत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणप्रतिषेधादप्राप्तो न
लोप इति भा[illegible] इहवाशब्दः स्त्रियामित्यनेन संबध्यते न तु पूर्वेणातेन नित्यो नलोप इत्याह। पंचतक्षमित्यादि। पात्राद्यंतस्येति। स्त्रीत्वमिति शेषः। आकृतिगणोयं
सुदिनाहमिति। प्रशस्तपर्यायः सुदिनशब्दः सुदिनासु समासु कार्यमेतत्प्रति चिन्वीत विशेषतः स्वयं चेत्यादिप्रयोगात्। अपथः संख्याव्यपेति। संख्याव्ययरूपाय
आदिलस्मादित्यर्थः। त्रिपथं विपथ[illegible]माता[illegible]क्पूरब्धुरित्यप्रत्ययः सुपंथा अतिपंथा इति। नपूजनादिति समासांतनिषेधः। कथं तर्हि व्यध्वो दुरध्वो विपथः। कदध्वा
कापथस्समा इत्यमर इति चेत्[illegible]दएवायमिति बहवः। मनोरमायां तु पथे गतावित्यस्मात् पचाद्यचि पथति व्याप्नोतीति व्युत्पादितः पथशब्दोस्ति तथा च त्रिकांडशेषः
वाटः पथश्च मार्गः स्यादिति[illegible]पथशब्दे न समासे पुंस्त्वमुपपन्नं नचैवं विपथसिद्धावपि कापथो न स्यात् कादेशस्य दुर्लभत्वादिति वाच्यं। ईषदर्थे चेति तत्संभवा
त्कुत्सापामर्थतः पर्यवसानादिति स्थितं। केचित्तु पथः संख्येति वार्तिकेकृतसमासांतस्यैव ग्रहणं न तु पचाद्यजंतस्येत्यत्र बीजाभावाद्विपथः कापथ इति प्रयोगे
दुरुपपाद एवेत्या[illegible] पा[illegible]म[illegible]परत्वाल्लिंगापवादत्वात्पुरुष एवेदं प्रवर्तते नान्यत्र विपथा नगरी बहुव्रीहिरयं पंथानमतिक्रांता अतिपथा इहापि न द्विगु

प्रासेन्स्यादिनापरवल्लिंग[illegible]र्थेघञादिति। सामान्येनपुंसकमिति। अनियतलिंगविषयकमिदं तेनाव्ययवतिप्रातरादिरितिपुंस्त्वमेव। मृदुपचतीति। क्रियाविशेषणत्वाद्द्वितीयांतं। धातूक्ता नभावनां प्रति हि फलांशः कर्मीभूतः। तथाचफलसामानाधिकरण्येद्वितीया। अतएवसकृल्ल्वा विन्यादौ कारकपूर्वकत्वाद्घञ्। यत्रतुभावनां प्रति

तत्पुरुषोऽनञ्कर्मधारयः। २।४।१९॥ अधिकारोऽयं। संज्ञायां कन्थोशीनरेषु। २।४।२०॥ कन्थान्तस्तत्पुरुषः क्लीबं स्यात्साचेदुशीनरदेशोत्पन्नायाः कन्थायाः संज्ञा। सुशमस्यापत्यानि सौशमयः। तेषां कन्था सौशमिकन्थं। संज्ञायां किं। वीरणकन्था। उशीनरेषु किं। दाक्षिकन्था। उपज्ञोपक्रमं तदाद्याचिख्यासायां। २।४।२१॥ उपज्ञान्त उपक्रमान्तश्च तत्पुरुषो नपुंसकं स्यात् तयोरुपज्ञायमानोपक्रम्यमाणयोरादिः प्राथम्यं चेदाख्यातुमिष्यते। पाणिनेरुपज्ञा। पाणिन्युपज्ञं ग्रन्थः। नन्दोपक्रमं द्रोणः। छाया बाहुल्ये। २।४।२२॥ छायान्तस्तत्पुरुषो नपुंसकं स्यात्पूर्वपदार्थबाहुल्ये। इक्षूणां छाया इक्षुच्छायं। विभाषासेनेति विकल्पस्यायमपवादः। इक्षुच्छायानिषादिन्य इति तु आसमन्तान्निषादिन्य इत्याङ्प्रश्लेषो बोध्यः। सभा राजाऽमनुष्यपूर्वा। २।४।२३॥ राजपर्यायपूर्वोऽमनुष्यपूर्वश्च सभान्तस्तत्पुरुषो नपुंसकं स्यात्। इनसभं। ईश्वरसभं। पर्यायस्यैवेष्यते। नेह। राजसभा। चन्द्रगुप्तसभा। अमनुष्यशब्दो रूढ्या रक्षःपिशाचादीनाह। रक्षःसभं। पिशाचसभं। अशाला च। २।४।२४॥ संघातार्था या सभा तदन्तस्तत्पुरुषः क्लीबं। स्त्रीसभं। स्त्रीसङ्घात इत्यर्थः। अशाला किं। धर्मसभा। धर्मशालेत्यर्थः॥ विभाषा सेनासुराच्छायाशालानिशानां। २।४।२५॥ एतदन्तस्तत्पुरुषः क्लीबं वा स्यात्। ब्राह्मणसेनं। ब्राह्मणसेना। यवसुरं। यवसुरा। कुड्यच्छायं। कुड्यच्छाया। गोशालं। गोशाला। श्वनिशं। श्वनिशा। तत्पुरुषो नञ्कर्मधारय इत्यनुवृत्तेर्नेह। दृढसेनो राजा। असेना। परमसेना॥ इति तत्पुरुषः॥

यांतनैवज्योतिष्टोमेनयजेतेतियथा। एतच्चकरणेयज इतिसूत्रे द्विपदमंजर्यां स्पष्टं॥ ९ करणतयाधात्वर्थविशेषोन्वेतितत्रतद्विशेषणानांतृती
तो॥ नञ्समासकर्मधारयभिन्नस्तत्पुरुषोवक्ष्यमाणकार्यभाग्भवतीतिसूत्रार्थः। उपज्ञायत इत्युपज्ञा आतश्चोपसर्गे इतिकर्मण्यङ् उपक्रम्यत इत्युपक्रमः। कर्मणि घञ्। नोदात्तोपदेशस्येतिवृद्धिप्रतिषेधः। उपज्ञा च उपक्रमश्चेतिसमाहारद्वंद्वः

सत्यानुवर्त्तमानस्य तत्पुरुषस्य विशेषणं। तत्त्वेन उपज्ञोपक्रमौ परामृश्येते तदेतत्सकलमभिप्रेत्याह उपज्ञांतरित्यादि। आख्यातुमिच्छा आचिख्यासेतीच्छासना इहवि
वक्षैव शब्दप्रवृत्तौ नियामिका न तु वस्तुस्थितिरिति ज्ञाप्यते। तेन त्वदुपक्रमं सौजन्यमित्याद्यपि सिध्यति। पाणिनेरिति। कर्त्तरि षष्ठी नंदस्योपक्र
ममिति विग्रहः। छायांबाहुल्ये। बाहुल्ये सति या छाया तद्वाचीयश्छायांतस्तत्पुरुष इत्यर्थः। इह कस्य बाहुल्यमित्यपेक्षायामावरकद्रव्यनिमित्तत्वाच्छायाया लक्ष्यबाहुल्यमि
गम्यते तच्चावारकं पूर्वपदार्थभूतमेवेत्याशयेनाह पूर्वपदार्थबाहुल्य इति। बाहुल्ये किं। कुड्यस्य छाया कुड्यच्छाया। प्रश्लेषो बोध्य इति। केचित्तु इक्षुच्छाय निषादित्स्व
इत्येवं पठंति। सभा। इनसभमित्यादि। इनशब्दो राजपर्यायः ईश्वरशब्दश्च। ननु स्वं रूपमिति वचनाद्राजशब्दस्यैव ग्रहणं युक्तं न पर्यायस्येत्यत आह पर्यायस्यैवे
ष्यत इति। एवकारेण स्वरूपस्याविशेषाणां च निरासः। कथं तर्हि नृपतिसभामगमन्नवेपमान इति कीचकवधे। अत्र केचित् ना पतिर्यस्यां सभायामिति बहुव्रीहौ
कृते पश्चात्कर्मधारयः। अनन्त्यकर्मधारय इत्युक्तेर्न क्लीबत्वमित्याहुः। रक्षितस्त्वाह। गजपतिवन्नृपतिरपि राजविशेषणे नात्र नानुपपत्तिरिति। अशाला च।
शालावाची संघातवाची च सभाशब्दस्तत्र राजामनुष्यपूर्वत्वे शालावाचिनः क्लीबत्वमुक्तमनेन तु संघातवाचिनो विधीयत इत्याह संघातार्थेति। विभाषासे
ना। प्रथमार्थे षष्ठीति सेनादिभिस्तत्पुरुषो विशेष्यते। विशेषणेन तदंतविधिरित्याह। एतदंत इति। श्वनिशमिति। कृष्णचतुर्दशी तस्यां किल के चित् श्वान
उपवसंति। एतच्च शाबरभाष्ये वेदांगाधिकरणे स्पष्टं। ननु तत्पुरुष इत्याद्यधिकारसूत्रस्यात्रैव प्रयोजनं न तु संज्ञायां कंथोशीनरेष्वित्यादिषु पंचसूत्र्यामतत्पुरु
षस्य नञ्समासस्य कर्मधारयस्य च नत्वासंभवादित्याक्षेपे स्थितं तथैव प्रत्युदाहरति दृढसेन इत्यादि। ननु बहुव्रीहौ विशेष्यनिघ्नत्वाल्लिंगस्यैवेति किमनेन तत्पुरु
षग्रहणेनामैवं न्यायापेक्षया वचनस्य बलीयस्त्वात्। किंचासति तद्ग्रहणे दृढसेनं पुंसकत्वं स्यात्परवल्लिंगापवादत्वादस्य प्रकरणस्येति दिक्। इति तत्पुरुषः॥

शेषो बहुव्रीहिः। [illegible] योगे कर्मणि ष[illegible]। अत्र वृत्तिकृता यत्रान्यः समासो नोक्तः स शेष इत्याह। एवं द्वन्द्वानां यस्मिन्नर्थेऽव्ययीभावादिसंज्ञकः समासो न विहितः स शेष इत्यर्थः। इति हरदत्तो व्याख्यत्। तच्च प्राक्कडारात्परं कार्यमिति पादाभिप्रायेण बोध्यम्। अस्मिंस्तु पक्षे शेषग्रहणाभावे उन्मत्तगङ्गमित्यत्र परत्वा
द्बहुव्रीहिः स्यान्निरवकाशत्वाच्चाव्ययीभावस्तु उन्मत्तगङ्गमित्याद्यनिष्टं प्रसज्येत आकडारादेकेति पक्षमभ्युपगम्य पक्षे त्वेकसंज्ञाधिकारे लौ बोन्मत्तगङ्गमि
त्यादिसिद्धेः शेषग्रहणं व्यर्थं निरवकाशत्वात् अव्ययीभावसंज्ञया बहुव्रीहिसंज्ञाया बाधात् तत्रापि प्रयोजनमाह। द्वितीयाश्रितेत्यादिनेति। शेषाधिकारस्य ब
हुव्रीहेरवशेषाद्विभाषेति कप्रत्ययान्यस्माद्बहुव्रीहेरित्यन्तन्याभार्थमपि शेषग्रहणमावश्यकमिति बोध्यम्। यस्य त्रिकस्येति। यद्यपि प्राग्योगता यद्यर्थप्र

शेषो बहुव्रीहिः। २।२।२३॥ अधिकारोऽयं प्राग्द्वन्द्वात्। द्वितीयाश्रितेत्यादिना यस्य त्रिकस्य विशिष्य समासो नोक्तः स शेषः प्रथमान्तमित्यर्थः॥ अनेक
मन्यपदार्थे। २।२।२४॥ अनेकं प्रथमान्तमन्यपदार्थे वर्तमानं वा समस्यते स बहुव्रीहिः। अप्रथमाविभक्त्यर्थे बहुव्रीहिरिति समानाधिकर
णानामिति च फलितम्॥ प्राप्तमुदकं यं ग्रामं॥ प्राप्तोदको ग्रामः। ऊढरथोऽनड्वान्। उपहृतपशू रुद्रः। उद्धृतौदना स्थाली। पीताम्बरो हरिः। वी
रपुरुषो ग्रामः। प्रथमार्थे तु न। वृष्टे देवे गतः॥ व्यधिकरणानामपि न॥ पञ्चभिर्भुक्तमस्य॥ प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः॥
प्रपतितपर्णः। प्रपर्णः॥ नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः॥ अविद्यमानः पुत्रः। अपुत्रः। अस्तीति विभक्तिप्रतिरूपकमव्ययम्। अ

प्रथमयेत्युक्तं तथापि द्वितीयाश्रितादिभिरिति वत्प्रथमाके नचित्सह समस्यत इति नोक्तमित्यर्थः। वार्तिककृता प्रथमयेत्युक्तावपि सूत्रकृता नोक्तमिति वा। प्रथमां
तमिति। कण्ठेकाल इत्यादि बहुव्रीहिज्ञापकसाध्य इति भावः। अन्यस्य पदस्यार्थ इति। समस्यमानपदातिरिक्तस्य पदस्यार्थे इत्यर्थः। पदेन हि प्रकृत्यर्थोपस
र्जनकः कर्मकर्त्रादिरभिधीयते प्रथमान्तेन तु प्रातिपदिकार्थमात्रं। यद्यपि त्रिकपक्षे संख्याप्यन्यपदार्थस्तथापि तस्याः प्रकृत्यर्थे प्रतिविशेषणत्वान्न प्रकृत्य
र्थोपसर्जनकः प्रत्ययार्थः प्रथमान्तस्यास्तीत्येवं न द्वितीयान्तार्थ इति फलितं। तदाह। अप्रथमाविभक्त्यर्थे इति समानेति। एतच्च शेषग्रहणलभ्यं अनेकं
किं बहूनामपि यथा स्यादेतच्च मूलेऽस्फुटीभविष्यति अनिश्चितौ केवलग्रहणं ज्ञापकीकृत्यानेकग्रहणमिह सुत्यजमित्याहुः। अन्यग्रहणं किं। बहुव्री

हितत्पुरुषयोर्विषयविभागोव्यवस्थाविज्ञायेत स्वपदार्थे हि सावकाशं तत्पुरुषं परत्वादन्यपदार्थे बहुव्रीहिर्बाधते असति त्वन्यग्रहणे कंठेकाल इत्यादावेव्याधिकरणपदे बहूनां
समुदाये च सावकाशं बहुव्रीहिं स्वपदार्थ इवान्यपदार्थेपि नीलोत्पलं सर इत्यादौ समानाधिकरणे तत्पुरुषो बाधेत परग्रहणं किं वा कार्थे माभूत् प्राहवनीनरी इह मास्त्वासीदि
त्विवकार्थो गम्यते अर्थग्रहणं किं यावता पदे पदान्तरस्य वृत्त्यसंभवादेव पदार्थे भविष्यति अत्राहुः प्रकृत्यर्थविशिष्टप्रत्ययार्थाभिधानं यथा स्यादन्यथा प्राधान्यात्प्रत्ययार्थ-
मात्रं गृह्येत इष्टापत्तौ तु चित्रगुरित्येतत् षष्ठ्यर्थसंबंधमात्रपरं स्यात् तथा च देवदत्तादिस्सामानाधिकरण्यं न स्यादिति अत्रेदमवधेयं सुपेत्येतन्नानुवर्त्तते तेनात्रानेकं प्रथ-
मांतमिति समस्यत इति पर्यवसन्नोर्थः एवं च त्रिपदबहुव्रीहिरबाध एव येतु सुप्सुपेत्यनुवर्त्य अनेकं सुबंतं सुपा सहेति व्याचक्षते तेषां तु त्रिपदबहुव्रीहिर्दुर्लभ एवेति द्विती-
यादिविभक्त्यर्थं क्रमेणोदाहरति प्राप्तेत्यादि ग्रामकर्मकप्राप्तिकर्त्तृउदकं विग्रहार्थः उदककर्तृकप्राप्तिकर्मेति समासार्थः विग्रहवाक्यस्य इति प्रयोगे तु तस्यापि यमेवा-
र्थः अनडुत्कर्तृकोढहनकर्मीभूतो रथः रथकर्मकोढहनकर्त्ता तु समासार्थः रुद्रसंप्रदानकोपहरणकर्म पशुः पशुकर्मकोपहरणसंप्रदानं तु समासार्थः स्थाल्यवधिको-
द्धरणकर्म ओदनः ओदनकर्मकोद्धरणावधिः स्थाली समासार्थ इत्यादि इह कर्मादीनां समासेनाभिहितत्वात्प्रथमा ननु वाक्ये धात्वर्थं प्रति कर्तृप्रत्ययार्थस्य कर्तुः कर्मणो
वा विशेष्यत्वात् ऊढानावपि तथैवोचितेति प्राप्तोदकोढरथादौ उदककर्तृकप्राप्तीत्यादिवर्णनं तु युज्यते इति चेदुच्यते एकार्थीभावादिभिर्वृत्तौ विशिष्टार्थविषयकशा-
क्तेरन्तरमेव स्वीक्रियते न त्ववयवशक्तिः इति नानुपपत्तिः व्यपेक्षावादिभिस्त्वगत्या भिन्नैव व्युत्पत्तिः स्वीकार्या किंच कर्तृविशिष्टप्राप्तेः पदार्थत्वे तस्येनामार्थत्वादुदक-
स्येतरमेदो वाच्यः स च बाधितः नहि कर्तृविशिष्टा प्राप्तिरुदकमिति संभवति अत एव बहूनां वृत्तिधर्माणां वचनैरेव साधने स्यान्महत् गौरवमित्यादिना समर्थसूत्रे एकार्थी-
भावपक्ष एव प्रबल इत्यवोचाम प्रथमार्थे तु नेति शेषपदेन वा अन्यपदार्थ इत्यनेन वा अतिप्रसंगवारणाद् प्रथमाविभक्त्यर्थ इति वचनं न कर्त्तव्यमिति भावः यत्रा-
न्यसमासेनोक्तः स शेष इति वृत्तिकारादीनां मते तु प्रथमांतानामेव बहुव्रीहिरित्यलाभात्कर्त्तव्यमेवेदं वचनमिति बोध्यं प्रादिभ्य इति प्रादिभ्यः परं यद्धातुजं तदंतस्य पदांतरेण
बहुव्रीहिर्व्याख्येय इति सूत्रसिद्धानुवादः वा चेति ॥

इत्यंतु वाचनिकं पूर्वपदांतर्गतेनोत्तरपदस्थधातुजस्य लोपो वाच्य इत्यर्थः एतच्च प्रादीनामेव वृत्तौ विशिष्टार्थवृत्तिनामाश्रित्य सूत्यजं नञोऽस्त्यर्थानामिति नञः परेषामस्त्यर्थ
वाचिनां पदांतरेण बहुव्रीहिर्व्याख्येयः अस्त्यर्थवाचिनां तु वा लोप इत्यर्थः अस्त्यर्थानां किं अनुपनीतपुत्रकः नञः किं विद्यमानपुत्रः मन्त्रिहस्तुपेत्यनुवृत्तावपि सुविज्ञेयेतद

स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु। ६।३।३४॥ भाषितपुंस्कादनूङ् ऊङभावोऽस्यामिति बहुव्रीहिर्निपातनात
त्पञ्चम्या अलुक् षष्ठ्याश्च लुक्। तुल्ये प्रवृत्तिनिमित्ते यदुक्तपुंस्कं तस्मात्पर ऊङोऽभावो यत्र तथाभूतस्य स्त्रीवाचकस्य शब्दस्य पुंवाचकस्येव रूपं स्या
त्समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे न तु पूरण्यां प्रियादौ च परतः। गोस्त्रियोरिति ह्रस्वः। चित्रा गावो यस्येति लौकिकविग्रहे। चित्रा अस् गो अस् इ
त्यलौकिकविग्रहे। चित्रगुः रूपवद्भार्यः। चित्रा जरती गौर्यस्येति विग्रहे। अनेकोक्तेर्बहूनामपि बहुव्रीहिः। अत्र केचित्। चित्राजरतीगुः। जरती
चित्रागुर्वा। एवन्दीर्घतन्वीजङ्घः। तन्वीदीर्घजङ्घः। त्रिपदे बहुव्रीहौ प्रथमं न पुंवत्। उत्तरपदस्य मध्यमेन व्यवधानात्। द्वितीयमपि न पुंवत्
पूर्वपदत्वाऽभावात्। उत्तरपदशब्दो हि समासस्य चरमावयवे रूढः। पूर्वपदशब्दस्तु प्रथमावयव इति वदन्ति। वस्तुतस्तु नेह पूर्वपदमाक्षिप्यते। आन
ङ् ऋत इत्यत्र यथा। तेनोपान्तस्यापि पुंवदेव। चित्राजरद्गुरित्यादि। अत एव चित्राजरत्यो गावो यस्येति द्वंद्वगर्भेऽपि चित्राजरद्गुरिति भाष्यं। कर्मधारयपूर्व
पदे तु द्वयोरपि पुंवत्। जरच्चित्रगुः। कर्मधारयोत्तरपदे तु चित्रजरद्गवीकः। स्त्रियाः किं। ग्रामणि कुलं तत्र दृष्टिरस्य। ग्रामणिदृष्टिः। भाषितपुंस्कात्किं।
गङ्गाभार्यः। अनूङ् किं। वामोरूभार्यः। समानाधिकरणे किं। कल्याण्या माता। कल्याणीमाता। स्त्रियां किं। कल्याणी प्रधानं यस्य स कल्याणीप्रधानः। पूर
ण्यां तु। अप्पूरणीप्रमाण्योः। ५।४।११६॥ पूरणार्थप्रत्ययान्तं यत्स्त्रीलिङ्गं तदन्तात्प्रमाण्यन्ताच्च बहुव्रीहेरप्स्यात्। कल्याणीपञ्चमी यासां
रात्रीणां ताः कल्याणीपञ्चमा रात्रयः। स्त्री प्रमाणी यस्य स्त्रीप्रमाणः। पुंवद्भावप्रतिषेधोऽप्प्रत्ययश्च प्रधानपूरण्यामेव। रात्रिः पूरणी वाच्या चेत्युक्तौ

नुवर्त्तते तथा चास्तिक्षीरेति प्रयोगो दुर्लभ इत्याशंक्य तं साधयति विभक्तिप्रतिरूपकमिति॥ ॥ स्त्रियाः पुंवत् निपातनादिति एतच्च पूर्वत्रापि योज्यं॥

हि तत्पुरुषयोर्विषयविभागो यथा विज्ञायेत स्वपदार्थे हि सावकाशं तत्पुरुषं परत्वादन्यपदार्थे बहुव्रीहिर्बाधते असति त्वन्यग्रहणे कंठेकाल इत्यादौ व्यधिकरणपदे बहूनां
समुदाये च सावकाशं बहुव्रीहिं स्वपदार्थ इवान्यपदार्थेपि नीलोत्पलं सर इत्यादौ समानाधिकरणे तत्पुरुषो बाधेत परग्रहणं किं वा कार्यं मा भूत् ग्राहवती नदी इह मा स्यासीरि
त्यत्र कार्यो गम्यते अर्थग्रहणं किं यावता परे पदान्तरस्य त्वसंभवादेव पदार्थे भविष्यति अत्राहुः प्रकृत्यर्थविशिष्टप्रत्ययार्थाभिधानं यथा स्यादन्यथा प्राधान्यात्प्रत्ययार्थ-
मात्रं गृह्येत इष्टापत्तौ तु चित्रगुरित्येतत् षष्ठ्यर्थसंबंधमात्रपरं स्यात् तथा च रेवत्यादिस्सामानाधिकरण्यं न स्यादिति अत्रेदमवधेयं सुपेत्येतन्नानुवर्त्तते तेनात्रानेकं प्रथ-
मान्तं [illegible] समस्यत इति पर्यवसन्नोर्थः एवं च द्विपदबहुव्रीहिरबाध एव येतु सुप्सुपेत्यनुवर्त्य अनेकं सुबंतं सुपा सहेति व्याचक्षते तेषां तु द्विपदबहुव्रीहिर्दुर्लभ एवेति द्विती-
यादिविभक्त्यर्थक्रमेणोदाहरति प्राप्तमित्यादि ग्रामकर्मक प्राप्तिकर्तृ उदकं विग्रहार्थः उदककर्तृकप्राप्तिकर्मेति समासार्थः विग्रहवाक्ये सत्ति प्रयोगे तु तस्याप्ययमेवा-
र्थः अनड्वान् कर्तृको वहनकर्मीभूतो रथः रथकर्मको वहनकर्त्ता तु समासार्थः रुद्रसंप्रदानकोपहरणकर्म पशुः पशुकर्मकोपहरणसंप्रदानं तु समासार्थः स्थाल्यवधिको-
द्धरणकर्म ओदनः ओदनकर्मकोद्धरणावधिः स्थाली समासार्थ इत्यादि इह कर्मादीनां समासेनाभिहितत्वात्प्रथमा ननु वाक्ये धात्वर्थं प्रति प्रत्ययार्थस्य कर्तुः कर्मणो
वा विशेष्यत्वाद्वृत्तावपि तथैवोचितेति प्राप्तोदकोढरथादौ उदककर्तृकप्राप्तीत्यादि वर्णनं तु युज्यते इति चेदुच्यते एकार्थीभावादिभिर्वृत्तौ विशिष्टार्थविषयकशा-
क्त्यन्तरमेव स्वीक्रियते नत्ववयवशक्तिः इति नानुपपत्तिः व्यपेक्षावादिभिस्त्वगत्याभिन्नैव व्युत्पत्तिः स्वीकार्या किं च कर्तृविशिष्टप्राप्तेः पदार्थत्वे तस्यैनामार्थत्वादुदक-
स्यत इमे दोषाश्च स्पष्टं च बाधितः नहि कर्तृविशिष्टा प्राप्तिरुदकमिति संभवति अत एव बहूनां वृत्तिधर्माणां वचनैरेव साधने स्यान्महद्गौरवमित्यादिना समर्थसूत्रे एकार्थी-
भावपक्ष एव प्रबल इत्यवोचाम प्रथमार्थे तु नेति शेषपदेन वा अन्यपदार्थ इत्यनेन वा अतिप्रसंगवारणाद प्रथमाविभक्त्यर्थ इति वचनं न कर्त्तव्यमिति भावः यत्रा-
न्यसमासो नोक्तः स शेष इति वृत्तिकारादीनां मते तु प्रथमान्तानामेव बहुव्रीहिरित्यलाभात्कर्तव्यमेवेदं वचनमिति बोध्यं प्रादिभ्य इति प्रादिभ्यः परं यद्धातुजं तदंतं स्यपदान्तरेण
बहुव्रीहिर्व्याख्येय इति सूत्रसिद्धानुवादः वावेति ॥

इदं तु वाचनिकं पूर्वपदांतर्गतस्योत्तरपदस्य धातुजस्य लोपो वाच्य इत्यर्थः एतच्च प्रादीनामेव वृत्तौ विशिष्टार्थवृत्तिनामाश्रित्य सुत्यजं नञोऽस्त्यर्थानामिति नञः परेषामस्त्यर्थ
वाचिनां पदांतरेण बहुव्रीहिर्वा वाच्य इत्यर्थः अस्त्यर्थवाचिनां तु वा लोप इत्यर्थः अस्त्यर्थानां किं अनुपनीतपुत्रकः नञः किं निर्विद्यमानपुत्रः नन्विह सुपेत्यनुवृत्तावपि सुपित्येतद

स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु। ६।३।३४॥ भाषितपुंस्कादनूङ् ऊङभावोऽस्यामिति बहुव्रीहिर्निपातना
त्पञ्चम्या अलुक् षष्ठ्याश्च लुक्। तुल्ये प्रवृत्तिनिमित्ते यदुक्तपुंस्कं तस्मात्पर ऊङभावो यत्र तथाभूतस्य स्त्रीवाचकस्य शब्दस्य पुंवाचकस्येव रूपं स्या
त्समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे न तु पूरण्यां प्रियादौ च परतः। गोस्त्रियोरिति ह्रस्वः। चित्रा गावो यस्येति लौकिकविग्रहे। चित्रा अस् गो अस् इ
त्यलौकिकविग्रहे। चित्रगुः। रूपवद्भार्यः। चित्रा जरती गौर्यस्येति विग्रहे। अनेकोक्तेर्बहूनामपि बहुव्रीहिः। अत्र केचित्। चित्राजरतीगुः। जरती।
चित्रा गुर्वी। एवं दीर्घा तन्वी जङ्घा। तन्वीदीर्घजङ्घः। त्रिपदे बहुव्रीहौ प्रथमस्य न पुंवत्। उत्तरपदस्य मध्यमेन व्यवधानात्। द्वितीयमपि न पुंवत्
पूर्वपदत्वाऽभावात्। उत्तरपदं ह्यो हि समासस्य चरमावयवे रूढः। पूर्वपदशब्दस्तु प्रथमावयव इति वदन्ति। वस्तुतस्तु नेह पूर्वपदमाक्षिप्यते। आन
ङ् ऋत इत्यत्र यथा। तेनोपात्तस्य पुंवद्वा चित्राजरद्गुरित्यादि। अत एव चित्रा जरत्यो गावो यस्येति द्वंद्वगर्भेऽपि चित्राजरद्गुरिति भाष्यं। कर्मधारयपूर्व
पदे तु द्वयोरपि पुंवत्। जरच्चित्रगुः। कर्मधारयोत्तरपदे तु चित्रजरद्गवीकः। स्त्रियाः किं। ग्रामणि कुलं तत्र दृष्टिरस्य। ग्रामणिदृष्टिः। भाषितपुंस्कात्किं
गङ्गाभार्यः। अनूङ् किं। वामोरूभार्यः। समानाधिकरणे किं। कल्याण्या माता। कल्याणीमाता। स्त्रियां किं। कल्याणी प्रधानं यस्य स कल्याणीप्रधानः। पूर
ण्यां तु। अप्पूरणीप्रमाण्योः। ५।४।११६॥ पूरणार्थप्रत्ययान्तं यत्स्त्रीलिङ्गं तदन्तात्प्रमाण्यन्ताच्च बहुव्रीहेरप्स्यात्। कल्याणी पञ्चमी यासां
रात्रीणां ताः कल्याणीपञ्चमा रात्रयः। स्त्री प्रमाणी यस्य स्त्रीप्रमाणः। पुंवद्भावप्रतिषेधोऽप्प्रत्ययश्च प्रधानपूरण्यामेव। रात्रिः पूरणीवाच्या चेत्यनुक्तो

तु वर्तते तथा चास्तिक्षीरेति प्रयोगो दुर्लभ इत्याशंक्यतं साधयन्ते विभक्तिप्रतिरूपकमिति॥ ॰ ॥ स्त्रियाः पुंवत् निपातनादिति एतच्च पूर्वत्रापि योज्यं॥

मन्यथान्यधिकरणेनांबहुव्रीहिःस्वरसत्तोनसिध्येत्॥ लुगिति। अनूङिति प्रथमांतं। षष्ठ्यर्थेप्रथमेतिहरदत्तः। एवंचसूत्रेकेषांचिदनूङः समानाधिकरणइतिषष्ठ्यं
तपाठोऽसांप्रदायिकइतिभावः। तुल्येइत्यादि। भाषितःपुमान्यस्मिन्नित्यादिव्याख्यानादयमर्थोलभ्यतेइतितृतीयादिषुभाषितपुंस्कमित्यत्रोपपादितं। यद्यत्र।
भाषितःपुमान्येनतद्भाषितपुंस्कमित्युच्येततर्हिकुटीभार्यः द्रोणीभार्यइत्यादावतिप्रसंगःस्याद्भवतिहिकुटशब्दोघटेपुल्लिंगोगेहेतुस्त्रीलिंगः। द्रोणशब्दस्तुपरि
माणविशेषेपुल्लिंगोगवादन्यांतुस्त्रीलिंगइति। ऊङभावोपत्रेति। यदितुऊङन्योनूङितिपर्युदासःस्यात्तर्हियंवाघतमेवगृह्णीतततःकिमितिचेत्दरदोपत्यंदारदः
द्युञ्मगधेत्यण्तस्यास्त्रियामतश्चेतिलुक्दरद्साचासौवृंदारिकाचदारदवृंदारिकेत्यादिनसिध्येत्। नत्वत्रदर्शनीयाभार्यायस्यदर्शनीयभार्यइत्यादावि
वस्त्रीप्रत्ययःकश्चिदस्तीतिभावः। नन्वनकोपधायाऊङश्चेत्येवसूत्र्यतामितिचेन्न। बाधकबाधनार्थेनपुंवत्कर्मधारयइत्यनेनवामोरूभार्येतिकर्मधारयेपुं
वद्भावापत्तेः। पृथक्प्रतिषेधसामर्थ्यात्सिद्धांतेतुनदोषः। स्त्रियाइत्यस्यस्त्रीप्रत्ययपरतांवारयतिस्त्रीवाचकस्येति। स्त्रीप्रत्ययस्यपुंवद्भावइत्युक्तेतुस्त्रीप्रत्ययलोपइ
त्येवार्थःपर्यवस्यतीतिदारदवृंदारिकेतिनसिध्येत्। किंचपटुभार्यइत्यत्रउत्तरपदनिमित्तत्वान्ङीषोनिवृत्तेःस्वःपरस्मिन्नितिस्थानिवद्भावापद्येत। अपि
चावतंडस्यापत्यंस्त्रीवतंडीवतंडाच्चेतियञ्। लुक्स्त्रियामितितस्यलुक्। शार्ङ्गरवादित्वान्ङीन्वतंडीचासौवृंदारिकाचवातंड्य वृंदारिका। अत्रपुंवद्भावेनङी
न्निवृत्तावपिअर्थगतस्यस्त्रीत्वस्यानिवृत्तत्वाल्लुक्स्त्रियामितियञोलुक्प्रसज्येतेतिभावः। ह्रस्वइति। अनेकमितिप्रथमानिर्दिष्टत्वात्। प्रथमानिर्दिष्टमित्येकवि
भक्तिचेतिवाशब्दस्योपसर्जनत्वादितिभावः। चित्रा अस्येति। अंतरंगानपीतिन्यायादिहपूर्वसवर्णदीर्घोनप्रवर्त्ततेअन्यथाएकादेशस्यपरादित्वेनसुपोलुकि
चित्रगुरित्यत्रअकारोनलभ्येतेतिभावः। नेहेति। अत्रैवसूत्रेपद्वीमृद्वीभार्याअस्येतिद्वंद्वगर्भबहुव्रीहौपद्वीमृदुभार्यइतिभाष्योदाहरणादितिभावः॥ आनङिति।
तथाचसमर्थसूत्रेभाष्येहोतृपोतनेष्टोद्गातारइत्यत्रचतुर्णांद्वंद्वेतृतीयस्यानङुदात्ततः। पूर्वपदाक्षेपेतुसन्नसिध्येत्नत्वत्रनेष्टापूर्वपदंहोतुरेवपूर्वपदत्वादि
तिभावः। अतएवेति। पूर्वपदानाक्षेपादेवेत्यर्थः। चित्राजरदिति। द्वंद्वांतर्गतजरच्छब्दस्योत्तरपदत्वेपिसामानाधिकरण्याभावान्नटापोनिवृत्तिः। नचैवमपिद्वंद्वात्म
कस्यपूर्वपदस्यसमानाधिकरणोत्तरपदपरत्वात्पुंवद्भावेटापोनिवृत्तिर्दुर्वारेतिवाच्यं। द्वंद्वांतर्गतचित्राजरच्छब्दयोःस्त्रीप्रत्ययप्रकृत्योःप्रत्येकंभाषितपुंस्कत्वेपिद्वं

द्वात्मके स्य पूर्वपदस्यात स्यात्वात् ... योरपीति। पूर्वपदांतर्गतमुत्तरपदमाश्रित्य प्रथमस्यापि पुंवद्भाव इति भावः। जरच्चित्रेति। पूर्वकाले केति समासः। लिंगविशिष्ट
परिभाषया जरद्ग्रहणेन जरतीशब्दस्यापि ग्रहणात्। चित्रजरद्गवीक इति। जरती चासौ गौश्च जरद्गवी गोरतद्धितेति टचि टित्वान्ङीप्। चित्रा जरद्गवी यस्येति बहुव्री
हौ नद्यृतश्चेति वक्ष्यमाणः कप्। वामोरूभार्य इति। संहितशफलक्षणवामादेश्चेत्यूङ् अप्रधानमिति। भावे ल्युडंतं नित्यनपुंसकं। पंचमीति। तस्य पूरण इति डट् नांतादसंख्यादेरिति
डटो मडागमः टिड्ढेति ङीप्। प्रमाणीति। करणे ल्युट् तदंतस्य विशेष्यनिघ्नत्वात् स्त्रियां ङीप्। कथं तर्हि प्रमाणयां स्मृतावित्यत्र वरभाष्यमिति चेत्। अत्र भट्टाः प्रमाणमय

नद्यृतश्च ५।४।१५३। नद्युत्तरपदाद् ऋदन्तोत्तरपदाच्च बहुव्रीहेः कप् स्यात् पुंवद्भावः। केऽणः ७।४।१३। के परेऽणो ह्रस्वः स्यात्। इति प्राप्ते। न कपि ७।४।१४
कपि परे ह्रस्वो न स्यात्। कल्याणपञ्चमीकः पक्षः। अत्र तिरोहितावयवभेदस्य पक्षस्यान्यपदार्थतया रात्रिरप्रधानं। बहुकर्तृकः। अप्रियादिषु किं।
कल्याणीप्रियः। प्रिया। मनोज्ञा। कल्याणी। सुभगा। दुर्भगा। भक्तिः। सचिवा। स्वसा। कान्ता। क्षान्ता। समा। चपला। दुहिता। वामा। अबला। तनया। सामा
न्येन पुंसकं। दृढभक्तिर्यस्य स दृढभक्तिः। स्त्रीत्वविवक्षायां तु दृढाभक्तिः। तसिलादिष्वाकृत्वसुचः। ६।३।३५। तसिलादिषु कृत्वसुजन्तेषु परे
षु स्त्रियाः पुंवत्स्यात्। परिगणनं कर्तव्यं। अव्याप्त्यतिव्याप्तिपरिहाराय। त्रतसौ। तरप्तमपौ। चरट्जातीयरौ। कल्पदेशीयरौ। रूपप्पाशपौ। थाल्।
तिल्थ्यनौ। बह्वीषु बहुत्र। बहुतः। दर्शनीयतरा। दर्शनीयतमा। घरूपेति वक्ष्यमाणो ह्रस्वः परत्वात्पुंवद्भावं बाधते। पट्वितरा। पट्वितमा। पटुच
री। पटुजातीया। दर्शनीयकल्पा। दर्शनीयदेशीया। दर्शनीयरूपा। दर्शनीयपाशा॥ ॥ ९

तेयानिमूलभूतां श्रुतिं पतः क्विवं नाद्यते तस्मात्प्रमाणप्र
स्मृतिरुच्यत इत्याहुः। तत्रापत्ते क्विपि ह्रस्वस्यापि तिङ्गतीनितु किया ... दुर्लभः तथाप्यागमशास्त्रस्यानित्यत्वात्तु ङेति बोध्यं। क्विविवाचरतिक्विप् विजित्यर्थ इति वा व्याख्येयं
अन्ये तु प्रमाणे वेदलक्षणा नरती त्याचारक्विवंता प्रमाणशब्दात् च ... चिदाविल्याहुः। प्रधानपूरण्यामेवेति। प्रधाने कार्यसंप्रत्ययान्न्यायसिद्धमिदं॥ ॥ नद्यृतश्च। तपरत्वं स्प
ष्टार्थं। नद्युत्तरपदादिति। नद्यंतादिति नोक्तं कप्प्रत्ययेन सह समासे ऽन्तवहुव्रीहेर नद्यंतत्वात् उत्तरपदं तु नद्यंतं भवत्येव समासेऽन्तः समासांत इति पक्षाश्रयणादिति बो
ध्यं। दृढमिति। अदार्ढ्यनिवृत्तिमात्रपर त्वेनात्र दृढशब्दप्रयोगान्न लिंगविशेषविवक्षेति भावः

नसिलादि॰ कृत्वसुज्झर्थ ते थुति लभ्यन्त पाठाभावात् एद्वीरस्याशुभारूप्य इत्यत्राति व्याप्तिः २॥

लिंगविशेषविवक्षायांतु इदठाभक्तिरित्यादिसिद्धये प्रियादिषु भक्ति शब्द पाठः। नसिलादिषु कृत्वसुजं ते धितिपंचम्यास्तसिलित्यारभ्य संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुचि त्येतत्पर्यंतेषिवित्यर्थः। अव्याप्त्यतिव्याप्तिवारणायेति। दृकतिरजथ्या वृहुशइत्यत्राव्याप्तिः ईश्वरसमा मावितिदृश्यस्य षष्ठ्या रूप्यस्य चैरूप्यस्य च तत्र पाठादतसन्निवारण यपरिगणनमित्यर्थः। परिगणितानात्तसादीनक्रमेणोदाहरतिवह्वीष्विति। यद्यपिवह्वादिषुङीषो वैकल्पिकत्वात्तदभावे वहुत्रेत्यादिसिध्यति तथापिपक्षे वह्वीत्रेत्य

वहुथा। वह्वस्तां हकी। दृकतिः। अजाभ्यो हिता। अजथ्या। शसिवह्वल्पार्थस्य पुम्वद्भावो वक्तव्यः॥ वह्वीभ्यो देहि। वहुशः। अल्पाभ्यो देहि अल्पशः। त तलोर्गुणवचनस्य। शुक्लाया भावः। शुक्लत्वं। शुक्लता गुणवचनस्य किंक्यभाक कर्त्रीत्वे। घरदः कृतार्थ तेन्यादौ तु सामान्येन पुंसकं। भस्याऽढेतद्धिते। हस्तिनी नां समूहो हास्तिकं। अढे किं। रौहिणेयः। स्त्रीभ्यो ढगिति ढो ऽत्र गृह्यते। अग्नेर्ढगित्ति ढकि तु पुम्वदेव। अग्नायी देवताऽस्य स्थालीपाकस्याग्नेयः। सपत्नी शब्दस्त्रिधा। शत्रुपर्य्यायात्सपत्नशब्दाच्छार्ङ्गरवादित्वात् ङीनेकः। समानः पतिर्य्यस्या इति विग्रहे विवाहनिवन्धनम्पतिशब्दमाश्रित्य नित्यस्त्रीलिङ्गो हि। तीयः। स्वामिपर्य्यायपतिशब्देन भाषितपुंस्कस्तृतीयः। आद्ययोः। शिवाद्यण। सपत्न्याऽपत्यं सापत्नः। तृतीयात्तु लिङ्गविशिष्टपरिभाषया पत्युत्तरप दलक्षणोण्यं एव न त्वण। शिवादौ रूढयोरेव ग्रहणात्सापत्न्यः। ठक्छसोश्च। भवत्याश्छात्राभावत्काः। भवदीयाः। एतद्वार्त्तिकमेकतद्धिते चेति सूत्रञ्च नकर्त्तव्यं। सर्वनाम्नोवृत्तिमात्रे इति भाष्यकारेष्ट्यागतार्थत्वात्। सर्वमयः। सर्वकाम्यति। सर्विका भार्य्या यस्य। सर्वकभार्य्यः। सर्वप्रियइत्यादि। पूर्वस्ये वेरंभ्रस्त्रैषा हूतिलिङ्गानात्तेनाकः चैरव शेषद्वैतो चना। सर्विका सर्वाः। कुक्कुट्यादीनामण्डादिषु। कुक्कुट्या अण्डं। कुक्कुटाण्डं। मृग्याः परं। मृगपरं। मृग

पुनिष्टवा स्लोपेरं। ततनलत्रेति पाठोक्तमुदाहरणमत्रोपेक्षितं सर्वनाम्नो वृत्तिमात्र इत्यनेननतार्थत्वादिति मनोरमायां स्थितं। पद्विनरेति। शाचातुपटुन्नरे स्पदद्धतंतत्रामारिक मितिभावः। पटुचरीति। भूतपूर्वेचरट्। पटुजातीयेति। प्रकारवचने जातीयर्। दर्शनीयरूपेत्यादि। प्रशंसायां रूपप्। याप्येपाशप्॥ ॥ वहुयति। प्रकारवचने थाल्। तत्र हि किं सर्वनामवहुभ्यस्त्वधिकृतं। दृकतिरिति। दृकज्येष्ठाभ्यां तिल् तातिलौ च छन्दसीति तिल्। अजथ्येति। अजाविभ्यां थ्यन्। शसीति। वह्वल्पार्थादिति पञ्चम्यास्तसिला।

द्विषत्सूनवः इत्यर्थः । तत्सादिरुपादिगतं नकर्तव्यमिति यातनान्वान्तो गुणवचनस्य गुणस्येति ——— वक्तव्ये वचनग्रहणं प्रसिद्धगुणपरिग्र
हार्थं अतो मध्ये वो नाहरति शुक्लत्वं शुक्लेनेति । नन्विह जातिसंज्ञान्यादि रिक्तां धर्ममात्रं गुण इति यन्त्राचीनैरुक्तं तत्स्वीकर्त्य मन्यथा निरीक्ष्य मेनेश इदः कृतार्थता । सामुमो
च इति दुःखशीलता मित्यादिषु पुंवद्भावाप्रवृत्त्या दीर्घश्रवणं स्यादित्यत आह । सामान्ये नपुंसकमिति । एवं च नैष्टुरो द्रारवनीतमासीदित्यादिप्रयोगो निर्बाध इति भावः
हास्तिकमिति । अचित्तहस्तिधेनोरिति ठक् । नचात्रपस्येति लोपेन निर्बाहस्तस्या सिद्धवदत्रेत्यसिद्धत्वादचः परस्मिन्निति स्थानिवद्भावाच्च नस्तद्धित इति टिलोपानापत्तेः
नवठक् कृत्स्नोसौ श्चेन्न तेनैवात्र पुंवद्भावसिद्धिः शंक्या । क्वसासाम वर्थो द्रवनठक्लसाविन्यस्यैवठकस्तत्र ग्रहणात् । नापिजातेश्चेति पुंवद्भावनिषेधः शंक्यः । अस्मादेव भा
ष्यो दाहरणात्सौत्रस्यैव निषेधो नत्वौपसंख्यानिकस्येति ज्ञापनात् । रोहिणीय इति । रोहिन्नशब्दाद्दूर्ल्लदनुदात्तादिति ङीन्नकारौ । सति तु पुंवद्भावे तयोर्निवृत्तौ रौहितेय इति
स्यादिति भावः । गृत्सत इति । व्याख्यानादितिशेषः अग्नायीति । अग्निशब्दात् वृषाकप्यग्नीति । स्त्रियां ङी वैकारादेशौ आग्नेय इति । पुंवद्भावाभावे तु । अग्नायेय इति स्यादि
ति भावः । शाङ्गरवायणादिति । अत्र च्यन्तसपत्नी इति निर्देशो लिंगादिपो वैरिसपत्नादिद्विषद्वेषणदुर्हृदः इत्यमरः । विवाहनिबंधनमिति । तज्जन्यसंस्कारविशेषविशिष्टे रूढ
मित्यर्थः । सापत्न इति । अभाषितपुंस्कत्वान्नहितीयस्य पुंवद्भावो न भवति । सति च पुंवद्भावे नकारादेशाभावात्सापत इति स्यादाद्यस्य तु पुंवद्भावे पि सापत्न इत्येव भवतीति
भावः । रूढयोरेवेति । आद्यस्यार्थ्यो रूढः द्वितीयस्तु योगरूढः स नान्यानः पतिर्यस्या इति विग्रहो न विरुध्यत इति दिक् । ठक्छसोश्च । अभत्वार्थ आरंभः । भावत्का इति
भवतष्ठक्छसौ । तावस्थायामेव पुंवद्भावे कृते ठस्येक इति इकादेशबाधित्वात् तांतलस्य कादेशः । नन्विकादेशे भत्वात् भस्याढे इति पुंवद्भावे सति कादेशप्रवृत्त्या
रूपासिद्धौ किमत्र द्वयग्रहणेनामैवं । मध्ये तत्पदव्यमस्यमाध्यितिक र्त्यन्त्रैवाल्विधि त्वेन स्थानिवद्भावायोगात्सन्निपातपरिभाषया वा कादेशप्रवृत्तेर्दुर्लभत्वादतष्ठ
क्छसोरिति ग्रहणं कर्तव्यमेव । भवदीय इति । छस्सः सिक्तरणेन्सातिचेति पदसंज्ञा । तेनात्र जश्त्वं भवति । एवं च पदसंज्ञया भसंज्ञाया बाधाद्भस्याढ इत्यस्याप्रवृ
त्या वार्तिके छसग्रहणं कृतं । भाष्यकारस्त्वेति । अनेन सूत्रवार्तिकारुक्ति संभवो ध्वनितः । उत्तरं दृष्ट्वा पूर्वस्याप्रवृत्तत्वात् निष्कर्षे तु व्यर्थमेवे त्याह । गतार्थत्वादिति
दृष्टरूदाहरणान्याह । सर्वमय इत्यादिना । तत आगत इत्यर्थे मयड्व पद्गा । तसिलादिषु मयडादेरपरिगणितत्वात्तेनेदं न सिध्यतीति भावः । सर्वकभार्य इति । नचस्त्रि

पुंवदिति सूत्रेण गतार्थता। न कोपधाया इति निषेधात्। न चास्यापि तेन निषेधः शंक्यः। स्त्रियाः पुंवदित्यादिप्रकरणोक्तस्यैव तेन निषेधात्। अस्या इष्टेस्तु तस्मिन् प्रकरणे असमा-
विष्टत्वात्। न च द्वन्द्वांतर्गतस्य सर्वनामत्वाभावात् पुंवद्भावो न भवेदिति वाच्यं। वचनारंभसामर्थ्यात् मात्रग्रहणाद्वा क्वचित्सर्वनामत्वेन दृष्टानां संप्रति संज्ञाभावेपि पुंवद्भावाभ्युपग-
मात्। अत एवोत्तरपूर्वायै इत्यत्र संज्ञाभावेपि पुंवद्भावः। सर्वा नाम काचित्तस्याः पुत्रः सर्वापुत्र इत्यत्र तु नातिप्रसंगः। संज्ञोपसर्जनयोः सर्वादिगणबहिर्भूतत्वेन वृत्तेः पूर्वमप्यसर्वनाम-
त्वात्। सर्वप्रिय इति। स्त्रियाः पुंवदित्यत्र प्रियादिषु पर्युदासो रूपवती प्रिया इत्यादावुपयुज्यत इति भावः। ननु दितिरात इत्येत्यादावुत्तरपदे इति प्रसंगमाशंक्याह। पूर्वस्यैवेति। वृत्तिघ-
टकानेकभागमध्ये किंचिदपेक्षया पूर्वस्येत्यर्थः। लिंगादिति। अन्यथा एषा ह्येतयोः कात्पूर्वस्य आपि विधीयमानमित्त्वं निर्विषयं स्यादिति भावः। दक्षिणपूर्वा दिगिति भा-
ष्योदाहरणमपीह लिंगमिति बोध्यं। यत्तु प्राचा सर्वनाम्नः समासे पूर्वं पुंवदित्युक्तं। यच्च व्याचख्युः वार्त्तिकार्थमनुवदति सर्वनाम्न इत्यादिनेति तत्प्रामादिकं। वृत्तिमात्रे इति पा-

क्यङ्मानिनोश्च। ६। ३। ३६॥ एतयोः परतः पुंवत्। एनी वाचरति एतायते। श्येनी वाचरति। श्येनायते। स्वभिन्नाङ्गां च दर्शनीयां मन्यते। दर्शनीयमानि-
नी। दर्शनीयां स्वयं मन्यते दर्शनीयमानी चैत्रः॥ न कोपधायाः। ६। ३। ३७॥ कोपधायाः स्त्रियाः न पुंवत्। पाचिकाभार्य्यः। रसिकाभार्य्यः॥ ॥

ठस्यैव भाष्यारूढत्वात् सर्वमयः सर्वकाम्यतीत्युक्तोदाहरणासिद्धिप्रसंगाच्च वार्त्तिकार्थमित्याद्यपि प्रामादिकमेव। वार्त्तिकग्रंथे एतदभावात्। न च सर्वनाम्नो वृत्तिमात्र इत्येतद्वार्त्ति-
कमेव न तु भाष्यकारेष्टिरिति शंक्यं। ठक्छसोरिति वार्त्तिकस्य निरालंबनतापत्तेः। भाष्यकारेष्टित्वे तु वार्त्तिकस्योक्तिसंभव उक्त एव प्राक्॥ ॥ क्यङ्मा एनायत इत्यादि क-
र्तुः क्यङ्सलोपश्चेति क्यङि पुंवद्भावे कृते एतश्येतयोर्हन्त्साविति दीर्घः। मानिन्ग्रहणमसमानाधिकरणार्थमस्वार्थं चेत्याशयेन यथाक्रममुदाहरति स्वभिन्नामित्यादिना
दर्शनीयमानिनीति। मन इति णिनिः। नांतत्वान्ङीप्। आत्मानमेव दर्शनीयां मन्यते तत्र स्त्रियाः पुंवदित्येव सिद्धं। एकस्या अपि ईप्सिततमत्वव्यापाराश्रयत्वविवक्षाभेदेन
कर्मत्वकर्तृत्वयोः सत्वेपि वास्तवाभेदेन सामानाधिकरण्याविघातादिति भावः। पाचिकाभार्य इति। पचतीति पाचिका ण्वुल्। युवोरित्यकादेशे टापि प्रत्ययस्थादितीत्वं। रसिका
भार्य इति। रसोस्त्यस्या इति रसिका अत इनिठनाविति ठन्॥

मुद्रिकाद्यन्तर इति। क्यङ्मानिनोश्चेति पुंवत्त्वप्राप्तिः। मद्रेषु भवा मद्रिका। मद्रवृज्योः कन्। सति तु पुंवद्भावे इत्त्वं न श्रूयेतेति भावः। तद्धितवुग्रहणमिति। द्वंद्वान्ते श्रूयमाणः प्रत्येकं संबध्यते। तद्धितग्रहणं वुग्ग्रहणेनैव चरितार्थं। पाका भार्येति। अभकच्छ्युकपाकावयसीति कप्रत्ययान्तो यमुणादिषु निपातितः न चायं तद्धितस्य ककारो नापि वोः। वर्षसिमध्यम इति ङीपं बाधित्वा अजादित्वाट्टाप्। संज्ञापूरण्योश्च। यत्तु दत्तायते इति क्यङन्तमपि दृश्यादिषु सूदाहृतं तत्तु विशेषाभावादिहोपेक्षितं। पंचमी पाशेति पाश्य पाशप्। तसिलादिष्विति प्राप्तिः। वृद्धिनिमित्तस्य। स्रौघ्नीति। स्रुघ्ने भवा। तत्र भव इत्यणि टिड्ढेति ङीप्। माथुरीयत इति। मथुरायां भवा माथुरी। सेवाचरतीत्यर्थे कर्तुः क्यङिति क्यङ्। मध्यमेति मध्ये भवा मध्यमा। मध्यान्म इति मः। काण्डलावेती। काण्डं लुनातीति काण्डलावी कर्मण्यण्। इदं यत्तावदिति। तत्परिमाणमस्याः तावती। यत्तदेतेभ्य इति वतुप्। सर्वनाम्न

मद्रिकायते। मद्रिकामानिनी। कोपधप्रतिषेधे तद्धितवुग्रहणं। नेह पाका भार्या यस्य स पाकभार्यः। संज्ञापूरण्योश्च। ६। ३। ३८॥ अनयोर्न पुंवत्। दत्ताभार्यः। दत्तामानिनी। दानक्रियानिमित्तः स्त्रियां पुंसि च संज्ञा न तु नायमिति भाषितपुंस्कत्वमस्ति। पञ्चमीभार्यः। पञ्चमीपाशा। वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे। ६। ३। ३९॥ वृद्धिशब्देन विहिता या वृद्धिस्तद्धेतुर्यस्तद्धितोऽरक्तविकारार्थस्तदन्ता स्त्री न पुंवत्। स्रौघ्नीभार्यः। माथुरीयते। माथुरीमानिनी। वृद्धिनिमित्तस्य किं। मध्यमभार्यः। तद्धितस्य किं। काण्डलावभार्यः। वृद्धिशब्देन किं। तावद्भार्यः। रक्ते तु काषायी कन्या यस्य स काषायकन्यः। विकारे तु हैमी मुद्रिका यस्येति हैममुद्रिकः। वृद्धिशब्देन वृद्धिं प्रति फलोपधानाभावादिह पुंवत्। वैयाकरणभार्यः। सौवश्वभार्यः। स्वाङ्गाच्चेतः। ६। ३। ४०॥ स्वाङ्गाद्य ईकारस्तदन्ता स्त्री न पुंवत्। सुकेशीभार्यः। स्वाङ्गात्किं। पटुभार्यः। ईतः किं। अकेशभार्यः। अमानिनीति वक्तव्यं। सुकेशमा

इत्याकारोऽन्तं वृद्धिशब्देन विहित इति भावः। काषायीति। कषायेण रक्तेत्यर्थे तेन रक्तं रागादित्यणि ङीप्। हैमीति। हेम्नो विकार इत्यर्थे अनुदात्तादेश्चेत्यञ्। फलोपधानेति। निमित्तशब्दः फलोपहितपरः। स्वरूपयोग्यपरत्वे तु वैयाकरणभार्य इत्यत्र पुंवद्भावो न सिद्ध्येदिति भावः। व्याकरणमधीते वेत्ति वा वैयाकरणी। तदधीते तद्वेदेत्यण्। स्वश्वस्यापत्यं स्त्री सौवश्वी तस्यापत्यमित्यण्। उभयत्राणि त्वात्ताभ्यां आदिवृद्धिर्न य्वाभ्यामित्यनेन प्रतिषिध्यत इति नायं वृद्धिं प्रति फलोपहितः किं तु स्वरूपयोग्यः। यद्यप्यैजागमनिमित्तत्वाद्वृद्धिं प्रति फलोपहितोऽयमत्ययस्तद्धितस्तथापि वृद्धिशब्देन विहितां वृद्धिं प्रति न भवतीति भावः अत्र न्याचक्षते सूत्रे निमित्तशब्दः फलोपहितपरः अन्यथा निमित्तग्रहणमनर्थकं स्यात् हेतुस्तद्धितस्येत्युक्ते पि निमित्तत्वमेव संबंधः इति वृद्धिनिमित्तं यस्तद्धित इत्यर्थलाभात् तेन वृद्धिशब्देन विहितां वृद्धिं स्वयमर्थो लभ्यते। अन्यथा फलोपहितपरत्वलाभो निष्फलः स्यादुक्तदोषतादवस्थ्या ॥

जातेश्च। यद्यप्यजातेरित्येव विहितस्येति व्याख्यायेत तर्हि हास्तिकमित्युदाहरणे औपसंख्यानिकस्य नायं निषेध इति भाष्योक्तिर्न संगच्छेत। हस्तिन्शब्दो ह्यजातेरिति ङीब्विहि-
तः। स्वरंतत्वाभावात्। किंतु ऋन्नेभ्य इति ङीब्विहित इति पुंवद्भावनिषेधस्याप्रसक्तेरत आह जातेः पर इति। एवं च हस्तिनीभार्यः शुनीभार्य इत्यादावपि निषेधः सिध्यतीति
भावः। यः प्रत्यय इति। टाबादिः प्राचां तु ङीष्येवोपात्तेस्तद्युक्तमिति ध्वनयन्नुदाहरति शूद्राभार्य इति। ब्राह्मणीति। शार्ङ्गरवादित्वान्ङीन्। प्राचां तु ङीष्पुंवदिति व्याख्याय ब्रा-
ह्मणीभार्यशूद्रसुदाहृतं तन्न इत्यसात्। सौत्रस्यैवेति। व्याख्यानादिति भावः। नकोपधाया इति निषेधस्तु भस्याढे इति प्राप्तस्यापि भवत्येव। तेन वैलेपिकायाः धर्म्यं वैलेपिकमिति
सिद्धं। यद्धर्मं महिष्यादिभ्य इत्यणि पुंवद्भावः स्यात् इकारोऽत्र न श्रूयेत। एतच्च न कोपधाया इति सूत्रे भाष्ये स्पष्टं। प्रासंगिकं समाप्य प्रकृतमनुसरति संख्ययेति। सामानाधिकर-

जातेश्च ॥ ६।३।४१॥ जातेः परो यः स्त्रीप्रत्ययस्तस्मिन्न पुंवत्। शूद्राभार्य्यः। ब्राह्मणीभार्य्यः। सौत्रस्यैवायं निषेधः। तेन हस्तिनीनां समूहो हास्तिकमित्यत्र भ-
स्याढ इति तु भवत्येव। संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये। २।२।२५॥ संख्येयार्थया संख्ययाऽव्ययादयः समस्यन्ते स बहुव्रीहिः। दशानां समी-
पे ये सन्ति ते। उपदशाः। नव एकादश वेत्यर्थः। बहुव्रीहौ संख्येये इति वक्ष्यमाणो डच्। ति विंशतेर्डिति। ६।४।१४२॥ विंशतेर्भस्य तिशब्दस्य लोपः स्याड्डि-
ति। आसन्नविंशाः। विंशतेरासन्ना इत्यर्थः। अदूरत्रिंशाः। अधिकचत्वारिंशाः। द्वौ वा त्रयो वा द्वित्राः। द्विरावृत्ता दश द्विदशाः। विंशतिरित्यर्थः। दिङ्ना-
मान्यन्तराले। २।२।२६॥ दिशो नामान्यन्तराले वाच्ये प्राग्वत्। दक्षिणस्याः पूर्वस्याश्च दिशोऽन्तरालं दक्षिणपूर्वा। नामग्रहणाद्यौगिकानां न। ऐं-

ण्यस्यान्यपदार्थत्वे वृत्तेः स्वविग्रहात्पूर्वं णत्वप्राप्तौ वचनं। दशानामिति। उपगता दश येषामिति न विगृहीतं पूर्वेणैव सिद्धेः। उपदश

द्र्याश्च कौवेर्याश्चान्तरालं

इति। उपशब्दः समीपे समीपिनि च वर्त्तते। आद्ये अव्ययीभावः द्वितीये तु बहुव्रीहिरिति विवेकः नव एकादश वेत्यर्थ इति।
।संख्याद्वारकसंबंधस्यांतरंगत्वादिति भावः। तेन दशानां वृक्षादीनां समीपे ये संति गवादयस्ते उपदशा इति न प्रयुज्यंते।
सूत्रे तिलुप्तषष्ठीकमित्याशयेनाह तिशब्दस्येति। विंशा इति। इह तिलोपोत्तरमतो गुण इति पररूपमेव न तु टिलोपः तिलोपस्याभीयत्वेनासिद्धत्वात्। न चात्र पररूपमपि न स्या-
त्तिलोपस्य स्थानिवत्त्वादिति शंक्यं अज्झलादेशो ज्यादेशो न भवतीति स च परस्मिन्नित्यस्याप्रवृत्तेः। स्थानिवदादेश इति तु न प्रवर्त्तत एव शास्त्रीयकार्ये हि कर्त्तव्ये तत्प्रवृत्तिर्न तु

विंशतेरिति सिद्धान्तान्नाविंशतेरिति। रक्षापि आसन्ना विंशतिर्येषामिति न विगृहीतमुक्तं युक्तेः। अदूरत्यादिः। अदूरास्त्रिंशतः। अधिकाश्चत्वारिंशतः इति विग्रहो वा। ध्यौ
द्विशा इति। वार्थे यं वहुव्रीहिः। स च वार्थेन विकल्पः। यस्तु द्विवचनस्याप्यपवादः। किं तु संशयः। स चानियतसंख्यावमर्शी। तत्र च त्रयो पि सर्वदा भासन्त इति तदपेक्षं बहुव
चनमेव। आनय नारिकेलिकान्वयस्तु द्वयोस्त्रयाणां वेत्यनियतं वेत्याह। द्विराद्वत्ता इति। सुजर्थे वहुव्रीहिरित्यर्थः। वृत्तौ तु सुजर्थान्तर्भावेनैवैकार्थीभावाश्रयणान्नसुचो
प्रयोगः। संख्ययेति किं। चत्वारो ब्राह्मणाः। अव्ययेत्यादि किं। ब्राह्मणाः पञ्च संख्येयेति किं। अधिका विंशतिर्गवां। संख्यार्थे यं संख्येतिन समासः। आदशतः संख्याः सं

न ख्येते सं इत्यनिसरूपा।२।२।२७॥ समस्यते ग्रहणविषये सरूपे पदे तृतीयान्ते च प्रहरणविषये इदं युद्धं प्रवृत्तमित्यर्थे समस्येते कर्मव्यतिहारे यो
गो स बहुव्रीहिः इति शब्दादयं विषयविशेषो लभ्यते। अन्येषामपि दृश्यते॥ दीर्घ इत्यनुवर्त्तते इच् कर्मव्यतिहारे बहुव्रीहौ पूर्वपदान्तस्य दी
र्घः। इच् समासान्तो वक्ष्यते। तिष्ठद्गु प्रभृतिषु च इच्प्रत्ययस्य पाठाद्व्ययीभावत्वमव्ययत्वं च। केशेषु केशेषु गृहीत्वेदं युद्धं प्रवृत्तं केशाकेशि दण्डै
श्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तं दण्डादण्डि। मुष्टीमुष्टि। ओर्गुणः।६।४।१४६॥ उवर्णान्तस्य भस्य गुणः स्यात्तद्धिते। अवादेशः। वाहू वाहवि। ओ
रोदिति वक्तव्ये गुणोक्तिः संज्ञापूर्वको विधिरनित्य इति ज्ञापयितुं तेन स्वायम्भुवमित्यादि सिद्धं। सरूपेति किं। हलेन मुशलेनेति न सहेति तुल्ययोगे।२।
२।२८॥ तुल्ययोगे वर्त्तमानं सहेत्येतत्तृतीयान्तेन प्राग्वत्। वोपसर्जनस्य।६।३।८२॥ बहुव्रीह्यवयवस्य सहस्य सः स्याद्वा। पुत्रेण सह आगतः सपुत्रः सह
पुत्रो वा आगतः। तुल्ययोगवचनं प्रायिकं। सकर्मकः। सलोमकः। प्रकृत्याशिषि।६।३।८३॥ सहशब्दः प्रकृत्या स्यादाशिषि। स्वस्ति राज्ञे सहपु
त्राय सहामात्याय। अगोवत्सहलेष्विति वाच्यं॥ सगवे सवत्साय सहलाय॥ ॥ ९९ ख्येये वर्त्तते न तु संख्यायां। विंशत्याद्याः संख्यास्तु संख्येयसंख्य
योर्वर्त्तन्ते। यस्तु संख्येये विंशतिशब्दस्तदा भवत्येव समासः। अधिका विंशतिः इति तत्रेदं ग्रहणविषय इति गृह्यते इति ग्रहणं केशादि तद्विषयो वा च्योपयो सरूपे प्र
हियते अनेनेति प्रहरणं दण्डादि। तद्विषयो वा च्योपयोरिति प्राग्वत्। कर्मव्यतिहारः परस्पर ग्रहणं परस्पर प्रहरणं च। ननु ग्रहणविषये समस्येते समस्येते प्रहरणविषये तृतीया
न्ते चेत्यादि विषयविशेषः सूत्राक्षरैः कथं लभ्यते इत्यत आह इति शब्दादिति। स हि लौकिकीं विवक्षां दर्शयति। लोके केशाकेशीत्यादि प्रयोगे यावान् अर्थः प्रतीयते तावा

सर्थेवहुव्रीहिर्भवतीत्यर्थः। अन्येषामपिदृश्यते। अत्रप्राचा दन्तिग्रहणात्कर्मव्यतिहारे वहुव्रीहौ पूर्वपदस्य दीर्घत्वमात्वं वा न चेत्युक्तं तत्र आत्वं वेत्यपाणिनीयमतएवा
मुष्टामुष्टीत्युदाहरणमप्यप्रामाणिकमेव एतच्च मनोरमायां स्पष्टं ॥ ओं गुणः। तद्धिते किं। पट्वी। वाभ्वो। गुणोक्तिरिति। यद्यप्योरोदिति सूत्रितेपि भस्य तद्धित इत्येवंरूपं सं
ज्ञापूर्वकत्वमेव वा तथापि विधेयसमर्पकं पदं यत्र संज्ञारूपं स एव संज्ञापूर्वको विधिरिति भावः। यद्यपि ओदिति तपरस्तत्कालस्य संज्ञैव तथापि इह तकार उच्चारणार्थ
स्तपरत्वफलाभावात् ओरोरित्येव वा सु। स्वरूपं शब्दस्येति तु प्रत्याख्यातमिति भावः। स्यादेतत्। तपरस्तत्कालस्य संज्ञा भवतीति गुरोरनृत इति प्लुतनिषेधस्यापि संज्ञापूर्व
कत्वेनानित्यत्वात् क्लृ॰ सशिखेत्यत्र प्लुतसिद्धेः अलृकृत्ते ऋकारात्पृथक्लृकारोपदेशो व्यर्थः। सावर्ण्येसत्यप्यकृतरीत्या लृकारस्य प्लुतसिद्धेरनित्यत्वज्ञापनस्य निष्फलत्वा
न्नचैवमपि ऋदितां लृदित्कार्यं लृदितामृदित्कार्यं च वारयितुमनित्यत्वज्ञापनमावश्यकमिति वाच्यं। राजृ भ्राजृ गम्लृ शक्लृ इति पृथगनुवंधकरणसामर्थ्यान्नाग्लो
पिशास्त्वृदितां लृदितः परस्मैपदेष्विति पृथगनुवादसामर्थ्याच्च तत्कार्याणामसांकर्यसिद्धेरिति चेदत्राहुः। गुरोरनृत इत्यनेन न्यग्भि न्यस्य गुरोः प्लुतविधानादनृत इ
त्येतच्छन्दमानगुरुविशेषणत्वेनानुवादरूपमेव न तु विधेयसमर्पकसंज्ञारूपं पदमिति अस्यानिकप्लुतनिषेधस्यानित्यत्वासिद्ध्या क्लृ॰ सशिखेत्यत्र प्लुतानसिध्य
[illegible]मुक्तज्ञापनायोभयोपदेश आवश्यक इति। अन्येतु ऋकारात्पृथक्लृकार उपदेष्टव्य एव। ऋकारोपदेशेन लृकारस्यालाभात्। न च ऋलृवर्ण
योर्मिथःसावर्ण्यमिति वचनात्तल्लाभः शंक्यः। वार्त्तिकं दृष्ट्वा सूत्रकृतो प्रवृत्तेरित्याहुः। तेन सहेति तुल्ययोगे। तुल्ययोगे किं। सहैव दशभिः पुत्रैर्भारं वहति गर्दभी। इह
सहशब्दो न तुल्ययोगवचनः। भारकर्मकवहनक्रियायां तु पुत्राणामनन्वयात्। किंतु विद्यमानवचनः। दशसु पुत्रेषु विद्यमानेष्वित्यर्थः। एतच्च सहशब्दस्य विद्यमा
नार्थत्वमेवं स्तीति वक्तुमुक्तं प्रत्युदाहरणं भारीरं तु सह पुत्रैरित्येवेति वोध्यं। तृतीया तु सहयुक्त इत्यनेनैव। वोपसर्जनस्य ——— उपसर्जनस्येति न सहस्य विशे
षणं। व्यभिचारात्। किंत्तर्हि पदं न सन्निधापितस्य समासस्य। तच्चावयवद्वारकं। उपसर्जनसर्वावयव ——— कस्य समासस्येत्यर्थः। तदेतत्फलितमाह। वहुव्रीहेरि
ति। तेनेह न सहयुध्वा। सहकृत्वा। राजनि युधि कृञः सहेति चेति क्वनिपि उपपदसमासाविमौ। सहस्य सः संज्ञायामित्यतोनुवर्त्तनादाह सहस्य सः स्यादिति। प्रापि कर्म
तिर्विभाषासपूर्वस्येत्यादिनिर्देशादिति भावः। सकर्मक इति। विद्यमानकर्मक इत्यर्थः। प्रकृत्याशिषि। कथं तर्हि यजमानस्य सपुत्रस्य सभ्रातृकस्य सपरिवारस्या

पुत्रोऽस्य ऐश्वर्यामिरद्धिरस्त्वित्यादिप्रयोगाः संगच्छन्त इति चेदुच्यते। ऐश्वर्यामिरद्धिरस्त्विति भवन्तोऽनुगृह्णन्त्वित्येतस्यार्थे नावाक्यं न त्वाशीर्वचनं। यत्राशीर्वचनं तथास्त्विति तत्र हि सपुत्रः केत्यादि न प्रयुज्यत एवेति न काप्यनुपपत्तिः॥ ०॥ बहुव्रीहौ संख्येये। व्यत्ययेन पंचम्यर्थे सप्तमी। यो बहुव्रीहिस्तस्मादिति। उपगणा इत्यत्र डचि सत्यसति च ह्रस्वे विशेषो नास्तीत्यत आह स्वरे विशेष इति। डचि सति चित इत्यंतोदात्तत्वं स्यादसति तु पूर्वपदप्रकृतिस्वर इत्यर्थः। न च सत्यपि डचि परत्वात्पूर्वपदप्रकृतिस्वर एव स्यादिति शंक्यं चित इति स्वरस्य समासशिष्टत्वात्। डच्प्रत्ययकरणस्य वैयर्थ्यापत्तेश्च। संख्यायाः इति। संख्यां तत्पुरुषस्य चरमावयवो डच्चकर्तव्य इत्यर्थः। एकविंशतिरित्यादौ तु न भवति अन्यत्राधिकलोपादिति वार्तिककारोक्तेः। व्यत्ययेन षष्ठीति। एतच्चोपलक्षणं सप्तम्यपि व्यत्ययेनैव। तदाह स्वांगवाचीत्यादि। अद्रव्यमूर्तिमदि

बहुव्रीहौ संख्येये डजबहुगणात्। ५।४।७३॥ संख्येये यो बहुव्रीहिस्तस्माड्डच् स्यात्। अपदशाः। उपदशाः। अबहुगणात्किं। उपबहवः। उपगणाः। अत्र स्वरे विशेषः। संख्यायास्तत्पुरुषस्य वाच्यः॥ निर्गतानि त्रिंशतो निस्त्रिंशानि वर्षाणि चैत्रस्य। निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः। बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्। ५।४।११३॥ व्यत्ययेन षष्ठी। स्वाङ्गवाचिसक्थ्यक्ष्यन्ताद्बहुव्रीहेः षच् स्यात्। दीर्घे सक्थिनी यस्य। सदीर्घसक्थः। जलजाक्षी। स्वाङ्गात्किं। दीर्घसक्थि शकटं। स्थूलाक्षा वेणुयष्टिः। अक्ष्णो दर्शनादित्यच्। अङ्गुलेर्दारुणि। ५।४।११४॥ अङ्गुल्यन्ताद्बहुव्रीहेः षच् स्याद्दार्वर्थे। पञ्चाङ्गुलयो यस्य तत् पञ्चाङ्गुलं दारु। अङ्गुलिसदृशावयवं धान्यादिविक्षेपणकाष्ठमुच्यते। बहुव्रीहेः किं। द्वे अङ्गुली प्रमाणमस्याः द्व्यङ्गुला यष्टिः। तद्धितार्थे तत्पुरुषात्तत्पुरुषस्याङ्गुलेरित्यच्। दारुणि किं। पञ्चाङ्गुलिर्हस्तः। द्वित्रिभ्यां षमूर्ध्नः। ५।४।११५॥ आभ्यां मूर्ध्नः षः स्याद्बहुव्रीहौ॥ द्विमूर्धः। त्रिमूर्धः। नेतुर्नक्षत्रे अब्वक्तव्यः॥ मृगो नेता यासां [illegible]॥

॥ ...इत्यादि लक्षणलक्षितं स्वांगं गृह्यते। तेन शोभनासीप्रतिमेत्यादिप्रयोगो निर्बाध एव बोध्यः। षच् स्यादिति। षो ङीषर्थः। चस्तु चित इत्यंतोदात्तार्थः। तेनात्र पूर्वपदप्रकृतिस्वरो न भवति। स्थूला सन्ति। स्थूलानि अक्षीणि पर्वाकुराणि यस्याः सा। प्राचा तु स्थूलाक्षीरसुरिति प्रसज्यत [illegible] अक्ष्णो दर्शनादित्यचो दुर्बलत्वात्। यद्यपि समासान्तविधेरनित्यत्वात्सन्न केन तरतिके... केश्चिद्व्याख्यातं तदसारं। एवं हि पञ्चापि तत्रैव न भावि... न्यनीतिप्रत्युदाहरणस्यासंगतिप्रसंगात्। द्व्यंगुलेति। मात्रचो द्विगोर्नित्यमिति लुक् नितुरिति। नेता नायकः। नक्षत्रे यो नेतृशब्दस्तदन्ताद्बहुव्रीहेरित्यर्थः॥

सि·कौ·टी·

मृगनेत्रा इति। मृगो मृगशीर्षनक्षत्रं। चंद्रो नेता यस्य मृगनक्षत्रस्य चंद्रनेता मृग इत्यत्र तु न भवति। इह हि नेतृशब्दान्तो बहुव्रीहिर्नक्षत्रे वर्त्तते न तु नेतृशब्द इति। खुरखरा भ्यां नित्यं नासिकाया इति वर्त्तते। केवलादेशवचनं प्रत्ययनिवृत्त्यर्थं। खुरणा इति। अत्वसंतस्येति दीर्घः। उपसर्गाच्च। उपसर्गग्रहणं प्रादीनामुपलक्षणं। नासिका

मृगनेत्रा रात्रयः। पुष्यनेत्राः। अन्तर्बहिर्भ्यां च लोम्नः। ५।४।११७। आभ्यां लोम्नोऽप्स्याद् बहुव्रीहौ। अन्तर्लोमः। बहिर्लोमः। अञ् नासिकायाः संज्ञायां नसं चास्थूलात्। ५।४।११८। नासिकान्ताद् बहुव्रीहेरच् स्यात् नासिकाशब्दश्च नसम्प्राप्नोति न तु स्थूलपूर्वात्। पूर्वपदात्संज्ञायामगः। ८।४।३। पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात्संज्ञायां न तु गकारव्यवधाने। द्रुरिव नासिकाऽस्य द्रुणसः। खरणसः। अगः किम्। ऋचामयनं। ऋगयनं। अणृगयनादिभ्य इति निपातनात् णत्वाभावमाश्रित्य अग इति प्रत्याख्यातं भाष्ये। अस्थूलात् किं। स्थूलनासिकः। खुरखराभ्यां वा नस्। खुरणाः खरणाः। पक्षे अजपीष्यते। खुरणसः। खरणसः। उपसर्गाच्च। ५।४।११९। प्रादेर्यो नासिकाशब्दस्तदन्ताद् बहुव्रीहेरच् नासिकाया नसादेशश्च। असंज्ञार्थमिदं वचनं। उन्नता नासिका यस्य स उन्नसः। उपसर्गादनोत्पर इति सूत्रेण नेदं णत्वं। भाष्यकार आह। उपसर्गाद् बहुलं। ८।४।२८। उपसर्गस्थान्निमित्तात्परस्य नसो नस्य णः स्याद् बहुलं। प्रणसः। वेर्ग्रो वक्तव्यः। विगता नासिकाऽस्य विग्रः। ख्यश्च। विख्यः। कथं तर्हि विनसा हतबान्धवेति भट्टिः। विगतया नासिकयोपलक्षितेति व्याख्येयं। सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः। ५।४।१२०। एते बहुव्रीहयोऽच्प्रत्ययान्ता निपात्यन्ते। शोभनं प्रातरस्य सुप्रातः। शोभनं श्वोऽस्य सुश्वः। शोभनं दिवाऽस्य सुदिवः। शारेरिव कुक्षिरस्य शारिकुक्षः। चतस्रोऽश्रयोऽस्य चतुरश्रः। एण्या इव पादावस्य एणीपदः। अजपदः। प्रोष्ठो गौः तस्येव पादावस्य प्रोष्ठपदः॥

॥ ११ शब्दस्याक्रियार्थत्वेन तं प्रत्युपसर्गत्वायोगात् न च क्रियायोगाभावेप्युपसर्गत्वमस्त्विति शंक्यं। साव के अधिसाव कमित्यव्ययीभावे उपसर्गात्सुनोतीति षत्वप्रसंगात्तदाह। प्रादेरिति। उपसर्गादनोत्परः। अनोत्परः किं प्रनीमुंचतमित्यत्र णत्वं माभूत्। तद्वदंतीति। अनोत्पर इत्यपनीय बहुलग्रहणं चक्रे इत्यर्थः। अन्यथा प्रणो नयेत्यादावव्याप्तिः। प्रनःपूषेत्यादौ त्वतिव्याप्तिः प्रसज्ये

प्रष्टस्तुत्तुवि। प्रगता नासिका अस्येति विगृहः। कथं तर्हीति। ग्रहव्ययोरन्यतरेण लाभाद्यमिति प्रश्नः। नासिकयेति। तथा च विनसेति न प्रथमान्तं किं तु पदन्न इति नसादेशेन तृ
तीयान्तमिति भावः। शोभनं प्रातरस्येति। अधिकरणशक्तिप्रधानस्य सामानाधिकरण्यासंभवात्प्रातःशब्देन प्रातस्तनं कर्म लक्ष्यत इत्याहुः। प्रातःकल्पमित्यत्रेव प्रातः
शब्दो वृत्तिविषये शक्तिमन्यर इति न सामानाधिकरण्यानुपपत्तिरित्यन्ये। एलीपदादिषु निपातनात्सद्भावः॥ ॥ नञ्दुःसुभ्यो नन्वत्र हलिग्रहणं व्यर्थं हलशब्दमा
त्राद्धलिरिति प्रयोगसंभवात्। न च महद्धलं हलिस्तद्रहितो ऽहलिस्तत्रैवार्थे हल इति प्रयोगार्थं तद्ग्रहणमिति वाच्यं। अहल इत्यत्र महद्धलरहित इत्यर्थाप्रती
तेः। किं च वैभ्यन्तोदात्तार्थमच[illegible]विधानमावश्यकमन्यथा ऽहल इत्यत्र पूर्वपदप्रकृतिस्वरः स्यादिति शंकां। नञ्सुभ्यामित्यनेनान्तोदात्तत्वविधानाद्दत्ताहुः

नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्यां। ५।४।१२१॥ अच् स्यात्। अहलः। अहलिः। असक्थः असक्थिः। एवं सुदुर्भ्यां। शक्त्योरिति पाठान्त
रं। अशक्तः। अशक्तिः। नित्यमसिच् प्रजामेधयोः। ५।४।१२२॥ नञ्दुःसुभ्य इत्येव। अप्रजाः। दुष्प्रजाः सुप्रजाः। अमेधाः दुर्मेधाः सुमेधाः
धर्मादनिच् केवलात्। ५।४।१२४॥ केवलात्पूर्वपदात्परो यो धर्मशब्दस्तदन्ताद्बहुव्रीहेरनिच् स्यात्। कल्याणधर्मा। केवलात्किं। परमः स्वो
धर्मो यस्येति त्रिपदे बहुव्रीहौ माभूत्। स्वशब्दो हीह न केवलं पूर्वपदं। किं तु मध्यमत्वात्पदापेक्षिकं। सन्दिग्धसाध्यधर्मेत्यादौ तु कर्मधारयपू
र्वपदो बहुव्रीहिः। एवं तु परमस्वधर्मेत्यपि माभूदेव। निवृत्तिधर्मा। अनुच्छित्तिधर्मेत्यादिवत्। पूर्वपदं तु बहुव्रीहिणाक्षिप्यते। जम्भा सुहरित
तृणसोमेभ्यः। ५।४।१२५॥ जम्भेति कृतसमासान्तं निपात्यते। जम्भो भक्ष्ये दन्ते च। शोभनो जम्भो ऽस्य सुजम्भा। हरितजम्भा। तृणं भक्ष्यं यस्य तृ
णमिव दन्ता यस्येति वा॥ तृणजम्भा। सोमजम्भा। स्वादिभ्यः किं। पतितजम्भः॥ ॥

[illegible] कस्य कपो निवृत्त्यर्थं हल इत्यत्रान्तोदात्तत्वार्थं च नदिति। शक्त्योरिति। आचार्येण केचिच्छात्रा हलि।
शक्त्योरिति पाठं ताथ्यनिभाक। नित्यमसिच्। अकारोच्चारणमत्वर[illegible]ादन। थं तेन सुप्रजसा विद्यते त्यस्येति चेत्याकारलोपः सिध्यति। अस्वरितत्वादेवान्यतरस्यां ग्रहण
नन्वृत्तिसिद्धौ नित्यग्रहणमन्यतोविधानार्थं तेनाल्पमेधस इति सिध्यतीति वृत्तिकारादयः। धर्मादनिच्। अनिचो ऽकारश्चिन्त्यप्रयोजन इत्येके। अन्ये तु धर्मकरोमा

चष्टेवानकरणीनीति एयंता तत्किमपि धर्मपरमो धर्मो यस्य सः परमधर्मा। एकदेशविकृतस्यानन्यत्वाद्धर्मशब्दोयमित्यकारोच्चारणमिह सप्रयोजनमेवेत्याहुः। बहुव्रीहिरिणत्रपूर्वपदस्मा
दित्यनुपदमेव वक्ष्यति तच्च केवलादित्यनेन विशेष्यत इत्याह। केवलात्पूर्वपदादिति। प्राचान्तु तत्पदमपि विशेषितं प्रसादकृतापि केवलादिति धर्मशब्दस्य पूर्वपद
स्य च विशेषणमिति व्याख्यातं। तदुभयमपि चिंत्यं। आवृत्तौ मानाभावात्। धर्मपदविशेषणे प्रयोजनाभावाच्च। न च धर्मशब्दांतं यत्रोत्तरपदं तद्यावृत्तिः फलमिति वाच्यं तत्र ब
हुव्रीहिस्त्ववयवीभूतपूर्वपदान्तरत्वस्य धर्मपदे असंभवादेवादोषत्वात्। मध्यमत्वादिति। न च सर्वनामसंख्ययोरिति सुशब्दस्य पूर्वनिपातः शंक्यः आहिताग्न्यादेराकृतिगणत्वा
दिति हरदत्तादिभिः समाहितत्वात्। अपेक्षिकमिति। नन्वत एव केवलग्रहणं व्यर्थं पूर्वपदशब्दस्य समासप्रथमावयवे रूढत्वेनैव मध्यमपरव्यावृत्तिसंभवादिति चे
दत्राहुः पूर्वपदाक्षेपेणात्यल्पग्राहकत्वेन केवलपदस्य सार्थकत्वादिति। कर्मधारयपूर्वपद इति। नन्वत्र अनिच् दुर्लभः। केवलादित्यस्य समासानाम्नकादित्यर्था
दिति चेन्मैवं। केवलग्रहणस्य समासान्तात्मकपूर्वपदपरत्वे मानाभावात् निवृत्तिधर्मा हिंस्या नो भवतीत्यादिप्रयोगविरोधाच्च। अस्मदुक्तार्थस्तु धृञ् धारण इति धा

दक्षिणेर्मा लुब्धयोगे। ५।४।१२६॥ दक्षिणे ईर्म व्रणं यस्य। दक्षिणेर्मा मृगः। व्याधेन कृतव्रण इत्यर्थः। इच् कर्मव्यतिहारे। ५।४।१२७॥ कर्मव्य
तिहारे यो बहुव्रीहिस्तस्मादिच् स्यात्समासान्तः। केशाकेशि। मुशलामुशलि॥

११ नौमाधवग्रंथेस्पष्टः। एतेन साध्यो धर्मोऽस्येति साध्यधर्मा संदिग्ध
श्चासौ साध्यधर्मा चेति विग्रहः। संचसंदेहः साध्यधर्मद्वारक एव पर्यवस्यतीति केषांचिद्व्याख्यानं परास्तं। उक्तरीत्यैव साध्यस्य सान्दे संदिग्धत्वलाभेन तत्समर्थनप्रया
सस्य व्यर्थत्वात्। साध्वेवेति। परमश्चासौ स्वश्च परमस्वः स धर्मो यस्येति यदा विगृह्यते॥ तदेत्यर्थः॥ ॐ ॥ दक्षिणेर्मा॥ लुब्धो व्याधः। तद्योगाद्देर्मनिष्पन्ना विर्दानि
पातनेनान्यइत्यर्थः लरेतदाह। व्याधेनेति। वाली हेमाब्जमाली गुणनिधिरिपुणा निर्मितो दक्षिणेर्मेति प्रयोगस्त्वौपचारिक इति कथंचिन्नेयः। केशाकेशीति। तत्र तेने
दमिति कर्मव्यतिहारे बहुव्रीहिः। इचोऽदयस्य तिष्ठद्गुप्रभृतिषु पाठादव्ययीभावत्वेऽव्ययत्वे। नन्वेवमिचश्चित्करणं व्यर्थमव्ययीभावसंज्ञया बहुव्रीहिसंज्ञाया बाध
त्समासस्वरेणान्तोदात्तत्वसिद्धेः। अत्राहुः विशेषणार्थं तदावश्यकमेव। तिष्ठद्गुप्रभृतिषु इकारमात्रपाठे हि सुगधिरित्यादावतिव्याप्तिप्रसंगात्। किंचात्राव्ययी
भावसंज्ञया बहुव्रीहिसंज्ञा न बाध्यते किं तु द्वयोः समावेश एव। उपजीव्यविरोधस्यान्याय्यत्वादेवं च स्वरार्थमपि चित्वं कर्तव्यमेवेति॥ ॥ ॥

हिरंडीति समुदायनिपातनस्य विषयविशेषपरिग्रहार्थत्वान्न हिरंडशब्देनात्र त्विचनं भवतीति। उभाहस्तीत्यादि। इहनिपातनादेवायं चः पासिकत्वं। प्रसंभ्यां जानु शब्दस्यैकत्वेप्युपपदानिवेषं नहित्वमाश्रित्य जानुनोरिति द्विवचननिर्देशस्तत्फलं तु स्थानषष्ठीत्वस्फुटीकरणं। जानुन इत्युक्तेनुकिमियं पंचमी प्रत्ययाधिकारात्तद्धु र पिप्रत्ययश्चत्येवं संदेहः स्यात् प्रदेतदूर्ध्वमयत्नाहा। जानुशब्दयोज्ञुरादेशइति। शार्ङ्गधन्वेति। कथं तर्हि खलावल्याशांसाधृतधनुषमन्हायतूणवदिति पुष्पदंतप योग इति चेद् अत्राहुः समासांतविधेरनित्यत्वान्नात्रानुपपत्तिरिति नित्यत्वे प्रमाणं त्वंश्वादिगणे राजन्शब्दपाठः। सहि प्रतेरंशवादयस्तत्पुरुषे इत्यंतोदात्तार्थः। राजाहः
हिदंडयादिभ्यश्च। पा। ४। १२८। तादर्थ्ये चतुर्थ्येषा। एषां सिद्ध्यर्थमिञ्प्रत्ययः स्यात्। द्वौ दण्डौ यस्मिन् प्रहरणे तत्। द्विदण्डि प्रहरणं। द्विमुसलि।
उभाहस्ति। उभयाहस्ति॥ प्रसंभ्यां जानुनोर्ज्ञुः। पा। ४। १२९॥ आभ्यां परयोर्जानुशब्दयोर्ज्ञुरादेशः स्याद्बहुव्रीहौ। प्रगते जानुनी यस्य। प्रज्ञुः। संज्ञुः।
ऊर्ध्वाद्विभाषा। पा। ४। १३०॥ ऊर्ध्वज्ञुः। ऊर्ध्वजानुः। धनुषश्च। पा। ४। १३२॥ धनुरन्तस्य बहुव्रीहेरनङादेशः स्यात्। शार्ङ्गधन्वा। वा संज्ञायां। पा। ४। १३३॥
शतधन्वा। शतधनुः। जायाया निङ्। पा। ४। १३४॥ जायान्तस्य बहुव्रीहेर्निङादेशः स्यात्॥ लोपो व्योर्वलि। ६। १। ६६॥ वकारस्य यकारस्य च लोपः स्याद्वलि।
युवजानिः। युवतिर्जाया यस्य स युवजानिः। गन्धस्येदुत्पूतिसुसुरभिभ्यः। पा। ४। १३५॥ एभ्यो गन्धस्य इकारोऽन्तादेशः स्यात्। उद्गन्धिः। पूतिगन्धिः।
सुगन्धिः। सुरभिगन्धिः। गन्धस्येत्त्वे तदेकान्तग्रहणं। ए[illegible]न्तोऽष्टरव। अविभागेन लक्ष्यमाण इत्यर्थः। सुगन्धि पुष्पं। सलिलं च। सुगन्धि
र्वायुः। नेह शोभना गन्धाः द्रव्याण्यस्य। सुगन्ध आपणिकः॥ ॥ ८ मत्वैविति टचो नित्यत्वेन तु किं तेनेति। लोपो व्योर्वलि। व्योर्लोप इति वक्तव्ये वलप्रक्तलोप
हल्लिव्लोपः। पूर्वविप्रतिषेधेनेति न्यायपितुमादौ विधेयनिर्देशः कृ[illegible]नसुवीयतेः क्विपि सुस्वीरिति सिद्धं। गंध स्येत। तकार उच्चारणार्थ इत्याशयेनाह। इकारोन्तादेश इति
आदेः परस्येति हनभवति समासांत इत्यधिकारात्। अत्र केचिद[illegible] इकारस्य प्रत्ययत्वेपि न क्षतिर्यस्येति चेति लोपे नोद्गंधिरित्यादि रूपसिद्धेः। न च तिन्स्वरितमित्यंत
[illegible]तत्संपत्तिर्नशंक्यानकारस्योच्चारणार्थत्वाश्रुपगमात्। ना[illegible]षष्ठीनिर्देशादादेशत्वमेव न प्रत्ययत्वमिति न[illegible]च्चां गापोष्टगित्यादि प्रत्ययविधिष्वपि षष्ठीदर्शनात् इ
ति। अविभागेनेति। एवं च गुणवाचिन एव ग्रहणं न तु द्रव्यवाचि[illegible]न इति फलितोऽर्थः। द्रव्याणीति। अत्र च गन्धशब्दो द्रव्यवचनः वहति जलमियमपि नष्टगंधानिति

गंधस्तु सौरभेन त्येगंधके गर्वलेशयोः। स एव द्रव्यवचनः बहुत्वे पुंसि च स्मृत इति कोशाच्च। केचित्तु गंधस्येत्व इति वार्त्तिके तदेकांतशब्देन स्वाभाविकत्वं विवक्षितं तेनागं[धस्य]जेत्याहुः। तथा च भट्टिः। आघ्रापिवान्‌ गंधवहः सुगंध इति। व्याख्यातं च जयमंगलायां अमंधस्येत्यादिना इकारः समासांतो न गंधस्येत्वे तदेकांतग्रहणमि[ति व]चनात्सुगंध आपणिक इति यथेति। अत एव भग्नवालसहकार सुगंधावित्यादीनां प्रामादिकत्वं दुर्घटवृत्तिकृतोक्तं॥ ॥ अल्पाख्यायां। अल्पवाचिनो गंधस्य इकारांतादेशः स्यात्‌ बहुव्रीहौ। सूपस्य गंध इति। अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः। यद्वा फलितार्थकथनमेतत्‌ सूपो गंधो यस्मिन्निन्त्येव विग्रहः। गं

अल्पाख्यायां। ५।४।१३६॥ सूपस्य गन्धो लेशो यस्मिन्‌ तत्‌। सूपगन्धि भोजनं। घृतगन्धि। गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोरिति वि

श्वः। उपमानाच्च। ५।४।१३७॥ पद्मस्येव गन्धोऽस्य। पद्मगन्धिः। पादस्य लोपोऽहस्त्यादिभ्यः। ५।४।१३८॥ हस्त्यादिवर्जितादुपमानात्परस्य

पादशब्दस्य लोपः स्याद्बहुव्रीहौ। स्थानिद्वारेणायं समासान्तः। व्याघ्रस्येव पादावस्य। व्याघ्रपात्‌। अहस्त्यादिभ्यः किं। हस्तिपादः। कुसूल

पादः। कुम्भपदीषु च। ५।४।१३९॥ कुम्भपद्यादिषु पादस्य लोपो ङीप्‌ च निपात्यते स्त्रियां। पादः पत्‌। कुम्भपदी। स्त्रियां किं। कुम्भपादः। सं

ख्यासुपूर्वस्य। ५।४।१४०॥ पादस्य लोपः स्यात्समासान्तो बहुव्रीहौ। द्विपात्‌। सुपात्‌। वयसि दन्तस्य दतृ। ५।४।१४१॥ संख्यासुपूर्वस्य दन्त

स्य दतृ इत्यादेशः स्याद्वयसि। द्विदन्‌। चतुर्दन्‌। षड्दन्‌। अस्य षोडन्‌। सुदन्‌। सुदती। वयसि किं। द्विदन्तः करी। सुदन्तो नटः। स्त्रियां संज्ञायां

। ५।४।१४३॥ दन्तस्य दतृ स्यात्समासान्तो बहुव्रीहौ। अयोदती। फालदती। संज्ञायां किं। समदन्ती। विभाषा श्यावारोकाभ्याम्‌॥ ५।४।१४४॥ दन्त

स्य दतृ बहुव्रीहौ। श्यावदन्‌। श्यावदन्तः। अरोकदन्‌। अरोकदन्तः॥ ॥ १ धशब्दस्य विशेषणत्वेप्यस्मादेव ज्ञापकात्परनिपातः। पादस्यं पद्य

यं लोपः समासांतो न स्यादादेः परस्येत्यादेः स्यात्तु शेषिकः कप्प्रसज्येत। शेषाद्विभाषेत्यत्र समासांताभावे शेषस्य शेषस्याश्रयणादित आह समासांत इति कथं पुनरभावो भाव

स्यावयवः स्यात्तत्राह स्थानिद्वारेणेति वचनबलादौपचारिकमवयवत्वं गम्यत इति भावः। कुंभपदीषु च। बहुवचननिर्देशाद्गणपाठसामर्थ्याच्चाद्यर्थविगति

स्त्र्यंभिप्रेत्याह कुंभपद्यादिष्विति। इह पाठेलोके कुंभपदी एकपदी जानपदीत्येवं समुदायाए

बपत्ययं तेन तस्य च प्रयोजनं विषयविशेषपरिग्रहः तथा च ग्रन्थेनाह स्त्रियामिति। यच्च हीयमानपूर्वसंख्यापूर्वं चेति प्रत्ययते तस्य सिद्धे लोपे नित्यं ङीवर्थं वचनं तेन पादोऽन्यतर स्यामिति विकल्पो न भवति। द्विदन्निति। द्विदतो वस्य आतो॥ शिशुना वयस्या लिङ्गगम्यते। उगिदचामिति नुमसंयोगान्तलोपस्यासिद्धत्वान्नलोपो न। वोडन्निति। षष उत्व दतृ देशोत्पत्ति नेनोत्वं प्रत्यये। मुदतीति। उगितश्चेति ङीप्। समदतीति। नासिकोदरेत्यादिना ङीप्। श्यावदन्निति। श्यावः स्यात्कपिशः इत्यमरः। अरोकदन्निति। अ रोकाः अच्छिद्रा दन्ता अस्य सः॥ ॥ अग्रांतादहानुक्तसमुच्चयार्थश्चकारस्तेन मूषिकदन्निति सिध्यतीत्याहुः। अजातेति। अजातककुदमस्येति विग्रहः। इह
अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च। ५।४।१४५॥ एभ्यो दन्तस्य दतृ वा॥ कुड्मलाग्रदन्। कुड्मलाग्रदन्तः। ककुदस्यावस्थायां लोपः। ५।४।१४६
अजातककुत्। पूर्णककुत्। त्रिककुत्पर्वते। ५।४।१४७॥ त्रिककुदाख्यस्य। त्रिककुत्। संज्ञैषा पर्वतविशेषस्य। त्रिककुदोऽन्यः। उद्विभ्यां का
कुदस्य। ५।४।१४८॥ लोपः स्यात्। उत्काकुत्। विकाकुत्। काकुदं तालु। पूर्णाद्विभाषा। ५।४।१४९॥ पूर्णकाकुत्। पूर्णकाकुदः। सुहृद्दुर्हृदौ
मित्रामित्रयोः। ५।४।१५०॥ सुदुर्भ्यां हृदयस्य हृद्भावो निपात्यते। सुहृन्मित्रं। दुर्हृदमित्रः। अन्यत्र सुहृदयः। दुर्हृदयः। उरःप्रभृतिभ्यः कप्।
५।४।१५१॥ व्यूढोरस्कः। प्रियसर्पिष्कः। इह पुमान्। अनड्वान्। पयः। नौः। लक्ष्मीरिति एकवचनान्तानि पठ्यन्ते। द्विवचनबहुवचनान्तेभ्यस्तु
शेषाद्विभाषेति विकल्पेन कप्। द्विपुमान्। द्विपुंस्कः। अर्थान्नञः। अनर्थकं। नञः किं। अपार्थं। अपार्थकः। इनः स्त्रियां। ५।४।१५२॥ बहुदण्डि
का नगरी। अनिनस्मिन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति। बहुवाग्मिका स्त्रियां किं। बहुदण्डी। बहुदण्डिको ग्रामः।
हिवाल्यावस्था गम्यते। उरःप्रभृतिभ्यः कप्। उरःप्रभृत्यन्ताद्बहुव्रीहेः कप्स्यात्। समासार्थोत्तरपदान्ताः समासान्ता इति पक्षे तु बहुव्रीहेश्चरमावयवेभ्यः उरःप्रभृतिभ्यः क
विति। षाष्ठेयान्तद्धितत्वात् स्यनेत्वं। व्यूढो रस्क इति। व्यूढं विशालमुरो यस्य सः। सोपदादाविति विसर्जनीयस्य सः। प्रियसर्पिष्क इति। इणः ष इति विसर्गस्य षत्वं। ए
क चनान्तानीति। नद्युतश्चेति सिद्धे लक्ष्मीशब्दपाठस्त्विह एकवचनान्तलक्ष्मीशब्दावयवकबहुव्रीहेरेव नित्यं कबन्यत्र शेषादिति विकल्प एवेति नियमा
र्थस्तेनाकृशमकृशलक्ष्मीश्चेतसांशंसितेस इति भारविप्रयोगः सिद्धः। अकृशा लक्ष्मीर्यस्येति विग्रहः। यत्तु प्राचोक्तं नद्युतश्चेति कप् बहुलक्ष्मीक इति त

स्युक्तं। संख्यावाचिबहुशब्दस्यैकवचनांतत्वाभावात्प्रकृतेन नियमेन वारितत्वात्। बह्वी अधिका लक्ष्मीर्यस्येति विग्रहे वैपुल्यवाचिन एकवचनांतत्वसंभवेपि विशेषविधेर्बली
यः। नञ्दुरः प्रभृतिभ्यः कपि नित्ये वक्तुमुचितत्वात्। यदा तु नियमशास्त्राणां निषेधमुखेन प्रवृत्तिरिति श्रीयते तदा प्रागुक्तमपि सम्यगेवेति ज्ञेयं। अर्थात्र जः गणसूत्रमिदं
अनर्थके नापीति। कथं तर्हि सुपथी नगरीति हलंतेषूक्तं कपोत्र दुर्वारत्वात्। न च नपूजनादित्यनेनाकपूर्वस्यूरित्यप्रत्ययस्येव कपोपि निषेधः शंक्यः पचः प्रागीनात्।
नाप्रिवस निषेध इति। वस्यमाणत्वात् कप्प्रत्ययस्य च उत्तरत्वात्। सत्यं समासांतविधेरनित्यत्वात्साधुरिति समाधेयं। वारनाकाविति सूत्रे सुपथीति भाष्याच्चैवमुक्तं
बहुवाग्मिकेति। वाचोग्मिनिः॥ शेषाद्विभाषा गुक्तकप्समासांतेपि सः। शेषः स्यात् तर्हि व्याघ्रपात्सुगंधिरित्यादावपि स्यादतः समासांतो यः स शेष इह गृह्यत इ-
त्याह। अनुक्तसमासांतादिति। व्याघ्रपादिति। स्थानिद्वारा लोपोपि समासांत इत्युक्तं। सुगंधीति। गंधस्येत्यादिना इत्समासांतः प्रियपथ इति। नद्यृतश्चेति नप्रत्यय

शेषाद्विभाषा। ५।४।१५४। अनुक्तसमासान्ताच्छेषाधिकारस्थाद्बहुव्रीहेः कप् वा स्यात्। महायशस्कः। महायशाः। अनुक्तेत्यादि किं। व्या-
घ्रपात्। सुगन्धिः। प्रियपथः। शेषाधिकारस्थात्किं। उपबहवः। उत्तरपूर्वा। सपुत्रः। नद्यादिना शेषशब्दोऽर्थद्वयपरः। आपोऽन्यतरस्यां। ७।
४।१५॥ कप्यावन्तस्य ह्रस्वो वा स्यात्। बहुमालकः। बहुमालाकः। कबभावे बहुमालः। न संज्ञायां॥ ५।४। १५५॥ शेषादिति प्राप्तः कप्
न स्यात्संज्ञायां॥ विश्वेदेवा अस्य। विश्वदेवः॥ ॥

स्समासांतः उपबहव इति। संख्ययाव्ययेत्यादिना समासः। उत्तरपूर्वेति। दिङ्नामे-
त्यादिना समासः। सपुत्र इति। तेन सहेतीत्यादिना समासः। अयं भावः। शेषो बहुव्रीहिरित्यतः शेषपदमनेकमन्यपदार्थ इत्येतस्मिन्नेव सूत्रेऽनुवर्त्तते सं-
ख्ययाव्ययासन्नेत्यादिषु च निवर्त्तते। तथा च शेषाधिकारस्थत्वाभावादुपबहव इत्यादिषु कप्प्रत्ययो नेति। एवं चानेकमन्यपदार्थ इति सूत्रात्पृथक् संख्ययाव्य-
यासन्नेत्यादीनामारंभः कबभावार्थमप्यावश्यक इति स्थितं। ननु सकृदुच्चरितस्य शेषशब्दस्यानुक्तसमासांतपरत्वं शेषाधिकारस्थपरत्वं च कथमित्यत आह तंत्रादि-
नेति। अर्थभेदेन शब्दभेदः समस्यार्थभेदे शब्दस्याभेद इति मतद्वयं। आद्ये आवृत्तिः। द्वितीये तंत्रमिति विवेकः। यद्वा प्रतिपदोक्ताः समासांताः। स्वविषये
बाधका भवतीति तत्किमनुक्तसमासांतपरत्वेन शेषग्रहणेनेति। तन्नाप्नकृदित्यादीनां समासांतरे चारितार्थतया प्रियपथ्यादौ परेण कपा बाधापत्तेः॥

ईयसश्चेति निषेधो वैकल्पिककपः सर्वोऽपि निषिध्यते। बहुश्रेयानिति। अतिशयेन प्रशस्यः श्रेयान्। द्विवचनविभज्येतीयसुन्। प्रशस्यस्य श्रः। श्रोबाढिभावेति कप्राप्तः। बहु
श्रेयसीति। नद्यृतश्चेति नित्यं प्राप्तः कप्। लिङ्गविशिष्टपरिभाषया ईयसश्चेति प्रतिषिध्यते। बहुनाडिरिति। उपसर्जनह्रस्वः। स्त्रीप्रत्ययान्तत्वाभावादिति। अविहितलक्षणस्तन्त्रि
प्रत्ययी प्रत्ययस्य स्त्रियामित्यधिकारे अविहितत्वादिति भावः। सप्तमीविशेषणे। यदा कण्ठे किंचिदस्तीति ज्ञाने तस्य विशेषणं काल इति तदेदं सप्तमीग्रहणमन्य
दानुतं न। विनापि विशेषणत्वादेव सिद्धं चित्रगुरिति। न चोपसर्जनं पूर्वमित्येवेदं सिध्यतीति वाच्यं। बहुव्रीहौ सप्तमीत्युक्ते तत्र कौण्डिन्यन्यायेनोपसर्जनं पूर्वत्वस्य

ईयसश्च।५।४।१५६। ईयसन्तोत्तरपदान्न कप्। बहवः श्रेयांसोऽस्य बहुश्रेयान्। गोस्त्रियोरिति ह्रस्वत्वे प्राप्ते। ईयसो बहुव्रीहेर्नेति वाच्यं
बह्व्यः श्रेयस्योऽस्य बहुश्रेयसी। बहुव्रीहेः किं। अतिश्रेयसिः। वन्दिते भ्रातुः।५।४।१५७। पूजितेऽर्थे यो भ्रातृशब्दस्तदन्तान्न कप्स्यात्। प्र
शस्तो भ्राता यस्य प्रशस्तभ्राता। न पूजनादिति निषेधस्तु बहुव्रीहौ सक्थ्यक्ष्णोरित्यतः प्रागेवेति वक्ष्यते। वन्दिते किं। मूर्खभ्रातृकः। नाडी
तन्त्र्योः स्वाङ्गे।५।४।१५९। स्वाङ्गे यौ नाडीतन्त्रीशब्दौ तदन्तात्कप् न स्यात्। बहुनाडिः कायः। बहुतन्त्रीर्ग्रीवा। बहुतन्त्रीर्धमनी। स्त्रीप्रत्यय
न्तत्वाभावान्न ह्रस्वः। स्वाङ्गे किं। बहुनाडीकः स्तम्भः। बहुतन्त्रीका वीणा। निष्प्रवाणिश्च।५।४।१६०। कबभावोऽत्र निपात्यते। प्रपूर्वाद्वयतेर्ल्युट्।
प्रवाणी तन्तुवायशलाका। निर्गता प्रवाण्यस्य निष्प्रवाणिः पटः। समासान्ताः। नवरत्नर्थाः। सप्तमीविशेषणे बहुव्रीहौ।२।२।३५। सप्तम्य
न्तं विशेषणं च बहुव्रीहौ पूर्वं प्रयोज्यं। कण्ठेकालः। अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः। चित्रगुः। सर्वनामसंख्ययोरुपसंख्यानं।

संघापनेन तोद्विशेषणग्रहणं कृतं। सर्वनामेति। कथं तर्हि तत्परोपसर्गास्तत्पर इति। कथं च जहत्स्वार्थावृत्तिरिति। इहापि जह ॥ सर्वश्वेतः। द्विशुक्लः॥
त्स्वं परं पदं जहत्स्वः सोऽर्थो यस्यामिति बहुव्रीहिगर्भो बहुव्रीहिः। यथा च स्वपरशब्दयोः सर्वनामत्वात्पूर्वनिपातेन भाव्यमिति चेदत्राहुः सूत्रभाष्यप्रयोगात्स्वपरशब्दयो
र्न पूर्वनिपातः राजदन्तादित्वाद्वा सिद्धमिति। द्विशुक्ल इति। यद्यपि सर्वनामत्वेनैव द्विशब्दस्य पूर्वनिपातत्वं सिध्यति तथापि त्रिशुक्ल इत्यादिसिद्धये वार्तिके
संख्याग्रहणं कृतं। ननु संख्याया अल्पाच्तरत्वेन सर्वनाम्नोऽभ्यर्हितत्वात् विपरीतोच्चारणमयुक्तमित्याशंक्याह॥ रामचन्द्राय नमः ॥ ॥

॥अल्पार्थवाचिकायाष्टप् इत्यर्थः गड्वादेरिति आदिशब्दः प्रकारवाची तेन पद्मनाभो यस्य पद्मनाभः उर्णनाभो यस्य ऊर्णनाभ इति ५॥

मित्रो नयोरिति। विपरीतोच्चारणमेवात्र लिङ्गमिति भावः। अल्पीयस्या इति। हृस्वः ऊर्णनाभ इति सिध्यतीत्याहुः। जातिकालेति। एतच्च जातिकालसुखादिभ्यो नाच्छादना
दित्यनेन ज्ञापितमिति भावः। सारंगो जग्धो यया सा। अस्वाङ्गपूर्वपदाद्वेति ङीष्। कथं तर्हि चारुस्मिन श्चारु हसित इत्यादि। अत्राहुः नपुंसके भावे क्तस्य न पूर्वनिपातः
निष्ठाशब्देन विहितस्यैव ग्रहणादिति। क्वचिन्नेति। आहिताग्न्यादित्वकल्पनात् अनभिधानाद्वेति भावः॥ इति बहुव्रीहिः। चार्थे द्वन्द्वः॥ अनेकमन्यपदार्थ इत्यतो
ऽनेकमित्यनुवर्तते सुबामन्त्रित इत्यस्मात् सुबपि। समास इति विभाषेति चाधिक्रियत एव तदाह। अनेकं सुबन्तमित्यादि। चार्थ इति। चशब्दद्योत्य इत्यर्थः। एक

मित्योनयोस्समासे संख्यापूर्वं शब्दपरं विप्रतिषेधात्॥ द्व्यन्यः। संख्याया अल्पीयस्याः। द्वित्राः द्वे द्वे ऽपि द्वादश। वा प्रियस्य। गुडप्रियः। प्रियगुडः
गड्वादेः परा सप्तमी॥ गडुकण्ठः क्वचिन्न। वहेगडुः॥ निष्ठा। २।२।३६॥ निष्ठान्तं बहुव्रीहौ पूर्वं स्यात्। कृतकृत्यः। जातिकालसुखादिभ्यः प
रा निष्ठा वाच्या॥ सारङ्गजग्धी। मासजाता। सुखजाता। प्रायिकं चेदं। कृतकटः। पीतोदकः। वाहिताग्न्यादिषु। २।२।३७॥ आहिताग्निः। अग्न्या
हितः। आकृतिगणोऽयं। प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ॥ अस्युद्यतः। दण्डपाणिः। क्वचिन्न विवृतासिः॥ इति बहुव्रीहिः॥ चार्थे द्वन्द्वः॥ २।
२।२९॥ अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते स द्वन्द्वः। समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः। परस्परनिरपेक्षस्यानेकस्य एकस्मिन्
न्वयः समुच्चयः। अन्यतरस्यानुषङ्गिकत्वेऽन्वाचयः। मिलितानामन्वय इतरेतरयोगः। समूहः समाहारः। तत्रेश्वरं गुरुं च भजस्वेति समुच्च
ये भिक्षामट गां चानयेत्यन्वाचये च न समासोऽसामर्थ्यात्। धवखदिरौ। संज्ञापरिभाषं। अनेकोक्तेः। होतृपोतृनेष्टोद्गातारः। द्वयोर्द्वयोर्द्वं
द्वं कृत्वा पुनर्द्वन्द्वे तु। होतापोतारौ नेष्टोद्गातारः॥ ॥ २९ सिन्निति॥ भजनादावित्यर्थः। ईश्वरं गुरुं च भजस्वेति। क्रियायां द्रव्ययोः समुच्चयो यं तथा

गुरोर्भज श्वाप्लक्षश्चेति द्रव्ये द्रव्ययोः समुच्चयः पटः शुक्लो रक्तश्चेति द्रव्ये गुणयोः। रक्तः पटः कुण्डलं चेति गुणद्रव्ययोरित्यूह्यं। भिक्षामट गां चानयेति। अत्र स्वदर्श
नाद्यमनानयन्नपि भिक्षामटत्येवानन्तरं तु भिक्षां न गामानयति। तथा अटनं विनान्विष्य गामानयन्नपि भिक्षाटनस्यैव प्राधान्यं गवानयनस्य त्वानुषङ्गिकता। अ
सामर्थ्यादिति। एकार्थीभावाभावादित्यर्थः। तथा हि बहुव्रीहिघटकपदानां कर्मादिपञ्चतत्त्वोपकल्पने वहूद्वघटकपदानां चार्थान्तर्भावेण एकार्थीभा

वृ आवश्यकः समर्थः पदविधिरिति परिभाषितत्वात् चार्थे द्वंद्व इत्युक्तेश्च। न चेतरान्वये परस्परनिरपेक्षाणामेकार्थीभावः संभवति। येन समुच्चयान्वाच-
ययोरेकार्थीभावात् न भूतोऽस्यातां। न तश्चेतरेतरयोगसमाहारे च परस्परसाहित्यसत्त्वात्समासो भवति न तु समुच्चयान्वाचययोः परं त्वितरेतरयोगे साहित्यं विशेषणं द्रव्यं तु विशेष्यं स-
माहारे तु साहित्यं प्रधानं द्रव्यं विशेषणमिति विवेक्तव्यं। ननु नीलोत्पलमित्यादौ च षष्ठ्यन्तं नभ्राविणविग्रहदर्शनादेकार्थीभावसत्त्वाच्च द्वंद्वो दुर्वारः स्यान्नैवं विशेषणं विशेष्य-
णेति सामानाधिकरण्ये विहितया तत्पुरुषसंज्ञया द्वंद्वसंज्ञाया बाधात् तस्यास्त्वसामानाधिकरण्ये सावकाशत्वात्। सामानाधिकरण्याभावविवक्षायां तु प्रमाणप्रमेये इत्यादा-
विव नीलोत्पलादावपि द्वंद्वे इष्टापत्तिरेवाहो नृपोत्रिति। उत्तरपदपरत्वाभावादनयोरानङ्॥ ॥ राजदन्तादिषु। इह द्वंद्वतत्पुरुषयोः पाठे व्यर्थधर्मादिष्वित्याद्यभिप्रायेण।

राजदन्तादिषु परं। २।२।३१॥ एषु पूर्वप्रयोगार्हं परं स्यात्। दन्तानां राजा। राजदन्तः। धर्मादिष्वनियमः। अर्थधर्मौ। धर्मार्थौ। दम्पती। जम्प-
ती। जायापती। जायाशब्दस्य जम्भावो दम्भावश्च वा निपात्यते। आकृतिगणोऽयं। द्वन्द्वे घि। २।२।३२॥ द्वंद्वे घिसंज्ञं पूर्वं स्यात्। हरिश्च हरश्च। हरि-
हरौ। अनेकप्राप्तावेकत्र नियमोऽनियमः शेषे॥ हरिगुरुहराः। हरिहरगुरवः। अजाद्यदन्तं। २।२।३३॥ द्वंद्वे पूर्वं स्यात्। ईशकृष्णौ। बहुष्वनिय-
मः। अश्वरथेन्द्राः। इन्द्राश्वरथाः। घ्यन्तादजाद्यदन्तं विप्रतिषेधेन। इन्द्राग्नी। अल्पाच्तरं। २।२।३४॥ शिवकेशवौ। ऋतुनक्षत्राणां समाक्षरा-
णामानुपूर्व्येण॥ हेमन्तशिशिरवसन्ताः। कृत्तिकारोहिण्यौ। समाक्षराणां किं। ग्रीष्मवसन्तौ। लघ्वक्षरं पूर्वं। कुशकाशं। अभ्यर्हितं च। ताप-
सपर्वतौ। वर्णानामानुपूर्व्येण॥ ब्राह्मणक्षत्रियविट्शूद्राः। भ्रातुर्ज्यायसः॥ युधिष्ठिरार्जुनौ॥

॥ २२ ॥ स्य द्वंद्वे घि। अनेकमिति सर्वे-
षामेवं प्रथमानिर्दिष्टत्वेनोपसर्जनत्वाविशेषादनियमप्राप्तावयमारंभः पक्षत्वेन कथ्यं तंत्र द्वयोरपि पूर्वनिपातनियमः स्यादत आह अनेकप्राप्तावेकत्रेति। अ-
न्याचरव्यु। आकृतौ पदार्थे समुदाये सकृल्लक्षणं प्रवर्तते न प्रतिव्यक्ति इत्युक्तत्वात्। तत्रैकस्य पूर्वनिपाते सति जातौ लक्षणं प्रवृत्तमेवेति न पुनः प्रवर्तते व्यक्तिपक्षस्त्विह नाश्री-
यते लक्ष्यानुरोधादिति। हरिहरगुरव इत्यत्र हरगुरुशब्दयोर्नेति नियमः प्रवर्तत इति भावः। अजाद्यदन्तं। समुद्राभ्राद्घः लक्षणहेत्वोः क्रियाया इत्यादिनिर्देशादनित्यमिदं प्रक-
रणं। तेन समासे वैरस्ये विशेषशालिनामिति भारविप्रयोगस्य संगतिः। अल्पाच्तरं। अत एव निपातनात् स्वार्थे तरप् एकत्वचत्वयोरभावश्च। यदि तु प्रकर्षे तरप् स्यात्तदा द्व-

सि.कौ.
टी.त.
३७८

दो रेव नियमः स्याद् द्विवचनांतोपपदत्वविषय एव तरपो विधानात् तेन श्वधवखदिरपलाशा इत्यादौ बहुषु नियमो न स्यात्। ऋतुनक्षत्राणामिति। ऋतूनामानुपूर्व्यं प्रादुर्भावकृ
तं नक्षत्राणां तूदयकृतं। अभ्यर्हितं चा वासुदेवार्जुनाभ्यां वुन्निति निर्देशेनेदं ज्ञाप्यत इति चतुर्थभाष्ये। अल्पाच्तरमजाद्यदंतमिति सूत्राभ्यामर्जुनस्य पूर्वनिपाते प्राप्ते तमकुर्व
न् ज्ञापयति सर्वतोभ्यर्हितं पूर्वमिति तत्रैव सूत्रे वक्ष्यते युधिष्ठिरार्जुनाविति। इंद्रपुत्रत्वादिलिंगैः शत्रुत्वाच्छूरत्वाद्वा अभ्यर्हितत्वमर्जुनेप्यस्तीति न तेन नियमः सिध्यतीति भावः
॥ ॥ द्वंद्वश्च प्राणि। प्राणितूर्यसेनानामंगानीति बहुवचनांतेनांगशब्देन षष्ठीसमासः अंगशब्दश्च प्रत्येकमन्वेति तेन प्राण्यंगानां प्राण्यंगैरेव तूर्यांगानां तूर्यांगैरेव सेनां
गानां सेनांगैरेव यो द्वंद्वस्स एकवद्भवति न तु व्यतिकरेण तेनेह न। मार्दंगिकाश्वारोहौ। अत्र प्राणिसेनयोरंगनामावयवः तूर्यस्य त्वंगनामोपकारकं बोध्यं। एषां द्वंद्व

द्वंद्वश्च प्राणितूर्यसेनांगानाम्। २।४।२। एषां द्वंद्व एकवत्स्यात्। पाणिपादं। मार्दंगिकपाणविकं। रथिकाश्वारोहं। समाहारस्यैकत्वादेकत्वे सिद्धे नियमार्थमिदं प्रकरणं। प्राण्यंगादीनां समाहार एव यथा स्यात्। अनुवादे चरणानाम्। २।४।३। चरणानां द्वंद्व एकवत्स्यात् सिद्धस्योपन्यासे स्थेणोर्लुङीति वक्तव्यं॥ उदगात्कठकालापं। प्रत्यष्ठात्कठकौथुमं। अध्वर्युक्रतुरनपुंसकम्। २।४।४। यजुर्वेदे विहितो यः क्रतुस्तद्वाचिनामनपुंसकलिंगानां द्वंद्व एकवत्स्यात्। अर्काश्वमेधं। अध्वर्युक्रतुः किं। इषुवज्रौ। सामवेदे विहितौ। अनपुंसकं किं। राजसूयवाजपेये। अर्द्धर्चादी। अध्ययनतोऽविप्रकृष्टाख्यानाम्। २।४।५। अध्ययनेन प्रत्यासन्ना आख्या येषां तेषां द्वंद्व एकवत्। पदकक्रमकं॥ ॥ ॥ ॥

ति। प्राण्यंगानां द्वंद्व तूर्यांगानां द्वंद्व सेनांगानां द्वंद्व इत्यर्थः। द्विगुरेकवचनमित्यत एकवचनं वर्त्तते। तत्रैकं वक्तीति व्युत्पत्त्या एकत्वविशिष्टः समाहाररूपो योर्थस्तत्प्रतिपाद
कः स्यादित्यर्थसंपन्नं फलितमाह। एकवत्स्यादिति। पाणिपादमिति। यद्यप्यत्र जातिरप्राणिनामित्येव सिद्धं तथापि द्रव्यप्राधान्येपि भवत्विति प्राणिग्रहणमित्येके। पाणि
दण्डौ वर्तेते व्यतिकरे माभूदिति नियमार्थवचनमित्यन्ये। मार्दंगिकेति। मृदंगवादनं शिल्पमस्येत्यर्थे शिल्पमिति ठक्। एवं पाणविक इत्यपि रथिकाश्वारोहमिति। रथै
श्चरंतीति रथिकाः पर्पादिभ्यः ष्ठन्निति ष्ठन्। ते चाश्वारोहाश्च तेषां समाहारः। ननु चार्थे द्वंद्व इत्यनेन समाहारद्वंद्वसिद्धस्तस्य चैकत्वादेकवचनमपि सिद्धमिति किमने
नेत्याशंक्याह नियमार्थमिति। समाहार एवेति। समाहारे प्राण्यंगादीनामेवेति विपरीतनियमोत्र न भवति। तिष्यपुनर्वस्वोरिति सूत्रे बहुवचनग्रहणं त्विह समाहा

रैकवचनस्य[illegible]तं मा भूदिति कृतमन्यथा तिष्यपुनर्वसू [illegible] तेन स्यादिति। एवं च द्वंद्वश्च प्राणितूर्यसेनाङ्गानामिति प्रकरणबहिर्भूतानामपि समाहारद्वंद्वो भवत्येव तेन सर्वो द्वंद्वो विभाषैक
वद्भवतीति पक्ष्ये मानं नापूर्ववचनमिति ज्ञेयं। चरणानामिति। शाखाध्येतृवाचिनामित्यर्थः। स्थेणोरिति। ष्ठा गतिनिवृत्तौ। इण् गतौ। स्थाप्रकृतिक इण्प्रकृतिक लुङन्ते उपप
देऽवगन्तव्ये। स्थेणोः किं। अभूवन् कठकालापाः। लुङि किं। तिष्ठन्तु कठकालापाः उदगादिति। इह यदा कठेषु कालापेषु च प्रतिष्ठितेषु उदितेषु चावाभ्यां गन्तव्यमिति
संकेत[illegible]केतं विस्मृत्यासीनं प्रतीदमुच्यते। कठेन प्रोक्तमधीयते कठाः। वैशंपायनान्तेवासित्वात् णिनि कलापस्य कठचरकादिति लुक्। अध्येतृणां सुप्रोक्तात् लुगिति

जातिरप्राणिनाम्। २।४।६॥ प्राणिवर्ज्जजातिवाचिनां द्वंद्व एकवत्। धानाशष्कुलि। प्राणिनां तु। विट्शूद्राः। द्रव्यजातीनामेवेनेह। रूपरसौ। गम
नाकुञ्चने। जातिप्राधान्य एवायमेकवद्भावः। द्रव्यविशेषविवक्षायां तु। बदरामलकानि॥ विशिष्टलिङ्गो नदी देशोऽग्रामाः। २।४।७॥ ग्रामवर्ज्जा
नदीदेशवाचिनां भिन्नलिङ्गानां समाहारे द्वन्द्वः स्यात्। उद्ध्यश्चैरावती च। उद्ध्येरावति। गङ्गा च शोणश्च। गङ्गाशोणं। कुरवश्च कुरुक्षेत्रं च। कुरुकुरु
क्षेत्रं। भिन्नलिङ्गानां किं। गङ्गायमुने। मद्रकेकयाः। अग्रामाः किं। जाम्बवन्नगरं। शालूकिनी ग्रामः। जाम्बवशालूकिन्यौ। क्षुद्रजन्तवः। २।४।८॥
एषां समाहारे द्वंद्वः स्यात्। यूकालिक्षं। आनकुलात् क्षुद्रजन्तवः॥ येषां च विरोधः शाश्वतिकः। २।४।९॥ एषां प्राग्वत्। अहिनकुलं। गोव्याघ्रं
। काकोलूकमित्यादौ परत्वाद्विभाषा वृक्षमृगेति प्राप्तं चकारेण बाध्यते॥ शूद्राणामनिरवसितानाम्। २।४।१०॥ अबहिष्कृतानां शूद्राणां
प्राग्वत्। तक्षायस्कारं। पात्राद्बहिष्कृतानां तु। चाण्डालमृतपाः॥ ॥

९ लुक्। कलापिनोऽण्। सब्रह्मचारीत्यादावुपसंख्यानात् लोपः। यजुरि
ति। सूत्रे अध्वर्युशब्दो यजुर्वेदलक्षक इति भावः। पदकेति। पदान्यधीते पदकः। क्रमादिभ्यो वुन्। एवं क्रमकोऽपि। पदान्यधीत्य क्रमोऽध्येतव्य इति स्पष्टा प्रत्यासत्तिरा
ध्यापनतः किं। पितापुत्रौ। अविप्रकृष्टेति किं। याज्ञिकनैयायिकौ। जातिर। जातिवाच्यवयवको द्वंद्वोऽपि जातिरित्युपचर्यत इत्याशयेनाह। जातिवाचिनामि
ति। विट्शूद्रा इति। जातिप्राधान्येऽपि बहुवचनमुपपद्यते। जात्याख्यायामेकस्मिन्निति विधानात् नेनात्र द्वंगविकल्प इति भावः। द्रव्यजातीनामेवेति। अप्राणिनामि
[illegible] वयुक्तन्यायेन द्रव्यजातीयानामेकवद्भावो न तु गुणक्रियाजातीयानामिति भावः। जातिः किं। नंदकपांचजन्यौ। संज्ञाशब्दावेतौ। जातिप्राधान्य एवेति

एतेन च जातिग्रहणं लब्धमन्यथा पर्युदासेनैव जात्युपसर्जनद्रव्यवाचिनोपि ग्रहणोपपत्तौ किं तेनेति भावः। द्रव्यविशेषेति। नन्वेवं रंजितानुविविधास्तरुशैला इति
भाः विपर्ययो न संगच्छत एवेति किमिति तरुसहिताः शैला इति मनोरमायां समर्थितमिति चेदत्राहुः। संकलतरुशैलरंजनं तत्र विवक्षितं न तु केषांचित्तरुशै
लविशेषाणामिति जातिप्राधान्यादेकवद्भावमाशंक्य तथोक्तमिति। बदरामलकानीति। फले लुगिति लुक्। लुक्तद्धितलुकीति स्त्रीप्रत्ययस्यापि लुकि फलत्व
जात्युपसर्जनद्रव्यवचनावेतौ विभाषा वृक्षमृगेति सूत्रे बदराणि चामलकानि च बदरामलकं जातिरप्राणिनामित्येकवद्भाव इति वक्ष्यति नन्वनेनाप्र
योगो विरुध्यते। फलत्वजातिवाचिनां बहुवचनान्तानामेव द्वंद्व एकवद्भवति न त्वेकवचनान्तानां द्वंद्व इति फलसेनावनस्पतीति वार्तिकोक्तनियममुपे
त्यैतत्प्रवृत्तेः। विशिष्टलिंगो। सूत्रे चत्वारोपि शब्दा अवयवधर्मेणावयविनिर्देशे वर्त्तन्त इत्याशयेनाह। ग्रामेत्यादि। इह नदीवाचिनां द्वंद्वे देशवाचिनां
द्वंद्वे इति वाक्यभेदेन व्याख्येयं तेन गंगाकुरुक्षेत्रे इत्यत्र न भवति। देशशब्देनात्र प्रसिद्ध एव जनपदो गृह्यते। नद्याः पृथग्ग्रहणात्तेन पर्वतानां न। कैला
सश्च गंधमादनं च कैलासगंधमादने। नदीदेशादिति किं। कुक्कुटमयूर्यौ। विशिष्टपरस्यार्थमाह भिन्नलिंगानामिति क्विपूर्वो हि शिषिर्भेदार्थः। अत एव विशेषणं वि
शेष्येणेति सूत्रे भेदकं भेद्येनेति व्याख्यातं समाहारे द्वंद्वः स्यादिति। निष्कर्षाभिप्रायेणेयमुक्तिः। यथाश्रुताभिप्रायेण तु द्वंद्व एकवत्स्यादिति केषुचित्सूत्रेषु व्याख्या
यत इति ज्ञेयं। उध्येरावत्यौ इति। उध्यो नदः। सोपि नदीविशेषत्वान्नदीशब्देन गृहीतः। एवं शोणोपि। अग्रामा इत्यत्र नगरप्रतिषेधो वक्तव्यस्तेन मथुरापाटलिपुत्रे
इत्यत्र निषेधो न भवति। उभयोरपि नगरत्वात्। क्षुद्रा अपचितपरिमाणत्वं क्षुद्रत्वं। तच्चापेक्षिकत्वादनवस्थितं। यच्च स्मर्यते। क्षुद्रजंतुरनस्थिः स्यादथ वा क्षुद्र
एव [illegible] प्रसृतौ येषां केचिदानकुलादपीति। तत्र सर्वपक्षसाधारण्येनोदाहरति। यूकालिक्षमिति। आनकुलादिति। नकुलपर्यंता इत्यर्थः। येषां च विरोधः
विरोधः [illegible] न तु सहानवस्थानं तेनेह न। छायातपौ। शश्वदित्यव्ययं त्रैकाल्ये वर्त्तते तत्र भवः शाश्वतिकः [illegible]। अत एव निपातनादि[illegible]तादिति
[illegible] अव्ययानां भमात्र इति टिलोपश्च न। शाश्वतिकः किं। देवासुरैरमृतमंबुनिधिर्ममंथे तेषां त्वमृतादि ———— पयु
क्तः कादाचित्को विरोधो न तु नित्यः। मंथनप्रवृत्तिकाले तद्विरहात्। परत्वादिति। पशुशकुनिद्वंद्वस्यावकाशो गोमहिषं गोमहिषाः। हंसचक्रवाकं हंसचक्र

काकाः येषां चैतस्या वकाशः मार्जारमूषकं । श्वमण्डू [illegible] ब्राह्मणमित्यादौ द्वंद्वेपि चकारेण बाध्यत इति । चकारः पुनर्विधायक इति भावः । शूद्राणां त्रैवर्णिकेतरमनुष्यपरः शू
द्रशब्दो न तु शूद्रत्वजातिपरः । अनिरवसितानामि । निरवधानपात्रादिति । यैर्भुक्ते भस्मना शुध्यते कांस्यमित्यादिस्मृत्युक्तसंस्कारेणापि पात्रं न शुध्यति तेषामित्यर्थः ॥
॥ गवाश्वम् । यथोच्चारितानीति । गणपाठपाणिनिना [illegible] पठितानि तथैव साधूनीत्यर्थस्तेनाबडः पाक्षिकत्वाद्दराना [illegible] तदा उत्तरसूत्रेण विकल्पेन भवति गो
अश्वं [illegible] वा अन्ये गोश्वम् एपशवो गोअश्वाः । गवाश्वमिति । इह पशुद्वंद्वविभाषया मा । दासीदासमिति । अत्र पुमान्स्त्रियेत्येकशेषो बाध्यते । विभाषावि
गवाश्वप्रभृतीनि च । २।४।११ ॥ यथोच्चारितानि साधूनि स्युः । गवाश्वं । दासीदासमित्यादि । विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्व
वडवपूर्वापराधरोत्तराणाम् । २।४।१२ ॥ वृक्षादीनां समानां द्वन्द्वः । अश्ववडवेत्यादि द्वंद्वत्रयं च प्राग्वत् । वृक्षादौ विशेषाणामेव ग्रहणं । प्ल
क्षन्यग्रोधं । प्लक्षन्यग्रोधाः । रुरुपृषतं । रुरुपृषताः । कुशकाशं । कुशकाशाः । व्रीहियवं । व्रीहियवाः । दधिघृतं । दधिघृते । गोमहिषं । गोमहिषाः । शु
कबकं । शुकबकाः । अश्ववडवं । अश्ववडवौ । पूर्वापरं । पूर्वापरे । अधरोत्तरं । अधरोत्तरे ॥ फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृ
णानां बहुप्रकृतिरेव द्वंद्व एकवदिति वाच्यं । बदराणि चामलकानि च । बदरामलकं । जातिरप्राणिनामित्येकवद्भावो नेह । बदरामलके ॥ र
थिकाश्वारोहौ । प्लक्षन्यग्रोधौ । इत्यादि । विभाषा वृक्षे । तत्सूत्रेप्राणिनस्तेषां ग्रहणम् । जातिरप्राणिनामिति नित्यप्राप्ते विकल्पार्थं । पशुग्र
हणं हस्त्यश्वादिषु सेनाङ्गत्वान्नित्ये प्राप्ते । मृगाणां मृगैरेव शकुनीनां तैरेवोभयत्र द्वन्द्वः । अन्यैस्तु सह इतरेतरयोग एवेति नियमार्थं मृगशकुनि
ग्रहणम् । एवं पूर्वापरमधरोत्तरमित्यपि । अश्ववडवग्रहणं तु पक्षे नपुंसकत्वार्थं । अन्यथा परत्वात्पूर्ववदश्ववडवाविति स्यात् ॥ ॥
शेषाणामेवेति । अयं भावः । वृक्षादिशब्दैः प्रत्येकं द्वंद्वो विशेष्यते न चैको वृक्षशब्दो द्वंद्वः । न च द्वयोः सह प्रयोगः । सरूपाणामित्येकशेषात् । नापि पर्यायाणां विरूपा
णामपि समानार्थानामित्येकशेषात् । नापि वृक्षधवश्चेत्यादिसा [illegible] न्यविशेषयोः अनभिधानात्तत्र द्वंद्वस्यैवाभावादिति । सर्वप्रकरणशेषतया नियममाह । फलसेने
त्यादि फलसेनादीनां द्वंद्वो विभाषा वृक्षमृगेत्यनेन लक्षणान्तरेण वा । कबद्धवन्बहुप्रकृतिरेवएकवद्भवतीत्यर्थः । बहवो वर्त्तिपदार्था बहुवचनान्तावा प्रकृतिः कारणं

स॰
टी॰
४६

पस्य सवहुश्रुतानि। वदराणि चामलकानि चेति। जात्याख्यायामेकस्मिन्निति वैकल्पिकं बहुवचनं। बदरामलके इति। जातिप्राधान्येप्येकवचनं। तयोर्द्वंद्व इति नास्त्येकवद्भा
वे इति भावः। पशुग्रहणमिति। विकल्पार्थमित्यनुषज्यते। चार्थे द्वंद्व इत्यनेनैव सिद्धे मृगशकुनिग्रहणं प्रतिपदविधानार्थं। तेनाश्ववडवमित्येकवद्भावपक्षे पूर्ववदश्ववडवौ
विलितद्धाधिलिंगे सनपुंसकमित्येतदेव भवति। स इति तच्छब्देन स्वैकवद्भावभाजं परामृश्य विधीयमानं नपुंसकत्वं एकवद्भाववदेव प्रतिपदविहितं भवति तथा च प्रतिपदो
क्तमवृत्तीयस्त्वान्नपुंसकत्वं सिध्यतीति॥ ॐ ॥ विप्रतिषिद्धं॥ अधिकरणमिह द्रव्यं। चकारो विभाषानुकर्षणार्थस्तदेतद्व्याचष्टे विरुद्धार्थानामित्यादि उदाहरणं
तु शीतोष्णे सुखदुःखं सुखदुःखे इत्यादि विरोधोत्र सहानवस्थानलक्षणः। भवत्येवेति। विप्रतिषिद्धग्रहणाभावे तु स न स्यात्। अद्रव्यवाचिनामेवेति नियमादिति भा

विप्रतिषिद्धं चानधिकरणवाचि। २।४।१३॥ विरुद्धार्थानामद्रव्यवाचिनां द्वंद्व एकवद्वा स्यात्। शीतोष्णं। शीतोष्णे। वैकल्पिकस्समाहार
द्वंद्वः स्यादेवेति सूत्रेण प्राप्तः। स विरुद्धार्थानां यदि भवति तर्हि अद्रव्यवाचिनामेवेति नियमार्थमिदं। तेन द्रव्यवाचिनामितरेतरयोग एव
शीतोष्णे उदके स्तः। विप्रतिषिद्धं किं नन्दकपाञ्चजन्यं नन्दकपाञ्चजन्यौ इह पाक्षिकः समाहारद्वंद्वो भवत्येव। न दधिपय आदीनि। २।४।१४॥ एतानि नैकव
त्स्युः। दधिपयसी। इध्माबर्हिषी। निपातनाद्दीर्घः। ऋक्सामे। वाङ्मनसे। अधिकरणैतावत्त्वे च। २।४।१५॥ द्रव्यसंख्यावगमे एकवदेवेति नि
यमो न स्यात्। दश दन्तोष्ठाः। विभाषा समीपे। २।४।१६॥ अधिकरणैतावत्त्वस्य सामीप्येन परिच्छेदे समाहार एवेत्येवंरूपो नियमो वा स्यात्। उपदशं

वः। अनधिकरणवाचीति किं। शीतोष्णे उदके स्तः इह पाक्षिकः समाहारद्वंद्वोपि स्यादिति दिक्। न दधिपय। दधीपयसी इति। व्यंजनं॥ ॥ दन्तोष्ठं। उपदशाः दन्तोष्ठाः।
बर्हिः [illegible]ः। एवं मधुसर्पिषी। सर्पिर्मधुनी इत्यत्रापि नोभ्यः इह ब्रह्मप्रजापती शिववैश्रवणौ विन्यादौ समाहारद्वंद्वनिषेधमुखेनेतरेतरयोगद्वंद्वोऽनेन व्यव।
स्थाप्यते तेन साहचर्याद्दधिपयसी इत्यादावपि तथैव। तेन तत्र व्यंजनत्वप्रयुक्तविकल्पनिषिद्धेपि जातिलक्षणो नित्यमेकवद्भावो स्यादिति न शंकनीयं। किंच नेह लक्षण
विशेषे आग्रहः। एतानि नैकवत्स्युरित्येकवद्भावमात्रस्य निषेधात्। यथा न षट्स्वस्रादिभ्य इत्यत्र औपटापोरुभयोरपि निषेधसिद्धये स्त्रियां यदुक्तं तन्नेति सामान्यतो नि
षिध्यत इति दिक्। ऋक्सामे वाङ्मनसे इति। अचतुरेत्यादिनात्र समासान्तो निपात्यते॥ अधिकरणे। समासार्थस्याश्रयोधिकरणं वर्तिपदार्थस्तस्यैतावत्त्वं परिमा

मकाभावात् एतेनऋत इति कार्यिनिर्देशार्थमित्युक्तत्वान्निर्दिश्यमानस्य ऋकारस्यैवादेशः स्यादिति ङित्कालां व्यर्थमित्याशंकापि परास्ता नेष्टोद्गातार इति। नह्यत्र नेष्टा पूर्वपदं आ
नवयवस्यैव पूर्वपदत्वात्। मातापितराविति। पुत्रोत्पादने अनयोर्योनिकृतसंबंधः। पूर्वत्र तु होत्रादिरूपविद्याकृतः संबंध एकस्मिन्पक्षे आर्त्विज्यरूप इति विवेकः। मङ्कु
ल नेति। तेन द्विभाषा स्वसृपत्योरित्यत्र न संबध्यत इति भावः॥ ॥ पितापुत्राविति। अनयोरपि योनिकृतसंबंधो जन्यजनकभावलक्षणः। देवता अनृकारान्ता
र्थमविद्यायोनिसंबंधार्थं च वचनं। ईदग्नेः आनङोपवादोयं। देवताद्वंद्व इत्येवेति। इदं च दृतिनिगर्थे स्थितं ज्योतिर्लतयोर्देवताद्वंद्वेप्यग्नीषोमौ प्रणेष्यामीत्याश्वलायन

पितापुत्रौ। देवताद्वंद्वे च। ६।३।२६॥ इहोत्तरपदे परे आनङ्। मित्रावरुणौ। वायुशब्दप्रयोगे प्रतिषेधः। अग्निवायू वाय्वग्नी। पुनर्द्वंद्वग्रहणं
प्रसिद्धसाहचर्यस्य परिग्रहार्थं। तेन ब्रह्मप्रजापती इत्यादौ नानङ्। एतद्धि नैकहविर्भागित्वेन श्रुतं नापि लोके प्रसिद्धसाहचर्यं॥ ईदग्नेः सोमवरु
णयोः। ६।३।२७॥ देवताद्वंद्व इत्येव। अग्नेः स्तुतस्तोमसोमाः। ८।३।८२॥ अग्नेः परेषामेषां सस्य षः स्यात्समासे। अग्निष्टुत्। अग्निष्टोमः। अग्नी
षोमौ। अग्नीवरुणौ। इद्वृद्धौ। ६।३।२८॥ वृद्धिमत्युत्तरपदे अग्नेरिदादेशः स्याद्देवताद्वंद्वे। अग्नामरुतौ देवते अस्य आग्निमारुतं कर्म। अग्नीवरु
णौ देवते अस्य। आग्निवारुणं। देवताद्वंद्वे चेत्युभयपदवृद्धिः। अलौकिकवाक्ये आनङ् मीत्वं च बाधित्वा इद्वृद्धौ किं। आग्नेन्द्रः। नेन्द्रस्य परस्ये
त्युत्तरपदवृद्धिनिषेधः। विष्णौ न। आग्नावैष्णवं। दिवो द्यावा। ६।३।२९॥ देवताद्वंद्वे उत्तरपदे। द्यावाभूमी। द्यावाक्षामे। दिवसश्च पृथिव्यां। ६।
३।३०॥ दिव इत्येव चात् द्यावा। आदेशे अकारोच्चारणं सकारस्य रुत्वं मा भूदित्येतदर्थं। द्यौश्च पृथिवी च। दिवस्पृथिव्यौ। द्यावापृथिव्यौ। छन्दसि
दृष्टानुविधिः। द्यावा चिदस्मै पृथिवी। दिवस्पृथिव्यौ। इरतिरित्यत्र पदकारा विसर्गं पठन्ति। उषासोषसः। ६।३।३१॥ उषस्शब्दस्योषासादेशो देवताद्वं

द्वे। न प्रयोगस्त्वार्षत्वात्साधुः। यद्वा मासु तदस्तु इति। अग्निसोमौ णावकावित्यत्राभिव्यक्तपदार्था ये स्वतंत्रा लोकविज्ञाता इति न्यायेनादोषत्वात्। अग्नेः। सात्पदाद्योरिति निषे
धे प्रमारंभः। अग्निष्टुदिति। अग्निः स्तूयते अनेन विग्रहः। संपदादित्वादधिकरणे क्विप्। अग्निष्टोम इति। अग्नी नांस्तोमोप्यिष्टोमः सोमयागस्य संस्था सा यासे
ष्या उच्यते। इद्वृद्धौ। तकार उच्चारणार्थः। इकारस्य विधानं तु वाधकबाधनार्थं। वृद्धिशब्देनात्र वृद्धिमद्गृह्यते। वृद्धिमात्रस्योत्तरपदस्यासंभवादिति व्याचष्टे।

इति मनुवरयद इति। आनङमीत्वं च बाधित्वेति। यद्यपि द्वंद्वः प्रागेव आनङित्वयोरंतरंगत्वात्प्रवृत्तिरस्ति तथापि परित्वात्पवादविषयमुत्सर्गोऽभिनिविशत इति न्यायाद
नङित्वेन भवत इति भावः। अग्नाविष्णू वा इति। ... भावे नड एव भवति। रुत्वं माभूदिति। अकारे सति सकारस्य श्रवणं भवति तेन प्रयोगे विकाराभावोऽनुमीयत इति भावः।
विसर्गमिति। तथा च क्वचिद्विकारो नेत्येवानुमेयं लक्ष्यानुरोधादिति भावः। उषासासूर्यमिति। उषाश्च सूर्यश्च तयोः समाहारः॥ ॥ मातरपितरौ। मातृशब्दस्यानङ् दे
शनिपातनात् द्वंद्वात्। अंतग्रहणं किमर्थं चु इति वर्गग्रहणस्य प्रयोजनं ध्वनयति। त्वक्स्रजमिति। बहूनां द्वंद्वे तु वाक्त्वक्स्रजं। द्वंद्वगर्भे द्वंद्वे तु वाक्त्वचस्रजं इति
द्वंद्वः द्वंद्वापवादत्वेनाह अथैकशेष इति। विरूपाणामिति। रूप्यते बोध्यत इति व्युत्पत्त्या सौत्रस्य रूपशब्दस्यार्थपरतापि व्याख्यानात्सूत्राक्षरैरेव लब्धुं शक्यत इति भा

मातरपितरावुदीचाम्। ६।३।३२। मातरपितरौ। उदीचां किं। मातापितरौ। द्वंद्वाच्चुदषहांतात्समाहारे। ५।४।१०६। चवर्गांताद्दषहांताच्च द्वं
द्वात् टच् स्यात् समाहारे। वाक्त्वचं। त्वक्स्रजं। शमीदृषदं। वाक्त्विषं। छत्रोपानहं। समाहारे किं। प्रावृट्शरदौ॥ इति द्वंद्वः॥ अथैक
शेषः। सरूपाणां। रामौ। रामाः। विरूपाणामपि समानार्थानां॥ वक्रदण्डश्च कुटिलदण्डश्च। वक्रदण्डौ। कुटिलदण्डौ। वृद्धो यूना तल्लक्षणश्चेदे
वविशेषः। १।२।६५। यूना सहोक्तौ गोत्रं शिष्यते गोत्रयुवप्रत्ययमात्रकृतं चेत्तयोः कृत्स्नं वैरूप्यं स्यात्। गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ। वृद्धः
किं। गर्गगार्ग्यायणौ। यूना किं। गर्गगार्ग्यौ। तल्लक्षणः किं। भागवित्तिभागवित्तिकौ। कृत्स्नं किं। गार्ग्यवात्स्यायनौ। स्त्री पुंवच्च। १।२।६६।
यूना सहोक्तौ वृद्धा स्त्री शिष्यते तदर्थश्च पुंवत्। गार्गी च गार्ग्यायणश्च। गार्ग्यौ। अस्त्रियामित्यनुवर्त्तमाने यञञोश्चेति लुक्। दाक्षी च दाक्षायणश्च।

गोत्रं वक्ष्यमाणत्वात्तं वृद्धो यूना। अपत्यमंतर्हितं वृद्धमिति पूर्वाचार्यैः परिभाषितस्य पाणिन्युक्तगोत्रापरपर्यायस्येह ग्रहणं कृत्रिमेण यूना साहचर्यात्तदाह। गोत्रं शिष्यत इति।
गोत्रं यूनेत्येव तु न सूत्रितं। अपत्याधिकारादन्यत्र लौकिकगोत्रग्रहणमिति सिद्धांतेन औपगवश्चानंतरः औपगविश्च युवेत्यत्र नैकशेषः। भागवित्तीति। भागवित्तस्य गोत्रापत्यं भागवि
त्तिः तस्य यूनि वृद्धाट्ठक् सौवीरेषु बहुलमिति कुत्सायां ठक्। इह कुत्सा सौवीरत्वं चाधिकमपेक्ष्यते न तु युवत्वमात्रकृतं वैरूप्यं। गार्ग्यवात्स्यायनाविति। इह प्रकृत्यंशे वैरूप्यं न गोत्रादि
कृतं। स्त्री पुंवच्च। वृद्धा स्त्रीति। गोत्रप्रत्ययांतस्त्रीवाचक इत्यर्थः। पुंवद्भावकृतं वैलक्षण्यं स्फुटीकर्तुं द्विवचनोत्पन्नविग्रहमाह। गार्ग्यायणाविति। अनुवर्त्तमान इति। तद्राजस्य बहुषु

सि॰कौ॰
टी॰त॰
१९८

पुंवदित्यप्राप्तातिदेशस्य फलमनेन दर्शितमन्यथा स्त्रीत्वस्यानिवर्त्तनात् ह्रस्वः स्यात गार्ग्यायण्येत्यत्र न त्वं च सिद्धं। प्रातिदेशेतु नैनन्न सिध्येत सामान्यातिदेशो विशेषानतिदेशादित्याहुः।
वृद्धोयूनेत्यस्याप्यनुवर्त्तनान्नेह। गार्गी च वात्स्यायनौ च॥ ॥ पुमान् स्त्रिया। वृद्धोयूनेति निवृत्तं। सरूपाणामिति त्वनुवर्त्तते। भ्रातृपुत्राविन्युत्तर सूत्रारंभात्। तेन हंसश्च वरटा
चेत्यत्र न भवत्यन्यथा स्यादेवातिप्रसंगः। हंसत्वजातिसाम्येन शब्दैकलक्षण्यस्य स्त्रीत्वपुंस्त्वमात्र प्रयुक्तत्वात्। स्यादेतत्। गौरियं गौश्चायं तयोस्सहोक्तौ एतौ गावाविति नियमतो न
स्यात् तल्लक्षण एव विशेषाभावात् किं तु स्त्रीवाचकस्य पुंवाचकस्य वा सरूपाणामित्येकशेषः नियमेन स्यात्। अत्राहुः। तदितर कृत विशेषाभावेन तात्पर्यान्न दोष इति। इंद्रेद्राण्याविन्या
दौ नैकशेषो भवति। स्त्रीत्वपुंस्त्वेतर पुंयोगकृत विशेषस्य सद्भावात् स्यादेतत्। एतौ गावाविति नियमतो न स्यादिति मनोरमादौ यदुक्तं तत्कथं संगच्छतां। त्यदादितः शेषे पुन्न
पुंसकतर इति नियम प्रवृत्त्या स्त्रीवाचि गोशब्दस्य शेषे पि एतौ गावाविति नियमतः प्रयोगः सिध्यत्येवेति चेदत्र केचित्। दिक्प्रदर्शनमात्रमिदं। नीलो गावौ सुंदरौ गावाविति नियम

पुमान् स्त्रिया। १।२।६७॥ स्त्रिया सहोक्तौ पुमान् शिष्यते तल्लक्षणः एव विशेषश्चेत्। हंसी च हंसश्च। हंसौ॥ भ्रातृपुत्रौ स्वसृदुहितृभ्याम्। १।२।६८॥ भ्राता
च स्वसा च। भ्रातरौ। पुत्रश्च दुहिता च। पुत्रौ॥ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्। १।२।६९॥ अक्लीबेन सहोक्तौ क्लीबं शिष्यते तच्च वा एक
वत् स्यात् तल्लक्षणः एव विशेषश्चेत्। शुक्लः पटः। शुक्ला पटी। शुक्लं वस्त्रं। तदिदं शुक्लं। तानीमानि शुक्लानि॥ ॥ ९ तोनस्यादित्युदाहर्त्तव्यमथवा एत
शब्दो ध्वादंतः कर्बुरवाची। एता श्च एता च एतौ गावौ कर्बुरौ गावौ सरूपाणामित्यनेन स्त्रीलिंगशेषे तु एते गावावित्यपि स्यादिति यथा श्रुतमेव समर्थनीयमित्याहुः। तदपरे न स
हंते त्यदादितः शेष इति नियमाः प्रवृत्तावपि पुमान् स्त्रियेति नियम प्रवृत्त्या नीलो गावावेतौ गावाविति नियमतः सिध्यत्येवेति। अत्र वदंति। अहं द्वंद्वतत्पुरुषविशेषणानामित्येत
स्याः प्रसिद्धमेव वचनं विशेष्यवल्लिंगं तद्विशेषणेष्वपीति सर्वसंमतत्वात्। एवं च द्वंद्वतत्पुरुषविशेषणेष्विव एकशेषविशेषणेष्वेतादृशं त्यदादितः शेष इत्यादि नियमाः
प्रवृत्ता विशेष्यगतमेव लिंगं भवतीति स्त्रीवाची गोशब्दस्य शेषे एते इति स्यादेवेत्य तौ गावाविति नियमतो न स्यादित्यादौ पः संगच्छत एवेति दिक्। नपुंसकमन। अन्यतरस्यां
ग्रहणमेकवद्भावेनैव नान्तर्यात् संबध्यते नत्वेकशेषेणान्यथा नित्यप्रयोजनाह। क्लीबं शिष्यते तच्च वा एकवदिति। अनपुंसकेनेति किं। शुक्लं च शुक्लं च शुक्ले। अत्रैकवच्चेति न भवति। अ
स्य ग्रहणम् स्यैकशेषस्य एकवद्भावो यथा विज्ञायेत तस्यैवार्थमन्यथा उत्तरत्राप्येकवदित्यस्यानुवृत्तिः शंक्येत। शुक्लः पट इत्यादि। शुक्लः शुक्ला शुक्लमित्येवविग्रहः पटः पटी

पिता मात्रा। श्वशुरः श्वश्र्वा। नन्वेतत्सूत्रद्वयं व्यर्थं पितृ[illegible]शब्देन मातापित्रोः श्वशुरशब्देन तु श्वश्रूश्वशुरयोर्लक्षणया बोधसंभवात् न च सरूपाणामित्यादि
सूत्रसमूहवदिदमपि सूत्रद्वयं द्वंद्वनिवृत्त्यर्थं दावश्यकमिति वाच्यं पक्षे तस्यापि दृष्टत्वादिति चेदत्राहुः। पितृश्वशुरशब्दयोरिव मातृश्वश्रूशब्दयोः केवलयोरुक्तविष
येपि योगं विना पितृमातृभ्यामेव सूत्रद्वयमनभिधान[illegible]श्रित्य प्रत्याख्यानस्यानुचितत्वादिति। मातापितराविति। पितुर्दशगुणं माता गौरवेणातिरिच्यत इति स्मृतेर्मा
तुरभ्यर्हितत्वात्पूर्वनिपातः। आनङृतो द्वन्द्व इत्यानङ्। श्वश्रूश्वशुराविति। श्वश्रूः पूर्वजपत्नी च मातृतुल्याः प्रकीर्तिता इति स्मृतेः श्वश्र्वा अभ्यर्हितत्वात्पूर्वनिपातः। त्यदादी
नि सर्वैः। किं। त्यदादिभिरन्यैरपि सहोक्तौ यथा स्यात्। अन्यथा सत्यां त्यदादिभिरेव सहोक्तौ विप्रतिषेधमभूत्। परमिति। शब्दपरविप्रतिषेधादिति भावः। त्यदादितर

पिता मात्रा। १।२।७०॥ मात्रा सहोक्तौ पिता वा शिष्यते। माता च पिता च पितरौ। मातापितरौ वा। श्वशुरः श्वश्र्वा। १।२।७१॥ श्वश्र्वा सहोक्तौ श्वशुरो वा शि
ष्यते। श्वशुरौ। श्वश्रूश्वशुरौ॥ त्यदादीनि सर्वैर्नित्यम्। १।२।७२॥ सर्वैः सहोक्तौ त्यदादीनि नित्यं शिष्यन्ते। स च देवदत्त
श्च तौ। त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते। स च यश्च यौ। पूर्वशेषोपि दृश्यत इति भाष्यम्। स च यश्च तौ। त्यदादितः शेषे पुन्नपुंसकतो
लिङ्गवचनानि॥ सा च देवदत्तश्च तौ। तच्च देवदत्तश्च यज्ञदत्ता च तानि। पुन्नपुंसकयोस्तु परत्वान्नपुंसकं शिष्यते। तच्च देवदत्तश्च ते। अद्वन्द्वतत्पु
रुषविशेषणानामिति वक्तव्यं॥ कुक्कुटमयूर्याविमे। मयूरीकुक्कुटाविमौ। तच्च सा च अर्द्धपिप्पल्यौ ते॥

॥ [illegible]ति। आद्यादित्वात्तसिः। त्यदादीनां शे
षे सह निर्वासितेषु यः पुमान्यच्च नपुंसकं तद्वशेन लिङ्गप्रतिपादकानि भवन्तीति वाच्यमित्यर्थः। कानीत्याकांक्षायामर्थात्त्यदादीन्येव। अस्यापवादमाह अद्वंद्वेति। द्वंद्वादिवि
शेषणानां पूर्वोक्तं न। किं तु विशेष्यनिघ्नत्वमेवेत्यर्थः। नन्वेवं कुक्कुटमयूर्याविमे इत्यत्र द्वंद्वस्य उभयपदार्थप्रधानत्वेन उभयोरपि विशेष्यत्वात् विशेष्यनिघ्नतायामपि कुक्कुटमयूर्या
विमे इति नियमतो न स्यादिति चेदत्र नव्याः। परवल्लिङ्गमित्यनेन द्वंद्वतत्पुरुषयोरुत्तरपदलिङ्गवत्त्वादुत्तरपदलिङ्गस्यैव द्वंद्वतत्पुरुषप्रतिपाद्यत्वेन तल्लिंगाधीनतैवानुप्रयो
गस्येति न कदाचिदनुपपत्तिरिति। मयूरीकुक्कुटाविमाविति। प्रकृतानुपयुक्तमप्येतत्प्रसंगादुक्तं। तच्चेति। पिप्पल्यर्द्धं। सा चेति अर्द्धपिप्पली तत्पुरुषविशेषणमुदाहर
ति अर्द्धपिप्पल्यौ ते इति। यद्यपि स्त्रीनपुंसकसाधारणो[illegible] तथापि तच्च तच्च सा च अर्द्धपिप्पल्यस्तानीत्याद्युदा हरणमूह्यं॥

ग्राम्या। ग्रामेभवा ग्राम्याः। ग्रामाव रक्जाविनिपः लिंगहूयेपि गावइतिरूपस्य समानत्वात् स्त्रीलिंगशेषस्य फलमाह। इमा इति। एवंच इमे च इमाश्च इमा इति स्त्रीलिंगशेषए॥
वभवतिनत्वत्रन्यदादितःशेषेपुंनपुंसकतो लिंगवचनानीतिपुल्लिंगशेषः। गावइमाइतिभाष्योदाहरणादित्येके अन्येतु। ग्राम्यपशुसंघविषयत्वाविशेषाद्गावेइतिवन्नाइमा

ग्राम्यपशुसंघेष्वतरुणेषु स्त्री॥ १।२। ७३॥ एषु सहविवक्षायां स्त्री शिष्यते। पुमान्स्त्रियेत्यस्यापवादः। गाव इमाः। ग्राम्येति किं। रुरव इमे। पशुग्रहणं किं। ब्राह्मणाः इमे। संघेषु किं। एतौ गावौ। अतरुणेषु किं। वत्सा इमे। अनेकशफेष्विति वाच्यं। अश्वा इमे। इह सर्वत्र एकशेषे कृते नेकसुबन्ताभावाद्द्वन्द्वो न। तेन न शिरसी शिरांसीत्यादौ समासस्यान्तोदात्तः प्राप्नोति। एकवद्भावश्च न। पन्थानौ। पन्थान इत्यादौ समासान्तो न॥ इत्येकशेषः॥ कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः। परार्थाभिधानं वृत्तिः। वृत्त्यर्थावबोधकं वाक्यं विग्रहः। स द्विधा। लौकिकोऽलौकिकश्च। परिनिष्ठितत्वात्साधुर्लौकिकः। प्रयोगानर्होऽसाधुरलौकिकः। यथा। राज्ञः पुरुषः। राजन् अस् पुरुष सु इत्यविग्रहो नित्यसमासः। अस्वपदविग्रहो वा। समासश्चतुर्विध इति प्रायोवादः। अव्ययीभावतत्पुरुषबहुव्रीहिद्वन्द्वाधिकारबहिर्भूतानामपि सह सुपेति विधानात्। पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः। अन्यपदार्थप्रधानो बहुव्रीहिः। उभयपदार्थप्रधानो द्वन्द्वः। इत्यपि प्रायोभिप्रायः। सूपप्रति। उन्मत्तगङ्गमित्याद्यव्ययीभावे। अतिमालादौ तत्पुरुषे। द्वित्रा इत्यादिबहुव्रीहौ। दन्तोष्ठमित्यादिद्वन्द्वे चाभावात्। तत्पुरुषविशेषः कर्मधारयः। तद्विशेषो द्विगुः। अनेकपदत्वं द्वन्द्वबहुव्रीह्योरेव तत्पुरुषस्य क्वचिदेवेत्युक्तं। किंच। सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा। सुबन्तेनेति विज्ञेयः समासः षड्विधो बुधैः॥ १॥ सुपा। राजपुरुषः। तिङा। पर्यभूषत्। नाम्ना। कुम्भकारः। धातुना। कटप्रूः। अजस्रं। तिङां तिङा। पिबतखादता। खादतमोदता। तिङां सुपा। कृन्तविचक्षणेति यस्यां क्रियायां सा कृन्तविचक्षणा। एहीडादयोऽन्यपदार्थे इति मयूरव्यंसकादौ पाठात्समासः॥ ॥ इति सर्वसमासशेषः॥ ॥

इति च स्त्रीलिंगशेष एव स्यादिति। नास्तिप्रांकावकाश इत्यन्ये तुः। एतौ गावाविति। एकशेषस्यानेकविषयत्वादेवानेकपरिग्रहे सिद्धे संघग्रहणं सामर्थ्याद्द्वन्द्वानां समुदायोत्र गृ
ह्यत इति भावः। एकशेषे कृते इति। विभक्त्युत्पत्त्यनपेक्षत्वेनान्तरंगत्वादिति भावः। नन्वेवं विषयभेदात् द्वंद्वापवाद एकशेष इत्युद्घोषः कथं प्रवर्त्तत इति चेदत्राहुः॥

यथैकशेषेणैव स्यात्तर्हि विभक्तावुच्यमानायां द्वंद्वः स्यान्न त्वेकशेषे सन भवतीति। तार्किकी प्रातिमादायापवादो द्वंद्वोष इति। द्वंद्वेनेति। एतेन कृतद्वंद्वानामेकशेष इति भ्रमो निर
स्तः न च तथैवास्तु फले विशेषाभावादिति वाच्यमित्याह तेनेति। ते नेति पंथ्यानाविति। न चात्रेतोऽत्सर्वनामस्थान इति लिंगात्समासांतस्य परिहरः इतोदित्युक्तेपि साविस्य नुच्यत्वापे
प्यात्प्रत्ययसिद्धेरिति वाच्यं पथो विभाषेति समासांताभावे अपंथानावित्यादौ इतोदिति सूत्रस्य सावकाशत्वात् इत्येकशेषः। प्रसंगादाह। कृत्तद्धितेत्यादि। पंच वृत्तय इति। पंचानां
वृत्तिरिति पूर्वाचार्यसंज्ञा इहाप्याश्रीयत इति भावः। तल्लक्षणमाह। परार्थेति। अन्यथा यो तमो वेलणपरपदार्थान्तर्भावेलणवा यो विशिष्टोर्थस्स परार्थस्स चाभिधीयते येन तत्परा
भिधानं। अतएव तिङंतं वृत्तिर्न भवति। तत्र नार्थीभावानभ्युपगमादन्यथा मृदु पचतीत्यादौ फले मृदुत्वान्वयो न स्यात् विशेषणानां वृत्तिर्न भवति वृत्तस्य च विशेषणयो
गो नेत्यभ्युपगमादित्येके। समर्थसूत्रे कैयटस्त्वाह परस्य शब्दस्य योर्थस्तस्याभिधानं शब्दांतरेण यत्र सा वृत्तिरित्यर्थः यथा राजपुरुष इत्यत्र राजशब्देन वाक्यावस्थायां
अनुक्तोत्कर्षार्थोभिधीयत इति। अविग्रह इति। लौकिकविग्रहरहित इत्यर्थः। अस्वपदेति। समस्यमानपदावयवाघटित इत्यर्थः। द्वंद्वबहुव्रीह्योरेवेति। अनेकग्रहण

ऋक्पूरब्धूःपथामानक्षे। पा.५।४।७४॥ अ अनक्ष इति च्छेदः। ऋगाद्यन्तस्य समासस्य अप्रत्ययः स्यात्। अक्षे या धूः तदन्तस्य तु न।

[illegible] दिशानां ह्युपपदसमासत्वं तयोरेव संभवतीति भावः। क्वचिदेवेति। द्व्यनृजात इत्यादौ। नाम्नेति। प्रातिपदिकेनेत्यर्थः। कुंभकार इति। अत्र हि सुवुक्तेः
[illegible] उपपदसमासः कटप्रूः अजस्रमिति। क्विब्वचिप्रच्छीति वार्तिकेन मिकंपीति सूत्रे च कटप्रु अजस्र इति निपातनाद्वा तु नासमासः। पिबतखादतेति आख्यातमाख्या
तेनेति विग्रहपूर्वं मयूरव्यंसकादौ पाठात्समासः॥ इति सर्वसमासशेषः॥ ॥ ऋक्पूर इति लुप्तप्रथमैकवचनांतं समासांता इति त्वधिक्रियते तदाह। समासस्याप्रत्ययोंतावयव इति
अनक्ष इत्येतत्सामान्यतः श्रुतमपि धुरैव संबध्यते सामर्थ्यान्नान्यैरित्याशयेन व्याचष्टे। अक्षे या धूरिति। तदंतस्य तु नेति। सूत्रे संबंधिनो विवक्षणत्वविवक्षया सप्तमी। तेनाक्षसंबंधि
नीया धूस्तदंतस्येत्यर्थः। यद्यत्राक्षे पूर्वपदे नेति व्याख्यायेत तर्हि दृढधूरक्ष इत्यत्र निषेधो न स्यात्। यदि त्वक्षे समासार्थे नेति व्याख्यायेत तदा अक्षधूरित्यत्र न स्यात्तस्मादुभयसं
ग्रहार्थमुक्तव्याख्यानमेव न्याय्यः। अर्धर्च इति। अर्धं नपुंसकमिति समासः। अर्द्धर्चाः पुंसि चेति पुंस्त्वं॥ अनृच इत्यादि। अनुक्तसमासांतत्वाच्छेषाद्विभाषेति कप्प्रत्यये नृत्यपि स्यादिति दृढ्यकमित्यपि वो

ऋङ्चः अनृचबह्वृचावध्येतर्य्येव नेह अनृक्सामा बह्वृक्सूक्तं। त्रिस्रोः प्रं॥ नृ.मू.॥

विष्णुपुरमिति। यद्यपि पुरशब्देन समासे ऽप्येतत्सिध्यति तथापि विष्णुपूरित्यनिष्टवारणाय सूत्रे पू ग्रहणं। कृतसमासांतस्येति। येन विधिरिति सूत्रे आप[illegible]नीति भा-
ष्यादिति भावः। अंतरीपमित्यादि। अंतर्गताः प्रतिकूलाः संगता वा आपो ऽस्मिन्निति विग्रहः। उपसर्गग्रहणं प्रादेरुपलक्षणार्थं। समाप इति। अनुपसर्गत्वान्नेत्वमिति भावः।
भाष्ये तु समापईत्वप्रतिषेधो वक्तव्य इत्युक्तं स च देवयजनरूपविशेषार्थपरः समीपसमृद्धीति निर्देशात्समीपमिति भाष्योदाहरणाच्चेति ज्ञेयं। देवयजनमि-
ति। आप्यन्ते ऽस्मिन्निति व्युत्पत्त्या यज्ञभूमिः स्यादिति। न पूजनादिति समासांता भावः। अवर्णांताद्वेति। द्व्यंतरिति सूत्रे ईत्वमनवर्णादिति वक्तव्यं इह मा भूत्। प्रापं
परापमिति भाष्योक्तेः। गतिश्चेति सूत्रे प्रेपं परेपमिति भाष्योक्तेश्चेति भावः। ऊदनोः दीर्घोच्चारणं कचित्प्रयायामवग्रहार्थं। बहृचास्तु अनूपे गोमान् गोभिरित्यत्रानूपशब्द-

विष्णुपुरं। क्लीबत्वं लोकात्। विमलापं सरः। द्व्यंतरुपसर्गेभ्यो ऽप ईत्। ६।३।९७॥ अप इति कृतसमासान्तस्यानुकरणं। षष्ठ्यर्थे प्रथमा एभ्यो ऽपस्य ईः स्यात्। द्विर्गता आपो यस्मिन्निति। द्वीपं। अन्तरीपं। प्रतीपं। समीपं। समापो देवयजनमिति तु। समा आपो यस्मिन्निति बोध्यं। कृतसमासान्तग्रहणान्नेह। स्वप्। अवर्णान्ताद्वा॥ प्रेपं। परेपं। प्रापं। परापं। ऊदनोर्देशे। ६।३।९८॥ अनोः परस्यापस्य ऊत्स्याद्देशे। अनूपो देशः। राजधुरा। अक्षन्तु। अक्षधूः। दृढधूरक्षः। सखिपथो रम्यपथो देशः। अच् प्रत्यन्ववपूर्वात्सामलोम्नः। ५।४।७५॥ एतत्पूर्वात्सामलोमान्तात्समासादच् स्यात्। प्रतिसामं। अनुसामं। अवसामं। प्रतिलोमं। अनुलोमं। कृष्णोदक्पाण्डुसंख्यापूर्वाया भूमेरजिष्यते॥ कृष्णभूमः। उदग्भूमः। पाण्डुभूमः। द्विभूमः प्रासादः। संख्याया नदीगोदावरीभ्यां च॥ पञ्चनदं। सप्तगोदावरं। अजिति योगविभागादन्यत्रापि। पद्मनाभः॥ ९ नावगृह्णंति। अनूप इति। अनु-

गता आपो ऽस्मिन्नित्यनूपो देशः। जलप्रायमनूपं स्यादित्यमरः। प्रतिसाममिति। अव्ययीभावः प्रादिसमासो बहुव्रीहिर्वा। एवमनुसमादावप्यूह्यं। कृष्णोदगिति। अजि-
ति योगविभागेन गतार्थमिदं। एवमुत्तरवार्त्तिकमपि कृष्णभूम इत्यादयो बहुव्रीहयः। पद्मनाभ इति। पद्मं नाभावस्येति विग्रहः। गड्वादित्वात्सप्तम्यंतस्य परनिपातः
पद्माकारा नाभिरस्येति वा। एवमूर्णनाभो ऽपि ज्ञेयः। तत्र तु व्याप्तेः संज्ञात्वं इदसोरिति ह्रस्वो विशेषः॥ ॥ ॥

अस्त्रो। इत्यत्र नैतिदर्शनं चक्षुस्तद्वाचि नौक्षिशब्दस्य दर्शनासाद मुख्यस्य ग्रहणमित्याशयेनाह अचक्षुः पर्य्यायाः इति गवाक्षइति गावः किरणाः अक्षिशब्दोरंध्रवाची षष्ठी समासः अचतुर नियात्यंत इति निपातनफलंतु समासविशेषनियमः टिलोपादिकंच तदाह आद्याइति बहुव्रीहय इति बहुव्रीहय एवेत्यर्थः तेन तत्पुरुषे अचत्वारो वि

अक्ष्णोऽदर्शनात्। ५।४।७६॥ अचक्षुः पर्य्यायादक्ष्णोऽच् स्यात्समासान्तः। गवामक्षीव। गवाक्षः। अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः। ५।४।७७। एते पञ्चविंशतिरजन्ता निपात्यन्ते। आद्यास्त्रयो बहुव्रीहयः। अविद्यमानानि चत्वार्यस्य। अचतुरः। विचतुरः। सुचतुरः। त्र्युपाभ्यां च चतुरोऽजिष्यते। त्रिचतुराः। चतुर्णां समीपे। उपचतुराः। तत एकादश द्वन्द्वाः। स्त्रीपुंसौ। धेन्वनडुहौ। ऋक्सामे। वाङ्मनसे। अक्षिणी भ्रुवौ च। अक्षिभ्रुवं। दाराश्च गावश्च। दारगवं। ऊरू च अष्ठीवन्तौ च। ऊर्वष्ठीवं। निपातनाट्टिलोपः। पदष्ठीवं। निपातनात्पादशब्दस्य पद्भावः। नक्तं च दिवा च नक्तंदिवं। सप्तम्यन्ताभ्यां च। रात्रिंदिवं। रात्रेर्मान्तत्वं निपात्यते। अहनि च दिवा च। अहर्दिवं। वीप्सायां द्वन्द्वो निपात्यते। अहन्यहनीत्यर्थः। सरजसमिति साकल्येऽव्ययीभावः। बहुव्रीहौ तु सरजः पङ्कजं। निश्चितं श्रेयः। निःश्रेयसं। तत्पुरुष एवेह। निःश्रेयान्पुरुषः। पुरुषस्यायुः। पुरुषायुषं। ततो द्विगू। द्व्यायुषं। त्र्यायुषं। ततो द्वन्द्वः। ऋग्यजुषं। ततस्त्रयः कर्मधारयाः। जातोक्षः। महोक्षः। वृद्धोक्षः। शुनः समीपं। उपशुनं। टिलोपाभावः सम्प्रसारणं च निपात्यते। गोष्ठे श्वा। गोष्ठश्वः। ब्रह्महस्तिभ्यां वर्च्चसः। ५।४।७८॥ अच् स्यात्। ब्रह्मवर्च्चसं। हस्तिवर्च्चसं। पल्यराजभ्यां चेति वक्तव्यं। पल्यवर्च्चसं। राजवर्च्चसं। अवसमन्धेभ्यस्तमसः। ५।४।७९॥ अवतमसं। सन्तमसं। अन्धयतीत्यन्धः। पचाद्यच्। अन्धन्तमः। अन्धतमसं॥

चत्वार इत्येवम भवतीति भावः एवमुत्तरत्रापि अवधारणमृत्यं त्रिचतुरा इति त्रयश्चत्वारो वेति विग्रहः संख्ययासन्नेति बहुव्रीहिः बहुव्रीहौ संख्येय इति डचोपवादोऽच् अक्षिभ्रुवमिति प्राण्यंगत्वादेकवत् ऊरू चाष्ठीवंतौ चेति सक्थ्यक्षीवपुमानूरित्यमरः जानूरूपर्वाष्ठी वदस्त्रियामिति च ऊर्वष्ठीवपदष्ठीवमिति प्राण्यंगत्वादेकवद्भावः द्वन्द्वो निपात्य

विरूपाणामपी त्येकशेषं बाधित्वेति शेषः सरजसमिति अव्ययीभावे चाकाले इति सहस्य सभावः सरजः पंकजमिति सरजसमकरंदनिर्भराःस्विति माघप्रयोगस्तु चिंत्य इति भावः नि-
श्रेयानिति निश्चितं श्रेयो येनेति विग्रहः निःश्रेयस इति केषांचित्त्वनुदाहरणमशुद्धं ईयस श्चेति कपो निषेधात् गोष्ठश्वेति एते नसमासमीन तत्पुरुष एवेति नियमो दर्शितस्तेन षष्ठी

श्वसो वसीयः श्रेयसः। ५।४।८०॥ वसुशब्दः प्रशस्तवाची। वतः ईयसुनि वसीयः। श्वस शब्द उत्तरपदार्थ प्रशंसामाशीर्विषयतामाह। मयूरव्यंसकादित्वा
त्समासः। श्वोवसीयसं। श्वः श्रेयसन्ते भूयात्। अन्ववतप्ताद्रहसः। ५।४।८१॥ अनुरहसं। अवरहसं। तप्तरहसं। प्रतेरुरसस्सप्तमीस्थात्। ५।४।८२॥ उर
सिप्रति। प्रत्युरसं। विभक्त्यर्थेऽव्ययीभावः। अनुगवमायामे। ५।४।८३॥ एतन्निपात्यते दीर्घत्वे। अनुगवं यानं। यस्य चायाम इति समासः। द्विस्तावा त्रिस्तावा
वेदिः। ५।४।८४॥ अच्प्रत्यये टिलोपः समासश्च निपात्यते। यावती प्रकृतौ वेदिः ततो द्विगुणा त्रिगुणा वा ऽश्वमेधादौ तत्रेदं निपातनं। वेदिरिति किं॥
द्विस्तावती त्रिस्तावती रज्जुः। उपसर्गादध्वनः। ५।४।८५॥ प्रगतोऽध्वानं। प्राध्वो रथः। न पूजनात्। ५।४।६९॥ पूजनार्थात्परेभ्यस्समासान्ता न स्युः। सुराजा
अतिराजा। स्वतिभ्यामेव॥ नेह। परमराजः। पूजनात्किं। गामतिक्रान्तोऽतिगवः। बहुव्रीहौ सक्थ्यक्ष्णोरिति षचः प्रागेवायं निषेधः। नेह। सुसक्थः। स्व
क्षः। किमः क्षेपे। ५।४।७०॥ क्षेपे यः किंशब्दस्ततः परं यत्तदन्तात्समासान्ता न स्युः। कुत्सितो राजा। किंराजा। किंसखा। किंगौः। क्षेपे किं॥ किंराजः। किंस
खः। किंगवः। नञस्तत्पुरुषात्। ५।४।७१॥ समासान्तो न। अराजा। असखा। तत्पुरुषात्किं। अधुरं शकटं। पथो विभाषा। ५।४।७२॥ नञ्पूर्वात्पथो वा
समासान्तः। अपथम्। अपन्थाः। तत्पुरुषादित्येव। अपथो देशः। अपथं वर्त्तते॥ इति समासान्ताः॥ ॥ ९ तत्पुरुषे गोष्ठश्वेत्येव ब्रह्मवर्चसमिति ष
ष्ठीसमासः। एवं हस्तिवर्चसमपि पल्यति पलं मांसमर्हतीति पल्यो मांसभोजी तदीयं वर्चः पल्यवर्चसं अवतमसमित्यादि अवहीनं संततं च तम इति विग्रहः अंधयतीति
अंधं दृष्टयुपघाते चुरादिः अंधमिति गाढमित्यर्थः॥ ॥ श्वसो वसुशब्दात्प्रशस्तवचनादीयसुनि त्याकरविरुद्धं व्याचक्षाणा उपेक्ष्या इति ध्वनयति वसुशब्द इति॥
वसीय इति यः कामयेत वसीयान्स्यामिति श्रौत प्रयोगोप्यत्र अनुकूल इति भावः श्वस शब्द इति कालवाच्यप्ययं प्रकृते त्वर्थविशेषपरः शक्तिस्वाभाव्यात्तमेवाह॥

उत्तरपदार्थप्रशंसामिति उत्तरपदार्थभूतां प्रशंसामित्यर्थः आशीर्विषयमिति षष्ठीसमासः विषयशब्दस्याजहल्लिंगत्वान्पुल्लिंगनिर्देशः उत्तरपदार्थप्रशंसाया आशीर्वि
षयत्वाभावेनेति पाठांतरं क्वचिदस्ति उभयथापि विषयताया द्योतकोयमिति फलितोर्थः अन्ववरहं रहः इत्यप्रकाशमुच्यते अनुगतमवहीनं च रह इति प्रादिसमासः अनुग
तो रहो सिमितिन्यादि वहुव्रीहिर्वा तप्तरहसमिति तप्तं च तद्रहश्चेति विग्रहः परेणानधिगम्यमित्यर्थः इत्यतः प्रागिति प्राग्वहुव्रीहिग्रहणं कर्त्तव्यमिति वार्त्तिकोक्तेरिति
भावः किमः क्षेपे क्षेपग्रहणमिह शक्यमकर्तुं प्रतिपरोक्तपरिभाषया किं क्षेप इति विहितसमासस्यैव ग्रहणान्न किं राज इत्यादि किमत्र प्रश्ने षष्ठीसमासः कर्मधारयो
वा नञ्समस्तरूपान्न नञ इति षष्ठी नञः संवंधी यस्तत्पुरुषः नञवयवकस्तस्मादित्यर्थः अपथमिति नसाङ्गित इति टिलोपः अपथं नपुंसकमिति क्लीवत्वं अपथं वर्त
त इति अव्ययीभावेऽव्ययीभावः ॥ इति सकलसमाससाधारणाः समासांताः ॥ अलुक् स्यादिति प्रसज्यप्रतिषेधोयं सुपो धात्वित्यादिना प्राप्तो लुङ् भवतीत्यर्थः स्तो

अलुगुत्तरपदे ॥ ६।३।१ ॥ अलुगधिकारः । प्रागानङः । उत्तरपदाधिकारस्त्वापादसमाप्तेः । पञ्चम्याः स्तोकादिभ्यः ॥ ६।३।२ ॥ एभ्यः पञ्चम्या अलुक् स्यादुत्तरप
दे । स्तोकान्मुक्तः । एवमन्तिक इत्यर्थकृच्छ्रेभ्यः । उत्तरपदे किं । निःस्तोकः । ब्राह्मणाच्छंसिन उपसंख्यानम् । ब्राह्मणे विहितानि शस्त्रा-
णि उपचारात्तानि ब्राह्मणानि तानि शंसतीति । ब्राह्मणाच्छंसी ऋत्विग्विशेषः । द्वितीयार्थे पञ्चम्युपसंख्यानादेव ॥ ९ स्तोकान्मुक्त इति समासप्रयोजनमे
कपदत्वैकस्वर्यविभक्त्यलोपाभावश्च किं च स्तोकान्मुक्तस्यापत्यं स्तोकान्मुक्तिः स्तोकान्मुक्ताया स्तोकान्मुक्तेय इति समुदायात्तद्धितोत्पत्तिरपि प्रयोजनं च प्राथमिकसामासि
कलुको निषेधेन चरितार्थत्वाद्धात्वन्तद्धितनिमित्तो लुग् दुर्वार इति शंकां सुपो धात्विति शास्त्रस्यैकत्वादविशेषेण लुग्द्वयस्यापि निषेधाभ्युपगमात् इह स्तोकांतिकेति समास
शास्त्रपठिता एव स्तोकादयो गृह्यंते न तु करणे च स्तोकाल्पकृच्छ्रेति सूत्रपठितास्समासे सुपो लुकि प्रसक्ते विधीयमानेनालुक्शास्त्रेण समासशास्त्रपठितानामविलंबे
नोपस्थितेर्व्याप्तिन्यायाच्च स्तोकांतिकेत्यत्र स्वार्थग्रहणादन्यान्यपि वहूनि गृह्यंते तत्तदर्थानि मनसि निधायाह एवमिति द्विवचनवहुवचनानां तु समासो न दृश्यते अन
भिधानात्तेन स्तोकाभ्यां मुक्त इत्यादौ वाक्यमेव शास्त्राणीति प्रगीतमंत्रसाध्यगुणिनिष्ठगुणाभिधानं स्तोत्रं अप्रगीतमंत्रसाध्यगुणिनिष्ठगुणाभिधानं शस्त्रमिति याज्ञिकाः

॥

ओजस्‌ ओजसा कृतमिति कर्तृकरणे कृतेति समासः कथं तर्हि स तत नैशतमो दृवमन्यत इति भारविः अत्राहुः इत्तु वर्त्तने इत्यस्मात् द्व्यर्थक विधानमित्ति भावे क्तप्रत्यये न दृत्तेन षष्ठीसमासाश्रयणान्न दोष इति यत्तु केवलपदाधिकार एवतदंतविधिर्न तूत्तरपदाधिकारे तथा च नैशतमसे ति तृतीयाया अलुङ्न भवतीति दुर्घटवृत्त्यादावुक्तं तत्र पदांगाधिकारे इत्यत्र इष्टकचितं पक्वेष्टकचितमिति भाष्योदाहरणादुत्तरपदाधिकारेपि तदंतविधिप्रवृत्तेः जनुषेति जनुर्जननजन्मानीत्यमरः आत्मनापंचम इति तृतीयेति योगविभागात्समासः इह प्रकृत्यादित्वात् प्रथमार्थे तृतीयेत्येके आत्मना कृतः पंचम इति करोतिक्रियापेक्षासेत्यन्ये बहुव्रीहिर्वा ध्य इति एकस्याध्येयोपाधिकभेदं परिकल्प्य वृत्तिपदार्थत्वमन्यपदार्थत्वं च विवक्षणीयमिति भावः वैयाकरणी व्याकरणे भवा वैयाकरणी अणृगयनादिभ्य इत्यण् सा चासावाख्या चेति कर्मधारयः आत्म

ओजस्सहोंऽभस्तमसस्तृतीयायाः। ६।३।३। ओजसा कृतमित्यादि। अञ्जस उपसंख्यानं। अञ्जसा कृतं। आर्जवेन कृतमित्यर्थः। पुंसानुजो ऽजनुषान्ध इति वा। यस्याग्रजः पुमान्। स पुंसानुजः। जनुषान्धो जात्यन्धः। मनसस्संज्ञायाम्। ६।३।४॥ मनसागुप्ता। आज्ञायिनि च। ६।३।५॥ मनस इत्येवा। मनसाज्ञातुं शीलमस्य मनसाज्ञायी। आत्मनश्च। ६।३।६॥ आत्मनस्तृतीयाया अलुक् स्यात्। पूरण इति वक्तव्यं॥ पूरणप्रत्ययान्ते उत्तरपदे इत्यर्थः। आत्मनापञ्चमः। जनार्दनस्त्वात्मचतुर्थ एवेति बहुव्रीहिर्वा ध्यः। पूरणे किं। आत्मकृतं। वैयाकरणाख्यायां चतुर्थ्याः। ६।३।७। आत्मन इत्येवा। आत्मनेपदं। आत्मनेभाषा। तादर्थ्ये चतुर्थी। चतुर्थीति योगविभागात्समासः। परस्य च। ६।३।८। परस्मैपदं। परस्मैभाषा। हलदन्तात्सप्तम्यास्संज्ञायां। ६।३।९। हलन्तादृदन्ताच्च सप्तम्या अलुक् संज्ञायां॥ त्वचिसारः॥ ॥ ९८

नइत्येवेति इहात्मन इत्यनुवर्त्य वैयाकरणाख्यायां चतुर्थ्या अलुगिति व्याख्याने तु परस्य चेत्युत्तरसूत्रं त्यक्तुं शक्यमित्याहुः आत्मनेभाषा इति यद्यपीयमाख्या अष्टाध्याय्यां नास्ति तथापि धातुपाठेऽस्तीति भावः प्रकृतिविकृतिभावविरहादिदं चतुर्थ्यन्तं यस्यालौकिकविग्रहवाक्ये तस्मात्सभासाभावमाशंक्याह योगविभागादिति इह लुग्विधिसामर्थ्यादपि समासस्सुवचः परत्वं च परस्मैव्द स्य च यथा चतुर्थ्यन्तस्य अलुक् स्याद्वैयाकरणाख्या

गविपुधिभ्यांस्थः। सासप्ताषिशिरे स्योणादिकः किरच्। अस्यांतसिद्धत्वान्निष्पन्नः सात्पदाद्योरिति निषेधे प्राप्ते वचनारंभः। गवीति वचनादेवेति न च लुकं बाधित्वा परत्वादंतरंगत्वाच्चावादेशः हल
दंतात्सप्तम्या इत्यनेनालुक्। सिध्यतीति वाच्यं अंतरंगानपि विधीन् बहिरंगो लुग्बाधत इति लुको बलीयस्त्वादिति भावः। हृदिस्पृगिति हृदयं दिवं च स्पृशतीति विग्रहः। अलुग्विधिसामर्थ्यात्कर्मणि सप्तमी

गवियुधिभ्यां स्थिरः ८।३।९५। आभ्यां स्थिरस्य सस्य षः स्यात्। गविष्ठिरः। अत्र गवीति वचनादेवाऽलुक्। युधिष्ठिरः। अंरण्येतिलकाः। अत्र संज्ञायामिति सप्तमीसमासः॥
हृद्युभ्यां ङेः। हृदिस्पृक्। दिविस्पृक्। कारनाम्नि च प्राचां हलादौ। ६।३।१०। प्राचां देशे यत्कारनाम तत्र हलादावुत्तरपदे हलदन्तात्सप्तम्या अलुक्। मुकुटेकार्षाप
णम्। दृषदिमाषकः। पूर्वेणा सिद्धे नियमार्थम्। कारनाम्न्येव प्राचामेव हलादावेवेति। कारनाम्नि किम्। अभ्याहितपशुः। कारादन्यस्यैतद्देयस्य नाम। प्राचां किम्। यूथप
शुः। हलादौ किम्। अविकटोरणः। हलदन्तात् किम्। नद्यां दोहः। नदीदोहः। मध्याद्गुरौ। ६।३।११। मध्येगुरुः। अन्ताच्च। अन्तेगुरुः। अमूर्धमस्तकात्स्वाङ्गादकामे।
६।३।१२। कण्ठेकालः। उरसिलोमा। अमूर्धमस्तकात् किम्। मूर्धशिखः। मस्तकशिखः। अकामे किम्। मुखेकामोऽस्य। मुखकामः। बन्धे च विभाषा। ६।३।१३। हल
दन्तात्सप्तम्या अलुक्। हस्तेबन्धः। हस्तबन्धः। हलदन्तात् किम्। गुप्तिबन्धः। तत्पुरुषे कृति बहुलम्। ६।३।१४। स्तम्बेरमः। स्तम्बरमः। कर्णेजपः। कर्णजपः। क्व
चिन्न। कुरुचरः। प्रावृट्शरत्कालदिवां जे। ६।३।१५। प्रावृषिजः। शरदिजः। कालेजः। दिविजः। पूर्वस्यायमपवादः। विभाषा वर्षक्षरशरवरात्। ६।३।१६। एभ्य
स्सप्तम्या वा अलुक् जे। वर्षेजः। वर्षजः। क्षरेजः। क्षरजः। शरेजः। शरजः। वरेजः। वरजः। घकालतनेषु कालनाम्नः। ६।३।१७। सप्तम्या विभाषा लुक् स्यात्। पूर्वा
ह्णेतरे। पूर्वाह्णतरे। पूर्वाह्णेतमे। पूर्वाह्णतमे। काले। पूर्वाह्णेकाले। पूर्वाह्णकाले। तने। पूर्वाह्णेतने। पूर्वाह्णतने। शयवासवासिष्वकालात्। ६।३।१८। खेशयः।
खशयः। ग्रामेवासः। ग्रामवासः। ग्रामेवासी। ग्रामवासी। हलदन्तादित्येव। नेह। भूमिशयः। अपो योनियन्मतिषु। अप्सुयोनिरुत्पत्तिर्यस्य। सोऽप्सुयोनिः। अ

कर्मणोऽधिकरणत्वविवक्षया वा। अविकटोरण इति संघातेन कटजितकट्च्। अस्यांतः उरणो मेषः। बंधे च विभाषा। बंध इति घञंतः। हस्तेबंध इति बहुव्रीहिरयं तत्पुरुषे तु नेन
सिद्धबध्नातिषु चेति वक्ष्यमाणेन निषेध एवेत्याहुः। अपसव्य इति दिगादित्वाद्यत्। ओर्गुण वांतादेशः। प्राचां तु यतः स्थाने जं पठित्वा अप्सुज इत्युदाहृतं तदाकरविरुद्धं जे चेत्य

अप्सुजः अप्सुचर इति भाष्ये वचनांतरदर्शनाच्च केचित्तु अप्सुज इत्युक्तोदाहरणद्वयेपि हलदंतादित्यलुकमाहुः ॥ ॥ अप्सुमंतावितिकारीर्यामश्च अग्नेसधिष्टवाप्सुमेसोमो अजुवीदित्याज्य भागमंत्रौस्तः तत्र स्वप्सुशब्दोस्तीति तद्द्वारा आज्यभागयोरप्यप्सुमत्त्वं प्राचा तु मतिषिति पठित्वा अप्सुमति रित्युदाहृतं अत्र केचित् अप्सुवित्येतदनुकरणशब्दः सप्तम्यंतो वा आ‍ोस्सप्त म्यंतात्तस्य मायाअभावेन मतुवेव दुर्लभः अन्ये तु लुकः प्राप्तिरेव नास्ति सप्तम्यभावात्तथा च मतिषिति प्राचोक्तः पाठ एव युक्तः न च स पाठो भाष्यादौ न दृष्ट इति वाच्यं मतिषितिपाठस्या प्सुमतिरित्युदाहरणस्य च भाष्यवृत्त्यादिपुस्तकेषु दृश्यमानत्वेन मतुषितिपाठस्यैव क्वाप्यदर्शनात् व्यर्थत्वाच्च अस्य वामीयं कथाशुभीयमित्यादावित्वलुकि कर्तव्ये प्रकृतिवद

अप्सुमन्तावाज्यभागौ निन्द्रियस्व धातिषु चा ६।३।१९ इन्नन्तादिषु सप्तम्या अलुग्न। स्थण्डिलशायी। साङ्काश्यसिद्धः। चक्रबन्धः। स्थे च भाषायाम् ६।३।२०। सप्तम्या अलुग्न। समस्थः। भाषायां किं। कृष्णोऽस्यास्वरेष्ठः। षष्ठ्या आक्रोशे ६।३।२१। चौरस्य कुलं। आक्रोशे किं। ब्राह्मणकुलं। वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु। वाचोयुक्तिः। दिशोदण्डः। पश्यतोहरः। आमुष्यायणाऽऽमुष्यपुत्रिकाऽऽमुष्यकुलिकेति च। अमुष्यायणः। नडादित्वात्फक्। अमुष्यपुत्रस्य भावः आमुष्यपुत्रिका। मनोज्ञादित्वाद्वुञ्। एवमामुष्यकुलिका। देवानांप्रिय इति च मूर्खे। अन्यत्र देवप्रियः। शेपपुच्छलाङ्गूलेषु शुनः। शुनःशेफः। शुनःपुच्छः। शुनोलाङ्गूलः। दिवश्च दासे। दिवोदासः। पुत्रेऽन्यतरस्याम् ६।३।२२। षष्ठ्याः पुत्रे परेऽलुग्वा निन्दायां। दास्याःपुत्रः। दासीपुत्रः। निन्दायां किं। ब्राह्मणीपुत्रः। ऋतो विद्यायोनिसम्बन्धेभ्यः ६।३।२३। विद्यासम्बन्धयोनिसम्बन्धवाचिन ऋदन्तात्षष्ठ्या अलुक्। होतुरन्तेवासी। पितुःपुत्रः। विद्यायोनिसम्बन्धेभ्यस्तत्पूर्वोत्तरपदग्रहणं। नेह। होतृधनं। पितृगृहं। विभाषा स्वसृपत्योः ६।३।२४। ऋदन्तात्षष्ठ्या अलुग्वा स्व

नु कृपाणामित्यतिदेशात्प्रवृत्त्यैवेष्टसिद्धेरित्याहुः नेन सिद्धवाचक्रबंध इति तत्पुरुष इत्यनुवृत्तेस्तत्पुरुष एवायं निषेधः बहुव्रीहौ बंधे च विभाषेति विकल्पः वपश्यतोहर इति पश्यंतमनादृत्य हरतीत्यर्थः षष्ठी चानादर इति षष्ठी देवानामिति मूर्खो हि देवानां प्रीतिं जनयन्तीति देवपशुत्वादिति मनोरमा अयं भावः ब्रह्मज्ञा नरहितत्वात्संसारिणो मूर्खास्ते तु यागादिकर्माण्यनुतिष्ठंतः पुरोडाशादिप्रदानद्वारा देवानामत्यंतप्रीतिं जनयंति ब्रह्मज्ञानिनस्तु न तथा तेषां यागाद्यनुष्ठानाभा

स्या न्यायेन त्वाकृसा। एतन्ने तथा एव द्दति शोपपुच्छेतिशुनःशेपमस्य शुनः शेपः यद्यपि शेपस्शब्दः सकारांतः गोर्लिगंचिन्हशेपसारित्यमरप्रयोगात्तथापि शीकोलिंपादित्वा
दौ एषःदर्केश्वत्य ये अकारांतोप्यस्त्येव तथा च मंत्रः यस्यामुशंतः प्रहराम शेपमिति चिन्हशेफसोरिति पाठे तु शेपशब्दस्य सकारांतत्वशंकैव नास्तीति बोध्यं शुनःपुच्छ

मातुःपितुर्भ्यामन्यतरस्याम्॥८।३।८४॥ आभ्यां स्वसुः सस्य षो वा स्यात् समासे। मातुःष्वसा। मातुःस्वसा। पितुःष्वसा। पितुःस्वसा। लुकि तु। मातृपितृभ्यां स्वसा॥८।३।
८४॥ आभ्यां परस्य स्वसुः सस्य षः स्यात् समासे। मातृष्वसा। पितृष्वसा। असमासे तु। मातुःस्वसा। पितुःस्वसा॥ इत्यलुक्समासः॥ घरूपकल्पचेलड्ब्रुवगोत्र
मतहतेषु ङ्योऽनेकाचो ह्रस्वः॥६।३।४३॥ भाषितपुंस्काद्यो ङी तदन्तस्यानेकाचो ह्रस्वः स्यात् घरूपकल्पपप्रत्ययेषु चेलडादिषु चोत्तरपदेषु। ब्राह्मणि
तरा। ब्राह्मणितमा। ब्राह्मणिरूपा। ब्राह्मणिकल्पा। ब्राह्मणिचेली। ब्राह्मणिब्रुवा। ब्राह्मणिगोत्रेत्यादि। ब्रूञः पचाद्यचि वच्यादेशाद्गुणयोरभावोपि निपा
त्यते। चेलडादीनि कुत्सितविषये कुत्सनवाचीनि। तैः कुत्सितानि कुत्सनैरिति समासः॥ ङ्यः किं। दत्तातरा। भाषितपुंस्कात्किं। आमलकीतरा। कुवलीतमा॥ न
द्याः शेषस्यान्यतरस्याम्॥६।३।४४॥ अङ्यन्तनद्याः ङ्यन्तस्यैकाचश्च घादिषु ह्रस्वो वा स्यात्। ब्रह्मबन्धुतरा। ब्रह्मबन्धूतरा। स्त्रीतरा। स्त्रितरा। कृन्नद्यान
लक्ष्मीतरा। लक्ष्मितरा॥ उगितश्च॥६।३।४५॥ उगितः परा या नदी तदन्तस्य घादिषु ह्रस्वो वा स्यात्। विदुषितरा। ह्रस्वाभावपक्षे तसिलादिष्विति पुंवत्। विद्वत्तरा। छत्त्वादिषु
विदुषीतरेत्यप्युदाहृतं तन्निर्मूलं। हृदयस्य हृल्लेखयदण्लासेषु॥६।३।५०॥ हृदयं लिखतीति हृल्लेखः। हृदयस्य प्रियं हृद्यं। हृदयस्येदं हार्दं। हृल्ला
सः। लेखेत्यणन्तस्य ग्रहणं। घञि तु। हृदयलेखः। लेखग्रहणमेव ज्ञापकं। उत्तरपदाधिकारे तदन्तविधिर्नास्तीति॥ वा शोकष्यञ्रोगेषु॥६।३।५१॥ हृच्छोकः

इत्यादावलुग्बहुव्रीहिः त्रयाणामपि ऋषिविशेषाणां संज्ञाः॥ ॥ मातुःपितुर्भ्यामिति सूत्रे समासे ग्रहणं सङ्ग इत्यत समासस्यानुवर्तितं तत्फलं दर्शयति असमासे त्विति वाक्ये
वैकल्पिकमपि षत्वं नेत्यर्थः॥ ॥ इत्यलुक्समासः॥ ॥ घरूपकल्पतरप्तमपौ घः प्रशंसायां रूपप् चिलवसने चेलडिति पचाद्यौ टित्यत्रैतेते ङीबुवर्थः अत्र
ये षितिलेखग्रहणे नोत्तरपदाधिकारे प्रत्ययग्रहणे तदंतग्रहणं नास्तीति ज्ञापयिष्यत इति भावः॥

त्रा ह्मणीतरेति जातश्चेति निषेधान्नसिलादिष्विति न पुंवद्भावः चेलीतिपचादौ चेलडितिपाठात् टिड्ढेति ङीप् आमलकीति आमलकीकुवलीशब्दौ वृक्षनित्यस्त्रीलिंगौ न या उक्तादन्यः शूषः स च द्विधेत्याह अऊंतेति उपलक्षणमेतत् भाषितपुंस्केत्यपि नेह संबध्यते इत्याशयेनाह स्त्रीतरेति उगितः परायान दीतिर्ई दूतोः केवलयोरपि नदीसं ज्ञेत्याश्रियेद मुक्तं विदुषितरेति उगितश्चेति ङीपि वसोः संप्रसारणं इत्यादिष्विति प्रक्रियातद्व्याख्यानानिचादिशब्दग्राह्याणि असंतग्रहणमिति अप्प्रत्ययसाह चर्याल्लेखगशब्दो ऽस्मिंत एव निर्दिष्ट इति भावः नन्वेवं लेखग्रहणमेव व्यर्थं स्यादणग्रहणेनैव सिद्धेरत आह ज्ञापकमिति अत एव घरूपकल्पेषु तरं तग्रहणेनेति व्याख्या

सो हार्दे। सोत्हृदय्यौ हृद्रोगः। हृदयरोगः। हृदय शब्दपर्यायो हृच्छब्दोप्यस्ति तेन सिद्धे समपद्भ्यार्थमिदं। पादस्य पदाऽज्यातिगोपहतेषु ६।३। ।५२। एषूत्तरपदेषु पादस्य पद इत्यादेशः स्यात्। पादाभ्यामजतीति। पदाजिः। पदातिः। अज्यतिभ्यां पादे चेतीण् प्रत्ययः अजेर्व्यभावो निपातना तू। पदगः। पदोपहतः। पद्यत्य ऽतदर्थे। ६।३।५३। पादस्य पत्स्यादतदर्थे यति परे। पादौ विध्यन्ति। पद्याः शर्कराः। अतदर्थे किं। पादार्थमुदकम्पाद्यं॥ पादार्घाभ्यां चेतियत्। इके चरतावुपसंख्यानम्। पादाभ्यां चरति। पदिकः। पद्यत्ये त्यान्नत इन्नहिमकाषिहतिषु च ६।३।५४। पद्धिमं। पत्काषी। पद्धतिः। ऋ चः शे। ६।३।५५। ऋचः पादस्य पत्स्याच्छे परे। गायत्र्याः पच्छः शंसति। पादम्पादमित्यर्थः। ऋचः किं। पादशः कार्षापणान् ददाति। वा घोषमिश्रशब्देषु ६।३। ।५६। पादस्य पत् घोषः। पादघोषः। पन्मिश्रः। पादमिश्रः। पच्छब्दः। पादशब्दः। निष्के चेति वाच्यं। पन्निष्कः। पादनिष्कः॥ ॥ ॥

त्॥ ०॥ सो हार्दे इति ब्राह्मणादित्वात् ष्यञ् हृद्रोगस्थिध्वंत इत्युभयपरत्वद्धिः पादस्य पद उत्तरसूत्रे पद्ग्रहणात्पदेत्यप्रथमन्तः सोत्रो विभक्तिलुक् तदाह अदंतादेशः इति तेन पद गइत्यादि सिद्धं पद्या इति विध्यत्यधनुषेति यत् पाद्यमिति पादार्घाभ्यां चेति यत् पूर्वसूत्रे आज्यात्यादिषु प्राण्यंगस्यैव करणत्व संभवादिहापि तद्वचन एव पादशब्दो गृह्य ते न पद्धिमाख्यवचनः तेन हाभ्यां पादाभ्यां क्रीतं द्विपाद्यं त्रिपाद्यमित्यत्र पणपादमाषेति यति पदादेशो न भवति एतच्च वृत्तिहरदत्तग्रंथयोः स्पष्टं पत्काषीति सुप्यजातावि तिणिनिः पद्धति रिति कर्मणि क्तिन् ऋचः शे इति शस्प्रत्ययस्येदमनुकरणं लोमादिषु पादशब्दस्य पाठाभावान्मत्वर्थे शो न संभवतीति भावः पच्छ इति संख्यैकवचनाच्च

उदपेषमिति [illegible] इत्युक्तेः उदधिरिति उदकं धीयतेऽस्मिन्निति विग्रहः कर्मण्यधिकरणे चेति किप्रत्ययः उदमंथ इति द्रवद्रव्यसंस्कृताः सक्तवो मंथः उद
केन मंथ इति विग्रहे तृतीयेति योगविभागात्समास इति हरदत्तः शुक्लीभाव इति ऊर्यादिच्विडाचश्चेति च्व्यंतत्वान्निपातत्वेऽव्ययत्वं भ्रुकुंस इत्यादि भ्रुकुंसश्च भ्रु
कुंसश्च भ्रूकुंसश्चेति नर्त्तक इत्यमरः नेदीयमीला भ्रकुटिर्भ्रुकुटिर्भ्रूकुटी स्त्रियामिति च एकतद्धिते एकेति लुप्तषष्ठीकं तदाह एकशब्दस्येति ह्रस्वविधानमस्य न

उदकस्योदः संज्ञायाम् ।६।३।५७॥ उदमेघः । उत्तरपदस्य चेति वक्तव्यम्॥ क्षीरोदः । पेषंवासवाहनधिषु च ।६।३।५८॥ उदपेषं पिनष्टि । उद
वासः । उदवाहनः । उदधिर्घटः । समुद्रे तु पूर्वेण सिद्धम् । एकहलादौ पूरयितव्येऽन्यतरस्याम् ।६।३।५९॥ उदकुम्भः । उदककुम्भः । एकेति किं । उ
दकस्थाली । पूरयितव्येति किं । उदकपर्वतः । मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च ।६।३।६०॥ उदमन्थः । उदकमन्थः । उदौदनः ।
उदकौदनः । इको ह्रस्वोऽङ्यो गालवस्य ।६।३।६१॥ इगन्तस्याङ्यन्तस्य ह्रस्वो वा स्यादुत्तरपदे । ग्रामणिपुत्रः । ग्रामणीपुत्रः । इकः किं । रमापतिः । अङ्य इति किं । गौरी
पतिः । गालवग्रहणं पूजार्थं । अन्यतरस्यामित्यनुवृत्तेः । इयङुवङ्भाविनामव्ययानां च नेति वाच्यं । श्रीमदः । भ्रूभङ्गः । शुक्लीभावः । अभ्रुकुंसादी
नामिति वक्तव्यं ॥ भ्रुकुंसः । भ्रुकुटिः । भ्रूकुंसः । भ्रूकुटिः । अकारोऽनेन विधीयत इति व्याख्यान्तरं । भ्रुकुंसः । भ्रुकुटिः । भ्रुवा कुंसा भाषणं शोभा वा य
स्याः स्त्री वेषधारी नर्त्तकः । भ्रुवः कुटिः कौटिल्यं । एकतद्धिते च ।६।३।६२॥ एकशब्दस्य ह्रस्वः स्यात्तद्धिते उत्तरपदे । एकस्या आगतं । एकरूपं. एक
क्षीरं । ङ्यापोः संज्ञाछन्दसोर्बहुलं ।६।३।६३॥ रेवतिपुत्रः । अजक्षीरं । त्वे च ।६।३।६४॥ त्वप्रत्यये ङ्यापोर्वा ह्रस्वः । अजत्वं । अजात्वं । रोहिणित्वं । रोहि
णीत्वं । ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे ।६।१।१३॥ ष्यङन्तस्य पूर्वपदस्य सम्प्रसारणं स्यात्पुत्रपत्योरुत्तरपदयोस्तत्पुरुषे ॥ सम्प्रसारणस्य
।६।३।१३९॥ सम्प्रसारणस्य दीर्घः स्यादुत्तरपदे ॥ ॥ ९९ वंतएवोपपुज्यते न तु केवले स्वभावत एव ह्रस्वत्वादतो व्याचष्टे एकस्या आगतमि
त्यादि [illegible] इह तत्पुरुषपदेन पूर्वपदमुत्तरपदं चाक्षिप्यते तत्र ष्यङः पूर्वपदस्य विशेषणत्वं तंतगृह्यत इत्याह ष्यङन्तस्येति पुत्रपत्योरुत्तरपदयोरिति पुत्रपत्यंतयो
रिति व्याख्याने तु कारीषगंध्यापरमपुत्र इत्यादावपि प्रसंगः स्यादिति भावः संप्रसारणस्य उत्तरपद इत्यधिक्रियते हलोप इत्यतो दीर्घ इत्यनुवर्त्तनेतदाह दीर्घः स्या

इत्तरपद इति हलइति दीर्घः ज्ञनप वर्तते सत्यप्यलुप्तत्वे नागसंज्ञाया अप्रवृत्तेः॥ ॥ कौमुदगंध्याया इति कुमुदगंधेरपत्यं स्त्री कौमुदगंध्या तस्यापत्यमित्यणि कृते ङ्लिनो
रितिष्यङादेशः यङश्चाप् ननु कौमुदगंधीपुत्र इत्यादाविकोह्रस्वो ङ्योगालवस्येति ह्रस्वेन भाव्यं दीर्घविधानं तु पक्षे सावकाशमित्यत आह व्यवस्थितविभाषयेति नेनैतिसंप्रसा
रणमिष्टं नेत्यर्थः अतिकारीषेति कारीषगंध्यामतिक्रान्तोऽतिकारीषगंध्यस्तस्य पुत्रः इष्टकचितमिति कर्तृकरणे कृतेति तृतीयासमासः पक्वेष्टकचितमिति पदाधिकारात्तदं
तविधिः प्रवर्त्तत इति भावः मालभारीति मालां बिभर्त्तीत्यर्थः सुप्यजातौ णिनिस्ताच्छील्ये इति णिनिः हारिरिति पाठांतरं कारे सत्या अगदेति यतो नुवर्जनाद्दाह नुमस्यादिति सत्यंकारः

कौमुदगंध्यायाः पुत्रः कौमुदगन्धीपुत्रः। कौमुदगन्धीपतिः। व्यवस्थितविभाषया ह्रस्वो न। स्त्रीप्रत्यये चानुपसर्जने नेति तदादिनियमप्रतिषे
धात्। परमकारीषगन्धीपुत्रः। उपसर्जने तु तदादिनियमान्नेह। अतिकारीषगंध्यापुत्रः। बन्धुनि बहुव्रीहौ। ६।१।१४॥ बन्धुशब्दे उत्तरपदे
ष्यङः सम्प्रसारणं स्याद् बहुव्रीहौ। कारीषगंध्या बन्धुरस्येति। कारीषगन्धीबन्धुः। बहुव्रीहाविति किं। कारीषगंध्याया बन्धुः कारीषगंध्याब
न्धुः। ल्वनिर्देशस्तु शब्दस्वरूपापेक्षया। मातच्मातृकमातृषु वा॥ कारीषगन्धीमातः। कारीषगंध्यामातः। कारीषगन्धीमातृकः। कारीषगं
ध्यामातृकः। कारीषगन्धीमाता। कारीषगंध्यामाता। अस्मादेव निपातनान्मातृशब्दस्य मातजादेशो नद्युतश्चेति कप्विकल्पश्च बहुव्रीहावे
वेरम्। नेह। कारीषगन्ध्याया माता। कारीषगंध्यामाता॥ चित्वसामर्थ्याच्चित्स्वरो बहुव्रीहिस्वरं बाधते। इष्टकेषीकामालानां चिततूलभा
रिषु। ६।३।६५॥ इष्टकादीनामेषां नाम्नां पूर्वपदानां चितादिषूत्तरपदेषु ह्रस्वः स्यात्। इष्टकचितं। पक्वेष्टकचितं। इषीकतूलं॥
मुञ्जेषीकतूलं। मालभारी। उत्पलमालभारी॥ कारे सत्यागदस्य। ६।३।७०॥ मुम् स्यात्। सत्यङ्कारः। अगदङ्कारः। अस्तोश्चेति वक्तव्यम्॥ अस्तुङ्का
रः। धेनोर्भव्यायाम्॥ धेनुम्भव्या॥ लोकस्य पृणे॥ ॥

१९ अपथ्यकरणं अपथ्यथेपि सत्याद्यपथ इति डाचं बाधित्वा परत्वान्मुमेव अगदं
कारे वैद्यः अस्तुंकारोभ्युपगमः अस्त्विति तिङन्तप्रतिरूपकमव्ययं धेनुंभव्येति भविष्यन्ती धेनुरित्यर्थः भव्यगेयेति निपातनात्कर्तरि कृत्यः धेनुश्चासौ भव्या चेति
विग्रहः गौतमस्मृतौ तु अधेनुं धेनुभव्येत्यत्रार्षत्वान्मुम्नेति बोध्यं॥

लोकम्पृण इति [illegible] तु [illegible] कर्मेति [illegible] अनभ्यासमित्य इति अभ्यासं समीपं तद्भिन्नमनभ्यासं यन्तीति इणस्तुदृजुष इति इणः क्यप्। भ्राष्ट्रमिन्ध इति क-
र्मण्युपपदे [illegible] उपपदसमासः। एवमग्निमिन्धोऽपि। गिलेऽगिलस्येति। गिलशब्दे उत्तरपदे अगिलस्य मुमित्यर्थः। तिमिङ्गिल इति मत्स्यविशेषः। गिरतेर्मूलविभुजादित्वात्कः। अचि विभा-
षेति लत्वं। गिलगिले चेति। गिलगिलतीति गिलगिलः तिमीनां गिलगिल इति विग्रहे इदमारब्धं। रात्रेः कृतीति। उत्तरपदस्याधिकारे प्रत्ययग्रहणे तदन्तग्रहणाभावेऽपि रात्रिंश-
ब्दात्परत्वेन कृतां सम्भवात्कृदन्त उत्तरपदे अयं विधिरित्याशयेनोदाहरति रात्रिंचर इति यद्यप्याचारक्विबन्ताताबलादिः सम्भवति तथापि विलम्बितोपस्थितिकत्वा-

लोकम्पृणः। पृण इति मूलविभुजादित्वात्कः। इच्छत्यनभ्यासस्य। अनभ्यासमित्यः। दूरतः परिहर्तव्य इत्यर्थः। भ्राष्ट्राग्न्योरिन्धे। भ्राष्ट्रमि-
न्धः। अग्निमिन्धः। गिलेऽगिलस्य। तिमिङ्गिलः। अगिलस्य किं। गिलगिलः। गिलगिले च॥ तिमिङ्गिलगिलः। उष्णभद्रयोः करणे॥ उष्णङ्क-
रणं। भद्रङ्करणं। रात्रेः कृति विभाषा। ६।३।७२॥ रात्रिञ्चरः। रात्रिचरः। रात्रिमटः। रात्र्यटः। अखिदर्थमिदं सूत्रं खिति तु। अरुर्द्विषदिति
नित्यमुन्तु वक्ष्यते। रात्रिंमन्यः। सहस्य सः संज्ञायाम्। ६।३।७८॥ उत्तरपदे। सपलाशं संज्ञायां किं। सहयुध्वा। ग्रन्थान्ताधिके च। ६।३।७९॥
अनयोः परयोः सहस्य सः स्यादुत्तरपदे। समुहूर्त्तं ज्योतिषमधीते। सद्रोणा खारी। द्वितीये चानुपाख्ये। ६।३।८०॥ अनुमेये द्वितीये सहस्य स-
स्स्यात्। सराक्षसीका निशा। राक्षसानां साक्षादनुपलभ्यमानानां निशयानुमीयते। समानस्य छन्दस्यमूर्द्धप्रभृत्युदर्केषु। ६।३।८४॥ समानस्य
सः स्यादुत्तरपदे न तु मूर्द्धादिषु। अनुभ्राता सगर्भ्यः। अनुसखा सयूथ्यः। योनः सनुत्यः। तत्र भव इत्यर्थे सगर्भसयूथसनुताद्यत्। अमूर्द्धा-
दिषु किं। समानमूर्द्धा। समानप्रभृतयः। समानोदर्काः। समानस्येति योगो विभज्यते। तेन सपक्षः। साधर्म्यं॥

[illegible] इति भावः। नित्यमेवेति पूर्वविप्रतिषेधेनेति भावः। रात्रिंमन्यन्त इति आत्ममाने खश्चेति खश्। सार्वधातुकत्वात्तस्मिन्परे श्यन्। सहयुध्वेति सहे चेति क्वनिप्।
[illegible] समुहूर्त्तमिति। अन्तवचने अव्ययीभावः। अव्ययीभावे चाकाले इत्यत्र कालपर्युदासाद्[illegible] सभावे ग्रन्थान्तग्रहणं द्वितीये
[illegible] द्वितीयः [illegible] लोकप्रसिद्धः [illegible] प्रत्यक्षं तद्भिन्नमनुमेयं तदाह अनुमेय इति सराक्षसीकेति नद्यृतश्चेति कप्। योगो विभज्यत इति एतदर्थमेव।

सु. सि.कौ.

छंदसभपि समानस्य छंदसीतिसूत्रमिहोपन्यस्तमितिभावः वहुव्रीहिरिति तेनवोपसर्जनस्येति एतदर्थं सहस्य सभावः प्राप्नोतीतिभावः॥ ॥ सज्योतिरिति समानंज्यो
तिरस्येति वहुव्रीहिः यस्मिं ज्योतिषि आदित्येन नक्षत्रे वा संजातं तत्दर्शमपर्यंतमनुवर्त्तमानमाशौचं सज्योतिरित्युच्यते इह समानमध्यमवीराश्चेति प्रतिपदोक्त ए
वसमासेन गृह्यते सरूपाणामेकशेष इतिलिंगात् किंतु वहुव्रीहिरपि इति हरदत्तः ब्रह्मचारीति व्रत इति णिनिः सब्रह्मचारीति समानो ब्रह्मचारीत्यर्थः ब्रह्मचारिण

सजातीय इत्यादि। सिद्धमिति काशिका। अथवा सहशब्दस्स दृशवचनोस्ति। सदृशस्सख्या ससखीति यथा तेनायमस्वपदविग्रहो वहु
व्रीहिः। समानः पक्षोयस्येत्यादि। ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनवन्धुषु। ६।३।८५॥ एषु द्वादशसूत्रपदे
षु समानस्य [illegible] सज्योतिः। सजनपद इत्यादि। चरणे ब्रह्मचारिणि। ६।३।८६॥ ब्रह्मचारिण्युत्तरपदे समानस्य सस्याच्चरणे समान
त्वेन गम्यमाने। चरणं शाखा ब्रह्म वेदः। तदध्ययनार्थं व्रतमपि ब्रह्म। तच्चरतीति ब्रह्मचारी। समानस्य सः। सब्रह्मचारी। तीर्थे ये। ६।३।८७॥
तीर्थे उत्तरपदे यादौ प्रत्यये विवक्षिते समानस्य सस्यात्। सतीर्थ्यः। एकगुरुकः। समानतीर्थे वासीति यत्प्रत्ययः। विभाषोदरे॥ ६।३।८८॥ या
दौ प्रत्यये विवक्षिते। इत्येव। समानोदर्यः। सोदर्यः। दृग्दृशवतुषु। ६।३।८९॥ सदृक्। सदृशः। दृक्षे चेति वक्तव्यं। सदृक्षः। वतुरुत्तरार्थः। इद
ङ्किमोरीश्की। ६।३।९०॥ दृग्दृशवतुषु इदम ईश् किमः कीस्यात्। ईदृक्। ईदृशः। कीदृक्। कीदृशः। वतुराहरणं वक्ष्यते। दृक्षे चेति वक्तव्यम्। ई
दृक्षः। कीदृक्षः। आसर्वनाम्नः। दृक्षे च। तादृक्। तादृशः। तावान्। तादृक्षः। दीर्घः मत्वोक्ते। अमूदृशः। अमूदृक्। अमूदृक्षः। समासेऽङ्गुलेस्स
ङ्गः। ८।३।८०॥ अङ्गुलिशब्दात्सङ्गस्य सस्य मूर्द्धन्यस्स्यात्समासे। अङ्गुलिषङ्गः। समासे किं। अङ्गुलेस्सङ्गः॥ ९ श्च समानत्वं ब्रह्मणः समानत्वात्

नतश्च समाने ब्रह्मणि व्रतचारीति फलितोर्थः तीर्थे ये इत्यकारोन विवक्षितः प्रत्यय इति विशेष्यं तु व्याख्यानाल्लभ्यते तेन यस्मिन्विधिरिति तदादिविधिरित्याह प्र
यादौ प्रत्यय इति विवक्षित इति उत्तरपदमात्रनिमित्तः सभावोन्तरंगः समासप्रकृतिकसुवंतात्तु यत्प्रत्ययः अतस्तस्य परत्वं न संभवतीत्याशयेनेदमुक्तं सोदर्य इ
ति समानोदरे [illegible] साक् समानस्य सभावे कृते सोदराद्य इति यः सभावाभावपक्षे तु समानोदरे शयित ओ चोदात्त इति यति समानोदर्यः सदृक्स

समानान्यो [illegible] क्वचिन्न कगौरीदीर्घ इति अदस आत्वे कृते सवर्णदीर्घ इत्यर्थः एतच्च पूर्वोत्तरोदाहरणेष्वपि॥ ❁ ॥ भीरोस्थानमिति विसर्जनीयव्यवधा-
नात्षत्वप्राप्तिरस्ति ज्योतिषः स्तोम इति इदं ज्योतिस्तोमोयमिति प्रत्युदाहर्तुमुचितं एति संज्ञायामिति सुषामाद्यंतर्गणसूत्रमेतत् एवं नक्षत्राद्धेत्यपि विष्वक्सेन इति चर्त्व

भीरोः स्थानम्। ८।३।८१॥ भिरुशब्दात् स्थानस्य सस्य मूर्द्धन्यः स्यात् समासे। भीरुष्ठानं। असमासे तु। भीरोः स्थानं। ज्योतिरायुषः स्तोमः। ८।३।८३।
आभ्यां स्तोमस्य सस्य मूर्द्धन्यः समासे। ज्योतिष्टोमः। आयुष्टोमः। समासे किं। ज्योतिषः स्तोमः। सुषामादिषु च। ८।३।९८॥ सस्य मूर्द्धन्यः। शोभनं साम
यस्य। सुषामा। सुषन्धिः। एति संज्ञायामगात्। ८।३।९९॥ सस्य मूर्द्धन्यः। हरिषेणः। एति किं। हरिसक्थं। संज्ञायां किं। पृथुसेनः। अगकारात्किं।
विष्वक्सेनः। इण्कोरित्येव। [illegible]सेनः। नक्षत्राद्वा। ८।३।१००॥ एति संज्ञायामगकारान्मूर्द्धन्यो वा। रोहिणीषेणः। रोहिणीसेनः। अगकारात्किं
शतभिषक्सेनः। आकृतिगणोयं। अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु। ६।३।९९॥ अन्यशब्द-
स्य दुगागमस्स्यादाशीरादिषु परेषु। अन्यदाशीः। अन्यदाशा। अन्यदास्था। अन्यदास्थितः। अन्यदुत्सुकः। अन्यदूतिः। अन्यद्रागः।
अषष्ठीत्यादि किं। अन्यस्या अन्येन वा आशीः। अन्याशीः। कारके छे च नायन्निषेधः। अन्यस्य कारकः। अन्यत्कारकः। अन्यस्यायं। अन्यदीयः। गहादेराकृ-
तिगणत्वाच्छः। अर्द्धे विभाषा। ६।३।१००॥ अन्यदर्थः। अन्यार्थः। कोः कत्तत्पुरुषेऽचि। ६।३।१०१। अजादावुत्तरपदे। कुत्सितोऽश्वः कदश्वः। कदन्नं।
तत्पुरुषे किं। कूष्ट्रो राजा। त्रौ च। कुत्सितास्त्रयः। कत्त्रयः। रथवदयोश्च। ६।३।१०२॥ कद्रथः। कद्वदः। तृणे च जातौ। ६।३।१०३॥ कत्तृणं। कापथ्य-
क्षयोः। ६।३।१०४॥ कापथः। काक्षः। अक्षशब्देन तत्पुरुषः। अक्षिशब्देन बहुव्रीहिर्वा॥ ॥ ((स्यासिद्धत्वादुकारेण व्यवधानमस्तीति भावः॥

अषष्ठ्य" अन्यदाशीरित्यादयः कर्मधारयाः नायं निषेध इति॥ एतच्च षष्ठीतृतीयास्थस्येत्येव सिद्धे निषेधानित्यत्वज्ञापनार्थं तद्धि नेत्र उपादानाल्लभ्यत इत्याहुः त्रौ च
अनत्याद्यर्थमिदं वार्त्तिकं कन्यादिभ्यो ढकञिति निर्देशेनैव सिद्धं कापथमिति कुत्सितः पंथाः ऋक्पूरब्धूरिति समासांतः पथः संख्याव्ययादेरिति नपुंसकत्वं अथा।
॥ त्रविभाषेति॥ ॥

पदर्थः अस्यानुवृत्तेरिति भावः पृषोदरप्रकाराणीति आदिशब्दो हि नव्यव स्थावचनः यथोपदिष्टपदानर्थक्यादिति भावः शिष्टैरिति अध्याहारलभ्यमिदं यथोपदिष्ट
मित्यव्ययार्थेऽव्ययीभावः उपदिष्टिश्चोच्चारणक्रिया यानि यानि शिष्टैरुपदिष्टानीत्यर्थः एवं स्थिते फलितमाह यथोच्चारितानि तथैवेति समासपदविषयकमिदं उत्तर
पदाधिकारात् निरुक्तादिशास्त्रसिद्धानामसमासपदानामुणादयो बहुलमित्येव सिद्धेश्च यद्यपि समासविषयकमेवेति नियमो न युज्यते हंससिंहशब्दयोरपि प्राचो
कारिकायामुदाहृतत्वात्तथापि तत्कारिकायां यथाशब्दाध्याहारे दृष्टान्तप्रदर्शनार्थं तयोरुपन्यासः कृतो न तु प्रकृतसूत्रोदाहरणत्वेनेति नियमोक्तिः सम्यगेवे

ईषदर्थे। ६।३।१०५। ईषज्जलं। काजलं। अजादावपि परत्वात्कादेशः। कोष्णः। विभाषा पुरुषे। ६।३।१०६। कापुरुषः। कुपुरुषः। अप्राप्तविभाषेयं। ईष
दर्थे हि पूर्वविप्रतिषेधान्नित्यमेव। ईषत्पुरुषः। कापुरुषः। कवं चोष्णे। उष्णशब्दे उत्तरपदे कवङ्का चवा स्यात्। कवोष्णं। कोष्णं। कदुष्णं। पृषोदरा
दीनि यथोपदिष्टम्। ६।३।१०९॥ पृषोदरप्रकाराणि शिष्टैर्यथोच्चारितानि तथैव साधूनि स्युः। पृषत् उदरं। पृषोदरं। तलोपः। वारिवाहकोब
लाहकः। पूर्वपदस्य वः उत्तरपदादेश्च लत्वम्। भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात्। गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम्॥१॥ दिक्
शब्देभ्यस्तीरस्य तारभावो वा॥ दक्षिणतारं। दक्षिणतीरं। उत्तरतारं। उत्तरतीरं। दुरो दाशनाशदभध्येषूत्वमुत्तरपदादेष्टुत्वं च॥ दुःखेन दाश्य
ते। दूडाशः। दुःखेन नाश्यते दूणाशः। दुःखेन दभ्यते। दूडभः। खलन्तावेते। दभेर्नेलोपो निपात्यते। दुष्टं ध्यायतीति दूढ्यः। आतश्चेति कः। वृ
षन्तोसीः सीदन्तीति। वृषी। धुवच्छेदस्य ह आदेशः। सदेरधिकरणे ड्डः। आकृतिगणोऽयं। संहितायाम्। ६।३।११४॥ ॥ ॥

त्वाद्धंसः वर्णागमादिति हन्तेः पचाद्यच् विसर्गागमः विपर्ययादिति हिंसेस्तु पचाद्यच् हकारसकारयोः स्थानव्ययः दिक्छब्देभ्य इति वार्त्तिकमिदं दुरो नाशेत्यप्येवं खलन्ति
भ्यः स्तिदाशनाशदभेति त्रयोपि ईषद्दुस्सुष्विति खल्प्रत्ययान्ता इत्यर्थः वृसीति मुनीनामासनं वृसि आकृतिगणोयमिति तेन लुंपेदवश्यमः कृत्ये तुंकाममनसोरपि
पि समो वा हितततयोर्मांसस्य पचियुड्घञोरित्यपि संगृहीतं कृत्ये तु उत्तरपदे अवश्यमः अन्तं समानेलुंपेत् अवश्यं गन्तव्यः अवश्यं सेव्यः तथा तुमः काममन
सोः परतः अन्तं लुंपेत् गन्तुकामः गन्तुमनाः समो हिततनयोः

अंतं वा लुंपेत् सहितः संहितः सनेति । पुट् घञन्तस्य रोपः । पच धातुः तस्मिन् परे मांसस्यांतं लुंपेत् मांसपचनी मांस्पाकः इह संयोगांतलोपोपि शिष्टोच्चारणान्नेति बोध्यं संहिता
यामिति तेन द्विगुणाकर्ण इत्यादौ अवग्रहे दीर्घो न भवतीति सूत्राशयमुन्मेषयंति ॥ ॥ अधिकारोयमिति तेन विश्वाहित्येत्यादौ पूर्वकालैकचोतसिङ इति दीर्घो नेत्या
दिप्रयोजनान्यूह्यानीति नहि वृतिरुह बंधने इत्यनुवर्तने वृषु सेचने व्यध ताडने रुच दीप्तौ षह मर्षणे तनु विस्तारे क्विबंतेष्विति उत्तरपदेष्विति शेषः तेन दिवसेषु रुगि
त्यादौ नातिप्रसंगः उपानदिति संपदादित्वात्कर्मणि क्विप् निवर्तंत इति नीवृत् प्रवर्षतीति प्रावृट् मर्माणि विध्यतीति मर्मवित् व्यधेर्ग्रहिज्येति संप्रसारणं निरोच

अधिकारोयं । कर्णे लक्षणस्याविष्टाष्टपञ्चमणिभिन्नछिन्नछिद्रस्रुवस्वस्तिकस्य । ६।३।११५॥ कर्णशब्दे परे लक्षणवाचकस्य दीर्घः । द्विगुणाकर्णः । लक्षणस्य किं । शोभनकर्णः । अविष्टादीनां किं । विष्टकर्णः । अष्टकर्णः । पञ्चकर्णः । मणिकर्णः । भिन्नकर्णः । छिन्नकर्णः । छिद्रकर्णः । स्रुवकर्णः । स्वस्तिककर्णः । नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ । ६।३।११६॥ क्विबन्तेषु परेषु पूर्वपदस्य दीर्घः । उपानत् । नीवृत् । प्रावृट् । मर्मावित् । नीरुक् । अभीरुक् । ऋतीषट् । परीतत् । क्वाविति किं । परिणहनं । विभाषा पुरुष इत्यतो मण्डूकप्लुत्या विभाषानुवर्तते । सा च व्यवस्थिता । तेन गतिकारकयोरेव नेह । पटुरुक् । तिग्मरुक् । वनगिर्योः संज्ञायां कोटरकिंशुलुकादीनाम् । ६।३।११७॥ कोटरादीनां वने परे किंशुलुकादीनां गिरौ परे दीर्घः स्यात् संज्ञायां ॥ वनेत्पुरगामिश्रकासिध्रकासारिकाकोटराग्रेभ्यः । ८।४।४॥ वनशब्दस्योत्तरपदस्य एभ्य एव णत्वं नान्येभ्यः । इह कोटरादीनां पञ्च दीर्घविधौ कोटरादयो बोध्याः । तेषां कृतदीर्घाणां णत्वविधौ निर्देशो नियमार्थः । अग्रशब्दस्य तु विध्यर्थः ॥

९ नरुतीति नीरुक् ऋतिं सहते
ऋतीषट् पूर्वपदादिति षत्वमिति हरदत्तः सहेः पृतनर्ताभ्यां चेत्यत्र सहेरिति योगविभागाच्चकारस्यानुक्तसमुच्चयार्थत्वाद्वा सुषामादेराकृतिगणत्वादित्यपरे । प
रितनोतीति परीतत् गमकादिवित्यत्र गमादीनामिति वाच्यमित्युक्तेर्नलोपः वनं पुरगा व्यत्ययेन षष्ठ्यर्थे प्रथमेत्याह वनशब्दस्येति एभ्य एवेति कृतदीर्घेभ्यः पु
रगादिभ्य एव परस्य णत्वमित्यर्थः एभ्यो वनस्यैव णत्वं नान्येषामिति विपरीतनियमशंका तु न भवति वनादन्यस्मिन्नुत्तरपदे पुरगादीनां दीर्घो नत्वासंभवा
त् नियमार्थ इति अयंभावः पुरगामिश्रकेति दीर्घनिर्देशात्संज्ञायां दीर्घाभावेन संज्ञायामेव णत्वमिति फलितं एवं च पूर्वपदात्संज्ञायामित्यनेनैव वनस्य

णत्वेसिद्धे पुनरपिक्षुम्नदीर्घस्य पुरगादि पंचकस्य णत्वविधौ निर्देशो नियमार्थ एवेति विध्यर्थ इति असंज्ञात्वेन पूर्वपदात्संज्ञायामित्यस्या प्रवृत्तेरिति भावः न च पुर
गाग्रहणमपि विध्यर्थं गकारव्यवधानेन पूर्वपदात्संज्ञायामित्यस्य प्राप्त्यभावादिति वाच्यं अगइत्यस्य पंचम्यंतत्वं स्वीकृत्य गांतात्पूर्वपदात्परस्य णत्वेन नित्या

पुरगावणं। मिश्रकावणं। सिध्रकावणं। सारिकावणं। कोटरावणं। एभ्य एवेति किं। असिपत्रवनं। वनस्याग्रे। अग्रेवणं। राजदन्तादिषु निपात
नात्सप्तम्या अलुक् प्रातिपदिकार्थमात्रे प्रथमा। किंशुलुकादीनां। गिरिः वले। ६। ३। ११८॥ वलप्रत्यये परे दीर्घस्यात्संज्ञायां। कृषीवलः। मतौ बह्वचो
नजिरादीनाम्। ६। ३। ११९॥ अमरावती। अनजिरादीनां किं। अजिरवती। बह्वचः किं। व्रीहिमती। संज्ञायामित्येव। नेह। वलयवती। शरा
दीनाञ्च। ६। ३। १२०॥ शरावती। इकोवहेऽपीलोः। ६। ३। १२१॥ इगन्तस्य दीर्घस्यात् वहे। ऋषीवहं। कपीवहं। इकः किं। पिण्डवहं। अपीलोः
किं। पीलुवहं। अपील्वादीनामिति वाच्यं। दारुवहं। उपसर्गस्य घञ्यमनुष्ये बहुलम्। ६। ३। १२२॥ उपसर्गस्य बहुलं दीर्घस्याद् घञन्ते परे
न तु मनुष्ये। परीपाकः। परिपाकः। अमनुष्ये किं। निषादः। इकः काशे। ६। ३। १२३॥ इगन्तस्योपसर्गस्य दीर्घस्यात् काशे। वीकाशः। नीकाशः। इकः किं। प्र
काशः। अष्टनः संज्ञायाम्। ६। ३। १२५॥ उत्तरपदे दीर्घः। अष्टापदं। संज्ञायां किं। अष्टपुत्रः। चितेः कपि। ६। ३। १२७॥ एकचितीकः। नरे संज्ञायाम्। ६।
३। १२९। विश्वानरः। मित्रे चर्षौ। ६। ३। १३०॥ विश्वामित्रः। ऋषौ किं। विश्वमित्रो माणवकः। शुनोदन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु दीर्घो
वाच्यः। श्वादन्तः। इत्यादि। प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि। ८। ४। ५॥ एभ्यो वनस्य णत्वं स्यात्। प्रवणं। का
र्ष्यवणं। इह षात्परत्वात् णत्वं। विभाषौषधिवनस्पतिभ्यः। ८। ४। ६॥ एभ्यो वनस्य णत्वं वा स्यात्। दूर्वावणं। दूर्वावनं। शिरीषवनं। शिरीषवणं।

ख्यानात् पुरगाशब्दस्याकारांतत्वादग इति निषेधस्याप्रवृत्तेः अत एवाग इत्यस्य ऋगयनमित्येकमेवोदाहरणमिंत्य णृगयनादिभ्य इति निर्देशाश्रयेण त
त्र्यात्यारख्यातृमाकारे पुरगावणमित्यादि नरकविशेषस्य संज्ञा असिपत्रवनमिति एभ्यो वनस्यैवेति विपरीतनियमे तु णत्वमत्र दुर्वारमिति भावः सप्तम्यर्थस्य।

प्रातिपदिकार्थे अंतर्भावादाह प्रथमेति किंशुलुकादीनामुदाहरणमाह किंशुलुकागिरिरिति आदिशब्दग्राह्यास्त्वंजनागिरिरित्यादयः किंशुलुकेति किंशुलुकगिरिः
रामगिरिः कृषीवल इति रजः कृष्यासुतीत्यादिना मत्वर्थे वलच अमरावतीति मादुपधायाश्चेति संज्ञायामिति वा मतोर्मस्य वः घञ्मात्रस्यांतरपदत्वासंभवादाह।
घञंत इति निषाद इति पुलिंदो मनुष्यजातिः निषीदत्यस्मिन्पापमिति निषादः हलश्चेत्यधिकरणे घञ् कथं तर्हि दौवारिके प्रतीहारशब्दप्रयोग इति चेदत्राहुः प्र
तिस्रमेहारं तास्थ्याप्रान्ता च्छव्यमिति एकचितीक इति शेयाहिभाषितिकपदंष्ट्र इति वार्तिके दीर्घांतः पठ्यते केचित्तु ह्रस्वांतं पठित्वाश्चादंष्ट्र इति बहुव्रीहौ दीर्घमाहु
त्यकथे इह षादिति कार्ष्यैतिज्ञालव्यपाठस्त्वनार्ष इति भावः वनस्पतिभ्यो वनस्पणत्वमुदाहरति शिरीषवणमिति ननु वानस्पत्यः फलैः पुष्पात्तैरपुष्पा
ठ नस्पतिरित्यमरकोशाद्यस्य पुष्पं विनैव फलप्रादुर्भावस्स वनस्पतिस्स चोदुंबरादिः शिरीषस्तु न तथा तस्य पुष्पफलोभयसत्वादतो णत्वमिह कथमिति चेदत्रा

द्व्यच्त्र्यच्भ्यामेव॥ नेह। देवदारुवनं। इरिकादिभ्यः प्रतिषेधो वक्तव्यः। इरिकावनं। मिरिकावनं। वाहनमाहितात्। ८।४।८॥ आरोप्यपदस्थनेन
हाच्चिस्थान्निमित्तात्परस्य वाहननकारस्य णत्वं स्यात्। इक्षुवाहणं। आहितात्किं। इन्द्रवाहनं। इन्द्रस्वामिकं वाहनमित्यर्थः। वहतेर्ल्युटि वृद्धि
रिहैव सूत्रे निपातनात्। पानं देशे। ८।४।९॥ पूर्वपदस्थान्निमित्तात्परस्य पानस्य नस्य णत्वं स्याद्देशे गम्ये। क्षीरं पानं येषां ते क्षीरपाणाः उशीनराः
सुरापाणाः। प्राच्याः। पीयत इति पानं। कर्मणि ल्युट्॥ वा भावकरणयोः॥ ८।४।१०॥ पानस्येत्येव। क्षीरपानं॥ क्षीरपाणं ॥ ॥

ः। वनस्पतिशब्देनात्र वृक्षमात्रमुपलक्ष्यते अत्र च लुपियुक्तवदिति सूत्रस्थं भाष्यं लिंगं तत्र हि व्यक्तिवचने किं शिरीषाणामदूरभवो ग्रामः शिरीषास्तस्य वनं।
शिरीषवनमित्यत्र णत्वे कर्तव्ये वनस्पतित्वमप्यतिदिश्यते इत्युक्तं तच्च शिरीषाणां वनस्पतित्वे संगच्छते नान्यथेति दिक्॥ ॥ द्व्यच्त्र्यच्भ्यामेवेति व्यवस्थित
विभाषाश्रयणादिति भावः ओषधित्वात्प्राप्तप्रतिषेधमाह इरिकादिभ्य इति एतदपि व्यवस्थितविभाषाविज्ञानादेव सिद्धं उशीनरा इति इह उशीनरशब्दस्त
द्देशवाचिपभाक्तः कर्मणि ल्युडिति कृत्यल्युटो बहुलमित्यनेन वाभाव आदेशार्थ आरंभ इत्यप्राप्तविभाषा क्षीरपाणमिति तिः पाने ल्युट् चेति नपुंस
के भावे ल्युट् पीयते अनेनेति पानं करणे ल्युट् क्षीरस्य पानं क्षीरपाणं॥

गिरिनद्यादीनां वेति वक्तव्यमिति शेषः संज्ञायां प्राप्ते असंज्ञायामप्राप्ते उभयत्र विभाषेयमाहुः माषवापिणाविति वहलमाभीक्ष्ण्ये इति णिनिः व्रीहिवापाणीति कर्म
ण्यण् उत्तरपदं पदिति इष्टानुरोधेन तथा व्याख्यायत इति भावः गर्गभगिनीति इह भगिनीशब्द उत्तरपदं न तु भगिन्शब्दः अत्र व्याख्यानेनुम् ग्रहणमेव ज्ञापक
मिति प्राचां मतं आह अत एवेति तदुक्तं ज्ञापकं विघट्टयति किं चेति परिपक्वानीति कुमतिं चेति नित्यणत्वं प्राप्तं एकाजुत्तर प्राग्व्याख्यातमपि प्रकरणानुरोधेनस्म
र्यते वृत्रहणाविति वृत्रं हतवंतौ ब्रह्मभ्रूणेति क्विप् परिमाणीति. मनेर्ण्यंतात् क्विप् चेति क्विप् गतिकारकोपपदानामित्यादिनां सुबुत्पत्तेः प्राक्समासान्नकाराणंत
मुत्तरपदं नांतत्वान्ङीप् क्षीरपाणीति पिवतेः कर्मण्युपपदे आतोनुपसर्गे इति कः आतोलोप इटि चेत्यालोपः रम्यविणेति रम्यश्चासौ विश्चेति विग्रहः लत

गिरिनद्यादीनां वा। गिरिनदी। गिरिणदी। चक्रनितम्बा। चक्रणितम्बा। प्रातिपदिकान्तनुम्विभक्तिषु च। ८।४।११॥ पूर्वपदस्थान्निमित्ता
त्परस्यैतेषु स्थितस्य नस्य णो वा स्यात्। प्रातिपदिकान्ते। माषवापिणौ। नुमि। व्रीहिवापाणि। विभक्तौ। माषवापेण। पक्षे माषवापिनावित्यादि।
उत्तरपदं यत्प्रातिपदिकं तदन्तस्यैव णत्वं नेह। गर्ग्याणां भगिनी। गर्गभगिनी। अत एव नुम्ग्रहणं कृतं। अङ्गस्य नुम्विधानात्तद्भक्तो हि नुम
नन्तूत्तरपदस्य। किं च वाग्रहि एवं नित्यादौ हि वर्नुमो णत्वार्थमपि नुम्ग्रहणं। प्रेन्वनमित्यादौ तु क्षुभ्नादित्वान्न। युवादेर्न॥ रम्ययूना। परिपक्वा
नि। एकाजुत्तरपदे णः। नित्यमित्युक्तं। वृत्रहणौ। हरिम्मानयतीति। हरिमाणी। नुमि। क्षीरपाणि। विभक्तौ। क्षीरपेण। रम्यविणा। कुमतिं च।
॥८।४।१३॥ कवर्गवत्युत्तरपदे प्राग्वत्। हरिकामिणौ। हरिकामाणि। हरिकामेण। पदव्यवायेपि॥ ८।४।३८॥ पदेन व्यवधानेपि णत्वं न स्यात्।

आङ्गेनाश्रियां ननु अंतर्वर्तिनीं विभक्तिमाश्रित्य विशब्दस्य पदत्वात्पदव्यवायेपीति णत्वनिषेधः स्यान्नैवं उत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणप्रतिषे
धेन विशब्दस्य पदत्वाभावात् स्वादिष्वित्यनेन तु रम्यविशब्दस्यैव पदत्वं न तु विशब्दस्य यस्मात्स्वादिविधिस्तस्यैव पदत्वाभ्युपगमात् एवं च पुनर्भूणामित्यत्र णा
त्वं निर्वाधमेव नामिपरतः भूशब्दस्य पदत्वाभावात् कुमतिं च अनेकाजुत्तरपदार्थ आरंभः कावित्येव तु न सूत्रितं यस्मिन्विधिरिति तदादिविधौ कवर्गादुत्तर
पद एव हरिकामिणामित्यादावदंगं विधिः स्यान्नतु वस्त्रयुगेणेत्यादौ तथा च मतुवंतनिर्देश आवश्यकः इत्याह कवर्गवतीति पदेन व्यवधान इति निमित्तनि

मितिनोर्मध्यपदे सति णत्वं नेत्यर्थः माषकुंभवापेनेति माषकुंभं वपतीति कर्मण्यण् उपपदसमासः॥ ॥ चतुरंगयोगेनेति। चत्वार्यंगान्यस्य तेन योग इति मनोरमायां विगृहीतं तदयुक्तं उत्तरपदत्वेचायदादिविधाविति प्रत्ययलक्षणप्रतिषेधादंगशब्दस्यापदत्वात् तस्मादंगानां योगो अंगयोगश्चतुर्णामंगयोगइत्येव विग्रहीतव्यं न च चतुरंगेन योग इति विग्रहेप्यंगशब्द उत्तरपदं नेति प्रत्ययलक्षणप्रतिषेधानप्रवर्ततइति शंक्यं तस्य पूर्वं समासस्योत्तरपदत्वात् उत्तरपदत्वे चेति प्रतिषेधश्च तेनाप्युत्तरस्य समासचरमावयवस्य पदत्वे कर्तव्ये पदादिविधिभिन्ने प्रत्ययलक्षणं न प्रवर्तत इत्यर्थाभ्युपगमाच्च शाकपार्थिवादीनामुत्तरपदलोपः आदिभ्यो धातुजस्येत्यादौ तूत्तरपदशब्देन समासचरमावयवमात्रं गृह्यत इति प्रत्ययलक्षणप्रवृत्त्यभावेपि न क्षतिः इह तु पदत्वलाभा

चतुरङ्गयोगेन। अनद्धितइतिवाच्यम्॥ आर्द्रगोमयेण। शुष्कगोमयेण। कुस्तुम्बुरूणि जातिः। ६।१।१४३॥ अत्र सुण्निपात्यते। कुस्तुम्बुरु धान्याकं। स्त्रीवत्वमतन्त्रं। जातिः किं। कुतुम्बुरूणि। कुत्सितानि तिन्दुकीफलानीत्यर्थः। अपरस्पराः क्रियासातत्ये ६।१।१४४॥ सुण्निपात्यते। अपरस्पराः सार्था गच्छन्ति। सततमविच्छेदेन गच्छन्तीत्यर्थः। क्रियेति किम्। अपरपरा गच्छन्ति। अपरे च परे च सकृदेव गच्छन्तीत्यर्थः। गोष्पदं सेवितासेवितप्रमाणेषु। ६।१।१४५॥ सुट् सस्य षत्वञ्च निपात्यते। गावः पद्यन्तेऽस्मिन्देशे। स गोभिः सेवितो गोष्पदः। असेविते। अगोष्पदान्यरण्यानि। प्रमाणे। गोष्पदमात्रं क्षेत्रं। सेवितेत्यादि किं। गोः पदं। गोपदम्।

स्थाने सुट् निपात्यते। आस्प ९ दं। प्रतिके। आपदापदं॥

पदत्वप्रत्ययलक्षणप्रवृत्तिरपेक्षिता एवं च माषकुंभवापेनेत्य विकुंभस्य वापः कुंभवापः कुंभशब्दः कुंभपरिमितधान्ये भाक्तः॥ माषाणां कुंभवाप इति निगृहीतव्यमिति नव्याः केचित्तु अपदादिविधावित्यत्र पदान्तविधावित्यर्थं परिक पदव्यवायेपीत्यस्य पदान्तविधित्वाभावान्नात्र प्रत्ययलक्षणनिषेध इत्याहुः तदपरे न क्षमन्ते तथाहि सति लाघवात्पदान्तविधावित्येव ब्रूयान्न त्वपदादिविधाविति दिक् अनद्धित इति व्यवधायकपदस्य तद्धित श्चेत्परे न भवति तदा निषेध इत्यर्थः आर्द्रगोमयेणेति इह गोशब्दः परं उत्तरपदत्वे चेति निषेधोत्र न शंक्यः गोमयशब्दस्योत्तरपदत्वात् गोशब्दस्य च स्वादिष्वि तिपदत्वात् गोष्पदः असेविते गोष्पदशब्दस्य वृत्त्यसंभवान्नञ्पूर्वकमुदाहरति अगोष्पदानीति गवां संचारो यत्र नैव संभवति तत्रापि सुडागमार्थमसेवितग्रहणं

आत्मख्यापनायेति कारुक्षेपाय शरीरक्षपणीयवेत्यर्थः॥ ॥ आश्चर्यमिति आङः परस्य चरेः सुट् चरेराङि चा गुराविति यत् विष्किर कृविक्षेपे इत्यस्मादिगुपधेः
त्यादिना कप्रत्यये सुडागमे अनेन निपात्यते षत्वं तु परिनिविभ्य इत्यनेन विकिरग्रहणमिति विष्किरः शकुनौ विकिरो वेति वृत्तिग्रंथपाठः सूत्रपाठे तु विकिरग्र

आश्चर्यमनित्ये॥ ६।१।१४७॥ अद्भुते सुट्। आश्चर्यं यदि स भुञ्जीत। अनित्ये किं। आचर्यं कर्म शोभनं। वर्चस्केऽवस्करः। ६।१।१४८॥ कुत्सि
तम्वर्चः। वर्चस्कमन्नमलं। तस्मिन्सुट्। अवकीर्यतइति। अवस्करः। वर्चस्के किम्। अवकरः। अपस्करो रथाङ्गम्। ६।१।१४९॥ अपकरो
न्यः। विष्किरः शकुनिर्विकिरो वा॥ ६।१।१५०॥ पक्षे विकिरः। वावचनेनैव सुड्विकल्पे सिद्धे विकिरग्रहणं तस्यापि शकुनेरन्यत्र प्रयोगो मा
भूदिति वृत्तिस्तन्न भाष्यविरोधात्। प्रतिष्कशश्च कशेः। ६।१।१५२॥ कश गतिशासनयोरित्यस्य प्रतिपूर्वस्य पचाद्यचि सुट् निपात्यते षत्वं च
सहायः। पुरोयायी वा प्रतिष्कश इत्युच्यते। कशेः किं। प्रतिगतः कशां। प्रतिकशोऽश्वः। यद्यपि कशेरेव कशा। तथापि कशेरिति धातोर्ग्रहणमु
पसर्गस्य प्रतेर्ग्रहणार्थं। तेन धात्वन्तरोपसर्गान्न। प्रस्कण्वहरिश्चन्द्रावृषी। ६।१।१५३॥ हरिश्चन्द्रग्रहणमसन्त्रार्थम्॥ ऋषी इति किं। प्रकण्वो
देशः। हरिचन्द्रो माणवकः। मस्करमस्करिणौ वेणुपरिव्राजकयोः। ६।१।१५४॥ मकरशब्दोऽव्युत्पन्नः तस्य सुडिनिश्च निपात्यते। वेणुरिव
ति किं। मकरो ग्राहः। मकरी समुद्रः॥ कास्तीराजस्तुन्दे नगरे॥ ६।१।१५५॥ ईषत्तीरमस्यास्तीति। कास्तीरं नाम नगरं। अजस्येव तुन्दमस्येति।
अजस्तुन्दं नाम नगरं। नगरे किं। कातीरं। अजतुन्दम्। कारस्करो वृक्षः। ६।१।१५६॥ कारं करोतीति। कारस्करो वृक्षः अन्यत्र कारकरः। के
चित्तु कस्कादिषु इदं पठन्ति तेन सूत्रेषु। पारस्करप्रभृतीनि च संज्ञायाम्। ६।१।१५७॥ एतानि ससुट्कानि निपात्यन्ते नाम्नि। पारस्करः। किष्किन्धा

हणं न्यास्येवेति वाच्यं तस्यापीति विकिरशब्दस्यापीत्यर्थः कशेरेव कशेति कश धातोरेव कशाशब्दो निष्पन्न इत्यर्थः धात्वन्तरेति प्रतिकश इत्यत्र प्रतिर्गमेरुपसर्गो
न तु कशेः यत्क्रिया युक्ताः प्रादयस्तं प्रत्येवेति न्यायादिति भावः असंत्रार्थ इति मंत्रे तु ह्रस्वाच्चंद्रोत्तरपदे मंत्र इत्यनेनैव सिध्यतीति भावः मस्करः मस्करशब्दादि

नित्यमत्वर्थीयेनेष्टसिद्धौ मस्करिग्रहणं परिव्राजकः वा यं प्रयोगाय यथा स्यादित्येवमर्थमित्याहुः कातीरमिति ईषदर्थ इति कोः कादेशः पारस्कर इति पारं करोतीति विग्रहः कृञो हेतुता च्छील्यानुलोम्येषु किष्किंधेति किमपि धत्ते इति विग्रहे आतोनुपसर्गे कः टाबु निपातनात् किमो द्वित्वं पूर्वस्य मलोपः सुट् षत्वं च किंकिं दधातीति विग्रहः तां मते तु वीप्सायां द्वित्वं सिद्धं अन्यत् निपातनादेव वस्तुतस्तु रूढिशब्दा एते कथंचिद्व्युत्पाद्यंत इत्यवयवार्थेनाग्रहः कार्यः॥ ॥ तद्बृहतोरिति गणसूत्रमेतत् नादिति तलोपश्चान्यत्रेति शेषः प्रायस्येति गण

तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च। तात्पूर्वं चर्त्वेन दकारो बोध्यः। तद्बृहतोर्इकारतका॥ रोलुप्येतौ करपत्योः सुसुट्। चोरदेवतयोरिति समुदायोपाधिः। तस्करः। बृहस्पतिः। प्रायस्य चित्तिचित्तयोः प्रायश्चित्तिः। प्रायश्चित्तम्। वनस्पतिरित्यादि। आकृतिगणोयं॥ इति समासाश्रयविधयः ॥

सूत्रमेतदपि प्रायः पापं विजानीयाच्चित्तं तस्य विशोधनमिति स्मृतिः। आकृतिगणोयमिति तेन शतात्पराणि परश्शतानि कार्याणीत्यादि सिद्धम् इह सुप्सुपेति वा पंचमीति योग विभागाद्वा समासः राजदंतादित्वाच्छतशब्दस्य परनिपातः पारस्करादित्वात्सुट्॥ इति समासाश्रयविधयः समाप्ताः॥

॥ श्रीगणेशाय नमः ॥ अपवादसंगत्या तद्धितान्विवक्षुस्तदीयमधिकारसूत्रमाह समर्थानामिति अन्यतरस्यां ग्रहणानुवृत्तेः समासोपीति वक्ष्यमाणमूलग्रंथेन समा
सापवादत्वं सूचितं। विधेयानिर्देशादुत्तरत्र प्रकृतिविशेषाकांक्षासत्वाच्च नायं स्वतंत्रो विधिरित्याह अधिक्रियत इति। पदत्रयमित्यनेन प्रत्येकं स्वरितत्वप्रतिज्ञा सूचिता। तत्प्र
योजनं तु कस्यचि न्निवृत्तावप्यपरस्यानिवृत्तिस्तथा च प्राग्दिश इति सूत्रे समर्थानां प्रथमाद्वेति निवृत्तं वेति त्वनुवर्त्तत एवेति वक्ष्यमाणमूलग्रंथः संगच्छते। प्राग्दिश इ
ति॥ ततउत्तरेषां प्रत्ययानां स्वार्थिकत्वेन प्रथमेति पदयोः प्रयोजनं नेति भावः॥ ननु समर्थः पदविधिरिति परिभाषयागतार्थत्वात्समर्थानामित्येतद्व्यर्थं तत्र च पदवि
धिव शंकां। घकालतनेष्वित्यलुग्विधानात्सुवंतात्तद्धितानामुत्पत्तिरिति सिद्धांतस्य सकलसंमतत्वादत आह सामर्थ्यमिति। कृतसंधिकार्यत्वमिति॥ अस्य फलं तु तस्यापत्यमि
ति सूत्रे मूल एव स्फुटी भविष्यति। इह समर्थानां प्रथमाद्वेति वक्तुं युक्तं॥ महोत्सर्गो नाह प्राग्दीव्यत इत्यादिना। सूत्रे दीव्यदित्येकदेशो नर्थकोप्यवधित्वेनोपात्तः पाघ्रीश्वरादितिव

॥ श्रीगणेशाय नमः ॥ समर्थानां प्रथमाद्वा। ४।१।८२ इदं पदत्रयमधिक्रियते प्राग्दिश इति यावत् सामर्थ्यं परिनिष्ठितत्वम् कृतस
न्धिकार्यत्वमिति यावत् प्राग्दीव्यतोऽण्। ४।१।८३। तेन दीव्यतीत्यतः प्राग् अणधिक्रियते अश्वपत्यादिभ्यश्च।४।१।८४। एभ्योऽण् स्या।
त्प्राग्दीव्यतीयेष्वर्थेषु वक्ष्यमाणेष्वर्थेषु। ……। दित्येके॥ अन्ये त्वाहुर्दीव्यदिति शत्रंतं तेन देवनकर्त्ता अर्थ एवावधिरिति॥ प्राग्दी
व्यतीयेष्विति॥ दीव्यतः प्राक् प्राग्दीव्यत् अपपरिबहिरंचवः पंचम्येत्यव्ययीभाव इति प्राचः। प्राग्दीव्यतमिति तूचितं॥ म्य इति टच्प्रवृत्तेरिति केचित् तन्न। …
म्य इ ति टचः पाक्षिकत्वात्। अन्यथा उपसमिधमुपसमिदिति तत्सूत्रस्थमूलोदाहरणस्यासंगत्यापत्तेः। न चात्र टचोभावे अव्ययानां भमात्रे इति टिलोपे प्राग्दीव्य
तो य इति रूपं न स्यादिति शंक्यं। अव्ययीभावस्याव्ययत्वे प्रयोजनं लुङ्मुखस्वरोपचार इति परिगणनात्। प्राग्दीव्यति भवः प्राग्दीव्यतीयः वृद्धाच्छः। त्वम्भु
न शंकनीय एव। अमे हुक्त तसित्रेभ्य एवेति परिगणनात् लुङ्मुखस्वरेत्यादिपरिगणनया अनव्ययत्वाच्च। वक्ष्यमाणस्येति॥ पत्युत्तरपदात् ण्य इति वक्ष्यमाणस्य

तद्धितेष्वचामादेरित्यचो ञ्णितीति सूत्रादच इत्यनुवर्त्तत इत्याशयेन व्याचष्टे अच इति। वृद्धिः स्यादिति। मृजेर्वृद्धिरित्यतोऽनुवर्त्तत इति भावः। किति च। वाहीक इत्यां
घृर्थमपीदं सुगमव्याख्यानायात्रैवोपन्यस्तं। अचामादेरिति निर्दिष्टस्थानिकत्वादिकपरिभाषा नोपतिष्ठत इत्याशयेनोदाहरति॥ आश्वपतमित्यादि। प्रामादिकमे
वेति॥ एतच्च हरदत्तग्रंथे स्थितं॥ यदि तु देवतार्थकाणां चातुर्वर्ण्यादेराकृतिगणत्वात् ष्यञिति व्याख्यायते तदा निर्दुष्ट एवायं प्रयोगः। अश्वपति गणपति। राष्ट्रपति कु
लपति गृहपति पशुपति क्षेत्रपतीत्यश्वपत्यादिर्दित्यदित्या॥ पतिशब्दस्योत्तरपदशब्देन बहुव्रीहिं कृत्वा पश्चात् द्वंद्वः कार्यो न तु द्वंद्वोत्तरं बहुव्रीहिरित्याह पत्युत्तरपदाच्चेति॥ प
त्यन्तादित्युच्यमाने बहुत्वमूर्छेदपि स्यादित्युत्तरपदग्रहणं कृतं॥ दैत्य इति॥ ननु दिते दैवताद्यर्थ एवास्यावकाशः इतश्चानिञ इत्यपत्ये ढक् दौलेय इत्यादौ सावकाशस्तथा च दि

तद्धितेष्वचामादेः।७।२।११७। ञिति णिति च प्रत्यये परेऽचामादेरचो वृद्धिः स्यात्। किति च।७।२।११८। किति तद्धिते च तथा। अश्वपतेरपत्यादि
आश्वपतं गाणपतम्। गाणपत्यो मन्त्र इति तु प्रामादिकमेव। दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः।४।१।८५। दित्यादिभ्यः पत्युत्तरपदाच्च
प्राग्दीव्यतीयेष्वर्थेषु ण्यः स्यादणोऽपवादः। दैत्यः। अदितेरादित्यस्य वा आदित्यः। प्राजापत्यः। यमाच्चेति काशिकायां याम्यः॥ पृथिव्या ञाञौ। पा
र्थिवा। पार्थिवी। देवाद्यञञौ। दैव्यम्। दैवम्। बहिषष्टिलोपो यञ्च। बाह्यः। ईकक्च। बाहीकः। स्याद्भोऽकारः पृषोदरादित्वात्तस्य तः। अश्वत्थामः। भवार्थे
गुलुग्वाच्यः अश्वत्थामा। लोम्नोऽपत्येषु बहुष्वकारः बाह्वादीञोऽपवादः उडुलोमाः उडुलोमान् बहुषु किम् औडुलोमिः॥ एतेरपत्यमित्यत्रोभयप्रसंगे परत्वा
द्वृकस्य नैव॥ एपादर्थविशेषलक्षणादणपवादात् पूर्वविप्रतिषेधाश्रयणात्॥ अर्थविशेष इति किं॥ औष्ट्रपतं। उष्ट्रपतिर्नाम पत्रं तस्येदं पात्राण्युपरिषदश्चेत्यत्र इह पूर्ववि
प्रतिषेधेन तस्येदमित्यर्थेऽण्या न भवति। इदमित्यस्य सामान्यार्थत्वात्॥ कथं तर्हि दैतेय इति। अत्राहुः। कृदिकारादिति ङीषंतात् स्त्रीभ्यो ढक्। एयस्तु न भवति। लिंगविशिष्टपरिभाषा
या अनित्यत्वात्। न चातो दिक्च्चेति पूर्वस्यांतवद्भावेन स्यादेवायमिति वाच्यं दितिशब्दात् ङीषि कृते यस्येति लोपेन सवर्णदीर्घाभावादिति आदित्यशब्दात् ण्यप्रत्यये य
स्येति लोपे हलो यमां यमि लोप इति पाक्षिको यलोपः। न चाल्लोपस्य स्थानिवत्वं लोपेन पदांतेति तन्निषेधात् पूर्वत्रासिद्धेन स्थानिवदित्युक्तेश्च। काशिकायामिति। भाष्ये तु न दृष्टमिति भा॥

वः॥ अणांतात्स्वार्थिकेनष्यञाप्रयोगस्तूपपादः। स्त्रियांङीषून भवति। षितांङीषोऽनित्यत्वात्। अणोः फलभेदज्ञापनाय स्त्रीलिंगमुदाहरति पार्थिवा पार्थिवीति। बहिष्टि॥ लोपवचनमव्ययानांभमात्रे इत्यस्यानित्यतांज्ञापयितु तेन आरातीयइतिसिद्धं॥ अश्वत्थामइति॥ आख्यादाहरणान्नदंतविधिः नचवलवाचिनः स्थाम नृशब्दस्यापत्येनयोगासंभवान्नवचनारंभसामर्थ्यात्तदंतविधिः स्यादितिवाच्यं। जाताद्यर्थेतत्संभवेनसामर्थ्योपक्षयात्॥ अश्वस्येवस्थामयस्येतिबहुव्रीहिः। उडुलोमाइति॥ उडूनिनक्षत्राणिवलोमान्यस्येतिविग्रहः। केवलस्यापत्येनयोगासंभवान्नदंतविधिस्ततोऽकारस्थ लोपः॥ ७॥ गोरिति। नकेवलमपत्यएवायंकिंतु प्राग्दीव्यतीयेषुसर्वेष्वर्थेष्विति ज्ञेयं। गव्यमिति गविभवंगव्यंगोर्देवतायस्य गोरिदमित्यादिरर्थः॥ केचित्तु भाष्ये सर्वत्रग्रहणात्प्राग्दीव्यतीयेभ्योन्यस्मिन्नर्थे अयंयत्। तेन गवांचरतिगव्यइत्याद्यपिभवतीत्याहुः॥ गोरूप्यमित्यादि। हेतुमनुष्येभ्योन्यतरस्यांरूप्यःमयट्चेतिरूप्यमयटौ। उत्सादिभ्योञ्॥ आणत्तदपवादानामिञादीनांचायमपवा

॥ गोरजादिप्रसंगेयत् गव्यम् अजादिप्रसंगेकिम् गोभ्योहेतुभ्यः आगतं गोरूप्यम् गोमयम्॥ उत्सादिभ्योऽञ्। ४। १। ८६।
औत्सः अग्निकलिभ्यांठग्वक्तव्यः अग्नेरपत्यादि आग्नेयम् कालेम्॥ इत्यपत्यादिविकारान्तार्थ साधारणाः प्रत्ययाः॥ ॥

दः। इहवष्कयासेइतिगणसूत्रं॥ असेअसमासे पूर्वाचार्यसंज्ञेयंवष्कस्यापत्यादिवाष्कयः। असेकिं। गौवष्कयिः। असइतिनिषेधाल्लिंगादिहतदंतविधिस्तेन धेनुशब्दस्येहपाठादधेनूनांसमूहआधेनवमितिसिद्धं॥ नन्वेवंधेनुपाठे धेनुकमित्यत्राप्रवर्त्तेत॥ अचित्तहस्तिधेनोरितिसूत्रेधेनुशब्दग्रहणाद्धैनुकमितिसिद्ध वपिगोधेनुकंनसिद्ध्येदितिचेन्न धेनुरनञ्इकमुत्पादयतीतिविशेषवचनस्यभाष्येस्थितत्वात्॥ इकंठकमित्यर्थः। अग्निकलिभ्यामिति। अयंभावः। सास्यदेवतेत्यधिकारे अग्नेर्ढगितिसूत्रंदृष्टंसामेत्यधिकारे कलेर्ढगितिवार्त्तिकंचापनीयप्राग्दीव्यतीयेष्विदमेवपठनीयं तेनाग्नेरपत्यंअग्निनादृष्टंसामअग्नेरिदमग्नौभवंअग्नेरागतंआग्नेयमितिसिध्यति तथाकलेरपत्यमित्याद्यर्थेकालेयमपिसिध्यतीति। एतेनपदकालयत्तत्कालेयस्यकालेयत्वमितिश्रुतावर्थांतरेपिठक्तोदर्शनात्कलेर्ढगितिसूत्रमपार्थकमितिमीमांसकोक्तिः परास्ता। वार्त्तिकेसूत्रत्वोक्तिरप्यवैयाकरणमीमांसकप्रतारणार्थेतिदिक्॥ ॥ इत्यपत्यादिविकारांतार्थसाधारणाः प्रत्ययाः॥ ८॥

स्त्रीपुंसाभ्यां। प्र[illegible]त्यनुवर्तनेन तदाह प्रागर्थेष्विति। पौंस्न इति। इह स्त्रा[illegible]ष्विति पदत्वात्संयोगान्तलोपेन पुंसः सस्य निवृत्तावपि प्रत्यय सकारः श्रूयत एव॥ अत एवाभ्यां प
रतो नञ्जेव न विहितः पौंस्न इति रूपासिद्धिः प्रसंगात् स्यादेतत् उभाभ्यामपि प्रकृतोऽञेवास्तु तत्सन्नियोगेन स्त्रीपुंसयोर्नुगिति नुगेव विधीयतां नचैवं स्त्रैणः पौंस्ना इत्य
त्रयुक्तं गोत्र इति लुक्प्रसंगः स्त्रैणानां संघ इत्यादौ संघांकलक्षणेष्वि[illegible]णप्रसंगश्च स्या।दिति वाच्यं। उभयत्रापि गोत्र इत्यनुवृत्तेः। प्रवराध्यायप्रसिद्धं हि तत्र गोत्रं। अन्यथापि
त्रादौ हि स्त्रा इत्यत्राप्यञो लुक्स्यात्। एवं च नञ्स्नञीकक्ख्युनिति वा[illegible]केन नञ्स्नञ्ग्रहणं विना अञन्तत्वादेव ङीप्सिध्यतीत्यपरमप्यनुकूलमिति चेन्नाङ्गः। नुकि नञ्स्नञ्द्वितेई
ति टिलोपः स्यात् न चैवं नुगानर्थक्यं टिलोपप्रवृत्त्यैव च नुकः सार्थकत्वात्[illegible]यपि स्त्रीशब्देन तस्य सार्थकत्वम् ——— नास्ति यस्येति चेत्यनेनापीकारलोपसंभवात्तथापि श्रीदेवतास्य श्रीयंर
खिरित्यत्र वलोपात्परत्वाद्वृद्धिः स्यात् नुकि तु टिलो[illegible]प्रवर्तत इति श्रीमं[illegible]नुकः सार्थकमस्तु तस्मान्नञ्स्नञावितियथान्यासमेव स्वीकर्तव्यमिति। अन्ये तु स्त्रीपुंसयोर्नुगेवास्तु॥

स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्। ४।१।८७। धान्यानां भवने [illegible] इत्यतः प्रागर्थेषु स्त्रीपुंसाभ्यां क्रमान्नञ्स्नञौ स्तः। स्त्रैणः। पौंस्नः। वत्यर्थेन स्त्रीपुंवच्चेति ज्ञाप
कात्। स्त्रीवत्पुंवत्॥ द्विगोर्लुगनपत्ये ४।१।८८ द्विगोर्निमित्तं यस्तद्धितोऽजादिरनपत्यार्थः प्राग्दीव्यतीयस्तस्य लुक्स्यात् पंचसु कपालेषु संस्कृतः पुरोडा
शः पंचकपालः। द्विगुनिमित्तस्येति किम्॥ पंचकपालस्येदं [illegible]म्॥ पांचकपालम्॥ अजादिः किम्॥ पंचगर्गरूप्यम्। अनपत्ये किम्॥ द्वयोर्मित्रयोरपत्य
म् द्वैमित्रिः॥ गोत्रेऽलुगचि ४।१।८९। अजादौ प्राग्दीव्यतीये [illegible] विवक्षिते गोत्रप्रत्ययस्यालुक्स्यात्॥ आगमेऽप्यकारो विवक्षितस्तस्य च यस्येति चेति लोपे कृतेऽपि स्था
निव[illegible]दिलोपे[illegible]दिति सूत्रेणैव [illegible] सिद्धे नञ्स्नञोरुपसंख्यानं मास्त्विति महदेव लाघवमित्याहुः॥ वत्यर्थ इति॥ स्त्रीपुंसाभ्यां नञ्स्नञौ वत्यर्थे न प्रव
र्तेते इति सामान्यापेक्षं ज्ञापकमिति भावः॥ अत एवोदाहरति स्त्री[illegible]ति। आच्च त्वादिति चकारो नञ्स्नञ्भ्यां त्वतलोः समावेशार्थ इति वक्ष्यति॥ तेन स्त्रीत्वं स्त्रीता। पुंस्त्वं पुंस्ते ति
सिद्धं। द्विगोर्लुगनपत्ये। द्विगोरि[illegible]षष्ठी[illegible]र्थस्तद्धेतुत्वं तच्च भावि[illegible] पर्यंत[illegible] ध्यवसायादित्याशयेनाह। द्विगोर्निमित्तमिति। अजादिरिति॥ एतच्चोत्तरसूत्रादचीत्यपकर्षात्स
भ्यते वा प्रत्यासत्त्या मनुवर्त्यं व्यवस्थितविभाषाश्रयणेन वा॥ प्राग्दीव्यती[illegible]किं। पंचभ्यः कपालेभ्य आगतं पंचकपालीयं। गोत्रेऽलुगचि। गोत्रे किं। गोत्रार्थकप्रत्ययस्यैवालुग्यथा स्यात्
[illegible]स्येदं कौवलं बादरस्येदं बादरं। कुवलबदरीशब्दौ हि गौरा[illegible] षंतौ ताभ्यां फलरूपे विकारे अनुदात्तादेश्चेत्यञ् तस्य फले लुगिति लुक् ततरिदमर्थे अजादि प्राग्दीव्यतीये॥

सु·त
सि·कौ
ठि·त
३

विवक्षिते ऽनेनालुङ्न भवति वृद्धत्वाच्छोनेतिभावः विवक्षित इति ———— अचातिविषयसप्तमी। परसप्तमीत्वे तु अवृद्धत्वाच्छस्याप्राप्तौ अणेव स्यादिति भावः॥ ॥ ग
र्गीणामिति। अपत्यवृद्धत्वविवक्षायां यञञोश्चेति लुक्॥ सत्यजादिप्रत्यये चिकीर्षिते अनेन प्रतिषिद्ध इति गार्ग्यशब्दाच्छे कृते तस्य ईयादेशः। यस्येति चेत्यकारलोपे यलोप
र्थमोऽत्र। आपत्यस्य चेति द्विलोपे कद्रूङ इत्यतो लोप इत्यनुवर्तते तत्र यतिष्येत्यतो ऽप इति हलस्तद्धितस्येत्यतो हल इति च तदाह हलः परस्येत्यादि। आभीयत्वेऽप्यन्यलोपो नासिद्धः आरंभसाम
र्थ्यादितरथा [illegible] अनुवर्तितमिति व्याचष्टे यकारस्येति। आपत्यस्येति किं। सांकाश्यकः कांपिल्यकः। संकाशादिभ्यो ण्यस्तत्र धन्वयोपधादिति वुञ्। तद्धित इति किं। गार्ग्यौ। गार्ग्ययोः
[illegible]नाणीति किं। गार्ग्यायणाः। गर्गीयमिति। तस्मै हितमिति छः। यूनि लुक्। प्राग्दीव्यतीय इति वर्तते अचीति च प्रत्ययाधिकारात् च प्रत्यय इति लभ्यते तदाह प्राग्दीव्यतीयेऽजादौ प्रत्यय इ

वृद्धाच्छः आपत्यस्य च तद्धितेनाति ६।४।१५१ हलः परस्यापत्ययकारस्य लोपः स्यात् तद्धिते न त्वाकारे। गार्गी
गर्गाणां छात्राः॥ ———— प्राग्दीव्यतः ये किम् गर्गेभ्यो हितं गर्गीयम्। अचि किं गर्गेभ्य आगतं। गर्गरूप्यम्। यूनि लुक् ४।१।९० प्राग्दीव्यतीयेऽजादौ प्रत्यये विवक्षिते युवप्रत्य
यस्य लुक् स्यात्। ग्लुचुकस्य गोत्रापत्यं ग्लुचुकायनिः वक्ष्यमाणः फिन् ततो यून्यण्। ग्लौचुकायनः तस्य छात्रोऽपि ग्लौचुकायनः। अणो लुकि वृद्धत्वा
भावाच्छो न। पैलादिभ्यश्च। २।४।५९ एभ्यो युवप्रत्ययस्य लुक् पीलाया वेत्यण् तस्मादणो द्व्यचः इति फिञ् तस्य लुक्॥ मनोरमायां ३। [illegible]ति प्रत्ययस्य लुगिति संज्ञाकरणाद्वृ

द्धो यः प्रत्ययः स यूनीत्यनेन विशिष्यते तथा च यूनि यः प्रत्ययस्तस्य लुगित्यर्थस्तदाह युवप्रत्ययस्येति। वक्ष्यमाण इति प्राचामवृद्धात् फिन्बहुलमिति वक्ष्यमाणः। अजादौ किं
ग्लौचुकायनरूप्यं प्राग्दीव्यतीये किं। ग्लौचुकायनीयं तस्मै हितमिति छः। इह हि गोत्रे लुगनपत्ये चि यूनि गोत्रे नेत्येव सूत्रयितव्यं तथा च लुग्ग्रहणं शक्यमकर्तुमिति
स्थितं। तत्र फक्फिञोरिति सूत्रे यूनीत्यस्य मंडूकप्लुतिराश्रयणीयेति क्लेशोऽयं लाघवानुरोधेन सोढव्य इति भावः। पैलादिभ्यश्च। ण्यक्षत्रियार्षेत्यतो यूनि लुगिति
वर्त्तते तदाह युवप्रत्ययस्य लुगिति। पीलाया वेत्यादि। अपत्येऽप्यणि विहिते गोत्रापत्येऽप्यणेव॥ एको गोत्र इति वक्ष्यमाणत्वात्॥ ततोऽण्यंतात्पैलशब्दादपत्येऽपि विधीयमा
नः फिञ् [illegible]त्येव पर्यवस्यति। तस्य च फिञोऽनेन लुगित्यर्थः। एवं च पीलाया अपत्ये गोत्रापत्ये युवापत्ये चावैरूप्येण पैलशब्दः प्रयुज्यत इत्याह॥ ९ ॥

राम
२

पैलः पितापुत्रश्चेति पैलादिभ्य इञन्ता शालंकि सात्यकि औदमेयि पैंगा प्रभृतयस्तेभ्य इञः प्राचामिति लुकि सिद्धे अप्राचामर्थः इति ज्ञेयं। तद्राजाच्चाणः। गणसूत्रमिदं तद्राजसंज्ञ
कास्य स्यायुवप्रत्ययस्य लुगित्यर्थः। तच्चेद्गोत्रे प्राचामिति। इह प्राचां ग्रहणं गोत्रविशेषणं न तु प्राचामवृद्धादित्यादिवद्विकल्पार्थमित्यत्र व्याख्यानं शरणं दाक्षिः पितेत्यादि।
दक्षस्यापत्यं गोत्रापत्यं च पुमान् दाक्षिः युवापत्यं तु दाक्षायण इति भावः। न तौल्वलिभ्यः बहुवचननिर्देशात् गणपाठसामर्थ्याद्वावगतिरित्यभिप्रेत्याह तौल्वल्यादिभ्य इति। देवमित्रि।
दैवयज्ञि। श्वाफल्कि। आसुरि। निमेषि पौष्करसादि। वैकर्णीत्यादि तौल्वल्यादिः। कात्यायनस्येति। कतस्य गोत्रापत्यं कात्यः। गर्गादित्वाद्यञ्। ततो यूनि यञिञोश्चेति फ

पैलः पिता पुत्रश्च तद्राजाच्चाणः। व्यञ्मगधेत्यणं तद्राजः। ... रणो द्व्यच इति फिञो लुक्। आङ्गः पिता पुत्रश्च। इञः प्राचाम् २।४।६० गोत्रे य इञ् तद
न्ताद्युवप्रत्ययस्य लुक् स्यात् तच्चेद्गोत्रं प्राचां भवति। पन्नागारस्यापत्यं अत इञ् यञिञोश्चेति फक् पान्नागारिः पिता पुत्रश्च प्राचां किं दाक्षिः। पिता दाक्षायणः
पुत्रः। न तौल्वलिभ्यः २।४।६१ तौल्वल्यादिभ्यः परस्य युवप्रत्ययस्य लुक् न स्यात्। पूर्वेण प्राप्तः तुल्वलः तत इञ् फकौ तौल्वलिः पिता तौल्वलायनः पुत्रः फक्फिञोर
न्यतरस्याम् ४।१।९१ यूनीत्येव यूनि लुगिति नित्ये लुकि प्राप्ते विकल्पार्थं सूत्रम् कात्यायनस्य छात्राः कातीयाः कात्यायनीयाः यस्कस्यापत्यं यास्कः शिवाद्यण् त
स्यापत्यं युवा यास्कायनिः अणो द्व्यच इति फिञ् तस्य छात्राः यास्कीयाः। यास्कायनीयाः। तस्यापत्यम् ४।१।९२ षष्ठ्यन्तात्कृतसन्धेः समर्थादपत्येऽर्थे उक्ता
वक्ष्यमाणाश्च प्रत्यया वा स्युः। उपगोरपत्यमौपगवः। आदेर्वृद्धिरन्त्योपधावृद्धीर्बाधते। तस्येदमित्यपत्येऽपि बाधनार्थं कृतं भवेत्॥ ९१ कृ। कातीया इति॥ आ

पत्यस्य चेत्ययं लोपः। तस्यापत्यं। तस्येति न स्वरूपग्रहणं किं तु षष्ठ्यर्थो भान्तोपलक्षणमित्याशयेनाह। षष्ठ्यन्तादिति पंचम्यर्थो व्याहारलभ्यः॥ अनुकरणात्पंचम्यां सौत्रो
लुगुक्ता इति। अणादय उक्ताः। वक्ष्यमाणा इति। इञा ... उपगु अ इति स्थिते ओर्गुणात्परत्वादचो ञ्णितीति वृद्धिर्भाव्यं। गुणस्तु पिच व्यादौ सावकाशः। कृते च गुणे
अवादेशे चात उपधाया इति वृद्धिर्भाव्यमत आह। आदिर्वृद्धेरिति। पंक्त्यादिति भावः अन्त्योपधावृद्ध्योरवकाशः गौः पावकः। आदिवृद्धेस्तु सुश्रुतसौश्रुतः त्वाष्ट्रः जाग्रत
इत्यादौ तूभयप्रसंगे परत्वादादिवृद्धिरेव भवति। लक्ष्यानुरोधेन सकृद्गतिन्यायस्येहाश्रयणात्। अनुशतिकादिषु पुष्करसच्छब्दपाठेऽप्यत्र लिंगं। अन्यथा आद्युपधा

वृद्धिः स्यात्पौष्करसादेः सिद्धत्वात्तत्पाठो नर्थकः स्यात्। नच पुष्करसत्शब्दस्य तावत्यर्थे ठकि पौष्करसादिकः इत्येतदर्थमनुशतिकादि पाठ आवश्यकः। जितिणित्येव उपधावृद्धेः सौका
रान्तत्वात् किमिति वाच्यम्॥ अनभिधानात् ठगत्र न भवतीत्यादि समाधानस्य कैयटे स्थितत्वात्। एतेन भिन्नविषये वाध्यवाधकभावो नोपपद्यत इति शंका निरस्ता॥ उ
त्सर्गापवादयोर्विषयविभागं कृत्वा प्रवृत्तिवेलायामु
त्सर्गापवादाभ्यां अनेन सत्यपि संभवे वाधनं भवतीत्यवश्याश्रयणीयत्वात्। नचैवमपि जाग्रत इत्यादावुपधावृद्धिर्वाध्यतां। औपगव इत्यत्र त्वादिवृद्धिप्रवृत्तिवेलायामु
पधावृद्धेरप्राप्त्या कथं तद्बाधः स्यादिति चेदत्राहुः जाग्रत इत्यादावुपधावृद्धेर्वाध्यत्वे निर्णीते कचित्कालांतरप्राप्ताया अपि तस्या वाध्यत्वौचित्यादिति। स्यादेतत्। यत्रा
दिवृद्धिरनेजातात्तत्रात्योपधालक्षणा वृद्धिः कस्मान्न भवति। असंभवाद्वैयर्थ्यमेवमिंगंतात्वेत्यण्। व्यापदिश्येत्यापदं तत्र भवइत्यण्॥ अत्र कैयटः तत्राप्यैचोपरत्वात्तद्
ध्यवसितिमर्थविसिद्धिरिति। शाब्दवाधे वैलक्षण्यसत्त्वेपि तदनादरेणाक्षिपति तस्येदमित्यपत्येपीति। इदमर्थे अपत्यसमूहविकारादीनामंतर्भावादपत्येपि तस्येद

उत्सर्गः शेषएवासौ वृद्धान्यस्य प्रयोजनम्। भानोरपत्यं भानवः। कृतसंधेः किम्। सौत्थितिः। अकृतव्यूहपरिभाषया सावुत्थितिर्माभूत्। समर्थ
पौत्र[illegible]स्यानेह वस्त्रमुपगोरपत्यं चैत्रस्य प्रथमात् किं। अपत्यवाचकात् षष्ठ्यर्थे माभूत्। वाग्रहणाद्वाक्यमपि दैवयज्ञीति सूत्रादन्यतरस्यांग्रह
णानुवृत्तेः समासोपि उपग्वपत्यम्। जातित्वान्ङीष् औपगवी। आश्वपतः दैत्यः औत्सः स्त्रैणः पौंस्नः॥ (मित्यण् प्रवर्ततइति किमनेन तस्यापत्यमिति सूत्रे

णेत्यर्थः। यद्यप्यतइञित्यादौ तस्यापत्यमित्येतदनुवर्तत एव तथापि योगविभाग[illegible]नः किमर्थ इत्याक्षेपोत्र वोध्यः। समाधत्ते वाधनार्थमिति। तस्येदमित्यस्य यद्बाधकं वृद्धाच्छस्त
द्बाधनार्थं पृथक्सूत्रं कृतं भवेदित्यर्थः। ननु तस्येदमित्यण्स्तदपवादस्य वृद्धाच्छस्य च शैषिकत्वादपत्यार्थे प्रसक्तिरेव नास्ति अपत्यादिचतुरर्थीपर्यंतेभ्योन्योर्थः स शेष
इत्यभ्युपगमादत आह॥ ॐ॥ उत्सर्गः शेषएवासाविति। असौ अपत्यार्थः। अयं भावः। असति योगविभागे अदंतवाह्वादिप्रकृतिसंबद्धस्यैवापत्यार्थस्योपयो
गादुपग्वादिप्रकृतिसंबद्धोऽपत्यार्थः शेष एव स्यात् तथा चाणं वाधित्वाभान्वादिभ्यो वृद्धाच्छः प्रसज्येत योगविभागे तु कृते प्रकृतिसामान्यसंबंधस्याप्यपत्यार्थस्यो
पयोगाच्छेषत्वाभावेन छस्य प्राप्तिरेव नास्तीति। ननूपग्वादेरवृद्धत्वेन छस्य प्रसक्त्यभावान्निष्फलो योगविभाग इत्यत आह वृद्धानीति। प्रातिपदिकानीति शेषः। कृतसंधेः कि
मिति। अनरे[illegible]त्वात् तत्र योः कृतायां तदुत्तरमेव प्रत्ययो भविष्यतीत्यधिकारसूत्रस्थसमर्थपदग्रहणं किमर्थमिति प्रश्नः। अकृतेति। इयं च परिभाषा समर्थग्रहणेन ज्ञा

प्ते त्विह पदं ... दृष्टं। लोकात् सिद्धेत्यन्ये। मावुत्पत्तिर्माभूदिति। अंतरंगपरिभाषाया अपवादभूतया अकृतेत्यनया अकृतसंधेरेव प्रत्ययः स्यात्तन्निवारणाय समर्थग्र
हणमधिकारसूत्रस्थमावश्यकमिति भावः। यद्यपि तत्र सामर्थ्यं परिनिष्ठितत्वमित्यविशेषेणोक्तं तथापि ङ्याप्प्रातिपदिकांश एव परिनिष्ठितत्वं न तु सुब्विशिष्ट इत्यवधेयं॥
तेन औपगवः दंडिमानित्यादि सिद्धं। अन्यथा औपगव दंडीमानित्यादि स्यात्॥ अश्विमानणिति निर्देशश्चेह लिंगं। यदि तु पामादिगणे विष्वगित्युत्तरपदलोपश्चेत्यत्राकृत
संधिग्रहणेन परिनिष्ठितात्तद्धितोत्पत्तिरित्यभ्युपगम्यते तर्हि व्यर्थमेव समर्थग्रहणमित्याहुः॥ प्रथमात्किमिति॥ तस्यापत्यमित्यत्र निर्दिष्टपदद्वयमध्ये प्राथमिकमेव प्र
कृतिसमर्थकं न त्वपत्यं तथा च प्रकृत्याकांक्षायां तदेव गृह्यत इति किं तेन प्रथमादित्यनेनेति प्रश्नः॥ अपत्यवाचकादिति तस्यापत्यमित्यादिना विहितः प्रत्ययो यथा
षष्ठ्यंतोपग्वादिशब्दादभ्युपगम्यते तथा अपत्यवाचकदेवदत्तादिशब्दादप्यन्यो भवत्विति शंका स्यात्तद्वारणार्थं प्रथमाद्ग्रहणमावश्यकमिति भावः। ननूपगोरपत्यमि
ति विग्रहवाक्ये अपत्यवाचकस्य प्राथम्येऽप्यपत्यमुपगोरिति वाक्ये प्राथम्यात्स्यादेवापत्यवाचकात्प्रत्यय इति चेन्नैवं लक्षणापेक्षं प्राथम्यं नियतत्वादत्राश्रीयते न तु विग्र।

॥ अपत्यं पौत्रप्रभृति गोत्रम् ४।१।१६२ अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात्॥

हापक्षमनेयतं। अन्यथा प्रथमादित्येतन्निरर्थकं स्यादिति षष्ठ्यर्थे मा भूदिति। अयमर्थः। यथा इंद्रो देवत्वमस्य हविषं इह विरिति प्रथमांतादन्यस्य यो भवति तथा उपगुरपत्यमस्य देवदत्त
स औपगवो देवदत्तः देवदत्तोऽपत्यमस्योपगोर्देवदत्तिरुपगुरिति मा भूदिति। एतच्च कैयटस्य स्थाने न्यपवादात्तद्धितस्य समासं नित्यं बाधेत। न च तद्धितस्य वैकल्पिकत्वात्पक्षे सोपि
भविष्यतीति वाच्यं। यत्रोत्सर्गापवादौ महाविभाषया विकल्प्येते तत्रापवादेन विनिर्मुक्ते उत्सर्गो न प्रवर्त्तत इति ... मध्ये इत्यत्र वाग्रहणेन ज्ञापितत्वादित्याशंक्याह अन्यतरस्यांग्र
हणानुवृत्तेरिति। जातित्वादिति। गोत्रं च चरणैः सहेत्यनेनेति शेषः। ... त्वगत ... द्वीवित्युक्तं तद्व्याख्यातृभिः स्वच्छिद्रान्नित्यनेनेत्युक्तं तदुभयमपि गोत्रायूनस्त्रियामिति सू
त्रस्थभाष्यानुरोधेन गोत्रं च चरणैरित्यत्र कृत्रिमं गोत्रमेव गृह्यते ... त्वपत्यमात्रमित्याशयेन प्रवृत्तमिति बोध्यमित्याहुः। स्वतंत्रस्यान्महोत्सर्गान् ... उदाहरति आश्वपत इ
त्यादि। औत्स इति। उत्सः प्रस्रवणं वारिप्रवाहो निर्झरो कूप इत्यमरः। तस्य चापत्येन योगस्तु गामेयो भीष्म इतिवत्॥ ॥ अपत्यं पौत्रेनन्वपत्यग्रहणं व्यर्थं पौत्रादेरपत्य
त्वाव्यभिचारादित्यत आह अपत्यत्वेन विवक्षितमिति। विवक्षितमिति किं। वस्तुतः पौत्रप्रभृतेर्यदा शेषत्वेन विवक्ष्यते ... दमिति तदा मा भूदित्याहुः अन्ये तु वस्तुतः पौत्रा

सु॰त॰ सि॰कौ॰ टि॰त॰ ६

एकोगोत्रे गोत्रइतिजात्यपेक्षयाएकवचनं एकशब्दस्संख्यावाची गोत्रेऽभिधित्सितेऽपत्ये त्वेकप्रत्ययएकएवस्यादित्युक्तेः गोत्रापत्येप्रथमएवशब्दः प्रत्ययंलभतेना न्यः॥ यदित्वनंतरापत्यप्रत्ययान्तादपिस्यात्तर्हिगोत्रापत्येएकएवप्रत्ययोनकृतः स्यात् अपत्यप्रत्ययानामनेकत्वेपि एकोवाच्यइतिवार्तिकार्थोप्यनेनसंगृहीतइत्या शयेनव्याचष्टे गोत्रेएकएवेति। अपत्यप्रत्ययइति। एतच्चाधिकारलब्धं। अन्येतुएकशब्दःप्रथमपर्यायः॥ प्रथमश्चापत्यप्रत्ययशून्यस्तत्प्रकृतिश्चप्रथमाप्रकृतिर्गोत्रेऽ पत्यप्रत्ययंलभतेइत्यर्थंव्याचक्षते तन्क्लिष्टं। अस्यांपक्षे एकमानयेत्युक्तेप्रथममानयेति प्राथम्यार्थस्याप्रतीतेः। वस्तुतस्तुप्रथमादित्यधिकाराद्गोत्रेप्रथमादेवप्राति

एकोगोत्रे ४।१।९३ गोत्रेएकएवापत्यप्रत्ययः स्यात्। उपगोर्गोत्रापत्यमौपगवः गार्ग्यः नाडायनः। गोत्रेस्वैकोनसंख्यानांप्रत्ययानांपरंपरा यहासंख्येभ्योऽनिष्टोत्पत्तिःप्रसज्यते अपत्यंपितुरेवस्यात्ततः प्राचामपीतिचमतभेदेनतद्द्वान्यैस्सूत्रमेतत्तथोत्तरम् पितुरेवापत्य मितिपक्षेहि॥ उपगोस्तृतीयेवाच्ये औपगवादिञ्स्यात् चतुर्थेतुजीवज्ज्येष्ठेमृतवंश्ये औपगविःफक् इत्यंफगिञोः परंपरायांमूलाच्छ ततमेगोत्रेएकोनशतंप्रत्ययाःस्युः पितामहादीनामपीतिमुख्यपक्षेतुतृतीयचाच्ये उपगोरण् इष्टेसिद्धेपि अणन्तादिञपिस्यात् चतुर्थे फगितिततःफगिञोःपरंपरायांशततमेगोत्रेएकनवतिरनिष्टप्रत्ययाःस्युः अतोनियमार्थमिदंसूत्रम् एवमुत्तरसूत्रेप्यूह्यम्॥

१ दिकादपत्यप्रत्ययइतिव्याख्यापेक्षयाग्रहणमिहत्यकुशंकामित्याहुः। औपगवइति। उपगुशब्दएवप्रत्ययंलभतेनत्वौपगवशब्दइतिगोत्रापत्येप्यनंतरापत्यइवाणेव भवतीत्यर्थः॥ गार्ग्यइति। गोत्रापत्येगर्गादिभ्योयञितिविशिष्यविधानादनंतरापत्यइवात्रअतइञ्नभवतिकिंतुयञेव। सचगार्ग्यस्यापत्येपिभवतिनतत्रयञंतात्फक्। कएकोगोत्रइतिनियमात्। नाडायनइति॥ नडादिभ्यःफगितिगोत्रापत्येविधानादत्राप्यतइञ्नभवतिकिंतुफगेव। सचनाडायनस्यापत्येपिभवति। नतुफगंतादिञ्। उ क्तनियमात्॥ ननु अस्मिन्गोत्रेयुगपदनेकप्रत्ययाप्रसक्तेर्व्यर्थमिदंसूत्रमित्याशंक्यसूत्रारंभफलंमतभेदेनव्यवस्थापयतिगोत्रेस्वैकेनेति॥ स्वगोत्रंतदपेक्षया। एकोनसंख्यानांतृतीयेद्वयोःपरंपराचतुर्थेत्रयाणांपंचमेतुचतुर्णामित्यादिपरंपराप्रसज्यतइत्यर्थः॥ तथाहि। उपगोस्तृतीयेअणिञोःपरंपराचतुर्थेअणिञ्फ

राम ६

जुयञंतादिघञितिनिति। नन्वेवमाणिञोः परंपरायां निवर्तितायामप्योपगव इत्यत्राणप्रत्ययपरंपरास्यात् तथा गार्ग्य इत्यादौ यञादिपरंपरेति वाच्यं। सत्यामपि तस्यामनिष्टाभावादि
ति[...]चित्यं। फगंतात्[...]किनाऽत्यन इत्यादावनिष्टप्रसंगादिति दिक्॥ ऊह्यमिति। अपत्यं पितुरेवेतिपक्षे। चतुर्थापत्यरूपे यूनि विवक्षिते गोत्राद्यूनीति नियमसूत्रे सत्यसति
च गोत्रप्रत्ययांतादेव युवप्रत्यय इति द्वयोः परंपरा साचेष्टत्वान्न नियमेन व्यावर्त्यते। पंचमे तु यूनि नियमाभावे त्रयाणां परंपरा प्रसज्यते। षष्ठे तु चतुर्णामित्यादि। ततः प्राचा
मपीति द्वितीयपक्षे तु गार्ग्याच्चतुर्थे यूनि मूलप्रकृत्यनंतराभ्यामनिष्टोत्पत्तिः प्रसज्यते पंचमे तु मूलप्रकृत्यनंतरयुवभ्यः। तथा नडाच्चतुर्थे यूनि पूर्ववद्द्वाभ्यामनिष्टोत्पत्तिः
पंचमे तु त्रिभ्यः। उपगोश्चतुर्थे वाच्यं तु मूलप्रकृतेरेकस्मादेवानिष्टोत्पत्तिः। नत्वनंतरापत्यवाचकात् नतांजा तेष्वपत इञि रूपानिष्टाभावादित्यादि यथासंभवं तत्रोह्यं।
इत्यर्थः॥ ॥ गोत्राद्यूनि॥ असत्यस्मिन्सूत्रे मूल[...]मते पंच[मा]दौ यूनि विवक्षिते गोत्रप्रत्ययांतात् युवप्रत्ययोत्पत्तावीष्टसिद्धेपि मूलप्रकृत्यनंतरयुवभ्योपि।
स्यादिति यौगिकानिष्टप्राप्तिनियमार्थमिद[...]मित्याशयेनाह गोत्र[प्र]त्ययांतादेवेति॥ न तु मूलप्रकृत्यनंतरयुवभ्य इत्यर्थः। मनोरमायां तु नतु युवप्रत्ययांतादिति प्रथ

**गोत्राद्यून्यस्त्रियाम्।४।१।९४। यून्यपत्ये गोत्रप्रत्ययान्तादेव प्रत्ययः स्यात्स्त्रियां तु न युवसंज्ञा गार्ग्यस्य युवापत्यं गार्ग्यायणः स्त्रियां गोत्रत्वादे
कएव प्रत्ययः॥** [...]पक्षेप्युइत्यपि स्थितं। अत्र वदंति। पंचमादौ यूनि विवक्षिते तस्य यूनस्तृतीयं प्रत्यनपत्यत्वादप्राप्तौ विध्यर्थमेवेदं स्यान्न तु नियमार्थमिति यु
वप्रत्ययांतात्प्रत्ययो दुर्वारः॥ तस्मादिह पितुरेवापत्यमिति पक्षो ना[द]रणीय इति। अन्ये त्वाहुः गर्गेपत्यं गोत्राद्यूनीत्यादि[...]केनाप्राप्तप्रत्ययं विधाय द्वितीयेन नियम्य
ते यूनि गोत्रादेवेति। एवं च ततः प्राचामपीति पक्षेणा सहा[...]यैकरूपता [भ]वतीति गोत्राच्चेद्यून्येवेति विपर्य[य]नियमस्त्विह न कृतः। व्यापत्त्यालाभात्। न च शेषिक[...]
वर्त्य इति वाच्यं। [...]ऽनुगच्छतीति लिंगात्। स्त्रियां त्विति। यद्यत्र अस्त्रिया[मित्य]स्यैकवाक्यतया स्त्रीभिन्ने यूनि गोत्रादेवेत्यर्थः क्रियते तर्हि स्त्रीषु युवसंज्ञाया अनिषेधात् यु
वतिषु प्रत्ययानां परंपरा प्रसज्येत॥ न चैको गोत्र इत्यनेन निस्तारः। युवसंज्ञाया गोत्रसंज्ञाया वा बाधात्। अथ स्त्रियां न युवप्रत्यय इति वाक्यभेदेनार्थः क्रियते तदा गोत्रप्र
त्ययेन युवतिर्नाभिधीयेत किंतु वाक्यमेव स्यात्ततश्च गार्ग्यस्यापत्यं स्त्री गार्गीति न स्यादतो[...]निषेधपरमेवेदमित्याशयेन व्याचष्टे न युवसंज्ञेति॥ अयमाशयः।
अस्त्रियामिति योगो विभज्यते। यूनीति शब्दस्वरूपमनुवर्त्यते॥ परिभाषा चेयं। यत्र युवसंज्ञाविधानं तत्रास्त्रियामित्युपतिष्ठत इति सिद्धस्य गतिरियं। जीवति तु वंश्ये युवा। स्त्रिय

अत इञ्॥ घकारस्तत्तनेष्विति ज्ञापकात्सुबंतादेव तद्धितोत्पत्तिरिति [illegible] मेव्याधिकृतप्रातिपदिकस्यनेष्यत्वार्त्कि तु प्रयोजनमस्तीति ध्वनयति। अदंतं यत्प्रातिपदिकमिति। अत इत्य
स्य सुबंतविशेषणत्वे तु दक्षयोरपत्यमित्यादिविवक्षायां दाक्षिरित्यादि न सिद्ध्येदिति भावः। न पूः [illegible] श्वपः अपत्यं वै श्वपः। अदीयताद्दाशरथायेन्यत्र तु तस्येदमित्यण्। अपत्यत्व
स्य सुबंतविशेषणत्वे तु दक्षयोरपत्यमित्यादिविवक्षायां दाक्षिरित्यादि न सिद्ध्येदिति भावः। न पूः [illegible]
विवक्षायां त्विञेव। बाह्वादिभ्यश्च। बाधृ लोडने इति धातो केवलस्य बाहोरपत्ययोगासंभवात्सामर्थ्यात्तदंतविधिरौ बाहविरिति माधवोक्तं चिंत्यमिति ध्वनयन्नाह बाहविरिति
मानं तु बाहविर्गार्ग्योऽमरस्त्वाश्वलायनसूत्रप्रयोगाद्बोध्यइत्यपदुदा हरणाच्च बाहुशब्दः संतानरूपोऽस्तीति भावः। औडुलोमिरिति। यद्यपि गणे बाहुक इत्युधिष्ठिर अर्जु
न प्रद्युम्नेत्यादि दुक्केवलो गोमम् शब्दः पठितस्तथापि सामर्थ्यात्तदंतग्रहणं नारकाप्युडुवात्त्रियामित्यमरः। तेषां नक्षत्रवाच्युडुशब्दः। उडूनीव लोमानि यस्य तस्यापत्यमौडु
लोमिः। शरारुवलोमानि यस्य तस्यापत्यं शारलोमिः। बहुत्वे तु इञपवादोऽकारः प्रागेवाजं तेषूक्तः उडुलोमाः शरलोमाः। इह उपपदविधानेषु पुराणसिद्धास्तं त्रापशब्दाए

अत इञ् ४।१।९५ अदन्तं यत्प्रातिपदिकं तत्प्रकृतिकात् षष्ठ्यन्तादिञ् स्यादपत्यार्थे, दाक्षिः। बाह्वादिभ्यश्च ४।१।९६। बाहविः औडुलोमिः। आकृ
तिगणोऽयम्। सुधातुरकङ् च ४।१।९७ चादिञ्। सुधातुरपत्यं सौधातकिः॥ व्यासवरुडनिषादचण्डालविम्बानां चेति वक्तव्यम्। आभ्यां पदान्ताभ्यां पू
र्वौ तु ताभ्यामैच ७।३।३ पदान्ताभ्यां यकारवकाराभ्यां परस्य न वृद्धिः किंतु ताभ्यां पूर्वौ क्रमादैचावागमौ स्तः। वैयासकिः। वारुडकिः। इत्यादि

॥ गोत्रे कुञ्जादिभ्यश्च्फञ् ४।१।९८ ॥

गृहीतं तेषां घोपस्थितिकत्वान्नेन इदानीं तनो येनानुकृतस्यापत्ये बाहवइत्यणेव। न त्विञ्। उक्तं च हरिणा। अभिव्यक्ता
पदार्थाये स्वतंत्रा लोकविश्रुताः शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु॥ अनर्थकं संदिग्धार्थकमप्रयुक्तं च क्रमेण विशेषणत्रयं व्यावर्त्यं तदुक्तिषु तत्सदृशेष्विन्य
र्थः। अत एव संज्ञा श्वशुरस्यापत्यं श्वाशुरिरित्यत्र राजश्वशुराद्यदिति यन्न। मिमीते माता तातस्यानुस्वसा मातृस्वसादेह मातृपितृभ्यां स्वसेति षत्वं न। नन्वेवं बाहवः स्वाशुरिरिति
पूर्वोक्तौ न सिध्यतः इति चेन्नैवं। अणिञोर्विधौ शब्दविशेषानुपादानादप्रतिसिद्धेः पितृत्वद्दत्तेन व्यासेति। वेदान्व्यसतीति व्यासः कर्मण्यण् भीमो भीमसेन इतिवद्
वकेशगुप्त त्वं न व्याप्तो॥ ॥सांकि न अर्थोपस्यनार्थः तस्यापत्यं नार्थिः। पदान्ताभ्यां किं। याज्ञिकः। सचैव विषयप्रदर्शनायनेति निषेधोक्तिः। तेनेह न। दाध्यश्विर्माध्वश्विः। अनेन
त्वाभ्यां परस्य वृद्धिप्रसक्तिरस्ति। क्वचित्तु वृद्धिप्रसक्तिसत्त्वेऽपि नेष्यते। द्वे अशीती भृतो भूतो भावी वा द्व्यशीतिकः। वारुडकिरिति। वरुडादयो जातिविशेषाः ठ क्कर।

कः। व्याख्यानान्तरे तदाह गोत्रेपाविति। गोत्रे किं। द्वीपादनुसमुद्रं यञ्। द्वीपे भवो द्वैप्यः। सुतंगमादिभ्यश्चातुरर्थिक इञ्। सौतंगमिः। तदपत्ये फक् मा भूत्। फक्त्वादिति। सा
मर्थ्यात् पूर्वस्यां शारद्वच्छुनकाः भृगुः। शारद्वतोपत्यं न भवति पूर्वभावित्वात्। एवं शुनस्यापत्यं न भवति वत्सः। अतो ब्राह्मणे भार्गवश्चवात्स्यश्चाग्रायणश्चेति द्वंद्वे अत्रिभृ
गुवितिपञ्जरो ऽश्चेति च यथासंभवं लुक् बोध्यः। यद्यप्यत्र बहुत्वाभावादत्रिभृग्वित्यादिना लुग्दुर्लभस्तथापि युगपदधिकरणवचनतायां वर्तिपदानां बह्वर्थ
त्वात् सौत्रत्वाद्वा स्यादेव लुक्। अतो व्याचष्टे भार्गवश्चेदिति। व्रात्यश्चेदिति च। अनादिरिति। अश्वत्थाम्नः पिता यो महाभारते प्रसिद्धस्तद्रूपे सप्रत्ययं स्वप्रवायं द्रो

अनृष्यानन्तर्ये बिदादिभ्योऽञ् ४।१।१०४। एभ्योऽञ् गोत्रे यत्त्वा नृषयस्तेभ्य आनन्तर्ये सूत्रे स्वार्थेऽष्यञ्। विदस्य गोत्रं वैदः। अनन्तरो वैदिः वा
द्वादेशाकृतिगणत्वादिञ्। पुत्रस्यापत्यं पौत्रः दौहित्रः। गर्गादिभ्यो यञ् ४।१।१०५। गोत्र इत्येव। गार्ग्यः। वात्स्यः। यञञोश्च २।४।६४ गोत्रे यद
न्त्रेऽञन्तं च तद्वयवयोरेतयोर्लुक् स्यात्। तत्कृते तेवहुत्वे न तु स्त्रियाम्। गर्गाः। वत्साः। विदाः। उर्वाः। तत्कृत इति किम्। प्रियगार्ग्याः। स्त्रियां तु गार्ग्यः। स्त्रि
यः। गोत्रे किम्। द्वैप्याः। औत्साः। प्रवराध्याये प्रसिद्धमिह गोत्रम्। तेनेह न पौत्राः। दौहित्राः। मधुबभ्वोर्ब्राह्मणकौशिकयोः ४।१।१०६। गोत्रे य
ञ्। माधव्यो ब्राह्मणः। माधवोऽन्यः। बाभ्रव्यः। कौशिकः। बाभ्रवोऽन्यः। बभ्रुशब्दस्य गर्गादिपाठात् सिद्धे नियमार्थमिदम्। गर्गादिपाठफलन्तु
लौहितादिकार्यार्थम्। बाभ्रव्यायणी। कपिबोधादाङ्गिरसे ४।१।१०७। गोत्रे यञ् स्यात्। काप्यः। बौध्यः। आङ्गिरसे किम्। कापेयः। बौधिः॥ ॥

ण इत्यर्थः। अश्वत्थाम्नीत्यादि। द्रोणाचार्यस्यानन्तरापत्ये अश्वत्थाम्नि द्रौणाय न इति प्रयोगो भ्रान्त इत्यर्थः॥ ॥ अनृष्या। अनृषीति पंचम्याः सौत्रो लुक्। अनृ
षिभ्य इत्यर्थः। सूत्रे इति। आनन्तर्य इत्यत्र इत्यर्थः। स्वार्थ इति। चातुर्वर्ण्यादिराकृतिगणत्वादिति भावः। वैदिरित्यत्र ऋष्यणमाशङ्क्याह बाह्वादेरिति। विद। उर्व।
कश्यप। कुशिक। भारद्वाज। उपमन्यु। विश्वानर। परस्त्री। परशुचेत्यादि॥ गर्गादिभ्यो। गर्ग। व्याघ्रपाद। पुलस्ति। बभ्रु। मंडु। वतंड। कपि। कत। शकल। कण्व॥
अगस्ति कुंडिनी। याज्ञवल्क्य। पराशर। जमदग्नीत्यादि। कथं तर्हि रामो जामदग्न्य इति। अनंतरापत्ये त्वयं सत्यं। अनंतरे पि गोत्रत्वारोपाद्बोध्यः। यञञोश्च। एयस्

न्त्रि पार्थे त्यतो लुगिति तद्राजस्येति सूत्राद्ग्रहणेन तेन वास्त्रियामिति चानुवर्त्तते। यस्कादिभ्यो गोत्र इति चा तदाह गोत्रे यद्घञंतमित्यादि। प्रवराध्यायप्रसिद्धगोत्र...विनो
केवलो यञ्जो न भवन गोत्र इत्यनेन न दंतविशेषितं। तदेव यञोरिति निर्दिश्यमानस्यादेशा भवंतीति भावः। प्रवराध्यायेति। एतच्च स्त्रीपुंसाभ्यामिति सूत्रे लौकिकस्य गो
त्रस्य ग्रहणमिति भाष्यमुपादाय कैयटेनोक्तमिति भावः। तेनेह नेति। यद्यत्र लौकिकं गोत्रमपत्यमात्रं गृह्येत तदा स्यादेवातिप्रसंग इति भावः। लोहितादीति। सर्व
त्रे लोहितादीत्यादिना ष्फः। ब्धेत्नो कैपिष्ठो लेविनत्वसामर्थ्यात् ङीषित्याशयेनाह बाभ्रव्यायणीति। गर्गादिगण एव बभ्रुः कौशिके इति पाठ्यं एवं हि द्विर्बभ्रुग्र
हणं न कर्त्तव्यं भवतीति हरदत्तादयः। कण्वस्य इति। इतश्चानिञ इति ढक्। कपेर्गर्गादिगणे पाठो लोहितादिकार्यार्थस्तेन काप्यायनी सिध्यति। बोधिरिति॥ अ

वतण्डाच्च ४।१।१०८। आङ्गिरस इत्येव। वातण्ड्यः। अनाङ्गिरसे तु गर्गादौ शिवादौ च पाठाद्यञणौ। वातण्ड्यः। वातण्डः। लुक् स्त्रियाम् ४।१।१०९। व
तण्डाच्चेति विहितस्य लुक् स्यात् स्त्रियाम्। शार्ङ्गरवादित्वान्ङीन्। वातण्डी। अनाङ्गिरसे तु वातण्ड्यायनी लोहितादित्वात् ष्फः। अणि तु वातण्डी ग
षित्वाद् ङीष्। मालाः ष्यङ् न। अश्वादिभ्यः फञ् ४।१।११०। गोत्रे आश्वायनः। पुंसि जाते पुंसीति प्रकृतिविशेषणम्। जातस्य गोत्रे जातायनः
पुंसीति किम्। जाताया अपत्यं जातेयः। भर्गात् त्रैगर्ते ४।१।१११। गोत्रे फञ्। भार्गायणस्त्रैगर्तः। भार्गिरन्यः॥ शुभ्रादिभ्यो वाह्लादिभ्यश्च॥ ॥ वातण्डाच्च

यञणोः प्राप्तयोः ... गिरसे यञेवेति नियमार्थं सूत्रं॥ लुक् स्त्रियां। विहितस्येति। परिशेषितस्यैवेति बोध्यं। एतच्चाङ्गिरस इत्यनुवृत्त्या लभ्यते। यद्यपि वतण्डात् लुक् स्त्रि
यामित्येकसूत्रं च वराले व्याङ्गिरस इत्यनुवृत्त्या अनाङ्गिरसे यञणोर्लुगभावात् स्त्रियामिष्टं सिध्यति तथापि पुंस्याङ्गिरसे यञणोरुभयोः प्राप्तिरनिष्टेति तद्वारणाय पृथ
क्सूत्रं कृतं। शार्ङ्गरवादीति। न चैवं क्रौड्यादिष्यङन्त्यणि सिद्धे शिवादिगणे वतंडपाठो व्यर्थ इति शंक्यं गर्गादिपाठेन यञा बाधान्निवृत्तये तत्पाठस्यावश्यकत्वात्। ष्य
ङ इति। अणि ओरनार्षयोरिति सूत्रेणेति भावः। अश्वादिभ्यः। गोत्र इति। इह गणे बैल्व आनडुह आत्रेय इति ... पत्यपाताः ... पठ्यन्ते ... एको गोत्रे॥
गोत्राद्यूनीति च ... लिनो ... आनडुह्यायनो गर्गादिषु ... आत्रेयशब्दात् ढगन्त इति ज्ञेय। पुंसि जात इति। गणसूत्रमिदं। जातप्र

इत्युक्ते विद्यमाने फञ् इत्यर्थः ॥ कस्मादित्याकांक्षायामर्थाज्ज्ञातत्वादिति लभ्यते । जोनायाय इति लिंगविशिष्टपरिभाषया एकादेशस्य पूर्वान्तत्वेन ग्रहणाद्वा प्राप्तिः ॥ ❁ ॥ शिवादिभ्योऽण् । ननु विशेषविहितान् इञादीन् बाधित्वा अणेवारंभसामर्थ्याद्भविष्यतीति किमनेनाण्ग्रहणेन अत्राहुः । ऋ. ऋष्यणं बाध्वा गर्गादियञ्प्राप्ते ततः प्राप्तमिञं बाधित्वा परत्वात्सेनान्तलक्षणेति प्राप्ते गृहपाठसामर्थ्याद्यथा प्राप्तप्रत्यय इत्येवस्यान्नत्वण् तथा चात्राण्ग्रहणमावश्यकमित्येके । अणधिकारादृत्येवस्यान्नान्यदित्यण्ग्रहणं स्पष्टप्रतिपत्त्यर्थमित्यन्ये । शिवा । ककुत्स्था । कोहड । जरत्कारु । विपाट् । तक्षन् । विश्रवण । रवण । ऋष्टिषेण । विरूपाक्ष इत्यादि ॥ गोत्र

शिवादिभ्योऽण् । ४।१।११२ ॥ गोत्र इति निवृत्तम् । शिवस्यापत्यं शैवः । गाङ्गः । पक्षे तिकादित्वात्फिञ् । गाङ्गायनिः । शुभ्रादित्वाड्ढक् । गाङ्गेयः ॥ अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः । ४।१।११३ ॥ अवृद्धेभ्यो नदीमानुषीनामभ्योऽण् स्यात् । ढकोऽपवादः । यामुनः । नार्मदः । चिन्तितायाः अपत्यं चैन्तितः । अवृद्धाभ्यः किम् । वासवदत्तेयः । नद्यादि किम् । वैनतेयः । तन्नामिकाभ्यः किम् । शोभनाया अपत्यं शौभनेयः ॥ ऋष्यन्धकवृष्णिकुरुभ्यश्च । ४।१।११४ ॥ ऋषयो मन्त्रद्रष्टारः । वासिष्ठः । वैश्वामित्रः । अन्धकेभ्यः । श्वाफल्कः । वृष्णिभ्यः । वासुदेवः । आनिरुद्धः । शौरिरिति बाह्वादित्वादिञ् । कुरुभ्यः । नाकुलः । साहदेवः । इञ एवायमपवादो मध्येऽपवादन्यायात् । अत्रिशब्दात्तु परत्वाड्ढक् । आत्रेयः ॥ मातुरुत्संख्यासंभद्रपूर्वायाः । ४।१।११५ ॥ संख्यादिपूर्वस्य मातृशब्दस्य उदादेशः स्यादण् प्रत्ययश्च । द्वैमातुरः । षाण्मातुरः । सांमातुरः । भाद्रमातुरः । आदेशार्थं वचनम् । प्रत्ययस्तूत्सर्गेण सिद्धः । स्त्रीलिंगनिर्देशोऽर्थापेक्षया । तेन धान्यमातुर्न । संख्येति किम् । सौमात्रः । शुभ्रादित्वाड्ढक् । द्वैमात्रेयः ॥

११ इति निवृत्तमिति । एतच्च वृत्तौ कैयटे च स्थितं । यद्यपि गोत्रसंज्ञासूत्रपर्यन्तं गोत्राधिकार इति यूनि लुगिति सूत्रस्थभाष्यकैयटाभ्यां लभ्यते तथापि तन्मतान्तरमिति भावः । एवं चेत्ततः प्रभृत्यपत्यसामान्ये प्रत्यया भवन्तीति स्थितं । शुभ्रादित्वान्नित्यं ढकि प्राप्ते जरत्कारुशब्दोऽत्राणर्थं पठ्यते । जारत्कारवः । ढकि तु ढ्लोपोऽकद्रवा इत्युलोपः । जारत्कारेयः । कुञ्जादित्वाद्वेत्येकं कुञ्जादिष्वपीति नित्यं च्फञि प्राप्ते विपाट्छब्दोऽत्राणर्थं पठ्यते । वैपाशः । वैपाशापत्यः सेनान्तलक्षणेति ण्यप्रत्यये उदीचामिञीति च प्राप्ते तक्षन्शब्दोऽत्राणर्थं पठ्यते एष्य

प्रत्ययेन समावेशोऽभिव्यज्यते न लिङ्गानाता स्त्रणः ता सल्पकाः विश्रवण रवण शब्दावत्र पठ्येते तौ च विश्रवःशब्दस्यादेशौ विश्रवसोपत्यं वैश्रवणः। रावणः। अरुद्धाभ्यो। अरुद्धेभ्यो नदीमा
नुषीनामभ्य इत्येव सूत्रयितुं युक्तमित्याशयेन व्याचष्टे अरुद्धेभ्य इत्यादिना। द्वैमातुर इति॥ तद्धितार्थेत्यादिना समासः। अत्र द्वयोर्मात्रोरपत्यमिति विग्रहो न तु द्विमात्रोरप
त्यमिति। दिक्संख्ये संज्ञायामिति नियमेनासंज्ञायां समासासंभवात्। धान्यमातुर्नेति। अभिव्यक्तपदार्था इत्यनेन जननीवाचिन एव ग्रहणोऽस्ति द्वेपितस्तस्य प्रतिपत्त्य
र्थः स्त्रीलिंगनिर्देश इति भावः। अभिव्यक्तेत्यस्यानित्यताज्ञापनार्थ इति त्वन्ये॥ ॐ ॥ कन्यायाः। ननु कन्या ह्युस्सतयो नि तस्या अपत्यसंभवस्तवनालीन्याशं

कन्यायाः कनीन च ४।१।११६। ढकोऽपवादोऽण्। तत्संनियोगेन कनीनादेशश्च कानीनो व्यासः। कर्णश्च। अनूढाया एवापत्यमित्यर्थः। विकर्णशु
ङ्गच्छगलाद्वत्सभरद्वाजात्रिषु ४।१।११७ अपत्येण्। वैकर्णो वात्स्यः। वैकर्णिरन्यः। शौङ्गो भारद्वाजः। शौङ्गिरन्यः। छागलः। आत्रेयः। छागलि
रन्यः। केचित्तु शुङ्गेत्यावर्त्तं पठन्ति तेषां द्वकमन्युदाहरणम् शौङ्गेयः। पीलाया वा ४।१।११८। तन्नामिकाणं बाधित्वा द्व्यच इति ढकि प्रा
प्तेऽण् विधीयते। पीलाया अपत्यं पैलः। पैलेयः। ढक्च मण्डूकात् ४।१।११९। चादण्पक्षे इञ् मांडूकेयः। माण्डूकः। माण्डूकिः। स्त्रीभ्यो
ढक् ४।१।१२० स्त्रीप्रत्ययान्ता यो ढक् स्यात्। वैनतेयः। बाह्वादित्वात्सौमित्रिः। शिवादित्वाद्वा। सापेत्नः। द्व्यचः ४।१।१२१। द्व्यचः स्त्रीप्रत्य
यान्तादपत्ये ढक् स्यात्। तन्नामिकाणोऽपवादः। दात्तेयः। पार्थ इत्यत्र तु तस्येदमित्यण्॥ ११ कन्याह। अनूढाया इति अविवाहिताया इत्यर्थः। विकर्णेति वा

त्स्यादीनामपत्यप्रत्ययान्तानां ग्रहणं यञञोश्च अत्रिभृगुकुत्सेति सूत्राभ्यामपत्यप्रत्ययस्य लुक्। न चात्र वत्सादीनामेव ग्रहोऽस्त्विति शंक्यं। मूलभूतानां तेषां विकर्णादी
नामपत्य त्वाभावादतो व्याचष्टे वात्स्य इत्यादि। युगपदधिकरणवचनतायां बहुत्वमस्तीति शारद्वच्छुनकसूत्र एवोक्तं। पर्यसेदृष्टिः। पूर्वसूत्राद्वा ग्रहणानुवृ
त्तेरिति भावः। स्त्रीभ्यो ढक्। बहुवचननिर्देशान्न स्वरूपस्य ग्रहणं नाप्यर्थस्य। ढगर्थे तथा शुभ्रादिषु विमातृशब्दपाठात्। किं तु स्वाधिकारोक्तटावादेर्ग्रहणं। नन्वि
यं प्रकृतिः किं त्वादेरित्याशयेनाह स्त्रीप्रत्ययान्तेभ्य इति। तेन दरदोऽपत्यं दारद इत्यत्र ढक् न भवति॥ स्त्र्यर्थग्रहणे तु स्यादेवात्र ठक्। दरच्छब्दो हि जनपदक्षत्रियवाचीति तेनोऽप

सार्थेद्वयन्नृगधेत्यणि तस्य स्त्रियामतश्चेति लुकि इदं च्छेद्वस्य स्त्र्यर्थवाचित्वात् ढश्चेति वर्तमाने पुनरिह ढग्ग्रहणमणं सवद्धस्य ठको निवृत्त्यर्थम् यद्यपि चानुकृष्टं नोत्तरे इति
परिभाषया अणि इह न प्रवर्तते तथापि तस्या अनित्यत्वज्ञापनाय ढग्ग्रहणमित्याहुः तस्येदमिति शिवादित्वादण्प्रत्यय एवाणीत्यन्ये इतश्च इतः किम् दाक्षिः अनिञः कि
म् दाक्षायणः द्व्यचः किं उदधेरपत्यमौदधिः काशिकायामरीचेर्मारीच इत्युदाहृतं तदसत्वाह्वादित्वेन अप्रवृत्तेः न चास्य वाह्वादित्वे विवक्षितव्यं मरीचिशब्दो वाह्वादि
षुपठ्यत इतिमिरचोन्यान्य इति सूत्रभाष्ये स्थितत्वात् आत्रेय इति परत्वादयमृष्यणं वाधत इति भावः शुभ्रादिभ्यश्च चकारस्त्वाकृतिगणत्वद्योतनार्थ इत्याहुः मृकंड
शब्दोऽत्र पठ्यते मार्कंडेयः शुभ्र मृकंडु अश्व विमातृ विधवा गोधा प्रवाहणेत्यादि आकृतिगणोऽयम् तेन पांडवेय इति सिद्धम् इहादन्ते पुरः आप्तः विधवाशब्दात्तु

इतश्चानिञः ४।१।१२२ इकारान्ताद्द्व्यचोऽपत्ये ढक् स्यान्न त्विञन्तात्। दौलेयः। नैधेयः। शुभ्रादिभ्यश्च ४।१।१२३ ढक् स्यात्। शुभ्रस्याऽपत्यम्।
शौभ्रेयः। विकर्णकुषीतकात्काश्यपे ४।१।१२४। अपत्ये ढक् वा। वैकर्णेयः। कौषीतकेयः। अन्यो वैकर्णिः। कौषीतकिः। भ्रुवो वुक् च। ४।१।१२५ स्याचा
त् ढक्। भ्रौवेयः। प्रवाहणस्य ढे। ७।३।२८। प्रवाहणशब्दस्योत्तरपदस्याऽचामादेरचो वृद्धिः। पूर्वपदस्य तु वा ढे परे। प्रवाहणस्याऽपत्यम्
प्रावाहणेयः। प्रवाहणेयः। तत्प्रत्ययस्य च ७।३।२९। ढान्तस्य प्रवाहणशब्दस्योत्तरपदस्यादेरचो वृद्धिः पूर्वपदस्य तु वा। प्रवाहणेयस्याऽपत्यम् प्रा
वाहणेयिः। प्रवाहणेयिः। वाह्यतद्धितनिमित्ता वृद्धिः ढाश्रयणविकल्पेन वाधितुं न शक्यत इति सूत्रारम्भः। कल्याण्यादीनामिनङ्। ४।१।१२६। ए
षामिनङादेशः स्यात् ढक् च। काल्याणिनेयः। बान्धकिनेयः॥

॥ ९ द्वालक्षणो ढक् चतुष्पाज्जातिवाचिषु ढञ् गोधाशब्दाद्बहुवचनात्सोऽपि भवति क्वचिदो
न्मार्गिकीणमाम इति बोध्यम् प्रवाहणस्य ढे उत्तरपदस्येत्यधिक्रियते अर्थात्परिमाणेत्यतः पूर्वस्य तु वेति अनुवर्तते तेनेदाह उत्तरपदस्याचामादेरित्यादि नित्यमुत्तरप
दवृद्धेः फलं प्रवाहणेयी भार्या इत्यत्र वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधः तत्प्रत्ययस्य च प्रवाहणस्येति वर्तते तच्छब्देन प्रत्ययः परामृश्यते तदाह ढान्तस्ये
त्यादि वाह्यतद्धितमनिमित्तेति ढक्प्रत्ययान्नाद्बहिर्भूतो य इञ् तन्निमित्तेत्यर्थः कल्याण्यादीनाम् इह परस्त्रीशब्दः पठ्यते परस्य स्त्रीति षष्ठीसमासः पारस्त्रैणेयः
परभार्यायामुत्पन्न इत्यर्थः अनुशतिकादित्वा

दुभयपदवृद्धिः विंशारिगलोमुपरस्त्रीपरस्तु चेति पठ्यते। प्रासेनीति निषेधः। नत्वपरा चासौ स्त्री चेति कर्मधारयः। परस्त्रिया अपत्यं पारस्त्रैणवः। आसुलोच्चूद्रायां तेनैवोढायामुत्पन्नः सा
चजात्यंतरयोगात्परस्त्री। न च परस्त्र्यादेशस्य स्थानिवद्भावात्पारशवेप्यनुशतिकादीनां चेत्युभयपदवृद्धिः स्यादिति वाच्यं॥ सत्यादेशे पूर्वोत्तरपदसंभ्रमो हान्तरप्रवर्तते इह ग
लोस्त्रीमत्वयांतानां ढकः सिद्धत्वादिनङर्थग्रहणं अन्येषां तूभयार्थं। कल्याणी। सुभगा दुर्भगा। बंधकी। परस्त्रीत्यादि॥ ॥ कुलटाया वा। भ्राकंध्वादित्वात्परत्वम्
तत्रैव निपातनाद्। सतीभिक्षुकात्रेति॥ अत्र इनङ्विधौ। तथा चोक्तममरेण। अथवा धकिनेयः स्याद्धुधुलश्चासतीसुतः। कौलटेरः कौलटेयो भिक्षुकी तु सती यदि तदा कौ
लटिनेयोस्याः कौलटेयोपि चात्मज इति किंचित्तु सुद्राया अपि इनङ तृतीयं रूपं कौलटिनेय इतीत्युक्तं। पचेदुगिति। ढगपि पक्षे भवत्येवेति भावः॥ इह गा पूर्वपदस्य चे

कुलटाया वा ४।१।१२७। इनङ्मात्रं विकल्प्यते ढक्तु नित्यः पूर्वेणैव कौलटिनेयः कौलटेयः सतीभिक्षुकात्र कुलटायास्तु व्यभिचार्यर्थं कुल
न्यटतित्तस्याः सुद्राभ्यो वेति पक्षे ढ्रक्। कौलटेरः। तद्धितसिद्ध नेपूर्वपदस्य च ७।३।१९। इत्यादिना पूर्वोत्तरपदयोश्चामादेरचो वृ
द्धिर्णितिकिति च सुत्र दोपत्यं सौहार्दः। सुभगाया अपत्यं सौभागिनेयः। सक्तुप्रधानाः सिंधवः सक्तुसिंधवः तेषु भवः साक्तुसैंधवः। चटकाया ऐ
रक् ४।१।१२८। चटकस्येति वाच्यम्। लिंगविशिष्टपरिभाषया स्त्रिया अपि। चटकस्य चटकाया वा अपत्यं चाटकैरः। स्त्रियामपत्ये लुग्वक्त
व्यः। तस्योरेवापत्यं। चटका। गोधाया ढ्रक् ४।१।१२९। गोधेरः। शुभ्रादित्वात्पक्षे ढक्। गौधेयः। आरगुदीचाम् ४।१।१३०। गोधारः। रकासिद्धे आकारोच्चारण
मन्यतोविधानार्थम्। जडस्यापत्यं जाडारः। पण्डस्यापत्यं पाण्डारः॥ ऐति। चकारेणोत्तरपदस्येत्यनुकृष्यते तदाह पूर्वोत्तरपदयोरिति। सहृदयत्तो सौभगायेत्यत्र

हृद्भगा। दिलादर्शिश्छंदसत्वान्नोत्तरपदवृद्धिरित्याहुः। चटकाया इति। स्त्रीलिंगनिर्देशान्पुंसि न स्यादित्याशंक्याह चटकस्येति वाच्यमिति। एवं चेच्चटकादैरगि
त्येव सांप्रदायिकः पाठ इति न्यासकृदुक्ति वार्तिकविरोधादपेक्ष्यात्तयोरेवेति। तत्र टापेनोत्तरद्धितलुकि लुक्तद्धितलुकीति टापो लुकि जातिलक्षणो ङीषं वा धित्व
अजादिलक्षणष्टाबिति भावः गौधेर इति ढस्य एयादेशे कृते लोपो व्योरिति यलोपः। आरगुदीचाम्। चकारेवद्धुगुणढगपरकोपपर्यायेसिद्धे उदीचां ग्रहणं पूजार्थम आ

रगितिनत्सूचितम् पक्षेति चेत्याकारलोपगैघेरत्यनिष्टप्रसंगात् अन्यतरति अनाकारांतात्स्वस्यानुरोधेन कृतमित्यर्थः पंडस्येति पंडो नपुंसकस्तस्यापत्यं तु कृत्रिमादिति ॥
॥ ❁ ॥ क्षुद्राभ्यः अर्थमतं स्त्रीत्वं शब्दे आरोप्य स्त्रीलिंगनिर्देशः गृष्ट्यादिभ्यश्च गृष्टि हलि वलि कुद्रि अगस्ति मित्रयु अण् ढकोपवाद इति इहांत्ययोर्द्वयोर्यञ्मिवत्वाद् ण्यास्यः अन्ये
भ्यस्तु इतश्चानिञ इति विवेकः गार्ष्टेय इति सकृत्प्रसूतायां सर्वापि गृष्टिर्न तु गौरेव अतोत्र न चतुष्पाद्भ्य इत्यनेन ढञ् सिद्धिः केकय केकयस्यापत्यं स्त्री कैकेयी जनपदशब्दा
त्क्षत्रियादञ् मैत्रेयिकया श्लाघ्यते मित्रयूनांभावेनेत्यर्थः गोत्रचरणाच्छ्लाघात्याकारेतिवुञ् तत्र हि लौकिकं गोत्रं गृह्यते लोके च अपि प्रभृति गोत्रमिति प्रसिद्ध इति क

क्षुद्राभ्यो वा ४।१।१३१ अङ्गहीनाः शीलहीनाश्च क्षुद्रास्ताभ्यो वा ढ्रक् पक्षे द्व्यचं इति ढक्। कालेरः। कालेयः। दासेरः। दासेयः। पितृष्वसुश्छण् ४।१।
१३२। अणोपवादः पैतृष्वस्रीयः। ढकि लोपः ४।१।१३३। पितृष्वसुरन्तलोपः स्यात्। ढकि अत एव ज्ञापकात् ढक्। पैतृष्वसेयः। मातृष्वसुश्च ४।१।
१३४ पितृष्वसुर्यदुक्तं तदस्यापि स्यात्। मातृष्वस्रीयः। मातृष्वसेयः। चतुष्पाद्भ्यो ढञ् ४।१।१३५। ढे लोपोकद्र्वाः ६।४।१४७। कद्रुभिन्नस्यावर्णोनस्य
लोपः स्यात् ढे परे। कामण्डलेयः। कमण्डलुशब्दश्चतुष्पाज्जातिविशेषे। गृष्ट्यादिभ्यश्च ४।१।१३६। एभ्यो ढञ् स्यात् अण्ढकोरपवादः गार्ष्टेयः
मित्रयोरपत्यं मैत्रेयः। ढञ्यपि मित्रयुप्रलयानां यादेरियः ७।३।२। एषां यकारादेरियादेशः स्यात् ञिति णिति किति च तद्धिते परे इति इया
देशो भावे॥ दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि। ४।४।१७४। दा

शिका एतच्च यदा मित्रयुशब्दः अभेदोपचारात्तदपत्यसंतानेवर्तते तदा बोध्यमन्यथा मित्रयूनामिति बहुवचनांतेन विग्रहो न स्यात् प्रलयादागतम् प्रालेयम् इत्यादेशो ह
द्धिं न बाधते अचामादेरचो वृद्धिर्यादेरियादेश इति भिन्नविषयत्वात् अंगं तूभयोर्विशेषणं न तु कार्यीति हरदत्तः आदिवृद्धेरपीदमेव सूत्रं विधायकमस्तु किमनेनेति वि
—ष यभेदविचारलोत्सन्ये दांडिनायन. निपात्यंत इति दंडिन् हस्तिन् आभ्यां नडादित्वात्फक् निपातनाट्टिलोपाभावः वसंतादिषु अथर्वन्नि— तिपठ्यते अथर्वणा प्रोक्तो ग्रंथ
उपचारादथर्वा तमधीते आथर्वणिकः सुभ्रादिषु जिह्माशिन्निति पठ्यते तस्यापत्यं जैह्माशिनेयः वाशिनोऽपत्यं वाशिनायनिः उदीचां वृद्धादिति फिञ् भ्रूणहन् धी

वन् अनयोः ष्वुन्नि नकारान्तादेशो निपात्यते भ्रूणघ्नो भावो भ्रौणहत्यम् धैवत्यं हननस्तोः चिण्णलोरित्यनेनैव हन्तेस्तत्वे सिद्धे तकारनिपातनं ज्ञापयति धातोः स्वरूपग्रहणे
तत्प्रत्यये कार्यविज्ञानमिति वार्त्रघ्नमित्यत्र तत्वं न नन्वेवं प्रसङ्ग्भ्यामित्यादौ अनुदात्तस्य च दुर्वारः स्यादमविधौ धातोः स्वरूपग्रहणाभावात् अत्राहुः मृजेर्वृद्धिरिति
सूत्रस्थभाष्यपर्यालोचनया धातोः कार्यमुच्यमाने तत्प्रत्यये भवतीति ज्ञापनार्थं तकारनिपातनमिति व्याख्येयं तेन न कोपि दोष इति सरपूरन्यस्यालिप्यरेष्वा देवौ निपात्य
नि सरस्वा भवं सारवमुदकं इक्ष्वाकोरपत्यं ऐक्ष्वाकः जनपदशब्दात्क्षत्रियादञ् उलोपो निपातनात् इक्ष्वाकुषु जनपदेषु भवः कोपधादण् ऐक्ष्वाकः अत्राप्युलो
पो निपातनादेव आजलं नपोऽर्हयोष्येक श्रुत्यापाठात बहुत्वे त्वमस्त्रद्राजत्वाल्लुक् अण्लुनेति शेषः तथाच रघुः इक्ष्वाकूणां दुरापेर्थे इति मुरारिस्त्वाह ऐ

यस्कादिभ्यो गोत्रे ।२।४।६३। एभ्यो गोत्रप्रत्ययस्य लुक् स्यात् तत्कृते बहुत्वे न तु स्त्रियाम् मित्रयवः । अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च ।२
।४।६५।। एभ्यो गोत्रप्रत्ययस्य लुक् स्यात्तत्कृते बहुत्वे अत्रयः भृगवः कुत्साः वसिष्ठाः । गोतमाः । आङ्गिरसः । बह्वच इञः प्राच्यभरतेषु ।२।४।६६। बह्व
चः परो य इञ् प्राच्यगोत्रे भरतगोत्रे च वर्तमानस्तस्य लुक् स्यात् पन्नागाराः । युधिष्ठिराः । न गोपवनादिभ्यः ।२।४।६७। एभ्यो गोत्रप्रत्ययस्य न लुक् स्यात् बि
दाद्यन्तर्गणोयम् । गौपवनाः शैग्रवाः तिककितवादिभ्यो द्वन्द्वे ।२।४।६८। एभ्यो गोत्रप्रत्ययस्य बहुषु लुक् स्याद् द्वन्द्वे तैकायनयश्च कैतवायनश्च तिककि
कादिभ्यः फिञन्तस्य लुक् तिककितवाः ।। इक्ष्वाकेषु चमे पिलेषु फलमिति हिरण्यस्य विकारे हिरण्मयः मयटि यादेर्लोपोत्र निपात्यते ।। ।। यस्काद
दिभ्यो यस्यादिकारादन्यत्र लौकिकं गोत्रं गृह्यते तदस्पष्टयन्नाह अपत्यप्रत्ययस्येति एयस्त्रिप्यार्षत्वतो लुगित्यनुवर्तते तद्राजस्येति सूत्राद्बहुषु तेनैवास्त्रियामि
ति च तद्राहलुक् स्यादित्यादि तत्कृतेति किम् प्रियायास्काः बहुत्वे किं यास्कः शिवाद्यण् यस्कलह्वद्रुह्यक र्णाटक वस्तिकुद्रि मित्रयु इत्यादि अत्रिगोत्रप्रत्ययस्ये
ति अत्रिप्रभृतिश्च आनिजन्तेति ढक् एतेभ्यस्तु ऋष्यणिति वा भृगुः भरतगोत्रे उदाहरति युधिष्ठिरा इति बहुषु ष्वेकस्य लुक् नेह यौधिष्ठिरिः कुरुलक्षण एयं वाधित्वा वा
कादित्वादिञ् विदाद्यन्तर्गणोयमिति यस्त्रगोत्रस्तिलुगन्यायनानीति भावः तिककितवादिभ्यो यद्यपि द्वन्द्वरूपा एवैव गणे पठ्यन्ते तिकादी निपूर्वपदानि कितवादी

सु·त· सि·कौ· टी·त· १२

न्युत्तरपदाश्रित्यापि तिकादिभ्य इत्युक्ते पूर्वपरेष्वेव लुमाशंक्येत इष्यते तूत्तरपदेष्वपि अत सिककितवादिभ्य इत्युक्तम्। तिककितवा इति अन्येऽप्युदाहर्तव्याः औपकायनाभ्रस्तलामकायनाश्च नडादिभ्यः फक् तस्य लुक् उपकलमकाः भ्राष्टकयश्च कापिष्ठलयश्च अत इञ् तस्य लुक् भ्राष्टककपिष्ठलाः कार्ष्णाजिनयश्च कार्ष्णसुंदरयश्च अत इञ् तस्य लुक् कृष्णाजिनकृष्णसुंदरा इत्यादि ॥ ॥ उपकादिभ्यो। अद्वंद्वे ग्रहणं द्वंद्व इत्येतत्राधिक्रियत इति स्फुटीकरणार्थं उपकादीनां मध्ये त्रयो द्वंद्वा तिक कितवादिषु पठ्यन्ते उपकलमका इत्यादयस्तेषां पूर्वेणानित्यमेव लुक् अद्वंद्वे त्वनेन विकल्प इति ज्ञेयम भाष्ये भ्राष्टकि कापिष्ठलय इत्युदाहरणाति ककितवादिषु स्य पाठो अ नार्थ इति कैयटस्तेनात्र द्वंद्वेपि विकल्प एवोचित इत्याशयेनोदाहरति भ्राष्टककपिष्ठला इत्यादि तिककितवादिषु पठितानामनेन द्वंद्व एवं विकल्प इत्याशयेनोदाहरति लमकाः॥

उपकादिभ्योऽन्यतरस्यामद्वन्द्वे ४।४।६९। एभ्यो गोत्रप्रत्ययस्य बहुत्वे लुक् वा स्यात्। द्वन्द्वे चाद्वन्द्वे च औपकायनाश्च लामकायनाश्च। नडादिभ्यः फक् तस्य लुक्। उपकलमकाः। औपकायनलामकायनाः भ्राष्टककपिष्ठलाः भ्राष्टकिकापिष्ठलयः। उपमकाः लामकायनाः। आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् २।४।७०। एतयोरवयवस्य गोत्रप्रत्ययस्य लोपः स्याद् बहुत्वे लुक् स्यात् अवशिष्टस्य प्रकृतिभागस्य यथासंख्यमगस्तिकुण्डिनचावादेशौ स्तः। अगस्तयः कुण्डिनाः॥

॥ ९ लामकायन इति एवमन्येऽप्युदाहर्तव्याः उपका औपकायनाः भ्राष्टकाः भ्राष्टकायना इत्यादि अगस्त्यशब्दाद् ऋष्यण् कुंडि नशब्दात्तु गर्गादिः यञ् ननु कुंडिनीशब्दस्य यञि भस्याढे इति पुंवद्भावे न तद्धित इति टिलोपः प्राप्नोति न च संयोगादिलोपश्चेति प्रकृतिभावः शंक्यः अणीति तत्रानुवर्तना नैवम् अस्मादेव निपातनात् तस्य प्रवृत्तेः कौंडिन्यः सिध्यति चकारस्त्वन्तोदात्तार्थः मध्योदात्तो कुंडिनीशब्दः कुंडमस्यास्ति इति मत्वर्थीयस्येनेरुदात्तत्वात् आदेशस्यापि कुंडिनशब्दस्यान्तरतमत्वान्मध्योदात्तत्वात्॥ अवशिष्टस्य प्रकृतिभागस्येति॥ न च प्रत्ययविशिष्टस्यादेशमात्रं विधीयतां किं लुग्विधानेनेति वाच्यं। अगस्तीयाश्छात्रा इ त्यनापत्तेः। लुकि हि सति गोत्रे लुगचीति लुकि प्रतिषिद्धे वृद्धत्वात् छस्सिध्यति। प्रत्ययविशिष्टस्यादेशविधौ तु वृद्धत्वापगमे शैषिकोऽणेव स्यात्॥ कौंडिनाश्छात्रा इ ति तूभयथापि सिध्यत्येव। व्यापवादस्य कण्वादिभ्यो गोत्रे इत्यणः प्रत्ययस्य प्रवृत्या तत्र विशेषाभावात्॥

१२

राजश्वशुराद्यत् । कर्मण्यणोऽपवादः ॥ जाताववेति ॥ प्रकृतिप्रत्ययसमुदायेन जातिश्चेद्वाच्येत्यर्थः । प्रत्ययस्त्वपत्य एव । एवं च पंकजादिवद्योगरूढ इति फलितोऽर्थः । टिलोपो ने-
ति । नस्तद्धित इति प्राप्तष्टिलोपो नेत्यर्थः । ब्राह्मो जातौ । योगविभागोऽत्रेति । एकयोगत्वे त्वारंभसामर्थ्यादनपत्ये — जातौ ब्राह्मीत्यत्र प्राप्तटिलोपसिद्धावपि ब्राह्मण इति न सिध्येत् । ण-
अन्निति प्रकृतिभावस्य न मपूर्वोऽपत्य इति निषेधाट्टिलोपस्य दुर्वारत्वात् । इदं च जातौ ब्राह्ममित्यादि न सिध्येदन्निति प्रकृतिभावस्य दुर्वारत्वादिति भावः । ब्राह्म इति । इहापत्य इति न सं-

। ४।१।१३७ ।

राजश्वशुराद्यत् । राज्ञो जातावेवेति वाच्यम् । ये चाभावकर्मणोः ६।४।१६८ । यादौ तद्धिते परेऽन् प्रकृत्या स्यान्न तु भावकर्मणोः । राजन्यः । श्वशुर्यः । जातिग्रहणाच्छू-
द्राद्वावुत्पन्नो राजनः । अन् ६।४।१६७ । अणि अन् प्रकृत्या स्यादिति टिलोपो न । अभावकर्मणोः किं । राज्ञः कर्म भावो वा राज्यं । संयोगादिश्च ६।४।१६६ । इनः प्र-
कृत्या स्यादणि परे । चक्रिणोऽपत्यं चाक्रिणः । न मपूर्वोऽपत्येऽवर्मणः ६।४।१७० । मपूर्वोऽन् प्रकृत्या न स्यादपत्येऽणि । भाद्रसामः । मपूर्वः किं । सौत्वनः । अपत्ये किम् । च-
र्मणा परिवृतश्चार्मणो रथः । अवर्मणः किं । चक्रवर्मणोऽपत्यं चाक्रवर्मणः । वा हितनाम्न इति वाच्यम् । हितनाम्नोऽपत्यं हैतनामनः हैतनामः । ब्राह्मोऽजातौ ६।
४।१७१ । योगविभागोऽत्र कर्त्तव्यः । ब्राह्म इति निपात्यतेऽनपत्येऽणि । ब्राह्मं हविः । ततो जातौ । अपत्ये जातौ अणि ब्रह्मणष्टिलोपो न स्यात् । ब्रह्मणोऽपत्यं ब्राह्मणः ।
अपत्ये किम् । ब्राह्मी ओषधिः । औक्षमनपत्ये ६।४।१७३ । अणि टिलोपो निपात्यते । औक्षं पदं । अनपत्ये किम् । उक्ष्णोऽपत्यमौक्ष्णः । षपूर्वहन्धृतराज्ञाम-
णि ६।४।१३५ । षपूर्वो योऽन् तस्य हनादेश्च भस्यातो लोपोऽणि । ताक्ष्णः । भ्रौणघ्नः । धृतराज्ञोऽपत्यं धार्तराज्ञः । पूर्वेति किम् । सामनः । अणि किम् । ताक्षण्यः । क्षत्त्रा-
द्घः ४।१।१३८ । क्षत्त्रियः । जातावित्येव । क्षात्त्रिरन्यः ॥

॥ ॥ संबध्यते । अन्यथा निपातनमिदं व्यर्थं स्यान्न मपूर्व इति प्रकृतिभावनिषेधाट्टिलोपसिद्धेरित्याशयेनाह अ-
नपत्येऽणीति । ब्राह्ममिति । ब्राह्मो मुहूर्त्तः । ब्राह्मः स्थालीपाक इत्याद्यप्युदाहरणं । नन्वेवमपि ब्राह्मणो न सिध्यति न मपूर्व इति प्रकृतिभावनिषेधादपत्येऽणि नस्तद्धित इति टिलोप-
प्रसक्तेरत आह जाताविति । इह मंडूकप्लुत्याऽपत्य इत्यनुवर्त्तते नेति च न तदाह अपत्ये जातावित्यादि । अयमत्रार्थः । अपत्ये जातौ ब्राह्मणशब्दे टिलोपो न भवतीति । केचिदिह अ-
जाताविति छित्त्वा जातौ न भवतीति व्याचक्षते तस्मिंस्तु व्याख्याने नेति नानुवर्त्तनीयं । जातौ किं । ब्राह्मो नारदः । ब्राह्मण इति । शिवादित्वात्तस्येदमित्यण्वा । ब्राह्मण्य इति । कारिलक्षणे

कुलात्खः। कैं कस्मात्कुलशब्दात् पूर्वपदादित्यादिना विशेषविहिताभ्यामपि यड्ढञ्भ्यां खेन बाध्यते न हि द्विधा वन्यतरस्यां ग्रहणादित्याशयेनाह कुलीन इति। लिंगादिति। अन्यथा ग्रहणवतेति
नरंतविधिप्रतिषेधात् पूर्वपदग्रहणं व्यर्थं स्यादिति भावः। आढ्यकुलीन इति। आढ्यश्चासौ कुलीनश्चेति कुलीनविशेषणत्वे कुलस्याढ्यत्वं न प्रतीयते। किंच ईकार उदात्त इति स्वरे

कुलात्खः ४।१।१३९। कुलीनः। तदन्तादपि उत्तरसूत्रे पूर्वपदादिति लिङ्गात्। आढ्यकुलीनः। अपूर्वपदादन्यतरस्यां यड्ढकञौ ४।१।१४०। कुलादित्येव पक्षे
खः। कुल्यः कौलेयकः। कुलीनः। पदग्रहणं किम्। बहुकुल्यः। बाहुकुलेयकः। बहुकुलीनः। महाकुलादञ्खञौ ४।१।१४१। अन्यतरस्यामित्यनुवर्तते प
क्षे खः। माहाकुलः माहाकुलीनः महाकुलीनः। दुष्कुलाड्ढक् ४।१।१४२। पूर्ववत्पक्षे खः। दौष्कुलेयः दुष्कुलीनः। स्वसुश्छः ४।१।१४३। स्वस्रीयः। भ्रातु
र्व्यच्च ४।१।१४४। चाच्छः। अणोऽपवादः। भ्रातृव्यः भ्रात्रीयः। व्यन्सपत्ने ४।१।१४५। भ्रातुर्व्यन् स्यादपत्ये प्रकृतिप्रत्ययसमुदायेन शत्रौ वाच्ये। भ्रातृव्यः।
शत्रुः। पाप्मना भ्रातृव्येणेति तूपचारात्। रेवत्यादिभ्यष्ठक् ४।१।१४६। ठस्येकः ७।३।५०। अङ्गात्परस्य ठस्य इकादेशः स्यात्। रैवतिकः। गोत्रस्त्रियाः कुत्सने ण
च ४।१।१४७। गोत्रं या स्त्री तद्वाचकाच्छब्दात् णः स्यात् ठक् च कौत्सने सामर्थ्याद्यूनि। गार्ग्या अपत्यं गार्गो गार्गिको वा जाल्मः। पुंवद्भावाद्गार्ग्यशब्दात् ठको यस्येति लोपः। आ
पत्यस्येति यलोपः। वृद्धाट्ठक् सौवीरेषु बहुलम् ४।१।१४८। सुवीरदेशोद्भवाः सौवीराः। वृद्धात्सौवीरगोत्रात् यूनि बहुलं ठक् स्यात् कुत्सायाम्। भागवित्तेर्भागविति
कः पक्षे फक्। भागवित्तायनः। फेश्छ च ४।१।१४९। फिञन्तात्सौवीरगोत्रादपत्ये छः ठक् च कुत्सने गम्ये। यमुन्दस्यापत्यं यामुन्दायनिः तिकादित्वात् फिञ्। तस्यापत्यं
यामुन्दायनीयः यामुन्दायनिकः। कुत्सने किम्। यामुन्दायनिः। औत्सर्गिकस्याणो ण्यक्षत्रियेति लुक्। सौवीरेषु किम्। तैकायनिः॥

(१ विशेषोऽस्तीति भावः। बहुक
ल्य इति विभाषा सुप इति बहुच्। अस्य योनं पदमिति अपूर्वपदत्वान्नात्र यत्र यं भवत्येवेति भावः॥ व्यन्स्यादिति। भ्रातुरपत्यं यदि शत्रुस्तदा भ्रातृशब्दात् व्यनेव स्यान्न तु व्यच्छौ इत्यर्थः। स
मुदायेनेति। तन्न घटित प्रत्ययेन शत्रुरूपेऽपत्ये वाच्य इत्यर्थः। यत्तु वृत्तिकृतोक्तम् अपत्यार्थोऽत्र नास्त्येवेति तदुपेक्ष्यं भाष्यविरोधादिति मनसि निधाय। पाप्मनेति। श्रुतिगत
भ्रातृव्यशब्दस्य गतिं वदन्नुपचारादिति। अस्त्री पङ्कं पुमान्पाप्मा पापं किल्विषकल्मषमित्यमरः। नहि पापं भ्रातुरपत्यं भवतीत्यतो भाक्त एवायं प्रयोग इति भावः। रेवत्या। रेवती।

१ कुत्सायाम्   भस्याढे तद्धिते इति पुं॰ २

मणिपाली।

अश्वपाली ह्रपालीत्यादि॥ स्येकः। अंगस्येत्यनुवर्त्तनादाह अंगात्स्येति। अंगादिति ठकारविशेषणाद्दठ च ष्ठकारस्य न भवति कर्मठः। गोत्रस्त्रियाः। लित्वं तु ग्लुचुकायन्या
अपत्यं म्लौचुकायनो जाल्म इत्यत्र फिञन्तात् [illegible] र्थमिति बोध्यं। सामर्थ्याद्यूनीति। गोत्राद्यपरो गोत्रप्रत्ययो नेत्युक्तत्वादिति भावः। गार्ग्या अपत्यमिति। पितुरसंविज्ञाने मा
त्राव्यपदेशात्कुत्सा। गोत्रेति किं। कारिकेयो जाल्मः। स्त्रियाः किं। औपगवस्यापत्यं औपगविर्जाल्मः। कुत्सनेनेति किं। गार्ग्यो माणवकः॥ ※ ॥ फांटाहृतीति। कुत्सन इति
निवृत्तौ। वृत्तिमते लित्वस्य फलमस्तीति ध्वनयन्नुदाहरति मैम[illegible]इति॥ नच भाष्यमतेपि फांटाहृताभार्य इत्यत्र वृद्धिनिमित्तस्येति पुंवद्भावनिवृत्तिर्लित्वफलमस्तीति वाच्यो अस्त्रि
यामिति युवसंज्ञानिषेधाद्गोत्रसंज्ञासद्भावादेको गोत्र इति नियमाच्चिंतान्फांटाहृतिशब्द इत्यस्य प्रत्ययस्याभावात्फांटाहृताशब्दस्यैवासत्त्वादिति भावः। कुर्वादिभ्यो॥ सौवी

फांटाहृतिमिमताभ्यां णफिञौ ४।१।१५०। सौवीरेषु नेह यथासंख्यं अल्पाच्तरस्य परनिपाताल्लिङ्गात् इति वृत्तिकारः भाष्ये तु यथासंख्यमेवेति स्थि
तम्। फांटाहृतः। फांटाहृतायनिः। मैमतः। मैमतायनिः। कुर्वादिभ्यो ण्यः ४।१।१५१। अपत्ये। कौरव्याः ब्राह्मणाः वावदूक्याः। सम्राजः क्षत्रिये सा
म्राज्यः। साम्राजोऽन्यः। सेनान्तलक्षणकारिभ्यश्च ४।१।१५२। एभ्यो ण्यः। हारिषेण्यः। लाक्षण्यः। कारिः शिल्पी तस्मात् तान्तुवाय्यः कौम्भकार्य्यः ना
पित्यः॥ उदीचामिञ् ४।१।१५३। हारिषेणिः लाक्षणिः तान्तुवायिः॥ कौम्भकारिः नापितात्तु परत्वात्फिञेव नापितायनिः॥ तक्ष्णोऽण् उपसंख्या
नम्। षपूर्वेन्यनोः कारलोपः। ताक्ष्णः। पक्षे ताक्षण्यः। तिकादिभ्यः फिञ् ४।१।१५४। तैकायनिः

रेष्वित्यपि निवृत्तं। कौरव्या ब्राह्मणा इति। यत्तु कुरुनादिभ्यो ण्य इति वक्ष्यति तस्य न
द्राजत्वादहरण[illegible] किं कुरवः। क्षत्रिया इञि भवति नतु कौरव्या इति भावः। वावदूक इति विदेर्यङ्ई॰ जादूकप्रत्ययः स चात्रैव गणे निपातनादित्याहुः। कुरुगर्गवावदूकाः। संम्राजः
क्षत्रिया सम्राट्शब्दात् ण्य इत्यर्थः। वामरथस्य कण्वादिस्वरवर्जं यञन्तस्य काण्वशब्दस्य यत्कार्यं तत् ण्यप्रत्ययान्तस्य वामरथ्यशब्द स्या घुदात्तं विनेत्यर्थः। वहुभ
त्वयञञोश्चेति लुक्। वामरथ्याः। छात्राकण्वादिभ्यो गो[illegible]ति छापवादोऽण्। वामरथी। वामरथ्यायनी स्त्री। यञश्च प्राचांष्फ तद्धित इति ङीष्ष्फौ। वामरथ्यानि सं
घंकलप्र[illegible]नि। संघाकलक्षणेष्विति छापवादीण्॥ सत्यंकारा वलभीकारा वुद्धिकारेत्यादि॥ हारिषेण्य इति। इतिसंज्ञायामिति षत्वस्यासिद्धत्वान्नेनान्तोयं॥ न तृण
इतिसंज्ञायामिति सस्य षः ७मू

इति। उदीचामिञोपवादः। अस्मादुपसंख्यानाच्छिवादिषु तस्य नु शब्दपाठः नार्थ इति गम्यते। वृत्तिकारस्तु तस्य नु शब्दं शिवादिषु पठित्वा कार्यलक्षणमुदीचामिञमपवादम्बा
धतेरादस्य तु बाधो नेष्यत इत्याह तदनुरोधेनास्माभिरपि तत्र तथैव व्याख्यातं फलविशेषाभावात्॥ * ॥ कौशल्यपरमप्रकृतेरेवायमिति॥ यदि तु वृद्धेत्कोसलेति ज्यङन्तात्कौ
लशब्दात्कौसल्यान्तात्कर्मारशब्दाच्चायं विधिः स्यात्तदामून्येव प्रसज्येतेति भावः॥ छागेति॥ इगुशब्दस्याप्युपलक्षणमेतत् फिञ्प्रकरणे दगुकोसलकर्मारच्छागवृ
षाणां युट्चादिष्टस्येति वार्त्तिकात्॥ आदिष्टस्य आयन्नादेशस्येत्यर्थः॥ अन्यथा प्रतिपदोक्ते युटि कृते प्रत्ययादित्वाभावात् कौशल्यायनिरित्यादौ फस्यायन्नादेशो न स्यात्॥
पुकि कृते तु दागव्यायनिरित्यत्र ओर्गुणो अन्यत्राल्लोपश्च न स्यादिति भावः। कार्त्रायणिरिति। कर्तुरपत्यं कार्त्रस्तस्यापत्यं तु कार्त्रायणिः। अत्र व्याचक्षते कर्तृश

कौशल्यकार्मार्याभ्यां च ४।१।१५५। अपत्ये फिञ् इञोपवादः परमप्रकृतेरेवायमिष्यते प्रत्ययसंनियोगेन प्रकृतिरूपं निपात्यते कुशलस्यापत्यं कौश-
ल्यायनिः कर्मारस्यापत्यं कार्मार्यायणिः। छागवृषयोरपि। छाग्यायनिः वार्ष्यायणिः। अणो द्व्यचः ४।१।१५६। अपत्ये फिञ् इञोपवादः कार्त्रायणिः
अण इति किम्। दाक्षायणः द्व्यचः किम्। औपगविः त्यदादीनां वा फिञ् वाच्यः। त्यादायनिः त्यादः उदीचां वृद्धादगोत्रात् ४।१।१५७ आम्रगुप्तायनिः प्राचा-
न्तु। आम्रगुप्तिः। वृद्धात्किम्। दाक्षिः। अगोत्रात्किम्। औपगविः॥ वाकिनादीनां कुक् च ४।१।१५८। अपत्ये फिञ् वा वाकिनस्यापत्यं वाकिनकायनिः। वाकिनिः

वः कुर्वादिषु पठ्यते तथा च काश्य इत्येव वर्द्धमानेनोदाहृतं॥ तस्मादिह भर्तृहर्त्र्योरुदाहार्यमिति। दाक्षिरिति। वा नामधेयं यस्येति वृद्धसंज्ञाभावपक्षे प्रत्युदाहरणमिदं पक्षान्त-
रे तु फिञ् संभवत्येव दाक्षायण्योश्विनीत्यादितारा इत्यमरः। वाकिनादीनां। यदिह वृद्धमगोत्रं शब्दरूपं तत्रागमार्थमेवेदं वचनमन्येषां तूभयार्थं। उदीचामित्यनुवर्त्तनाद्विक-
ल्पः फलित इत्याह फिञ्वा स्यादिति॥ वाकिनकायनिरिति। वचनं वाकः सोऽस्यास्तीति वाकिनः। अत एव निपातनादिनन्। अगारे राधत इति गारेधः पृषोदरादित्वादृलोपः
शकन्ध्वादित्वात्पररूपं गारेधकायनिः। चर्मिवर्म्यादौ तूभयार्थौ। चर्मवर्मशब्दाभ्यां व्रीह्यादित्वादिनिः। चर्मि वर्मिणोर्नलोपश्चेति गणसूत्रं। चार्मिकायणिः। वार्मिकायणिः
कुकि कृते नकारस्यानन्त्यत्वान्नलोपाप्राप्तौ वचनं। न च कुक् परादिरस्त्विति वाच्यं। फस्यानादित्वादायनादेशाभावप्रसंगात्। वाकिनिरिति। अत इञ्। फिञभावे तस्मिन्

पुत्रांतात्। उदीचां वृद्धादि त्यनुवर्त्तनं इत्य। ग्रंथनाह वाफिञ् सिद्ध इति॥ तेनैव सूत्रेण फिञि सिद्धे अनेन कुगेव वा विधीयत इति भावः। प्राचामवृद्धात्। प्राचां ग्रहणं पूजार्थं। अव
ह्यादिति किं। राजदंतिः। बहुलग्रहणान्नेह दाक्षिः। मानुषः मनुष्य इति। जातिशब्दावेतौ। अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः। नकारस्य च मूर्द्धन्यस्तेन सिध्यति माणवः
णत्वविधानार्थमिदमणः सिद्धत्वात्। अनधीतवेदत्वान्मूढत्वं विहितानुष्ठानाच्च कुत्सितत्वं इदं च वचनं ब्राह्मणमाणवेति णत्वनिपातनाल्लब्धमित्याहुः। जनपदाजनप
दस्य क्षत्रियेति। जनपदवाची समर्थः क्षत्रियवाचीत्यर्थः यद्यपि पंचालादयो जनपदे बहुवचनांताः क्षत्रिये त्वेकवचनांतास्तथापि प्रातिपदिकस्योभयत्राविशेष मस्तमे
वेति बोध्यं। जनपदशब्दात्किं। द्रुह्यो यत्यं... केवल क्षत्रियवाच्ययं। क्षत्रियादिति किं। ब्राह्मणस्य पंचालस्यापत्ये पांचालिरिति वृत्तिकारादयः॥ बाह्वादिषु पाठादिम

पुत्रान्तादन्यतरस्याम् ४।१।१५९। अस्माद्वा फिञ् सिद्धः तस्मिन्परे पुत्रान्तस्य वा कुक् विधीयते। गार्गीपुत्रकायणिः। गार्गीपुत्रायणिः। गार्गीपुत्रिः। प्राचाम
वृद्धात्फिन्बहुलम् ४।१।१६०। ॥ग्लुचुकायनिः॥ मनोर्जातावञ्यतौ षुक्च॥ ४।१।१६१। समुदायार्थो जातिः। मानुषः मनुष्यः। ज
नपदशब्दात्क्षत्रियादञ् ४।१।१६८। जनपदक्षत्रिययोर्वा चकारादन्यस्मादपत्ये। दाण्डिनायनेति सूत्रे निपातनाट्टिलोपः। ऐक्ष्वाकः। ऐक्ष्वाकौ॥ क्षत्रियस
मानशब्दाज्जनपदात्तद्राजन्यपत्यवत्। तद्राजमाचक्षाणस्तद्राज इत्यन्वर्थसंज्ञासामर्थ्यात्। पंचालानां राजा पांचालः। पुरोरण्वक्तव्यः। पौरवः। पा
ण्डोर्ड्यण्। पाण्ड्यः। साल्वेयगान्धारिभ्यां च ४।१।१६९। आभ्यामपत्येऽञ् वृद्धेदिति ञ्यङोपवादः। साल्वेयः। गान्धारः। तस्य राजन्यप्येवम्॥ द्व्य
ञ्मगधकलिङ्गसूरमसादण् ४।१।१७०। अञोपवादः। द्व्यच्। आङ्गः। वाङ्गः। सौह्मः। मागधः। कालिङ्गः। सौरमसः। तस्य राजन्यप्येवम्॥ ॥

दं प्रत्युदाहरणं बैत्यमित्यन्ये। क्षत्रियसमानशब्दादिति॥ समानः शब्दो यस्य जनपदस्य सोयं समानशब्दो जनपदः। क्षत्रियेण समानशब्दः। क्षत्रियसमानशब्द
स्मात्तस्य क्षत्रियस्यैव समर्थात्तद्राजनि वाच्ये अपत्यवत्प्रत्ययो भवतीत्यर्थः पंचालानां राजेति। इहाद्वृद्धादपि बहुवचनविषयादिति प्राप्तो वुञ् बाध्यते॥ पुरोरिति। पूरु
शब्देन जनपदवाचीति प्राग्दीव्यतीये अणि सिद्धे न ... समर्थवचनं। जनपदवाचित्वेन तु द्व्यञ्मगधेत्येव सिद्धं। पाण्डोर्ड्यण्। णित्करणं तु पाण्ड्या भार्य इत्यत्र वृद्धिनि
मित्तस्येति पुंवद्भावप्रतिषेधार्थं। युधिष्ठिरपितृवाचिनो गुणवाचिनश्च पाण्डोर्नेह ग्रहणं जनपदशब्दादित्युक्तेस्तदधिपतिवाचिन एवोपस्थानात्॥ ॥

वृद्धेत्यानपरत्वेऽणि कौमाराः। कुमारीशब्दो जनपदक्षत्रियवचनः। कुरुना। नकार आदिर्येषां तेनादयः। कुरुशब्दाद्[illegible] प्राप्ते नादिभ्यस्त्वञि प्राप्ते वचनं। उदुंबर
शादेरन्यानि। उदुंबराः तिलखला मद्रकारा युगंधराः। भुलिंगाः शरदंडाश्च साल्वावयवसंज्ञिका इति वृत्तिः। औदुंबरिरिति। तैलखलिः॥ माद्रकारिः॥ यौगंधरिरित्यादी
न्युदाहर्तव्यानि॥ ते तद्राजाः॥ अजादय इति॥ ततः प्राचीनास्तु तच्छेदे न परामृष्यन्ते गोत्रयुवसंज्ञाकांडेन विच्छेदादेतदर्थमेव हि तत्कांडमध्ये तत्तमाचार्यैर्लेख्या।
हुणः। वस्तुतस्तु तद्राज इत्यधिकृत्य जनपदशब्दात्क्षत्रियादञित्यादिसूत्राणामारंभे गोत्रयुवसंज्ञाकांडस्य मध्ये पाठाभावेऽपि न क्षतिरित्यन्ये तद्राजस्य तदर्थे

वृद्धेत्कोशलाजादाञ्ञ्यङ्। ४।१।१७१। वृद्धात्। आम्बष्ठ्यः। सौवीर्यः। इत्। आवन्त्यः। कौशल्यः। अजादस्यापत्यमाजाद्यः। कुरुनादिभ्यो ण्यः
४।१।१७२। कौरव्यः। नैषध्यः। स नैषधस्यार्थपतेरित्यादौ तु शैषिकोऽण्। साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ्। ४।१।१७३। साल्वो
जनपदस्तदवयवाश्च उदुम्बरादयस्तेभ्यः। प्रत्यग्रथादिभ्यस्त्रिभ्यश्च इञ्स्यादणोऽपवादः। औदुम्बरिः। प्रात्यग्रथिः। कालकूटिः। आश्मकिः। राजन्यप्येवं
ते तद्राजाः। ४।१।१७४। अञादय एतत्संज्ञाः स्युः। तद्राजस्य बहुषु तेनैवास्त्रियाम्। २।४।६२। बहुत्वेऽर्थे तु तद्राजस्य लुक् स्यात्तदर्थकृते बहुत्वे न तु स्त्रि-
याम्। इक्ष्वा क्वाकवः पञ्चाला इत्यादि। कथं तर्हि कौरव्याः पशवः। तस्यामेव रघोः पाण्ड्या इति। कौरव्ये पाण्ड्ये च साधव इति समाधे-
यम्। रघूणामन्वयं वक्ष्ये निरुध्यमानां यदुभिः कथंचिदिति तु रघुयदुशब्दयोस्तदपत्ये लक्षणया। कम्बोजाल्लुक्। ४।१।१७५। अस्मात्तद्राजस्य
लुक्। कम्बोजः। कम्बोजौ। कम्बोजादिभ्य इति वक्तव्यम्। चोलः। शकः। [illegible] लुक्। केरलः। यवनः। अञो लुक्। कम्बोजाः समरे इति पाठः सुगमः।
[illegible]दिपाठे तु कम्बोजोऽभिजनो येषामित्यर्थः॥

ते। तद्राजप्रत्ययार्थेन कृते इत्यर्थः। तेनैवेति। प्रियपंचालाः साधव इति। तथा च तत्र साधुरिति यत्प्रत्ययस्य
तद्राजत्वाभावाल्लुगिति भावः॥ रघुयदुशब्दयोर्जनपदवाचित्वाभावात्ताभ्यां परस्य तद्राजसंज्ञा नेति लुकोऽप्रवृत्त्या राघवाणां यादवैरित्येव भवितव्यमित्याशंक्याह रघुयदु
शब्दयोरिति। लक्षणयेति॥ ततश्चार्शआदित्वादपत्यप्रत्ययो नात्रोत्पन्न इति भावः। कंबोजाल्लुक्। तद्राजस्य बहुष्विति प्रकरणे बहुत्वे न कृतं द्व्येकार्थवाचकस्याञो लुक् भा

कु.न.
सि.कौ.
टी.त.
२६

मंवित क्रुआनामिति। किमनेन यौधेयादिग्रहणेन। सत्यं। व्याप्तिन्यायेन पांचमिकस्यापीह ग्रहणमिति ज्ञापयितुं यौधेयादिग्रहणं तेन पार्श्वाद्यणः स्त्रियां लुकि सिध्यति॥ तथा हि पर्शुः क्षत्रियो जनपदेन समानशब्दस्तस्यापत्यं स्त्री द्व्यञ्मगधेत्यण् तस्यातश्चेति लुक्। पुनः पार्श्वादिलक्षणः स्वार्थिको ण् तस्यापि लुक्यूङ्ः। पर्शूः। एवं रक्षसः क्षत्रियस्यापत्यं स्त्री रक्षाः। पूर्ववद्णद्वयस्यापि लुक्त्वे सन्तस्येति दीर्घः। उक्तं च वार्त्तिककृता पर्श्वादिभ्यो लुग्वक्तव्यः। यौधादिप्रतिषेधो वा ज्ञापकः पार्श्वादिलुक इति। यौधेयीत्यादि। युधायाः श्रुत्कारा अपत्यं स्त्रीति विग्रहः॥ ॥ अणिञोः॥ उक्तममिति। अव्युत्पन्नं श्चाति पदादिकमिदं न तु ठव्यादीनमपि। तेन किमेत्ति ङ्यपचादित्यामूनशंक्यः। गोत्रे यावित्ति॥ अपत्याधिकारादन्यत्र लौकिकं गोत्रमिति नेह शास्त्रीयं गृह्यते॥ तथा चानार्षयोरिति पर्युदासाद्देव सिद्धे गोत्रग्रहणमिह त्यक्तुं शक्यं। न चात्र गोत्रग्रहणसामर्थ्यात् शास्त्रीयमेव गोत्रं गृह्यत इति वाच्यं। दैवदत्यायाज्ञदंत्येत्यादीनां तरापत्येपीष्यमाणत्वादतरावानुपदं वक्ष्यति कुमुदगंधेरपत्यं स्त्री कौमुदगंध्येति। इदं च कौसुभा

अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे ४।१।७८ ।त्र्यादीनामन्त्यमुत्तमं तस्य समीपमुपोत्तमम्। गोत्रे यावणिञौ विहितावनार्षौ तदन्तयोर्गुरूपोत्तमयोः प्रातिपदिकयोः स्त्रियां ष्यङादेशः स्यात्। निर्दिश्यमानस्यादेशा भवन्तीत्यणिञोरेव ष्यङाविति। यङश्चाप्। कुमुदगन्धेरपत्यं स्त्री कौमुदगन्ध्या वाराह्या। अनार्षयोः किम्। वासिष्ठी वैश्वामित्री। गुरूपोत्तमयोः किम्। औपगवी जातिलक्षणो ङीष्। गोत्रे किम्। अहिच्छत्रे जाता आहिच्छत्री॥ ॥

नुसारि व्याख्यानमत्रत्यमूलानुगुणमपि दैवयज्ञिसूत्रस्थेनागोत्रार्थमिदमित्यादिमूलग्रंथेन सह विरुध्यत इति तत्रैव स्फुटीभविष्यति। यद्यपि स्त्रीप्रत्ययाः प्रकृतास्तथापि प्रत्ययनीयसंयोग इति नकारस्यैव ष्यङ आदेशत्वमेवोचितं॥ अणिञोरिति षष्ठी स्वरसादित्यभिप्रेत्याह ष्यङादेशः स्यादिति। ष्यङः प्रत्ययत्वेपि लक्ष्यसिद्धिः प्रत्यूहेति मनोरमायां स्थितं। न च यङि चेत्यंतादेशं बाधित्वा परत्वात्सर्वादेशः स्यात् ङिच्चेत्यस्यानन्त्यार्थङित्वे चरितार्थत्वात्। ष्यङोनुबंधस्य यङश्चाबिति विशेषणार्थतया सप्रयोजनत्वादित्याशंक्याह निर्दिश्यमानस्येति ष्यङाविताविति॥ अनुबंधद्वयकरणं ष्यङ इव ष्यङोपि यङश्चाबित्यत्र सामान्यग्रहणार्थं। न च ष्यङः संप्रसारणमित्यत्र विशेषणार्थं सरूपयोगोत्स्यन्यथा पाप्यापुत्रः प्राप्यामतिरित्यत्र मा शादिभ्योयइति प्रत्ययेपि संप्रसारण

प्रसंग इति वाच्यं पङः संप्रसारणमित्यकारव्यवधानापि तद्वारणात् लोलूपापतिरित्यत्र त्वकारप्रत्ययेनव्यं— वधानात्संप्रसारणाभावः कौमुदगंधीपुत्र इत्यत्र लकारे शास्
पूर्वान्तत्वेन ग्रहणान्न संप्रसारणमिति संप्रसारणं सिद्ध्यति कौमुदगंध्येति अणः ष्यङ् वाराह्येति इञः ष्यङ् अणिञोः किम् ऋतभागस्यापत्यमार्तभागी
विदादित्वा [illegible] इति ङीन्न टिड्ढेत्यादिना ङी विति तु वृत्तिकारः अणिञोरित्यत्र लौकिकं गोत्रं गृह्यते गोत्रं च चरणैरित्यत्र तु पारिभाषिकमेव गृह्य
ते [illegible] त्वाभावान्ङीनः पाणिनी स्त्रीति स्थि तस्य गतिमाह ॥ ॥ गोत्रावयवात् अवयवशब्दोऽप्रधानवाची अवयवश्चासौ गोत्रं चेति कर्मधारयः नि
पा[illegible] माद्गोत्रशब्दस्य पूर्वनिपातः गोत्राभिमता इति गोत्रमित्येवमभिमताः गोत्रवाचित्वेन देशविशेषे प्रसिद्धाः न तु प्रवराध्याये पठिता इत्यर्थः प्रवराध्याये पाठाच्चाभावा
त्वं कुलाख्या इति कुलमाख्यापयते यैरिति कुलाख्याः पुणिकभुणिकमुखरप्रभृतयः तैर्हि कुलमाख्यापयते पुणिकावयं गोत्रेण भुणिकावयं गोत्रेणेति तत इति गो
त्रावयवात् ॥४।१।७९॥ गोत्रावयवा गोत्राभिमताः कुलाख्यास्ततो गोत्रे विहितयोरणिञोः स्त्रियां ष्यङादेशः स्याद् अगुरूपोत्तमार्थ आरम्भः। पौ
णिक्या। भौणिक्या। कौड्यादिभ्यश्च ॥४।१।८०॥ स्त्रियां ष्यङ् प्रत्ययः स्यात्। अगुरूपोत्तमार्थोऽनणिञर्थश्चारम्भः। कौड्या। व्याड्या। सूतयुवत्या
म्। सूत्या। भोजक्षत्रिये। भोज्या॥ दैवयज्ञि शौचिवृक्षि सात्यमुग्रि काण्ठेविद्धिभ्योऽन्यतरस्याम् ॥४।१।८१॥ एभ्यश्चतुर्भ्यः ष्यङ्वा। गोत्रार्थमिदं। गोत्रेपि
—परत्वात्प्रवर्तते। पक्षे इतो मनुष्यजातेरिति ङीष्। दैवयज्ञ्या। दैवयज्ञी॥ इत्यपत्याधिकारः॥ ॥ ९ त्रावयवादित्यर्थः कौड्यादिभ्यश्च पंचमीनिर्देशान्न
त्यप्रत्ययमेवाहुः श्रीपतिस्त्वाह ष्यङ् प्रत्यय इति कौडि व्याडि आपि[illegible]लि गौकक्ष्य इत्यादि गौकक्ष्यशब्दो गर्गादिषु अतस्तदर्थमाह अनणिञर्थश्चेति सूतेति गण
सूत्रं मृत[illegible] ष्यङ् [illegible] वान्वाख्यायामित्यर्थः सूत्येति ष्यङ् [illegible] अन्यत्र तु क्रियाशब्दात् टाप् सूतजातिवाचिनस्तु ङीष् सूती भोजेति इदमपि गणसूत्रं
जातिलक्षण[illegible]पवादः ष्यङ् क्रियाशब्दात्तु टापेव भोजयती [illegible] भोजा दैवयज्ञि चतुर्भ्य इति इञन्तेभ्य इति शेषः देवयज्ञस्यापत्यस्य सदेवयज्ञः शुचिवृक्षो
यस्य [illegible] सात्यमुग्रयस्य सात्यमुग्रः निपातनाद्धिशब्दस्य पूर्वनिपातः मुमागमश्च कांडेनविद्धः काण्डेविद्धः कर्तृकरणे कृतेति समासः निपातनात्कांडश
ब्दस्य [illegible]कारः पाठान्तरे कण्ठेविद्धमस्य कण्ठेविद्धः काण्ठेविद्धिः अमूर्द्धमस्तकादित्यलुक् एभ्यः सर्वेभ्यो अपत्ये अत इञ् गोत्रेपि परत्वादिति तथा चोभयत्र विभाषे

अत्रेदमवधेयं अलिञ्जोरिति सूत्रे यदि शास्त्रीयं गोत्रं गृह्यते तदा अगोत्रार्थमिदमित्यादिग्रंथः स्वरसतः संगच्छते यदि तु लौकिकं गोत्रमेव तत्र गृह्यते तदा अलिञ्जोरिति
नित्ये प्राप्ते विकल्पार्थमिदमित्येव व्याख्यातुमुचितमिति॥ ॥ इत्यपत्याधिकारः॥ ॥ तेन रक्तं तृतीयांतात्समर्थाद्रक्तमित्यर्थे यथाविहितं प्रत्ययाः स्युः रज्यते अनेनेति बाहु
लकात्करणे घञ् रागइति रंजकद्रव्यमित्यर्थः शुक्लस्य वर्णान्तरापादनमिह रंजेरर्थः लाक्षारोचनात् वृत्तिकृता तु वार्त्तिकस्थौ शाकलकर्दमौ सूत्रे प्रक्षिप्तौ शकलं
त्वचि खण्डे चर्मणि वल्कलेऽस्त्री शकले इति विश्वः वृत्तिकार इति भाष्ये तु नैतद्दृष्टमिति भावः नील्येति नीली ओषधिविशेषः अणपवादोऽयं नक्षत्रेण नक्षत्रवाचकाः शब्दा
वृत्तिविषये तद्युक्ते चन्द्रमसमभिदधानाः प्रत्ययं लभंते पुष्येणेति पुष्यसमीपस्थेन चन्द्रमसेत्यर्थः एवं च पौषमहरित्यादिव्यवहारः संगच्छते सर्वेषामप्यन्हां पुष्ययो

तेन रक्तं रागात्।४।२।१॥ रज्यतेऽनेनेति रागः। कषायेण रक्तम्वस्त्रं। काषायं। माञ्जिष्ठं। रागात्किं। देवदत्तेन रक्तम्वस्त्रं॥ लाक्षारोचनाट्ठक्।४।२।२॥
लाक्षिकः। रौचनिकः। शाकलकर्दमाभ्यामुपसंख्यानम्॥ शाकलिकः। कार्दमिकः। आभ्यामणपीति वृत्तिकारः। शाकलः। कार्दमः। नील्या अन्॥ नी
ल्या रक्तं नीलम्। पीतात्कन्॥ पीतकं। हरिद्रामहारजनाभ्यामञ्॥ हारिद्रं। माहारजनं। नक्षत्रेण युक्तः कालः।४।२।३॥ पुष्येण युक्तम्। पौषम
हः। पौषी रात्रिः। लुबविशेषे।४।२।४॥ पूर्वेण विहितस्य लुप्स्यात्। षष्टिदण्डात्मकस्य कालस्यावान्तरविशेषश्चेन्न गम्यते। अद्य पुष्यः। कथन्त
र्हि पुष्ययुक्ता पौर्णमासी पौषीति। विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्य इति निर्देशेन पौर्णमास्यामयं लुब्नेति ज्ञापितत्वात्। श्रवणशब्दात्तु अ
नेतरवलुप्। युक्तवद्भावाभावश्चाऽऽवाधकान्यपि निपातनानि श्रावणी। संज्ञायां श्रवणाश्वत्थाभ्याम्।४।२।५॥ विशेषार्थोऽयमारम्भः। श्रवण
रात्रिः। अश्वत्थ्या मुहूर्त्तः। संज्ञायां किं। श्रावणी। आश्वत्थी॥ ॥

गसत्त्वेपि तत्समीपस्थचन्द्रमसा योगस्यासार्वत्रिकत्वात् नक्षत्रेण
तिकिम् अर्द्धेन युक्ता रात्रिः कालः किं पुष्येण युक्तश्चंद्रः लुबवि पूर्वसूत्रस्यानुवर्त्तनादिह नक्षत्रेण युक्तस्य कालस्याविशेषे गम्ये इत्यर्थो लभ्यते तेनाह षष्टिदण्डे
ति अद्यपुष्य इत्युक्त्या नक्षत्रयोग इति विशेषे गम्यमानेपि अहोरात्रात्मककालस्यावांतरविशेषानवगमाल्लुब्भवत्येवेति भावः अविशेष इत्यत्र प्रसज्यप्रतिषेधाश्रय
णात्पौषा अहोरात्रा इत्यत्र लुन्न भवति षष्टिदंडसमुदायरूपकालस्य प्रतीतावप्यवयवद्व्यात्मकस्य विशेषस्य प्रतीतेरित्याशयेनाह विशेषश्चेन्नेति अद्यपुष्य

मूलेनावाहयेद्देवीं श्रवणेनेत्यप्युदाहरणं बोध्यम्॥ ॥ द्वन्द्वाच्छः विशेषेउदाहरणमाह तिष्येत्यादि अविशेषेणोदाहर्तव्यम् अराधानुराधीयमिति न चात्र लुब्विशेष

इति अणं द्वन्द्वच्छस्यापि लुप्स्यादिति वाच्यं मध्येपवादन्यायेनास्यापूर्वोपस्थितस्याण एव तत्प्रवृत्तेः यत्तु लुबं परत्वाद्बाधते इति वृत्तिकृतोक्तं तन्न द्वयोर्युगपत्प्राप्त्य

भावात् दृष्टं साम तृतीयान्ताद्दृष्टमित्यर्थेऽणादयः स्युर्यद्दृष्टं तच्चेत्साम अस्मिन्नर्थे इति तथा च श्लोकवार्तिकं दृष्टे सामनि जाते वाप्यण्डिद्द्विर्वा विधीयते तीयादी

कक्[illegible]यागोत्रादंकवदिष्यत इति जातेर्थे योद्विरण् स च वा डिदित्यत्र यः शतभिषजि जातः शातभिषः शातभिषजः इह हि प्राग्दीव्यत इति प्राग्दीव्यतोऽण् काला

ठ्ञा बाधितः स च संधिवेलादिसूत्रेणानुप्रसूयत इत्यर्थः द्विरुक्तोण तीया इति तीयादीकक् स्वार्थे भवतीत्यर्थः द्वैतीयीकः तार्तीयीकः न विद्याया इति विद्या

द्वन्द्वाच्छः॥४।२।६॥ नक्षत्रद्वन्द्वाद्युक्ते काले छः स्यात्। विशेषे सत्यसति च। तिष्यपुनर्वसवीयमहः। राधानुराधीया रात्रिः। दृष्टं साम।४।२।७

तेनेत्येव। वसिष्ठेन दृष्टं वासिष्ठं साम। अस्मिन्नर्थेऽण्डिद्वा वक्तव्यः॥ उशनसा दृष्टं औशनसं। औशनं। कलेर्ढक्॥४।२।८॥ कलिना दृष्टं का

लेयं साम। वामदेवाड्ड्यड्ड्यौ।४।२।९॥ वामदेवेन दृष्टं साम वामदेव्यं। सिद्धे यस्येति लोपेन किमर्थं ययतौ डितौ। ग्रहणं मातदर्थे भूद्वामदेव्यस्य

नञ्स्वरे॥ परिवृतो रथः।४।२।१०॥ वस्त्रैः परिवृतो वास्त्रो रथः। रथः किं। वस्त्रैः परिवृतः कायः। समन्ताद्वेष्टितः परिवृत उच्यते। तेनेह न। छात्रैः परि

वृतो रथः। पाण्डुकम्बलादिनिः।४।२।११॥ पाण्डुकम्बलेन परिवृतः। पाण्डुकम्बली। पाण्डुकम्बलशब्दो राजास्तरणपाण्डुवर्णकम्बलस्य वाचकः। समासपर्याये

णैव सिद्धे वचनमणो निवृत्त्यर्थम्। द्वैपवैयाघ्रादञ्।४।२।१२॥ द्वीपिनो विकारः। द्वैपम्। तेन परिवृतो द्वैपो रथः। एवं। वैयाघ्रः॥ ॥ ॥

वाचकात्तीयान्ता[illegible]कन्न भवतीत्यर्थः द्वितीया विद्यागोत्रादंकवदिति गोत्रप्रत्ययान्तादङ्के यः प्रत्ययः स दृष्टे सामन्यपि भवति औपगवेन दृष्टं औपगवकम् इह गोत्र

चरणाद्वुञ्[illegible] वामदेवात ग्रहणमतदर्थ इत्यादि अतदर्थे ययतोश्चातदर्थे इति विहितेन नञ्स्वरेण नाश्रितस्वरे ड्यड्यतोर्ग्रहणं माभूदित्यर्थः ययतोश्चेति सू

त्रेणा[illegible]द्यमाननञः परस्य यत्पदं तस्यान्तरपदस्यान्तोदात्तत्वं वामदेव्यशब्दे[illegible]किं तव्ययपूर्वपदस्वरत्वं यथा स्यादित्येतदर्थोऽडित्करणमिति फलितोऽर्थः नञ्

कृते[illegible]डित्वे ययतोरित्यस्य प्रवृत्तिः कुतो नेति शंक्यं निरनुबंधकग्रहणे न सानुबंधकस्य तदनुबंधकग्रहणे नातदनुबंधकस्येति परिभाषयोस्सत्वात् इमे च परि

सि·कौ·
टी·त·
सु·त·
९८

मि,स्र इहैव डित्वेन ज्ञाप्यते तत्रायाथाः प्रयोजनं पूरणगुणेति सूत्रेन तव्यं ग्रहणेन तव्यतो ऽयहणं ह्वितीयस्याणअडु·ग्रहणे चडौ ऽग्रहणं श्चयतेरः आङ्·परेइतिशेषः अश्वतचडि·परं तुन
अन्गिष्टिप्रत परि वृतो तृतीयां तात्परि वृत इत्यर्थः ऽणादयः स्युर्यः परिवृतः स चेडुयो भवति यथा व्छादनार्थयदुरत्वे कवलादिकं तत् तएव सर्ववेष्टनं भवति न तुच्छ
त्रादिभ्यैः ··· ण्यत्येनाह समन्ताद्वेष्टित इतिपरिः सर्वतो भावे वर्तत इति भावः॥ ॥ कौमारातेनेतिनिवृत्तं अपूर्व इतिभावप्रधानो निर्देश इत्याह अपूर्वत्वे इति।
अपूर्वत्वं तु स्त्रिया एवेष्यते पुरुषस्तु अपूर्वभार्यो स्तु वामावेत्यनाग्रहः अपूर्वपतिः क्षिति नपूर्वपतिर्यस्या इति वहुव्रीहिः कौमारः पतिरि ति द्वितीयां तात्कुमारी
शब्दादुपयंतरि प्रत्ययः कौमारीति इह कुमारीशब्दात्प्रथमां तात्स्वार्थे प्रत्ययः टिड्ढ, णि,तिङीप् तत्रोद्धृत सास्मिन्पौर्णमासी ति सूत्रात्प्राक् तत्रेत्यधिकारः पात्रवा

कौमारापूर्ववचने।४।२।१३॥ कौमारेत्यविभक्तिको निर्देशः। अपूर्वत्वे निपातनमिदं। अपूर्वपतिं कुमारी रुपपन्नः। कौमारः पतिः। यद्वा।
अपूर्वपतिः। कुमारी पतिमुपपन्ना। कौमारी भार्या। तत्रोद्धृतममत्रेभ्यः।४।२।१४॥ शरावे उद्धृतः। शारावः ओदनः। उद्धरतिरिहोद्धरणपूर्वके
निधाने वर्तते। तेन सप्तमी उद्धृत्य निहित इत्यर्थः। स्थण्डिलाच्छयितरि व्रते।४।२।१५। तत्रेत्येव समुदायेन चेद्व्रतं गम्यते। स्थण्डिले शयितुं नियमोऽस्य
स्थाण्डिलो भिक्षुः॥ संस्कृतं भक्षाः।४।२।१६॥ सप्तम्यन्तादण् स्यात् संस्कृते ऽर्थे यत्संस्कृतं भक्षाश्चेत्ते स्युः। भ्राष्ट्रे संस्कृताः। भ्राष्ट्राः। अष्टसु क
पालेषु संस्कृतः। अष्टाकपालः। पुरोडाशः। शूलोखाद्यत्।४।२।१७॥ अणोऽपवादः। शूले संस्कृतं। शूल्यं मांसं। उखा पात्रविशेषः। तस्यां सं
स्कृतं। उख्यम्। दध्नष्ठक्।४।२।१८॥ दध्नि संस्कृतं। दाधिकं। उदश्वितोऽन्यतरस्याम्।४।२।१९॥ ठक् स्यात् पक्षेऽण्॥ ॥

··· भ्यः सप्तम्यन्तेभ्य उद्धृतमित्यर्थे यथाविहितं प्रत्ययाः स्युः शारावइति भुक्तोच्छिष्ट इत्यर्थ इति वृत्तिकृत् अवशिष्ट इति तदर्थः उच्छिनष्टि नसर्वं जहातीतिक
स्य सूत्रस्य वहागत समस्तं ··· निधानक्रियापेक्षया अधिकरणत्वादिति भावः स्थाण्डिलात् व्रतं शास्त्रेण विहितो नियमः तस्मिन्समुदायेन गम्ये सप्तम्य
न्ताद्यथाविहितः प्रत्ययो भवति शयितर्यर्थे अष्टाकपाल इति द्विगोर्लुगनपत्य इत्यणो लुक् शूलोखा संस्कृतं भक्षा इत्यनुवर्तते कथमुख्योऽग्निरिति नत्वयं सोऽभ
क्ष इति चेदत्राहुः दिगादित्वाद्भवार्थे यदिति दध्नष्ठक् दध्नीति संस्कारस्त्विह लवणादिना दधित्वाधिकरणमात्रं यत्तु प्राग्वहतेरित्यत्र संस्कृतमिति ठग्वक्ष्यते सतृतीयान्तो

साऽस्य देवतेति प्रकृतं संज्ञासंबद्धमिति पुनः साग्रहणं कृतमित्याहुः इहैव सूत्रे निपातनाद्देवशब्दात्स्वार्थे तल् मंत्रस्तुत्येति मंत्रेण स्तुत्या एतिस्तुशास्वित्यादिना क्यप् पितुक् टाप् आ
नेनावेक्ष्यस्त्वादिति इहाम्युद्देशेन ब्राह्मणो न त्यज्यत इति कथमयं प्रयोग इति न शंक्यं इति भावः परत्वादादिवृद्धिरिति इदं च समाधानं श्रायमित्यत्रावश्यकमिति तेनैव
परिहारः सेः वादित्वविधानसामर्थ्यमिह नाश्रितं उक्तरूपमिति नपादित्यस्य नप्तृ इति रूपमित्यर्थः शतंरुद्रा इति शतशब्दोऽनंतवचनः सोमीति हलस्तद्धितस्येति

सास्य देवता॥ ४।२।२४॥ इन्द्रो देवताऽस्येति ऐन्द्रं हविः। पाशुपतं। बार्हस्पत्यं। त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता। मन्त्रस्तुत्या च। ऐन्द्रो मन्त्रः। आग्नेयो
वै ब्राह्मणो देवतयेति तु गौणोऽर्थः सर्वत्राग्नीति ढक्। कस्येत्॥ ४।२।२५॥ कशब्दस्य इकारादेशः स्यात्प्रत्ययसन्नियोगेन। यस्येति लोपात्परत्वादादिवृ-
द्धिः। कायं हविः। श्रीर्देवताऽस्य। श्रायं। शुक्राद्घन्॥ ४।२।२६॥ शुक्रियं। अपोनप्त्रपान्नप्तृभ्यां घः॥ ४।२।२७॥ अपोनप्त्रियम्। अपा-
न्नप्त्रियं। अपोनपात् अपान्नपाद्वा देवता प्रत्ययसन्नियोगेन तु कृतं रूपं निपात्यते अत एवापोनपाते। अपान्नपाते नु ब्रूहीति प्रैषः। छ च॥ ४।२।२८॥ योगवि-
भागो यथासंख्यनिवृत्त्यर्थः। अपोनप्त्रीयं। अपान्नप्त्रीयं। शतरुद्राद्घश्च। चाच्छः। शतरुद्रा देवताऽस्य शतरुद्रियं शतरुद्रीयं घच्छयोर्विधानसामर्थ्याद्द्विगोर्लुगनपत्ये इति
न लुक्। महेन्द्राद्घाणौ च॥ ४।२।२९॥ चाच्छः। महेन्द्रियं हविः। माहेन्द्रं। महेन्द्रीयं। सोमाट्ट्यण्॥ ४।२।३०॥ सौम्यं। टित्वात् ङीप्। सौमी। हलस्तद्धितस्येति यलोपः। वाय्वृतुपि-
त्रुषसो यत्॥ ४।२।३१॥ वायव्यं। ऋतव्यं। रीङृतः॥ ७।४।२७॥ अकृद्यकारे असार्वधातुके यकारे च्वौ च परे ऋदन्ताङ्गस्य रीङादेशः स्यात्। यस्येति च। पित्र्यं।
उषस्यं॥ द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च॥ ४।२।३२॥ चाद्यत्। द्यावापृथिवीयं। द्यावापृथिव्यं॥ शुनासीरीयं। शुनासी-
र्यं। अग्नेर्ढक्॥ ४।२।३३॥ आग्नेयः।

यलोपः। रीङृतः अंगवृत्तपरिभाषया अकृत्सार्वेति दीर्घो न प्रवर्तत इति दीर्घग्रहणमित्याहुः यस्येति चेति। पित्रीयमनीम॥
ऋ रीङ्विधिः सावकाश इति भावः उषस्यमिति उषसशब्दः स्त्रीलिंगो दिवो दुहितरं देवतां ब्रवीति। द्यावापृ अणण्ययोरपवादः शुनासीरीयमिति शुनश्च सीरश्चेति द्वन्द्वे
देवताद्वन्द्वे चेत्यानङ् शुनो वायुः सीर आदित्य इति वृत्तिकृता। हरदत्तस्तु शुनासीरशब्द इन्द्रस्य गुणवाचीत्यन्ये मन्यंत इत्याह तथा च मंत्रः इन्द्रं वयं शुनासीरमस्मिन्यज्ञेह

वामहइति मरुतोऽस्य संतीति मरुत्वानिंद्रः मरुत्वतीयं मरुत्वत्यं अग्नीषोमीयं अग्नीषोम्यं ईद्ग्नेस्सोमवरुणयोः वास्तुनः पतिः वास्तोष्पतिः इहैव सूत्रे निपातनात्साधुः वेश्वम
भूर्वास्तुरस्त्रियां वास्तोष्पतीयं वास्तोष्पत्यं गृहमेधीयं गृहमेध्यं गृहमेधशब्दोऽकारान्तस्तथा च आश्वलायनः मरुद्भ्यो गृहमेधेभ्य इति॥ ःः॥ कालेभ्यो कालवाचि
भ्यो ये प्रत्यया भवार्थे दृष्टास्तेऽस्य देवतार्थे त्यस्मिन्नर्थेऽनेनातिदिश्यन्ते वत्करणं सर्वसादृश्यार्थं तेन यस्माद्यो विहितस्ततस्तस्मादेव भवति नान्यः तथैवोदाहरति
मासिकं प्रावृषेण्यमिति कालाट्ठञ् प्रावृष एण्यः ठामहञिति एतच्च वृत्त्याद्यनुरोधेनोक्तं भाष्ये तु आनङो देशो महच्च प्रत्ययश्च निपात्यते तेनावग्रहः सीध्यतीत्युक्तं

कालेभ्यो भववत्।४।२।३४॥ मासिकं। प्रावृषेण्यं॥ महाराजप्रोष्ठपदाट्ठञ्।४।२।३५॥ महाराजिकं। प्रोष्ठपदिकं॥ देवताद्वन्द्वे च।७।३।२१।अ
त्रपूर्वोत्तरपदयोराद्यचो वृद्धिः स्यात् त्रितिलितिकिति च परे। आग्निमारुतं। नेन्द्रस्य परस्य।७।३।२२। परस्येन्द्रस्य वृद्धिर्न स्यात्। सौमेन्द्रः। परस्य किं।
ऐन्द्राग्नः। दीर्घाच्च वरुणस्य।७।३।२३। दीर्घात्परस्य वरुणस्य न वृद्धिः। ऐन्द्रावरुणं। दीर्घात्किं। आग्निवारुणीमनड्वाहीमालभेत। नतस्मिन्वर्ते
तइति। नवयज्ञादिभ्य उपसंख्यानं। नावयज्ञिकः कालः। पाकयज्ञिकः। पूर्णमासादण् वक्तव्यः। पूर्णमासोऽस्यां वर्ततेइति पौर्णमासी तिथिः।
पितृव्यमातुलमातामहपितामहाः।४।२।३६॥ एते निपात्यन्ते। पितुर्भ्रातरि व्यत्। पितुर्भ्राता। पितृव्यः। मातुर्डुलच्। मातुर्भ्राता। मातुलः। मातृपि
तृभ्यां पितरि डामहच्। मातुः पिता। मातामहः। पितुः पिता। पितामहः। मातरि षिच्च। मातामही। पितामही। अवेर्दुग्धे सोढदूसमरीसचो वक्त
व्याः। सकारपाठसामर्थ्यान्न षः। अविसोढं। अविदूसं। अविमरीसं। तिलान्निष्फलात् पिञ्जपेजौ। तिलपिञ्जः। तिलपेजः। वंध्यस्तिल इत्यर्थः। पिञ्जश्छन्द
सि डित्वं। तिलिञ्जं। तस्य समूहः।४।२।३७। काकानां समूहः। काकं। वाकं॥ १९ सकारपाठेति अन्यथा प्रक्रियालाघवाय षकारमेव पठेदिति भावः

तच्च नेत्स्मापांस्थितं अन्ये तु कृते त्वा अविसोढमित्यत्र षत्वनिवारणेऽप्यविदूसमित्यादौ स्यादेव षत्वं तत्र हि ण्यन्तात्क्विप्यविदूरित्यादिरूपसिद्धये सकारपाठसामर्थ्य
स्योपक्षीणत्वात् तस्मादविसोढमित्यादिभाष्यकृदुदाहरणेषु सकारपाठसामर्थ्यादिति व्याख्येयमित्याहुः तस्य समूहः इहाचित्ताट्ठक् मनुष्यराजादेरभ्रं गोत्रान्ताद्वुञ्
केदाराद्यञ्चेत्यादिना प्रतिपदं यत्रादींश्च वक्ष्यति तथा च चित्तवदाद्युदात्तगोत्रान्तप्रतिपदोक्तप्रत्ययरहितमिहोदाहरणमित्याशयेनोदाहरति काकं वाकमिति एवं वा

पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च सूत्रेण ह्युदात्ताः प्रातिवाचिनो ये आदिभूताः कवर्गात्पूर्वं तेषामुदात्तः स्यादिति सूत्रार्थः अथादि प्राक्शक
र्ककाकवकवृकशब्दाः प्रातिनो कुपूर्वाणामिति फिट्सूत्रेण ह्युदात्ताः प्रातिवाचिनो ये आदिभूताः कवर्गात्पूर्वं तेषामुदात्तः स्यादिति सूत्रार्थः ॥ ःः ॥ भिक्षादिभ्योऽण् भैक्षमिति ।
टोः स्थिकारात् यत्तु वृत्तिन्यासयोः शौकमित्युदात्तं तत्तद्युपेक्ष्यं खण्डिकादिषु शुकशब्दस्य पाठात्तत्रोञाभाव्यमिति हरदत्तादयः ॥ भिक्षादिभ्योऽण् भैक्षमिति ।
अपितित्वोद्भवत्वात् गार्भिणमिति अनुदात्तादित्वादञ्यासः सति हि तस्मिन्नाद्युदात्तत्वे टिलोपो स्यात्तां न च भस्याढ इति पुंवाचकरूपातिदेशान्न टिलोपः स्यादिति वा
च्यं हस्तिनीनां समूहो हास्तिकमित्यत्रापि टिलोपापातेः तस्मात् स्त्रीप्रत्ययनिमित्तमात्रपरं तत्तन्नतु रूपातिदेशकमिति बोध्यं यौवनमिति युवतिशब्दस्यानुदात्ता
दित्वादञि प्राप्ते अण् भिक्षादिषु पाठः पुंवद्भावात्तिप्रत्ययनिवृत्तिः अन्तिति प्रकृतिः । नतु भस्याढ इत्यत्राढे तद्धिते विवक्षिते पुंवद्भावः स्यात् युदात्तादित्वात्तेः
भिक्षादिभ्योऽण् । ४ । २ । ३८ ॥ भिक्षाणां समूहो भैक्षं । गार्भिणीनां समूहः गार्भिणं । इह भस्याढ इति पुंवद्भावे कृते । इनण्यनपत्ये । ६ । ४ । १६४ ।
अनपत्यार्थेऽणि परे इन् प्रकृत्या स्यात् । तेन नस्तद्धित इति टिलोपो न । युवतीनां समूहः । यौवनं । अत्र नाद्युदात्तादेरञि । यौवतं । गोत्रोक्षोष्ट्रोरभ्र
राजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ् । ४ । २ । ३९ ॥ एभ्यः समूहे वुञ् स्यात् । लौकिकमिह गोत्रं । तच्चापत्यमात्रं । युवेरनाके । अथ एषु वुवुञ्तयोर
नुनासिकयोः कुमारेन अकृते तादृशः । ग्लुचुकायनीनां समूहः । ग्लौचुकायनकं । औक्षकमित्यादि । आपत्यस्येति लोपे प्राप्ते । प्रकृत्याऽके ।
राजन्यमनुष्ययुवानः । राजन्यकं । मानुष्यकं । वृद्धाच्चेति वक्तव्यम् ॥ वार्द्धकं । केदाराद्यञ्च । ४ । २ । ४० ॥ चाद्वुञ् । कैदार्यं । कैदारकं । गणिकायाय
ञिति वक्तव्यम् । गाणिक्यं । ठञ्कवचिनश्च । ४ । २ । ४१ ॥ चात्केदारादपि । कवचिनां समूहः । कावचिकं । कैदारिकं ॥ टे प्रागेव निप्रत्ययनिवृत्तौ सत्यां
कनिष्ठवृद्धीति कनिनन्तनया आद्युदात्तत्वादण् सिद्ध एवेति चेत् सत्यं अत एव भाष्ये भिक्षादिषु युवतिशब्दपाठः प्रत्याख्यातः इह युवतिशब्दपाठसामर्थ्या
त्पुंवद्भावो नेति वृत्तिकारोक्तिः स्त एव निरस्ता नन्वेवं गार्भिणं यौवतं गणे इत्यादिप्रयोगा भाष्यमतेन संगच्छेरन्नित्याशंक्याह अत्रेत्यादि युवाँ समाहार इंद्रे सोत्रं पुं
स्त्वे उकारस्तूच्चारणार्थः नेत्संज्ञकः तेन नरन्नः कारकः नंदनाकारिकार इत्यत्रोगि न्लक्षणौ नुम्ङीपौ न स्तः अनुनासिकयोरिति किं उर्णायुः प्रकृत्याक इति इह राजन्य
मनुष्यग्रहणं व्यर्थं इहि शब्दत्वेन आपत्यस्य चेति यलोपस्य प्राप्त्यभावात् अत एव गोत्रोक्षोष्ट्रेत्यत्र तयोर्ग्रहणं सार्थकमन्यथा गोत्रग्रहणेनैव सिद्धे तयोर्ग्रहणं न कुर्यात्

दित्याहुः पूर्वोभावोयैव निकामनोक्तो दित्वाद्दुञ् वार्द्धकमिति यदि रहुत्वेपि वार्द्धकमिति प्रयोगोस्तितर्हि मनोज्ञादित्वं कल्पनीयमित्याहुः॥ ॥ ब्राह्मणमाणव नपुंत्रयो
ष्मीवृद्धास्तेभ्यः प्रकृतोयत्र वा मनुवृद्धा यनियत्रि वा रूपेविशेषाभावात् नापिस्वरे विशेषः उभयथाप्याद्युदात्तत्वात् स्त्रियां विशेषस्तु न शंक्य एव नपुंसकत्वात् यत्र

ब्राह्मणमाणववाडवाद्यन्॥४।२।४२॥ ब्राह्मण्यं माणव्यं वाडव्यं पृष्ठादुपसंख्यानम्॥ पृष्ठ्यम्। ग्रामजनबन्धुभ्यस्तल्॥४।२।४३॥ ग्रामता। जनता। बन्धुता। गजसहायाभ्यां चेति वक्तव्यम्॥ गजता। सहायता। अह्नः खः क्रतौ। अहीनः। अहर्गणसाध्यसुत्याकः क्रतुरित्यर्थः। क्रतौ किं॥ आह्नः। टिखण्डिकादित्वादञ्। अह्नष्टखोरेवेति नियमाट्टिलोपो न। पर्श्वा णस वक्तव्यः॥ सिति च॥१।४।१६॥ सितिपरे पूर्वं भसंज्ञं स्यात्॥ अभत्वादौ गुणो न। पर्शूनां समूहः। पार्श्वं। अनुदात्तादेरञ्॥४।२।४४॥ कापोतं। मायूरं। खण्डिकादिभ्यश्च॥४।२।४५॥ अञ् स्यात्। खण्डिकानां समूहः। खाण्डिकं। चरणेभ्यो धर्म्मवत्॥४।२।४६॥ काठकं। छान्दोग्यं। अचित्तहस्तिधेनोष्ठक्॥४।२।४७॥ साक्तुकं। हास्तिकं। धैनुकं। केशाश्वाभ्यां यञ्छावन्यतरस्याम्॥४।२।४८॥ पक्षे ठगणौ। कैश्यं। कैशिकं। अश्वीयं। आश्वं। पाशादिभ्यो यः॥४।२।४९॥ पाश्या। तृण्या। धूम्या। वन्या। वात्या। खलगोरथात्॥४।२।५०॥ खल्या। गव्या। रथ्या॥ इनित्रकट्यचश्च॥४।२।५१॥ खलादिभ्यः क्रमात् स्युः। खलिनी। गोत्रा। रथकट्या। खलादिभ्य इनिर्वक्तव्यः॥ डाकिनी। कुटुम्बिनी। आकृतिगणोयं॥ विषयो देशे॥४।२।५२॥ षष्ठ्यन्तादणादयस्स्युरत्यन्तपरिशीलितेर्थे स चेद्देशः॥ शिबीनां विषयो देशः शैबः। देशे किं। देवदत्तस्य विषयोऽनुवाकः॥ राजन्यादिभ्यो वुञ्॥४।२।५३॥ राजन्यकः॥ भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ॥४।२।५४॥ भौरिकीणां विषयो देशः। भौरिकिविधं। भौलिकिविधं। ऐषुकारिभक्तं। सारसायनभक्तम्॥ ॥

श्चेत्कार्थ यग्रहणाच्च ठञ् तु नानुवर्तिष्यते अस्मृतत्वादिति चेत् सत्यं अरहादपि कृतार्थश्चिद्विधानार्थे यत्नवचनं तत्सिद्धार्थानुवादकं वार्तिकमाह पृष्ठादिति प
पूर्ववत्र विशेषः पृष्ठ्यमिति पृष्ठानां समूहः पृष्ठ्यं षडह इति तु मत्वर्थलक्षणया बोध्यः ग्रामजन इति ज्ञातानुवार्तिकस्थसहायशब्दोपि सूत्रे प्रक्षिप्तः अनुदात्ता

र्थः प्रत्ययोर्धर्मवस्यंतेसतस्याः प्रकृते ३

आपूपिकं शाष्कुलिक मित्यादौ परत्वादचित्त हस्ति धेनोरिति ठगेवेत्याशयेनेह सूत्रे चित्तवत्तमुदाहरति कापोतमिति लघावन्त इति फिट् सूत्रेणाक् पोतमयूरशब्दौ म ध्योदात्तौ न च शकुनीनां चलघुपूर्वमित्याद्युदात्ता विभाविति शंक्यं अंत्यात्पूर्वं लघूदात्तमिति तत्र व्याख्यानादित्याहुः खण्डिका आद्युदात्तार्थमचित्ता द्वेकोवाधनार्थं च व चनं चरणेभ्यः यस्याः प्रकृतेस्समूहे पिस्यादित्यर्थः वुञादयो हि चरणेभ्यो वस्यंते तत्र चरणाद्धर्माम्नाययोरिति तु वार्तिकं तदप्यनेनैवाति देशसूत्रेणाप्यते काठकमित्यादि गोत्रचरणाद्वुञ् छंदोगौक्थिकेति ञ्यः यञ्छाविति यथासंख्यं सूत्रः द्वगणाविति केशाश्वाद्दचित्तत्वेनठक् विषयादेशे तस्येत्यनुवर्तत इत्याह षष्ठ्यन्तादिति विषयशब्दार्थमाह अत्यंतेति भौरिक्या आभ्यां गणाभ्यां यथासंख्यमेतौ प्रत्ययौस्तः भौरिकि विधमित्यादि क्लीवत्वं लोकात्॥ ॥सोस्यादि

सोऽस्यादिरितिच्छन्दसः प्रगाथेषु।४।२।५५॥ अण्। पङ्क्तिरादिरस्येति। पाङ्क्तः प्रगाथः। स्वार्थ उपसंख्यानम्॥ त्रिष्टुवेव। त्रैष्टुभं। संग्रामे प्रयोज नयोद्धृभ्यः॥४।२।५६॥ सोस्येत्यनुवर्तते। सुभद्रा प्रयोजनमस्य संग्रामस्येति। सौभद्रः। भरतायोद्धारोऽस्य संग्रामस्य। भारतः। तदस्यांप्रहरण मितिक्रीडायांणः।४।२।५७॥ दण्डः प्रहरणमस्यां क्रीडायां। दाण्डा। मौष्टा। घञः सास्यांक्रियेतिञः।४।२।५८॥ घञन्तात्क्रियावाचिनः प्रथमान्ता दस्यामिति सप्तम्यर्थे स्त्रीलिङ्गे ञप्रत्ययस्स्यात्। घञ इति कृद्ग्रहणाद्गतिकारकपूर्वस्यापि ग्रहणं। श्येनतिलस्य पाते ञे।६।३।७१। श्येनतिलएतयो र्मुमागमस्स्यात् ञप्रत्यये पातेपातशब्दे उत्तरपदे। श्येनपातोऽस्यां वर्तते श्यैनम्पाता मृगया। तिलपातोऽस्यां वर्तते तैलम्पाता स्वधा। श्येनतिलस्य किम्। दण्डपातोऽस्यांतिथौ वर्तते। दाण्डपाता तिथिः॥ ॥ ९९ रिति छंदोनामाक्षरेयत्तानिबंधनं पंक्त्यादिरिह विवक्षितः तदात्मकोत्यर्थमांतादस्ये त्यादिमत्रिप्रत्ययः स्याद आदिमान्स्तः प्रगाथश्चेत् प्रग्रथ्यत इति प्रगाथः ग्रंथसंदर्भे इत्यस्मादकर्तरि च कारक इति कर्मणि घञ् पृषोदरादित्वाद्ग्रफ नकारयोर्लोपः अन्ये तु प्रगीयत इति प्रगाथः गैः थक् इत्यतः उषिकुषिगार्तिभ्यस्थनित्याहुः यत्र द्वेऋचावावृत्या तिस्रः क्रियंते स प्रगाथः त्रैष्टुभमिति स्वार्थिकाः प्रत्ययाः प्रकृतितो लिंगवचनान्यतिवर्तंत इति न्यायेन क्लीवतेति भावः संग्रामे ननु प्रथमादित्यधिकारात्प्रथमोच्चारितसंग्रामवाचिन एव प्रत्ययः प्राप्नोति न प्रयोजनयोद्धृभ्य इत्यत आह सोस्येतीति एवं च प्रथमांतविशेषणद्वारा प्रयोजनयोद्धृभ्यः प्रकृतित्वमस्येति प्रत्ययार्थविशेषणद्वारा संग्रामस्य प्रत्ययार्थत्वं वक्तुं शक्यमिति भावः तथा च य

तत्प्रतिपादकं प्रातिशाख्यमित्यर्थः नेष्यते इति अनभिधानादितिभावः त्रि विद्येति तिस्रो विद्या अधीत इतिविग्रहे तं तद्धितार्थे द्विगौ त्रिविद्य इत्येव स्यात् द्विगोर्लुगनपत्य इति लुक्प्रवृत्तेरितिभावः आख्यायिकेति गद्यपद्यरूपो ग्रंथविशेष इत्यर्थः सर्वादेरिति सादेरित्येव सिद्धे सर्वादिग्रहणमर्थवत्परिभाषाज्ञापनार्थं॥ ❁ ॥ सवार्तिक इति वार्तिकांतमधीत इत्यर्थः अंतवचने अव्ययीभावः अव्ययीभावे चाकाल इति सहस्य सभावः इकन्निति पदशब्द उत्तरपदं यस्य तस्मादिकन् शतशब्दात्षष्टिशब्दाच्च परो यः पथिन्शब्दस्तदंतात्तु षिकन् वाच्य इत्यर्थः शतपथिक इति वृत्तिकृता तु वार्तिके वहुलमिति पूरयित्वा शातपथ इत्यणंतमप्युदाहृतं तत्तु भाष्येन दृष्टं षित्वफलं दर्शयति श

सुवार्तिकः। द्विगोर्लुक् इति लुक्। द्वितंत्रः। इकन्पदोत्तरपदात्॥ शतषष्टेः षिकन्पथः॥ पूर्वपदिकः। उत्तरपदिकः। शतपथिकः। शतपथिकी। षष्टिपथिकः। षष्टिपथिकी। क्रमादिभ्यो वुन्॥४।२।६१॥ क्रमकः। क्रमपदशिक्षामीमांसाक्रमादिः। अनुब्राह्मणादिनिः॥४।२।६२॥ तदधीते तद्वेदेत्यर्थे। ब्राह्मणसदृशो ग्रंथोऽनुब्राह्मणम्। तदधीते अनुब्राह्मणी। मत्वर्थीयेनैव सिद्धे अणबाधनार्थमिदम्॥ वसंतादिभ्यष्ठक्॥४।२।६३॥ वासंतिकः। अथर्वाणमधीते आथर्वणिकः। दाण्डिनायनसूत्रे निपातनाट्टिलोपो न॥ प्रोक्ताल्लुक्॥४।२।६४॥ प्रोक्तार्थकप्रत्ययात्परस्याध्येतृवेदितृप्रत्ययस्य लुक् स्यात्। पणनम्पणः घञर्थे कविधानमिति कः। सोऽस्यास्तीति पणी तस्य गोत्रापत्यं पाणिनः॥ गाथिविदथिकेशिगणिपणिनश्च॥६।४।१६५॥ इत्यणि प्रकृत्याः स्युः इति टिलोपो न। ततो यूनि इञ्। पाणिनिः॥ एयक्षत्रियार्षञितो यूनि लुगणिञोः॥२।४।५८॥ एयप्रत्ययान्तात्क्षत्रियगोत्रप्रत्ययान्तादृष्यभिधायिनो गोत्रप्रत्ययान्तात् ञितश्च परयोर्युवाभिधायिनोरणिञोर्लुक् स्यात्। कौरव्यः पिता। कौरव्यः पुत्रः॥ ॥

तपथिकीति अणबाधनार्थमिति भाष्ये तु प्रत्याख्यातमेवेदं सूत्रं तद्धीत्याल्लणिष्यन इत्यनभिधानान्नेति वा बोध्यं वसंता उक्थ्यादिष्वेव वसंतादीन्पठित्वा वसंतादिषु वा उक्थ्यादीन्पठित्वा अन्यतरस्य कामवक्तुं अथर्वाणमिति अथर्वणा प्रोक्त उपचारादथर्वा ——— तेन प्रोक्तमित्यधिकारे ऋषिभ्यो लुग्वक्तव्यः वशिष्ठः विश्वामित्रोनुवाक इत्युदाहृतस्य अथर्वणो वा अथर्वा आथर्वण इति भाष्योक्तः साधुः गाथिविदथि इन इत्यनपत्य इति सिद्धे अपत्येप्याणि प्रकृतिभावार्थमयमारंभः गाथिनः वैदथिनः कैशिनः गाणिनः पाणिनः एयक्षत्रियार्ष कौरव्य इति कुर्वादिभ्यो ण्यः ततः इञो लुक् कौरव्यः पुत्रः ननु तिकादिषु कौरव्यशब्दः पठ्यते तथा च कौरव्यायणिरिति फिञा भाव्यं

नन्वित्रेति चेत्सत्यं कुरुनादिभ्यो ण्य इति क्षत्रियगोत्रे विहितो यो ण्यस्तदंतं न तत्र पठ्यते प्रकृते तु ब्राह्मणगोत्रप्रत्ययांतमित्यवधेयं॥ ॥ श्वाफल्क इति ऋष्यन्धकेत्यण्॥
ततइञो लुक् श्वाफल्कः पुत्रः वासिष्ठ इति ऋष्यण् ततइञो लुक् वासिष्ठः पुत्रः तैकायनिरिति तिकादिभ्यः फिञ् ततो ऽणो लुक् तैकायनिः पुत्रः वामरथ्या इति कुर्वादिभ्यो
ण्यस्तंतो वृद्धाच्छं बाधित्वा कण्वादिभ्यो गोत्र इति शैषिको ण् इतीति ण्य क्षत्रियार्षेत्युदात्त तत्सूत्रेणेत्यर्थः ऋष्यण एवेति पाणिनशब्दे तु औत्सर्गिक एवाणिति भावः नन्वि
दं वान्यस्मिन्नपि लुग् इति सूत्रस्थभाष्यकैयटाभ्यां विरुध्यते अत्रेर्युवापत्यानि पुमांसो अत्रयः इतश्चानिञ इति ढक् तदंताद्यून्यतइञ् तस्य ण्यक्षत्रियेति लुक् अत्रिभृगु
कुत्सेति ढको ऽपि लुगित्युक्तत्वात् ऋष्यंधकेत्यण एव ग्रहणे तु ढको ऽग्रहणात्ततः परस्येञो लुङ् स्यादित्याहुः यत्तु तत्सुदाक्षिपुत्रस्य पाणिनेरिति भाष्यप्रयोगादस्य साधु

श्वाफल्कः पिता। श्वाफल्कः पुत्रः। वासिष्ठः पिता। वासिष्ठः पुत्रः। तैकायनिः पिता। तैकायनिः पुत्रः। एभ्यः किं। शिवाद्यण् कौहडः पिता। ततइञ् कौ
हडिः पुत्रः। यूनि किम्। वामरथ्यस्य छात्राः वामरथाः। इति अणो लुक् तु न भवति। आर्षग्रहणेन प्रतिपदोक्तस्य ऋष्यण एव ग्रहणात्। पाणिनिना प्रो
क्तम् पाणिनीयं। वृद्धाच्छः। इञश्चेत्यण् तु न गोत्रे यइञतदन्तादिति वक्ष्यमाणत्वात्। ततो ऽध्येतृवेदितृत्वेनो लुक् स्यात्। स्वरे स्त्रियाञ्च विशेषः। पाणि
नीयः। पाणिनीया। सूत्राच्च कोपधात्। ४।२।६५॥ सूत्रवाचिनः ककारोपधाद् अध्येतृवेदितृप्रत्ययस्य लुक् स्यात्। अप्रोक्तार्थ आरम्भः। अष्टौ अध्या
याः परिमाणमस्य अष्टकं पाणिनेः सूत्रम्। तदधीयते विदन्ति वा अष्टकाः॥ छन्दोब्राह्मणानि च तद्विषयाणि। ४।२।६६॥ छन्दांसि ब्राह्मणानि च
प्रोक्तप्रत्ययान्तानि तद्विषयाणि स्युः। अध्येतृवेदितृप्रत्ययं विना न प्रयोज्यानीत्यर्थः। कठेन प्रोक्तमधीयते कठाः। वैशम्पायनान्तेवासित्वाण्णिनिः
तस्य कठचरकाल्लुक्॥ ततो ऽण्। तस्य प्रोक्ताल्लुक्॥ ॥

त्वमिति तेयं इञश्चेति यूनि लुगिति लुक्यपि प्रत्ययलक्षणेन इञन्तमस्तीति भावः
गोत्रे यइञिति गोत्रमिह शास्त्रीयं न तु लौकिकमिति तत्र वक्ष्यत इति भावः स्वरे इति लुगभावे प्रत्ययस्वरेणान्तोदात्तत्वं स्त्रियां च ङीप् स्यात्। लुकि सति त्वोकार उदात्तः
टाप् च सिध्यतीति भावः अष्टकमिति संख्यायाः संज्ञासंघसूत्राध्ययनेष्विति संख्याया अतिशदन्तायाः कन् संख्याप्रकृतिकादिति संख्याप्रकृतिकप्रत्ययान्तादि
त्यर्थः कालापक इति कलापिन् शब्दात् प्रोक्तार्थे ण् सब्रह्मचारीत्युपसंख्यानाट्टिलोपः ततो अध्येतर्यण् तस्य प्रोक्ताल्लुगिति लुक् कालापानामाम्नाय इत्यर्थे गोत्रचर

सि॰कौ॰
टी॰त॰
सु॰त॰
९३

लाहुत् ततोऽध्येतृवेदितृलोनलुक् स्वरे स्त्रियां च विशेषः छंदोब्राह्मणानि इह मंडूकप्लुत्यानुवृत्तं प्रोक्तादिति पंचम्यंतं जसंतत्वेन विपरिणम्यते छन्दांसि ब्राह्मणानीत्यनेन सा
मानाधिकरण्यात् प्रोक्तशब्दस्य प्रोक्तार्थके प्रत्यये लाक्षणिकं इत्याशयेनाह प्रोक्तप्रत्ययांतानीति तद्विषयाणीति तच्छब्देन अध्येतृवेदितृप्रत्ययः परामृश्यते विषय
शब्दस्त्विहानन्यभाववाची न तु देशवाचीत्यभिप्रेत्याह प्रत्ययं विना न प्रयोज्यानीत्यर्थ इति पाणिनीयं पाणिनीया इतिवदनियमेन प्रयोगे प्राप्ते नियमार्थमेतदिति भावः छं

तदस्मिन्नस्तीति देशे तन्नाम्नि ४।२।६७॥ उदुम्बराः सन्त्यस्मिन् देशे औदुम्बरः तेन निर्वृत्तम् ४।२।६८॥ कुशाम्बेन निर्वृत्ता कौशाम्बी नगरी तस्य निवासः
४।२।६९॥ शिबीनां निवासो देशः शैवः अदूरभवश्च ४।२।७०॥ विदिशाया अदूरभवं नगरं वैदिशं चकारेण प्रागुक्तास्त्रयोऽर्थाः सन्निधाप्यन्ते तेन
वक्ष्यमाणा अण्यानां चातुरर्थिकत्वं सिद्ध्यति ओरञ् ४।२।७१॥ अणोऽपवादः कक्षतु कोक्षतवो नद्यां नेपरत्वान्मतुप् इक्षुमती मतोश्च बहु
जङ्गात् ४।२।७२॥ बहुच् अङ्गं यस्य मतुपस्तदन्तादञ् स्यात् सैध्रकावतो वाहूजितिकिं आहिमतम् अङ्ग्रहणं बहूजितितद्विशेषणं यथा
स्यान्मतुबन्तविशेषणं मा भूत् ॥ बह्वचः कूपेषु ४।२।७३॥ अणोऽपवादः दीर्घवरत्रेण निर्वृत्तो दैर्घवरत्रः कूपः उदक् च विपाशः ४।२।७४॥ विपाश उ
त्तरकूले ये कूपास्तेष्वञ् अबह्वजर्थ आरम्भः दत्तेन निर्वृत्तः कूपो दात्तः उदक्किम् दाक्षिणतः कूपेष्वण् वा सङ्कलादिभ्यश्च ४।२।७५॥ कूपेष्विति नि
वृत्तम् सङ्कलेन निर्वृत्तं साङ्कलम् पौष्कलम् स्त्रीषु सौवीरसाल्वप्राक्षु ४।२।७६॥ स्त्रीलिङ्गेषु एषु देशेषु वाच्येष्वञ् सौवीरे दत्तामित्रेण निर्वृत्ता
दात्तामित्री नगरी साल्वे वैधूमाग्नी प्राचि माकन्दी सुवास्त्वादिभ्योऽण् ४।२।७७॥ अञोऽपवादः सुवास्तोरदूरभवं सौवास्तवम् वर्णु वार्णवम्
अण्ग्रहणं घञ्मतुपोर्बाधनार्थं सौवास्तवी ॥ ॥ ११ छंदोग्रहणादेव सिद्धे ब्राह्मणग्रहणं चिरंतनप्रोक्तब्राह्मणानामेव तद्विषयतार्थं तेनेह न याज्ञव
ल्क्येन प्रोक्तानि ब्राह्मणानि याज्ञवल्क्यानि यत्र तान्कण्वादिभ्यो गोत्र इत्यण् आपत्यस्य चेति यलोपः याज्ञवल्क्यादयो हि पाणिन्यपेक्षया नूतना इति वृत्तिकृतां व्यवहारश्च
कारोऽनुक्तसमुच्चयार्थः तेन काश्यपिनः कौशिकिन इत्यत्र कल्पेऽपि तद्विषयत्वं सिद्धं काश्यपकौशिकाभ्यामृषिभ्यामिति प्रोक्तेणिनिः अध्येत्रणो लुक् छंदोब्राह्मण
नीतिकिं पाणिनीयं व्याकरणं अथचातुरर्थिकाः ॥ ॐ ॥ तदस्मिन्नस्तीत्युपाधिकात्प्रथमांतादस्मिन्निति सप्तम्यंतार्थे यथाविहितं प्रत्ययः स्यात् प्रत्ययांतेन नाम्ना देश

प्रत्ययान्तं नाशेयस्येति बहुव्रीहिः मतुपोपवादः इति शब्दस्तु सकललोकप्रसिद्धदेशे यथास्यात्तथाधुनिकसंकेतिते पीत्येतदर्थः उत्तरसूत्रत्रयेपि देशे तन्नाम्नीत्यनुवर्तते तेन
निर्वृत्तं अंतर्भावितण्यर्थाद्वृतेः कर्मणि क्तः अदूर अदूरमंतिकं तत्र भवतीत्यदूरभवः निपातनात्सप्तमीसमासः चातुरर्थिकत्वमिति चतुर्णामर्थानां समाहारश्चतुरर्थी
तत्र भवाश्चातुरर्थिकाः अध्यात्मादित्वाट्ठञ् चतुर्ष्वर्थेषु भवा इति तद्धितार्थे द्विगौ तु द्विगोर्लुगनपत्य इति ठञो लुक् स्यात् मतोश्च ननु मतोर्वह्वच इत्येवास्तु वह्वचो वि
हितो यो मतुप् तदन्तादिति वैयधिकरण्येन व्याख्यानादिष्टं सिध्यति किं मंगग्रहणेनेत्याशंकां निवारयन्नंगग्रहणमिति मत्वंतविशेषणमिति संभवति सामानाधि

रोण्याः ॥ ४।२।७८ ॥ रोणीशब्दात्तदन्ताच्च अण् । कृपाद्यपवादः । रौणः । आजकरौणः । कोपधाच्च । ४।२।७९ ॥ अण् । अत्रोपवादः । कार्णच्छिद्रकः । कू
पः । कार्णवेष्टकः । त्रैशङ्कवः । वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसङ्काशब
लपक्षकर्णसुतङ्गमप्रगदिन्वराहकुमुदादिभ्यः । ४।२।८० ॥ सप्तदशभ्यः सप्तदश क्रमात्स्युः चतुरर्थ्याम् । अरीहणादिभ्यो वुञ् । आरीहणेन निर्वृत्तम् । आ
रीहणकम् । कृशाश्वादिभ्यश्छण् ॥ कार्शाश्वीयम् । ऋश्यादिभ्यः कः । ऋश्यकम् । कुमुदादिभ्यष्ठच् ॥ कुमुदिकम् । काशादिभ्य इलः । काशिलः । तृणादिभ्य
सः । तृणसः । प्रेक्षादिभ्य इनिः । प्रेक्षी । अश्मादिभ्यो रः । अश्मरः । सख्यादिभ्यो ढञ् । साखेयम् । सङ्काशादिभ्यो ण्यः । साङ्काश्यम् । बलादिभ्यो यः । बल्यम् । प
क्षादिभ्यः फक् । पाक्षायणः । पथः पन्थ च । पान्थायनः । कर्णादिभ्यः फिञ् । कार्णायनिः । सुतङ्गमादिभ्य इञ् । सौतङ्गमिः । प्रगद्यादिभ्यो ञ्यः । प्राग
द्यः । वराहादिभ्यः कक् । वाराहकः ॥ कुमुदादिभ्य ठक् । कौमुदिकः ॥ ॥ करणे वैयधिकरण्यस्याप्यन्यायत्वादंगग्रहणाभावे मत्वंतविशेषण

तां स्यादेव ततश्चाहिमतमित्यादावतिप्रसंगः स्यादिति भावः ॥ रोणी रोणीशब्दः प्रत्ययमुत्पादयतीत्यर्थस्तथा च फलितमाह रोणीशब्दादिति पंचम्यास्सौत्रो लुगि
त्यन्ये तदन्तादिति येन विधिरिति सूत्रे भाष्यस्य विशेषवचनाद्विशेषणविशेष्ययोः कामचारमाश्रित्य समासप्रत्ययविधौ प्रतिषेध इत्यस्य प्रत्याख्यानाद्धात्तदंतविधिरि
तिभावः वुञ्छण्ठकरित्यंतमेकं समस्तपदं अरीहणादिपदं तत्र प्रथमतः कुमुदांतानां चतुर्णां द्वन्द्वं विधाय द्वितीयेन काशादिकुमुदांतद्वंद्वेन सह पुनर्द्वन्द्वो बोध्यः तेन
कुमुदशब्दस्य द्विः पाठेपि नैकशेषः आदिशब्दः प्रत्येकं संबध्यते इत्याह अरीहणादिभ्य इति पक्षाद्यन्तर्गणसूत्रमाह पथ इति ॥ ॥ ॥

सि·कौ·
टी·ल·
मु·त·
-२४

जनपदे लुप् तन्नाम्नीत्येव नेह उदुम्बराः सन्त्यस्मिन्नौदुम्बरो जनपदः न ह्यत्र लुपं तं नामधेयं जनपदस्यैकत्वादेकवचने प्राप्ते बहुवचनादिफलकमतिदेशमाह लुपि
युक्तवदिति व्यक्तिवचने किम् शिरीषाणामदूरभवो ग्रामः शिरीषाः वरणादिभ्यश्चेति लुप् तस्य वनं शिरीषवनं इह वनस्येति णत्वमतिदिश्येत ततश्च विभाषौषधिवन
स्पतिभ्य इति णत्वं स्यात् न त्वत्र शिरीषाणामिति षष्ठीबहुवचनं कुतो नातिदिश्यत इति चेदत्राहुः वचनमिह संख्यानत्वेकवचनं हि वचनादि न चैवमपि संख्याबोध
कत्वेन श्रुतैव षष्ठी परिगृह्यतामिति वाच्यं षष्ठ्यर्थस्य न हि तस्यान्तर्गतत्वादुक्तार्थप्रथमाया एवं युक्तत्वादिति पंचाला इत्यादि यद्यप्यत्राभिधेयलिंगवत्वेपीष्टसिद्धि
स्तथापि कटुवदर्या अदूरभवो ग्रामः कटुवदरीत्यादिसिद्धये प्रकृतिलिंगातिदेश इति भावः पूर्वाचार्यानुरोधेन कृतं सूत्रं संप्रति प्रत्याचष्टे तदशिष्यमिति पंचालाः अं

जनपदे लुप् ४।२।८१॥ जनपदे वाच्ये चातुरर्थिकस्य लुप् स्यात्। लुपि युक्तवद्व्यक्तिवचने १।२।५१॥ लुपि सति प्रकृतिवल्लिङ्गवचने स्तः। प
ञ्चालानां निवासो जनपदः पञ्चालाः कुरवः। अङ्गाः। वङ्गाः। कलिङ्गाः। तदशिष्यं संज्ञाप्रमाणत्वात् १।२।५३॥ युक्तवद्वचनं न कर्तव्यं संज्ञानां प्र
माणत्वात्। लुब्योगाऽप्रख्यानात् १।२।५४॥ लुबपि न कर्तव्यो ऽवयवार्थस्येहाप्रतीतेः। योगप्रमाणे च तदभावेऽदर्शनं स्यात् १।२।५५॥ यदि हि
योगस्यावयवार्थस्य बोधकं स्यात्तदा तदभावे न दृश्येत। प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् १।२।५६॥ प्रत्ययार्थः प्रधानमित्येवंरू
पमर्थवचनमप्यशिष्यं कुतः अर्थस्य लोकत एव सिद्धेः। कालोपसर्जने च तुल्यम् १।२।५७॥ अतीताया रात्रेः पश्चार्द्धेनागामिन्याः पूर्वार्द्धेन च सहितो दिव
सोऽद्यतनः। विशेषणमुपसर्जनमित्यादि पूर्वाचार्यैः परिभाषितं तत्राप्यशिष्यत्वं समानं लोकप्रसिद्धेः॥ ... गाः वंगाः कलिंगा इत्यादयो जनपदस्य

यथायथं बहुवचनाद्यन्ता एव संज्ञाः न त्वत्र यत्नेन लिंगसंख्ये प्रतिपादनीये आपो दारा इत्यादिषु यथा न हि तत्र शास्त्रेण लिंगसंख्ये प्रतिपाद्येते इति भावः उपजीव
कं प्रत्याख्यायोपजीव्यं प्रत्याचष्टे लुब्योगेति जनपदे लुप् वरणादिभ्यश्चेति हि सूत्रे लुप्शब्देन विवक्षिता अशिष्यमिति संबध्यत एव तदा हलुबपीति प्रकृतिप्रत्ययार्थ
योः संबंधो योग इत्याशयेन फलितमाह अवयवार्थस्येति अप्रख्यानादिति व्याचष्टे अप्रतीतेरिति पंचालादयः शब्दाः क्षत्रियेषु यथा रूढास्तथा जनपदेपीति तस्य नि
वासः अदूरभवश्चेति तद्धितो नैवोत्पद्यते किमनेन लुपो विधानेनेत्यर्थः न दृश्येतेति विनापि क्षत्रियसंबंधं पंचालादिशब्दो जनपदेषु प्रयुज्यत इति नार्थः सूत्रेणेत्यर्थः

२४

प्रसंगात्पूर्वाचार्यपरिभाषितमन्यत्रापि भवत्याचेष्टप्रधानेत्यादिना॥ ॐ॥ विशेषणानां यद्यपि सूत्रपाठे लुपि युक्तवदिति सूत्रादनंतरमेतत्सूत्रं पठित्वा तदशिष्यमित्या

विशेषणानाञ्चाजातेः॥१।२।५२॥ लुबर्थस्य विशेषणानामपि तद्वल्लिङ्गवचने स्तो जातिं वर्जयित्वा पञ्चाला रमणीयाः। गोदौ रमणीयौ। अजातेः

किम्। पञ्चाला जनपदः। गोदौ ग्रामः। हरीतक्यादिषु व्यक्तिः।४।३।१६७॥ हरीतक्याः फलानि हरीतक्यः। खलतिकादिषु वचनम्। खलतिकस्य

पर्वतस्याऽदूरभवानि खलतिकम्वनानि। मनुष्यलुपि प्रतिषेधः। मनुष्यलक्षणे लुबर्थे विशेषणानां लुवन्तस्य तु भवतीत्यर्थः। चञ्चा अभिरू

पः। वरणादिभ्यश्च।४।२।८२॥ अजनपदार्थ आरम्भः। वरणा नाम दूरभवन्नगरं वरणाः॥ शर्कराया वा।४।२।८३॥ अस्माच्चातुरर्थिकस्य वा लुप्स्या

त्। ठक्छौ च।४।२।८४॥ शर्करायाः नोक्तः कुमुदादौ वराहादौ च पाठसामर्थ्यात् पक्षे ठच्कौ। वाग्रहणसामर्थ्यात् पक्षे औत्सर्गिकोऽण्। तस्य

तु विकल्पः षट्रूपाणि। शर्करा। शार्करं। शार्करिकं। शर्करीयं। शार्करिकम्। शार्करकं। नद्यां मतुप्।४।२।८५॥ चातुरर्थिकः। इक्षुमती। मध्वा

दिभ्यश्च।४।२।८६॥ मतुप्स्याच्चातुरर्थिकः। अनद्यर्थ आरम्भः। मधुमान्। कुमुदनडवेतसेभ्यो ड्मतुप्।४।२।८७॥ कुमुद्वान्। नड्वान्। वेतस्वान्।

आद्ययोर्ह्रस्व इति। अन्येमादुपधाया इति वत्वं माभूदनेन कः। महिषाच्चेति वक्तव्यं॥ महिष्मान्नाम देशः। नडशादाड्ड्वलच्।४।२।८८॥ नड्वलः। शादो

जम्बालशष्पयोः। शाड्वलः। शिखाया वलच्।४।२।८९॥ शिखावलम्। उत्करादिभ्यश्छः।४।२।९०॥ उत्करीयः॥ नडादीनां कुक्च।४।२।९१॥ नड

कीयं। कुञ्चा ह्रस्वत्वञ्च॥ कुञ्चकीयः। तक्षन्नलोपश्च। तक्षकीयः॥ बिल्वकादिभ्यश्छस्य लुक्।६।४।१५३॥ नडादिगणान्तर्गता बिल्वकादयस्तेभ्य

श्छस्य लुक् तद्धिते परे। बिल्वा यस्यां सन्ति सा बिल्वकीया। तस्यां भवा बैल्वकाः। वेत्रकीयायां वैत्रकाः। छस्य किम्। छमात्रस्य लुग्यथा स्यात् कुकौ

निवृत्तिर्माभूत्॥ अन्यथा सन्नियोग शिष्टानामिति कुगपि निवर्तेत। लुग्ग्रहणं सर्वलोपार्थं अन्यथा लोपोपि यमात्रस्य स्यात्॥ इति चातुरर्थि

रम्यत्वात्त्रैवेदं व्याख्यातुमुचितं तथापि जातेः प्रतिषेधमात्रपरमिदं न तु युक्तवद्भावपरमित्याशयेन तत्र नोक्तमित्याहुः पंचाला रमणीया इति कथं तर्हि पं

चाहलम्नप द्रसुभिक्षः संपन्नपानीय इति प्रयोग इति चेत् जनपदविशेषणत्वादित्येवेहि पंचालविशेषणत्वाभ्युपगमे तु तद्धितं
गवचनेस्त एव पंचालाः सुभिक्षाः संपन्नपानीया इति हरीतक्य इति हरीतक्यादिभ्यश्चेत्यणो लुप् तत्र हि लुबेत्यतो लुबनुवर्तते खलतिकमिति वरणादिभ्यश्चे
ति लुप् चंचेति संज्ञायामिति कनो लुम्मनुष्ये इति लुप् चंचा तृणमयः पुमान् वरणादिष्वकारो नुक्तसमुच्चयार्थस्तेनास्याकृतिगणत्वं सिद्धं वरणा इति एवं कटु
वदरी शिरीषाः मधुरौखलतिकमित्यादीन्युदाहर्तव्यानि वत्वस्यासिद्धत्वात्तस्मिन्कर्तव्ये टिलोपोऽनस्थानिवदित्याशयेनाह यद्यपीति नड्वानित्यत्रापि परत्वान्झय इ
त्यनेनैव वकारस्य उत्तु मादुपधाया इत्यनेनेति भावः न चासिद्धत्वान्मादुपधाया इत्येवं तत्रन्याय्यमिति वाच्यम् प्रकरणोत्प्रकरणामसिद्धं न तु योगे योग इति
उपसर्गादसमासेपीत्यत्र भाष्ये निर्णीतत्वात् ननु वेतस्वानित्यत्र वेतसुशब्दस्य सुवन्तत्वेन पदत्वात् ड्मतुपो डित्वसामर्थ्याट्टिलोपे एकदेशविकृतन्या
येन पदत्वात्सरुत्वं स्यात् न च स्थानिवत्वेन निर्वाहः पूर्वत्रासिद्धे तन्निषेधादिति चेन्मैवं अन्तरंगरुत्वं प्रति बहिरंगस्य टिलोपस्यासिद्धत्वात् न च षाष्ठी बहिरंगपरिभाषा त्रै
पादिकं न जानातीति वाच्यं कार्यकालपक्षाभ्युपगमात् नन्वेवमपि स्वादिष्विति सान्तस्य पदत्वे तदाश्रयरुत्वस्यान्तरंगत्वाभावाद्बहिरंगपरिभाषा न प्रवर्तते यतिरुत्वं दुर्वारमेव
न च न सौ मतुविति चतुरर्थ्यां मतुपो विधानाच्चातुरर्थिकोऽयं मतुप् मत्वर्थीय इति न सो मत्वर्थ इत्यनेन भत्वं शंक्यं टिलोपस्य स्थानिवत्त्वात् न च पदत्वेप्येवं तस्य रुत्वविधिना स
ह कार्यकालतया पूर्वत्रासिद्धे नेति निषेधादिति चेदत्राहुः परसंज्ञायां यथोद्देशपक्षाश्रयणात्पूर्वत्रासिद्धे नेति निषेधाप्रवर्तनात्स्थानिवत्त्वप्रवृत्त्या सांतस्यापदत्वादिति ए
तेन घटी आमलकी इत्यत्र स्वादिष्विति पदत्वाज्जश्त्वं स्यादिति सीत्यत्र तु संयोगान्तलोपः स्यादिति शंकापि परास्तेति दिक् ननु प्रक्रियालाघवाय ड्मतुवेव विधीयतामथ वा कुमुदन
ड्वेतसेभ्यो ड्मतुबिति प्रकृतस्य मतुपो डित्वमतिदिश्यतां किमनेन ड्मतुब्विधानेन सत्यं अन्यतो विधानार्थं तत् तत्सिद्ध्यर्थकथनपरं वार्तिकमाह महिषाच्चेति शिखाया निर्वृत्ता
द्यर्थे देशे तन्नाम्नि अणो बाधनार्थं चेदं दंतशिखात्संज्ञायामिति यं च मे वक्ष्यमाणं त्व देशेपि शिखावल इति रूपसिद्ध्यर्थं नडादीनां नडल्पक्ष बिल्व वेणु वेत्र वेतसादयो नडा
दयः नडादीं वर्गाणां सूत्रमाह कुंचेति एवं तक्षन्नित्यपि उभयत्रापि षष्ठ्याः सौत्रो लुक् ढलोप इत्यतो लोपोऽनुवर्तमाने लुग्ग्रहणं व्यर्थमित्याशंक्याह सर्वलोपार्थमिति।
यमात्रस्येति न चादेः परस्येति ईकारस्य भाव्यमिति वाच्यं सूर्यतिष्येत्यतो यकारसंबद्धस्यैव लोपस्यानुवर्तनादिति भावः॥ ॥ इति चातुरर्थिकाः॥ ॥

शेषे लक्षणं चेति ग्रहणात् चक्षुरादिष्वर्थेषूत्तरसूत्रानुपाते ष्वेषु अतो विधायकमित्यर्थः ननु लक्षणं तावदर्थं तस्येदमित्यनेन चाक्षुषादीनां संस्कृतं भक्षा इत्यनेन दार्षदादीनां सि
द्धेः तथाधिकारोऽपि व्यर्थः तथाहि अधिकारस्यापत्यादि चतुरर्थ्यपर्यन्तेष्वर्थेषु चाक्षुषादीत्युत्सुलं तानां निवृत्तिर्जाताथ थेसाकल्यं वा प्रयोजनं तत्र निवृत्तिस्तावन्न प्रयोजनं आ

शेषे। ४।२।९२॥ अपत्यादिचतुरर्थ्यन्तादन्योऽर्थः शेषस्तत्राऽणादयः स्युः। चक्षुषा गृह्यते चाक्षुषं रूपम्। श्रावणः शब्दः। औपनिषदः पुरुषः। दृषदि पिष्टा
दार्षदाः सक्तवः। उलूखले क्षुण्ण औलूखलो यावकः। अश्वैरुह्यते आश्वो रथः। चतुर्भिरुह्यते चातुरं शकटं। चतुर्दश्यां दृश्यते चातुर्दशं रक्षः। शे
ष इति लक्षणं चाधिकारश्च। तस्य विकार इत्यतः प्राक् शेषाधिकारः। राष्ट्राऽवारपाराद्घखौ। ४।२।९३॥ आभ्यां क्रमाद्घखौ स्तः शेषे। राष्ट्रियः। अवारपारी
णः। अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यम्॥ अवारीणः। पारीणः। पारावारीणः। इह प्रकृतिविशेषाद्घादयष्ट्युट्युलन्ताः प्रत्यया उच्यन्ते। ते
षां जातादयोऽर्थविशेषाः समर्थविभक्तयश्च वक्ष्यन्ते। ग्रामाद्यखञौ। ४।२।९४॥ ग्राम्यः। ग्रामीणः। कत्त्र्यादिभ्यो ढकञ्। ४।२।९५॥ कुत्सितास्त्रयः क
त्त्रयः। तत्र जातादिः कात्त्रेयकः। नागरेयकः। ग्रामादित्यनुवर्तते। ग्रामेयकः। कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु। ४।२।९६॥ कौलेयकः श्वा। कौलोऽन्यः
कौक्षेयकोऽसिः। कौक्षोऽन्यः। ग्रैवेयकोऽलङ्कारः। ग्रैवोऽन्यः। नद्यादिभ्यो ढक्। ४।२।९७॥ नादेयं। माहेयम्। वाराणसेयं। दक्षिणापश्चात्पुरसस्त्यक्।
४।२।९८॥ दक्षिणेत्याजन्तमव्ययम्। दाक्षिणात्यः। पाश्चात्यः। पौरस्त्यः। कापिश्याः ष्फक्। ४।२।९९॥ कापिश्यां जातादि कापिशायनं मधु। कापि
शायनी द्राक्षा। रङ्कोरमनुष्येऽण् च। ४।२।१००॥ चात् ष्फक्। राङ्कवो गौः। राङ्कवायणः। अमनुष्ये इति किं। राङ्कवको मनुष्यः॥ ॥ ॥

द्वैकाश्मनादीनामुत्करादिपाठेन इतः प्राचीनेष्वर्थेषु घादयो न प्रवर्तन्त इति ज्ञापनात् अन्यथाश्मनश्छ इत्येव सिद्धे तत्पाठस्य वैयर्थ्यप्रसंगात् नाप्यर्थसाकल्यं प्रयोजनं।
जाताधिकारात्प्राक् सामर्थ्यादेव तल्लाभात् पदिसंनिहिते जातार्थ एव घादयस्स्युरिति दुक्तोरेषु भवाद्यर्थेषु प्राग्दीव्यत इति विशिष्टावधिपरिच्छिन्नेष्वर्थेषु विधीयमानाऽण
दयस्त्वस्मदाजताधिकारान्तरमेव प्रवृत्तविष्यत्यादिभिस्स ह राष्ट्रावारपारेत्यादयोऽपि प्रवर्तेरन् तस्माद्व्यर्थमिदं सूत्रमिति चेदत्रोच्यते शैषिकान्सरूपः शैषिको नेष्व

ष्यच कार्यस्यादित्यलाभायशेषाधिकारस्तावदावश्यकः शैषिकत्वप्रयुक्तकार्यविशेषं ध्वनयितुं क्रियमाणः शेषाधिकार एव शैषिकान्मतुवर्थीयादित्यादिश्लोकं ज्ञापयति ए
वच श्लोकसन्निधानात्तु विधौ च भाष्ये पठित इह तु सन्त्रे नपठित इति तत्रैव व्याख्यास्यते अपत्यादिस्वर्थेषु घादीनां निवृत्त्यर्थमप्यधिकार आवश्यकः न चोक्तज्ञापकेनैव तत्सि
द्धिरिति वाच्यं ज्ञापकस्य विशेषापेक्षत्वे दोषतादवस्थ्यात् आर्द्रकादिभ्यो यदि छः स्यात्तर्हि चतुरर्थ्यामेवेति नियमस्यापि संभवाच्च एवं स्थिते चाश्मुषामित्यादि सुगृह्यमाणत्वा
दिप्रकारकबोधन्यायविधायकत्वमपि तस्य सुवचमिति दिक् विगृहीतादपीत्यादि वचनेनैवेदं सूत्रे यथासंख्यप्रवृत्त्यर्थं विशिष्टोच्चारणात् कुत्सितास्त्रय इति त्रिहव बहुव्रीहिर
पि सुवच इहैव निपातनात्कोः कद्भावः कद्भावेत्त्रावुपसंख्यानमिति तु प्रत्याख्येयं कुत्स्यायाय लोपश्चेति गणसूत्रं कुत्स्यायां जातः कौलेयकः कत्रिडंभि कुंडिन माहिष्मती
त्यादि दक्षिणापश्चात् अव्ययमिति साहचर्यादिति भावः एवं च दाक्षिणात्य इत्यत्र सर्वनाम्नो वृत्तिमात्र इति पुंवद्भावशंकैव नासीति बोध्यं पाश्चात्य इति कथं तर्हि पश्चात्तनैः क
श्च न नुध्रुमान इति न च दिग्देशवाचिनि पश्चाच्छब्दे सावकाशं त्यकं कालवाचकात् ट्युलौ बाधेते परत्वादिति वाच्यं अग्रादिपश्चाद्दिमचा ट्युट्युलौ बाधस्य दुर्वारत्वात्
सत्यं पश्चात्तनं तिपश्चात्तनाइतिकथं चित्समाधेयं कापिश्याः ष्फक् कापिशीशब्दात्ष्फकस्यात्त्वान्ङीष् तदाह कापिशायनीति रंकोरमनुष्ये रंकवो जनपदस्तनः प्राग्दीव्य
तीयेऽण्प्राप्तः तद्बाधकत्वेनावृद्धाद्पीति वुञ्प्राप्तस्तमपि बाधित्वा ओर्देशे ठञ्प्राप्तस्तस्य तु कोपधादण् बाधकस्तेनापि परत्वात्कच्छादिपाठेनाऽणेन ष्फगणो विधीयते
कोपधलक्षणस्तु कच्छादित्वादेव सिद्धे कच्छादिषु रंकुशब्दस्य पाठो मनुष्यतत्स्थयोर्वुञ्विधानार्थ इति कैयटः अत एवाह रांकवको मनुष्य इति कश्चित्तु रांकव इति पठ्यते स तु लेखक
प्रमादः स्यादेतत् अमनुष्यग्रहणमिह व्यर्थं आदावेन वुञा तत्र ष्फगणो बाधेनामनुष्य एव पर्यवसानात् अणग्रहणमपि व्यर्थमेव कच्छादित्वादेव तत्सिद्धेः अत्राह
काशिकाकृत् नायं प्रसज्यप्रतिषेधः किं तु पर्युदासस्तेन मनुष्यभिन्ने प्राणिन्येव ष्फग्विधीयत इति रांकवः कंबल इत्यत्र न ष्फक् विशेषविहितेन ष्फकाऽणो बाधा मा
भूदित्यणग्रहणं च क्रियत इति भाष्ये तु अप्राणिन्यपि ष्फकमंगीकृत्येदं द्वयमपि प्रत्याख्यातं॥ ॥

धुप्रागपागिति व्याप्तिमिति सूत्रे दिवश्च दिग्भ्यश्च जातेर्द्वै स इति भावः अपाचीदक्षिणादिक् द्वितीयो वर्णः पकारो न तु दंतोष्ठ्यः पद्भिःप्रागपागुदगित्यादौ तथा दर्शनादिति स्थितं मनोर
मायां केचित्तु प्राच्यवाचीप्रतीच्यस्तावत्यमरकोशे अवाचीति दंतोष्ठ्यपाठं काचित्कं पुरस्कृत्य सूत्रेप्यवागिति पठित्वा अवाच्यमित्युदाहरंति प्रागपागिति वेदे तु व्यत्ययेन
वकारस्य पकार इति तेषामाशयः प्रागादयो स्तातं ता अव्यया स्तद्धिताः न्तत्वनव्ययाः उभयेषामपीह ग्रहणमविशेषात् कथं तर्हि संस्काराः प्राक्तना इवेति अत्राहुः कालं

द्युप्रागपागुदक्प्रतीचो यत्। ४।२।१०१॥ दिव्यम्। प्राच्यम्। अपाच्यम्। उदीच्यम्। प्रतीच्यम्। कन्थायाष्ठक्। ४।२।१०२॥ कान्थिकः। वर्णौ वुक्। ४।२।१०३॥
वर्णु नद स्तस्य समीपदेशो वर्णुः तद्विषयार्थवाचिकन्थाशब्दाद्वुक् स्यात्। यथा हि जातं हिमवत्सु कान्थकम्॥ अव्ययात्त्यप्। ४।२।१०४॥ अमेहक्वतसित्र
भ्य एव। अमान्तिकसहा र्थयोः। अमात्यः। इहत्यः। क्वत्यः। ततस्त्यः। तत्रत्यः। परिगणनं किं। उपरिष्टाद्भव औपरिष्टः। अव्ययानां भमात्रे टिलोपः। अनित्यो
ऽयं विधिः टिलोपविधानात् तेनेह न आरातीयः। त्यब्नेर्ध्रुव इति वक्तव्यम्॥ नित्यः। निसो गते। ह्रस्वात्तादौ तद्धिते। ८।३।१०१॥ ह्रस्वादिणः परस्य सस्य
षः स्यात्तादौ तद्धिते। निर्गतो वर्णाश्रमेभ्यो निष्ट्यश्चाण्डालादिः। अरण्याण्णः॥ आरण्याः सुमनसः। दूरादेत्यः॥ दूरेत्यः। उत्तरादाहञ्॥ औत्तराहः। ऐ
षमोह्यःश्वसोऽन्यतरस्याम्। ४।२।१०५॥ पक्षे त्यब्वक्ष्यमाणौ ट्युट्युलौ। ऐषमस्त्यम्। ऐषमस्तनम्। ह्यस्त्यम्। ह्यस्तनम्। श्वस्त्यम्। श्वस्तनम्। पक्षे शौवस्ति
कम्। वक्ष्यते। तीररूप्योत्तरपदादञ्ञौ। ४।२।१०६॥ यथासंख्येन। काकतीरं। पाल्वलतीरं। शैवरूप्यं। तीररूप्यान्तादिति नोक्तं बहुच्पूर्वान्माभूत्
बाहुरूप्यम्। दिक्पूर्वपदादसंज्ञायां ञः। ४।२।१०७॥ अणोऽपवादः। पौर्वशालः। असंज्ञायां किं। संज्ञाभूतायाः प्रकृतेर्मा भूत्। पूर्वेषुकामशम्यां भवः पूर्वे
षुकामशमः। प्राचां ग्रामनगराणामित्युत्तरपदवृद्धिः॥ ॥ १९ वाचिनः प्राक् ठञ्व्याप्तं बाधित्वा परत्वाट्ट्युट्युलौ वा स्यातामिति वर्णौ वुक् वर्णुरिति अदूरभवश्च
त्यर्थे सुवास्त्वादिभ्योऽण् इत्यण् तस्य नद्यां लुबिति लुप् ह्रस्वात्तादौ प्रदानत्वात्तस्या प्राप्तावयमारंभः आदिग्रहणं तु व्यर्थं यस्मिन्विधिरित्येव सिद्धेः ह्रस्वात् किं गीःसरा धूःसरा। तादौ किं स
र्पिष्षु इति तद्धिते किं सर्पिस्तरति तिङः तस्य प्रतिषेधो वाच्यः भिषु स्तरां दूरेत्य इति दूरादागत इत्यादिरर्थः औत्तराह इति इहामुतोत्तरात् स्त्रियां टाब्बाध्यः यदा तूत्तरा
द्वेत्याहि ततोऽप्रत्ययते अमेहेति परिगणनेन त्यपोऽभावात् तदा औत्तराहशब्दो नोदात्तः स्त्रियां ङीब्विशेषः वक्ष्यमाणाविति सायंचिरमित्यादिनेति शेषः वक्ष्यत इति
३ ३ मास्त इति अमाशब्दः समीपवाची स्वरादिः अमासमीपे भव इत्यर्थः ३॥

श्वक्ष्यतः इत्यत्र दिक्पूर्वं असंज्ञायामित्यत्र सौश्नत्वात्यं चम्यर्थे सप्तमीत्याशयेनाह संज्ञाभूतायामिति ॥ ❀ ॥ मद्रेभ्योञ् बहुवचननिर्देशाज्जनपदवाची गृह्यते न तु मद्रपर्यायः दिशोमद्राणामिति दिग्वाचकादुत्तरपदस्य जनपदवाचिनो मद्रमिन्नस्याचामादेर्वृद्धिः स्यात् ञ्णिति तिणिति किति च तद्धिते इति सूत्रार्थः पौर्वमद्र इति मद्रैकदेशमद्रशब्दस्य वृत्तौ दिक्शब्देन सामानाधिकरण्यात्तद्धितार्थेति समासः उदीच्य दिग्ग्रहणं निवृत्तं उदीच्यग्रामात्किम् माथुरः बह्वचः किं ध्वाजः पिप्पल्यादिश्चौ

मद्रेभ्योऽञ् ।४।२।१०८॥ दिक्पूर्वपदादित्येव दिशोमद्राणामिति मद्रपर्य्युदासाद्वृद्धिः । पौर्वमद्रः । आपरमद्रः । उदीच्यग्रामाद्बह्वचोऽन्तोदात्तात् ।४।२।१०९॥ अञ् स्यात् । शैवपुरम् । प्रस्थोत्तरपदपलद्यादिकोपधादण् ।४।२।११०॥ माहकिप्रस्थः । पालदः । नैलीनकः । काण्वादिभ्यो गोत्रे ।४।२।१११॥ एभ्यो गोत्रप्रत्ययान्तेभ्योऽण् स्यात् । कण्वो गर्गादिः । काण्व्यस्य छात्राः काण्वाः । इञश्च ।४।२।११२॥ गोत्रे यदिञ् तदन्तादण् स्यात् । दाक्षाः । गोत्रे किं । सौतङ्गमेरिदं सौतङ्गमीयं । गोत्रमिह शास्त्रीयं न तु लौकिकं तेनेह न । पाणिनीयं । न द्व्यचः प्राच्यभरतेषु ।४।२।११३॥ इञश्चेत्यस्यापवादः । प्राक्षीयाः । काशीयाः । भरतानां प्राच्यत्वेऽपि पृथग्ग्रहणादन्यत्र प्राच्यग्रहणे भरतानामग्रहणस्य लिङ्गम् ॥ वृद्धिर्यस्याचामादिस्तद्वृद्धम् ।१।१।७३॥ यस्य समुदायस्याचां मध्ये आदिर्वृद्धिस्तद्वृद्धसंज्ञं स्यात् । त्यदादीनि च ।१।१।७४॥ वृद्धसंज्ञानि स्युः । वृद्धाच्छः ।४।२।११४॥ शालीयः । मालीयः । तदीयः । एङ् प्राचां देशे ।१।१।७५॥ एङ् यस्याचामादिस्तद्वृद्धसंज्ञं वा स्याद्देशाभिधाने । एणीपचनीयः । गोनर्दीयः । भोजकटीयः । पक्षे अणि । ऐणीपचनः । गौनर्दः । भोजकटः । एङ् किं । आहिच्छत्रः । कान्यकुब्जः । वा नामधेयस्य वृद्धसंज्ञा वक्तव्या ॥ दैवदत्तः देवदत्तीयः । भवतष्ठक्छसौ ।४।२।११५॥ वृद्धाद्भवतष्ठक्छसौ स्तः । भावत्कः । भवदीयः । वृद्धादित्यनुवृत्तेः शत्रन्तादणेव । भावतः ॥

॥ ८८ पंतोध्वजीशब्दः अन्तोदात्तात्किम् शार्कराधानं शार्कराधानशब्दे धाशब्दाकार उदात्तः कृदुत्तरपदप्रकृतिस्वरेण लित्स्वरस्यावस्थानात् शैवपुरमिति प्रस्थपुरवहान्ताच्चेति वुञ् न भवति वृद्धादिति तत्रानुवृत्तेः प्रस्थोत्तर उदीच्यग्रामलक्षणस्याञोऽपवादः पालद इति पलदीति इकारान्त इत्येके नान्त इत्यन्ये नलोपः सति यणादेशः संहितानुल्येव वाहीकशब्दो कोप

गोपिपत्यादिषु पठ्यते दर्शनं [illegible] तु अन्यथा अणा बाधितत्वात् परत्वाच्छ एव स्यात्कोपधप्रयुक्तोण् अवृद्धे सावकाश इति यकल्लोमनि भवो याकल्लोमः अन्निति पठितिभावस्तु
न गौणोऽस्मिन्नन्नोपनिपातनादिति हरदत्तादयः सौतंगमेरिति सुतंगमादिभ्यश्चातुरर्थिक इञ् शास्त्रीयमिति ननु अपत्याधिकारादन्यत्र लौकिकं गोत्रं गृह्यत इति चेद्
अत्राहुः पूर्वसूत्रे गोत्रग्रहणेन पौत्रप्रभृति गोत्रं गृह्यते कण्वादिभ्यो गोत्रे यः प्रत्ययो विहित स तदन्तेभ्य इति गोत्रप्रत्ययानुवादेन तत्राण्विधानात् कण्वादेः यश्च गर्गो

काश्यादिभ्यष्ठञ्ञिठौ ॥४।२।११६॥ इकार उच्चारणार्थः। काशिकी। काशिका। वैदिकी। वैदिका। आपदादिपूर्वपदात्कालान्तात्॥ आपदादिराकृतिगणः। आपत्कालिकी। आपत्कालिका॥ वाहीकग्रामेभ्यश्च ॥४।२।११७॥ वाहीकग्रामवाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ स्तः छस्यापवादः। कासीरन्नाम वाहीकग्रामः। कासीरिकी। कासीरिका। विभाषोशीनरेषु ॥४।२।११८॥ एषु ग्रामास्तद्वाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ वा स्तः। सौदर्शनिकी॥ सौदर्शनिका। सौदर्शनीया। ओर्देशे ठञ् ॥४।२।११९॥ उवर्णान्ताद्देशवाचिनष्ठञ्। निषादकर्षूः। नैषादकर्षुकः। कण इति ह्रस्वः। देशाकिंपटोऽच्छात्राः पाटवाः। ञिठं व्यावर्तयितुं देशग्रहणं। वृद्धाच्छं परत्वादयं बाधते। दाक्षिकर्षुकः। वृद्धात्प्राचाम् ॥४।२।१२०॥ प्राग्देशवाचिनो वृद्धादेवेति नियमार्थं सूत्रम्। आढकजम्बुकः। शाकजम्बुकः। नेह मल्लवास्तु। माल्लवास्तवः। धन्वयोपधाद्वुञ् ॥४।२।१२१॥ धन्वविशेषवाचिनो यकारोपधाच्च देशवाचिनो वृद्धाद्वुञ् स्यात्। ऐरावतं धन्व। ऐरावतकः। साङ्काश्यकाम्पिल्यशब्दौ वुञ्छणादिसूत्रे गण्यन्तौ। साङ्काश्यकः। काम्पिल्यकः। प्रस्थपुरवहान्ताच्च ॥४।२।१२२॥ एतदन्ताद्वृद्धाद्देशवाचिनो वुञ् स्यात्। छस्यापवादः। मालाप्रस्थकः। नान्दीपुरकः। पैलुवहकः। पुरान्तग्रहणमप्रागर्थं प्राग्देशे तूत्तरेण सिद्धं। रोपधेतोः प्राचाम् ॥४।२।१२३॥ रोपधादीकारान्ताच्च प्राग्देशवाचिनो वृद्धाद्वुञ् स्यात्। पाटलिपुत्रकः। ईतः। काकन्दकः॥ ९ यञन्तगर्गाः गर्गादिभ्यो यञित्यत्र

गोत्रे कुञ्जादिभ्य इत्यतो गोत्रे इत्यनुवर्तते तेन तु शास्त्रीयगोत्रमेव गृह्यते अपत्याधिकारस्थत्वात् तदेव हि यञिञोश्चेति सूत्रेऽनुवर्तत इति न ह्यचः अपवाद इति प्रतिषेध इ
त्यर्थः भरतानामग्रहणस्येति तेन इञः प्राचामिति भरतेभ्यो युवप्रत्ययस्य लुङ् भवति औद्दालकिः पिता औद्दालकायनः पुत्र इति आर्हादगोपुच्छेति सूत्रे कैयटः भवतः
ठगादिरपवादः स्यादनुशत्यादिः पठ्यते तार्थमित्यक्षरणादित्याद्यपेक्षायामह अप्रस्यमिति॥ ॥ काश्यादिभ्य इकार उच्चारणार्थ इति उभयत्र ञकार एवानुबन्धः स्यव्यस्या

सपाठस्तु स्त्रीप्रत्ययेविशेषार्थ इति भावः आपदादीति गणसूत्रमिदं अद्धादेवेति वृद्धाच्चेत्याचामेवेति विपरीतनियमस्तु नभवति अप्राग्देशवाचिनो वृद्धस्य उवर्णान्तस्याभावा
न्धन्वयोधन्वेति नस्वरूपपर्याययोर्ग्रहणं वृद्धत्वासंभवादित्याशयेनाह धन्वविशेषेति ऐरावतधन्वेति यद्यपि समानौ मरुधन्वानावित्यमरेण पुंस्त्वमुक्तं तथाप्याष्टकं नामधन्वेति
माध्यह्रस्वपाठान्नपुंसकोपि धन्वशब्दोस्येवेति बोध्यं उत्तरेणेति रोपधत्वादिति भावः॥ ॥ जनपद सचासौ अवधिश्चेति कर्मधारयाज्जनपदरूप एवावधिर्लभ्यते न
च जनपदत्वादेव सिद्धे अवधिग्रहणं व्यर्थं वुञेव यथा स्यान्नान्यदित्येतदर्थं तस्यावश्यकत्वात् अत एव जनपदावधिवाचिनस्त्रिगर्त्तशब्दात् गर्त्तोत्तरपदादिति छो न भ

जनपदतदवध्योश्च।४।२।१२४॥ जनपदवाचिनस्तदवधिवाचिनश्च वृद्धाद्वुञ् स्यात्। आदर्शकः। त्रैगर्त्तकः॥ अवृद्धादपि बहुवचनविष
यात्।४।२।१२५॥ अवृद्धाद्वृद्धाच्च जनपदतदवधिवाचिनो बहुवचनविषयात्प्रातिपदिकाद्वुञ् स्याद्वृद्धादणो वृद्धाच्छस्यापवादः। अवृद्धाज्जन
पदात्। आङ्गकः। अवृद्धाज्जनपदावधेः आजमीढकः। वृद्धाज्जनपदात्। दार्वकः। वृद्धाज्जनपदावधेः कालञ्जरकः। विषयग्रहणं किं। एकशेषेण
बहुत्वे माभूत्। वर्त्तनी च वर्त्तन्यश्च तासु भवो वार्त्तनः। कच्छाग्निवक्त्रवर्त्तोत्तरपदात्।४।२।१२६॥

देशवाचिनो वृद्धादवृद्धाच्च वुञ् स्यात्। दारुकच्छकः। कौण्डाग्नकः। सैन्धुवक्त्रकः। बाहु
वर्त्तकः। धूमादिभ्यश्च।४।२।१२७॥ देशवाचिभ्यो वुञ्। धौमकः। तैर्थकः। नगरात्कुत्सनप्रावीण्ययोः।४।२।१२८॥ नगरशब्दाद्वुञ् स्यात्कुत्सने प्रा
वीण्ये च गम्ये। नागरकः। चौरः शिल्पी वा। कुत्सेति किं। नागरा ब्राह्मणाः। अरण्यान्मनुष्ये।४।२।१२९॥ वुञ् अरण्यात्पदन्तस्यापवादः। पथ्यध्याय
न्यायविहारमनुष्यहस्तिष्विति वाच्यम्। आरण्यकः पन्था। वा गोमयेषु॥ आरण्यकाः। आरण्याः गोम
याः॥ विभाषा कुरुयुगन्धराभ्यां।४।२।१३०॥ वुञ्

वति किंतु अवृद्धादपि बहुवचनविषयादित्युत्तरसूत्रेण वुञेव भवतीत्याशयेनोदाहरति त्रैगर्त्त
क इति जनपदतदवध्योरिति सूत्रे जनपदावधिवाचिन उदाहरणं तुश्यामायनक इत्यादि बोध्यं नागरा ब्राह्मणा इति कश्चादिषु माहिष्मतीति संज्ञाशब्दसाहचर्यात्सं
ज्ञाभूत नगरशब्दस्यैव ठकञ् नागरेयक इति भाष्यमिति भावः विभाषा कुरु कुरुशब्दः कच्छादिषु पठ्यते तत्सामर्थ्यान्मनुष्ये ऽणः सिद्ध इति परिशेषाद्धि भाष्ये ग्रहणं युगं

...र्थमेव अवृद्धादपीति नियमार्थो वुञनेन न विकल्प्यते मनुष्यतत्स्थयोस्तु परत्वान्नित्य एव वुञ्॥ ॥ कौरवको मनुष्यः कौरवकमस्य हसितं एतदर्थमेव ... कच्छादौ पाठः अन्यथा अनपवादत्वाद्विभाषया वुञ् ... मद्रेषु किं ... भावः सैन्धवा इति ओर्देशे ठञ् ... वुञ्सिद्ध इति। मनुष्यतत्स्थयोरित्यनेन गहादिभ्यश्च ... देश

कौरवकः। कौरवः। यौगन्धरकः। यौगन्धरः। मद्रवृज्योः कन्।४।२।१३१॥ जनपदवुञोऽपवादः। मद्रेषु जातो मद्रकः। वृजिकः। कोपधादण्।४।२।१३२॥ आर्षिकः। कच्छादिभ्यश्च।४।२।१३३॥ देशवाचिभ्योऽण् वुञादेरपवादः। काच्छः। सैन्धवः। मनुष्यतत्स्थयोर्वुञ्।४।२।१३४॥ कच्छादिभ्य अणोऽपवादः कच्छे जातादि। काच्छको मनुष्यः। काच्छकं हसितम्। मनुष्येति किं। काच्छो गौः। अपदातौ साल्वात्।४।२।१३५॥ साल्वशब्दस्य कच्छादित्वाद्वुञ्सिद्धे नियमार्थमिदं। अपदातावेवेति साल्वको ब्राह्मणः। अपदातौ किं। साल्वः पदातिर्व्रजति। गोयवाग्वोश्च।४।२।१३६॥ साल्वात् वुञ्। कच्छाद्यणोऽपवादः। साल्विका यवागूः। साल्वको गौः। साल्वमन्यत्॥ गर्त्तोत्तरपदाच्छः।४।२।१३७॥ देशे। अणोऽपवादः। वृकगर्त्तीयं। उत्तरपदग्रहणं बहुच्पूर्वनिरासार्थं। गहादिभ्यश्च।४।२।१३८॥ छः स्यात्। गहीयः। मुखपार्श्वतसोर्लोपश्च॥ मुखतीयं। पार्श्वतीयं। अव्ययानां भमात्रे टिलोपस्यानित्यतां ज्ञापयितुमिदं। कुक् जनस्य परस्य च। जनकीयं। परकीयं। देवस्य च। देवकीयं। स्वस्य च। स्वकीयं। वेणुकादिभ्यः छण् वाच्यः॥ वैणुकीयं वैत्रकीयं। उत्तरपदकीयं। प्राचां कटादेः।४।२।१३९॥ प्राग्देशवाचिनः कटादेः छः स्यात्। अणोऽपवादः। कटनगरीयं। कटघोषीयं। कटपल्वलीयं। राज्ञः क च।४।२।१४०॥ वृद्धत्वाच्छे सिद्धे तत्सन्नियोगेन ककारादेशमात्रं विधीयते। राजकीयं। वृद्धादकेकान्तखोपधात्।४।२।१४१॥ अक इक एतदन्तात् खोपधाच्च वृद्धाद्देशवाचिनः छः स्यात्। आह्मणको नाम जनपदो यत्र ब्राह्मणा आयुधजीविनस्तत्र जातो ब्राह्मणकीयः। शाल्मलिकीयः॥

वाचिभ्यश्छः स्यात्। पूर्वपक्षादिशब्देभ्यस्तु देशवाचित्वाभावेऽपि पाठसामर्थ्याच्छः। मुखपार्श्वतसोरिति गणसूत्रमिदं सप्तम्यन्ताभ्यां माद्यादित्वात्तसिः। मुखतीयमिति मुखे जातमित्याद्यर्थे तसन्ताच्छः अव्ययानां भमात्रे टिलोपस्यानित्यत्वात् सकारस्य लोपे प्राप्ते इत्यकारलोपः। कुग्जनस्येति इदमपि गणसूत्रं स्वकीयमिति स्वार्थिककन्नन्तात् स्वशब्दाद्गहादेः

सि·कौ· टी·त· सु·त· २८

प्रकृतिगणत्वाच्छः देशवाचित्वाभावेपि पूर्वपक्षादिवद्बोध्यः अत एव लुब्योगाप्रख्यानादिति सूत्रे नहिस्वकीयस्यैवप्रख्याख्यानमिति न्यासकारोक्तिः संगच्छते केवलात्त्व
शब्दाद्दलेव सौवं द्वारादीनां चेत्यैच स्वीयमित्यत्र तु प्राक्क्रीताच्छः अंतरशब्दात्तु गहादित्वाच्छे तदन्तेन नञ्शब्दस्य समासे स्वार्थे कनि च नांतरीयकमिति भवति अवि
नाभूतमित्यर्थः वृद्धाट्ठकेकांत ब्राह्मणकीय इति कोपधादणित्यण् प्राप्तः॥ ॐ॥ आयो मुखीयमिति वाहीकग्रामलक्षणो ठञ्ञिठाविह प्राप्तौ ठञ्ञिठादेरिति आ
दिशब्देन रोपधेतोरित्यादिना प्राप्तस्य वुञः पर्वतीय इति। तत्र घोरं रघ्वोऽन्यपार्वतीयैर्यज्ञोरभूदित्यत्र तु पर्वतादन्यस्य राज्ञ इमे इत्यर्थे छांतादण् कृकणं भारद्वाजश
ब्दोत्र देशवचनः स च न प्रत्ययार्थः किंतु प्रकृतिविशेषणमित्याह भारद्वाजदेशेत्यादिना युष्मदस्मदोः त्यदादीनि चेति वृद्धत्वान्नित्ये छे प्राप्ते खञणोरपि विधा

अयो मुखीयं। कन्यापललदनगरग्रामह्रदोत्तरपदात्॥४।२।१४२॥ कन्यादिपञ्चकोत्तरपदाद्देशवाचिनो वृद्धाच्छः स्यात्। ठञ्ञिठादेरपवादः
दाक्षिकन्थीयं। दाक्षिपललदीयं। दाक्षिनगरीयं। दाक्षिग्रामीयं। दाक्षिह्रदीयं। पर्वताच्च॥४।२।१४३॥ पर्वतीयः। विभाषाऽमनुष्ये॥४।२।१४४॥ मनु
ष्यभिन्नेऽर्थे पर्वताच्छो वा स्यात् पक्षेऽण्। पर्वतीयानि पार्वतानि वा फलानि। अमनुष्ये किं। पर्वतीयो मनुष्यः। कृकणपर्णाद्भारद्वाजे॥४।२।१४५॥ भा
रद्वाजदेशवाचिभ्यामाभ्यां छः। कृकणीयं। पर्णीयं। भारद्वाजे किं। कार्कणं। पार्णं। युष्मदस्मदोरन्यतरस्यां खञ्च॥४।३।१॥ चाच्छः पक्षेऽण्
युवयोर्युष्माकं वा अयं युष्मदीयः। अस्मदीयः। तस्मिन्नणि च युष्माकास्माकौ॥४।३।२॥ युष्मदस्मदोरेतावादेशौ स्तः। खञि अणि च। यौष्माकीणः।
आस्माकीनः। यौष्माकः। आस्माकः। ॥

९ नार्थमिदं पक्षेऽणीति अन्यतरस्यांग्रहणादिति भावः तथा चैतेषु [illegible] यथा
संख्यं न भवतीति केचित् मनोरमायां तु यथासंख्यनिवारणाय योगविभागः कृतः तथा हि युष्मदस्मदोरन्यतरस्यां आभ्यां छो वा स्यात् त्यदादीनि चेति वृद्धत्वान्नित्ये छे
प्राप्ते विकल्पोयं ततः खञ्च एवमुत्तरसूत्रेपि योगविभागो बोध्यः तेन आदेशयोः खञणभ्यां यथासंख्येन त्यादि युवयोरित्यादि एकवचने तवकममकादेशविधाना
त्रैकवचनांतेन विग्रहोत्र [illegible] तस्मिन्नणि च तस्मिन्निति सामर्थ्याद्विहितः खञ् निर्दिश्यते न तु चानुकृष्टः। निमित्तयोरादेशौ प्रति यथासंख्यं तु न भवत्येव खञणोरि
तिवक्तव्ये पृथग्विभक्तिनिर्देशसामर्थ्यात् स्थान्यादेशयोस्तु इष्यत एव तत्॥

२८

तवक इह पूर्ववदेव निमित्तं [illegible] खञणौ शरदेशी प्रतिपद्यासंख्यं न भवति किन्तु स्थान्यादेशयोरेव त्याशयेनोदाहरति तावकीनः मामकीनः इति परावरा परावरा धर्मान् इत्यस्य इत्ये
षवन्नाव्ययपूर्वग्रहणं पूर्वविप्रतिषेधसूचनार्थं तेन दिक्शब्दयोः परावरयोरर्द्धशब्देन समासे उत्तरसूत्रेण प्राप्तमपि ठञ्यत्तो बाधित्वा यदेव भवति दिक्पूर्वपदस्य
ग्रहणं स्वरूपविधिनिरासार्थमित्याहुः असाम्प्रतिके सम्प्रत्यव्ययन्याय्ये वर्तते अनागतश्चातीतश्चेति रिक्तः पश्चात्सर्वा एव संप्रतिपत्तेर्व्यत्ययं च रात्रेर्व्यत्ययं न यादृशं नातं न न्यूनो नातिरिक्तस्य

तवकममकावेकवचने।४।३।३।एकार्थवाचिनोर्युष्मदस्मदोस्तवकममकौ स्तः खञ्यणि च। तावकीनः। तावकः। मामकीनः। मामकः। छे तु मदीयो त्वदीयः
परयोः स्तः।७।१।९८॥ मपर्यन्तयोरेकार्थयोस्त्वमौ स्तः प्रत्यये उत्तरपदे च त्वदीयं मदीयः त्वत्पुत्रः मत्पुत्रः अर्द्धाद्यत्।४।३।४। अर्द्ध्यः परावराधमोत्तमपूर्वाच्च।४।३।५॥
परार्द्ध्यं। अवरार्द्ध्यं। अधमार्द्ध्यं। उत्तमार्द्ध्यं॥ दिक्पूर्वपदाट्ठञ्च।४।३।६॥ चाद्यत्। पौर्वार्द्धिकं। पूर्वार्द्ध्यं। ग्रामजनपदैकदेशादञ्ठञौ।४।३।७॥ ग्रामैकदेश
वाचिनो जनपदैकदेशवाचिनश्च दिक्पूर्वपदाद्धादरञ्ठञौ स्तः। इमे स्मा कं ग्रामस्य जनपदस्य वा पौर्वार्द्धाः। पौर्वार्द्धिकाः। ग्रामस्य पूर्वस्मिन्नर्द्धे भवा इ
ति तद्धितार्थसमासः ठञ्ग्रहणं [illegible] प्रार्थं। अञ् चेत्युक्तेर्य्यनोप्यनुकर्षस्सम्भाव्येत। मध्यान्मः।४।३।८॥ मध्यमः। असाम्प्रतिके।४।३।९॥ मध्यशब्दा
दकारः प्रत्ययस्स्यात्साम्प्रतिकेर्थे। उत्कर्षापकर्षहीनो मध्यो वैयाकरणः। मध्यन्दारु। नातिह्रस्वन्नातिदीर्घमित्यर्थः। द्वीपादनुसमुद्रं यञ्।४।३।१०॥
समुद्रस्य समीपे यो द्वीपस्तद्विषयाद्द्वीपशब्दाद्यञ् स्यात्। द्वैप्यं। द्वैप्या। कालाट्ठञ्।४।३।११॥ कालवाचिभ्यष्ठञ् स्यात्। मासिकं। सांवत्सरिकं। सायम्प्रा
तिकः। पौनःपुनिकः। कथं तर्हि शार्वरस्य तमसो निषिद्धये इति कालिदासः। अनुदितौ भगवानिति भारविः। समानकालीनं। प्राक्कालीनमित्यादि च
अपभ्रंश एवेति प्रामाणिकाः॥ तत्र जात इति यावत्कालाधिकारः। श्राद्धे शरदः।४।३।१२॥ ठञ् स्यात्। ऋत्वणोऽपवादः। शारदिकं श्राद्धं॥ विभाषा रो
गातपयोः।४।३।१३॥ शारदिकः। शारदो वा रोगः आतपो वा। एतयोः किं। शारदं दधि। निशाप्रदोषाभ्यां च।४।३।१४॥ वा ठञ् स्यात्। नैशिकं॥
संप्रत्यर्थः इदानीमित्यर्थे तु प्रसिद्धमेव तर्हि संप्रतीदानीमिति समानार्थत्वात् ततः प्रत्ययाद्वितीयस्त्वार्थः यद्विनयादित्वात्स्वार्थे ठगापितेन सांप्रतं साम्प्रतिकमिति पर्यायौ उत्कर्षेत्यादि न्याय्यः
विद्यमान एव सम्प्रतिशब्दो गृह्यते इति भावः द्वीपादनुसमुद्रं [illegible] यञ् अनु समुद्रं अनुर्यत्समया इत्यव्ययीभावः सप्तम्यन्तं चेदं विद्यमानक्रियाद्वारा द्वीपविशेषणमित्याशय

सि॰कौ॰
टी॰त॰
सु॰त॰
३०

नाह समुद्रसमीपे यो द्वीप इति कच्छादयो मनुष्यवुञ्श्चापवादोऽयं अनुसमुद्रं किं द्वैपमन्यत् कच्छाद्यण् द्वैपको मनुष्यः मनुष्यतत्स्थयोरिति वुञ् द्वैप्येति यञ्श्चेति ज्ञेयं लभ
वति अपत्याधिकारस्थादेवयञोऽसिविति प्रागेवोक्तत्वात् कालाद्वञ् स्वरूपस्यैव न ग्रहणं संधिवेलादिसूत्रेण संधिवेला त्रयोदशी चतुर्दशी प्रभृतिभ्यो वृद्धेभ्योऽपि ठ
ञोऽनार्थमविधानात् किं तु सर्वेषामपि कालवाचिनां ग्रहणमित्याशयेनाह कालवाचिभ्य इति पर्यायाणां च न ग्रहणमिति पदमंजर्यादिषु स्थितं
तदसत् कालिकः संबंधः कालिकी व्याप्तिरित्यादिप्रयोगानापत्तेः न च विशेषाणामेव ग्रहणं संधिवेलादिभ्य एव विधानं ज्ञापकमिति वाच्यं तस्य स्वरूपमात्रग्रहणनिरा
सकत्वेनापि साफल्यात् गौणमुख्यन्यायस्त्विह नाश्रीयते तेन कर्दवपुष्यसाहचर्यात्कर्दवपुष्यः कालः व्रीहिपलालसाहचर्याद्व्रीहिपलालः कालः तत्र भवं कार्दवपु
ष्पिकं व्रैहिपलालिकमित्याकरः अत्र हि प्रमाणं संधिवेलादिसूत्रे अनेन कालग्रहणेन नक्षत्राणां विशेषणमेवेत्याहुः न च पुष्यादिशब्दानां कालो मुख्य एवार्थः

श्वसस्तुट् ।४।३।१५॥ श्वस्शब्दाट्ठञ् स्यात्तस्य तुडागमश्च । द्वारादीनां च ।७।३।४॥ द्वारस्वरव्यल्कशस्वस्ति   स्फ्यकृत्स्वादुमृदुश्वस्श्वन्स्व ए-
षां न वृद्धिरैजागमश्च । शौवस्तिकं । सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् ।४।३।१६॥ सन्धिवेलादिभ्य ऋतुभ्यो नक्षत्रेभ्यश्च कालवृत्तिभ्योऽण् स्यात् । सन्धि-
वेलायाम्भवं सान्धिवेलं । ग्रैष्मं । तैषं । सन्धिवेला संध्या अमावस्या त्रयोदशी चतुर्दशी पौर्णमासी प्रतिपत् । सम्वत्सरात्फलपर्वणोः ॥ साम्वत्सरं
फलं । पर्व वा । साम्वत्सरिकमन्यत् ॥ ॥

ऽऽ लुबविशेष इति व्युत्पादनात् तथा च कालविशेषणमुक्तार्थेन प्रमाणमिति वा [illegible] पुष्यादिसमीपस्थचंद्रम
सा युक्ते काले पुष्यादिशब्दानां गौणत्वात् लुबविशेष इति शास्त्रमपि गौणवृत्तित्वान्नास्य व्यापकमेवेति दिक् एवं स्थिते कालवाचिभ्य इति मूलस्य कालसमीपार्थकेभ्य इति फलि
तोऽर्थः श्राद्धमिति भक्त्या क्रियमाणं पित्र्यं कर्मेत्यर्थः श्रद्धा श्रद्धा चास्यास्तीति मत्वर्थीयेन व्युत्पादितः श्राद्धो वास्तुरूपस्तु न गृह्यते अनभिधानात् ॥ ❀ ॥ श्वसस्तुट् विभाषेत्यनुवर्तना
दाह ठञस्तुडागम इत्यादिना त्यबपि विकल्पेन विहितः आभ्यामुक्तेभ्यो लावपि स एव शौवस्तिकमिति न चान्तरंगत्वात् तुड्ठस्य प्रत्ययादित्वाभावात्क मठ
इकादेशो न स्यात् न च परत्वादिकादेशे तस्य तुडिति वाच्यं आदेशात्प्रागेवान्तरंगत्वात् तुटः प्रवृत्तेः इकादेशस्य त्वंगत्वेन बहिरंगत्वात् सूत्रभंगेन
तु किं हि क्रियमाणे त्विसुसुक्तान्तात्क इति कादेशप्रसंग इति चेत्सत्यं वुञ्छणादिषु ठञ्च श्वित्वेनैकादेशान्तरंगेभ्यो बलवानिति ज्ञापितत्वात् अन्यथा [illegible] त्यया [illegible]

३०

चिरंतनमिति चिरशब्दस्यापिप्रत्ययसन्नियोगेनमांतत्वंनिपात्यत इतिभावः अत्रवदंति स्वरादौपाठदव्ययत्वादेवसिद्धे सूत्रेचिरमित्येतद्व्यर्थं नचादन्ताच्चिरशब्दाद्दु
ष्यादितिवाच्यं तेनबाधादिति एदंतत्वमिति प्राह्णः सोढोऽस्यप्राह्णेतनइत्याद्यर्थं तत्रहिसप्तमीनास्तिजातार्थघकालतनेष्वित्यलुकापिसिद्धं चिरत्नमिति सूत्रेचिर
शब्दस्योपादानादृट्युट्युलावपिस्तः नचैवंसूत्रेचिरशस्यप्रत्याख्यानंनसंभवतीतिवाच्यं मांताव्ययादेवट्युट्युल्विधौतत्संभवात् परुत्पूर्वस्मिन्वत्सरे परारिपूर्व
तरे अग्रादि डिमचोडित्वंस्पष्टार्थं तत्रजातः ननुशेषइत्यस्यलक्षणत्वोक्तेश्चातुरर्थिकरूपेऽश्वादयः शब्दइत्यादौ विवजातादिष्वर्थेष्वणादयः सिद्धाः अधिकाराच्च

चिरन्तनं। प्राह्णप्रगयोरेदन्तत्वान्निपात्यते। प्राह्णेतनं। प्रगेतनं। दोषातनं। दिवातनं। चिरपरुत्परारिभ्यस्त्नो वक्तव्यः। चिरत्नं। परुत्नं। परारित्नं
अग्रादिपश्चाड्डिमच्॥ अग्रिमं। आदिमं। पश्चिमं। अन्ताच्च॥ अन्तिमं। विभाषापूर्वाह्णापराह्णाभ्याम्।४।३।२४॥ आभ्यां ट्युट्युलौ वास्तस्तयोस्तुट् च पक्षे ठञ्
पूर्वाह्णेतनं। अपराह्णेतनं। घकालतनेषुकालनाम्न इत्यलुक्। पूर्वाह्णः सोढोऽस्येति विग्रहे तु पूर्वाह्णतनं। अपराह्णतनं। पौर्वाह्णिकं। आपराह्णिकं। तत्रजातः
४।३।२५॥ सप्तमीसमर्थाज्जात इत्यर्थेऽणादयो घादयश्च स्युः स्रुघ्ने जातः स्रौघ्नः। औत्सः। राष्ट्रियः। अवारपारीण इत्यादि॥ प्रावृषष्ठप्।४।३।
२६॥ एण्यस्यापवादः। प्रावृषि जातः प्रावृषिकः। संज्ञायां शरदो वुञ्।४।३।२७॥ ऋत्वणोऽपवादः। शारदकाः दर्भविशेषा मुद्गविशेषाश्च। उत्त
रपदस्य।७।३।१०॥ अधिकारोऽयं हनस्त इत्यस्मात्प्राक्। अवयवादृतोः।७।३।११॥ अवयववाचिनः पूर्वपदादृतुवाचिनोऽचामादेरचो वृद्धिः स्या
त् ञिति णिति किति च तद्धिते परे। पूर्ववार्षिकः। अपरहैमनः। अवयवात्किं। पूर्वासु वर्षासु भवः पौर्ववर्षिकः॥ ॥ ॥

घादयोऽपि च जातादिष्वेवाणादय इति नियमार्थं जाताद्यर्थनिर्देश आवश्यकः अन्यथा तत्रास्ते तत्र शेते इत्याद्यर्थेऽपि प्रत्ययः स्यादिति वाच्यं चातुरर्थिकमित्याद्यसिद्धाप
त्तेः स्रुघ्ने आस्ते स्रुघ्ने शेते इत्यादौ त्वनभिधानादेव तद्धितो न भविष्यति अंगुल्या खनति वृक्षमूलादागत इत्यादौ यथा समर्थविभक्तयस्त्वाक्षेपादेव लभ्यन्ते चातुरर्थिकमित्यत्र
तेषां यथा तस्मात्तेन कृत इत्याद्यर्थनिर्देशो व्यर्थ इति चेन्मैवं प्रावृषष्ठविन्याद्यपवादार्थं तदावश्यकत्वात् येतु निरपवादा अर्थनिर्देशाः कृतलब्धक्रीतकुशला इत्यादयः =
यस्ते तु व्यर्था एवेति दिक् संज्ञायां शरदः समुदायेन चेत्संज्ञा गम्यत इत्यर्थः संज्ञायां किं शारदं सस्यं संज्ञायामित्येतत्तु तत्रलब्धेत्येतत्पर्यन्तेष्वेचिरदनुवर्तयंतीति वृत्तिकृ

पूर्ववार्षिक इत्यादि वर्षाणां पूर्वः हेमन्तस्यापर इति विग्रहे पूर्वापराधरोत्तरमित्येकदेशिसमासः पूर्वासु इति तद्धितार्थे समासः॥ ॐ॥ ऋतोर्वृद्धिमद्विधाविति ऋतुवाचि
नः शब्दाद्वृद्धिनिमित्तकप्रत्ययविधाने तदन्तविधिर्वाच्यः स चेदृतुवाचिशब्दोऽवयवेभ्यः पर इत्यर्थः पूर्वत्रेति पूर्ववार्षिकः अपरहैमन इत्यत्र तथा च वर्षाभ्यष्ठक स
र्वैकाच्च तल्लोपश्छन्दस्याभ्यां क्रमेण ठञणौ भवतः वृद्धिमद्विधौ किं पूर्वशारदं प्रावृषेण्य इत्यत्र तदन्तविध्यभावादिह ऋत्वणेव इहत्विति पौर्ववार्षिक इत्यत्र ते
षां च हस्वाला दृष्टिति ठञेवेति भावः अवयवत्वाभावादिति अन्यथा पूर्वासु वर्षास्विति सामानाधिकरण्यं न संगच्छेतेति भावः जनपदे तदवध्योरिति तस्मिन्नेनु
वर्तमाने अंगदेशा इति बहुवचनविषयादित्यनेनेत्यर्थः पौर्वमद्र इति मद्रेभ्योऽञित्यञ् पूर्वाह्णक इति विभाषा पूर्वाह्णापराह्णाभ्यामित्यस्यापवादः आर्द्रको मूलक

ऋतोर्वृद्धिमद्विधाववयवानामिति तदन्तविधिः पूर्वत्र इह तु नावयवत्वाभावात्। सुसर्वार्द्धाज्जनपदस्य ७।३।१२॥ उत्तरपदस्य वृद्धिः। सुपा
ञ्चालकः। सर्वपाञ्चालकः। अर्द्धपाञ्चालकः। जनपदे तदवध्योरिति वुञ्। सुसर्वार्द्ध दिक्शब्देभ्यो जनपदस्येति तदन्तविधिः। दिशोऽ
मद्राणाम् ७।३।१३॥ दिग्वाचकाज्जनपदवाचिनो वृद्धिः। पूर्वपाञ्चालकः। दिशः किं। पूर्वः पञ्चालानामयं पौर्वपञ्चालः। अमद्राणां किं।
पौर्वमद्रः। योगविभाग उत्तरार्थः। प्राचां ग्रामनगराणाम्। ७।३।१४॥ दिशः परेषां ग्रामवाचिनां नगरवाचिनां चाङ्गानामवयवस्याचो वृद्धिः
पूर्वेषुकामशम्यां भवः। पूर्वैषुकामशमः। नगरे। पूर्वपाटलिपुत्रकः। पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्वुन्। ४।३।२८॥ पूर्वाह्णकः।
अपराह्णकः। आर्द्रकः। मूलकः। प्रदोषकः। अवस्करकः। पथः पन्थ च। ४।३।२९॥ पथि जातः पन्थकः। अमावास्याया वा। ४।३।३०॥ अमावा

इति अस्यत्रापवादः प्रदोषक इति निशाप्रदोषाभ्यां चेत्यस्यापवादः अवस्करक इति औत्सर्गिकस्यापवादः ये तु संज्ञायामित्येतत्कृतलब्धेत्येतत्पर्यन्तमनुव
र्तयन्ति तन्मते असंज्ञायां यथायथं अणादयो घादयश्च बोध्याः अमावास्यायां वा संधिवेलाद्यणोऽपवादः अमावस्यदन्यतरस्यामिति सूत्रेणामापूर्वाद्वसेर्ण्यै
ति वृद्धोपधस्य ह्रस्वत्वं निपात्यत इति ह्रस्वमध्यस्याप्यमावास्याशब्दस्येह ग्रहणं प्रकृतिग्रहणेन विकृतेरपि ग्रहणात् अमावस्यकः अमावस्यः यत्त्विह सूत्रे सं
धिवेलादिषु च ह्रस्वोपधं पठन्ति तेषां तु दीर्घोपधस्य नस्यादित्यग्रहणेन प्रकृतेरग्रहणादिति हरदत्तादयः वस्तुतस्तु वृद्धिप्रकृतिभूतस्यानुकरणमिदमि

विशाखं अषाढः बहुलः कृत्तिकावाची बहुलाशब्दः श्रावणन्तस्य समाहारद्वंद्वेन ह्रस्वनिर्देशः सूत्रे उपसंख्यानमिति लुक् इति शेषः । चित्रेति लुक् द्विजेति लुकि पुनश्छापटानाविति विधानसामर्थ्यादेतयोर्न लुक् स्यान्नांत गोशाले त्यत्र विभाषा सेनेति नपुंसकत्वे ह्रस्वत्वं तस्मा ह च यान्तवर शाले ष्वेवमेव न चैवं स्त्रीत्वप ह्रस्व स्यादिति शंक्यं लिंगविशिष्टपरिभाषया तत्रापि लुक् सिद्धेरित्याहुः यद्यपि टावंतयोः पाठोप्येकदेशविकृतन्यायेन ङीवर्षीष्टं सिद्ध्यति तथापि लाघवात् ह्रस्वपाठः नपुंसकत्वे ह्रस्वत्वमिति सूत्रे इति शेषः ॥ ॥ वत्सशाले जात इति वत्सशालायामित्यपि बोध्यं इत्यादीति आदिशब्दादभिजित् आभिजितः अश्वयुक् आश्वयुजः प्रतिप्रसूत इति कालाट्ठञिति वर्त्तमाने यऔत्सर्गिकोण संधिवेलादिसूत्रेण पुनरभ्यनुज्ञात इत्यर्थः कृतलब्ध ननु कृतक्रीतत्वे जा

वत्सशाले जातः वत्सशालः । वात्सशालः इत्यादि । जातार्थे प्रतिप्रसूतोऽण्वा डित् कर्त्तव्यः ॥ शतभिषजः । शतभिषक् । नक्षत्रेभ्यो बहुलम् ॥ ४ । ३ । ३७ ॥ जातार्थे प्रत्ययस्य बहुलं लुक् स्यात् । रोहिणः । रौहिणः । कृतलब्धक्रीतकुशलाः ॥ ४ । ३ । ३८ ॥ तत्रेत्येव । स्रुघ्ने कृतो लब्धः क्रीतः कुशलो वा स्रौघ्नः । प्रायभवः ॥ ४ । ३ । ३९ ॥ तत्रेत्येव । स्रुघ्ने प्रायेण बाहुल्येन भवति स्रौघ्नः । उपजानूपकर्णोपनीवेष्ठक् ॥ ४ । ३ । ४० ॥ औपजानुकः । औपकर्णिकः । औपनीविकः ॥ सम्भूते ॥ ४ । ३ । ४१ ॥ स्रुघ्ने सम्भवति स्रौघ्नः । कोशाड्ढञ् ॥ ४ । ३ । ४२ ॥ कौशेयं वस्त्रं । कालात्साधुपुष्प्यत्पच्यमानेषु ॥ ४ । ३ । ४३ ॥ हेमन्ते साधुः हैमन्तः प्राकारः । वसन्ते पुष्प्यन्ति वासन्त्यः कुन्दलताः । शरदि पच्यन्ते शारदाः शालयः । उप्ते च ॥ ४ । ३ । ४४ ॥ हेमन्ते उ

तलब्धत्वयोर्व्याप्य इति किमनयोर्ग्रहणेन सत्यं कृतत्वे तत्वप्रकारकबोधेपि प्रत्ययार्थतद्ग्रहणं अतएव जाते लुग्भाजामपि कृते न लुक् प्रायकादाचित्कभवनो श्रयः प्रा यभवे त्वसेन वक्ष्भव इत्यनेन गतार्थतेत्याहुः भाष्ये तु ... त्यानमेतत् प्रायभवग्रहणमनर्थकं तत्रभवेन कृतत्वादिति उपजानु इत्येते ष्वमीसामीप्येऽव्ययीभावाः तेषां समाहा ... ठेमोत्रं पुंस्त्वं संभवे इह तत्रादिना संभावना आधार ... सायस्यानतिरेक इति इयमप्यार्थीयते स्रौघ्न इति स्रुघ्ने संभाव्यते तत्परिमाणेन तिरिक्तो वा सेनादिरित्यर्थः कोशात् कौशेयमिति वस्त्रविशेषे योगरूढोयं कोशसंभव ... सत्कार्यवादाभिप्रायेण मतांतरं तु विकारप्रक इणेण्यादञित्यस्यानंतरं कोशाड्ढञिति पठितव्यं तथा च वार्त्तिकं विकारे कोशाट्ठञ् संभूतेत्वर्थानुपपत्तिरिति कालात् पुष्प्यदिति दैवादिकः शत्रं तस्मादाह पुष्प्यंतीति उप्ते च कालादित्येव योगविभाग उत्तरार्थः उप्तं इति सूत्रे भूतकाले

सि·कौ·
टी·त·
सु·त·
३३

मयूराः कलापिनो भवन्ति स उपचारात्कलापी तत्र देयमृणं कलापकं अश्वत्थस्य फलमश्वत्थः तद्युक्तः कालोप्यश्वत्थः यस्मिन्काले॥ मू· ५॥
तत्रमितिभावः आश्वयुज्यावुञ् ञकारः स्वरार्थः उत्तरत्र वृद्ध्यर्थश्च॥ ॐ॥ आश्वयुज्यामिति अश्विनीनक्षत्रपर्यायो अश्वयुक् तद्युक्ता पौर्णमासी आश्वयुजी तत्रेत्यर्थः
देयमृणे ऋणे किं मासे देयामिक्षा अश्वत्थ इति फले लुक् इह पुल्लिंगनिर्देशाय द्वयम्युक्तस्तथापि फले अश्वत्थशब्द औपचारिक इत्याशयेन पुल्लिंगप्रयोग इत्याहुः

आश्वयुज्या वुञ्। ४।३।४५॥ ठञोऽपवादः। आश्वयुज्यामुप्ता आश्वयुजका माषाः॥ ग्रीष्मवसन्तादन्यतरस्याम्। ४।३।४६॥ पर्से ऋत्वण्। ग्रैष्मकं। ग्रैष्मं। वासन्तकं। वासन्तं॥ देयमृणे। ४।३।४७॥ कालादित्येव। मासे देयमृणं मासिकं। कलाप्यश्वत्थयवबुसाद्वुन्। ४।३।४८॥ यस्मिन्काले ऽश्वत्थाः फलन्ति तत्र देयमश्वत्थकं। यस्मिन्यवबुसमुत्पद्यते तत्र देयं यवबुसकं॥ ग्रीष्मावरसमाद्वुञ्। ४।३।४९॥ ग्रीष्मे देयमृणं ग्रैष्मकं। आवरसमकं। संवत्सराग्रहायणीभ्यां ठञ्च। ४।३।५०॥ चाद्वुञ्। सांवत्सरिकं। सांवत्सरकं। आग्रहायणिकं। आग्रहायणकं। व्याहरति मृगः। ४।३।५१। कालवाचिनः सप्तम्यन्ताद्व्याहरतीत्यर्थे अणादयः स्युः। यो व्याहरति स मृगश्चेत्। निशायां व्याहरति नैशो मृगः। नैशिकः। तदस्य सोढम्। ४।३।५२। कालादित्येव। निशासहचरितमध्ययनं निशा तत्सोढमस्य नैशिकः। नैशः। तत्र भवः। ४।३।५३॥ स्रुघ्ने भवः स्रौघ्नः राष्ट्रियः। दिगादिभ्यो यत्। ४।३।५४॥ दिश्यम्। वर्ग्यम्। शरीरावयवाच्च। ४।३।५५॥ दन्त्यं। कर्ण्यं॥ प्राचां नगरान्ते। ७।३।२४॥ प्राचां देशे नगरान्तेऽङ्गे पूर्वपदस्योत्तरपदस्य चामादेरचो वृद्धिः ञिति णिति किति च। सुह्मनगरे भवः सौह्मनागरः। पौण्ड्रनागरः। प्राचां किं। मद्रनगरमुदक्षु तत्र भवः माद्रनगरः॥ जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम्। ७।३।२५॥ जङ्गलाद्यन्तस्याङ्गस्य पूर्वपदस्याचामादेरचो वृद्धिरुत्तरपदस्य वा ञिति णिति किति च। कुरुजङ्गले भवं कौरुजङ्गलं। कौरुजाङ्गलं। वैश्वधेनवं। वैश्वधैनवं। सौवर्णवलजं। सौवर्णवालजं। दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्। ४।३।५६॥ दार्तेयं। कौक्षेयं कलशिर्घटः तत्र भवं कालशेयं

ठञ्चेति संवत्सराग्रहायणीभ्यां चेत्येव सुवचं न चेति वक्तव्ये ठञ्ग्रहणं संधिवेलादिषु संवत्सरात्फलपर्वणोरि
ति पठ्यते तत्र फले ऋणत्वेन विवक्षिते अणं बाधित्वा ठञेव यथा स्यादिति काशिकादावुक्तमिति वाच्यं तस्मै हितास्तद्धिता इत्यन्वर्थसंज्ञाकरणबलेनान्यापि प्रत्य
योन भवेदिति वक्तुं शक्यत्वादिति नव्याः नैशिक इति निशाप्रदोषाभ्यां चेति वा ठञ् तत्र भवः कालादिति निवृत्तं कालसंबद्धस्य निवृत्त्यैव पुनस्तत्र ग्रहणात् ॥

नचपूर्वसूत्रस्थस्यतदित्यस्यव्यावृत्त्यैतत्रग्रहणमस्त्विति वाच्यं तदस्येतिसूत्रस्येतअत्रत्रापिसुपठत्वात् यद्यपिभूधातुरत्यन्तावपिवर्त्ततेतथापीहसत्तार्थएववर्तते
तत्र जात इति पृथग्ग्रहणादिति बोध्यं दिगादिभ्यो दिश् वर्ग पूग पक्ष रहस उखा साक्षिन्। आदि अंत मुख जघन मेघ यूथ उदकात्संज्ञायांन्यायवंश कालेत्या
दिदिगादिः मुखजघनयोः पाठोत्रापशरीरावयवार्थः सेनायामुखेजघनेचभवंमुख्यंजघन्यं प्राचांनगरान्ते सप्तमीनिर्दिष्टाद्दंगेस्यत्यधिकृतमपिसत्सम्पन्नेनविपरिण
म्यतेतदाह नगरांतेग्रामे इति दृतिकुक्षि इति चर्मविकारः शरीरावयवविशेषश्च कुक्षिशब्दो धूमादिस्तेतो धूमादिभ्यश्चेतिवुञिप्राप्ते अनन्तढञ् कलशिर्मन्थपात्रंकल
शिमुदधिगवर्षिष्टवालेइयन्तीतिमाघः वस्तिर्नाभेरधोद्वयोरित्यमरः तत्रभववालेयं अस्तीतितिङ्न्तप्रतिरूपकोनिपातः सचतिङन्तेनसमानार्थोभिन्नार्थश्च आद्यो
यथा अस्तिक्षिरागोः द्वितीयोयथा अस्तिमान्धनमानित्यर्थः तदिहाविशेषाद्भयोरपिग्रहणमाकेयमिति हरदत्तः अहोभवमाहेयंत्रिष्वाहेयंविषास्थ्या इत्यमरः॥

ग्रीवाभ्योऽण्च।४।३।५७॥ चात्ढञ्।ग्रैवेयं।ग्रैवं।गम्भीराञ्ञ्यः।४।३।५८॥ गाम्भीरेभवंगाम्भीर्यं।अव्ययीभावाच्च।४।३।५९॥ परिमुखम्भवंपा
रिमुख्यं।परिमुखादिभ्यएवेष्यतेनेह।औपकूलः। अन्तःपूर्वपदाट्ठञ्।४।३।६०॥ अव्ययीभावादित्येव।वेश्मनिअन्तः।अन्तर्वेश्मं।तत्रभवं

ग्रं॥ ग्रीवाभ्योण्च शरीरावयवाच्चेतियतोपवादः ग्रीवाशब्दोधमनीसंघातेवर्त्तते तत्रउद्भूतावयव संघातविवक्षया ९ आन्तर्वेश्मिकम्।आन्तर्गणिकं॥
सूत्रेबहुवचनं तिरोहितावयवसंघातविवक्षायांत्वेकवचनान्ताद्प्यण्ढञौस्तःएव ग्रैवेयमित्यादि ग्रीवासुभवंग्रीवायामितिवाविग्रहः गंभीराञ्ञ्यः पंचजनादुपसं।
ख्यानं पांचजन्यं परिमुखमिति यदिपरिशब्दादिहवर्जनंगम्यते तदाअपपरिबहिरंचवः पंचम्येत्यव्ययीभावः यदिसर्वतोभावस्तदात्वसमासएवनिपातनाद्व्ययी
भावइत्याहुः परिमुखादिभ्यएवेति अयंभावः दिगादिगणेबंतरंपरिमुखपरिहनुपर्योष्ठपर्युलूखलेत्यादिपरिमुखादिगणःपठ्यतेतत्रामध्यादिहसूत्रेअव्ययीभावशब्दे
नेपरिमुखादिरेवगृह्यतेतस्यगणस्यकार्यान्तराभावादिति नन्वेवंपरिमुखादेरितिसूत्रविशिष्यैवक्रियतांकिमनेनप्रयासेनउत्तरत्राव्ययीभावादित्यस्यापेक्षायामपि
तत्रैवतत्स्यगणोक्तिस्यादितिचेदत्राहहरदत्तः परिमुखादिरित्युच्यमानेबहुव्रीहितत्पुरुषेभ्योपिन्यःस्यात् अव्ययीभावग्रहणात्तुतेभ्योणेवभवतीतिपरिमुखादिग
णप्रतिशाखशब्दोपिबोध्यः तथाचशाखव्याख्याविति धाते प्रतिशाखंभवंप्रातिशाख्यं अव्ययीभावाच्चेतिञ्य इतिमाधवः अंतर्वेश्ममिति नपुंसकादन्यतरस्यामिति

अध्यात्ममिति अनश्चेतिटचूकर्णललाटात्‌यत्नोपवादः अलुकारे किं कर्ण्ये ललाव्यं तस्यव्याख्यान इतिच व्याख्यायतेयेनमव्याख्यानः करणेल्युट्‌ इतिशब्दोवाक्यार्थप रामृशतितत्समीपेश्रूयमाणेश्चकारस्तत्रभवइतिवाक्यार्थमाक्षिपति नामप्रतिपादकं तच्चशक्त्यालक्षणयावेत्यत्रनाग्रहः तथाचषष्ठ्यं ताद्व्याख्यानकरणेर्थेसमर्थं

अध्यात्मादेष्ठञिष्यते॥ अध्यात्मेभवमाध्यात्मिकं। अनुशतिकादीनाञ्च। ७।३।२०॥एषामुभयपदवृद्धिस्यात्‌।ञितिणितिकितिच। आधि दैविकम्‌। आधिभौतिकं। ऐहलौकिकं। पारलौकिकं। अध्यात्मादिराकृतिगणः॥ देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्‌। ७।३।१॥ ए षांपञ्चानांवृद्धिप्राप्तावादेरचआत्‌।ञितिणितिकितिच। दाविकं। देविकाकूलेभवा दाविकाकूलाः शालयः। शिंशपाया विकारः शांशपश्चमस· पलाशादिभ्योवेत्यण्‌।दित्यौहः। दैत्यौहं। दीर्घसत्रेभवं दार्घसत्रं। श्रेयसिभवं श्रायसं। ग्रामात्पर्य्यनुपूर्वात्‌। ४।३।६१॥ठञ्स्यात्‌। अव्य यीभावादित्येव। पारिग्रामिकः। आनुग्रामिकः॥ जिह्वामूलाङ्गुलेश्छः। ४।३।६२॥ जिह्वामूलीयं। अङ्गुलीयं। वर्गान्ताच्च। ४।३।६३॥ कवर्गी यं। अशब्देयत्खावन्यतरस्यां। ४।३।६४॥पक्षेपूर्वेणछः। मद्वर्ग्यः। मद्वर्गीणः। मद्वर्गीयः। अशब्देकिं। कवर्गीयोवर्णः। कर्णललाटात्क नलंकारे। ४।३।६५॥ कर्णिका। ललाटिका। तस्यव्याख्यान इतिचव्याख्यातव्यनाम्नः। ४।३।६६॥ सुपांव्याख्यानः सौपोग्रन्थः। तैङः। कार्तः। सुप्सुभवंसौपं। बह्वचोऽन्तोदात्ताट्ठञ्‌। ४।३।६७॥ षत्वणत्वयोर्विधायकंशास्त्रंषत्वणत्वं। तस्यव्याख्यानस्तत्रभवोवाषात्वणत्विकः। क्रतुयज्ञे भ्यश्च। ४।३।६८॥ सोमसाध्येषुयागेष्वेतौप्रसिद्धौतत्रान्यतरोपादानेनसिद्धेउभयोरुपादानसामर्थ्यादसोमकाअपीहगृह्यन्ते। अग्निष्टोमस्य व्याख्यानस्तत्रभवआग्निष्टोमिकः। वाजपेयिकः। पाकयज्ञिकः। नावयज्ञिकः। बहुवचनंस्वरूपविधिनिरासार्थं। अनन्तोदात्तार्थआरम्भः ॥

त्रभवार्थेव्याख्यातव्यस्यग्रंथस्यप्रतिपादकात्प्रत्ययाः स्युरितिसूत्रार्थः व्याख्यातव्यनाम्नः किं पाटलीपुत्रस्यव्याख्यानीसुकोसला पाटलीपुत्रंहितयाव्याख्यायते दी दृक्प्राकारेवेशाविशिष्टमिति नत्विदंव्याख्यातव्यस्यनाम ग्रंथेष्वेवव्याख्येयत्वस्यसुप्रसिद्धत्वान्नामग्रहणंहिप्रसिद्ध्युपसंग्रहार्थमेवंसूत्रेकृते बह्वचो अणोपवादः

गृहीतग्रहणमाख्यातार्थमिति ज्ञेयं नामिकः आख्यातिकः नामाख्यातिकः अणृगयु ऋगयनादि भ्योभवव्याख्यानयोरणस्यात् ठञादेरिति आदिशब्दाद्वुञ्छ
योः आर्गयन इति अयनशब्दो भावसाधनस्तेन समासे अनो भावकर्मवचन इत्यंतोदात्तः अभेदोपचाराद्भाववचनोपि ग्रंथे वर्त्तते इह वह्वचो गोदक्षादिति ठञ् आम:
औपनिषद इत्यत्राप्येवं विद्यान्यायशिक्षाशब्देभ्योप्यनृद्धात्स्वरणेति ठक्प्राप्तः व्याकरणशब्दात्तु वृद्धाच्छः ॥ ॥ ठगाय एत्येनं स्वामी स्वामिनमयमेनीति वा ऽयः स्वा
मिग्राह्यो भागः सयस्मिन्नुत्पद्यते तदायस्थानम् वहुवचननिर्देशः स्वरूपग्रहणनिरासार्थः वृद्धाच्छं परत्वादयं वाधते आपणिकः आकरिकः छादीनां चेति का
र्कण इत्यत्र छकणषणीञ्ज्ञारह्वाज इति छः प्राप्तः तीर्थशब्दात्तु धूमादित्वाद्वुञ् प्राप्तः उदपानशब्दस्योत्सादित्वादञ् प्राप्त इत्यर्थः विद्यायोनि विद्यायोनिकृ

ठगायस्थानेभ्यः।४।३।७५॥ शुल्कशालाया आगतः शौल्कशालिकः। शुण्डिकादिभ्योऽण्।४।३।७६॥ आयस्थानठकोऽपवादः। शौ
ण्डिकादागतः शौण्डिकः। कार्कणः। तैर्थः। विद्यायोनिसम्बन्धेभ्यो वुञ्।४।३।७७॥ औपाध्यायकः। पैतामहकः। ऋतष्ठञ्।४।३।७८॥ वुञोऽपवा
दः। हौतृकं। भ्रातृकं। पितुर्यच्च।४।३।७९॥ चादृञ्। रीङृतः। यस्येति लोपः। पित्र्यं। पैतृकं। गोत्रादङ्कवत्।४।३।८०॥ विदेभ्य आगतं वैदं। गार्गं।
दाक्षं। औपगवकं। नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम्।७।३।३०॥ नञः परेषां शुच्यादीनामचामादेरचो वृद्धिः पूर्वपदस्य तु वा स्यादादौ प
रे। आशौचं। अशौचं। आनैश्वर्य्यं। अनैश्वर्य्यं। आक्षैत्रज्ञ्यं। अक्षैत्रज्ञ्यं। आकौशलं। अकौशलं। आनैपुणं। अनैपुणं॥ ॥

तः संवंधो येषां तेभ्यो वुञ् स्यात् अणोऽपवादः छं तु परत्वाद्वाधते आचार्यकः मातामहकः मातुलकः ऋतष्ठञ् विद्यायोनिसंवंधेभ्य इति वर्त्तते तदाह वुञोऽपवाद इति उच्क।
ऋति वक्तव्ये तपरकरणं ठञ्ग्रहणं च चिंत्यप्रयोजनमिति प्रांचः पैतृकमिति वियेत्यत्र ञीवर्थे ठञ्ग्रहणमिति तु न तत्त्वं नच टिड्ढेति सूत्रे कञ्ग्रहणात् त्यदादिषु दृश इति कञोऽनु
नुवंधकत्वात् तपरकरणं विहाय उष्ठञित्येव सुवचमित्याहुः गोत्रादंकवत् अपत्याधिकारादन्यत्र लौकिकं गोत्रमित्युक्तं अपत्यप्रत्ययांतात् तत आगत इत्यस्मिन्नर्थे।
अंकवत् प्रत्ययाः स्युः अंके दृष्टस्य सर्वस्यायमतिदेशो न तु साक्षाद्विहितस्यैवेत्याग्रहः तेन गोत्रचरणाद्वुञिति वुञपि लभ्यते सहितस्येदमिति सामान्येन विधीयमा
नोपि अञ्यञिञंतादन्यत्र अंकेपि दृष्टः वैदमित्यादि संघांकेत्यादिना अंकार्थेऽण् विहित इतीहाप्यञ्यञिञंतादण् औपगवकमिति गोत्रचरणादिति वुञ् अंकेद
ङीप्सिद्ध्यतीति वाच्यं यादृशीत्याद्यसिद्धेः तदनुवंधकग्रहणेनातदनुवंधकस्याग्रहणात् ४

हेतुमनुष्येभ्यो मनुष्यग्रहणमहेत्वर्थं बहुवचनं स्वरूपविधिनिरासार्थं समरूप्यमिति विभाषागुणेऽन्यत्रविभाषेति योगविभागादगुणवचनादपि पंचमी योगविभागे तु बाहुलकं प्रवृत्तेरूल्लनुदइ हेरितिलिंगं मयङ्योगविभागो यथासंख्यनिरासार्थः टोडीवर्थः हैमवति हिमवतः प्रकाशते तत्र प्रथमं दृश्यत इत्यर्थः उत्पत्तिवचन सुप्रभवत्तिर्न गृह्यते तत्र जात इत्यतो भेदेन निर्देशात् वैदूर्य इति दंत्यमध्योयं शाहूलवन्नतु नेड्वलवन्मूर्द्धन्यमध्यः नन्वत्रार्थासंगतिः बालवायपर्वतो दूरे सोप्रभवति विदूरनगरे तु संस्क्रियते सत्यं अतएवसमाहितं भाष्ये बालवायो विदूरं चप्रकृत्यंतरमेववा नवैतत्रैतिचेद्ब्रूयाज्जित्वरीवदुपाचरेदिति अस्यार्थः बालवायशब्दः प्रत्ययं लभते विदूरादेशं च सूत्रे पठितेनादेशेनानुरूपः स्थानी बालवायशब्द आक्षिप्यते यथाशिवादिषु पठिताभ्यां विश्रवण रवण देशाभ्यामनुरूपः स्थानी विश्रवस्शब्द आक्षिप्यते यथावापहन्नइत्यादौ पदाद्यादेशानुरूपस्थानी पादंदंतादिराक्षिप्यतेतद्वत् प्रकृत्यंतरमेवेति विदूरशब्दो नगरस्येव पर्वतस्यापिवाचकोसीत्यर्थः एवं चास्मिन्पक्षे बालवायात्प्रभवतीति विग्रहे विदूरशब्दात्प्रत्यय इति व्याख्यानक्लेशेनेतिभावः नवा इति वैशब्दोः समाधानं यतितत्र पर्वतेविदूरशब्दः प्रसिद्ध इति चेद्ब्रूयाज्जित्वरीवद्व्यवहरेत नियतपुरुषापेक्षो हिव्यवहारो दृश्यते यथावणिज एव वाराणसीं जित्वरीति व्यवहरंति एवं वैयाकरणा एवाऽद्रिं विदूर इति तद्गच्छति द्वितीयांतात् गच्छतीत्यर्थे प्रत्ययः स्यात् स चेद्गंता पंथा दूतो वास्यर्थः तत्र साध्य सिद्ध्विनति काष्ठानिपचंतीत्यादाविव करणस्य स्वातंत्र्यविवक्षया पंथाः कर्ता अभिनिष्क्रामति द्वितीयांतात्प्रत्ययः स्यात् निष्क्रामतितच्चेद्द्वारमित्यर्थः स्रौघ्नंकान्यकुब्जद्वारमिति स्रुघ्नाभिमुखनिष्क्रमणे करणीभूतमिति फलितोर्थः पूर्ववत्करणस्यकर्तृत्वं तदित्येवेति अधिकृत्येत्यनतरपेक्षयात्र द्वितीया

हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः ।४।३।८१॥ समादागतं समरूप्यं। विषमरूप्यं। पक्षे गहादित्वाच्छः समीयं। विषमीयं। देवदत्तरूप्यं। देवदत्तं मयट् च।४।३।८२॥ सममयं। विषममयं। देवदत्तमयं॥ प्रभवति।४।३।८३॥ तत इत्येव। हिमवतः प्रभवति हैमवती गंगा॥ विदूराञ्ञ्यः।४।३।८४॥ विदूरात्प्रभवति वैदूर्यो मणिः। तद्गच्छति पथिदूतयोः।४।३।८५॥ स्रुघ्नं गच्छति स्रौघ्नः। पन्था दूतो वा। अभिनिष्क्रामति द्वारम्।४।३।८६॥ तदित्येव। स्रुघ्नमभिनिष्क्रामति स्रौघ्नं। कान्यकुब्जद्वारं॥ अधिकृत्य कृते ग्रन्थे।४।३।८७॥ तदित्येव। शारीरकमधिकृत्य कृतो ग्रन्थः शारीरकीयः।
शारीरकं भाष्यमिति त्विमे दोपचारात्॥

शारीरकीय इति कुत्सितं शरीरं शरीरकं तत्संबंधी शारीरको जीवात्मा तमधिकृत्य प्रस्तुत्य कृतो ग्रंथः शारीरकीयः चतुर्लक्षणीसूत्रसंदर्भः वृद्धाच्छः अत्र वार्त्तिकं लुबाख्यायिकाभ्यो बहुलमिति तादर्थ्ये एषा चतुर्थी आख्यायिकानाम ग्रंथरूपो ग्रंथविशेषः अत एवाख्यानाख्यायिकयोस्तत्र तत्र भेदेनोपादानं आख्यायिकाभिधानाय यः प्रत्ययस्तस्य लुब्बहुलं लुगित्यर्थः वासवदत्तामधिकृत्य कृता आख्यायिका वासवदत्ता सुमनोत्तरा क्वचिन्न भैमरथी अभेदोपचारेण गतार्थत्वान्नेदं वार्त्तिकमावश्यकमिति मूले नोक्तं ॥ ः ॥ शिशुक्रंद अत्र वार्त्तिकं द्वंद्वे देवासुरादिभ्यः प्रतिषेधः देवासुरं राक्षोसुरं निपातनादिति सभा राजेति सूत्रे अमनुष्यशब्दो रूढ्या रक्षःपिशाचादीनाहेत्युक्तत्वात्तेन सूत्रेण क्लीबत्वं न सिद्ध्यतीति भावः सोस्य निवासः स इति प्रथमांतादस्येति षष्ठ्यर्थे यथाविहितः प्रत्ययः स्याद्यः प्रथमांतार्थः स चेन्निवासश्चेत् स्रु

शिशुक्रंदयमसभद्वंद्वेन्द्रजननादिभ्यश्छः ।४।३।८८। शिशूनां क्रंदनं शिशुक्रंदः तमधिकृत्य कृतो ग्रन्थः शिशुक्रंदीयः यमस्य सभा यमसभं क्लीबत्वन्निपातनात् यमसभीयः। किरातार्जुनीयं। इन्द्रजननादिः आकृतिगणः। इन्द्रजननीयं विरुद्धभोजनीयं सोऽस्य निवासः ।४।३।८९। स्रुघ्नो निवासोऽस्य स्रौघ्नः। अभिजनश्च ।४।३।९०। स्रुघ्नोऽभिजनोऽस्य स्रौघ्नः यत्र स्वयमवसत्ति स निवासः यत्र पूर्वैरुषितं सोऽभिजन इति विवेकः। आयुधजीविभ्यश्छः पर्वते ।४।३।९१। पर्वतवाचिनः प्रथमांतादभिजनशब्दादस्येत्यर्थे छः स्यात्। हृद्गोलः पर्वतोऽभिजनो येषामायुधजीविनां ते हृद्गोलीयाः। आयुधेति किम्। ऋक्षोदः पर्वतोऽभिजनो येषां ते आर्क्षोदाः द्विजाः। शण्डिकादिभ्यो ञ्यः ।४।३।९२। शण्डिकोऽभिजनोऽस्य शाण्डिक्यः॥ ८९, स्रुघ्नो निवास इति निवासाधिकरणमित्यर्थः

न त्वस्येति कर्तृयोगे कर्तरि षष्ठी तथा च विशेषणविशेष्यभावश्चान्यथा सामानाधिकरण्यात् स्रुघ्नाधिकरणवासकर्तेह प्रत्ययार्थस्तथा च तत्र भव इत्येव सिद्धं किमनेनेति चेदत्राहुः वासस्य चेतनमात्रकर्तृकतया प्रसिद्धत्वात्प्रकारकृतो भेदोऽस्तीति नास्ति वैयर्थ्यं वसंति हि प्रेम्णि गुणा न वस्तुनीत्यादौ तूपचारो बोध्यः अभिजनश्च योगविभाग उत्तरार्थः अभिजनाः पूर्वबांधवा इति वृत्तिः अभिजायते येभ्य इति व्युत्पत्तेरिति भावः पूर्वबांधवाः पित्रादयः बंधुशब्दः प्रत्तादिः पूर्वसूत्रादिह निवास इत्यनुवृत्तं तत्सामानाधिकरण्यादभिजनशब्दस्य तत्संबंधिनि लक्षणा एवं स्थिते फलितमाह यत्र पूर्वैरिति आयुधजीविभ्यः तादर्थ्ये एषा चतुर्थी आयुधजीविभ्यः आयुधजीव्यर्थं आयुधजीविनोऽभिधातुं प्रत्ययः स्यादित्यर्थः सोस्याभिजन इत्यनुवर्तते पर्वत इति प्रकृतिविशेषणं तदाह पर्वतवाचिन इत्यादि पर्वत इति किं सांकाश्य ॥ ॥

कः । आयुधजीविनः यायधादिति वुञ् । शंडिकादिभ्यो ञ्यः । शांडिक्यः । सर्वसेन शक इत्यादि ॥ ॥ सिंधुतक्ष । सिंधुवण्डगंधार कंबोजादयः सिंध्वादयः । ते तु आयेनाकच्छादिषु पठ्यंते तेभ्योऽणि सिद्धे मनुष्यवुञो बाधनार्थं वचनं तक्षशिलावत्सोद्धरण बर्बर इत्यादयस्तक्षशिलादयः वासुदेवार्जुनाभ्यां वुन् छाणोरपवादः अजाद्यदंतमल्पाच्तरमिति सूत्राभ्यामर्जुनस्य पूर्वनिपाते प्राप्ते तस्याकरणं सर्वतोऽभ्यर्हितं पूर्वं निपततीति ज्ञापनार्थं ननु वसुदेवस्यापत्यमित्यर्थे ऋष्यंधकेत्यणि वासुदेवशब्दो निष्पन्नः स चात्र गोत्रक्षत्रियाख्येभ्य इत्युत्तरसूत्रेण वुञेवास्तु किमनेन वुना न ह्यत्र वृद्धौ विशेषः प्रागेव वृद्धत्वात् न च वृद्धिनिमित्तस्येति पुंवद्भावनिषेधो दोषः

सिन्धुतक्षशिलादिभ्योऽणञौ ।४।३।९३। सिन्ध्वादिभ्योऽण् तक्षशिलादिभ्योऽञ् स्यादुक्तेऽर्थे । सैन्धवः । ताक्षशिला नगरी । अभिजनोऽस्य ताक्षशिलः । तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः ।४।३।९४। तूदी अभिजनोऽस्य तौदेयः । शालातुरीयः । वार्मतेयः । कौचवार्यः । भक्तिः ।४।३।९५। सोऽस्येत्यनुवर्तते । भज्यते सेव्यत इति भक्तिः । स्रुघ्नो भक्तिरस्य स्रौघ्नः । अचित्ताददेशकालाट्ठक् ।४।३।९६। अपूपा भक्तिरस्य आपूपिकः । पायसिकः । अचित्तात्किं । दैवदत्तः । अदेशात्किं । स्रौघ्नः । अकालात्किं । ग्रैष्मः । महाराजाट्ठञ् ।४।३।९७। माहाराजिकः । वासुदेवार्जुनाभ्यां वुन् ।४।३।९८। वासुदेवकः । अर्जुनकः । गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् ।४।३।९९। अपवादः । परत्वाद्वृद्धाच्छं बाधते । ग्लुचुकायनिर्भक्तिरस्य ग्लौचुकायनकः । नाकुलकः । बहुलग्रहणान्नेह । पाणिनो भक्तिरस्य पाणिनीयः ॥ ॥

स्यादिति वाच्यं वुन्यपि नकोपधाया इति निषेधस्य समानत्वात् न वा स्वरे विशेषः ञित्यादिर्नित्यमिति तुल्यस्वरत्वात् नाप्यभ्यर्हितं पूर्वमिति ज्ञापनमेव तत्फलमिति वाच्यं तथा लिहि पूर्वनिपातप्रकरणे अभ्यर्हितमित्येव स्वाघवात्कुर्यादिति चेदत्र भाष्ये संज्ञैषा भगवत इति अयं भावः सर्वत्रासौ समस्तं च वसत्यत्रेति वेद्यतः ततोऽसौ वासुदेवेति विद्वद्भिः परिगीयत इति स्मृतेः [illegible] वासुदेवः सर्वत्रासौ वसति सर्वमत्र वसतीति वा व्युत्पत्त्या वासुः बाहुलकादुण् वासुश्चासौ देवश्चेति विग्रहः तथा च नेयं गोत्राख्या नापि क्षत्रियाख्येति युक्त एव वुन्विधिः अभ्यर्हितं पूर्वमिति तु प्रसंगाज्ज्ञापितं तदप्यनित्यं श्वयुवमघोनामित्यादिलिंगादित्यवधेयं वृद्धाच्छं बाधत इति । गोयगवो भक्तिरस्य औष्गवकः ॥ ॥

जनपदिनां स्वस्वामिभावसंबंधे मत्वर्थीयं दर्शयति जनपदस्वामिवाचिनामिति प्रत्ययः प्रकृतिश्चेति अनेन सर्वशब्दस्यार्थो दर्शितः असति सर्वग्रहणे प्राधान्यात्प्रत्ययस्यैवातिदेशः स्यान्न तु प्रकृतेरिति हरदत्तः अत्र वार्त्तिककारः सर्वशब्दस्य प्रयोजनमाह सर्ववचनं प्रकृतिनिर्ह्रासार्थं तच्च मद्रवृज्यर्थमिति अयं भावः वृद्धिनिमित्तेषु वुञादिष्वतिदिष्टेष्वपि प्रकृतिरूपे पुनर्वृद्ध्याभाव्यमिति विशेषस्य तत्र दुर्लभत्वान्मद्रवृज्योः कनि विशेषो वोध्यः सोऽप्यबहुत्व एवेति निर्ह्रासोपचयोऽस्यना तथा हि मद्राणां राजा द्व्यञ्मगधेत्यण् माद्रः वृजिशब्दाद्वृद्धेत्कोसलेति ञ्यङ् वार्ज्यः स भक्तिरस्येति प्रकृतिनिर्ह्रासे मद्रकः वृजिकः मद्रवृज्योः कन् अन्यथा माद्रकः वार्ज्यक इति स्यात् आंगक इति जनपदतदवध्योश्च अवृद्धादपीति वुञ् अंगशब्दात्स्वामिवाचिनो बहुवचनान्तात् दाण्डिनायनेति वुञिति दिश्यते पंचालाः ब्राह्मण

जनपदिनां जनपदवत्सर्वं जनपदेन समानशब्दानाम्बहुवचने। ४।३।१००॥ जनपदस्वामिवाचिनाम्बहुवचने जनपदवाचिना समानश्रुतीनां जनपदवत्सर्वं स्यात् प्रत्ययः प्रकृतिश्च। जनपदतदवध्योश्चेति प्रकरणे ये प्रत्यया उक्तास्तेऽत्रातिदिश्यन्ते। अङ्गा जनपदो भक्तिरस्य आङ्गकः। अङ्गाः क्षत्रिया भक्तिरस्य आङ्गकः। जनपदिनां किं। पञ्चाला ब्राह्मणा भक्तिरस्य पाञ्चालः। जनपदेनेति किं। पौरवो राजा भक्तिरस्य पौरवीयः। तेन प्रोक्तम्। ४।३।१०१॥ पाणिनिना प्रोक्तम्पाणिनीयम्। तित्तिरिवरतन्तुखण्डिकोखाच्छण्। ४।३।१०२॥ छन्दोब्राह्मणानीति तद्विषयता। तित्तिरिणा प्रोक्तमधीयते तैत्तिरीयाः॥ काश्यपकौशिकाभ्यामृषिभ्यां णिनिः। ४।३।१०३॥ काश्यपेन प्रोक्तमधीयते काश्यपिनः॥ ॥

इति अभेदोपचाराद्ब्राह्मणेषु पंचालशब्दस्य प्रवृत्तिः बहुवचनग्रहणं किं एकवचनद्विवचनयोस्सत्यपि शब्दभेदे अतिदेशो यथा स्यात् आंग आंगौ वा भक्तिरस्य आंगकः इह वृद्धाच्छे प्राप्ते वुञ् तेन प्रोक्तं प्रकर्षेण उक्तं प्रोक्तमित्युच्यते न तु कृतं कृते ग्रन्थे इत्यनेन गतार्थत्वात् पाणिनिना प्रोक्तमिति स्वयमन्येन वा कृतं व्याकरणमध्यापनेनार्थव्याख्यानेन वा प्रकाशितमित्यर्थः प्रेति किं देवदत्तेनाध्यापितं प्रख्यातस्यैव ग्रन्थस्याध्यापनमिति नेहानेन प्रत्ययः तित्तिरिवर अणोऽपवादः न हि विषयतेति कौलकादिभ्यश्छंदसीत्यत्रास्यानुवृत्तेस्तित्तिरिणा प्रोक्ताः श्लोका इत्यत्र न भवतीति भावः तैत्तिरीया इति प्रोक्ताल्लुगीत्यध्येतृप्रत्ययस्य लुक् एवमग्रेऽपि काश्यप छस्यापवादः णकार उत्तरत्र वृद्ध्यर्थः ननु वृद्धिनिमित्तस्येति पुंवद्भावनिषेधोऽत्र फलमस्तीति चेदत्राहुः णिन्यन्तस्याध्येतृवेदितृविषयत्वेन स्त्रियामप्रवृत्तेः प्रवृत्तावपि

जाते श्चेति सिद्धत्वाच्चरणत्वेन जातित्वादिति वक्ष्यामिति किं इदानीं तेनेन गोत्रकाश्यपेन प्रोक्तं काश्यपीयं॥ ०॥ कलापिवैशंपायनान्तेवासिभ्यः छंदुपरत्वाद्वा
धनेकलाप्यन्तेवासिनश्चत्वारः हरिद्रुः छगली तुंवुरुः उलप इति वैशंपायनान्तेवासिनस्तु नव आलंविः कलिंगः कमलः ऋचाभः आरुणिः ताण्ड्यः श्यामायनः क
ठः कलापी इति हारिद्रविण इति एवं तौंवुरविणः औलपिनः छगलिनस्तु ढिनुकं वक्ष्यति आलंविन इति एवं कालिंगिनः आर्चाभिनः आरुणिनः ताण्डिनः।

कलापिवैशम्पायनान्तेवासिभ्यश्च।४।३।१०४॥ कलाप्यन्तेवासिभ्यः हरिद्रुणा प्रोक्तमधीयते हारिद्रविणः। वैशम्पायनान्तेवासिभ्यः। आ
लम्बिनः। पुराणप्रोक्तेषु ब्राह्मणकल्पेषु।४।३।१०५॥ तृतीयान्तात्प्रोक्तार्थे णिनिः स्यात्। यत्प्रोक्तं पुराणप्रोक्ताश्चेद्ब्राह्मणकल्पास्ते भव
न्ति। पुराणेन चिरन्तनेन मुनिना प्रोक्ताः। भल्लुः। भाल्लविनः। शाट्यायन। शाट्यायनिनः। कल्पे पिङ्गेन प्रोक्तः पैङ्गी कल्पः। पुराणेति किं। या
ज्ञवल्क्यानि ब्राह्मणानि। आश्मरथः कल्पः। अणिञ् आपत्यस्येति यलोपः। कठचरकाल्लुक्।४।३।१०७॥ आभ्यां प्रोक्तप्रत्ययस्य लुक् स्यात्
कठेन प्रोक्तमधीयते कठाः। चरकाः। कलापिनोऽण्।४।३।१०८॥ कलापिना प्रोक्तमधीयते कालापाः। नान्तस्य टिलोपे। सब्रह्मचारिपीठसर्पिक
लापिकौथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसंख्यानाट्टिलोपः॥ छगलिनो ढिनुक्।४।३।१०९॥ छग
लिना प्रोक्तमधीयते छागलेयिनः। पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः।४।३।११०॥ पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते पाराशरि
णो भिक्षवः। शैलालिनो नटाः॥ कर्मन्दकृशाश्वादिनिः।४।३।१११॥ भिक्षुनटसूत्रयोरित्येव। कर्मन्देन प्रोक्तमधीयते कर्मन्दिनो भिक्षवः।

श्यामायनिनः कठाल्लुकं वक्ष्यति कलापिनश्चाणं याज्ञवल्क्यादयः इत्यादौ कण्वादीनेन ताभ्यां यञ् ताभ्यां वृद्धाच्छो न भवतीत्या एवं। कृशाश्विनो नटाः
शायेनाह अणि आपत्यस्येति याज्ञवल्क्यादयोऽत्वचिरकाला इत्याख्यानेषु वार्त्तादिविषयव्यवहारस्तेन वानुमतः सूत्रकृता कठचरकाल्लुक् कठशब्दस्य वैशंपायनान्तेवा
सित्वात्णिनिः चरकादण् तयोर्लुक् छंदसीत्येव काठाः चारकाः श्लोकाः कलापिनोऽण् वैशंपायनान्तेवासित्वान्नामस्य णिनेरपवादः इनण्यनपत्ये इति प्रकृतिभा
वे प्राप्ते आह नान्तस्य टिलोप इति कलापिन इत्युक्ते प्यौत्सर्गिकः टिलोपः सिद्धः पुनरयं वचनं मध्ये कविधानार्थं सहायकबाधनार्थं भवति तेन माथुरेण प्रोक्ता माथुरी

मौदाः पैप्पलादाः शाकलाः इति सिद्धं मुदपिप्पलादशाकल्यएभ्यः पुराणप्रोक्तेष्विति णिनेरपवादोऽण् छगलिनोढिनुक् कलाप्यन्तेवासित्वात्स्यात्तस्य णिनेरपवादः पाराशर्यमण्डूकत्पुत्यां णिनिरिह संवध्यन्त इत्याह णिनिः स्यादिति तद्विषयतात्रेष्यते तदर्थं छंदोग्रहणमनुवर्त्यसूत्रयोश्छंदस्त्वं तु गौण्या वृत्त्याकेध्यं भिक्षुसूत्रमिति चतुर्लक्षणं लोपः पं पाराशरिण इति पाराशर्यो व्यासः अनंतरापत्येपि गोत्रत्वेनोपचाराद्गर्गादिभ्य इति यञ् आपत्यस्य चेति यलोपः अध्येत्रणस्तुश्रो णादि तिलुक् भिक्षुनटसूत्रयोः किम् पाराशरं शौलालकमिदं इहापिछंदोनुवृत्त्यादि प्र-वत् भिक्षुनटसूत्रयोः किम् कार्मंदं कार्शाश्वं॥ ॥ तेनैकदिक् तृतीयांता

तेनैकदिक्। ४। ३। ११२॥ सुदाम्ना अद्रिणा एकादिक्। सौदामनी। तसिश्च। ४। ३। ११३॥ स्वरादिपाठादव्ययत्वं। पीलुमूलेन एकादिक् पीलुमूलतः। उरसो यच्च। ४। ३। ११४॥ चात्तसिः। अणोपवादः। उरसा एकदिक् उरस्यः। उरस्तः। उपज्ञाते। ४। ३। ११५॥ तेनेत्येव। पाणिनिना उपज्ञातम् पाणिनीयम्। कृते ग्रन्थे। ४। ३। ११६॥ वररुचिना कृतो वाररुचो ग्रन्थः। संज्ञायाम्। ४। ३। ११७॥ तेनेत्येव। अग्रन्थार्थमिदं। मक्षिकाभिः कृतं माक्षिकं मधु। कुलालादिभ्यो वुञ्। ४। ३। ११८॥ तेन कृते संज्ञायां। कुलालेन कृतं कौलालकं। वारुडकं। क्षुद्राभ्रमरवटरपादपादञ्। ४। ३। ११९॥ तेन कृते संज्ञायां। क्षुद्राभिः कृतं क्षौद्रं। भ्रामरं। वाटरं। पादपं। तस्येदम्। ४। ३। १२०॥ उपगोरिदं औपगवं। वहेस्तुरणिट् च॥ सम्वोढुः स्वं सांवहित्रं। अग्नीधः शरणे रण् भं च। अग्निमिन्धे अग्नीत्। तस्य स्थानमाग्नीध्रं। तां तथ्यां सोपि आग्नीध्रः। समिधामाधाने षेण्यण्। सामि

एकदिगित्यर्थे अणादयः स्युः एकदिक् समानादिगित्यर्थः पुनस्तेनेत्युक्तिश्छंदोधिकारनिवृत्त्यर्था। सौदामनीति ११ घेन्यो मन्त्रः। सामिधेनी ऋक्॥ अन्निति प्रकृतिभावान्नुटिलोपः तडित् सौदामनी विद्युदित्यमरः तसिश्च पूर्वोक्तविषये उपज्ञाते विनोपदेशं ज्ञातमुपज्ञातं कुलालादिभ्यो कुलालवरुड चंडाल। निषाद कुंभकार श्वपाकादयः कुलालादयः क्षुद्राभ्रमर पादप शब्दाच्छैषामे अन्येभ्यो अण् अञ् विधीयते तस्येदं अणादयः पंचमहोत्सर्गाः घादयश्च षष्ठ्यंता रक्षत्वेधि निस्युः अनंतरादिष्वनभिधानान्न देवदत्तस्यानंतरमिति वहेस्तु इडर्थमिदमुपसंख्यानं अण् तु सिद्ध एवानूद्यते तृ इति तृन् तृचोस्सामान्यग्रहणं ढलादीनामसिद्धत्वाद्लौकिके प्रक्रियावाक्ये पूर्वमिट् ततो निमित्ताभावान्न ढत्वादीत्याशयेनोदाहरति सांवहित्रमिति अग्नीदिति क्विप् क्त्विविशेषोयं त्वमग्निर्

नोपरत्यत्र तु छांदसहूस्वत्वं आग्नीध्रमिति मलविधानाद्रस्य जस्त्वं नेति भावः सोपीति अग्नीदपीत्यर्थः ननु पिवाग्नीध्रात्त वेत्यादावाद्युदात्त प्रयुज्यत वात्तकेतुरिति
तिपादादयमंतोदात्त इति चेदत्राहुः आग्नीध्रसाधारणादञिति वार्तिकेन विहितोयः स्वार्थेञ् तत्य क्षेतत्राद्युदात्तत्वं बोध्यमिति समिधांकर्मणि षष्ठीयं आधान
मितिकरणे ल्युट् कर्मणिषष्ठ्यंतादाधानकरणवेण्यण्यस्मात् सामिधेन्य इति यया अग्निः समिध्यते सा समित् संपदादित्वात्करणे क्विप् तस्या आधान इति वि
ग्रहः सामिधेनीति टिड्ढाणञिति ङीप् हलस्तद्धितस्येति यलोपः यया ऋचा समिदाधीयते सा सामिधेनीत्यर्थः प्रवोवाजा अभिद्यव इत्याद्याः आ जुहोता दुवस्यतेत्यंताः स
मिधेन्य इति व्यवह्रियंते॥ ॥ रथाद्यत् अणोपवादः रथाद्र्थांगे इति वार्तिकमभिप्रेत्याह रथ्यं चक्रमिति रथसीताहलेभ्यो यद्विधाविति तदंतविधिरुपसं

रथाद्यत्॥४।३।१२१॥ रथ्यं चक्रं। पत्त्रपूर्वादञ्॥४।३।१२२॥ पत्त्रं वाहनं। अश्वरथस्येदं। आश्वरथं। पत्त्राध्वर्युपरिषदश्च॥४।३।१२३॥ आश्व
त्रं। पत्त्राद्वाह्ये। अश्वस्येदं वहनीयमाश्वं। आध्वर्यवं। पारिषदं। हलसीराट्ठक्॥४।३।१२४॥ हालिकं। सैरिकं। द्वन्द्वाद्वुन्वैरमैथुनिकयोः
॥४।३।१२५॥ काकोलूकिका। कुत्सकुशिकिका। ह्रेदेवासुरादिभ्यः प्रतिषेधः॥ दैवासुरं। गोत्रचरणाद्वुञ्॥४।३।१२६॥ औपगवकं। चर
णाद्धर्माम्नाययोरिति वक्तव्यं। काठकं। संघाङ्कलक्षणेष्वञ्यञिञामण्॥४।३।१२७॥ घोषग्रहणमपि कर्त्तव्यं॥ अत्र। बैदः संघोऽङ्को घोषो वा।
वैदं लक्षणं। यञः। गार्गः। गार्गं। इञः। दाक्षः। दाक्षं। इह स्वरार्थं सम्बन्ध्योऽङ्कः। सास्यानुलक्षणं। शाकलाद्वा॥४।३।१२८॥ अण्वोक्तेऽर्थे पक्षे चरणत्वाद्वु
ञ्। शाकलेन प्रोक्तमधीयते शाकलास्तेषां संघोऽङ्को घोषो वा शाकलः। शाकलकः। लक्षणे क्लीबता॥ ॥ रथाय तेषु रथ्यं उत्तमरथ्यं द्वयोरश्वयोः

गोद्विरथ्यं इह हि गोर्लुगनपत्य इति यत्तात्क ननु यावत्यपि अरथ्यं गएवं परीक्ष्यते वयं तर्हि रथस्य वोढा रथ्य इति तद्वहतीत्यनेनेति चेदेवं तर्हि अयमेव यद् द्वा
गत्व वाढयेघोष्यतां न दन्तिर थ्ययुगप्रासंगमित्यत्र य द्वहतीत्यत्र्यंतामिति चेन्नैवं द्वौ रथौ वहतीति द्विरथ्य इत्यत्र हि गोर्लुगनपत्य इति प्राग्दीव्यतीयलुक्प्र
संगात् तद्वहतीति यत्प्रत्ययस्य तु प्राग्दीव्यतीयत्वाभावान्न लुगिति द्विरथ्य इति सिद्ध्यति ननु द्विगोर्लुगनपत्य इत्यत्राचीत्यपकर्षणात्कथमत्र यतो लुक्प्रस
क्तिरिति चेदत्राहुः तद्वहतीत्यत्र रथग्रहणमवलायकम तस्य यतो हलादेरपि लुग्भवतीति अन्यथा तत्र रथग्रहणं व्यर्थमेवं स्यात्तथा च द्वयो रथयोरिंगमिति

सि·कौ·
टी·त·
सु·त·
४९

[illegible]मिनिप्रयोगः सुरथ इति पत्रपूर्वादञ् पूर्वस्य यतोऽपवादः पत्रमिति यं तेन नेनेतिविग्रहे दाम्नीत्यादिनाष्ट्रन् रथादित्येव संवध्यत इत्याह अश्वरथ स्येदमिति अश्वयुक्तो रथो अश्वरथस्तस्याङ्गमित्यर्थः। पत्राध्वर्यु अणोऽपवादः वार्त्तिकमाहत्पत्राद्वात्य इति इह पत्रेत्यर्थग्रहणे इतरथोऽसुस्वरूपग्रहणं व्याख्या नमेव शरणं द्वंद्वाद्वुन् अणोऽपवादः छं तु परत्वाद्बाधते काकोलूकिकेति काकोलूकस्य वैरमित्यर्थः वुन्नंतस्त्रियां वैरमैथुनिकादिवुनितिस्त्र्यधिकारे अमरः कुत्सकुशिकिकेति कुत्सकुशिकयोर्मैथुनिका विवाहरूपः संवंध इत्यर्थः मिथुनेऽयं पतीतस्य कर्मक्रियानिष्पादनं मनोज्ञादित्वाद्वुञ् वुञंतं चेदं स्त्रियां स्वभावा त् अत्र वदंति कुत्साश्च कुशिकाश्च कुत्सकुशिकास्तेषां मैथुनिकेत्यपि विग्रहः इह कुत्सश्च कुशिका चेति द्वयोरेव मैथुनिकायां वुनिति नाग्रहः कार्यः पूनि लगिति सूत्रे कैयटेन अत्रिभरद्वाजिकेत्यादिकं प्रसंगाद्दात्तत्य वहुवचनांत द्वंद्वाद्वुनो व्याख्यातत्वादिति संघांक पूर्वस्य वुञोऽपवादः घोषग्रहणमिति

छन्दोगौक्थिकयाज्ञिकवह्वृचनटाञ्ञ्यः। ४।३।१२९॥ छन्दोगानां धर्म्मो आम्नायो वा छान्दोग्यं। औक्थिक्यं। याज्ञिक्यं। वाह्वृच्यं। नाट्यं। च रणाद्धर्माम्नाययोरित्युक्तं। तत्साहचर्यान्नटशब्दादपि तयोरेव। न दण्डमाणवान्तेवासिषु। ४।३।१३०॥ दण्डप्रधाना माणवा अन्तेवासिषु शिष्येषु च वुञ् न स्यात्। दाक्षाः दण्डमाणवाः शिष्या वा। रैवतिकादिभ्यश्छः। ४।३।१३१॥ तस्येदमित्यर्थे वुञोऽपवादः। रैवतिकः। वैजवापीयः। कौपिञ्जल हास्तिपदादण्। ४।३। कुपिञ्जलस्यापत्यं इहैव निपातनादण्। तदन्तात्तु नरण्। कौपिञ्जलः। गोत्रवुञोऽपवादः। हस्तिपदस्यापत्यं हास्तिपद

एवं चपकत्तयस्ति सः प्रत्ययार्थविशेषणानि चत्वारीति वैषम्याद्यथासंख्यमपि न प्रवर्त्तते गार्ग इति आपत्यस्येति यलोपः पद्य ((तस्यायं हास्तिपादः ॥ प्यं कलक्षणयोः पर्यायत्वं प्रसिद्धं कलंकां कौलांछने च चिन्हं लक्ष्म च लक्षणमित्यमरस्त्यापि पृथग्ग्रहणसामर्थ्यादिह विशेषपरतेत्याह परंपरासंवंध इत्य या गवादिनिष्ठः स्वामिता गोद्वारा संवंधः साक्षादिति यथा विदानां विद्या घोष आभीरस्थानं लिंत्वं ङीवर्थे पुंवद्भावनिषेधार्थं च वैदी विद्या यस्य वैदो विद्यः वि द्यानाम साधारणीया विद्या तद्वानित्यर्थः॥ [illegible]॥ छंदोगौक्थिक संघादयानि दृत्ताः एभ्योऽन्यः स्यात्तस्येदमित्यर्थे चरणशब्देभ्यो वुञोऽपवादः न दाक्षौत्सर्गिकस्या णः धर्माम्नाययोरित्युक्तेर्नेह छंदोगकुलमित्यादि न दंड तस्येदमित्यनुवर्त्तते तेषु शिष्येषु चेति प्रत्ययार्थवि शेषणेष्विति शेष दाक्षा इति इञश्चेत्यण्

त्रपुजतुनोः बिल्वादिभ्योणित्यतोनुवर्त्तनादाह अणस्यादिति औरत्रं रत्नस्यायमयवादः अप्राण्यादित्वादनेयवेनभवतीत्याशयेनाह विकारेइति त्रापुषमिति त्रपुणोवि
कारः एवंजतुनोविकारोजातुषं औरत्रं अनुदात्तादेरित्यस्योदाहरणं दैवदारवमिति देवदारुभद्रदारुशब्दौमितद्रु योनामित्याद्युदात्तौ दाधित्थमिति दधनितिष्ठतीति सुपि
स्थइतिकः उपपदसमासः पृषोदरादित्वात्सकारस्यतकारः कृदुत्तरपदप्रकृतिस्वरेणांतोदात्तत्वं एवंकपित्थेपिबोध्यं पलाशादिभ्योवा उभयत्रविभाषेयं पलाशखदिरशिं
शपास्पंदनानामनुदात्तादित्वान्नित्यंप्राप्तेकरीरशिरीषविकंकतपूलासयवासशब्दानामप्राप्तेविधानात् पालाशमिति पलाशशब्दोघृतादित्वादंतोदात्तः खदिरशब्दोऽ
जिरशिशिरेत्यादौकिरचप्रत्ययांतोनिपातितः शिंशपाशब्दोअथादितीयंप्रागीषादितिवर्त्तमानेपांतानांगुर्वादीनामितिमध्योदात्तः स्पंदिकिंचिच्चलनेअनुदात्तेतश्चहला
देरितियुच् कारीरमिति किरतेरीरन् नित्स्वरेणकरीरशब्दोयमाद्युदात्तः कृतृभ्यामीषन् शृधूभ्यांकिच्च पूर्ववच्छिरीषशब्दोप्याद्युदात्तः विकंकतपूलासयवासशब्दाः ग्राम

त्रपुजतुनोःषुक्॥४।३।१३८॥ अभ्यामणस्याद्विकारेएतयोःषुगागमश्च। त्रापुषं। जातुषं। ओरत्रा॥४।३।१३९॥ दैवदारवं। भाद्रदारवं। अनुदात्ता
देश्च॥४।३।१४०॥ दाधित्थं। कापित्थं। पलाशादिभ्योवा॥४।३।१४१॥ पालाशं। कारीरं। शम्याः ष्लञ्॥४।३।१४२॥ शामीलंभस्म। षित्वान्ङीष्। शा
मीली स्रुक्। मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः।४।३।१४३॥ प्रकृतिमात्रान्मयड्वास्याद्विकारावयवयोः। अश्ममयं। आश्मनं। अभक्ष्येत्यादि
किं। मौद्गःसूपः। कार्पासमाच्छादनं॥ ॥ ग्रामीणा इत्याद्युदात्ताः षित्वान्ङीषिति टित्वान्ङीबेति तु माधवः मयड्वैतयोः भाषायां किं खादिरोयूप इति
वृत्तिकारः ननुमयटोवैकल्पिकत्वात्सिद्धमिदमिति चेदत्राहुः वेदेवक्ष्यतिमयटोअर्थांतरपरत्वमेवेतितात्पर्यग्रहणार्थमेवेदं द्व्यचश्छंदसीतिसूत्रस्थद्व्यचएवेतिनिय
मार्थत्वेयद्यपीदंगतार्थंतथापिद्व्यचश्छंदस्येवेतिविपरीतनियमशंकानिवृत्त्यर्थंभाषायांग्रहणं कृतमिति अधिकारादेवविकारावयवयोर्लाभे एतयोरितिवचनंयेविशेषप्र
त्ययाः प्राणिरजतादिभ्योञित्येवमादयस्तद्विषयेपियथास्यादित्येवमर्थंकपोतमयंलोहमयं इहविकारावयवाभ्यांसहप्रत्येकं अभक्ष्याच्छादनयोरिति संबध्यते समास
निर्देशादतोयथासंख्यंन आश्मनमिति विनापि [illegible] पूर्वोत्तरपदयोर्वालोपो वाच्य इतिवचनादश्मभेदशब्देभेदशब्दस्यलोपे अश्मन्निति नंतमवशिष्यते तथाकल्माषां
घ्रिनोभार्यायांमदयंत्यांवसिष्ठेनोक्तास्मिंसुतोश्मकोनामतत्रसंज्ञात्वद्योतनाय [illegible] स्यकप्रत्ययस्याभावेअश्मन्नितिनामभवति तस्यावयवे आश्मनंविकारेप्याश्मनमित्येव

नचाश्मनोविकार इति टिलोपः स्यादिति वाच्यं प्रसिद्धतरत्वेन पाषाणवाचकस्यैव तत्र ग्रहीतुमुचितत्वात् वस्तुतस्तु तस्येदमिति सामान्यविवक्षायां पाषाणवाचकस्याप्यश्म
न् शब्दस्याश्मनमिति भविष्यति पैष्टी सुरेतिवत् मौद्गः कार्णममिति मुद्गशब्दः घृतादित्वादंतोदात्तः कात्रः पास इति पासप्रत्यये गुणे रपरे च कर्पासी शब्दो जातिलक्षणङीषन्त
त्वाप्यामनुदात्तादेश्चेत्यत्र बाधित्वा बिल्वादित्वादण् ॥ ॥ नित्यं वृद्ध इह भाषायामभक्ष्याच्छादनयोरित्यनुवर्तत इति वृत्तिः नन्वेवमानंदमयाधिकरणे शंकराचार्यैर
न्योन्तर आत्मानंदमय इति श्रुतावानंदमय इति विकारे मयडित्युक्तं तत्कथं संगच्छतां प्राचुर्ये मयडिति तु वक्तुमुचितमिति चेदत्राहुः प्राचुर्ये मयट्यपि प्रकृत्यर्थविरोधिनो दुः
खस्य लेशतोनुवृत्तिलाभात्प्रकृते विकारार्थः पर्यवस्यतीति नेषामाशयः यद्वा नित्यं वृद्धेत्यत्र भाषाग्रहणं नानुवर्तते अनुवृत्तावपि भाषायां नित्यं अन्यत्र क्वाचित्कत्वमाश्रित्यमय

नित्यं वृद्धशरादिभ्यः ॥ ४।३।१४४॥ आम्रमयम्। शरमयम् ॥ एकाचो नित्यम्। त्वङ्मयम्। वाङ्मयम्। कथन्तर्हि। आप्यमम्मयमिति। तस्येदमित्यण्।
ताल्वर्थ्यं च। गोश्च पुरीषे ॥ ४।३।१४५॥ गोः पुरीषं गोमयम्। पिष्टाच्च ॥ ४।३।१४६॥ मयट् स्याद्विकारे पिष्टमयं भस्म। कथं पैष्टी सुरेति सामान्यविव
क्षायां तस्येदमित्यण्। संज्ञायाङ्कन् ॥ ४।३।१४७॥ पि[ष्टा]दित्येव। पिष्टस्य विकारविशेषः पिष्टकः। [पि]ष्टपूपः पिष्टकस्यात् ॥ व्रीहेः पुरोडाशे ॥ ४।३।१४८॥
मयट् स्यात्। बिल्वाद्यणोपवादः। व्रीहिमयः पुरोडाशः। व्रैहमन्यत् ॥ असंज्ञायां तिलयवाभ्याम् ॥ ४।३।१४९॥ तिलमयं। यवमयं। संज्ञायान्तु तैलम्।

[?]प्रसाधः अथवाद्दत्तमनुष्यायम्यद्रत्यनुवर्तमाने मयड्वेति सू[त्रे]ण आगतार्थे मयट् विकार इति त्वार्थिकार्थकथनमेवातः शंकरभगवत्पादोक्तिरनवद्यैवेति शरमयमिति
शरदर्भमृत कुटी तृण सोम बिल्वज शरादिः एकाचो नित्या[दि]ति आरंभसामर्थ्यादेमृच्छब्दपठनं विस्पष्टार्थमित्याहुः गोश्च पूरीषे पुरीषं न विकारो नाप्यवयवः तथापि त
स्येदमित्यर्थे मयड् न्यायः। बिकारावयवयोर्वसिद्धेनित्यं वृद्धेति [?] पयग्रहणं योगविभागेनान्यत्रापि क्वचिद्विधानार्थं तेनैतल्लभ्यत इति भावः एकाच्त्वादेवसिद्धे शरादि
य[?] सुगोपयसोर्यत्वक्ष्यतिपुरी[?] दि[?] गत्यपयः पावक इति यव शब्दाद्वृद्धाच्छन्दस्तोघावादिभ्य इति स्वार्थे कन् ॥

तालादिभ्योण् अञ्मयटोरिति तालश्यामाकशब्दाभ्यां वृद्धत्वान्मयट्प्राप्तः बर्हिणं विकारो बार्हिणं शालि रजतादिभ्योञ् ततोञितश्चतत्प्रत्ययादित्यञ्प्राप्तः शौर्ष्यस्त्य
नुदात्तादित्वादञ्प्राप्तः तथा हि विशि दशिभ्यामिन्दुशब्द उपपदे मूलविभुजादित्वात्कः अन्येषामपीति दीर्घः इन्द्राविशः इन्द्रादृशः चापसांत्वनेप चापच चोपपिपूसा शब्दो
लघावंत इति मध्योदात्तः फिष इत्यधिकारादापः प्रागेव स्वरप्रवृत्तेः इन्द्रायुधशब्दः समासस्वरेणान्तोदात्तः अण्ग्रहणं बाधकबाधनार्थं यथाविहितप्रत्ययविधौ हि बार्हि
णशब्दाद्वृद्धलक्षणो मयट् स्यात् ञितश्च तत्प्रत्ययादित्यञो बाधनेन वचनस्य चरितार्थत्वादित्याहुः तालाद्धनुषीति गणसूत्रमिदं हाटक इति इह वृद्धलक्षणो मयट् प्राप्तः न

तालादिभ्योऽण्। ४। ३। १५२॥ अञ्मयटोरपवादः। तालाद्धनुषि। तालं धनुः। अन्यत्तालमयं। ऐन्द्रायुधं। जातरूपेभ्यः परिमाणे। ४। ३। १५३॥ अण्
बहुवचनात्पर्यायग्रहणं। हाटकः। तापनीयः। सौवर्णो वा निष्कः। परिमाणे किं। हाटकमयी यष्टिः। प्राणिरजतादिभ्योऽञ्। ४। ३। १५४॥ शौकं। बाकं।
राजतं। ञितश्च तत्प्रत्ययात्। ४। ३। १५५॥ ञितो विकारावयवप्रत्ययस्तदन्तादञ् स्यात् तयोरेवार्थयोः। मयटोपवादः। शामीलस्य शामीलं। दा
धित्थं। कापित्थं। आञितः किं। बैल्वमयं। क्रीतवत्परिमाणात्। ४। ३। १५६॥ प्राग्वतेष्ठञित्यारभ्य क्रीतार्थे ये प्रत्यया येनोपाधिना परिमाणाद्विहिता
स्तेन तथैव विकारेऽतिदिश्यन्ते। अणादीनामपवादः। निष्केण क्रीतं नैष्किकं। एवं निष्कस्य विकारोऽपि नैष्किकः। शतस्य विकारः शत्यः। शतिकः॥
उष्ट्राद्वुञ्। ४। ३। १५७॥ प्राण्यञोपवादः। औष्ट्रकः। उमोर्णयोर्वा। ४। ३। १५८॥ औमं। औमकं। और्णं। और्णकं। वुञभावे यथाक्रममणञौ। एण्या
ढञ्। ४। ३। १५९॥ ऐणेयं। एणस्य तु ऐणं। गोपयसोर्यत्॥ गव्यं। पयस्यं। द्रोश्च। ४। ३। १६१॥ द्रुवृक्षस्तस्य विकारोऽवयवो वा द्रव्यम्॥ ॥

पनीयादेरनुदात्तादेश्चेत्यञ् प्राप्तः प्राणि अनुदात्तादेरञः सिद्धत्वात्परिशिष्टमिहोदाहरणं तदाह शौकं बाकमिति शुकबकशब्दौ प्राणिनां कुपूर्वाकृधूमित्याद्युदात्तौ रज
तमिति रजत·सीस·लोह·उदुंबर·कंटकारेत्यादयो रजतादयस्तेषु अनुदात्तादीनां पुनः पाठो मयड्बाधनाय अन्यथा हि परत्वान्मयट् स्यादेव शामीलमिति शमीलशब्दः
शम्याः ष्लञ् इति ष्लञन्तः दधित्थादनुदात्तादेश्चेत्यञ् दाधित्थस्य दाधित्थं बैल्वमयमिति बिल्वशब्दो अणन्तः नैष्किकमिति तेन क्रीतमिति ठञ् शत्यः शतिक इति शताच्च
ठन्यतावशतादिति उमाशब्दस्तृणधान्यानां च द्व्यषामित्याद्युदात्तः उर्णाशब्दस्तु प्रातिपदिकस्वरेणान्तोदात्त इति भावः एण्या ढञ् प्राण्यञोपवादः स्त्रीलिंगनिर्देशादाह॰ ॥

...त्विति गोपयसोः यद्यपि सर्वत्र गोरजादि प्रसंगे यदुक्तस्तथापि मयड्वैतयोरिति पक्षे प्राप्तं मयटं बाधितुं पुनरयं यद्विधिः द्रोश्च ... एको चो नित्यमिति मय
टष्टायपवादोऽयं द्रुमयमिति ओर्गुणः वान्तो यि प्रत्यये द्रव्यगुणकर्मेत्यादिषु प्रयुज्यमान द्रव्यशब्दस्तु गुणो द्रूयते आश्रीयते इति द्रु धातोरचो यदिति यत्प्रत्ययान्तः ॥ ... ॥ माने
वयः यतोऽपवादः द्रुवयमिति द्रोर्विकारभूतं प्रस्थादिपरिमाणमित्यर्थः फले लुक् विकारावयवेति फलितस्य वृक्षस्य फलमवयवो विकारश्चेति तेनाऽन्यत्र ... न्प्रत्ययः आम
लकमिति मयटो लुक् लुक्तद्धितलुकीति ङीपो लुक् न चात्र स्थानिवद्भावेन यस्येति चेति लोपः शंक्यः लुकालुप्तेन स्थानिवदित्यभ्युपगमात् अत एव पंचभिः पट्वीभिः क्रीतः
पंचपटुरित्यत्र ध्वर्ड्पूर्वेति ठञो लुकि कृते लुक्तद्धितेति ङीपो लुकालुप्तत्वेन स्थानिवत्त्वाभावादुकारस्य यणादेशो न भवति प्लक्षादिभ्योऽण् अत्रोत्सर्गः शिग्रु कर्कन्धु शब्दा

माने वयः ।४।३।१६२॥ द्रोरित्येव । द्रुवयं । यौतवं द्रुवयं पाय्यमिति मानार्थकत्रयं । फले लुक् ।४।३।१६३॥ विकारावयवप्रत्ययस्य लुक् स्यात् फले ॥ आम
लक्याः फलं आमलकं । प्लक्षादिभ्योऽण् ।४।३।१६४॥ विधानसामर्थ्यान्न लुक् । प्लाक्षं । न्यग्रोधस्य च केवलस्य ।७।३।५॥ अस्य न वृद्धिरैजागमश्च । नै
यग्रोधं । जम्ब्वा वा ।४।३।१६५॥ जम्बूशब्दान्न फलेऽण् वा स्यात् । जाम्बवं । पक्षे ओरञ् । तस्य लुक् । जम्बु । लुप् च ।४।३।१६६॥ जम्ब्वाः फलप्रत्ययस्य लुप् वा स्या
त् । लुपि युक्तवत् । जम्ब्वाः फलं जम्बूः । फलपाकशुषामुपसंख्यानं ॥ व्रीहयः । मुद्गाः । पुष्पमूलेषु बहुलम् ॥ मल्लिकायाः पुष्पं मल्लिका । जात्याः पुष्पं जा
ती । विदार्य्या मूलं विदारी । बहुलग्रहणान्नेह । पाटलानि पुष्पाणि । शाल्वानि मूलानि । बाहुलकात् क्वचिल्लुक् । अशोकं । करवीरं ॥ ॥

[illegible] ... ओरञित्यस्यापवादः लुदात्तादित्वादत्रः प्राप्तिः प्लक्षः न्यग्रोध अश्वत्थ इंगुदी [illegible] बृहती तत्र प्लक्षशब्दः फिषइत्यन्तोदात्तः न्यग्रोधशब्दो लघावन्ते द्वयोश्चेति मध्योदा
त्तः अश्वत्थशब्दस्तु घृतादित्वादन्तोदात्तः इंगुदी बृहती शब्दो गौरादिङीषन्तौ अश्वत्थैः नप्लाक्षं नैयग्रोधं गुदं फलमित्यमरः न्यग्रोधस्य च केवलस्येति किं न्यग्रोध
मूले भवाः न्याग्रोधमूलाः शालयः न्यक्रोहतीति न्यग्रोधः [illegible] नियमार्थमप्युत्पत्तिपक्षे तु विध्यर्थं जम्ब्विति नपुंसकह्रस्वः फले जम्बु वा जम्बूः स्त्री जम्बु जा
म्ब वमित्यमरः फलपाकेति फलपाकेन शुष्यन्तीति फलपाकशुषः व्रीहयो मुद्गा इति [illegible] लुप् मल्लिकेति अनुदात्तलक्षणस्याञो लुप् मादीनां चेति फिट्सूत्रान्मल्लि
काशब्दो द्वितीयमुदात्तः जाती विदारीशब्दौ गौरादिङीषन्तौ पा[illegible]त्वादण् सान्त शब्दः प्रातिपदिकस्वरेणान्तोदात्तः ॥

हरीतक्यादिभ्यश्च इहद्राक्षाप्रभृतिभ्यो नित्यं वृद्धेति प्राप्तस्य मयटो लुप् अत्र ततु मनोदि —————— भ्यो ऽन्यत्रेभ्यस्त्वण्ः लिंगमेवेति वचनं तु विशेष्यवदेव हरीतक्यः ... त्
व्यक्तिरित्युक्तत्वादिति भावः कंसीयमिति प्राक्क्रीताच्छ इत्यधिकारे तस्मै हितमिति छः तस्यैव छस्यापवाद तया उगवादिभ्यो यत् परशव्यं दारुपारशव्यस्यानुदात्तादित्वादञ्सिद्धे
तत्संनियोगेन यतो लुगर्थं वचनं न च यस्येति लोपे कृते हलस्तद्धितस्येति यलोपेन सिद्धमिष्टमिति भ्रमितव्यं ईतीत्यनुवृत्तेः ॥ प्राग्दीव्यतीयाः समाप्ताः ॥ तदाहेति
निवाक्यादयं प्रत्ययविधिः शब्दो मा कारीति यो निषेधति स माशब्दिक इत्युच्यते तथा नित्यः शब्द इति य आह स नैत्यशब्दिकः कार्यशब्दिकः इह वाक्याद्वितीयान्तसंभवत्यप्राप्ति

हरीतक्यादिभ्यश्च ।४।३।१६७॥ एभ्यः फलप्रत्ययस्य लुप्स्यात् । हरीतक्यादीनां लिङ्गमेव प्रकृतिवत् । हरीतक्याः फलानि हरीतक्यः ॥ कंसीयपरशव्ययोर्यञ्
ञौ लुक्च ।४।३।१६८॥ कंसीयपरशव्यशब्दाभ्यां यञञौ स्तः छयतोश्च लुक् । कंसाय हितं कंसीयं । तस्य विकारः कांस्यम् । परशवे हितं परशव्यं । तस्य विकारः
पारशवः ॥ प्राग्दीव्यतीयाः समाप्ताः ॥ प्राग्वहतेष्ठक् ।४।४।१॥ तद्वहतीत्यतः प्राक् ठगधिक्रियते । तदाहेति माशब्दादिभ्य उपसंख्यानम् ॥ माशब्दः कारी
इति य आह स माशब्दिकः । स्वागतादीनाञ्च ।७।३।७॥ ऐच्न स्यात् । स्वागतमित्याह स्वागतिकः । स्वाध्वरिकः । स्वङ्गस्यापत्यं स्वाङ्गिः । व्यङ्गस्यापत्यं व्याङ्गिः
व्यडस्यापत्यं व्याडिः । व्यवहारेण चरति व्यावहारिकः । स्वपतौ साधुः स्वापतेयं । आहौ प्रभूतादिभ्यः ॥ प्रभूतमाह प्राभूतिकः । पार्य्याप्तिकः । पृच्छतौ सुस्नाता
दिभ्यः ॥ सुस्नातम्पृच्छति सौस्नातिकः । सौखशायनिकः । आनुशातिकादि । गच्छतौ परदारादिभ्यः ॥ पारदारिकः । गौरुतल्पिकः । तेन दीव्यति खनति जयति
जितम् ।४।४।२॥ अक्षैर्दीव्यति आक्षिकः । अभ्र्या खनति आभ्रिकः । अक्षैर्जयति । आक्षिकः । अक्षैर्जितमाक्षिकं ॥ ((पदिकत्वान्नेन तच्छब्देन कर्ममात्रं

निर्दिश्यते तच्च वाक्यार्थरूपमित्याहुः ऐच्न स्यादिति नय्वाभ्यामिति प्राप्त ऐजागमोऽनेन निषिध्यते न कर्मेत्यतो नञनुवर्तनादिति भावः स्वापतेयमिति पृथ्यतिथिवसतिस्व
पतेर्ढञ् स्वशब्दस्य द्वारादित्वादैजागमस्य प्राप्तिः द्वारादिफलं तु स्वस्येदं सौवमिति ज्ञेयं आहाविति उपसंख्यानमित्यनुषज्यते आहेति पदे एकदेशस्य ... आगमस्यागंतुके
नैकारेण आहाविति अनुकरणं प्राभूतिक इति क्रियाविशेषणाद्धक्प्रत्ययः तेन दीव्यति इह कालपुरुषसंख्या न विवक्षिता तेन अक्षैरदेवीत् देविष्यति वा आक्षिकः
इति भवति एवमक्षैर्देविष्यसि देविष्यामि वा आक्षिकः दीव्यंति दीव्यथ दीव्यामो वा आक्षिकाः कारकं तु विवक्षितमेव जयति जितमिति क[illegible] मेणाः पृथगुपादानात्

तेनाक्षैर्जुमः अक्षैःखनतः इति कर्मण्यर्थे आक्षिक इति न भवति अभ्र्येति अभ्रिःस्त्री काष्ठकुद्दाल इत्यमरः ॥ ॐ ॥ संस्कृतं योगविभाग उत्तरार्थः भक्ष्य इति सूत्रेयेवकारः सांहि
तकोनेत्यनुबंधस्तिनङीष् तथाच आकर्षात्पर्पादेरित्यादि श्लोकवार्तिकं षित्वविवेचनाय प्रकरणांते पठिष्यति निकषोपल इति सुवर्णपरीक्षार्थः पाठांतरमिति एतच्चभ्वा
दौकषखषेत्यादिदंडके आकषान्ष्ठलिति माधवेनोपन्यस्तं किंत्वाकर्षात्पर्पादेरिति वार्तिकस्याननुगुणं तत्रहि नीरेफपाठे व्यासंगतिप्रसंगात् पर्प इति पर्पं गतौ हलंश्चेति
करणे घञ् इहांतर्गणसूत्रे पादः पच्चेति पादाभ्यां चरति पदिकः एतत्तु वार्तिकं पद्भाव इके चरतावुपसंख्यानमिति सोस्यैव प्रपंचः पर्प अश्व अश्वत्थ रथ जाल न्याय व्याल पा

संस्कृतम् ।४।४।३॥ दध्नः संस्कृतं दाधिकं । मारिचिकं । कुलत्थकोपधादण् ।४।४।४॥ ठकोपवादः । कुलत्थैः संस्कृतं कौलत्थं । तैन्तिडीकं । तरति ।४।४।५॥
उडुपेन तरति । औडुपिकः । गोपुच्छाट्ठञ् ।४।४।६॥ गौपुच्छिकः । नौद्व्यचष्ठन् ।४।४।७॥ नाविकः । घटिकः । बाहुभ्यां तरति बाहुका स्त्री । चरति ।४।४।८॥
तृतीयान्ताद्गच्छति भक्षयतीत्यर्थयोष्ठक् स्यात् । हस्तिना चरति हास्तिकः । शाकटिकः । दध्ना चरति दाधिकः । आकर्षात्ष्ठल् ।४।४।९॥ आकर्षो निक
षोपलः । आकषादिति पाठान्तरं । तेन चरति आकर्षिकः । षित्वान्ङीष् । आकर्षिकी । पर्पादिभ्यः ष्ठन् ।४।४।१०॥ पर्पेण चरति पर्पिकः । पर्पिकी । येन पी
ठेन पङ्गवश्चरन्ति स पर्पः । अश्विकः । रथिकः । श्वगणाट्ठञ्च ।४।४।११॥ चात्ष्ठन् । श्वादेरिञि ।७।३।८॥ ऐच् न । श्वभस्त्रस्यापत्यं श्वाभस्त्रिः । श्वादंष्ट्रिः
तदादिविधौ चेदमेव ज्ञापकं । इकारादाविति वाच्यं । श्वगणेन चरति । श्वागणिकः । श्वागणिकी । श्वगणिकः । श्वगणिकी । पदान्तस्यान्यतरस्याम् ॥
।७।३।९॥ श्वादेरङ्गस्य पदशब्दान्तस्यैज्वा । श्वाप[illegible]पदं श्वापदं । शौवापदं ॥ वेतनादिभ्यो जीवति ॥४।४।१२॥ वेतनेन जीवति वैतनिकः । धानुष्कः ।
वस्नक्रयविक्रयाट्ठन् ।४।४।१३॥ वस्नेन मूल्येन जी[illegible]ति वास्निकः । क्रयविक्रयग्रहणं संघातविगृहीतार्थं । क्रयविक्रयिकः । क्रयिकः । विक्रयिकः ॥

ष्ठन् श्वगणाट्ठञ्च ठकोपवादः एतदेव ज्ञापकमिति द्वारा[illegible]श्वदंष्ट्राशब्दः पठ्यते ननु श्वभस्त्रश्वदंष्ट्रादिसत्याच श्वादेरिञीति निषेधसूत्रमेव व्यर्थं सद्द्वारादिषु तदादिवि
धिं ज्ञापयतीत्यर्थः फलं तु द्वारस्थानस्यायं दौवारपाल इत्या[illegible] इकारादाविति सूत्रे इञीत्यपनीय इकारादाविति पठनीयमित्यर्थः अन्ये तु इञीति स्थाने इ
तीति पठनीयम् तथाचांगाक्षिप्तप्रत्ययस्य विशेष्यत्वात्त[illegible] इकारादिर्लभ्यत इत्याहुः श्वगणिकीति ष्ठनः षित्वान्ङीष् श्वापदस्येति अन्ये[illegible]

इष्यत इति दीर्घः धानुष्क इति वेतनादिगणे धनुर्दण्डेति पठ्यते तच्च संघात विगृहीतार्थं तथा च धानुर्दण्डिकः दाण्डिक इत्यप्युदाहार्यं ॥ ॥ आयुधाच्छ च आयुधं [illegible] नेति आयुधं धन्वर्थक विधानमिति कः हरत्युत्संगादिभ्यः एभ्यस्तृतीयान्तेभ्यः [illegible] कस्यादुत्पादनेन यति वेत्यर्थः उत्संग उडुप उत्पुत पिठक पिटक भस्त्रादिभ्यः ष्ठन् भस्त्रा चर्मविकारः शीर्षभार शब्दो ऽत्र पठ्यते निपातनाच्छीर्षभारः सप्तमी समासश्च तत्पुरुषे कृतीति वा अलुक् पक्षे शीर्षभारः एकदेशविकृतस्येति वीवधाच्चेति वक्तव्यमि ति वार्त्तिकं न्यायसिद्धार्थकथनपरमिति भावः वृत्तिकृत्तु सूत्रे वीवधशब्दं प्रक्षिप्य विभाषा विवधवीवधादिति पपाठ ऐर्ममित्यं नित्यग्रहणं स्वातन्त्र्येण प्रयोगं वारयितुं अ

आयुधाच्छ च ।४।४।१४॥ चाट्ठन् । आयुधेन जीवति । आयुधीयः । आयुधिकः । हरत्युत्सङ्गादिभ्यः ।४।४।१५॥ उत्सङ्गेन हरत्यौत्सङ्गिकः ॥ भस्त्रादिभ्य ष्ठन् ।४।४।१६॥ भस्त्रया हरति भस्त्रिकः । पित्वान्ङीष् । भस्त्रिकी । विभाषा विवधवीवधात् ।४।४।१७॥ विवधेन हरति विवधिकः । पक्षे ठक् । वैवधिकः । एकदेश विकृतस्यानन्यत्वात् । वीवधादपि ष्ठन् ॥ वीवधिकः । वीवधिकी । विवध वीवध शब्दौ उभयतो बद्धशिक्ये स्कन्धवाह्ये काष्ठे वर्तते । अण् कुटिलिका याः ।४।४।१८॥ कुटिलिका व्याधानां गतिविशेषः कर्मारोपकरणभूतं लोहं च । कुटिलया हरति मृगान् अङ्गारान्वा । कौटिलिको व्याधः कर्मारश्च निर्वृत्ते ऽक्षद्यूतादिभ्यः ।४।४।१९॥ अक्षद्यूतेन निर्वृत्तं । आक्षद्यूतिकं वैरं । त्रेर्मम्नित्यम् ।४।४।२०॥ त्रिप्रत्ययान्तप्रकृतिकात् तृतीयान्तान्निर्वृत्ते ऽर्थे मप् स्यान्नि त्यं । कृत्या निर्वृत्तं कृत्रिमं । भावप्रत्ययान्तादिमप् वक्तव्यः । पाकेन निर्वृत्तम् पाकिमं । त्यागिमं । अपमित्ययाचिताभ्यां कक्कनौ ।४।४।२१॥ अपमित्येति ल्यब न्तम् । अपमित्य निर्वृत्तं आपमित्यकम् । याचितेन निर्वृत्तं याचितकं । संसृष्टे ॥४।४।२२॥ दध्ना संसृष्टं दाधिकं ॥ चूर्णादिनिः ।४।४।२३॥ चूर्णैः संसृष्टाः चूर्णि नो ऽपूपाः । लवणाल्लुक् ।४।४।२४॥ लवणेन संसृष्टो लवणः सूपः ॥ लवणं शाकं । मुद्गादण् ।४।४।२५॥ मौद्ग ओदनः ॥ ९९ तएव लौकिके विग्रहवाक्ये क्त्रि न्नादीनां प्रयोगो न तु क्तेः तदाह कृत्या निर्वृत्तमिति एवमग्रे पिपाकेन निर्वृत्तमिति विग्रहो बोध्यः संख्यावाची त्रिशब्दो नेह गृह्यते प्रत्ययाप्रत्ययोः प्रत्ययस्यैव ग्रह णात् त्रिजातं [illegible]णामिति लिंगाच्च ननु नित्यग्रहणेन निर्वृत्तार्थे विवक्षायां मपं विना त्रिप्रत्ययान्तस्य प्रयोग निवारणेपि तदविवक्षायान्तस्य स्वातन्त्र्येण प्रयोगो दुर्वार इ ति चेन्न [illegible]त्यमिति योगं विभज्य तत्सामर्थ्यादर्थविशेषानादरेणैव स्वातन्त्र्यवारणात् इमवितिएवं च मप् न कर्त्तव्यः तथा हि भावप्रत्ययान्तादिमप् ततः त्रेः पूर्वेणसि

त्वमिपमीप्यमिदं त्रिप्रत्ययांतरूपं सविषय एवेति ते न त्रिप्रत्ययांतस्य प्रयोगो निवर्त्तते ततः नित्यं अनेन निर्वृत्तार्था विवक्षायामपि व्यंतस्य साधुत्वं वार्यते एवं च संख्यावा
चि त्रिशब्दस्य ग्रहणशंकैव नास्ति भावप्रत्ययांतादित्यनुवृत्तेः स्वरेपि विशेषो नास्ति उदात्तनिवृत्तिस्वरेणाद्यस्य प्रकारस्योदात्तत्वात् अपमित्येति त्रुटीचो माङ इति क्त्वा
प्रत्यये अपेत्यनेन सह गतिसमासः क्त्वो ल्यप् मयतेरिदन्यतरस्यामिति इत्वं ह्रस्वस्येति तुक् ल्यवंतादस्मात् तृतीयांतात्प्रत्ययो न भवति किंतु वचनात्प्रथमांतादेवेति बोध्यं
॥ ॐ ॥ व्यंजनैरुप व्यज्यते अनेन ओदनादिरस इति व्यंजनं तद्वाचिभ्य उपसिक्त इत्यर्थे ठक् स्यात् ननु प्रत्ययवृत्तेरकर्मकत्वात्कथं तस्य द्वितीयांतेन प्रतीपमित्यादिना
संबंध इत्याशंकायामाह क्रियाविशेषणत्वादिति प्रतीपमिति प्रतिगता आपो स्मिन्निति बहुव्रीहिः ऋक्पूरित्यकारः समासांतः द्व्यंतरुपसर्गेभ्य इतीत्वं व्युत्पत्तिमात्र
व्यंजनैरुपसिक्ते।४।४।२६॥ ठक्। दध्ना उपसिक्तं दाधिकं॥ ओजस्सहोंऽम्भसा वर्त्तते।४।४।२७॥ ओजसा वर्त्तते औजसिकः शूरः। साहसिकश्चौरः
आम्भसिको मत्स्यः। तत्प्रत्यनुपूर्वमीपलोमकूलम्।४।४।२८॥ द्वितीयांतादस्माद्वर्त्तत इत्यस्मिन्नर्थे ठक् स्यात्। क्रियाविशेषणत्वाद्द्वितीया। प्रतीपम्व
र्त्तते प्रातीपिकः। आन्वीपिकः। प्रातिलोमिकः। आनुलोमिकः। प्रातिकूलिकः। परिमुखं च।४।४।२९॥ परिमुखम्वर्त्तते। पारिमुखिकः। चात्पारिपार्श्वि
कः। प्रयच्छति गर्ह्यम्।४।४।३०॥ द्विगुणार्थं द्विगुणं तत्प्रयच्छति द्वैगुणिकः। त्रैगुणिकः। वृद्धेर्वृधुषिभावो वक्तव्यः। वार्द्धुषिकः। कुसीददशैकादशात्
ष्ठन्ष्ठचौ।४।४।३१। गर्ह्यार्थाभ्यामाभ्यामेतौ स्तः प्रयच्छतीत्यर्थे। कुसीदं वृद्धिस्तदर्थं द्रव्यं कुसीदं तत्प्रयच्छतीति कुसीदिकः। कुसीदिकी। एका
दशार्थत्वाद्दशैकादशा तेन तत्सहितो दश शेचेति विग्रहे समासान्त इहैव सूत्रे निपात्यते। दशैकादशिकः। दशैकादशिकी। दशैकादशान्प्रयच्छति
मिदं प्रतिकूलानुकूलपर्यायाः हीमरुद्धिशब्दाः आप्लापक इति अन्वीपमित्यत्र ऊदनोर्देशे इत्यूत्वं तु न भवत्यदेशत्वात्॥ परिमु १ इत्युत्तमर्णेन एवेहापि तद्धितार्थः
खमिति अपपरी वर्जने इति कर्मप्रवचनीयसंज्ञायां पंचम्यपाङ् परिभिरिति पंचमी अपपरि बहिरंचवः पंचम्येत्यव्ययीभावः ततष्ठक् स्वामिनो मुखं वर्जयित्वा यः सेवको व
र्त्तते स पारिमुखिकः यदानुसरंतो भावे परिशब्दः प्रादिसमासः स्वतंत्रा यतो यतः स्वामिनो मुखं ततस्ततो यो वर्त्तते स एवमुच्यते एवं पारिपार्श्विकोप्यर्थद्वये बोध्यः प्रय
च्छति द्वितीयांतात्प्रयच्छत्यर्थे ठक् स्यात् प्रयच्छति गर्ह्ये चेति द्विगुणार्थं द्विगुणमिति तादर्थ्ये चतुर्थ्या मिति भावः बहुवृद्ध्युद्देश्यकदानकर्मतयास्य द्रव्यस्य गर्ह्यत्वं

वार्द्धुषिक इति द्व्यर्थं वृद्धिः तां प्रयच्छतीति विग्रहः अथ कथं द्व्याजीवश्च वार्द्धुषिरित्यमरः उक्तं नियोगेनैव वृध्युषिभावस्वीकारात् अत्राहुः निरंकुशाः कवय इति गर्ह्यमिति किं द्वि गुणं त्रिगुणं वा वृद्धिं प्रयच्छन्त्यधमर्ण इत्यर्थे द्वैगुणिक इत्यादि माभूत् निपात्यत इति अगरव्याख्याने प्रयोगोप्युपपद्यत इत्याशयेनोदाहरति दशैकादशानिति संख्यायाः अल्पीय स्या इति पूर्वनिपातः अनमर्णश्चेति दश दत्वा एकादश गृह्णातीति तस्यैव गर्ह्यत्वादिति भावः॥ ॥ उंछति भूमौ पतितस्यैकैकस्योपादानमुंछः सामाजिक इति समजंतिअ स्मिन्निति समाजः समूहः शब्दं करोतीति प्रकृतिप्रत्ययविभागेन व्युत्पादयतीत्यर्थः अभिधानस्वाभाव्याद्व्युत्पादन एवायं प्रत्ययः नेह शब्दं करोति वर्वरः खरो वा दार्दुरिक इति कुला लः वा घटभांडवाची ह दर्दुरशब्दः मात्स्यिक इति मत्स्यस्य ड्यामिति परिगणनात् सूर्यतिष्येति यलोपाभावः हारिणिक इति नन्विदं पर्यायस्योदाहरणं न भवति हरिणस्य मृगविशेषत्वा

उंछति। ४।४।३२॥ बदराण्युंछति बादरिकः। रक्षति। ४।४।३३॥ समाजं रक्षति सामाजिकः। शब्ददर्दुरं करोति। ४।४।३४॥ शब्दं करोति शाब्दिकः। दार्दुरिकः। पक्षि मत्स्यमृगान्हन्ति। ४।४।३५॥ स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणं मत्स्यपर्याये तु मीनस्यैव। पाक्षिको हन्ति पाक्षिकः। शाकुनिकः। मायूरिकः। मात्स्यि कः। मैनिकः। शाकुलिकः। मार्गिकः। हारिणिकः। सारङ्गिकः। परिपन्थं च तिष्ठति। ४।४।३६॥ अस्माद्द्वितीयान्तात्तिष्ठति हन्ति चेत्यर्थे ठक् स्यात्। प न्थानं वर्जयित्वा व्याप्य वा तिष्ठति पारिपन्थिकश्चौरः। परिपन्थं हन्ति पारिपन्थिकः। माथोत्तरपदपदव्यनुपदं धावति। ४।४।३७॥ दण्डाकारो माथः प न्थाः। दण्डमाथः। दण्डमाथं धावति दाण्डमाथिकः। पादविकः। आनुपदिकः। आक्रन्दाट्ठञ्च। ४।४।३८॥ अस्माट्ठञ् स्यात् चाट्ठक् धावतीत्यर्थे आक्रन्दः दुःखिनां रोदनस्थानं धावति। आक्रन्दिकः। पदोत्तरपदं गृह्णाति। ४।४।३९॥ पूर्वपदं गृह्णाति पौर्वपदिकः। औत्तरपदिकः। प्रतिकण्ठार्थललामं च त्यर्थे ठक् स्यात्। प्रतिकण्ठं गृह्णाति। प्रातिकण्ठिकः। आर्थिकः। लालामिकः॥

१ तथा चात्र पर्यायस्योदाहरणं किमिति न प्रदर्शितमिति चे दत्राहुः आरण्यकचतुष्पात्सु हरिणे च मृगशब्दो वर्तते यदा हरिणवाची मृगशब्दस्तदा मृगपर्यायस्योदाहरणं भवत्येवेति परिपंथं च परिमुखवदयमव्ययीभावस्त त्पुरुषो वा। कर्मविशेषणत्वात्तिष्ठतेरकर्मकत्वेपि परिपंथस्य कर्मत्वमस्त्येवेत्याह द्वितीयान्तादिति चकारोभिन्नक्रमः प्रत्ययार्थे समुच्चिनोतीत्याह तिष्ठति हन्ति चे त्येषामायत इति मथ्यते गंतृभिरिति माथः मथे विलोडने कर्मणि घञ् पदोत्तरपदं पदशब्द उत्तरपदं यस्य तत्पदोत्तरपदं परान्तमिति तु नोक्तं बहुच्पूर्वान्मा भूदिति

प्रतिकण्ठम् इति कण्ठं कण्ठं प्रतीति वीप्सार्थे अव्ययीभावः लक्षणेनाभिप्रती आभिमुख्ये इत्यनेन । यस्तु प्रतिगतः कण्ठं प्रतिकण्ठं इति प्रादिसमासः तस्येह न ग्रहणं व्याख्यानादि
त्यर्थः ॥ धर्मं चरति चरतिरिहासेवायां न त्वनुष्ठानमात्रे तेन दैववशाद्धर्मे प्रवृत्तौ ... धार्मिक इत्युच्यते आसेवा हि स्वारसिकी प्रवृत्तिः एवं दैवकाद्धर्मे प्रवृत्तो यः
स हन्त आधर्मिक इति नोच्यते प्रतिपथमिति वीप्सायामाभिमुख्ये वा अव्ययीभावः अच् इति समासान्तः समवायान् समूहवाचिभ्यो द्वितीयान्तेभ्यः ष्ठक् स्यात् सम
वैतीत्यर्थे इह समवपूर्वस्य एतेरर्थः प्रविश्यैकदेशीभवनं तत्र गुणभूतप्रवेशापेक्षया समवायान् इति द्वितीया निर्दिष्टाः विशेष्यापेक्षया तु लोके सप्तमी प्रायेण प्रयुज्यते ।

धर्मं चरति । ४ । ४ । ४१ ॥ धार्मिकः । अधर्माच्चेति वक्तव्यम् ॥ आधर्मिकः । प्रतिपथमेति ठंश्च । ४ । ४ । ४२ ॥ प्रतिपथमेति प्रातिपथिकः । समवाया
न्समवैति । ४ । ४ । ४३ ॥ सामवायिकः । सामूहिकः । परिषदो ण्यः । ४ । ४ । ४४ ॥ परिषदं समवैति पारिषद्यः । सेनाया वा । ४ । ४ । ४५ ॥ ण्यः स्यात्पक्षे ठ
क् । सैन्याः । सैनिकाः ॥ संज्ञायां ललाटकुक्कुट्यौ पश्यति । ४ । ४ । ४६ ॥ ललाटं पश्यति लालाटिकः सेवकः । कुक्कुटीशब्देन तत्पातार्हः स्वल्पदेशो ल
क्ष्यते । कौक्कुटिको भिक्षुः । तस्य धर्म्यम् । ४ । ४ । ४७ ॥ आपणस्य धर्म्यमापणिकम् । अण् महिष्यादिभ्यः । ४ । ४ । ४८ ॥ महिष्या धर्म्यं माहिषं । याज
मानं । ऋतोऽञ् । ४ । ४ । ४९ ॥ यातुर्धर्म्यं यात्रं । नराच्चेति वक्तव्यं ॥ नरस्य धर्म्यो नारी । विशसितुरिड्लोपश्चाञ्च वक्तव्यः । विशसितुर्धर्म्यं वैशस्त्रं ।
विभाजयितुर्णिलोपश्चाञ्च वाच्यः ॥ विभाजयितुर्धर्म्यं वैभाजित्रं । अवक्रयः । ४ । ४ । ५० ॥ षष्ठ्यन्ताट्ठक् स्यादवक्रयेऽर्थे आपणस्यावक्रय
आपणिकः । राजग्राह्यं द्रव्यमवक्रयः । तदस्य पण्यम् । ४ । ४ । ५१ ॥ अपूपाः पण्यमस्य आपूपिकः । लवणाट्ठञ् । ४ । ४ । ५२ ॥ लावणिकः ॥ किसरा
दिभ्यः ष्ठन् । ४ । ४ । ५३ ॥ किसरं पण्यमस्य किसरिकः । षित्वान्ङीष् । किसरिकी । किसर उशीर नलद इत्यादि किसरादयः । सर्वे सुगन्धिद्रव्यविशे

कुरुक्षेत्रे समवेता इति यथा एत्येधत्यूठ्स्विति वृद्धिरिह न भवत्येङादित्वाभावात् सैन्याः सैनिका इति द्वितीयान्ताट्ठकौ यस्तु सेनायां समवेतास्ते सैन्यास्ते सैनिका उच्यन्ते इ
ति निर्दिष्टं दृष्ट्वा कृतं तत्फलितार्थकथनपरं बोध्यं संज्ञायां ललाटकुक्कुटीशब्दाभ्यां द्वितीयान्ताभ्यां पश्यतीत्यर्थे ठक् स्यात् समुदायेन संज्ञा प्रसिद्धिस्तस्यां प्रसिद्धिविषयभूते
र्थे इत्यर्थः लालाटिक इति ... स्थित्वा प्रभोर्ललाटं पश्यति न तु कार्ये उपस्थित इत्यर्थः लालाटिकः प्रभोर्भालदर्शी कार्याक्षमश्च यः कौक्कुटिको भिक्षुरिति संज्ञा

हिपादविक्षेपपर्यास्तदेशपर्यन्तमेवचलत्संयम्यगच्छतीतिभावः धर्म्यमिति धर्मादनपेतं धर्म्यं धर्मपथ्यर्थन्यायादनपेत इति यत् अवक्रयः अवक्रीयते अनेनेति।
कारणोऽरस्त्व वर्ण्यमिति यणितमर्थे अवद्यपण्येतियदंतोनिपातितः शलालुक इति इसुसुक्तांतात्कः ठकाःसेत्वादिवृद्धिः शालालुकः मार्दंगिक इति मृदंगशब्देन मृ
दंगवादनं लक्ष्यते मुख्यार्थे तु प्रयोगो न भवत्यनभिधानादिति भावः शिल्पं कौशलं तच्च मृदंगवादनविषयकं तेन मृदंगवादनविषयके मृदंगशब्दस्य लक्षणेति।
निष्कर्षः प्रहरणं प्रक्षिप्यते अनेनेति प्रहरणमायुधं धानुष्क इति इसुसुक्तांतात्कः इणः षः इति विसर्गस्य षः परश्वधात् चाट्ठकद्वयोः कुठारः स्वधितिः परशुश्च पर

शलालुनोऽन्यतरस्याम्।४।४।५४॥ छन्स्यात्पक्षे ठक्। शलालुकः। शलालुकी। शालालुकः। शालालुकी। शलालु सुगन्धिद्रव्यविशेषः। शिल्प
म्।४।४।५५ मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः॥ मड्डुकझर्झरादणन्यतरस्याम्।४।४।५६॥ मड्डुकवादनं शिल्पमस्य माड्डुकः। माड्डुकिकः। झार्झरः।
झार्झरिकः। प्रहरणम्।४।४।५७॥ तदस्येत्येव। असिः प्रहरणमस्य आसिकः। धानुष्कः॥ परश्वधाट्ठञ्च।४।४।५८॥ पारश्वधिकः। शाक्तिकयष्ट्योरी
कक्।४।४।५९॥ शाक्तीकः। याष्टीकः। अस्तिनास्तिदिष्टं मतिः।४।४।६०॥ तदस्येत्येव। अस्ति परलोक इत्येवं मतिर्यस्य स आस्तिकः। नास्तीति मति
र्यस्य स नास्तिकः। दिष्टमिति मतिर्यस्य स दैष्टिकः॥ शीलम्।४।४।६१॥ अपूपभक्षणं शीलमस्य आपूपिकः। छत्रादिभ्यो णः।४।४।६२॥ गुरोर्दो
षाणामावरणं छत्रं तच्छीलमस्य छात्रः॥ कार्मस्ताच्छील्ये।६।४।१७२॥ कार्म इति ताच्छील्ये णे टिलोपो निपात्यते। कर्मशीलः। कार्मः। नस्त
द्धित इत्येव सिद्धे अण्कार्य्यं नाच्छीलिके णेऽपि। तेन चौरी तापसीत्यादि सिद्धं। ताच्छील्ये किं। कार्मणः॥ २२ ॥

श्वधः परलोक इति एतच्चाभिधान
शक्तिस्वाभाव्याल्लभ्यते आस्तिक इति अस्तिनास्तिशब्दौ निपातौ यद्वा वचनसामर्थ्यादस्तीत्याख्यातान्नास्तीतिनिपातात्ख्यातसमुदायाच्च प्रत्ययः दिष्टमिति दैवं दिष्टं भाग
धेयमित्यमरः नालंवते दैष्टिकतामिति माघः प्रमाणानुगामतिर्दिष्टेति प्राचोक्तिस्तु पेक्ष्या दिष्टशब्दस्यस्त्रीत्वे प्रमाणानुगमतिवाचकत्वे चोक्तकोशविरोधादिति दिक्
छत्रादिभ्यो णः छत्रादिभ्यो णित्येव सुवचमिति कार्मस्ताच्छील्य इति सूत्रे कैयटः ताच्छील्ये इति कर्मन् शब्दस्य छत्रादित्वादिति भावः चौरीत्यादि चुराशीलमस्याः
तपः शीलमस्या इति विग्रहे णप्रत्यये सति नदतान्ङीप् सिद्ध्यतीत्यर्थः

आकरिक इति खनिः स्त्रियामाकरः स्यादित्यमरः अध्यापिन्य अदेशकालमित्वि कार्यमधीते पूर्वाह्णे अधीते काठिनांत प्रस्तार संस्थान शब्दौ संनिवेशपर्यायाविति विहकः प्रस्तारो यज्ञः मैत्रोयज्ञ इति घञ् संस्थानं संनिवेश इत्यके नैकटिको भिक्षुरिति संन्यासी हि ग्रामस्यानिकटे वसन् भिक्षार्थमेव ग्रामे प्रविशति न तु तत्र वसतीति भावः आवसथात् ठल्कारः स्वार्थः आवसंत्यस्मिन्निति आवसथः उपसर्गे वसेरित्यथ प्रत्ययः कुसीदसूत्रादिति कुसीद दशैकादशादिति सूत्रोपात्ताभ्यां प्रकृतिभ्यामित्यर्थः इह नौद्यचष्ठन्नित्यत्र वयेषांषकारः सांहितिक इतिः भाव्यते तेषामेव गणे नेष्ठलादेः षित्वमनार्षमिति भ्रमः स्यादतः श्लोक वार्तिककारः षित्वमप्यास्सर्वानपि पर्यजीगणत्॥ ० ठकादयः समाप्ताः॥ ॥ युग्य इति युगरथांगं वहतीत्यर्थः प्रासंग इति प्रासज्यते असाविति कर्मणि घञ् धुरो धुरोढक्कौ त्येव सुवचं नम उपधाया इति उपधायां च

प्राग्घिताद्यत्।४।४।७५॥ तस्मै हितमित्यतः प्राक् यदधिक्रियते। तद्वहतिरथयुगप्रासङ्गम्।४।४।७६। रथम्वहति रथ्यः। युग्यः। वत्सानां दमनकाले स्कन्धे काष्ठमासज्यते स प्रासङ्गः। तम्वहति प्रासंग्यः। धुरो यड्ढकौ।४।४।७७॥ हलि चेति दीर्घे प्राप्ते॥ नभकुर्छुराम्।८।२।७९॥ भस्य कुर्छुरोश्चोपधाया दीर्घो न स्यात्। धुर्य्यः। धौरेयः। खस्सर्वधुरात्।४।४।७८॥ सर्वधुरम्वहतीति सर्वधुरीणः॥ एकधुराल्लुक्च।४।४।७९॥ एकधुरम्वहति। एकधुरीणः। एकधुरः। शाकटादण्।४।४।८०॥ शाकटम्वहति शाकटो गौः। हलसीराट्ठक्॥४।४।८१॥ हलम्वहतीति हालिकः॥ सैरिकः॥

९ तिपूर्वसूत्रादेतदनुवर्त्यत इति भावः उपधायाः किं प्रतिदीव्नः इह नान्तस्य भत्वेपी काररस्यानुपधात्वान्निषेधो न प्रवर्त्तते खः सर्वधुरात् सर्वधुराया इति वक्तव्ये नपुंसकनिर्देशः शब्दस्वरूपापेक्षया वं धुनिवहुत्रीहाविति वत् सर्वधुरामिति पूर्वकालैकेति समासः ऋक्पूरब्धूरिति समासांतेः प्रत्यये टापू एकधुराल्लुक्च चात्खः एवं च माकरणिकस्य यतो लुक् खस्य तु विधानसामर्थ्याल्लुक्चवणमिति फलितं तदाह एकधुरीण इत्यादि शाकटो गौरिति ननु तस्येदमित्यणा सिद्धं यो हि शाकटं वहति शाकटस्यासौ भवति अत्राहुः आरंभसामर्थ्यादत्र तदंतविधिरनेन द्वैशकटं वहति द्वैशाकट इत्यत्र द्विगोर्लुगनपत्य इति प्राग्दीव्यतीयो लुग् भवति तस्येदमित्यणा तु स्यादेव लुगिति हलसीरात् ननु तस्येदमित्युपक्रमे हलसीराट्ठगिति पठितं तथा च तेनैव शैषिकेण हालिकः सैरिक इति सिद्धौ किमनेनेति चेत् सत्यं आरंभसामर्थ्यादत्रापि तदंतविधिस्तेन द्वैहलिको द्वैसीरिक इति भवति

[illegible]के ऽकि तु प्राग्दीव्यतीयो लुक् स्यात् जायते अस्यां गर्भ इति व्युत्पत्तिमाश्रित्य आह जनीवधूरिति जनिघसिभ्यामिण् जनिवध्योश्चेति न वृद्धिः कृदिकारादिति ङीष् ततो ऽ[illegible]सूत्रे यत् प्रत्यये जन्या जामातुर्वयस्या सा हि विवाहादिषु वधूं जामातृसमीपं प्रापयति कालि[illegible]स्तु वध्वासन्नवाहेष्वपि प्रायुंक्त यातेति जन्यानवदत्कुमारीरिति जनीं वहन्ती ति च न्याय्या ऽऽसीत् इत्यर्थः पद्या इति यद्धस्तदर्थ इति पद्भावः अधनुषा किं चोरं विध्यति संभाव्यते हि चोरव्यधने धनुषः करणत्वं यदा तु धनुषेति प्रयुज्यते तदा सापेक्षत्वादेव न भवति एवं च नेकात्र धनुः करणमित्यत्र संभाव्यते इति विशेषो बोध्यः तृन्नं तमिति एवं च न लोके त्यादिना कृद्योगषष्ठ्या निषेधाद्धनं गणमिति प्रयोगो निर्बाध इति भावः वशं गतः वशनं वशः इच्छा वशिरण्योरुपसंख्यानमित्यप् मूलमस्यावर्हि प्रथमान्ताद्दावर्हि इत्युपाधिकान्मूलशब्दादस्येति षष्ठ्यर्थे यत् स्यात् आवर्ह इति वृह उद्यमने इ

संज्ञायां जन्याः ।४।४।८२। जनीं वधूं वहन्ति प्रापयन्ति जन्याः ॥ विध्यत्यधनुषा ।४।४।८३। द्वितीयान्ताद्विध्यतीत्यर्थे यत् स्यान्न चेत्तत्र धनुः करणं। पादौ विध्यन्ति पद्याः शर्कराः धनगणं लब्धा ।४।४।८४। तृन्नन्तमेतत् । धनं लब्धा धन्यः गणं लब्धा गण्यः ॥ अन्नाण्णः ।४।४।८५। अन्नं लब्धा आन्नः । वशं गतः ।४।४।८६। वश्यः परेच्छानुचारी । पदमस्मिन्दृश्यम् ।४।४।८७। पद्यः कर्दमः ॥ नातिशुष्क इत्यर्थः ॥ मूलमस्याबर्हि ।४।४।८८। आवर्हणमावृहः उत्पाटनं तदस्यास्तीति आवर्हि मूलम् आवर्हि येषां ते मूल्या मुद्गाः । संज्ञायां धेनुष्या ।४।४।८९। धेनुशब्दस्य षुगागमो यत्प्रत्ययश्च स्वार्थे निपात्यते संज्ञायां । धेनुष्या बन्धके स्थिता । गृहपतिना संयुक्ते ञ्यः ।४।४।९०। गृहपतिर्यजमानस्तेन संयुक्तो गार्हपत्योऽग्निः । नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु ।४।४।९१।

९ त्योऽष्यादिरयं न तु पवर्गादिः उदाहरणेषु सह मूलमिन्द्रियादि प्रयोगदर्शनात् मूल्या मुद्गा इति मूलोत्पाटनं विना सेयग्रहीतुमशक्याः मध्यतो लूयमानेषु कोशस्था अपि यस्यामवस्थायां पतेयुस्तामवस्थां प्राप्ताः सुष्ठु शुष्का इति यावत् यत्प्रत्यय इति तेन धेनुष्या शब्दोऽन्तोदात्तः इति तु नित्स्वरः स्यादिति भावः ॥ [illegible] ॥ संज्ञायामिति ऋणप्रत्यर्पणाय या धेनुर्दोहनार्थमुत्तमर्णाय [illegible] संयुक्ते यं गार्हपत्य इति गृहपतिनेति निर्देशादेव तृतीयान्तात्प्रत्ययः संज्ञायामित्यनुवृत्तेरहनीयादौ नातिप्रसंगः नौवयो धर्मेत्यादिभ्योऽष्टभ्यो यथासंख्यं तार्यादिष्वष्ट स्वर्थेषु यत् स्यात् इह तार्यादियोगे यथासंभवं करणकर्तरि [illegible] तृतीया भवतीति सैवेह समर्थविभक्तिरर्थाल्लभ्यते अत्र प्रथमं मूलं तानां पंचा

नौद्वंद्वं कृत्वा द्वितीयमूलादि द्वंद्वेन सह समाहारद्वंद्वः मूलं नाना द्वितीयाणां वा मूलादीनामेव वा द्वंद्वं कृत्वा नावादिषु द्वंद्वे तेन सहास्याभावादेकशेषो न भवति ॥ ॥ नावा ता
र्यमिति शक्यार्थे अर्ह लोर्प्रत्ययेन करणे तृतीया वयस्य इति स्निग्धो वयस्यः सवया इत्यमरः वयसा तुल्यः शत्रुरित्यत्र तु न भवति संज्ञाधिकारात् विषेण वध्य इति विषेण वधमर्हती
त्यर्थः दंडादिभ्य इति सूत्रे यवधशब्दात् [illegible] यद्विधानात् मूलेनानाम्यमिति मूलं नाम पदादीनामुत्पत्त्यर्थं वणिग्भिर्विनियुक्तं द्रव्यं तेन स्वस्मादतिरिक्तं लाभाख्यं यद्
द्रव्यमात्मानं प्रति शेषीक्रियते आत्मन उपकारकं क्रियते तत् आनाम्यं आङ्पूर्वको नमिरभिभवे वर्तते तस्मात् पोरदुपधादिति यति प्राप्ते अत एव निपातनाण्ण्यत् त
था चोक्तम्यमभिभवनीयं आत्मानं प्रति शेषीकर्तव्यं स च लाभाख्यो भाग एव लोके तु यावता द्रव्येण पटादिकं विक्रीयते तत्रैव समुदाये मूल्यशब्दः प्रसिद्धो न तु मूला
तिरिक्तभागमात्रे एवं च लाभमात्रे वृत्त्यादि तस्य मूल्यशब्दस्य तद्व्यतिसंघाते निरूढलक्षणा वोध्यासीतेति सीता हलाग्रं संपूर्वादिणः क्तः संमितं संगतं निम्नोन्नतादि

नावा तार्य्यं नाव्यं । वयसा तुल्यो वयस्यः । धर्म्मेण प्राप्यं धर्म्यं विषेण वध्यो विष्यः । मूलेन आनाम्यं मूल्यं । मूलेन समो मूल्यः । सीतया समितं सीत्यं क्षे
त्रं । तुलया संमितं तुल्यं । धर्म्मपथ्यर्थन्यायादनपेते । ४।४।९२॥ धर्म्मादनपेतं धर्म्यं । पथ्यं । अर्थ्यं । न्याय्यं । छन्दसो निर्म्मिते । ४।४।९३॥ छन्द
सा निर्म्मितं छन्दस्यं । इच्छया कृतमित्यर्थः । उरसोऽण् च । ४।४।९४॥ चाद्यत् । उरसा निर्म्मितः पुत्रः औरसः । उरस्यः । हृदयस्य प्रियः । ४।४।९५॥
हृद्यो देशः हृदयस्य हृल्लेखयदण्लासेतिहृदादेशः ॥ ॥

रहितं कृतमित्यर्थः समीकृतमिति यावत् इयं सीता हलेभ्यो य द्विधा वितीनदंतवि
धिः परमसीत्यं द्वाभ्यां सीताभ्यां समितमिति तद्धितार्थे समासस्ततो यत् द्विसीत्यं तुलया संमितमिति संमितं परिछिन्नं रूढिशब्दोयं संज्ञायामित्यधिकारात् अत एव तु
ल्यमिति सदृशमात्रे प्रयुज्यते न तु तुलायामाग्रहः क्रियते पथ्यमिति संज्ञाधिकारादभिधेयनियमः तेन शास्त्रीयात्पथोऽनपेतं तमेव पथ्यं न तु मार्गादनपेतं श्चोरोपि छं
दसो छदि संवरण इति चुरादिरिच्छायामपि वर्त्तते धातूनामनेकार्थत्वात् ततो घञि इच्छापर्यायश्छंदशब्दः प्रसिद्ध एव स्वच्छंदो छलदछकत्येत्यादौ अमुनि तु यः सां
[illegible] निर्माणे इच्छायाः करणत्वात्सामर्थ्यात्तृतीयां तात्प्रत्ययः इच्छया कृतमिति यद्यपि वेदे त्रिष्टुवादिषु च सांत श्छंदः शब्दोस्ति तथापि इह न गृह्यते
संज्ञाधिकारात् किं त्विच्छापर्याय एव सगृह्यते इति भावः पुत्र इति संज्ञाधिकारान्नेह उर [illegible] निर्मितं सुखं हृदयस्य प्रीणातीति प्रियः इगुपधेति कः कृद्योगात्कर्म

पक्षान्तरे तु नमःशब्दात् पञ्चम्या पञ्चेत्यापचेत्यादिवदाद्युदात्तः स्यात् एवं च व्याख्यानं तु यस्याप्यावश्यकत्वे लक्ष्यानुरोधेन क्वचित्किंचिद्व्याख्येयमिति तत्त्वं समानतीर्थे वासी निपातनात् सिनिर्ग्र
न्थादेरकृतिगणत्वान्नांदिगृहीत्यनेन वा सतीर्थ्य इति तीर्थे ये इति समानस्य सभावः तरंत्यनेनेति तीर्थं तरतेस्थक् तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमंत्रिषु योनौ जलावतारे च
निविष्टः इह लव्ध्यापकर्षाद्विना एवं ग्रहणं नान्यस्य संज्ञाधिकारात् शङ्कितः स्थितः इति शीधातुः स्थित्यर्थे वर्तते जलेशयः कुशेशयमिति प्रयोगादिति भावः समानमुदरमिति
पूर्वोक्तं प्रथमस्यादिना तत्पुरुषः ततो यत् तन्त्रापवाद ओकारस्योदात्तः सोदर्यः ओचोदात्त इति नानुवर्तते विभाषोदरे इति समानस्य सभावः तत्र तीर्थे य इत्यतोऽनुवृत्तं य इत्येन
द्विषयसप्तमी तेन सोदरं इत्यस्माद्यः शय्यस्वरः प्राग्वदिति समानोदरे शयित इत्येवार्थः इत्यर्थः कथं तर्हि अपंथा नतु गच्छं तं सोदरोऽपि विमुंचतीति मुरारिरिति चेत् अत्राहुः स
हसमानमुदरं यस्य सोदरः वोपसर्जनस्येति सहस्य सभावः तस्य वैकल्पिकत्वाद्यत्र भावस्तत्र सहोदर इत्यपि सिद्धमिति ॥ ॥ इति प्राग्धीतीयाः समासाश्चातुर्थिकाः ॥ अथ पांचमि

प्राक्क्रीताच्छः । ५।१।१ । तेन क्रीतमित्यतः प्राक् छोऽधिक्रियते ॥ उगवादिभ्यो यत् । ५।१।२ ॥ प्राक्क्रीतादित्येव । उवर्णान्तात् गवादिभ्यश्च यत्स्यात् छस्यापवादः
शंकवे हितं । शङ्कव्यं । नाभि नभं च ॥ नभ्योक्षः । नभ्यमञ्जनं रथनाभावेवेदं । शुनः सम्प्रसारणं वा च दीर्घत्वम् ॥ शुन्यं । शून्यं । ऊधसोऽनङ् च । ऊधन्यः ॥ कम्बलाच्च संज्ञा
याम् । ५।१।३ ॥ यत्स्यात् । कम्बल्यमूर्णापलशतं । संज्ञायां किं । कम्बलीया ऊर्णा ॥ ॥

१९ का० प्राक्क्रीताच्छः इत्यतः प्रागिति इहार्थोऽवधित्वेन गृह्यते न तु प्रत्ययः
प्रकृतिर्वा तेनार्थ एवावधिमंत इति प्राक्क्रीतादेशः तद्धिताद्यस्तेषु यस्योपस्थानं अवधिसजातीयोऽत्यवधिमान् भवति यथा मासात्पर इति कालः प्रतीयते ग्रामात्पूर्व इति देशः अतोऽन्यात्
र्व इत्यत्रैव एवं च समानेऽर्थे प्रकृतिविशेषाद्उत्पद्यमानोऽप्रत्यादिः प्रकृत्यंतरे साधकाः प्रोक्तं तत्र कौण्डिन्यन्यायेन बाधते अन्यथा छस्य परादेश्च संनिधानाविशेषात् व्यवधानीयत्वमिव पर्यायः
स्यात् अतोऽर्थोऽवधित्वेन गृह्यते ननु परादिविषये छो न भविष्यति विभाषा हविरपूपादिभ्य इति विभाषाग्रहणलिंगात् तथा च प्रत्ययस्य प्रकृतेर्वा अवधित्वस्वीकारे न क्षतिः उक्त
ज्ञापकेनोगवादिप्रभृतिभ्यश्छः स्यादिति प्रसंगनिरासादिति चेत् अत्राहुः एवं सति छ इत्येवाधिकारोऽस्तु नार्थोऽवधिनिर्दिष्टो नाप्राग्वतेष्ठञित्यादिके तु प्रकरणे नास्याधिकारः अधिका
रांतरेणोपरुद्धत्वात् स्पष्टप्रतिपत्त्यर्थमवधिनिर्देशोऽन्यथा प्रतिपत्तिगौरवं स्यादिति चेत् तर्हि विभाषा हविरित्यादिज्ञापकाश्रयणे प्रतिपत्तिगौरवात् इत्यर्थं वा वधित्वेन निर्दिष्टमुचितमिति
ओगवादिभ्यो उवर्णान्ताद् गवादेश्च द्वादेर्वंशद्वादेश्च यत्स्यादित्यर्थो न भवति गवादिगणपाठात् गवाद्यंतर्गणसूत्राण्याह नाभि नभं चेति नाभिशब्दो यत्प्रत्यये परे नभादेशं चेत्यर्थः नभ्योक्ष इति

सि·कौ·
त·त·
सु·त
४६

खलयव अत्र वृषशब्दोऽकारान्तो गृह्यते न तु नकारान्तः अन्यथा त्वरन्ते नार्थे न लोपमकृत्वैव निर्दिशेत् आत्मन्विश्वजनेतिवत् वृषाय हितं वृष्यं नांता घति तु वृषण्यं [illegible] तेस्या
न ब्रह्मण्यमिति ब्रह्मन्शब्दो ब्राह्मणपर्यायः प्रकृतिभावस्तु ये चाभावकर्मणोरिति पूर्ववत् इह वृषन्शब्दात् ब्रह्मणशब्दाच्च यतः प्राप्तिरेव नास्ति छोप्यनभिधानान्नेत्याकरः तेन वृष्णे हितं भो
सलोभ्यो हितमिति वाक्यमेव चाद्रथ्यमिति गवादिषु रथशब्दो न पठितः हितार्थे एवरथ्येति यथा स्यात् अर्थान्तरे माभूदिति अजाविभ्यां अजशब्द इह पुल्लिंग उपात्तः अत एव
[illegible] विभ्य[illegible] वा निपातं बाधित्वा अजाद्यदंतमिति अजशब्दस्य पूर्वनिपातः कृतः प्रातिपदिकग्रहणे लिंगविशिष्टस्यापीति स्त्रीलिंगादपि थ्यन् तसिलादिषु थ्यनः
परिगणनात्तु न पुंवद्रूपं तुल्यं अजथ्येति अजेभ्यो अजाभ्यो वा हितेति विग्रहः ॥ कर्मधारया इवेति ॥ ॥ व्याख्यानादिति भावः विश्वजनीयमिति विश्वस्य जन
सर्वसाधारणत्वे ऽस्यादिः विश्वो जनो यस्येति बहुव्रीहावपि स एवान्यपदार्थस्तस्मै हितमिति विग्रहः पंचजनीनमिति रथकारपंचमाश्चत्वारो वर्णाः पंचजनास्तेभ्यो हितं दि

खलयवमाषतिलवृषब्रह्मणश्च ।५।१।७। खलाय हितं खल्यं। यव्यं। माष्यं। तिल्यं। वृष्यं। ब्रह्मण्यं। चाद्रथ्या अजाविभ्यां थ्यन् ।५।१।८। अजथ्या
यूथिः। अविथ्या। आत्मन्विश्वजनभोगोत्तरपदात्खः ।५।१।९। आत्माध्वानौ खे। ६।४।१६९ ॥ एतौ खे प्रकृत्या स्तः। आत्मने हितमात्मनीनं। विश्व
जनीनं। कर्मधारयादेवेष्यते। षष्ठीतत्पुरुषाद्बहुव्रीहेश्च छ एव। विश्वजनीयं। पञ्चजनादुपसंख्यानम्। पञ्चजनीनम्। सर्वजनाट्ठञ्खश्च। सार्व
जनिकः। सर्वजनीनः। महाजनाट्ठञ्। माहाजनिकः। मातृभोगीणः॥ पितृभोगीणः। राजभोगीनः। आचार्यादणत्वञ्च॥ आचार्यभोगीनः॥

कास्ये संज्ञायामिति समासः पंचजनादित्येतत्प्रभृति वार्तिकत्रयमपि कर्मधारयविषयमेव तेन षष्ठीसमासाद्बहुव्रीहेश्च छ एव पंचजनीयः सर्वजनीन इति सर्वो जनः सर्व
जनः पूर्वकालैकेति तत्पुरुषः तस्मै हितमिति विग्रहः साध्वर्थे तु प्रतिजनादिभ्यः खञिति खञि सार्वजनीन वैश्वजनीनशब्दौ व्युत्पादितौ मातृभोगीण इति इहाखण्डपदत्वाभावेऽप्य
द्रकुप्वाड्व्यवायेनेति णत्वं भवति तथा प्रागेवोपपादितं मातुर्भोगः शरीरं तस्मै हित इति विग्रहः यद्यपि भोगः सुखस्यादिभृ नावहेश्च वर्ण कायपर्यायि न्यमरेण अहिरस्युक्तं त
थापि प्रयोगबाहुल्याभिप्रायं न तु शक्तिस्तु शरीरमात्रे इत्याकरः मातृपितृशब्दाभ्यामौत्सर्गिकः छ एव मात्रीयः पित्रीयः राजाचार्याभ्यां त्वौत्सर्गिकः छोऽपि न भवत्यनभिधानात् किं तु राज्ञे हितं
माचार्याय हितमिति वाक्यमेव त्याकरः

निषेधेन तु ढञेवेष्यते छादिषेयं चर्म आह च यञ्ञा वत्रः पूर्वविप्रतिषिद्धं ढञ् चेति यत उदाहरणं स्नानं गव्यं स्नानं गुश्चर्मविकारस्तदर्थं चर्म उगवादिभ्य इति यत् न्यासोदाहर
णमेतत् पानत्यमिति अनुपदं वक्ष्यति वालेयाः इति अरोप हारयोः पुंसि वलिः प्रायंगजेस्त्रियामित्यमरः उपाधेरिति उपसर्गे घोः किरिति धातोः किरातोलोप इति चन्द्रोहि
फं विप्रतिषेधेनेति यञ्ञा वत्र इत्यादि वार्तिकेनेत्यर्थः नमु ढञ्विधौ ... त्यस्य न्यविधा उपाबहश्च विशिष्य ग्रहणेन प्रतिपदोक्तं बलीय इति सिद्धे किमनेन पूर्वविप्र
तिषेधेन अत्राहुः निरवकाशत्वे सत्येव ... पदविधित्वं बलीयस्त्वप्रयोजकं न तु सावकाशत्वे इत्येतन्मुनिवचनेनानुमीयते तेन स्वपितडाकानीत्येव युक्तं परत्वान्नुसम
दृतेः ... दीर्घमाश्रित्य स्वापितडाकानीति मतं दुर्बलं ... निर्दोर्म्य आपस्निष्टं ... उदाहरणे सावकाशतया प्रतिपदोक्तत्वस्याबलीयस्त्वादिति ॥ ॥
चर्मणोत्र तदर्थमित्यादि पूर्वोक्तेर्थे अञ् स्यात् छस्यापवादः चर्मण इति षष्ठी न तु पञ्चमी पंचम्यां तु ... चर्मपर्यायां प्रकृतौ प्रत्ययः स्याच्चर्मणो द्वीपीत्यादौ न चेष्यते चार्मणो

चर्मणोऽञ् ।५।१।१५॥ चर्मणो या विकृतिस्तदर्था चकारान्नस्यात् । वर्ध्रैरिदं । वार्ध्रं चर्म्म । वारत्रं चर्म्म । तदस्य तस्मिन्स्यादिति ।५।१।१६॥ प्राकार आ
सामिष्टकानां स्यात् प्राकारीया इष्टकाः । प्रासादीयं दारु । प्राकारोऽस्मिन्स्यात् प्राकारीयो देशः ॥ इतिशब्दो लौकिकीं विवक्षामनुसारयति । तेनेह न ।
प्रासादो देवदत्तस्य स्यादिति । परिखाया ढञ् ।५।१।१७॥ पारिखेयी भूमिः ॥ छयतोः पूर्णोऽवधिः ॥ प्राग्वतेष्ठञ् ।५।१।१८॥ तेन तुल्यमिति वतिं वक्ष्य
ति ततः प्राक् ठञोऽधिक्रियते ॥ ॥

द्वीपीति तदाह चर्मणो या विकृतिरिति वार्ध्रैरिति वृधिवपिभ्यामिति रन् प्रत्यये वध्रशब्द आद्युदात्तश्चर्मवाची
तस्य विकार इत्यण् टिड्ढेति ङीप् वार्ध्री रज्जुः ... वर्धेः ... तु वध्रीति भवति ततो ... तु वाध्रं नध्री वध्री वरत्रा स्यादित्यमरः चंचाः पक्ष्य वध्रिकाः ... इति भाष्यं तद
स्मै यथासमर्थात्प्रातिपदिकात्षष्ठ्यर्थे सप्तम्यर्थे च यथाविहितं प्रत्ययाः ——— स्यादिति संभावनेऽलमिति चेदित्यादिना संभावने लिङ् ——— इष्टकानां व
हुत्वेन प्राकार आसां स्यादित्येतत्संभाव्यते देशस्य हि गुणेन प्राकारोऽस्मिन्स्यादिति संभाव्यते ——— देशस्य हि गु
णेन प्राकारोऽस्मिन्स्यादिति संभाव्यते इह प्रकृतिविकारभावस्तादर्थ्यं च न विवक्षितं किं तु योग्यतामात्रं तेन पूर्वस्यायमविषयः हिरण्यग्रहणं स्पष्टप्रतिपत्त्य
र्थं तदस्यास्मिन् इति वत्सतरोत्सवग्रहणेनैवेष्टसिद्धेः ॥ ॥ छयतोः पूर्णोऽवधिः ॥ ॥ प्राग्वतेष्ठञ् ठञित्येव वक्तव्ये प्राग्वतेरिति वचनं मध्ये यो

वस्तुनो भवति यथा वर्णादेर्हस्तादिः कश्चिदूर्ध्वाधोभावावस्थितस्य भवति यथा द्वासिनमुदकं उरुद्वयसमुदकमिति संख्या तु उन्मानपरिमाणप्रमाणेभ्यः पलादिप्रस्था
दिहस्तादिभ्यस्त्रिभ्यो भिन्ना एकत्वद्वित्वादिरिति इह संख्यापरिमाणयोरेव प्रकृतत्वेप्युन्मानप्रमाणयोर्विवेचनं प्रसंगात् कृतमिति बोध्यं असमासे निष्कादिभ्यः
निष्क पल ... इह द्रोणवृद्धिरतिसमनिष्कादयः तत्र द्रोणशब्दः परिमाणवाची षष्टिशब्दः संख्यावाची ताभ्यां ठञ्प्रसंगे वचनं इतरेषां तु पंचानामुन्मानवाचित्वे
... सिद्धे समासप्रतिषेधार्थं वचनमित्येके अन्ये त्वाहुः पूर्वसूत्रे परिच्छेदकमात्रं संख्याभिन्नं परिमाणशब्देन गृह्यते तेन न सर्वेभ्यष्ठञ्प्राप्ते ठञ्विधाना
र्थं वचनम् नैवं परिमाणं तु सर्वतः इति भेदेनानुवादं नव्यप्रमिति वा प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये इत्यादाविव योगादिनियमाद्द्वयमप्येतत्पर·
मंजर्यां स्पष्टं असमासे किमर्थमसमास इत्युच्यते प्रातिपदिकग्रहणे तु दंतग्रहणाभावादेवेष्टसिद्धेरत आह असमासग्रहणमिति सुगव्यमिति आ गवादिभ्यो यत् उपवाषूप्यमिति विभाषाह

शताच्च ठन्यतावशते । ५ । १ । २१ ॥ शतेन क्रीतं शतिकं । शत्यं । अशते किं । शतं परिमाणमस्य शतकं सहस्रं ॥ इह प्रत्ययार्थो वस्तुतः प्रकृत्यर्थान्नाभिद्य
ते तेन ठन्यतौ न किंतु कन्नेव । असमास इत्येव । द्विशतेन क्रीतं द्विशतकं । संख्याया अतिशदन्तायाः कन् । ५ । १ । २२ ॥ संख्यायाः कन् स्यादार्हीयेऽर्थे न तु
त्यन्तशदन्तयोः । पञ्चभिः क्रीतः पञ्चकः । बहुकः । त्यन्तायास्तु । साप्ततिकः । शदन्तायाः । चात्वारिंशत्कः ॥

७९ विरपूपादिभ्य इति यत् अन्नविकारत्वादेवसि
द्धे अपूपादीनां प्रतिपदपाठसामर्थ्यात्तदंतविधिर्नेति न्यासग्रंथस्य पुरुषस्य भाष्यादिग्रंथविरोधादिति भावः अत एव तत्सूत्रे अपूपादीनां केषांचित्पाठः प्रपंचार्थ इत्य बोध्यम् इत उर्ध्वमि
तिज्ञापकेन तदंतविधौ लब्धेऽपि विशेषव्यवस्थार्थमिदं संख्यापूर्वपदानामिति किम् इह माभूत् परमपारायणं वर्तयति द्विशूर्यमिति तद्धितार्थे द्विगुरयं एवाद्विप्रकृतिर्लुगंतान·
भवति इति संख्यापूर्वपदादप्यस्मात् ठञ् पारायणान्यतरस्यामिति प्राप्तस्याष्टत्रो वा अध्यर्द्धपूर्वेति लुक् द्विशौर्पिकमिति परिमाणांतस्येत्युत्तरपदवृद्धिः ठञो द्विगुंप्रति निमित्तत्वा
भावाल्लुगभावः यद्यप्यध्यर्द्धेति सूत्रे द्विगोः परस्यार्हीयस्य लुगित्येव मूले व्याख्यास्यते तथापि द्विगोर्निमित्तस्येति व्याख्येयमेव अन्यथा अत्रैव ठञो लुक्स्यादेतच्चाध्यर्द्धेतिसूत्रे
स्फुटीकरिष्यते तपरः किमिति दीर्घोकारस्य वृद्धौ कृतायामपि रूपे विशेषो नास्तीति प्रश्नः निषेधो न स्यादिति तथा च वृद्धिनिषेधाभावाय तपरकरणमावश्यकमिति भावः
इदं च पुंवद्भावनिषेधाभावाय पादेनं पूर्वपदस्य वृद्ध्यभावपक्षे क्रियते यदा तु पूर्वपदस्यापात्स्विकी वृद्धिः क्रियते तदा फलोपधान वृद्धिनिमित्तं तद्धित इत्युत्तरपदाकारस्य वृद्धिनिषे

पानस्य कनोपवादः चकारो समाप्त इत्यस्यानुकर्षणार्थः द्विशतकमिति द्वौ च शतं च तेषां समाहारो द्विशतं ततः कन् प्राग्वतेः संख्यापूर्वपदानां तदंतग्रहणमलुकीत्यनया
इष्टपासमासाद्विधा नातीत्य समास इत्यतस्यानयनमुचितमिति भावः त्यंतशदं तायाइतित्यंतसहिताशदन्तेत्युत्तरपदलोपी समासः पंचक इति लौकिक्याः संख्याया उ
दाहरणं बहुक इति पारिभाषिक्याः सार्वतिक इति ठञ् निन्नादाद्विवृद्धिः ठस्येकादेशे यस्येति च नीकारलोपः अर्थवत्सुनिशब्दस्य ग्रहणान्न तुत्पवयवस्येति शब्दस्य पर्युदा
सानभवति कतिकः चात्वारिंशत्कः इसुसुक्तान्तात्कः ॥ ॐ ॥ वतोरिड्वावतोरितियंचमासाच्चकनिति प्रथमायाः षष्ठीकल्प्यतीत्याह वत्वंतात्कनइति तावतिक इति पक्ते

वतोरिड्वा ॥५।१।२३॥ वत्वन्तात्कन इड्वा स्यात् । तावतिकः । तावत्कः ॥ विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम् ॥५।१।२४॥ योगविभागः कर्तव्यः । आभ्यां ड्वु
न् स्यात् । असंज्ञायां तु ड्वुन् स्यात्कनोपवादः । विंशकः । त्रिंशकः । संज्ञायां तु विंशतिकः । त्रिंशत्कः । कंसाट्टिठन् ॥५।१।२५॥ टोडीवर्थः । इकार उच्चा
रणार्थः । कंसिकः । कंसिकी । अर्धाच्चेति वक्तव्यं ॥ अर्धिकः । अर्धिकी । कार्षापणाट्टिठन्वक्तव्यः । प्रतिरादेशश्च वा ॥ कार्षापणिकः । कार्षापणिकी । प्र
तिकः । प्रतिकी । शूर्पादञन्यतरस्याम् ॥५।१।२६॥ शौर्पं । शौर्पिकं । शतमानविंशतिकसहस्रवसनादण् ॥५।१।२७॥ एभ्योण् स्यात् । इञठकनामप
वादः । शतमानेन क्रीतं शातमानं । वैंशतिकं । साहस्रं । वासनं । अध्यर्धपूर्वाद्द्विगोर्लुगसंज्ञायाम् ॥५।१।२८॥ अध्यर्धपूर्वाद्द्विगोश्च परस्यार्हीयस्य
लुक् स्यात् । अध्यर्धकंसं । द्विकंसं । संज्ञायां तु पाञ्चकलापिकं ॥ विभाषा कार्षापणसहस्राभ्याम् ॥५।१।२९॥ लुग्वा स्यात् । अध्यर्धकार्षापणं । अध्यर्
द्धकार्षापणिकं । द्विकार्षापणं । द्विकार्षापणिकं । [illegible] संख्यानिकस्य टिठन्नालुक् । पक्षे अध्यर्धप्रतिकं । द्विप्रतिकं । अध्यर्धसहस्रं । अध्यर्धसाहस्रं । द्वि
द्विसहस्रं । द्विसाहस्रं । द्वित्रिपूर्वान्निष्कात् ॥५।१।३०॥ लुग्वा स्यात् । द्विनिष्कं । द्विनैष्किकं । त्रिनिष्कं । त्रिनैष्किकं । बहुपूर्वाच्चेति वक्तव्यम् । बहुनिष्कं । बहुनै
तेः प इति [illegible] आसर्वनामः इत्यात्वं । कर्तव्य इति अन्यथा [illegible] शाकटायनं दुर्लभ इति भावः विंशक इति तिविंशतेर्डिति तीतिति शब्दलोपः
अर्द्धक इति [illegible] कार्षापणाट्टिठन् [illegible] आसामर्थ्येन [illegible] दिनशेन भागे [illegible] वविहतानेमतितात्स्यामर्थामिति वा वोध्यम् एतेनार्द्धश्च
स्य समापेक्षत्वान्नदंतादेवाटिठन् [illegible] अर्द्धिकः इत्याद्यर्द्धिक इति केचाचित्त [illegible] शूर्पात् शूर्पशब्दस्य परिमाणवाचित्वाद्दत्ति प्राप्ते तदपवादत्वेनाञ्पक्षे विधीयते ।

ठञ्ठक् कनामिति शतमानं परिमाणं तेन तठ्ठञ् प्राप्तः विंशत्याक्रीतं विंशतिकं संज्ञाशब्दोयं असंज्ञायां हि विंशतित्रिंशद्भ्यामिति वुन् स्यात् संज्ञा च यदि परिमाणस्य तद
ठञ् प्राप्तः अशीतेरप्येवं तर्हि ठक् प्राप्तः वस्नशब्दात्तु ठगेव सहस्रशब्दस्य संख्यावाचित्वात् तु संख्याया अतिशदन्ताया इति कन् प्राप्त इति विवेकः अध्यर्द्धपूर्व अध्यार्द्ध
ढमर्द्धं यस्मिन् तदध्यर्द्धं शांदिभ्यो धातुजस्येत्युत्तरपदलोपः अध्यर्द्धशब्दः पूर्वो यस्मिन्निति व[illegible]हि गर्भवद्बहुव्रीहौ कृते अध्यर्द्धपूर्वं च द्विगुश्चेति द्वन्द्वः सौत्रं पुंस्त्वं द्विगोरि
त्रिपंचमी न तु [illegible]न्यायेन व्याचष्टे अध्यर्द्धपूर्वादित्यादि रि एतच्च वृत्तिकाररीत्या व्या अत्र वार्त्तिकं द्विगोर्लुकि तन्निमित्तग्रहणं द्विगोर्निमित्तं यस्तद्धितस्त
स्य लुगिति वक्तव्यं द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पं द्विशूर्पेण क्रीतं द्विशौर्पिकमिति पूर्वोक्तोदाहरणे ऽलुङ्मा भूदिति न चैवं द्वयोः शूर्पयोः समाहारो द्विशूर्पी तया क्रीतमिति
विग्रहे द्विशूर्पमिति रूपं न स्यात् तद्धितस्यात्र द्विगोरनिमित्तत्वात् अध्यर्द्धेति लुको ऽप्रसक्तेः द्विगोः परस्येति व्याख्यायां तु सिद्धमिष्टमिति चेत् न मैवं अर्थविशेषासंप्रत्यये अत
न्निमित्तादपीति वचनान्तरस्य वार्तिककृतैवोक्तत्वात् यत्र तद्धितार्थे द्विगुना सह अर्थो नभिधीयते तत्र स तद्धितो यस्य निमित्तं न भवति तस्मादपि द्विगोः परस्य लुगिति व
क्तव्यमिति तिं तस्यार्थः एवं च द्विशूर्पमिति तद्धितार्थे द्विगुना सह द्विशूर्प्या क्रीतमित्यस्यार्थो नभिधीयत इति समाहाराद्द्विगोः परस्य तद्धितस्य लुग्भवत्येवेति न काप्यनुपपत्तिः
वस्तुतस्तु सूत्रे द्विगोरिति षष्ठीमाश्रित्य द्विगोर्निमित्तं यस्तद्धित इति व्याख्याय प्रथमं वार्त्तिकं प्रत्याख्यातुं शक्यं द्विशूर्प्या क्रीतमिति विग्रहे तु द्विशूर्पादेव प्रत्ययो भवत्यव्य
विकल्पात् न तु द्विशूर्पीशब्दादित्याश्रित्य द्वितीयमपि प्रत्याख्यातुं शक्यं न च अध्यर्द्धशब्दः संख्यावाच्येव तथा च लोके गण्यते एको ऽध्यर्द्धो द्वाविति अत एव अध्यर्द्धकमि
तिकन् अध्यर्द्धकंसमिति तद्धितार्थे द्विगुः अध्यर्द्धसांवत्सरिकमित्यादौ संख्यायाः संवत्सरसंख्यस्य चेत्युत्तरपदवृद्धिश्च भवति तत्किमध्यर्द्धपूर्वग्रहणेनेति चेत् अत्राहुः
संख्याकार्यमेतस्य किंचिन्नेति ज्ञापनार्थमिदं तेन कन् द्विगुसमास   वृत्तिभ्यो ऽन्यत्र भवति तद्यथा अध्यर्द्धं करोतीति नेह कृत्वसुच् यः सकृत्फलं तां क्रियामभिनि
र्वृत्य पुनस्तामेव कुर्वन् मध्ये निवर्तते स एवमुच्यते इति पांचकलापिकमिति पंचकलापाः परिमाणमस्येति विग्रहे तद्धितार्थे इति समासः तदस्य परिमाणमिति ठञ् एवं पां
चलोहितिकमपि बोध्यम् पंचलोहिन्यो गुंजाः परिमाणस्येति विग्रहे पूर्ववत्समासतद्धितौ भस्याढे तद्धित इति पुंवद्भावाल्लोहिनीशब्दस्य ककारनकारयोरभावः परिमा
णविशेषस्य नामधेये एते असंज्ञाग्रहणं प्रत्ययांतस्य विशेषणं न तु द्विगोः एतच्च वृत्तिकृतां सूत्राशयमनुरुध्य वर्णितमिति इहापि तथैवोक्तं भाष्यवार्तिकयोस्तु सं

भावेठन्निति भावः मुख्यमतेतु ठगेव बोध्यः शाणाद्वेति सूत्रे शताच्चेति वक्तव्यं पूर्वेणानित्यं प्राप्ते विकल्पार्थं एवं च पूर्वसूत्रे शतग्रहणमकृत्वा शतशाणाभ्यां वेत्येव वक्तुं युक्तमित्याहुः अ
ध्यर्द्धशतं अध्यर्द्धशानं पंचशतं पंचशतं यदभावे संख्यालक्षणस्य कनो लुक् शताच्च ठन्यतावितितु न प्रवर्तते तत्रासमासग्रहणस्यानुवर्तनात् ॥ ४६ ॥ द्वित्रिपूर्वादण्च वार्तिकमिदं
इति कतासूत्रेद्धृ इति मं भाष्यादिप्रामाण्याच्छतग्रहणमिह संबध्यत इत्याशयेनाह शाणादिति न्यासकृता त्वण्विधायके वार्तिके सूत्रत्वभ्रमेण व्याख्यातं शतशाणाभ्यां वे
ति सूत्रयितव्ये पणपादेति पूर्वसूत्रे शतग्रहणं क्रियते तस्येदं फलं शतशब्दः स्वरितत्वेनानुवर्त शाणाद्वेत्यत्रैव संबध्यते तदुत्तरसूत्रे द्वित्रिपूर्वादित्यत्र तु न संबध्यते तेन श

द्वित्रिपूर्वादण् च ।५।१।३६। शाणादित्येव । चाद्यत् । तेन त्रैशाण्यं परिमाणमस्य शाणयोरिति पर्युदासादादिवृद्धिरेव द्वैशाणं । द्विशाण्यं । द्विशाणं ।
ठञादयस्त्रयोदश प्रत्ययाः प्रकृतास्तेषां समर्थविभक्तयोऽर्थाश्चाकथिताः त इदानीमुच्यन्ते । तेन क्रीतम् ।५।१।३७। ठञ् । गोपुच्छेन क्रीतं गौपुच्छिकं ।
साप्ततिकं । प्रास्थिकं । ठक् नैष्किकं । इकोण्याः ।५।१।५०। गोण्या इत्यस्मात्तद्धितलुकि लुको पञ्चभिर्गोणीभिः क्रीतः पटः पञ्चगोणिः । तस्य निमि
त्तं संयोगोत्पातौ ।५।१।३८। संयोगः सम्बन्धः उत्पातः शुभाशुभसूचकः । शतिकः । शत्यो धनपतिसंयोगः । शत्यं शतिकं । दक्षिणाक्षिस्पन्दनं शतस्य नि
मित्तमित्यर्थः । वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानं । वातस्य शमनं कोपनं वा वातिकं । पैत्तिकं । श्लैष्मिकं । सन्निपाताच्चेति वक्तव्यं ॥ सा
न्निपातिकं । गोद्व्यचोः संख्यापरिमाणाश्वादेर्यत् ।५।१।३९। गोर्निमित्तं संयोग उत्पातो वा गव्यः । द्व्यचः । धन्यः । यशस्यः । स्वर्ग्यः । गोद्व्यचः किं । विज
यस्य वैजयिकः । असंख्येत्यादि किं । पञ्चानां पञ्चकं । सप्तकं । प्रास्थिकं । खारीकं । अश्वादि आश्विकं । आश्मिकं । ब्रह्मवर्चसादुपसंख्यानं ॥ ब्रह्मव
र्चस्यं । पुत्राच्छ च ।५।१।४०। चाद्यत् । पुत्रीयः । पुत्र्यः । सर्वभूमिपृथिवीभ्यामणञौ ।५।१।४१। सर्वभूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः पार्थिवः ।
सर्वभूमिशब्दोऽनुशतिकादिषु पठ्यते ॥ ॥

४९ तशब्दादण्णेति तदिदं सामर्थ्यं वर्णनमण्विधायकं यदि सूत्रं स्यात्तदा संगच्छते नान्यथेत्याशंकां वन्त्रै
ह्स्यमिति तदेतद्दर्शयति द्वैशाणमित्यादिना अ एयकं ठञो लुकि द्वितीयं यति तृतीयं ठञादयस्त्रयोदशेति ननु ठका दशैव प्रत्ययाः प्रकृताः सूत्रभेदेन विहितत्वाद्य
त्प्रत्ययस्य द्विर्ग्रहणेन तु द्वादशेति त्रयोदशत्वेन तदुपपादमेव न च शूर्पादञन्यतरस्यामित्यन्यतरस्यांग्रहणलभ्यठञमादाय त्रयोदशत्वं सूपपादमिति वाच्यम् ॥

तुल्यन्यायेन स्याणां द्विति सूत्र लभ्यते ठञो ग्रहणेन पंचदशत्वप्रसंगात् नापि सूत्रोपात्तैर्द्दशभिः सह द्वित्रिपूर्वादण्चेति वार्त्तिकोपात्ताण्प्रत्ययस्य गणनेन निर्वाहः उक्तरी
त्या कंसाद्विठन्निति सूत्रे अर्द्धाच्चेति वक्तव्यं कार्षापणाद्विठन् वक्तव्य इत्यादिवार्त्तिकोक्तटिठन्प्रत्ययस्यापि ग्रहणप्रसंगादिति चेत् अत्राहुः कंसाद्विठन् इति सूत्रस्थैव
टिठन् अर्द्धकार्षापणशब्दाभ्यां परामृष्ट इति सन्निधीयते द्वित्रिपूर्वादण्चेति वार्त्तिकस्थाण्तु निर्द्दिश्यमानविंशतिकेत्यणो दूरस्थत्वेन परामर्ष्टुमशक्यत्वादिति तेन क्री
तेनेति तृतीयान्तक्रियार्थे यथाविहितं प्रत्ययाः स्युः ठञिति आर्हादिति सूत्रे अगोपुच्छेत्यादिपर्युदासाद्गोपुच्छसमाप्तिप्रस्थेभ्य ष्ठञ्भवतीत्यर्थः ननु द्रव्यद्रव्येन क्रीतं पा
त्रिणां क्रीतं नौ षेण क्रीतमित्यादावतिप्रसंग इति चेत् अत्राहुः करणे तृतीयैवेह समर्थविभक्तिः सापि मूल्यद्रव्यसमर्थकाच्छब्दादुत्पन्नानान्त्वन्यापि अन्यत्र त्वनभिधानान्न प्र
त्ययः एतच्च तद्धिता इत्यादि महासंज्ञाकरणाल्लभ्यते तेभ्यः प्रयोगेभ्यो हिताः तद्धिता इति व्याख्यानादिति लुकोपवाद इति लुक् तद्धितलुकीति प्राप्तस्य स्त्रीप्रत्ययस्य लुकोऽ
पवाद इत्यर्थः पंचकमिति संख्यालक्षणः कन् आश्मिकमिति अश्मनां निमित्तमित्यर्थे ठक् नस्तद्धित इति टिलोपः पुत्राच्छ च गोद्व्यचइति निर्य्यातिप्राप्ते वचनं क
थं पुत्रीयः क्रतुरिति नहि क्रतुसंयोगो नाप्युत्पात इति चेत् अत्राहुः इह संयुज्यते उत्तेति व्युत्पत्त्या क्रतुरपि संयोग एव यागकरणे न हि पुरुषः फलेन संयुज्यते
अतो यागादिरपि संयोग न केवलं संबंध एवेत्याहुः इति सर्वभूमि आभ्यां यथासंख्यमणठञौ स्तः॥ ॥

तस्येश्वरः तस्य निमित्तमित्यतो नुवृत्त्यैव सिद्धे पुनस्तस्येति निर्देशो निमित्तरूपप्रत्ययार्थस्य निवृत्तये अन्यथा हि संयोगोत्पाता विषेश्वरोपि प्रत्ययार्थस्य विशेषणं संभाव्येत तत्र वि
। दित इति च योगः । भाग उत्तरार्थो यथासंख्यनिवृत्त्यर्थश्च तस्य वापः तस्येति वा पाये स्वयं तो मेलिव प्रस्थस्येति कर्तरि षष्ठ्यां तु देवदत्तस्य वापः क्षेत्रमित्यादौ स्यादिति भा

तस्येश्वरः ।५।१।४२। तत्र विदित इति च ।५।१।४३। सर्वभूमेरीश्वरः सर्वभूमौ विदितो वा सार्वभौमः पार्थिवः । लोकसर्वलोकाट्ठञ् ।५।१।४४। तत्र
विदित इत्यर्थे । लौकिकः । अनुशतिकादित्वादुभयपदवृद्धिः । सार्वलौकिकः । तस्य वापः ।५।१।४५। उप्यतेऽस्मिन्निति वापः क्षेत्रं । प्रस्थस्य
वापः प्रास्थिकं । द्रौणिकं । खारीकं । पात्रात्ष्ठन् ।५।१।४६। पात्रस्य वापः क्षेत्रम्पात्रिकं । पात्रिकी क्षेत्रभक्तिः । तदस्मिन्वृद्ध्यायलाभशुल्कोपदा
दीयते ।५।१।४७। वृद्धिर्दीयत इत्यादिकमेणार्थे त्वेकं सम्बन्धादेकवचनं । पञ्चास्मिन् वृद्धिरायो लाभः शुल्कमुपदा वा दीयते पञ्चकः । शति
कः । शत्यः । साहस्रः । उत्तमर्णेन मूलातिरिक्तं ग्राह्यं वृद्धिः । ग्रामादिषु स्वामिग्राह्यो भाग आयः । विक्रेत्रा मूल्यादधिकं ग्राह्यं लाभः । रक्षानिर्वेशरा
जभागः शुल्कः । उत्कोच उपदा । चतुर्थ्यर्थे उपसंख्यानं ॥ पञ्चास्मै वृद्ध्यादिर्दीयते पञ्चको देवदत्तः । सममन्नास्तरणेदानमितिवदधिकरणवि
वक्षा । पूरणार्द्धाट्ठन् ।५।१।४८। यथाक्रममणठञ्ठनोरपवादः । द्वितीयो वृद्ध्यादिरस्मिन् दीयते द्वितीयिकः । तृतीयिकः । अर्द्धिकः । अ
र्द्धशब्दो रूपकस्यार्द्धे रूढः ॥ भागाद्यच्च ।५।१।४९। चाट्ठन् । भागशब्दोपि रूपकस्यार्द्धे रूढः भागो वृद्ध्यादिरस्मिन् भाग्यं । भागिकं शतं । भाग्या भा
गिका विंशतिः । तद्धरति वहत्यावहति भाराद्वंशादिभ्यः ।५।१।५०। वंशादिभ्यः परो यो भारशब्दस्तदन्तं यत्प्रातिपदिकं तस्मात्कृतिका द्वितीयान्ता
दित्यर्थः । वंशभारं हरति वहत्यावहति वा वांशभारिकः । ऐक्षुभारिकः । भाराद्वंशादिभ्य इत्यस्य व्याख्यान्तरं । भारभूतेभ्यो वंशादिभ्य इति भारभू
तान्वंशान् हरति वांशिकः । ऐक्षुकः । वस्नद्रव्याभ्यां ठन्कनौ ।५।१।५१। यथासंख्यं स्तः । वस्नं हरति वहत्यावहति वा वस्निकः ॥ द्रव्यकः ॥

कः । खारीकमिति खार्या ईकन् तदस्मिन् प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति शुल्कग्रहणं प्रपंचार्थं तस्याप्यायविशेषत्वात् तथा च ठगा

टितिभावः द्वैकुल्लिजिकीति असंज्ञाशाणयोरित्यत्र कांजशब्दोपि दृश्यते तेनोत्तरपदवृद्धिर्नेत्याहुः॥ ॥ तदस्यपरिमाणं इह परिमाणशब्देन परिच्छेदकमात्रं गृह्यते तेन तु सूर्वतोमानमेव उत्तरसूत्रे संख्यायाः परिमाणेन विशेषणात् षष्टिर्जीवितं परिमाणमस्य षाष्टिकः सोस्येति वर्तमाने पुनस्तद्ग्रहणाद्वै षष्टीजीवितं परिमाणमस्य द्विषाष्टिकस्त्रिषाष्टिक इत्यादावध्यर्द्धेति लुङ् भवति स्पष्टं चेदं काशिकादौ [illegible]सूत्रमिति तेन पंच गावः परिमाणमस्य पंचको गोसंघ इत्यादि सिध्यति यदा तु परकृत्यर्थस्येव परिच्छेदिका संख्या पंचगावोस्य संघस्येति तदा तु प्रत्ययो न भवति परिमाणस्य प्रत्ययार्थत्वाभावात् एतच्च आर्हादगोपुच्छेति सूत्रे कैयटे स्पष्टं स्वार्थे उदाहरति पंचेवेति। स्तोमे डविधिरिति डित्करणमेकविंश इत्यत्र तिलोपार्थं त्रयस्त्रिंश इत्यत्र टिलोपार्थं च पंचदश मंत्रा इति साम्ना स्तुवीत एकं साम तृचे क्रियत इति हि श्रुतिः तत्र तृचस्य पंच

तदस्यपरिमाणम्।५।१।५७॥ प्रस्थः परिमाणमस्य प्रास्थिको राशिः॥ संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु।५।१।५८॥ पूर्वसूत्रमनुवर्त्तते। तत्र संज्ञायां स्वार्थे प्रत्ययो वाच्यः। यद्व्येकयोरितिवत् संख्यामात्रवृत्तेः परिमाणिनि प्रत्ययः। पञ्चैव पञ्चकाः शकुनयः। पञ्चपरिमाणमेषामिति वा सङ्घे पञ्चकं सूत्रे अष्टकं पाणिनीयं। सङ्घशब्दस्य प्राणिसमूहे रूढत्वात् सूत्रं पृथग्गृहीतं। पञ्चकमध्ययनं। स्तोमे डविधिः। पञ्चदश मन्त्राः परिमाणमस्य पञ्चदशः। सप्तदशः। एकविंशः। सोमयागेषु छन्दोगैः क्रियमाणा पृष्ठ्यादिसंज्ञिका स्तुतिः स्तोमः। पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम्।५।१।५९॥ एते रूढिशब्दा निपात्यन्ते॥

॥ १९ कृत्व आवृत्त्या पंचदश मंत्राः सप्तदशस्तोमे अंत्यायामृचः सप्तकृत्व आवृत्तिः प्रथमम[illegible]योस्तु पंचकृत्व एव एकविंशस्तोमे तु तृचस्य सप्तकृत्व आवृत्तिरिति ज्ञेयं छंदोगैरिति सामगैरित्यर्थः॥ पंक्ति विंशति तदस्य परिमाणमिति वर्त्तते पंचन्शब्दस्य टिलोपः तिप्रत्ययश्च चोः कुरिति कुत्वं पंच पदानि परिमाणमस्य पंक्तिश्छंद इति काशिका पदशब्दोऽत्र पादपर्याय इति हरदत्तः रूढिशब्दा इति तथा चात्र नावयवार्थोऽभिनिवेष्टव्यः पंक्तिशब्दो हि नानार्थः अस्ति क्रमसंनिवेशो यथा हरणपंक्तिः पिपीलिकापंक्तिरिति अस्ति च दशसंख्यायां पंक्तिरथ इति दशरथ इत्यर्थः अस्ति हि छंदोविशेषे यस्य पंचाक्षराः पंच पादाः तथा च छंदो विशेषे एवावयवार्थो नान्यत्रेति बोध्यं द्वयोर्दशतोर्विंभावः शतिश्च प्रत्ययः अपदत्वं च द्वौ दशतौ परिमाणमस्य विंशतिः अपदत्वा[illegible]मातनान्नकारस्यानुस्वारः केचित्तु विंभावमुक्त्वा अपदत्वं चेति न पठंति त्रयाणां दशतां त्रिंभावः शच्च प्रत्ययः मतांतरे तु त्रिंभावः त्रयो दशतः

परिमाणस्य निपातनात् एवं च तुर्णां चत्वारिंशत्पञ्चाशत्पञ्चा आभ्यामपि शत्प्रत्ययः षष्ट्यं दशानां षष्टिश्च प्रत्ययः अपदत्वं च षट् दशतः परिमाणमस्याः षष्टिः ततस्तिभ्यो विति त्र
त्ययएव संप्रमाणं (?) शतां सप्त अष्टानां दशतां अशी नवानां दशानां नव दशानां दशतो शभावः तश्च प्रत्ययः दशदशतः परिमाणमस्य शतं॥ ॥ पंच दशतौ द्रमोऽध्यंन त्वे
नेन्नियात्येते वर्गेऽभिधेये तदस्य परिमाणमित्यनुवर्तते एव दशदिति दशपरिमाणमस्य पक्षे इति वा ग्रहणं संख्याशब्द इति कन पि भवतीति भावः त्रिंशच्चत्वारिंशतोः व्यस्य
येन पंचम्यर्थे षष्ठी द्विवचनं चत्वारिंशतश्च ब्राह्मणे डं निपात्येते समाहारद्वंद्वात्वं चम्येकवचनं इह ब्राह्मणसंज्ञायामिति षष्ठी समासेन निर्दिष्टमुचितं तथा हि सति ब्राह्मणस्य चे
त्संज्ञेति स्फुटी भवति अन्यथा यस्य कस्य चित्संज्ञायां ब्राह्मणस्य च प्रयोगे इत्यनिष्टोर्थः संभाव्येत तत्र श्च मंत्रे भाषायां चेडणन सिध्येदिष्यते च सः तस्मादिष्टानुरोधेन षष्ठ्य

पञ्चद्दशतौ वर्गे वा।५।१।६०॥ पञ्च परिमाणमस्य पञ्च द्वर्गः। दशत्। पक्षे पञ्चकः। दशकः। त्रिंशच्चत्वारिंशतो ब्राह्मणे संज्ञायां डण्।५।१।६२॥
त्रिंशदध्यायाः परिमाणमेषां ब्राह्मणानां त्रैंशानि। चात्वारिंशानि। तदर्हति।५।१।६३॥ लब्धुं योग्यो भवतीत्यर्थे द्वितीयान्तात् ठञादयः स्युः। श्वेत
च्छत्रमर्हति श्वैतच्छत्रिकः। छेदादिभ्यो नित्यम्।५।१।६४॥ नित्यमाभीक्ष्ण्यम्। छेदं नित्यमर्हति छैदिकः वेतसः। छिन्नप्ररूढत्वात्। विराग विरङ्गं च॥
विरागं नित्यमर्हति वैरागिकः। वैरङ्गिकः। शीर्षच्छेदाद्यच्च।५।१।६५॥ शिरश्छेदं नित्यमर्हति शीर्षच्छेद्यः। शैर्षच्छेदिकः। यद्ठकोः सन्नियोगेन शिरसः शी
र्षभावो निपात्यते॥ दण्डादिभ्यः।५।१।६६॥ एभ्यो यत्स्यात्। दण्डमर्हति दण्ड्यः। अर्घ्यः। वध्यः। पात्रात् घंश्च।५।१।६८॥ पात्रियः। तदर्हतीत्यर्थे पात्रियः

यः सप्तमीति व्याख्येयं ब्राह्मणेऽभिधेये इति तु काशिकायां व्याख्यातं तन्मन्दं ... ठञ उदाहरणं तस्य मर्हति प्रायिकः द्रौणिक इत्यायुक्तं आदिशब्दग्राह्यस्य ठक उदाहरण
माह श्वैतच्छत्रिक इति एवं वारीकः शात्यः शातिकः सासम्र इत्यादी न्युदाहर्तव्यं नित्यं छेदादिभ्यो नित्यं नित्यग्रहणमिह नित्यं क्रीडाजीविकयोरित्यत्र वन्महाविभाषयाप्राप्तस्य बाधे
स्य नित्यत्वार्थं न भवति आरम्भसामर्थ्यादेव तन्निवृत्तिसिद्धेः किंतु प्रत्ययार्थविशेषणमिति ध्वनयन्निच्छेदं नित्यमर्हतीति भाष्ये तु नित्यग्रहणं प्रत्याख्यातं सूत्रमेव मास्त्विति तत्रा
शयमिति मनोरमा। अयं भावः नित्यग्रहणमिह प्रत्ययार्थविशेषणं नमतेति नित्यं छेदमर्हतीत्य र्थः सेति न ... न हि कश्चित्पदार्थो नित्यं छेदमर्हति योपि वेतसादिरर्थः
छिन्नः प्ररोहति सोपि नित्यं छेदमर्हति कालान्तर एव तस्य छेदावर्तनात् न चात्र नित्यग्रहणत्यागे छेदमर्हतीत्यादि विग्रहवाक्यनिरन्तये सूत्रस्यावश्यकत्वात् तस्य।

व्याख्यानं न युज्यत इति शंक्यं विग्रहवाक्यस्य भाष्यादिसंमतत्वादिति दिक्॥ छेद भेद द्रोह दोषेत्यादयश्छेदादयः॥ गणसूत्रमाह विरागेति इंडादिभ्यः पूर्वसूत्रादेवानुवर्त्तत इत्या
हयन्त्यादिति केचित्तु इंडादिभ्यो यदिति पठन्ति स चापपाठ एव भाष्यादिविरोधादित्याहुः तथाहि अचो यदिति सूत्रे भाष्ये उक्तं हनो वा यन्त्वधादेशश्च वध्यः घात्यः तद्धि
तो वा वधमर्हतीति वध्य इति यदि चेह यद् द्वितीयेत तर्हि वैतदुपपद्यते पक्ष इयेन्[illegible] यतो नावइत्याद्युदात्तत्वात् यदित्वत्र यो विधीयेत तदा स्वरो भिद्येत मनोरमायां तु क्वचिदेषो हनो वा व
धस्तद्धितो वेति भाष्यं यदि चेह य द्वितीयेत तर्हि वैतदुपपद्यते काप्याद्युदात्तत्वं [illegible] त्वपि तद्धितेयतो नावइत्याद्युदात्तत्वमित्यादि स्थितं॥ ❈ ॥ कडंकरदक्षिणाच्छ च कडंगरे
ति पाठस्तूपेक्ष्य इति ध्वनयति कडंकरोतीति कडमदे कडतीति कडः [illegible] मुद्गादिकाष्ठमिति अमरश्चाह कडंकरं बुसं क्लीबमिति गौरिति नीवारया कादिकडंकरीये

कडङ्करदक्षिणाच्छ च। ५। १। ६९॥ चाद्यत्। कडङ्करोतीति वि॰ह अत एव निपातनात् णत्वं च। कडङ्करं माषमुद्गादिकाष्ठमर्हतीति कडङ्करीयो गौः
कडङ्कर्यः। दक्षिणामर्हतीति दक्षिणीयः। दक्षिण्यः। स्थालीबिलात्। ५। १। ७०॥ स्थालीबिलमर्हन्ति स्थालीबिलीयास्तण्डुलाः। स्थालीबिल्याः। पा
कयोग्या इत्यर्थः॥ यज्ञर्त्विग्भ्यां घखञौ। ५। १। ७१॥ यथासंख्यं स्तः। यज्ञं ऋत्विजं चार्हति यज्ञियः। आर्त्विजीनो यजमानः। यज्ञर्त्विग्भ्यां तत्कर्मार्ह
तीत्युपसंख्यानम्॥ यज्ञियो देशः। आर्त्विजीनो ऋत्विक्॥ आर्हीयाणामठगादीनां द्वादशानां पूर्णोऽवधिः॥ अतः परं ठञेव॥ पारायणतुरायणचा
न्द्रायणं वर्त्तयति। ५। १। ७२॥ पारायणं वर्त्तयति पारायणिकश्छात्रः। तुरायणं यज्ञविशेषः तं वर्त्तयति तौरायणिको यजमानः चान्द्रायणिकः

रिति [illegible] स्थालीबिलात् छयतावनुवर्तेते। अस्माच्छयतौस्तः। ठकोपवादः। पाकयोग्या इति। निष्फली कृता इति यावत्। यज्ञं ऋत्विजं वार्हतीति। अर्थसमर्थो विहान् शास्त्रेण पर्युदस्त इत्यर्थः
देशस्यानेवंविधत्वादुपसंख्यानं। यज्ञियो देश इति। यज्ञानुष्ठानयोग्य इत्यर्थः। ऋत्विगिति। स तु ऋत्विक्कर्मार्हतीति न तु ऋत्विजमिति सूत्रेण खञोऽप्राप्तावुपसंख्यानं। आर्हीयाणां ठ
गादीनां गतो वधिः पारायण। आदित आरभ्य आन्ताद्विच्छेदेन वेदस्याध्ययनं पारायणं तच्च गुरुणा शिष्येण वा निवर्त्यते। अन्यतरासन्निधौ अध्ययनक्रियायामनिष्पादनात्तथापि शिष्य
एव प्रत्ययइष्यते अनुगुणाविव्याकरे स्थितं तदाहश्छात्र इति। यजमान इति। यद्यपि पुरोडाशादिनिर्वर्त्तने ऋत्विगपि यज्ञं निर्वर्त्तयति तथापि तत्र तौरायणिक इति न प्रयुज्यते। अन
भिधानादिति भावः। चान्द्रायणं तपोविशेषः। विषयीभूतोर्थ इति। स्थाणुर्वा पुरुषो वेति संशयविषयीभूते स्थाणवादावेव प्रत्यय इष्यते न तु संदेग्धरीति भावः। कथं तर्हि सांश

थिकः संशयापन्नमानसरतिचेदस्याह । संशयापन्नं मानसं यस्मिन्निषयेस विषयः ॥ ॥ संशयापन्नमानसरतीति गोऽभिगमनमिति । अत्र पंचम्यंतात्प्रत्ययः पंथोपथः पंथ इत्यस्मादे
शः ष्ठश्च प्रत्ययः । नित्यग्रहणमिह प्रत्ययार्थविशेषणं [illegible] तु वाक्यनिवृत्त्यर्थमित्याशयेनाह नित्यं गच्छतीति । नित्यमिति किं । पथिकः । भाष्ये तु नित्यग्रहणं प्रत्याख्यातं । अयं हि भा

संशयमापन्नः ५।१।७३॥ संशयविषयीभूतोऽर्थः सांशयिकः । योजनं गच्छति ५।१।७४॥ यौजनिकः । क्रोशशतयोजनशतयोरुपसंख्यानम् ॥ क्रोश
शतं गच्छति क्रौशशतिकः । यौजनशतिकः । ततोऽभिगमनमर्हतीति च वक्तव्यम् ॥ क्रोशशतादभिगमनमर्हतीति क्रौशशतिको भिक्षुः यौजनश
तिक आचार्यः । पथः ष्कन् ५।१।७५॥ षकारो ङीषर्थः । पन्थानं गच्छति पथिकः । पथिकी । पंथो ण नित्यम् ५।१।७६॥ पन्थानं नित्यं गच्छति
पान्थः । पान्था । उत्तरपथेनाहृतं च ५।१।७७॥ उत्तरपथेनाहृतं औत्तरपथिकम् । उत्तरपथेन गच्छति औत्तर
पथिकः । आहृतप्रकरणे वारिजङ्गलस्थलकान्तारपूर्वादुपसंख्यानम् ॥ वारिपथिकं । कालात् ५।१।७८। प्रागाद्दिभ्यो ठञित्ययं प्राग्धिक्रियते । ते
न निर्वृत्तम् ५।१।७९॥ अह्ना निर्वृत्तमाह्निकं ॥ तमधीष्टो भृतो भूतो भावी ५।१।८०॥ अधीष्टः सत्कृत्य व्यापारितः । भृतो वेतनेन क्रीतः । भूतः स्वसत्त
या व्याप्तकालः । भावी तादृश एवानागतकालः । मासमधीष्टो मासिकोऽध्यापकः । मासं भृतो मासिकः कर्मकरः । मासं भूतो मासिको व्याधिः । मास
म्भावी मासिक उत्सवः । मासाद्वयसि यत्खञौ ५।१।८१॥ मासं भूतो मास्यः । मासीनः । द्विगोर्यप् ५।१।८२॥ मासाद्वयसि इत्यनुवर्त्तते । द्वौ मासौ भूतो
द्विमास्यः । षण्मासाण्ण्यच्च ५।१।८३॥ वयसीत्येव । यप्[illegible]रनुवर्तते [illegible]चाद्व्वन् । षण्मास्यः । षाण्मास्यः । षाण्मासिकः । अवयसि ठंश्च ५।१।८४॥ षण्मासा
न् भृतः षण्मासिको व्याधिः ॥ षाण्मास्यः । समायाः खः ५।१।८५॥ समामधीष्टो भृतो भूतो भावी वा समीनः ॥ ११

पथ्याशयः । नित्यं पन्थानं गच्छतीत्यर्थो न दप्र
विसंभवति तथापि नात्र वार्थयोर्यथाह्यस्य प्रयोगं दृश्यते । कदाचिद् [illegible] न्यपि तत्प्रयोगान्तानं चैव नास्ति विग्रहवाक्यनिवृत्त्यर्थं नित्यग्रहणमस्त्विति शंकामपि षष्ठप्रयोगविग्रहवा
क्यस्य दर्शनादिति । उत्तरपथेन । चकारेण गच्छतीति [illegible]प्यर्थः समुच्चीयत इत्याह उत्तरपथेन गच्छतीति चौत्तरपथिकमिति । वारिपथेन गच्छति वारिपथेनाहृतमिति वि

कालात्। स्वरूपग्रहणमिह न भवति तमधीष्टो भृतो भूतो भावीत्यत्यंतसंयोगे द्वितीयानिर्देशात्। मासादिरस्तीत्यादौ मासादीनां काले विशेषणाच्च। तेन निर्वृत्तं। तृतीयांतात्का लवाचिनष्ठञ्स्यात् तेन निर्वृत्तिकरणे तृतीया। चतुर्थ्यंतगणं ज्ञेन निर्वृत्तमित्यत्र तु कर्तरि तृतीयेति विशेषः। उभयत्राप्यंतर्भाविण्यर्थो द्रष्टव्यः। कर्मणिक्तः। आह्निकमिति। अन्हष्ठ खोरेवेति नियमान्नलहितं इति टिलोपेन मासाहूयसि॥ स्वत्रोऽतित्कर लक्षणार्थं पुंवद्भावप्रतिषेधार्थं च मासीना भार्या। अधीष्टादीनां चतुर्णामधिकारेपि सामर्थ्याद्भूतत्वेन स्वसंबध्यते। नहि मासमधीष्टो भृतो वेत्यादि उक्तौ काचित्कालकृतावस्थानावस्था गम्यत इत्याशयेनाह। मासं भूत इति। एतच्च वृत्तिपदमञ्जर्योः स्पष्टं। मासीन इति। बालकः द्विगोर्यप्यागमवतः संख्यापूर्वपदानंतरंतविधेरभ्युपगमात्पूर्वेणयत्वे मे मासत्योर्यप् विधीयते पित्वादनुदात्तः। तेन हि मास्य इत्यादौ विगतकालेत्यादिना पूर्वपदप्रकृतिस्वरो वतिष्ठते। यद्दत्युक्तेतु प्रत्ययस्योदात्तत्वात् स्नोदात्ते हि मासस्य स्यानसाति एष्टव्य स्वरबलीयस्त्वादिति भावः। यपप्यनुवर्ततइति। व्याख्यानमेव प्रशरणे समायाः स्वः हायनो

द्विगोर्वा। ५।१।८६॥ समायाः खः स्यादेव। तेन परिजय्येत्यतः प्राङ्कृतादिषु स्वस्वार्थेषु प्रत्ययाः। द्विसमीनः। द्वैसमीकः। रात्र्यहःसंवत्सराच्च। ५।१।८७
द्विगोरित्येव द्विरात्रीणः। द्वैरात्रिकः। द्व्यहीनः। द्वैयह्निकः। समासान्तविधेरनित्यत्वान्न टच्। द्विसंवत्सरीणः। संख्यायाः संवत्सरसंख्यस्य च। ७।३।
१५॥ संख्याया उत्तरपदस्य वृद्धिः स्यान्नित्यादौ। द्विसांवत्सरिकः। द्वैषष्टीभूतो द्विषाष्टिकः। संख्यायाः परिमाणं तस्येत्येव सिद्धे संवत्सरग्रहणम्परिमा णग्रहणे कालपरिमाणस्याग्रहणार्थं। तेन द्वैसमीक इत्युत्तरपदवृद्धिर्न। वर्षाल्लुक्च। ५।१।८८॥ वर्षशब्दान्ताद्द्विगोर्वा खः। पक्षे ठञ् वा च लुक् त्रीणि रू

त्रीणि वर्षाणि भूतः त्रिवर्षीणः इत्यमरः। समामधीष्ट इत्यादि। अधीष्टादयश्चत्वारोऽर्था अत्राप्यनुवर्तन्त इति भावः॥ ॥ द्विगोर्वा। संख्यायाः पूर्वपदानांतरं तग्रहणमलुकीत्यभ्युपगमात्पूर्वेणनि त्ये प्राप्ते विकल्पः। द्वैसम करति। खेन मुक्ते पक्षे ठञिति भावः। द्वैयह्निक इति। टखोरेवेति नियमादिह टिलोपेन। अह्नोऽह्न एतेभ्यः इत्यह्नादेशः समासान्ते आह संवत्सराच्चेत्येवं वाधिकस्तरत्वाट्टचाभाव्यं न चमत्। विभाषय टचो विकल्प इति वाच्यं। वृहतीजात्यंताः समासांताः इति नित्येषु परिगणनादत आह। समासांतविधेरनित्यत्वादपि तु विंशतेप्यह्ना देशे न द्वैयह्निक इति रूपं सिध्यति तथापि द्व्यहीन इति रूपं न सिध्यति टचि सत्यन्हादेशे तस्य स्थानिवत्त्वाद्राजाहःसखिभ्यष्टजिति समासांतस्याहः शब्दांत समासग्रहणेन ग्रहणाच्चरात्र्यहःसंवत्सराच्चेति खप्रत्यये कृते पि द्व्यहीन इति रूपप्रसंगादित्याहुः। उत्तरपदवृद्धिर्नेति। एतच्चोपलक्षणं। द्विवर्षेत्यत्राद्विगोरिति ङीब्भवति। परि

कालपर्युदासेन पर्युदासाभावात्परिमाणविशेषाचिनेतीह निषेधप्रवृत्तेः द्वैवर्षभृतेन मधीष्ट इति ठञ्वर्षाल्लुक्चेति लुक्। चित्तवतिनित्यमिति नित्यं लुको वक्ष्यमाणत्वाद
[illegible]नेह प्रत्ययार्थ इत्युदाहरति॥ ॐ ॥ द्विवर्षीणो व्याधिरिति। द्विवार्षिको मनुष्य इति। अत्र वदंति। मनुष्ये चित्तवतीति नित्यं लुक्प्रसंगान्मनुष्यो मनुष्यसदृशः न

द्विवर्षीणो व्याधिः ॥ द्विवर्षः। वर्षस्याभविष्यति। ७।३।१६॥ उत्तरपदस्य वृद्धिः स्यात्। द्विवार्षिकः। भविष्यति तु द्वैवर्षिकः। अधीष्टभृतयोरभवि
ष्यत्त्वादिति प्रतिषेधेन। गम्यते हि तत्र भविष्यत्त्वान्न तु तद्धितार्थः। द्वेवर्षे अधीष्टो भृतो वा कर्म करिष्यतीति द्विवार्षिको मनुष्यः। परिमाणान्तस्यासंज्ञाशा
णयोः। ७।३।१७। द्वौ कुडवौ परिमाणमस्य द्विकौडविकः। द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसौवर्णिकम्। द्विनैष्किकम्। असंज्ञेति किम्। पाञ्चकलायाः परिमा
णमस्य पाञ्चकलायिकम्। तद्धितान्तः संज्ञैषा। द्वैशाणम्। कुलिजशब्दमपि केचित्पठन्ति। द्वैकुलिजिक। चित्तवति नित्यम्। ५।१।८९। वर्षशब्दान्ताद्द्विगोः
प्रत्ययस्य नित्यं लुक् स्यात् चेतने प्रत्ययार्थे। द्विवर्षो दारकः। षष्टिकाः षष्टिरात्रेण पच्यन्ते। ५।१।९०। बहुवचनमतन्त्रम्। षष्टिको धान्यविशेषः। तृतीयान्ता
त्कन् रात्रशब्दलोपश्च निपात्यते। तेन परिजय्यलभ्यकार्य्यसुकरम्। ५।१।९३। मासेन परिजय्यो जेतुं शक्यो मासिको व्याधिः। मासेन लभ्यं कार्य्यं सुक
रं वा मासिकम्। तदस्य ब्रह्मचर्य्यम्। ५।१।९४। द्विती[illegible] प्रत्ययः स्यात्। अत्यन्तसंयोगे द्वितीया। मासं ब्रह्मचर्य्यमस्य मा
सिको ब्रह्मचारी। आर्द्धमासिकः। यद्वा प्रथमान्ताद[illegible]। मासोऽस्येति मासिकं ब्रह्मचर्य्यं। महानाम्न्यादिभ्यः षष्ठ्यन्तेभ्य उपसंख्यानम्। म
हानाम्न्यो नाम विद्या[illegible]धाऽऽचः। तासां ब्रह्म[illegible]यमस्य माहानाम्निकः। हरदत्तस्तु भस्याढे इति पुंवद्भावान्माहानामिक इत्याह। चतुर्म्मासा
ण्ण्यो यज्ञे। तत्र भव इत्यर्थे। चतुर्षु मासेषु भवनिवा[illegible]ण्यान्तरं[illegible]चतुर्षु मासेषु भवति चातुर्म्मासी। अणन्तात् ङीप्। पौर्णमासी

तिमादिरिति व्याख्यायस्थितस्य गतिः समर्थनीयेति। दारक[illegible]बालकः। परिजय्यस्य विवरणं जेतुं शक्य इति। लभ्यजय्यौ शक्यार्थ इत्यादेशः। महानाम्न्यो नाम्ने
ति। तथा चाभाषितपुंस्कत्वान्न पुंवद्भावो नेति भावः। हरदत्तस्ति[illegible]मिति मन्यते। महानामिक इति पुंवद्भावे कृते नस्तद्धित इति टिलोपः। चतुर्म्मा

सादिति। मासशब्दस्य कालवाचित्वात्कालाधिकारे वार्त्तिकमिदम्। नच विशिष्टस्य कालवाचित्वाभावादिह संगतिर्दुर्निरूपेति शङ्क्यम्। प्रागेव तत्संख्यापूर्वपदानां तदन्तग्रहणमित्यभ्युपग मादस्त्येव संगतिरिति। अण्संज्ञायामिति। तत्र भव इत्यनेनैव सिद्धे पुनरण्विधिर्हि गोत्रे लुगनपत्य इति लुग्मा भूदित्येतदर्थमिदम्। अत्रार्थ्यं एवं चास्मिन् वार्त्तिके च तुर्मासादित्यस्या नुवृत्त्ये पूर्ववार्त्तिकमत्रैवारभ्यमित्यपि ज्ञेयम्। चातुर्मासीति। कस्य पूर्ण इत्याकांक्षायामाह। आषाढीति। अषाढानक्षत्रयुक्ता पौर्णमासीत्यर्थः। तस्य दक्षिणा। षष्ठ्यन्तेभ्यो यज्ञाख्ये भ्यो दक्षिणेत्यस्मिन्नर्थे ठञ् स्यात्। कालाधिकारादेवेह द्वादशाहादिभ्यः सिद्धे आख्याग्रहणं व्यर्थमित्याशंकां परिहरति। आख्याग्रहणादिति। तत्र च। कालवाचिभ्यः सप्तम्यन्ता

तस्य दक्षिणा यज्ञाख्येभ्यः। ५।१।९५॥ द्वादशाहस्य दक्षिणा द्वादशाहिकी। आख्याग्रहणादकालादपि। आग्निष्टोमिकी। वाजपेयिकी। तत्र च दीयते कार्यं भववत्। ५।१।९६॥ प्रावृषि दीयते कार्यं वा प्रावृषेण्यम्। शारदम्॥ कालाधिकारस्य सम्पूर्णोऽवधिः॥ व्युष्टादिभ्योऽण्। ५।१।९७॥ व्युष्टे दीयते कार्यं वा वैयुष्टम्। व्युष्ट तीर्थ संग्राम प्रवास इत्यादि। तेन यथाकथाचहस्ताभ्यां णयतौ। ५।१।९८॥ यथाकथाचेत्यव्ययसंघातात्तृतीयान्ताद्धस्ताच्च यथासंख्यं णयतौ स्तः। अर्थाभ्यां तु यथासंख्यं नेष्यते। यथाकथाच दीयते कार्यं वा याथाकथाचम्। अनादरेण देयं कार्यं वेत्यर्थः। हस्तेन दीयते कार्यं वा हस्त्यम्। सम्पादिनि। ५।१।९९॥ तेनेत्येव॥ कर्णवेष्टकाभ्यां सम्पादि कार्णवेष्टकिकं मुखम्। कर्णालङ्काराभ्यामवश्यं शोभत इत्यर्थः। कर्मवेषाद्यत्। ५।१।१००॥ कर्मणा सम्पादि कर्मण्यं शौर्यम्। वेषेण सम्पादि वेष्यो नटः। वेषः कृत्रिम आकारः। तस्मै प्रभवति संतापादिभ्यः। ५।१।१०१॥ संतापाय प्रभवति सांतापिकः। सांग्रामिकः। योगाद्यच्च। ५।१।१०२॥ चाट्ठञ्। योगाय प्रभवति योग्यः। यौगिकः। कर्मण उकञ्। ५।१।१०३॥ कर्मणे प्रभवति कार्मुकम्। समयस्तदस्य प्राप्तम्। ५।१।१०४॥ समयः प्राप्तोऽस्य सामयिकम्। ऋतोरण्। ५।१।१०५॥ ऋतुः प्राप्तोऽस्य आर्तवम्। कालाद्यत्। ५।१।१०७॥ कालः प्राप्तोऽस्य काल्यम्

दीयते कार्यमित्येतयोरर्थयोर्भववत्प्रत्ययः स्यात्। प्रावृषेण्यमिति। प्रावृष एण्य इति भवार्थे विहितस्स इहाप्यतिदिश्यत इति भावः। शारदमिति। संधिवेलाद्यृतुनक्षत्रेभ्योऽण्॥ कालाधिकारस्य पूर्णोऽवधिः। व्युष्टादिभ्योऽण्। व्युष्टशब्दः कालवाची दिवसमुखे वर्तते। संपादिनि। गुणोत्कर्षः संपत्तिः आवश्यके णिनिरिति चन्निकृत्। एवं वस्त्रयुगेन संपादि वस्त्रयुगिकं शरीरमित्यप्युदाहार्यम्। वस्त्रयुगेन अवश्यं शोभत इत्यर्थः। तस्मै प्रभवति। समर्थः शक्तः प्रभवतीत्युच्यते। आर्तवमिति। पुष्पमित्यादि विशेष्यं बोध्यम्। कालं प्री

काध्ययनं वर्त्तत इति वाक्यार्थो न संगत इति चेदत्राहुः। ब्राह्मणशब्दस्तत्कर्तृकाध्ययने लक्षणया वर्त्तते। ब्राह्मणकर्तृकाध्ययनतुल्याध्ययनं वाक्यार्थ इति न कोऽपि दोष इति

गुणतुल्ये इति। उपलक्षणमिदं॥ अक्रियातुल्य इत्यर्थः। एवं च ब्राह्मणेन सदृशः क्षत्रिय इत्यर्थे ब्राह्मणवत् क्षत्रिय इति प्रयोगः साधुरेव। अत एव पर्वतो वह्निमान्

महानसवदिति वाक्ये महानससदृशः पर्वत इत्यर्थे वतेः साधुत्वं मत्वा तत्र वतेः साधुत्वरक्षणार्थं पर्वतो वा [illegible] वत्तमर्हतीत्यादि क्रियापदं प्रयुंजते [illegible]॥ ॥

तत्र तस्येव। सप्तम्यंतात् षष्ठ्यंताच्च इवार्थे प्रत्ययः। क्रिया चेदिति नानुवर्त्तत इति द्रव्यादितुल्यप्रत्ययो भवति। मथुरावत् स्रुघ्ने। मथुरायां यथा प्राकारः तेन तुल्यः प्राकारः स्रुघ्ने इत्यर्थः

न तदर्हं। अर्हतीत्यर्हः पचाद्यच् यद्यपि कर्तृकर्मणोरिति षष्ठ्या भवितव्यं तथापि अत्र सौत्रो विभक्तिव्यत्यय इत्येके। न कर्तृकर्मणोरिति षष्ठ्या अनित्यत्वे ज्ञापकमिदं। तेन च धर्म्यै

तत्र तस्येव। ५।१।११६॥ मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः। चैत्रस्येव चैत्रवन्मैत्रस्य गावः। तदर्हम्। ५।१।११७॥ विधिमर्हति विधिवत्पूज्यते। क्रियाग्रहणं मण्डूकप्लुत्यानुवर्त्तते। तेनेह न। राजानमर्हति छत्रं। तस्य भावस्त्वतलौ। ५।१।११९॥ प्रकृतिजन्यबोधे प्रकारो भावः। गोर्भावः गोत्वं। गोता। त्वान्तं क्लीबं तलन्तं स्त्रियां। आ च त्वात्। ५।१।१२०॥ ब्रह्मणस्त्व इत्यतः प्राक् त्वतलावधिक्रियेते। अपवादैः सह समावेशार्थं। गुणवचनादिभ्यः कर्मणि विधानार्थं चेदं। चकारो नञ्स्नञ्भ्यामपि समावेशार्थः। स्त्रिया भावः स्त्रैणं। स्त्रीत्वं। स्त्रीता। पौंस्नं। पुंस्त्वं। पुंस्ता। न नञ्पूर्वात्तत्पुरुषादचतुरसंगतलवणवटयुधकतरसलसेभ्यः। ५।१।१२१॥ इतः परं ये भावप्रत्ययास्ते नञ्तत्पुरुषान्न स्युः चतुरादीन्वर्जयित्वा। अपतित्वं। अपटुत्वं। नञ्पूर्वात्किं। बार्हस्पत्यं। तत्पुरुषात्किं। नास्य पटवः सन्तीत्यपटुः तस्य भावः आपटवं॥ अचतुरेति किं। आचतुर्यं। आसङ्गत्यं। आलवण्यं। आवट्यं। आयुध्यं। आकत्यं। आरस्यं॥ आलस्यं॥

॥ रामो रघुत्तममिति भट्टिप्रयोगः संगच्छत इति तु कारकेष्वेवाचार्यः द्वितीयांतादेव प्रत्यय इति स्पष्टीकृतमिति। तेन विगृह्णाति। विधिमर्हतीति। कथं तर्हि तत्रोययावह्नि हिताध्वरायेति। असत्वार्थकस्य कर्मत्वासंभवेन द्वितीयांतत्वाभावादिति चेदत्राहुः। यथाशब्दो द्व्यर्थोऽपि विषये सत्वार्थकस्तथात्वमित्यादिषु त्वतलादिदर्शनात्। अन्यथा षष्ठ्यपि नास्तीति त्वतलौ न स्यातां। तथा च द्वितीयांतात् यथाशब्दादिहार्थे वतिः। योग्यतामर्हतीति विश्रांतमिति क्रियायोगोपि सुलभ इति। तस्य भावस्त्वतलौ। प्रकृतीति। न तु यः कश्चिद्धर्मः। घटत्वमित्यत्र द्रव्यत्वपृथिवीत्वादेरभानात्। गोर्भाव इति। इह गोशब्दोऽर्थपरः शब्दस्व

गुणवचाप्यत्रानुवर्त्तते। कर्म क्रिया कार्यं च। शरीराण्यास्थ्यत्र साध्यं श्रेणिवादि[illegible]। शास्त्रेण विहितैर्यागादि: कार्यमिति तयोरिदमाह:। अर्हत इति। अर्हः प्रशंसायामिति शत्रन्तो अर्हन्शब्दः पूजार्थाभिधायीति कैयटः। आकृतिगण इति। केषांचित्पाठस्तु कार्यो तरार्थं। तथाहि अर्हतो नुम्चेति नुमर्थः पाठ एवं ग्राम्यवः त्रिभावः अन्यभावः एषां पाठः स्वार्थे विधानार्थः। तथा च प्रत्याहाराह्निके वार्तिके प्रयोगः। आन्यभाव्यं तु कालशब्दव्यवायादिति अन्यभाव एव आन्यभाव्यं अन्यतामित्यर्थः। अयं तु व्याकरणाधिकरणे भट्टपादैरुक्तमान्यभाव्य

गुणवचनब्राह्मणादिभ्यः कर्मणि च। ५। १। १२४। जडस्य भावो वा। जडस्य कर्म भावो वा जाड्यं। मूढस्य भावः कर्म वा मौढ्यं। ब्राह्मण्यं॥ अर्हतो नुम् च। अर्हतो भावः कर्म वा आर्हन्त्यं। आर्हन्ती। ब्राह्मणादिराकृतिगणः। यथातथयथापुरयोः पर्य्यायेण। ७। ३। ३१॥ नञः परयोरेतयोः पूर्वोत्तरपदयोः पर्य्यायेण वृद्धिर्ञ्णिदादौ। अयथातथाभावः आयथातथ्यं अयाथातथ्यं आयथापुर्य्यं अयाथापुर्य्यं। आपादसमाप्तेर्भावकर्माधिकारः। चतुर्वर्णादीनां स्वार्थ उपसंख्यानम्। चत्वारो वर्णाः चातुर्वर्ण्यं। चातुराश्रम्यं। त्रैस्वर्यं। षाड्गुण्यं। सैन्यं। सान्निध्यं। सामीप्यं। औपम्यं। त्रैलोक्यमित्यादि। सर्ववेदाः सर्ववेदास्तानधीते सर्ववेदः। सर्वादेरिति लुक्। स एव सार्ववैद्यः। चतुर्वेदस्योभयपदवृद्धिश्च॥ चतुरो वेदानधीते चतुर्वेदः। स एव चातुर्वैद्यः। चतुर्विद्यस्येति पाठान्तरं॥ चतुर्विद्य एव चातुर्वैद्यः॥ स्तेनाद्यन्नलोपश्च। ५। १। १२५॥ नेति सङ्घातग्रहणं। स्तेन चौर्य्ये पचाद्यच्। स्तेनस्य भावः कर्म वा स्तेयमन्नादिति योगविभज्य। स्तैन्यमिति ष्यञन्तमपि केचिदिच्छन्ति॥ सख्युर्यः। ५। १। १२६॥ सख्युर्भावः कर्म वा सख्यं। दूतवणिग्भ्यां च॥ दूतस्य भावः कर्म वा दूत्यं। वाणिज्यमिति काशिका। माधवस्तु वाणिज्याशब्दः स्वभावात् स्त्रीलिङ्गः भाव एव। अत्र प्रत्ययो न तु कर्मणीत्याह। भाष्ये तु दूतमप्रत्ययो। इति। तत्र वैय्याकरणमीमांसकसंतोषार्थमित्यवधेयं। सर्ववेदा इति। पूर्वकाले केति समासः। चतुर्वेद इति (वणिग्भ्यां चेति नास्त्येव। ब्राह्मणादित्वाद्यो।) तद्धितार्थेति द्विगुः। द्विगोर्लुगनपत्य इत्यणो लुक्। चतुर्विध इति। विद्यालक्षणसूत्रान्तादिति ठक्। तस्य लुक्। संघातग्रहणमिति। वर्णग्रहणे तु यस्येति चेत्यकारलोपे सति नलोपः स्यात्। अकः परस्मिन्नित्यलोपस्य स्थानिवद्भावाद्यादेशप्रसंगादिति भावः। ननु संघातग्रहणेप्यन्त्यस्येत्यकारस्यैव लोपः स्यान्न तु संघातस्येति चेन्नैवं। आरंभसामर्थ्यान्नानर्थकेलोन्त्यविधिरिति निषेधाद्वा तत्सिद्धेः। ❀ ॥

इगंताच्च। लघुः पूर्वोऽवयवो यस्येति प्रातिपदिकविशेषणं। पूर्वत्वं च सन्निधानादिगपेक्षं। तेनाति पांडुशब्दान्न भवति। लघुपूर्वक इत्येव सुवचम्। लघुपूर्वश्चासौ इकश्च लघुपूर्वकः तस्य प्रातिपदिकविशेषणेन इदंतलाभ इति चिन्त्याः। इगंतात्किं। चपल। लघुपूर्वात्किं। पांडुत्वं। कथं कौच्यमिति। कुधातोः औरावश्यक इति रूपसिद्धावपि कवेः क्रमेणार्थे काव्यमिति स्यादिति प्रश्नः। योपधात्। गुरूपोत्तमात्प्रातिपदिकस्य तस्मादित्यर्थः। योपधात्किं। [illegible] रूपोत्तमादिति किं क्षत्रियत्वं। आभि[illegible]कमिति अत्र प्रकृतिरभेः परं अनीयर् प्रत्ययांतो दधातिः। अभिधेयस्य भावः कर्म वेत्यर्थः। साहाय्याद्वेति। सूत्रे लिनित्ये प्राप्ते विकल्पार्थे वचनं द्वंद्वमनोज्ञादिभ्यश्च। मनोज्ञ। प्रियरूपाव हुल। अवश्यस्य दयो मनोज्ञादिः। गोत्रचरणात्। गोत्रवाचिनश्चरणवाचिनश्च प्रातिपदिकाद्वुञ् स्याद्भावकर्मणोः। अपत्याधिकारादन्यत्र लौकिकं गोत्रं। तेनापत्यप्रत्ययां

इगन्ताच्च लघुपूर्वात्। ५।१।१३१। शुचेर्भावः कर्म वा शौचं। मौनं। कथं कौत्यमिति। कविशब्दस्य ब्राह्मणादित्वात् ष्यञ्। योपधाद्गुरूपोत्तमाद्वुञ्। ५।१।॥१३२॥ रामणीयकं। आभिधानीयकं। सहायाद्वा। साहाय्यं। साहायकं। द्वंद्वमनोज्ञादिभ्यश्च। ५।१।१३३॥ शौष्योपाध्यायिका। मानोज्ञकं। गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु। ५।१।१३४॥ अत्याकारोऽधिक्षेपः तदवेतः। गोत्रचरणयोर्भावकर्मणोः प्राप्तः। अवगतवान्। गार्गिकया श्लाघते गार्ग्यत्वेन विकत्थत इत्यर्थः। गार्गिकयात्याकुरुते। गार्गिकामवेतः। होत्राभ्यश्छः। ५।१।१३५॥ होत्राशब्दः ऋत्विग्वाची स्त्रीलिङ्गः। बहुवचनाद्विशेषग्रहणाभ। अच्छावाकस्य भावः कर्म वा अच्छावाकीयं। मैत्रावरुणीयं। ब्रह्मणस्त्वः। ५।१।१३६॥ होत्रावाचिनो ब्रह्मशब्दात्त्वः स्यात्। छस्यापवादः। ब्रह्मत्वं नेति वाच्ये त्वग्रहणं तलो बाधनार्थम्। ब्राह्मणपर्य्यायाद्ब्रह्मशब्दात्तु त्वतलौ। ब्रह्मत्वम्। ब्रह्मता॥ ॥ नञ्स्नञोरधिकारः समाप्तः॥ ॥ ॥

तेभ्य[illegible]र्थः। प्रवराध्याये ये पठितास्तेभ्य इत्यपरे। गोत्रं च चरणैः सहेति जातित्वात्प्राणभृज्जातीत्यादिना अञ्प्राप्ते वचनं। श्लाघेत्यादि। श्लाघादिषु विषयभूतेष्वित्यर्थः। प्र[illegible] प्राप्यर्थत्वात् अवपूर्वस्य [illegible] प्रसिद्धत्वादाह। अवगतवानेति गार्गिके ति। आपत्यस्य [illegible]यलोपः। चरणाद्वुञ् उदाहरणं तु काठिकया श्लाघते इत्यादि द्रष्टव्यं। श्लाघादि[illegible]ति किं गार्ग्यत्वं। काठत्वं। होत्राशब्द इति। जुहोतेस्त्रन्। नेति वाच्ये इति। छप्रत्ययेन निषिद्धे तस्य भावस्त्वतलाविति सूत्रेणैव प्रत्ययः सिध्यतीति भिन्नेरनुच्चारणे लाघवं च भवतीति भावः। होत्राभ्य इत्यनुवृत्तेः फलं दर्शयति॥ ब्राह्मणपर्यायादिति। नञ्स्नञोरधिकारः समाप्तः॥ ॥ ॥ ॥ ॥

सि·कौ·
टी·त·
पु·त·
९२

पुल्लुवेवहुत्वेमयन्निति। यथामुखंदर्श्नइति। अव्ययीभावस्यापियथामुखशब्दस्योन्मत्तः। अर्दिवत्सत्ववचनत्वात्कर्मभक्तियोगेसतिकृद्योगलक्षणाषष्ठी तस्याःनाव्ययीभावा
दित्यमादेशः। सर्वस्यमुखस्येति। संमुखस्येतिनोक्तं। प्रत्ययसंनियोगेनैवसमशब्दस्यान्त्यलोपनिपातनात्। संशब्दस्तुसमशब्दार्थे दृश्यतेसंमुखोभवेत्यत्राभिमुखइत्यर्थप्रतीतेस्तत्रच
खप्रत्ययस्यानिष्यमाणत्वात्। कथंतर्हिसंयुगेसंमुखीनंतमुद्यदंश्रसहंतकइतिभट्टिः। अभिमुखावस्थानात्सामर्थ्याद्वद्विष्यतीतिहरदत्तः॥ ॥ तत्सर्वादेः॥ तदितिद्वितीयासमर्थ
विभक्तिः। व्याप्नोतीतिप्रत्ययार्थः परिशिष्टंप्रकृतिविशेषणं॥ तत्रकेवलानांपथ्यादीनांसर्वादित्वासंभवात्प्रातिपदिकैरंगिरन्तैस्तदंतविधिः। तदाहपथ्यांगकर्मपत्र
पात्रांतात्प्रातिपदिकादित्यर्थः। सर्वपथीनइति। पूर्वकालेकेतिसमासः। ऋक्पूरितिसमासांतस्तस्यपथ्यंतसमासग्रहणेनग्रहणाद्भवतिखप्रत्ययः। अनुपदसर्वान्नायानयंबद्धाभ

तत्सर्वादेःपथ्यङ्गकर्मपत्रपात्रंव्याप्नोति। पा।२।७॥ सर्वादेःपथ्यादेर्यन्ताद्द्वितीयान्तात्खस्स्यात्। सर्वपथान्व्याप्नोतिसर्वपथीनः। सर्वाङ्गीणः। सर्वकर्मी
णः। सर्वपत्रीणः। सर्वपात्रीणः आप्रपदंप्राप्नोति। पा।२।८॥ पादस्याग्रम्प्रपदंतन्मर्यादीकृत्य। आप्रपदं। आप्रपदीनःपटः। अनुपदसर्वान्नायानयं
बद्धाभक्षयतिनेयेषु। पा।२।९॥ अनुरायामेसादृश्येवा अनुपदम्बद्धा अनुपदीना उपानत्। सर्वान्नानिभक्षयतिसर्वान्नीनोभिक्षुः। अयानयःस्थलविशे
षः। तंनेयः अयानयीनश्शारः। परोवरपरम्परपुत्रपौत्रमनुभवति। पा।२।१०॥ परांश्चावरांश्चाऽनुभवतीतिपरोवरीणः। अवरस्योत्वन्निपात्यते। परांश्चप
रतरांश्चाऽनुभवतिपरम्परीणः। प्रकृतेःपरम्परभावोनिपात्यते। पुत्रपौत्राननुभवतिपुत्रपौत्रीणः। परम्पराशब्दस्तुअव्युत्पन्नंशब्दान्तरंस्त्रीलिङ्गं तस्मा
त्स्यात्। अर्थेषुष्वन्निपारम्पर्य्या। कृपम्पारोवर्य्यवदिति असाधुरेवायं स्वप्रत्ययसन्नियोगेनैवपरोवरेतिनिपातनात्॥ ११ स्पपतीयत्रनिपातनात्तिङन्तेनस

हवृहतामणीयांतेभ्योऽनुपदादिभ्योयथासंख्यंबद्धादिष्वर्थेषुखःस्यात्। अनुरायामइत्यादि। यस्यचायामइतियथार्थेयदव्ययमितिवाअव्ययीभावइत्यर्थः। सर्वान्नीनइति।
यर्कोन्त्येसर्वशब्दः। यान्यन्नानिलभ्यंतेउष्णानि शीतलानिसरसानिनीरसानिवासर्वाणिभक्षयतीत्यर्थः। अयःप्रदक्षिणगमनं। अनयःप्रसव्यगमनं। प्रदक्षिणप्रसव्यगा
मिनोंशारालांयस्मिन्परैरसमावेशःसोयमयानयइतिकाशिका। तन्नेयइति। नयतेर्द्विकर्मकत्वादप्रधानेकर्मणिद्वितीया। अयानयीनःशारइति। फलकाशिरसिस्थितइत्य
र्थइतिकाशिका। अवरस्येति। आदेरितिशेषः। उत्वेकृते आद्गुणः। केचित्तुओत्वंपरशब्दस्यनिपात्यतेतस्मात्परस्यात एङःपदान्तादतीतिपूर्वरूपादेशइतिपक्षांतरमाहुः ॥

अवारपारंगामीति। गमेरिति। आङि णिच्चेति बहुलवचनात्केवलादपि णिनिः भविष्यति गम्यादय इति भविष्यत्कालता। न्यासकारस्तु आवश्यके णिनिः सोपि भविष्यत्ये
वेत्याह। अवारपारमिति। अकेनोर्भविष्यदाधमर्ण्ययोरिति षष्ठी प्रतिषेधः। केचित्तु गत्यर्थकर्मणीति सूत्रे द्वितीयाग्रहणमपवादविषयेपि विधानार्थं तेन ... षष्ठी न भ
वति ... गंतेति वदिति व्याचक्षुस्तदसत्। अकेनोरिति प्रतिषेधे षष्ठीप्रसंगस्यैवाभावात्। अवारीणमित्यादि। विगृहीताद्विपरीताच्चेष्यत इति भावः। अत्यंतमिति क्रिया
वि... अनुकाममिति कामः इच्छा तस्य सदृशमनुकामं कामानुरूपमित्यर्थः। अव्ययं विभक्ति... यथार्थेव्ययीभावः। समांसमां। यलोप इति। समायामित्यत्र यकार
लोप...। पूर्वपदे निपात्यत इति। अन्यथा तद्धिते उत्पन्ने पश्चात्तत्र परत्वे सुपो लुग्भवति सुपो धातुप्रातिपदिकयोरिति। तथा पूर्वपदेपि स्यादिति भावः। समांसमीनेति

अवारपारात्यन्तानुकामं गामी। ५।२।११॥ अवारपारङ्गामी। अवारपारीणः। अवारीणः। पारीणः। पारावारीणः। अत्यन्तगामी। अत्यन्तीनः। भृ
शङ्गन्तेत्यर्थः। अनुकामङ्गामी। अनुकामीनः। यथेष्टङ्गन्ता। समांसमां विजायते। ५।२।१२॥ यलोपो ऽवशिष्टविभक्तेरलुक् च पूर्वपदे निपात्यते। समांस
मीना गौः। समांसमीना सा या प्रतिवर्षं प्रसूयते। खप्रत्ययानुत्पत्तौ यलोपो वा वक्तव्यः॥ समांसमां विजायते। समायांसमायां वा॥ अद्यश्वीनावष्टब्धे
।५।२।१३॥ अद्यश्वो वा विजायते अद्यश्वीना वडवा। आसन्नप्रसवेत्यर्थः। केचित्तु विजायत इति नानुवर्तयन्ति। अद्यश्वीनं मरणमासन्नमित्य
र्थः। आगवीनः। ५।२।१४॥ आङ्पूर्वाद्गोः कर्मकरे खप्रत्ययो निपात्यते। गोः प्रत्यर्पणपर्यन्तं यः कर्म करोति स आगवीनः॥ ॥

वीसायां द्विर्वचनं। सुबंतसमुदायः प्रकृतिः। विजायत इत्येतन्न ... प्रसूयत इति। विजायते जनिर्गर्भविमोचने वर्तत इति भावः। गर्भविमोचने कृत्स्नायाः स
मायाव्याप्यमानत्वादत्यंतसंयोगे चेति द्वितीया ... समायामित्यादि। खप्रत्ययानुत्पत्तौ विग्रहे ... केन समांसमामिति सौत्रप्रयोगस्सूपपन्न इति भावः।
अद्यश्वीना। अविभक्तिको निर्देशः। न तु स्त्रीलिंगनिर्देशः। ... अद्यश्वीनो गोसमूहः अद्यश्वीनं ग्रामं डलमित्याद्यव... त्वात्। अद्यश्वो वेति। निपातनात्तु वार्थे समासो
यमिति भावः। अवाचालं बनेति सूत्रेण आदि ... अवष्टब्धशब्द आसन्नपरः। विजायत इति निवर्तते स च गर्भविमोचनार्थकत्वादुक्तः। आसन्नप
सवेत्यर्थ इति। कर्मकर इति। यस्तु प्रातः गां गृहीत्वा गच्छति गो... पालयति ... पर्यन्तमिति। गोशब्दस्य ... गोः प्रतिदाने वर्तत इति भावः। आगवी

आङ्मर्यादाभिविध्योरित्यव्ययीभावे गोस्त्रियोरिति ह्रस्वे कृते खप्रत्ययः। आगुलाः॥ ॥अनुगवं। खइत्यनुवर्त्तते। अनुगुशब्दादलंगामीत्यस्मिन्नर्थे खः स्यात्। गोः पश्चादिति
पश्चादर्थेऽव्ययीभावः। पर्याप्तमिति क्रियाविशेषणं। अत्र हरदत्तः। अनुगवित्यस्य क्रियाविशेषणत्वान्न द्वितीयांतादिह प्रत्ययः। न चालंगामीत्यस्य सुप्सुपेति समासेऽपि
निप्रत्ययांततया कृद्योगलक्षणा षष्ठी स्यादिति वाच्यं। क्रियाविशेषणात्तदप्रवृत्तेः शोभनं पाचक इत्यादौ तथा दर्शनादित्याह। अत्र केचित् धातूपात्तव्यापारजन्यफलाश्रय
त्वं यत्र तन्मुख्यं कर्म यत्र तु व्यापारजन्यत्वमात्रं तदौपचारिकं। ततश्च तंडुलानां पाचक इत्यत्र मुख्यकर्मणि कृद्योगलक्षणा षष्ठी भवति। मृदु पाचकः शोभनं पाचक
इत्यत्र तु सा न भवति। फलव्यापारयोः क्रियाकर्मभावव्यवहारे सत्यपि फलस्यौपचारिककर्मत्वात् तद्विशेषणत्वाच्च मृद्वादेरिति तस्याशय इत्याहुः। अन्ये त्वेवं तर्हि तुल्यन्या
येन क्रियाविशेषणान्न द्वितीयापि अप्रवृत्तिः स्यात् तस्मात्तदर्हमिति निर्देशाद्व नित्या कृद्योगषष्ठीति क्रियाविशेषणात्सा न स्वीक्रियत इतीह हरदत्ताशयः कथंचिद्वर्ण्यः।

अनुग्वलङ्गामी। ५।२।१५॥ अनुगु। गोः पश्चात्पर्याप्तं यथा गच्छति स अनुगवीनो गोपालः। अध्वनो यत्खौ। ५।२।१६॥ अध्वानमलङ्गच्छ
ति अध्वन्यः। अध्वनीनः। ये चाभावकर्मणोः। आत्माध्वानौ खे इति प्रकृतिभावः। अभ्यमित्राच्छ च। ५।२।१७॥ चाद्यत्खौ। अभ्य
मित्रीयः। अभ्यमित्र्यः। अभ्यमित्रीणः। अमित्राऽभिमुखं सुष्टु गच्छतीत्यर्थः॥ गोष्ठात्खञ्भूतपूर्वे। ५।२।१८॥ गौष्ठीभूतपूर्वः गौष्ठीनो देशः। अ
श्वस्यैकाहगमः। ५।२।१९॥ एकाहेन गम्यत इत्येकाहगमः॥ आश्वीनोऽध्वा॥ ॥ ॥ नीय इत्याहुः। वस्तुतस्तु पश्चादर्थेऽव्ययीभावोऽयमिति
निर्विवादं पश्चादिति चासत्त्वार्थे निपातितं। तच्च यद्यपि विभक्तित्रयसाधारणं तथापीह योग्यताबलात्सप्तम्यर्थवृत्तिरतस्तस्य कर्मत्वायोगात्प्रथमांतादेवेह प्रत्ययइति
वक्तुं उचितं। कृद्योगलक्षणा षष्ठी शंक्यत एव नेति बोध्यं। अभ्यमित्रात्। अभ्यमित्रशब्दो लक्षणेनाभिप्रती आभिमुख्ये इत्यव्ययीभावः। क्रियाविशेषणत्वाद्द्वितीयास
मर्थविभक्तिः। गोष्ठात्खञ्। गावस्तिष्ठन्त्यस्मिन्निति गोष्ठः। घञर्थे कविधानमित्यधिकरणे कः। अंबाम्बगोभूमीति षत्वं पूर्वं भूतो भूतपूर्वः सुप्सुपेति समासः। अश्वस्य। क
र्तरि षष्ठी प निर्देशादेव समर्थविभक्तिः। एकाहगम इति। कर्तृकरणे कृतेति समासः। नन्विह ग्रह इद निश्चिगमश्चेत्यपं बाधित्वा परिमाणाख्यायां सर्वेभ्य इति घञ् प्राप्नोति। असि
चात्र परिमाणाख्या एकाहेन गम्यत इति परिच्छेदावगमात्। अत्राहुः। अस्मादेव निपातनादप् द्रष्टव्य इति॥ ॥ ॥ ॥

शालीनकौपीने। इमौ खञ्प्रत्ययांतत्वेन निपात्येते। रूढिशब्दावेतौ कथंचिद्व्युत्पाद्येते नात्रावयवार्थेऽभिनिवेशः कार्यः। शालाप्रवेशमिति। अप्रागल्भ्यादन्यत्र गन्तुमशक्तः। शा
लामेव प्रवेष्टुमर्हतीत्यर्थः। कूपपतनमिति। यत्कार्येण तदाच्छादनीयत्वात्कूपावतरणमर्हतीत्यर्थः। तदाच्छादनमिति। वासःखंड इत्यर्थः। अन्ये त्वाहुः। अकार्यशब्द
यः करोति स क्रियासामान्यवचनेन सेनलज्जाहेतुत्वेन अदृष्टव्यत्वात्पुरुषलिंगं कौपीनं। अस्पृश्यत्वात्तदाच्छादनमिति। शरीरायासेनेति। भारवहनादिनेत्यर्थः यद्य
पि व्रातशब्दो लोके संघातवचनस्तथाप्यत्र भाष्यादिग्रंथपर्यालोचनया अयमेवार्थ इह उचित इति भावः। साप्तपदीनं। योग्यतया समर्थविभक्तिस्तृतीयेति दर्श
यति। सप्तभिः पदैरिति। पदमिह संभाषणं पादविक्षेपो वा। तद्धितार्थे द्विगुः। अवाप्यत इत्यर्थे खञ्। हैयंगवीनं। ह्योगोदोहस्येति। गोर्दोहो गोदोहः षष्ठीसमासः

शालीनकौपीने अधृष्टाकार्ययोः। ५। २। २०॥ शालाप्रवेशमर्हति शालीनः। अधृष्टः। कूपपतनमर्हति कौपीनं पापं। तत्साधनत्वात्तद्दोषत्वाद्वा पुरुषलिङ्गमपि
तत्संबन्धात्तदाच्छादनमपि। व्रातेन जीवति। ५। २। २१॥ व्रातेन शरीरायासेन जीवति न तु बुद्धिवैभवेन स. व्रातीनः। साप्तपदीनं सख्यं। ५। २। २२॥ सप्तभिः
पदैरवाप्यते साप्तपदीनं। हैयंगवीनं संज्ञायां। ५। २। २३॥ ह्योगोदोहस्य हियंगुरादेशोऽर्थविकारार्थे खञ् च निपात्यते। दुह्यत इति दोहः क्षीरं। ह्योगोदो
हस्य विकारः हैयंगवीनं नवनीतं। तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ। ५। २। २४॥ पीलूनां पाकः पीलुकुणः। कर्णस्य मूलं कर्णजाहं
पक्षात्तिः। ५। २। २५॥ मूलग्रहणमात्रमनुवर्तते। पक्षस्य मूलं पक्षतिः॥ ॥ " तेनसहत्त्वस शब्दस्य सुप्सुपेति समासः। ततो विकारे अनुदात्त
लक्षणस्याञोऽपवादः खञ्। अत्र त्वसशब्देन कालप्रत्यासत्तिर्विवक्षिता। नवनीतमिति। यद्यपि नवनीतं घृतमित्युक्तं तथैव चामरेणापि। तत्तु हैयंगवीनं यत् ह्योगोदोहोद्भवं घृतं
इत्युक्तं तथापि घृतशब्देन नवनीतमेव विवक्षितमिति हरदत्त [illegible] धानुरोधेनेदमुक्तं। तस्य पाकः। पाकः परिणामः। मूलमुपक्रमः। तस्येदमित्यणादिषु प्राप्तेष्वयमारंभः अजा
हचोजकारस्य प्रयोजनाभावात्त्वमार्ग्यः। लकर्कंधु। शमी। करी। कुवल। बदर। अश्वत्थ। खदिर। पील्वादिः। कर्ण। अक्षि। नख। मुख। केश। पाद। गुल्फ। भ्रू। शृंग। दंत। ओ
ष्ठ। पृष्ठ। कर्णादिः। मूलग्रहणमात्रमिति। एकदेशस्वरितत्वप्रतिज्ञानादिति भावः। पक्षात्तिरिति। प्रतिपदं। पक्षिणः पक्षमूलं च।

तेन वित्तं । विन्नः प्रतीतः । वित्तो भोगप्रत्यययोरिति निपातनादृदाभ्यां निष्ठातो न इति नत्वं न । लुप्तनिर्दिष्ट इति । चुञ्चुपः प्रत्ययस्येति वक्तव्ये पृथग्योगकरणं तु चुञ्चुप इत्येतदनित्यमिति समा धानांतरमप्याहुः । नानाञाविति । नाञो ञकारो वृद्ध्यर्थः स्वार्थश्चानसहेति प्रकृतिविशेषणं न प्रत्ययार्थ इत्याशयेनाह । असहार्थ इत्यादि । यदि प्रत्ययार्थः स्यात्तर्हि नञ्‌ द्वौ प्रतिषेधौ प्रकृतमर्थं गमयत इति सहार्थो गम्येतेन न सह अपि तु सहैवेति । तस्मात्प्रकृतिविशेषणमेतच्च व्याख्यानलभ्यं तेन प्रत्येकं सहेत्येव प्रत्ययार्थोऽस्तु विनञोः प्रतिषेधार्थत्वादिष्टसिद्धेर्वि नार्दे भरद्यक इत्यादौ विशब्दस्यापि प्रतिषेधवृत्तिर्दृष्टैवेति । सत्यं । क्रियावाचिनो विशब्दात्सहार्थे प्रत्ययो विज्ञायेत । विगतेन सह विकृतेन सहेति । तस्माद्यथोक्तमेव न्याय्यमेतच्च

तेन वित्तश्चुञ्चुप्चणपौ । ५ । २ । २६ ॥ पकारः प्रत्यययोरादौ लुप्तनिर्दिष्टः तेन च स्यने त्वं ज्ञा । विद्यया वित्तो विद्याचुञ्चुः । विद्याचणः । विनञ्भ्यां नानाञौ नसह । ५ । २ । २७ ॥ असहार्थे पृथग्भावे वर्तमानाभ्यां स्वार्थे प्रत्ययौ । विना । नाना । वेः शालच्छङ्कटचौ । ५ । २ । २८ ॥ क्रियाविशिष्टसाधनवाचकात्स्वार्थे विस्तृतं । विशालं । विशङ्कटं । सम्प्रोदश्च कटच् । ५ । २ । २९ ॥ सङ्कटं । प्रकटं । उत्कटं । चाह्निकटं ॥ अलाबूतिलोमाभङ्गाभ्यो रजस्युपसंख्यानं । अलाबूनां रजः । अलाबूकटं । गोष्ठजादयः स्थानादिषु पशुनामभ्यः ॥ गवां स्थानं गोगोष्ठं । सङ्घाते कटच् ॥ अवीनां सङ्घातः । अविकटः । विस्तारे पटच् । अविपटः । द्वित्वे गोयुगच् ॥ द्वावुष्ट्रौ । उष्ट्रगोयुगं । षट्त्वे षड्गवच् । अश्वषड्गवं । स्नेहे तैलच् । तिलतैलं । सर्षपतैलं । भवने क्षेत्रे शाकटशाकिनौ । इक्षुशाकटम् । इक्षुशाकिनं । अवात्कुटारच्च । ५ । २ । ३० ॥ चात्कटच् । अवाचीनः । अवकुटारः । अवकटः । नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः । ५ । २ । ३१ ॥ अवादित्येव । नतं नमनम् । नासिकाया नतं । अवटीटं । अवनाटं । अवभ्रटम् । तद्योगान्नासिका अवटीटा । पुरुषोऽवटीटः ॥ ॥ ॥

हरदत्तग्रन्थे स्पष्टं । स्वार्थ इति । अनिर्दिष्टार्थत्वादिति भावः । सम्प्रोदश्च । क्रियाविशिष्टसाधनवाचकात्स्वार्थे प्रत्ययः । संकटं संहतं संबाध इत्यर्थः । प्रकटं प्रज्ञातं प्रकाशित इत्यर्थः । उत्कटं उद्भूतं विकटं । विकृतं । रूढशब्दाश्चैते कथंचिद्व्युत्पाद्यन्ते । अलाबू तिलेत्यादि । एभ्यः पंचभ्यः रजस्यभिधेये कटच् प्रत्ययो भवति । रजसो विकारत्वाद्विकारेऽप्र त्ययात्क्रमापवादोऽयं । अलाबूकटमिति । ओरञ्मयड्वैतयोरिति मयड् इह प्राप्तः । तिलकटमिति । असंज्ञायां तिलयवाभ्यामिति मयड् प्राप्तः । उमाशब्दात् घृतादित्वादंतो दात्तादनुदात्तादेश्चेत्यञ् । उमोर्णयोर्वेति वुञ्च प्राप्तः । भंगाशब्दात् तृणधान्यानां च द्व्यषामित्याद्युदात्तत्वादण्मयड् प्राप्त इत्येवं यथासंभवं प्रत्ययप्राप्तिरूह्या । हरदत्तस्तु तिल

शब्दस्य घृतादित्वादन्तोदात्तत्वमंगीकृत्य ततोऽनुदात्तादेश्चेत्यञ्। असंज्ञायां तिलयवाभ्यामिति मयड्भावादित्याह तत्र तिलशब्दस्य घृतादित्वकल्पने बीजं चिन्त्यं। तृणधान्या
नां च द्व्यषामिति फिट्सूत्रेणाद्युदात्तस्यैव न्याय्यत्वात्। तिलाश्च मे इत्यत्र तथैव वेदे पाठाच्च। गोष्ठजादय इति संघाते कटजित्यादीन्यस्यैव प्रपंचः। इहोभयमादिशब्दस्य प्रकारे
पशुनामभ्य इति। पशुनामादिभ्य इति भाष्ये प्रचुरः पाठः। गवां स्थानमिति। तस्येदमित्यत्रार्थे सर्वत्र गोरजादिप्रसंग इति यति प्राप्ते गोष्ठच्। संघात इति। अप्रसृतावयव
समूहः संघातः। प्रसृतावयवस्तु विस्तारः। कटच्प्रत्ययो ह्यनपि सामूहिकानामपवादः। द्वित्वे इति। प्रकृत्यर्थस्य द्वित्वे द्योत्ये इत्यर्थः। उष्ट्रगोयुगमिति। हस्तियुगमित्यादि
तत्र्यवयवसंख्या तु धान्यादेकवचनमेवमग्रेऽपि। नतमिति। नपुंसके भावे क्तः। नमनमिति। नीचैस्त्वमित्यर्थः। अवटीटमिति। नासिकासाधनकेन मनेवर्त
मानादवशब्दात्स्वार्थे प्रत्ययः कथं तर्हि नासिकायां पुरुषे चावटीटशब्दस्य प्रयोग इत्यत आह। तद्योगादिति॥ ॐ ॥ नेर्बिडच्। नते नासिकायाः संज्ञाया

नेर्बिडज्बिरीसचौ। ५।२।३२॥ निबिडं। निबिरीसम्। इनच्पिटच्चिकचि च। ५।२।३३॥ नेरित्येव। नासिकाया नतेऽभिधेये इनच्पिटचौ
प्रत्ययौ प्रकृतेश्चिकचि इत्यादेशौ च। कप्रत्ययचिकादेशौ च वक्तव्यौ। चिकिनं। चिपिटं। चिक्कं। क्लिन्नस्य चिल्पिल् लश्चास्य चक्षुषी। क्लिन्ने च
क्षुषी अस्य चिल्लः। पिल्लः। चुल् च। चुल्लः। उपाधिभ्यां त्यकन्नासन्नारूढयोः। ५।२।३४॥ संज्ञायामित्यनुवर्तते। पर्वतस्यासन्नं स्थलमुपत्य
का। आरूढस्थलमधित्यका॥

मिति वर्त्तते निशब्दान्नासिकाया नतेऽभिधेये बिडज्बिरीसचौ स्तः। निबिडमिति। तद्योगान्निबिडा नासिका निबिरीसा। कथं
तर्हि निबिडाः केशाः निबिडं वस्त्रमिति। उपमानाद्भविष्यति। [illegible]च्च कादिकायास्य प्टं। केचित्तु उक्तप्रयोगानुरोधेनेह सूत्रे नते नासिकाया इति नानुवर्त्तत इति व्याचक्षते।
प्रकृतेरिति। निशब्दस्येत्यर्थः। आदेशौ चेति। प्रत्ययानन्तरा[illegible]योगेन यथासंख्यमिमावादेशौ चेत्यर्थः। चिकिनमिति। इनच्प्रत्ययसन्नियोगेन चिकादेशः। चिपिट
मिति। पिटच्प्रत्ययसन्नियोगेन चिरित्यादेशः। क्लिन्नस्येति। चिल पिल इत्युभावादेशौ भवतः। लश्च प्रत्ययः। अस्य तु चक्षुषी इत्येतस्मिन्नर्थे चुल चेति। चाल्लप्रत्ययः चुल इति
क्लिन्नस्य चक्षुषी इति पूर्वोक्त एव विग्रहः। कथं तर्हि स्युः क्लि[illegible]के चिल्ले चुल्लपिल्लाः क्लिन्नदृशि चाप्यमी इत्यमर इति चेदत्राहुः। पुरुषे त्वन्यादिनेतरवयवे लक्षणा
बोध्येति अन्ये त्वाहुरस्य च चक्षुषी इत्यनन्तरं क्लिन्ने इति न वक्तव्यं क्लिन्ने सक्षि चिल्लं पिल्लं पुरुषे तु मत्वर्थे च। अर्शआदिषु स्वोगाद्धीनादिति सूत्रितत्वादि॥ उपाधिभ्याम्॥

संज्ञाधिकारादिह नियतविषयमासन्नारूढं गृह्यते इत्याशयेनाह। पर्वतं समीपम्। आसन्नं समीपं आरूढमुच्चस्थानं। उपत्यकेति। प्रत्ययस्थादितीत्वं तु न भवति। त्यकनश्च ॥ संज्ञानिमि-
निषेधस्य उक्तत्वात्॥ ॥ कर्मणि घटोऽठच्। समर्थानां कर्मन्शब्दात् घटते इत्यर्थे ठच् स्यात्। कर्मठ इति। ठस्येक इतीह न भवति। अठच्इति स्वामप्यपि नागसंज्ञानिमि-
त्ताभावात्। तारकितमिति। एवं पुष्पितं। फलितं पुलकितं रोमाञ्चितमित्युदाहार्यं। प्रमाणे द्वयसच्। प्रमाणे विद्यमानात् प्रथमान्तादस्येतिनिर्दिष्टे प्रमेये र्थे प्रत्ययः प्र-
त्ययाः स्युः। प्रमाणमिह परिच्छेदकमात्रम् तत्र मात्रच्। द्वयसच् दघ्नचौ तु ऊर्ध्वमान एव भवतः। प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ मम इति भाष्यात्। ऊर्ध्वमस्थितेन
येन मीयते तदूर्ध्वमानं ऊर्वादि तेन तिर्यङ्मानादौ रज्जुद्वयसं क्षेत्रमित्यादि न प्रयुज्यते। यथोत्तरं मुनीनां प्रामाण्यात्। अत एव द्विकाण्डा क्षेत्रभक्तिरित्यत्र द्वयसा
चो लुगिति प्राचोक्तं नादर्तव्यमित्यवोचाम। प्रमाणे ल इति। लुकः एषा पूर्वाचार्यसंज्ञा। प्रमाणत्वेन ये प्रसिद्धास्ततः परस्यैवायं लुगित्युदाहरति। शमो दिष्टिर्वितस्ति

कर्मणि घटोऽठच्। ५।२।३५। घटते इति घटः। पचाद्यच्। कर्मणि घटते कर्मठः पुरुषः। तदस्य संजातं तारकादिभ्य इतच्। ५।२।३६। ता-
रकाः संजाता अस्य तारकितं नभः। आकृतिगणोऽयं। प्रमाणे द्वयसज्दघ्नञ्मात्रचः। ५।२।३७। तदस्येत्यनुवर्तते। ऊरु प्रमाणमस्य ऊरु-
द्वयसम्। ऊरुदघ्नम्। ऊरुमात्रं। प्रमाणे लः। शमः। दिष्टिः। वितस्तिः। द्विगोर्नित्यम्। द्वौ शमौ प्रमाणमस्य द्विशमम्। प्रमाणपरिमाणाभ्यां
संख्यायाश्च संशये मात्रज्वक्तव्यः। शममात्रम्। प्रस्थमात्रम्। पञ्चमात्राः। वतुनान्त्वार्थे द्वयसज्मात्रचौ। तावदेव तावद्द्वयसम्। तावन्मा-

इति। शमः प्रमाणमस्येत्यादिविग्रहः। एषु मात्रचो लुक्। इतरयोरसंभवात्। शमादीनामनूर्ध्वमानत्वात्। द्विगोर्नित्यमिति द्विगोरप्रमाणत्वान्नेदं तद्विध्यभावात् पूर्वेणाप्राप्ते
विधीयते। न च विकल्पस्याप्रकृतत्वान्नित्यग्रहणमिह निरर्थकमिति चेत्स्यात्। अनुपदं संशये वक्ष्यमाणो मात्रच् शममात्रमित्यादौ यथा न लुप्यते प्रमाणे ल इत्यस्य प्र-
माणे द्वयसजिति यः पूर्वविधिस्तद्विषयत्वादेवं द्विगोरपि न लुप्येत। इष्यते च लुक्। द्वौ शमौ स्यात् न वा द्विशम इति। तथा चाधिकसंग्रहार्थं नित्यग्रहणमिति। अत्र केचित्
द्विगोर्लक्तस्तु नेपि पुनर्लग्रहणं नित्यार्थमधिकसंग्रहार्थमिति व्याख्यातुं शक्यत इति वैचित्र्यार्थं नित्यग्रहणमित्याहुः। शममात्रमित्यादि। शमः स्यान्न वेत्यादिविग्रहः॥

रुषहस्तिभ्यामण्च इत्यण्यनपत्य इति प्रकृतिभावः। हस्ती प्रमाणमस्य हास्तिनं। अत्र काशिकायामुक्तं द्विगोर्नित्यं लुक् द्विपुरुषमुदकमित्यादि व्याख्यातं च [illegible] तेन
द्वयसज्दघ्नञ्मात्रचां प्रमाणे लो द्विगोर्नित्यमित्यस्य नायमनुवादः पुरुषहस्तिनोः शमादिवत् प्रमाणत्वेनाप्रसिद्धत्वात् अत एव हि पुरुषद्वयसमित्यादौ प्रमाणे लः [illegible] न
भवति तथाप्यपूर्वोऽत्र लुग्विधीयत इति। एतच्चासंगतं द्विगोर्नित्यं लुगित्यपूर्ववचनस्य मुनित्रयानुक्तत्वात्। वस्तुतस्तु विधीयत इत्यस्यानुमीयत इत्यर्थः। अयं भावः। द्विगो
र्हि तल्लुकी न्याय्यं वर्तमाने पुरुषात्प्रमाणेऽन्यतरस्यामिति ङीब्विकल्पेनैतदेव लुकमनुमापयतीति। यत्तदेतेभ्यः॥ यावानित्यादि। आ सर्वनाम्न इत्यात्वे उगित्त्वान्नुमिति नु
म्। अत्वसंतस्य चेति दीर्घः। हल्ङ्याब्भ्य इति संयोगान्तलोपौ। प्रमाण इत्यनुवर्तमाने परिमाणग्रहणं प्रमाणपरिमाणयोर्भेदात् कृतं। तथा च वार्तिकं। डावतावर्थवैशेष्यान्नि
र्देशः पृथगुच्यते। मात्राद्यप्रतिघाताय भावः सिद्धश्च डावतोरिति। अस्यार्थः॥ इह शास्त्रे वतुपं विधाय तस्मिन्परे आत्वं विहितं पूर्वाचार्यैस्तु डावतुं विदधिरे तद्वि

पुरुषहस्तिभ्यामण् च।५।२।३८॥ पौरुषं प्रमाणमस्य पौरुषम्। पुरुषद्वयसम्। हास्तिनं। हास्तिद्वयसं। यत्तदेतेभ्यः परिमाणे वतुप्।५।२।३९॥ य
त्परिमाणमस्य यावान्। तावान्। एतावान्। किमिदंभ्यां वो घः।५।२।४०॥ आभ्यां वतुप् स्याद्वस्य च घः। कियान्। इयान्। किमः संख्यापरिमा
णे डति च।५।२।४१। चाद्वतुप्। तस्य च वस्य घः स्यात्। का संख्या येषां ते कति। कियन्तः॥ ॥ ९९ त्यानिर्देशोऽयं डावतावितिा विशेष्यत इति

विशेषणस्य भावो वैशेष्यं तस्मात्। अर्थभेदादित्यर्थः। अर्थभेदं [illegible] परिमाणं तु सर्वतः। आयामस्तु प्रमाणं स्यादिति प्रागेवोक्त इति भावः। नन्वनयोरर्थभेदे सति यावान भ
ध्वा यावती रज्जुरित्यादि न सिध्येदित्याशयमानं गम्यते। यदि [illegible] प्रमाणाद्भविष्यतीति चेत् तर्हि प्रमाणग्रहणमेवानुवर्त्यतां यावानध्वेत्यादिप्रयोगाश्च मुख्याः संतु ये तु परि
माणे प्रयोगाः यावान् धान्यराशिरित्यादयस्तानेवोपमानाद्भवं [illegible] तत्राह। मात्रादीति। यत्तदेतेभ्य इति विशेषविहितो हि वतुप् सामान्यविहितान्मात्रजादीन् बाधेत तेन
तन्मात्रमित्यादि न स्यात्। परिमाणग्रहणे सति तु भिन्नो विषय [illegible] प्रमाणे विहितमात्रजादिभिः सह बाध्यबाधकभावो नेति भावः। नन्वेवमपि बाधः स्यादेव
प्रमाणे द्वयसजित्यत्र प्रत्ययमात्रमित्यादिसिद्धये प्रमाणग्रहणस्य [illegible] अपरत्वाख्यात्वात्तत्वे न वतुपो यत्तदेतेभ्यो विहितत्वेन विशेषविहितत्वानपायात् स्याद्बा
त्तदेतेभ्यो वतुप् [illegible] चेत्येवमुच्यतां नातु परिमाणग्रहणमस्तु च [illegible] अधिकारे [illegible] न यावती रज्जुर्यावान् धान्यराशिरित्यादिप्रयोगास्सर्वेऽप्युपचारं विनैव निर्वहन्ती स्य

परमनुकूलमत आह। भावः सिद्धश्चेति। डावतावितिवचनं तं। अर्थभेदसमिवलंतान्मात्रंजादीनामुत्पत्तिः सिध्यति। तत्परिमाणमस्य तावद्धान्यं राशीकृतं तावत्प्रमाणमस्य कुड्यादेः तावन्मात्रं। यादृग्राशीकृतस्य धान्यादेर्दैर्घ्यं तादृक्कुड्यादेरपीत्यर्थः एकविषयत्वे तु वतुपैव विशिष्टस्य प्रमेयस्योक्तत्वाद्धतुर्वं तान्मात्रजादीनस्तु। यस्य हि तावत्प्रमाणं तस्य तदपि प्रमाणं। जानुप्रमाणकं जलादि यस्य प्रमाणं तदपि जानुप्रमाणकमिति वक्तुं शक्यत्वात्। एवं च तावत् शब्द एव प्रयुज्येत न तु तावन्मात्रमित्यादि। अन्यथा तत्प्रमाणमस्य तन्मात्रं। तन्मात्रं प्रमाणमस्य तन्मात्रमात्रमित्येवं मात्रजादिभ्यां प्रत्ययमालाप्रसंगात्। किमिदंभ्यां। वतुप्स्यादिति। वकारस्य घविधिसामर्थ्याद्वतुपमनुवर्त्य सोप्यत्र विधीयत इति भावः। आदेः परस्येत्येव सिद्धे वश्चेति वचनमादेशप्रतिपत्त्यर्थमितरथा घं प्रत्ययान्तरं विज्ञायेत। कियानिति। इदंकिमोरीश्की। यस्येति चेति लोपः। इयानिति। ईशादेशस्य यस्येति लोपे प्रत्ययमात्रमवशिष्यते। पठन्ति च। उदितवति परस्मिन् प्रत्यये शास्त्रयोनौ गतवति विलयं च प्राकृतेपि प्रपंचे। सपदि पदमुदीतं केवलः प्रत्ययो यत् तदियदिति मिमीते कोविदापंडितोपि। वैयाकरणानामौपनिषदानां च प्रक्रियामाश्रित्य प्रवृत्तो द्व्यर्थोयं श्लोकः। किमः संख्या। तदस्य

संख्याया अवयवे तयप्। ५।२।४२। पञ्चावयवा अस्य पञ्चतयं दारु। द्वित्रिभ्यां तयस्यायज्वा। ५।२।४३। द्वयं। द्वितयं। त्रयं। त्रितयम्॥

न वर्त्तत एव वा संख्यायाः परिमाणं परिच्छेदः तस्मिन् कर्त्तव्ये यः प्रश्नस्तस्मिन्वर्तमानात् किमः प्रथमासमर्थादस्येति षष्ठ्यर्थे डतिः स्यात्। संख्यापरिमाणे किं। क्षेपे मा भूत्। का संख्येषां दरिद्राणां। अज्ञातानां मंत्राणां जातिमात्रोपजीविनां। सहस्रशः समेतानां परिषत्त्वं न विद्यते इत्येवं संख्येयद्वारेणात्र संख्यायाः कुत्सा बोध्या॥ ✲॥ संख्याया अवयवे। अवयवे वर्त्तमानाया संख्यातद्वाचिनः प्रथमान्तात्षष्ठ्यर्थे तयप् स्यात्। यं प्रत्यवयवः सोऽवयवी प्रत्ययार्थः अस्येत्यधिकारात्। यथाह्यस्य जादिषु प्रमाणे प्रकृत्यर्थे प्रमेयं प्रत्ययार्थस्तद्वत्। त्रयमिति। ननु त्रयोवयवाः तंतवो यस्य त्रयं सूत्रमिति प्रयोगे संभवत्यपि मुनित्रयमिति प्रयोगो न संगच्छते। अन्यपदार्थस्यावयविनोऽभावादिति चेदत्राहुः। अवयवी त्वत्र समुदाय एव स चातिरिक्तो वाऽनतिरिक्तो वेति विचारान्तरं एवं च समुदायस्यातिरिक्तत्वपक्षेपि समुदायघटकत्वेन मुनीनां प्रत्यभिज्ञानान्मुनित्रयनमस्कारस्य विघ्नविघातकत्वमस्त्येवेति॥

उभादुदात्तो नित्यम्। इह चित इत्यनेनैवान्तोदात्तत्वं सिद्धं। सर्वोदात्तत्वं तु अनुदात्तं पदमेकवर्जमिति वचनाद्बाधितं। न च उभये इति संबुध्यंते आमंत्रिताद्युदात्तत्वं बाधितुं वचनमिति शंक्यं। पूर्वत्राष्टपवादन्यायेन चित्स्वरस्यैव बाध्यत्वात्। न त्वामंत्रिताद्युदात्तत्वस्येति सुवचत्वात्। तस्मादुदात्तवचनसामर्थ्यादादेरेवायं। प्रयुज्यते च नञा। उभयं शृणवच्च न इति। तदेत
त्सकलमभिप्रेत्याह स चेति। तदस्मिन्। पुनस्तद्ग्रहणमस्येति षष्ठ्यंतसंबंधनिरासार्थं। प्रत्ययविधौ तदंतविध्यभावादाह। दशान्तादिति। अतएव ग्रहणं किं। दश अधिका अस्मिन्
शते। न चेह व्यपदेशिवद्भावेन दशान्तत्वमस्तीति वाच्यं। व्यपदेशिवद्भावो प्रातिपदिकेनेत्यभ्युपगमात्। अदंता प्रत्ययग्रहणपरिभाषया तदंतविधौ सति यस्मात्प्रत्ययविधिस्तदा
दिस्तदंतस्येति परिभाषया तदादिनियमः स्यात्। तं वारयितुमंतग्रहणं। तेन एकत्रिंशं शतं एकचत्वारिंशमित्यादि सिद्धं। न चैवं गोत्रिंशदधिका अस्मिन् गोशते इत्यादावतिप्र

उभादुदात्तो नित्यम्। ५।२।४४॥ उभशब्दात्तयपो अयच् स्यात्। स चाद्युदात्तः। उभयम्। तदस्मिन्नधिकमिति दशान्ताड्डः। ५।२।४५॥ एकादश अधिका
दशम्। शतसहस्रयोरेवेष्यते। नेह। एकादश अधिका अस्यां विंशतौ। प्रकृतिप्रत्ययार्थयोः समानजातीयत्वमेवेष्यते। नेह। एकादश माषा अधिका
अस्मिन् सुवर्णशते। शदन्तविंशतेश्च। ५।२।४६॥ डः स्यादुक्तेऽर्थे। त्रिंशदधिका अस्मिन् त्रिंशं शतम्। विंशं। संख्याया गुणस्य निमाने मयट्। ५।२।४७।
भागस्य मूल्ये वर्तमानात्प्रथमान्तात्संख्यावाचिनः षष्ठ्यर्थे मयट् स्यात्। यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्य द्विमयमुदश्विद्यवानाम्। गुणस्येति।
किम्। द्वौ व्रीहियवौ निमानमस्योदश्वितः। निमाने किम्। गुणो क्षीरस्यैकस्तैलस्य द्विगुणं क्षीरं पच्यते तैलेन॥ ॥ मं.गः श्लोकः संख्याया अवयवे तयप्

संख्याग्रहणानुवृत्तेः। अंतग्रहणमिह विंशतिशब्दानंतरं कर्तव्यं। [illegible] तेन एकविंशं शतमित्यादि सिध्यत्यन्यथा ग्रहणवतेति तदंतविधिप्रतिषेधादिह न स्यात्। सं
ख्याया गुणस्य। गुणो भागः। निमीयते क्रीयतेनेनेति निमानं मूल्यं। मेय [illegible] तस्मान्निपूर्वात् [illegible] ल्युट्। तदाह भागस्य मूल्ये इति षष्ठ्यर्थे इति। यद्यपि तदस्मिन्नधिकमित्यत
स्तदित्यनुवृत्तौ प्रथमांतादित्ययमेवार्थो लभ्यते तथापि मेदूकस्तु [illegible] तदस्येत्यस्यानुवर्त्तनात् षष्ठ्यर्थ इत्येतदपि लभ्यत इति भावः। द्विमयमिति। द्विशब्दस्य सं
बंधिशब्दत्वेन नित्यसापेक्षत्वाद्यवानामिति पदसत्त्वेपि तद्धितोत्पत्तिः। [illegible] इति तेषां तु एवमपि प्रत्ययार्थस्योदश्वित्त्वेन सामानाधिकरण्यं दुर्लभमित्याशंक्याह उदश्विद्भा
गो प्रत्ययार्थो विवक्षितो नोदश्विदिति। अत्राहुः। भागेपि विधीयमानः प्रत्ययः अप्रधानस्वाभाव्यात् भागवंतमाचष्टे। तेन सामानाधिकरण्यं भवतीति गुणनिमानेति वक्तव्यं।

न्यसोऽच्चारणादेकत्वं गुणस्येत्यत्र विवक्षितं। तेनेह न भवति। यवानां द्वौ भागौ निमानमेषामुदश्वितस्त्रयाणां भागानामिति। भूयसश्च वाचिकायाः संख्यायाः प्र[illegible]ह्यते। इह न भवति। एको भागो निमानमस्येति। भूयस इति च प्रत्ययार्थादाधिक्यमात्रं [illegible]स्याविवक्षितं न तु बहुत्वं तेन हि शब्दादपि भवत्येव। तस्य पूरणे। तस्येति षष्ठ्यंतानुकरणमेकत्वं त्वविवक्षितं। एकस्य पूरणासंभवात्। पूर्यतेऽनेनेति पूरणः ण्यंतात् [illegible] ल्युट्। एकादशानामिति। उद्भूतावयवभेदः समुदायः प्रकृत्यर्थः। अवयवः प्रत्ययार्थः इह यस्मात्संख्यावाचिनः प्रत्ययविधिस्तदीयप्रवृत्तिनिमित्तस्य एकादशत्वादेः पूरणेऽर्थात्प्रत्ययः। यथाऽतिशायने [illegible]दिषु प्रवृत्तिनिमित्तस्यैवातिशयादिकं गृह्यते अंतरंगत्वात्तथेहापीति। तेन एकादशानां घटानां पूरणो जलादिरित्यत्र नातिप्रसंगः शंकाले श्रोणीप्रतिभावः। ननु यदि प्रवृत्तिनिमित्तस्य पूरणे प्रत्ययस्तर्हि एकादशत्वस्य पूरण इति विग्रहो वक्तुं युक्तम् इति चेदत्राहुः वैयाकरणपाशः   इत्यत्र यथा याप्यो वैयाकरण इति विग्रहः। ननु याप्यं वैयाकरणत्वमिति निमि[illegible]इहापि बोध्यमिति। एवं च व्युत्क्रमेणाध्याये गम्यमा

तस्य पूरणे डट्। ५।२।४८।। एकादशानाम्पूरण एकादशः।। नान्तादसंख्यादेर्मट्। ५।२।४९।। डटो मडागमस्स्यात्। पञ्चानाम्पूरणः पञ्चमः। नान्तात्किं विंशः। असंख्यादेः किं। एकादशः।। षट्कतिकतिपयचतुरां थुक्। ५।२।५१।। एषां थुगागमः स्यात् डटि। षण्णां पूरणः षष्ठः। कतिथः। कतिपयशब्दस्यासंख्यात्वेऽप्यत एव ज्ञापकाड्डट्। कतिपयथः। चतुर्थः।। चतुरश्छयतावाद्यक्षरलोपश्च।। तुरीयः। तुर्यः।। बहुपूगगणसङ्घस्य तिथुक्। ५।२।५२।। डटीत्येव। पूगसङ्घयोरसंख्यात्वेऽप्यत एव डट्। बहुतिथः। इत्यादि। वतोरिथुक्।। ५।२।५३।। डटीत्येव। यावतिथः।।

११ नेष्ठद्विरादिजित्यध्यायो यदा चरमं गण्यतेऽनेनरा णप्यप्रमो भवत्येव। नान्तादसंख्यादेः। डट इति। डडिति प्रथमान्तस्यानुवृत्तस्य नान्तादिति पंचम्या षष्ठी कल्प्यत इति भावः। यद्यपीह मटः प्रत्ययत्वेऽपि न क्षतिस्तथाप्युत्तरत्र मट आगमत्वमेवाभ्युपगंतव्यं। अनुदात्तत्वाय यथा स्यात्। प्रत्ययत्वे त्वाद्युदात्तः स्यात्तथा चैकरूप्येणैव संदर्भव्याख्यानमुचितं। अन्येप्याहुर्मटः प्रत्ययत्वे अकारसहितो मकारो विधेयः। आगमत्वे तु मकारमात्रमिति लाघवमस्तीति। विंश इति। विंशतेः पूरणः।। तिविंशतेर्डितीति तिलोपः। षट्कति इह षष्ठीनिर्देशबलात् षडादीनामागमित्वं स्पष्टमिति तदानुकूल्येनानुबन्धो डटः। प्रत्ययो विपरिणम्यते तदाह। डटीति। डट एव थुट् तु न कृतः। षष्ठथकारस्य जश्त्वप्रसंगात्। चतुर्थे रेफस्य विसर्गप्रसंगाच्च। न चैवं नान्तादिति सूत्रेऽपि डटि परे मुगेव विधीयतामिति वाच्यं। पंचमः सप्तम इत्यादौ नलोपाभावापत्तेः। चतुरश्छयतावितीति।। विशेषविहिताभ्यामपि छयद्भ्यां डट् प्रत्ययो न बाध्यते थुग्विधानसामर्थ्यान्न चतुर्थः इति सिद्धं।

सि॰ कौ॰
टी॰ त॰
सु॰ त॰
९८

मतौ छः। मत्वर्थ इति। मतोर्विषय इत्यर्थः। तेन तदिति प्रथमासमर्थविभक्तिरस्यास्मिन्निति प्रत्ययार्थश्च हलभ्यते। विधानसामर्थ्यादिति। मतुप्प्रकरण एवास्मिन् सूत्रे कर्तव्ये यदत्रास्य लुग्विधानं तदस्यास्तीति कं लुकमनुमापयतीति कैयटः। तत्र कुशलः। सप्तमीसमर्थात्पथिन्शब्दात्कुशल इत्यर्थे वुन् स्यात्। आकर्षादिभ्यः कन्। वुना सिद्धे कन्।

मतौ च्छः सूक्तसाम्नोः। ५।२।५९॥ मत्वर्थे छः स्यात्। अच्छावाकशब्दोऽस्मिन्नस्ति। अच्छावाकीयं सूक्तम्। वारवन्तीयं साम। अध्यायानुवाकयोर्लुक्। ५।२।६०॥ मत्वर्थस्य छस्य अत एव ज्ञापकात्तत्र छः। विधानसामर्थ्याच्च विकल्पेन लुक्। गर्दभाण्डः। गर्दभाण्डीयः। विमुक्तादिभ्योऽण्। ५।२।६१॥ मत्वर्थेऽण् स्यादध्यायानुवाकयोः॥ विमुक्तशब्दोऽस्मिन्नस्ति वैमुक्तः॥ दैवासुरः॥ गोषदादिभ्यो वुन्। ५।२।६२॥ मत्वर्थेऽध्यायानुवाकयोः। गोषदकः। इषेत्वकः। तत्र कुशलः पथः। ५।२।६३॥ वुन् स्यात्। पथिकुशलः पथिकः॥ आकर्षादिभ्यः कन्। ५।२।६४॥ आकर्षे कुशल आकर्षकः आकषादिभ्य इति रेफरहितो मुख्यः पाठः। आकषो निकषः। धनहिरण्यात्कामे। ५।२।६५॥ काम इच्छा। धने कामो धनको देवदत्तस्य। हिरण्यकः॥ स्वाङ्गेभ्यः प्रसिते। ५।२।६६॥ केशेषु प्रसितः केशकः। तद्रचनायां तत्पर इत्यर्थः। उदराट्ठगाद्यूने। ५।२।६७॥ अविजिगीषौ ठक् स्यात्नोपवादः। बुभुक्षयाऽत्यन्तपीडित उदरे प्रसित औदरिकः। आद्यूने किम्। उदरकः। उदरपरिमार्जनादौ प्रसक्त इत्यर्थः। सस्येन परिजातः। ५।२।६८॥ कन् स्यात्। व्यर्थं तेन ठक्। सस्यशब्दो गुणवाची न तु धान्यवाची शस्येनेति पाठान्तरम्। सस्येन गुणेन परिजातः संबद्धः सस्यकः साधुः॥ अंशं हारी। ५।२।६९॥ हारीत्यावश्यके णिनिः। अत एव तद्योगे षष्ठी न। अंशको दायादः। तन्त्रादचिरापहृते। ५।२।७०॥ तन्त्रकः पटः। प्रत्यग्र इत्यर्थः॥ ब्राह्मणकोष्णिके संज्ञायाम्। ५।२।७१॥ आयुधजीविनो ब्राह्मणा यस्मिन्देशे स ब्राह्मणकः॥ अल्पमन्नं यस्यां सा उष्णिका यवागूः।

((अन्नशब्दस्य उष्णादेशो निपात्यते ॥

न हस्तं इदं तदर्थं अशनिकः शाकुनिकः स्तरुकः मख्यः पाठ इति। आकषन्त्यस्मिन् सुवर्णादिकमित्याकषः। पुंसि संज्ञायां घ इति व्याख्याय येत्वाकर्षादिभ्य इति सरेफं पठन्ति तेषामाकर्ष इति घञि रूपमिति हरदत्तेनोक्तत्वादिति भावः॥ धने काम इति। तत्रेत्यनुवर्तनात्सप्तम्यंतात्प्रत्य

उदराज्ञ। आद्यूनशब्दार्थमाह। अविजीगीषावित्ति। दिवो विजिगीषायामिति तत्रैव निष्ठानत्वविधानात्। सस्येन। कर्तरि तृतीयेयं। परिजातः परिजातः फलितमाह। संबद्ध इति अन्नं वेति। अके नो रिति निषेधादिति भावः। तंत्रात्। तन्त्रं तेमन्त वोऽस्मिन्निति व्युत्पत्त्या तंत्रं तंतुवायसकाल्ना अचिरः कालो अपहृतस्येत्यचिरापहृतं तस्मिन्। कालाः परिमाणेने
निसमासः प्रत्ययग्रहणे। तन्त्र इत्यर्थः। ब्राह्मणकोष्णिके। ब्राह्मणशब्दायुधजीवित्वोपाधिका प्रथमान्तात् समभ्यर्थेकन् प्रत्ययो निपात्यते। अन्नशब्दात्तु अल्पत्वोपाधिकात्। तदाह
आयुधप्रधानं : ....शीतोष्णाभ्यां शीतमिव शीतं मंदमित्यर्थः। शीते समिकार्यकरणे पाठवाभावात्। उष्णमिवोष्णं शीघ्रमित्यर्थः। क्रियाविशेषणाभ्यां द्वितीयांताभ्यां प्रत्ययः। कृयोग
लक्षणा षष्ठी तु क्रियाविशेषणे नेत्युक्तं। मुख्यार्थवृत्तिभ्यां तु प्रत्ययो न भवत्यनभिधानात्। अधिकं। अध्यारूढशब्दादिति। गत्यर्थाकर्मकेत्यादिना रुहेः कर्तरि कर्मणि वा क्तो वि
हितः आधिकप्रत्ययेन कर्मणो ऽनभिहितत्वात् अध्यारूढशब्दयोगे द्वितीया। अध्यारूढो द्रोणं खारीमिति। ग्राममगत इतिवत्। तथा अधिकशब्देनापि योगे द्वितीयायां प्राप्त

शीतोष्णाभ्यां कारिणि। ५।२।७२॥ शीतं करोतीति शीतकः। अलसः। उष्णं करोतीति उष्णकः शीघ्रकारी। अधिकम्। ५।२।७३॥ अध्यारूढशब्दात्कन् उत्त
रपदलोपश्च। अनुकाभिकाभीकः कमिता। ५।२।७४॥ अन्वभिभ्यां कन्। अभेः पाक्षिको दीर्घश्च। अनुकामयते। अनुकः। अभिकामयते। अभिकः।
अभीकः। पार्श्वेनान्विच्छति। ५।२।७५॥ अनृजुरुपायः पार्श्वं तेनान्विच्छति पार्श्वकः॥ अयःशूलदण्डाजिनाभ्यां ठक्ठञौ। ५।२।७६॥ तीक्ष्ण उपायो
ऽयःशूलं तेनान्विच्छति आयःशूलिकः साहसिकः। दण्डाजिनं दम्भः तेनान्विच्छति दाण्डाजिनिकः॥ ॥ ॥ ॥

यां यस्मादधिकं तदस्मिन्नधिकमिति च निर्देशाद् यात् पंचमी सप्तम्यौ [illegible]। अधिको द्रोणः खार्याः अधिको द्रोणः खार्यामिति। द्वितीये तु क्तेन कर्मणोऽभिहितत्वात्प्रथ
मा। अधिकारवारी द्रोणेन कर्मणोऽभिहितत्वादेव पंचमीसप्तम्यावित्यनाशंकनीयं। अनुकाः समाहारद्वंद्वे सौत्रं पुंस्त्वं। सूत्रत्वाल्लिंगव्यत्यय इति फलितोऽर्थः। अन्वभि
भ्यां कनिति। क्रियाविशिष्टसाधनवाचिभ्यां स्वार्थे निपात्यो [illegible]। पार्श्वेनान्विच्छति। आकर्षादिभ्यः कनित्यतः कन्ननुवर्तते। अनृजुरिति। तिर्यगवस्थानात्
पार्श्वमनृजुत्वसाधर्म्यादुपायोऽपि इह शीघ्रोपायः पार्श्वः [illegible] दण्डाजिनशब्दा गौणा एवं गृह्यते। मुख्यार्थेभ्यस्तु प्रत्ययो न भवत्यनभिधानात्॥ ॥ ॥

तावतिथंग्रहणमितिलुग्वा। तावतांपूरणंतावतिथं। वतोरिथुक्। यथातस्यापत्यमित्यत्रतस्येतिषष्ठ्यंतानांसामान्यनिर्देशस्तथात्रतावतिथमितिपूरणेऽन्त्ययांतानांसामान्यनिर्देशः। अनंतरावपिठक्ठञौनानुवर्तेते अस्वरितत्वादित्यभिप्रेत्याह॥ कन्स्यादिति। पूरणप्रत्ययस्येति। ननु कनःलुग्वाग्रहणानर्थक्यप्रसंगात्। पंचमंपंचमकमित्यादिरूपद्वयंहितेनसाध्यं। तच्चमहाविभाषाधिकारात् द्विकल्पेनकनउत्पत्त्यासिद्धमेव तस्मात्पूरणप्रत्ययस्यैवलुक्तत्रकारस्याभिमतमितिव्याचष्टे॥ द्विकमिति। वार्तिककारलुकनएवलुगितिव्याख्यामभिप्रेत्यतावतिथंग्रहणमितिलुग्वावचनानर्थक्यंविभाषाग्रहणादित्याह। तन्मतेद्वितीयकंद्वितीय मित्येवरूपंनतुद्विकमितिबो

तावतिथंग्रहणमितिलुग्वा।५।२।७७॥ कन्स्यात्पूरणप्रत्ययस्यचलुग्वा॥ द्वितीयकम् द्विकम्वाग्रहणंदेवदत्तस्यद्वितीयेनरूपेणग्रहणमित्यर्थः। तावतिथेनगृह्णातीतिकन्वक्तव्योनित्यञ्चलुक्॥ षष्ठेनरूपेणगृह्णातिषट्कोदेवदत्तः। पञ्चकः॥ सएषांग्रामणीः।५।२।७८॥ देवदत्तोमुख्योदेवदत्तकाः। त्वत्काः मत्काः। शृङ्खलमस्यबन्धनङ्करभे।५।२।७९॥ शृङ्खलकः करभः। उत्कउन्मनाः।५।२।८०॥ उद्गतमनस्कःइत्यत्रेरुत्कण्ठावाचकोऽर्थकत्। उत्कः उत्कण्ठितः॥ कालप्रयोजनाद्रोगे।५।२।८१॥ कालवचनात्प्रयोजनवचनाच्चकन्स्याद्रोगे। द्वितीयेऽहनिभवोद्वितीयकोज्वरः। प्रयोजनंकारणंरोगस्यफलम्वा। विषपुष्पैर्जनितोविषपुष्पकः। उष्णङ्कार्य्यमस्यउष्णकः। रोगेकिम्। द्वितीयोदिवसोऽस्य॥ तदस्मिन्नन्नंप्राये संज्ञायाम्।५।२।८२॥ प्रथमान्तात्सप्तम्यर्थेकन्स्यात्। यत्प्रथमान्तमन्नं चेत्प्रायविषयन्तत्। गुडापूपाःप्रायेणान्नमस्यांगुडापूपिका पौर्णमासी। वटकेभ्यइतिनिर्वाच्यः॥ वटकिनी। कुल्माषादञ्।५।२।८३॥ कुल्माषाःप्रायेणान्नमस्यांकौल्माषी॥ श्रोत्रियंश्छन्दोऽधीते।५।२।८४॥ श्रोत्रियः। वेत्यनुवृत्तेश्छान्दसः॥ श्राद्धमनेनभुक्तमिनिठनौ।५।२।८५॥ श्राद्धी। श्राद्धिकः॥ ॥ ९९ ध्यं। तावतिथेनेति। पूरणप्रत्ययांताद्ग्रहणोपाधिकात्स्वार्थेविधीयमानोग्रहीतरिनप्राप्नोतीतिवचनमितिकैयटः। सएषांग्रामणीः। ग्रामणीर्नापितेपुंसिश्रेष्ठेग्रामाधिपेत्रिष्वित्यमरः। करभइति। उष्ट्रबालकः। द्वितीयेहनीति। यद्यपिद्वितीयशब्दःकालवाचीनभवतितथाप्यर्थप्रकरणादिनावृत्तिविषयेकालेवर्त्तनइतिभावः। ननुसाक्षात्कालवाचिभ्योमासादिभ्योनभवति द्वितीयादिभ्यस्तुभवतीत्यत्रकिंमानमितिचेदत्राहुः। उत्तरसूत्रस्थसंज्ञापकर्षणाछन्दस्वभावाद्वातद्बोध्यमिति। वटकेभ्यइति। कनिप्राप्तेवचनं। ननुसंज्ञाग्रहणात्कन्नभविष्यतीतिचेत्किंततः इनेरप्राप्तत्वात्तदर्थंवचनमंगीकार्यमेव। अतइनिठनाविस्येवकथंचिदिनिःसिध्यतीत्याशात्रनकार्यासप्तम्यांचनतोऽस्मृतावितिवचनात्। श्रोत्रियः॥

पः छंदोधीते सः श्रोत्रियो भवति। अत्र भाष्ये छंदोधीत इत्यस्य वाक्यस्यार्थे श्रोत्रियन्निपात्येतत्यदं निपात्यत इति वाक्यार्थे पदवचनपक्षः। छंदसो वा श्रोत्रभावो निपात्यते तेन धीतर
त्येतस्मिन्नर्थे घश्च प्रत्यय इति पक्षांतरं चस्थितं। व्याख्यातं च कैयटेन वाक्यार्थस्य संबंधरूपस्य क्रियारूपस्य वा असत्वरूपत्वात्। श्रोत्रियशब्दस्य च सत्वरूपाभिधायित्वा
द्वाक्यार्थग्रहणेन तदाश्रयश्छंदोध्यायी अभिधीयत इति। एकां शाखामधीत्य श्रोत्रियो भवतीति धर्मशास्त्रं। वेत्त्यनुवृत्तेरिति। नावतिथं ग्रहणमिति तन्त्रुग्वस्यतः। श्राद्धमने
नाश्राद्धामिन्नस्तीति श्राद्धी। यत्ता श्राद्धार्वान्मोलः। यद्यपि तिर्यक्कर्म श्राद्धशब्देनोच्यते। तथापीह तत्साधनद्रव्यमुच्यते मुख्यस्य श्राद्धस्य भो...क्यत्वात्। श्राद्धी।
श्राद्धिक इति। अद्यतन एवेष्यते अद्य भुक्ते श्वः श्राद्धिक इति मा भूत्॥ ॥ पूर्वादिनिः। पूर्वमिति क्रियाविशेषणात् द्वितीयांतात्प्रत्ययः। अनेनेति कर्तृवाचकमनुवर्तते नचाक्रि
यामंतरेण कर्तृसंभवतीति क्रिया। चिक्रिया मध्याहृत्य प्रत्ययो विधेयस्तदाह पूर्वं कृतमनेनेति। सपूर्वाच्च। अनेनेति पूर्वसूत्रमनुवर्तते। विद्यमानपूर्वकात्पूर्वशब्दादनेनेत्य

पूर्वादिनिः। ५।२।८६॥ पूर्वं कृतमनेन पूर्वी। सपूर्वाच्च। ५।२।८७॥ कृतपूर्वी॥ इष्टादिभ्यश्च। ५।२।८८॥ इष्टमनेन इष्टी। अधीती॥ छन्दसि परि
पन्थिपरिपरिणौ पर्य्यवस्थातरि। ५।२।८९॥ लोके तु परिपन्थिशब्दो न न्याय्यः॥ अनुपद्यन्वेष्टा। ५।२।९०॥ अनुपदमन्वेष्टा। अनुपदी॥ साक्षाद्द्रष्ट
रि संज्ञायाम्। ५।२।९१॥ साक्षाद्द्रष्टा साक्षी॥ क्षेत्रियच् परक्षेत्रे चिकित्स्यः॥ ५।२।९२॥ क्षेत्रियो व्याधिः शरीरान्तरे चिकित्स्यः॥ अप्रतीतकार्य्य

स्मिन्नर्थे इति स्यात्। पूर्वान्नाच्चेत्यत्र तत्फलितस्। कृतपूर्वीति। कृतपूर्वशब्दयोः सुप्सुपेति समासः। इह प्रातिपदिकाधिकारात्पूर्वादिनिरित्यनेनैव पूर्वशब्दांतात्प्रातिपदिकात्
कृतपूर्वशब्दादिनौ सिद्धे सपूर्वाच्चेत्येतत् ग्रहणवता प्रातिपदिकेन तदंतविधिर्नेति परिभाषां ज्ञापयति। कृतपूर्वीत्येतत्सिद्धये पूर्वान्नाच्चेति स्वीकृतेन नैव व्यपदेशिव
द्भावे मत्पूर्वीत्यपि सिद्धे सिद्धे पूर्वादिनिरित्येतत् व्यपदेशिवद्भावोऽप्रातिपदिकेनेति परिभाषां ज्ञापयति। छंदसि पर्यवस्थातृशब्दो च्छत्रुपर्यायान्त्वोर्थ इति प्रत्ययः। अ
वस्थातृशब्दस्य च पंथपरणावादेशौ निपात्येते। अपत्यथ इत्थं पन्थिनं। मात्वापरिपरिविदन्। उभयत्रापि पथि द्वे अवग्रहः। लोके त्विति। अनुपस्थितपरिपन्थिभिः
पार्थिवैरित्यादौ। अनुपद्यन्वेष्टा॥ अन्वेष्टरि इनि प्रत्ययो निपात्यते। अनुपदमिति। पदस्य पश्चात्। पश्चादर्थेऽव्ययीभावः। अनुपदी गवामिति। परापद्मस्या षष्ठी। गो
पदात्पश्चादन्वेषणं गवामेवातेन हि रण्यादावन्वेष्यनभवतीति हन्तः। साक्षाद्द्रष्टरि। द्रष्टृर्थे इनिः स्यात्। साक्षाच्छब्दोऽव्ययं तेन प्रकृतिवदनुकरणमित्यनि

दिश्यादिहसूत्रेपंचम्यालुक् उदस्यात्संभोः अवाच्चालंबनेत्यादौतुप्रकृतिवदित्यातेरेशस्यवैकस्मिकत्वेनाव्ययत्वाभावात्पंचम्यालुङ् नभवतीतिबोध्यं। साक्षीति। अव्यया
भमात्रेइतिटिलोपः। यद्यपिसाक्षाद्द्रष्टारस्त्रयोभवंतिदाताग्रहीताउपद्रष्टाच। तथापीहसंज्ञाग्रहणात्साक्षिशब्देनोपद्रष्टैवोच्यतेइत्याहुः। क्षेत्रियच्परक्षेत्रशब्दा
त्संह –पंताद्व्यपरशब्दस्यलोपश्चनिपात्यतइतिमनोरमा। अन्येतुपरक्षेत्रेचिकित्स्यइत्यर्थेक्षेत्रियजितिनिपात्यते वाक्यार्थेपदवचनंश्रोत्रियवदित्याहुः। एवमन्य
त्वापूत्वा॰ क्षेत्रियोव्याधिरिति। किंचक्षेत्रियंविषं। यत्परशरीरेसंक्रमय्यचिकित्स्यते। अपिचक्षेत्रियाणितृणानि। यानिसस्यानिसस्यार्थेक्षेत्रेजातानिचिकित्स्यानि
विनाशयितव्यानि। किंचक्षेत्रियःपारदारिकः। परदाराःपरक्षेत्रंतत्रचिकित्स्योनिग्रहीतव्यः। सर्वेप्येतेपक्षाआकरेस्थिताः॥ ॥ इंद्रियमिंद्र॥ इंद्रशब्दाद्घच् इंद्रेण

इन्द्रियमि॰ [...]लिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमितिवा। ५।२।९३॥ इन्द्रआत्मातस्यलिङ्गंकरणेनकर्तुरनुमानात्। इतिकरणः प्रकारा
र्थः। इन्द्रेणदुर्जयमिन्द्रियम्। तदस्यास्त्यस्मिन्नितिमतुप्। ५।२।९४॥ गावोस्यास्मिन्वासन्तिगोमान्॥ भूमनिन्दाप्रशंसासुनित्ययोगेतिशायने॥
सम्बन्धेस्तिविवक्षायांभवन्तिमतुबादयः॥ १॥ रसादिभ्यश्च। ५।२।९५॥ मतुप्। रसवान्। रूपवान्॥ अन्यमत्वर्थीयनिवृत्त्यर्थंवचनम्। रसरूप
गन्धस्पर्शशब्दस्नेहगुणात्एकाचः। स्पर्शवान्। गुणग्रहणंरसादीनांविशेषणम्॥ तसौमत्वर्थे। १।४।१९॥ तान्तसान्तौभसंज्ञौस्तोमत्वर्थेप्रत्य
येपरे। वसोःसम्प्रसारणम्। विदुष्मान्। गुणवचनेभ्योमतुपोलुगिष्टः। शुक्लोगुणोस्यास्तिशुक्लः पटः। कृष्णः॥ ९९ दृष्टंज्ञातंममचक्षुर्ममश्रोत्रमि

त्यादिक्रमेणसृष्टं, दृष्टंद्वाराजुष्टंप्रीणितंसेवितंवादत्तंयथायथंविषयेभ्यः रूढिशब्दोयंकथंचिद्व्युत्पादितः। तदस्यास्त्यस्मिन्नितिमतुप्। तदितिप्रथमासमर्थोस्य
पः अस्तीतिपुरुषवचनेअविवक्षितेकालस्तुविवक्षितः। धनेगतेभाविनिवाधनवानयमितिप्रतीत्यभावात्। इतिशब्दोविषयविशेषलाभार्थस्तथाहि। भूमनिंदाप्रशं
सासुनित्ययोगेतिशायने। संसर्गेस्तिविवक्षायांभवंतिमतुबादयः। अस्तिविवक्षायांयेमतुबादयोविधीयंतेतेभूमादिषुविषयेषुभवंतीतिवार्तिकार्थः भूमाबहुत्वंतच्चाप
क्षिकं। यस्यहियावदुचितंतावदेवबहुत्वबोधकबहुशब्देनापिप्रतीयते। यथापंचषाभिरपिगोभिरीश्वरदत्तस्यबह्व्योगावइतिव्यवहारः। ए[...]सहस्रैर्गोभिरपिगावोऽ।
[...]हारः। गोमान्। यवमान्यस्यखार्यादिभिः परिछिन्नायवास्संतिसएवमुच्यते। ननुसहस्रेणापियवैर्यवमानिति। कथंतर्हियवमतीभिरा।

सि॰कौ॰ दृश्यादिह सूत्रे पंचम्या लुक् उदस्थास्तंभोः अवाच्चालंबनेत्यादौ तु प्रकृतिवदित्यातेदेशस्य वैकल्पिकत्वेनाव्ययत्वाभावात्पंचम्या लुङ् न भवतीति बोध्यं। सास्तीति। अव्यया

भमात्रे इति टिलोपः। यद्यपि साक्षाद्दृष्टा रत्नयोर्भवति दाता ग्रहीता उपदृष्टा च। नष्टाषीह संज्ञाग्रहणात्तस्मात्क्षेत्रिशब्देनोपदृष्टैवोच्यते इत्याहुः। क्षेत्रियच्। परक्षेत्रशब्दा

पु॰त॰ त्सप्तम्यंताद्घच् परशब्दस्य लोपश्च निपात्यत इति मनोरमा। अन्ये तु परक्षेत्रे चिकित्स्य इत्यर्थे क्षेत्रियजिति निपात्यते वाक्यार्थे पदवचनं श्रोत्रियवदित्यप्याहुः एवमन्य

७० त्रापूर्त्याः क्षेत्रियो व्याधिरिति। किंच क्षेत्रियं विषं। यत्परशरीरे संक्रमय्य चिकित्स्यते। अपि च क्षेत्रियाणि तृणानि। यानि सस्यानि सस्यार्थक्षेत्रे जातान्यचिकित्स्यानि

विनाशयितव्यानि। किंच क्षेत्रियः पारदारिकः परदाराः परक्षेत्रं तत्र चिकित्स्यो निग्रहीतव्यः। सर्वेप्येते पक्षा आकरे स्थिताः॥ ःः॥ इंद्रियमिंद्र॥ इंद्रशब्दाद्घच् इंद्रेण

ह्रीन्नृपि देव इंद्रलिंगमिंद्रदृष्टमिंद्रसृष्टमिंद्रजुष्टमिंद्रदत्तमिति वा। पा५।२।९३॥ इन्द्र आत्मा तस्य लिंगं करणेन कर्तुरनुमानात् इति करणः प्रकारा

र्थः। इंद्रेण दुर्जयमिन्द्रियम्। तदस्यास्त्यस्मिन्निति मतुप्। पा५।२।९४॥ गावोस्यासन्ति गोमान्॥ भूमनिन्दाप्रशंसासु नित्ययोगेतिशायने॥

सम्बन्धेस्तिविवक्षायां भवन्ति मतुवादयः॥ २॥ रसादिभ्यश्च। पा५।२।९५॥ मतुप्। रसवान्। रूपवान्॥ अन्यमत्वर्थीयनिवृत्त्यर्थं वचनम्। रसरूपव

र्णगन्धस्पर्शशब्दस्नेहगुणात् एकाचः। स्ववान्। गुणग्रहणं रसादीनां विशेषणम्॥ तसौ मत्वर्थे। १।४।१९॥ तान्तसान्तौ भसंज्ञौ स्तो मत्वर्थे प्रत्य

येपरे। वसोस्संप्रसारणं। विदुष्मान्। गुणवचनेभ्यो मतुपो लुगिष्टः। शुक्लो गुणोस्यास्ति शुक्लः पटः। कृष्णः॥ ९९ दृष्टं ज्ञातं मम चक्षुर्मम श्रोत्रमि

त्यादिक्रमेण सृष्टं दृष्टं द्वारा जुष्टं प्रीणितं सेवितं वा दत्तं यथायथं विषयेभ्यः रूढिशब्दोयं कथंचिद्व्युत्पादितः। तदस्यास्त्यस्मिन्निति मतुप्। तदिति प्रथमासमर्थोस्य

पः अस्तीति पुरुषं वक्तुं नु अविवक्षिते कालस्तु विवक्षितः। घने गते भाविनि वा धनवानयमिति प्रतीत्यभावात्। इति शब्दो विषयविशेषलाभार्थस्तथाहि। भूमनिंदाप्रशं

सासु नित्ययोगेतिशायने। संसर्गेस्तिविवक्षायां भवंति मतुवादयः। अस्तिविवक्षायां ये मतुवादयो विधीयंते ते भूमादिषु विषयेषु भवंतीति वार्तिकार्थः। भूमा वहुत्वं तद्व्याप ७०

क्षिकं। यस्य हि यावदुचितं तावदेव बहुत्वबोधकं बहुशब्देनापि प्रतीयते। यथा पंचषाभिरपि गोभिः ईश्वरदत्तस्य वन्नो गाव इति व्यवहारः। न तु सहस्रगोरपि गावो ग।

[illegible] हारः। गोमान्। यवमान्। यस्य खार्यादिभिः परिच्छिन्ना यवास्संति स एवमुच्यते। ननु सहस्रेणापि यवैर्यवमानिति। कथं तर्हि यवमतीभिर।

सि॰कौ॰
टी॰त्र॰
सु॰त॰
७२

धिकभावस्यतन्मूलत्वात्। अयंभावः। विषुवति दिनानांसमतायांजातायामग्रेन्यूनान्यधिकानिचदिनानिभवेयुरितिनानागतदिनवत्त्वंयद्यपिविषुवतिनास्तितथापि
नानागतदिनमूलभूतदिनानांसत्वात्तथोच्यतइति। तथानानागमनवत्वान्मूर्त्तपूर्वपुरुषवस्थितंकिञ्चविषुणशब्देनोच्यते॥ ॥ प्रज्ञाश्रद्धा। प्राज्ञोव्याकरणमि
तिगुणभूतयाक्रिययाकर्मत्वेनसंबंधः कृद्ग्रहणात्तद्धितप्रयोगेषष्ठीन। कृतपूर्वीकटमितिवत्। ननुप्रकर्षेणजानातीतिप्रज्ञः एवप्रज्ञावान्। तथाचप्रज्ञ
वप्राज्ञइत्यपिसिद्धमिष्टं किमत्रप्रज्ञाग्रहणेनेत्याशंकांनिराकुर्वन्नाह इति। स्त्रियांटाप्। प्रज्ञादिभ्यश्चेत्यणितुङीप्स्यादितिभावः। स्नेहस्येति। वार्तिकमिदं
काशिकोक्तं। नातुंदन्तिशब्दः सूत्रेपठितः। विछिन्नस्यप्रतिविधानंवृत्तिः। तपस्वीसहस्रीति। असंतत्वाददंतत्वाच्चसिद्धेपुनर्वचनमण्बाधामाभूदिति। सहस्राट्ठनो

प्रज्ञाश्रद्धार्चाभ्योणः। ५।२।१०१॥ प्राज्ञोव्याकरणम्। प्राज्ञा। श्राद्धः। आर्चः। वृत्तेश्च वार्तिकं। तपःसहस्राभ्यांविनीनी। ५।२।१०२॥ विनीन्योरिकारोनकारप
रित्राणार्थः। तपस्वी। सहस्री। असन्तत्वाददन्तत्वाच्चसिद्धेपुनर्वचनमण्बाधामाभूदिति। सहस्रात्तुठनोपिबाधनार्थम्। अण्च। ५।२।१०३॥
योगविभागउत्तरार्थः। तापसः। साहस्रः। ज्योत्स्नादिभ्यउपसंख्यानम्॥ ज्योत्स्नः। तामिस्रः॥ सिकताशर्कराभ्यांच॥ ५।२।१०४॥ सैकतोघटः। शा
र्करः॥ देशेलुबिलचौच। ५।२।१०५॥ चादण्मतुप्च। सिकतास्सन्त्यस्मिन्देशे सिकताः। सिकतिलः। सैकतः। सिकतावान्। एवंशर्करेत्यादि। दन्त
उन्नतउरच्। ५।२।१०६। उन्नताद्दन्ताः सन्त्यस्य दन्तुरः॥ ॥ ११ पिबाधनार्थं। एतच्चसमाधानंमूलपुस्तकेष्वपिक्वचिद्दृश्यते। उत्तरार्थइति। विनीन्योर्यथा

संख्यप्रवृत्त्यर्थश्चेत्यपिबोध्यं। ज्योत्स्नइति। शुक्लपक्षः। तामिस्रइति। कृष्णपक्षः नरकविशेषश्च। तमःसमूहस्तमिस्रं ज्योत्स्नातमिस्रेतिनिपातनात्मत्वर्थीयोरस्तत्रत्यवयव
भूतानितमांसिविद्यन्तेतदस्मिन्नस्तीतिविग्रहेऽणं तादृणा तमिस्रातामसीरात्रिर्ज्यौत्स्नीचंद्रिकयान्वितेत्यमरोक्तौतुतमिस्रेत्येतद्रूपं तेनलक्षणतमिस्रितस्विरोधः। एवंचतमि
स्राशब्दत्रयोऽस्मिन्संतितामिस्रः पक्षइत्यपिव्याख्यातुंशक्यः। सिकताशर्क। देशविशेषस्यवक्ष्यमाणत्वादाह। घटइति मतुप्चेति। अन्यतरस्यांग्रहणेनसर्वत्रम
तुपःसमुच्चयादितिभावः। सिकताइति। लुपियुक्तवद्भावः अत्रसूत्रद्वयस्योदाहरणान्यमरः संजग्राह। स्त्रीशर्करा शार्करिलः शार्करः शर्करावति। देशएवाद्विमावेवमुन्नेया
स्सिकतावतीति। दन्तउन्नत। उन्नतइति किं। दंतवान्॥ ॥

पार्षदकृतिरेषा तत्रभवतां सर्ववेदपार्षदं हीदं शास्त्रमिति च। भदिरत्नाहा। पर्षद्वलान्महाप्रसैराटनैकटिकाश्रमानिति। पर्षदेषा दशावरेति मनुः॥ ॐ॥ भ्रातृवल इति वले इत्यत्र णग्रहणानुवृत्तेर्नेह दीर्घः। पुत्रवलादौ तु स्यात्त्राह संज्ञायामित्यनुवृत्तेरिति। वनगिर्योरिति सूत्रादिति भावः। ज्योत्स्ना चन्द्रप्रभा तत्रावयवीभूतं ज्योतिरस्तीति मत्वर्थीयोपपत्तिः। एतेन तमस्समूहे तमिस्राशब्दो व्याख्यातः। निघण्टुषु तमःपर्यायस्तमिस्रशब्दः पठितस्तत्र समूहसमूहिनोरभेदोपचार इति हरदत्तः। स्त्रीत्वमतंत्रमिति व्याख्यानमत्र शरणम्। ऊर्जस्विन्नो मिन्नित्यत्र नान्तत्वाभिव्यक्तये नलोपो न कृतः। अत इनिठनौ। तपरकरणं किं। खट्वावान्। एकाक्षरात्कृतो जा

भ्रातृवलः। पुत्रवलः। शत्रुवलः। वल इत्यत्र संज्ञायामित्यनुवृत्तेर्नेह दीर्घः॥ दन्तशिखात्संज्ञायाम्। ५।२।११३॥ दन्तावलो हस्ती। शिखावलः केकी। ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः। ५।२।११४॥ मत्वर्थे निपात्यन्ते। ज्योतिष उपधालोपो नश्च प्रत्ययः। ज्योत्स्ना। तमस उपधाया इत्वं रश्च। तमिस्रा। स्त्रीत्वमतन्त्रम्। तमिस्रं। शृङ्गादिनच्। शृङ्गिणः। ऊर्जसो वलच्। तेन वा धा मा भूदिति विनिरपि। ऊर्जस्वी। ऊर्जस्वलः। ऊर्जोऽसुगागम इति वृत्तिस्तु चिन्त्या। ऊर्जस्वतीति वदसुन्नन्तेनैवोपपत्तेः। गोशब्दान्मिनिः। गोमी। मलशब्दादिनच्। मलिनः। ईमसच्च। मलीमसः। अत इनिठनौ। ५।२।११५॥ दण्डी। दण्डिकः॥ व्रीह्यादिभ्यश्च। ५।२।११६॥ व्रीही। व्रीहिकः। न च सर्वेभ्यो व्रीह्यादिभ्य इनिठनाविष्येते किन्तर्हि शिखामालासंज्ञादिभ्य इनिः। यवखदादिभ्य इकः॥ अन्येभ्य उभयम्। तुन्दादिभ्य इलच्च। ५।२।११७॥ चादिनिठनौ मतुप् च। तुन्दिलः। तुन्दी। तुन्दिकः। तुन्दवान्। उदर पिचण्ड यव व्रीहि। स्वाङ्गाद्विवृद्धौ। विवृद्ध्युपाधिकात्स्वाङ्गवाचिन इलजादयः स्युः। विवृद्धौ कर्णावस्य स कर्णिलः। कर्णी। कर्णिकः। कर्णवान्॥ एकगोपूर्वाट्ठञ् नित्यम्। ५।२।११८॥ एकशतमस्यास्तीत्यैकशतिकः। ऐकसहस्रिकः। गौशतिकः। गौसहस्रिकः। शतसहस्रान्ताच्च निष्कात्। ५।२।११९॥ निष्कात्परौ यौ शतसहस्रशब्दौ तदन्तात्प्रातिपदिकाट्ठञ् स्यान्मत्वर्थे। नैष्कशतिकः

तेः सप्तम्यां च नतौ स्मृतौ। स्ववान् कृतः कारकवान्। जातेः व्याघ्रवान्। सप्तम्यां दण्डाः अस्यां सन्तीति दण्डवती शाला। तदस्यास्तीति सूत्रस्येति करणो विषयनियमार्थः सर्वत्रापि संबध्यत इति। क्वचित्कृतोपि भवति कार्यी कार्यिकः क्वचित्तु जातेरपि। तण्डुली तण्डुलिकः एतच्च काशिकादौ स्पष्टं। तुन्दादिभ्य इलच्च। अन्यतरस्यामित्यनुवर्तनादाह

॥

मनुश्चेति। अत्र स्वांगात् विवृद्धाविति पठ्यते विवृद्ध्युपाधिकात्स्वांगवाचिन इत्वजादयः स्युः विवृद्धौ कर्णौ यस्य कर्णिलः कर्णी कर्णिकः। कर्णवान्। एकगोपूर्वात्। एकशत
कं इति। एकं च तच्छतं चेति पूर्वकालेत्यादिना कर्मधारयः। षष्ठीतत्पुरुषाद्बहुव्रीहेर्द्वन्द्वाच्च न भवत्यनभिधानादिति हरदत्तादयः। अतद्... एकविंशतिर
स्यास्तीति। नित्यग्रहणं मतुपो बाधनार्थं। अन्यथा ठञ् इनिठनौ वा घेतां तेऽप्यन्यतरस्यांग्रहणानुवृत्त्या मतुप्यापादयेत्याहुः। कथमेकद्रव्यवानिति। असाधुरेवायं
एकेन द्रव्यवानिति वा विग्रहीतव्यम्। कथमेकदंडी इति। एकदेशिनैकाधिकरण इति निर्देशो ज्ञापयति इनिरपि क्वचिद्भवतीति॥ ॐ॥ रूपादाहत। आह

रूपादाहतप्रशंसयोर्यप्॥ ५।२।१२०॥ आहतं प्रशस्तं वा रूपमस्यास्तीति रूप्यः कार्षापणः। प्रशस्तं रूपमस्यास्तीति रूप्यो गौः। आहतेति किम्। रूपवान्। अन्ये
भ्योऽपि दृश्यते। हिम्याः पर्वताः। गुण्याः ब्राह्मणाः। अस्मायामेधास्रजो विनिः॥ ५।२।१२१॥ यशस्वी। यशस्वान्। मायावी। व्रीह्यादिपाठादिनिठनौ। मा
यी। मायिकः। क्विन्नन्तत्वात्कुः। स्रग्वी। आमयस्योपसंख्यानं दीर्घश्च। आमयावी। शृङ्गवृन्दाभ्यामारकन्॥ शृङ्गारकः। वृन्दारकः। फलबर्हाभ्यामिन
च्। फलिनः। बर्हिणः। हृदयाच्चालुरन्यतरस्याम्। इनठनौ मतुप् च। हृदयालुः। हृदयी। हृदयिकः। हृदयवान्। शीतोष्णतृप्रेभ्यस्तदसहने॥ शीत
न्न सहते शीतालुः। उष्णालुः। स्फायितञ्चीति रक्। तृप्रः पुरोडाशः तन्न सहते तृप्रालुः। तृप्रं दुःखमिति माधवः। हिमाच्चेलुः॥ हिमं न सहते हिमेलुः। ब
लाच्चूलः॥ बलं न सहते बलूलः। वातात्समूहे च। वातं न सहते वातस्य समूहो वा वातूलः। तप्पर्वमरुद्भ्याम्। पर्वतः। मरुत्तः। ऊर्णाया युस्॥ ५।२।१२३॥
सित्वात्पदत्वम्। ऊर्णायुः। अत्र छन्दसीति केचिदनुवर्तयन्ति। युक्तं चैतत्। अन्यथा हि। अहंशुभमोरित्यत्रैवोर्णायुग्रहणं कुर्यात्॥ ॥

तत्प्रशंसाविशिष्टेऽर्थे वर्तमानाद्रूपशब्दान्मत्वर्थे यप् स्यात्। आहतमिति। आहननमाहतं ताडनमित्यर्थः। ततो निष्पन्नं यत्कार्षापणादिरूपं तदपि कार्यकारणयोरुपचा
रादाहतमित्युच्यते। इत्याहतरूपयोः सामानाधिकरण्यमुपपद्यते। हिम्या इति। भूम्नि यप्। पर्वता इति। हिमवान् तत्पर्यन्तवर्तिनश्च। गुण्या इति। दक्षिणग्रहणादि
निरूपितत्वाच्च माघः। गुण्य गुण्य इति न व्यजीगणन्नाम। गु...ऽगुण्य इति पदच्छेदः। अस्मायामेधा। यशस्वीति। तसौ मत्वर्थ इति भत्वाद्रुत्वं न। यशस्वानिति। नित्यग्रहणा
न्पूर्वत्रासंबद्धमप्यन्यतरस्यांग्रहणं मतुप्समुच्चयार्थमिह संबध्यते। यशस्वान्। तसौ मत्वर्थ इति सूत्रे यशस्वी यशस्वानिति भाष्योदाहरणादिति भावः। चोः कुरित्यनेन न सिद्धं व्रश्चादि

षत्वमाशंक्याह। क्विन्नंतत्वादिति। त्वदयाद्यालुरन्यतरस्यां। अन्यतरस्यांग्रहणं इनिठनोः प्राप्त्यर्थमंतुपसर्वत्रसमुच्चीयत एवा चकारस्य चुटू इतीत्संज्ञा। तेनत्वदयालु शब्दोंतोदात्तइत्याहुः। शीतोष्णेति। इहचालुरनुवर्तते। पुरोडाशइति नतु प्राउरूव्यचेसमितिमंत्रस्य भाष्ये तथाव्याख्यानत्वादितिभावः माधवइति। सुवधातुश्च्यौस्थि तमिदं। हिमाच्चेलुरिति। एकारादिरयं प्रत्ययइतिमाघवः। वलादिति। सिध्मादिषुवलुल वातूलशब्दौमत्वर्थप्रकारांतरेण व्युत्पादितौ तप्पूर्वमरुड्या। पित्वमपुदा त्तत्वार्थं। काशिकायांतुपर्वमरुद्भ्यां तन्वक्तव्यइतिस्थितं। हरदत्तेनतु तन्निति प्रतीकमुपादाय आद्युदात्तत्वार्थोनकारइत्युक्तं। तच्चमनोरमायामहतात्प्रबंधेन दूषितं

वाचोग्मिनिः। ५। २। १२४॥ वाग्मी। आलजाटचौबहुभाषिणि। ५। २। १२५॥ कुत्सितइतिवक्तव्यम्॥ कुत्सितंबहुभाषतेवाचालः वाचाटः। यस्तुसम्यग्बहुभाषतेसवाग्मीत्येव। स्वामिन्नैश्वर्ये। ५। २। १२६॥ ऐश्वर्यवाचकात्स्वशब्दान्मत्वर्थे आमिनच्॥ स्वामी॥

नैर्निराकृतं। ततएवतत्स्वधार्ये। पदंत्वमिति। तेनयस्येतिचेतिलोपोनप्रवर्त्ततइतिभावः। अनुवर्त्तयतीति। बहुलंछंदसीत्यतः॥ ॥ वाचोग्मिनिः। इकारोन कारपरित्राणार्थः। नकारस्यकुत्वेजश्त्वेचवाग्मीवाग्मिनावित्यादौ द्वयोर्गकारयोः श्रवणं भवति। हित्वेतुत्रयाणामिनिरस्युक्तेजुहित्वेसति द्वयोर्गकारयोः श्रवणं हि त्वाभावेत्वेकस्यैवश्रवणंस्यात्। किंचयरोनुनासिके प्रत्ययेभाषायां नित्यमितिवाच्यमित्यत्रेवनित्यमनुनासिकः प्राप्नोति। तच्चानिष्टमितिग्मिनिकृतः। स्वामि न्नैश्वर्ये। ऐश्वर्यवाचकादिति। स्वशब्दस्यैश्वर्यवाचित्वमेतद्वृत्तिविषयकमेवेतिबोध्यं। ईशितोहिईश्वरः सतुस्वामीत्युच्यते। यथावागीशएववाचस्पतिर्वाचः स्वा मीति। ऐश्वर्येकिं। स्ववान्॥

अर्श आदिभ्योऽच् । ... हस्ता ... द्वीनादिति गणे पठ्यते । खंजः पादोऽस्यास्तीति खंजः । काणं चक्षुरस्यास्तीति काणः । प्रथिमिनीति । पृथ्व्यादिभ्य इमनिज्वेति टिलोपः । रश्म
नरेति रभावः । अन्निनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्त ___ विधिं प्रयोजयन्तीति मन्नन्तादिनौ कृते नस्तद्धित इति टिलोपे नांतत्वात् ङीप् । दामिनीति दाधातो
अर्श आदिभ्योऽच् । पा । ५ । २ । १२७ ॥ अर्शांस्यस्य विद्यन्ते अर्शसः । आकृतिगणोऽयम् ॥ द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः । पा । ५ । २ । १२८ ॥ द्वन्द्वी । कटकव
लयिनी । शंखनूपुरिणी । उपतापो रोगः । कुष्ठी । विलासी । गर्ह्यं निन्द्यम् । ककुदावर्त्ती । काकतालुकी । प्राणिस्थात्किं । पुष्पफलवान् घटः । प्राण्य
ङ्गान्न । पाणिपादवती । अत इत्येव । चित्रकललाटिकावती । सिद्धे प्रत्यये पुनर्वचनं ठनादिबाधनार्थम् ॥ वातातीसाराभ्यां कुक् च । पा । ५ । २ । १२९ ॥ चादि
निः । वातकी । अतीसारकी । रोगे चायमिष्यते नेह । वातवती गुहा । पिशाचाच्च । पिशाचकी । वयसि पूरणात् । पा । ५ । २ । १३० ॥ पूरणप्रत्ययान्तान्मत्वर्थे
इनिः स्याद्वयसि द्योत्ये । मासः संवत्सरो वा पञ्चमोऽस्यास्तीति पञ्चमी उष्ट्रः । ठन्बाधनार्थमिदं । वयसि किम् । पञ्चमवान् ग्रामः । सुखादिभ्यश्च । पा । ५ ।
१३१ ॥ इनिर्मत्वर्थे । सुखी । दुःखी । मालाक्षेपे । माली ॥ धर्मशीलवर्णान्ताच्च । पा । ५ । २ । १३२ ॥ धर्माद्यन्तादिनिर्मत्वर्थे । ब्राह्मणधर्मी । ब्राह्मणशी
ली । ब्राह्मणवर्णी । हस्ताज्जातौ । पा । ५ । २ । १३३ ॥ हस्ती । जातौ किम् । हस्तवान्पुरुषः । वर्णाद्ब्रह्मचारिणि । पा । ५ । २ । १३४ ॥ वर्णी । पुष्करादिभ्यो देशे ॥
। पा । ५ । २ । १३५ ॥ पुष्करिणी । पद्मिनी । देशे किम् । पुष्करवान् करी । बाहूरुपूर्वपदाद्बलात् ॥ बाहुबली । ऊरुबली । सर्वादेश्च । सर्वधनी । सर्ववी
जी । अर्थाच्चासन्निहिते ॥ अर्थी । सन्निहिते तु अर्थवान् । तदन्ताच्च । धान्यार्थी । हिरण्यार्थी । बलादिभ्यो मतुबन्यतरस्याम् । पा । ५ । २ । १३६ ॥
बलवान् । बली । उत्साहवान् । उत्साही । संज्ञायां मन्माभ्याम् । पा । ५ । २ । १३७ ॥ मन्नन्तान्मान्ताच्च इनिर्मत्वर्थे । प्रथिमिनी । दामिनी । होमिनी । सोमि
मनिन । होमिनी । सोमिनीति । अर्तिस्तुसुहुसृधृक्षीत्यौणादिकेन मनिनित्वा होमसोमशब्दौ मन्प्रत्ययान्तौ । ___ ९ नी । संज्ञायां किम् । सोमवान् ॥

कंशंभ्यां।पदत्वार्थ इति।अन्यथाकँम्युः इतिस्यादितिभावः।वकारयकारपरस्येति।वहुव्रीहिरयं।अनुनासिकौ वयाविति।एतेन प्रथमप्रत्ययः दंत्योष्ठ्यादिर्न तु पवर्गीत
ीय इतिध्वनितं।माघवइति।तुडितोडन इतिधातौतेनोक्तं।वृद्धानाभिसुंडिः इत्ना।तुंडिरस्यास्तीतितुंडिलः।तुंदादिभ्य इलच्चेत्यत्रसांगाद्विवृद्धाविति गणसूत्रेण इल
चा तुंडिल एवतुंडिभः।तुंडिवलिवटेर्भ इतिमत्वर्थीयोभ इति।वटिभ इति।वटवेष्टने इत्नवटिशब्दः पामादिषुपठ्यते तेनवठिन इत्यपिभवति।अहंयुः शुभंयु
रिति।पूर्ववदनुस्वारपरसवर्णौ।इतिमत्वर्थीयाः।किंसर्वनाम।द्व्यादिपर्युदासात्किमः पृथग्ग्रहणं।द्व्यादिषुकिम् शब्दपाठे प्रयोजनंतुत्वंचकश्चकौ।अहंचक

कंशंभ्यांवभयुस्तितुतयसः।५।२।१३८॥ कंशमितिमान्तौ कमित्युदकसुखयोः शमितिसुखे।आभ्यांसप्तप्रत्ययाः स्युः युसयसोः सकारः प
दत्वार्थः।कम्वः।कम्भः।कंयुः कन्तिः कन्तुः कन्तः।कंयः।शम्वः।शम्भः।शंयुः शन्तिः शन्तुः।शन्तः।शंयः अनुस्वारस्यवैकल्पिकः प
रसवर्णः।वकारयकारपरस्यानुनासिकौ वयौ।तुन्दिवलिवटेर्भः।५।२।१३९॥ वृद्धानाभिस्तुन्दिः।मूर्द्धन्योपधोयमितिमाधवः।तुन्दिभः।वलि
भः।वटिभः।नाना।इत्वाद्धलिनेति।अहंशुभमोर्युस्।५।२।१४०॥ अहमितिमान्तमव्ययमहङ्कारे।शुभमितिशुभे।अहंयुः अहङ्कारवान्॥
शुभंयुः शुभान्वितः॥ ॥ इतिमत्वर्थीयाः॥ प्राग्दिशोविभक्तिः।५।३।१॥ दिक्शब्देभ्य इत्यतः प्रागवक्ष्यमाणाः प्रत्ययाविभक्तिसं
ज्ञास्युः अपत्स्वार्थिकाः प्रत्ययाः। समर्थानामितिप्रथमादितित्रिवृत्तम्। वेतित्वनुवर्त्तत एव।किंसर्वनामवहुभ्योऽद्व्यादिभ्यः।५।३।
।२॥किमस्सर्वनाम्नोवहुशब्दाच्चेतिप्राग्दिशोऽधिक्रियते॥ इदमइश्।५।३।३॥ प्राग्दिशीयेपरे।एतेतौरथोः।५।३।४॥ इदम्शब्दस्य एत इत
इत्यादेशौस्तो रेफादौ थकारादौ च प्राग्दिशीये परे।इशोपवादः।एतदोऽन्।५।३।५॥ योगविभागः कर्त्तव्यः।एतदः।एतेतौस्तोरथोः।अन्।एतदइत्येवा।अ
नेकाल्त्वात्सर्वादेशः।नलोपः प्रातिपदिकान्तस्य।सर्वस्यसोऽन्यतरस्यान्दि।५।३।६॥ प्राग्दिशीये दकारादौ प्रत्यये परे सर्वस्य सो वास्यात्।पञ्चम्यास्तसि
ल्।५।३।७॥ पञ्चम्यन्तेभ्यः किमादिभ्यस्तसिल्स्याद्वा॥ ॥ ((श्चकौ इत्यत्र किमः शेषः।त्यदादीनां मिथः सहोक्तौ यत्परंतच्छिष्यत इत्युक्तत्वात्।एत
दोन्।अभ्याहृढोयंपाठः।वृत्तिकारस्तु एतदोऽश्।इतिपठित्वा शकारः सर्वादेशार्थ इत्याह।अनिशि प्राग्दिशीयेपरे अन्स्यात्।अनेकाल्त्वादितिनिर्णयकरणस्यप्रयो

॥ मरु॥ पक्षे अस्मात्। अनः इति ॥ ३

एतदः। नादेशः। अनुत इति। अदसो मेरिति मुत्वम्। पक्षे अमुष्मात्। बहुतः इति। पक्षे बहुभ्यः। द्वाभ्याम्। [illegible] सर्वनामत्वात्। प्रातिपदिकत्वात् तसिल्। अद्यादिभ्य इति [illegible] युद्दाम्‌ त्यात् तसे
रिति। यतियोगे पंचम्यास्तसिः। अपादाने चाहीयरुहोरिति विहित स्यात् तसेस्तसिलादेशः। इत्यर्थः। विभक्त्यर्थे चेति। अन्यथा परत्वात् तसौ क्रतेन [illegible] प्रादिशीय [illegible] हि भ
कृति हः। वकारादिकारउच्चारणार्थः। वेन्नुरुतेः फलं दर्शयति। कस्मादिति। यतस्ततः इति हस्तहितेति प्रातिपदिकत्वात् सुपो लुकित्यादाबत्वं। पक्षे यस्मात्। तस्मात्। इत इति। इद

कुतिहोः। ७।२।१०४॥ किमः कुस्यात् तादौ हादौ च विभक्तौ परतः। कुतः। कस्मात्। यतः। ततः। अतः। इतः। अमुतः। बहुतः। द्व्यादेस्तु द्वाभ्यां। तसेश्चा। ५।३।
८॥ किंसर्वनामबहुभ्यः परस्य तसेस्तसिलादेशः स्यात्। स्वार्थे विभक्त्यर्थे च वचनं। पर्यभिभ्यां च। ५।३।९॥ आभ्यां तसिल् स्यात्। सर्वोभयार्था
भ्यामेव। परितः। सर्वत इत्यर्थः। अभितः। उभयत इत्यर्थः। सप्तम्यास्त्रल्। ५।३।१०॥ कुत्र। यत्र। तत्र। बहुत्र। इदमो हः। ५।३।११॥ त्रलोपवाद इशादे
शः। इह। किमोऽत्। ५।३।१२॥ वाग्रहणमपकृष्यते। सप्तम्यन्तात् किमोऽद्वा स्यात् पक्षे त्रल्। अत्‌ इति। ७।२।१०५॥ किमः क्वादेशः स्यात् इति। क्व। कुत्र। वा
ह च छन्दसि। कुहस्थः। कुह जग्मथुः॥ एतदस्त्र तसोस्त्रतसौ चानुदात्तौ। ५।४।३३॥ अन्वादेशविषये एतदोऽश्स्यात् तौ चानुदात्तौ त्रतसोः परतः
तौ चानुदात्तौ तसः। एतस्मिन् ग्रामे सुखम्वसामः अथो अत्राधीमहे अतो न गन्तास्मः। इतराभ्योऽपि दृश्यन्ते। ५।३।१४॥ पञ्चमीसप्तमीतरविभक्त्यन्तादपि
तसिलादयो दृश्यन्ते। दृशि ग्रहणाद्भवदादियोग एव। स भवान्। ततो भवान्। तत्र भवान्। तम्भवन्तम्। ततो भवन्तम्। तत्र भवन्तम्। एवं दीर्घायुः।
देवानांप्रियः। आयुष्मान्। सर्वैकान्यकिंयत्तदः काले दा। ५।३।१५॥ सप्तम्यन्तेभ्य एभ्यः कालार्थेभ्यो दा स्यात्। सर्वस्मिन् काले सदा। सर्वदा। एकदा।
अन्यदा। कदा। तदा। काले किं। सर्वत्र देशे॥ इदमो र्हिल्। ५।३।१६॥ सप्तम्यन्तात् काले इत्येव। हस्यापवादः। अस्मिन् काले एतर्हि। काले किं। इह देशे।

किंसंज्ञायां अभावात् उदाहृत्वाभावे यत्तोः वगच्छतीत्यादि न सिध्येदिति भावः। ननु तसेः प्रामतरत्यादौ चरितार्थत्वात् किमादिभ्यस्तसिलोभाध्यत्वेन तसिर्न भवेत्स्यानिर
वकाशत्वात्तथा च तसेश्चेति विधानं व्यर्थमिति चेन्। कुतो वहीयते कुतो न रोह ची्यादौ तसिलं सावकाशत्वात्। सर्वोभयार्थाभ्यामेवेति। अत्र चाभिधानस्था

भाव्यं हेतुस्तेनेह न भवति परिषिंचति। अभिषिंचति। उपर्यर्थे परि रभिस्त्वाभिमुख्ये। अन्वारनं परिषिंचतीत्यत्र सर्वतोभावे परिरिति तत्सिलभावः कथमिति चे
न्नैवं। वावचनानुवृत्त्या तत्सिद्धेः। सप्तम्यास्त्रल्। इह त्रल्तसिलौ स्वतंत्रौ प्रत्ययौ न तु सप्तमीपंचम्योरादेशौ। तेन कुत्र बहुत्र कुतः बहुत इत्यादौ अच्च घेर्ङेर्ङि
तीत्यादिकं नेत्याहुः। किमोत्। न विभक्तौ तु स्मादिति निषेधोत्र न प्रवर्तते। थमो रुकारे ण मकारपरित्राणार्थेनानित्यत्वज्ञापनात्। बाग्रहणमिति। किमोद्धेति सू
त्रे पठितस्याहश्चवंदसीति सूत्रयितुं युक्तं। कुत्रेति। यद्यपि भाग वृत्तिकारो भाषायां त्रलं नेच्छति तथापि बहुप्रयोगदर्शनादिह स्वीकृतं। तथा च श्रीहर्षः। नान्यत्र
कुत्रापि च साभिलाषं। अमरश्चाह साहचर्यायत्र कुत्रचिदिति। वाह च छंदसि पूर्वोक्तस्य वाग्रहणापकर्षणस्य स्फुटीकरणार्थमिदमुपन्यस्तं। अत इति। एतस्मा

अधुना। ५। ३। १७॥ इदमः सप्तम्यन्तात्कालवाचिनः स्वार्थेऽधुनाप्रत्ययस्यात्। इश्। यस्येति लोपः। अधुना। दानीं च। ५। ३। १८॥ इदानीम्।
तदो दा च। ५। ३। १९॥ तदा। तदानीं। तदो दा वचनमनर्थकं विहितत्वात्। अनद्यतने र्हिलन्यतरस्याम्। ५। ३। २१॥ कर्हि। कदा। यर्हि। यदा।
तर्हि। तदा। एतस्मिन्काले एतर्हि। सद्यः परुत्परार्यैषमः परेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः। ५। ३।
२२॥ एते निपात्यन्ते। समानस्य सभावो द्यस् चाहनि॥ समानेऽहनि सद्यः। पूर्वपूर्वतरयोः परः उदारी च संवत्सरे॥ पूर्वस्मिन्वत्सरे परुत्।
पूर्वतरे वत्सरे परारि। इदम इश्समसण् प्रत्ययश्च संवत्सरे॥ अस्मिन्संवत्सरे ऐषमः। परस्मादेद्यव्यहनि॥ परस्मिन्नहनि परेद्यवि। इदमो
ऽश्भावो द्यश्च। अस्मिन्नहनि अद्य। पूर्वादिभ्योऽष्टभ्योऽहन्येद्युस्। पूर्वस्मिन्नहनि पूर्वेद्युः। अन्यस्मिन्नहनि अन्येद्युः। उभयोरह्नोरुभयेद्युः द्युश्चोभया
। द्युत्व्यः। उभयद्युः।

त्। ग्रामादित्यर्थः। तत्रभवंतमिति। ततो भवन्तात्। तत्रभवतां। ततो भवते। तत्रभवते इत्यादि। एवमिति। ततो दीर्घायुस्तत्र दीर्घायु॥ ८ ॥ अधुना प्रत्यय इति। निपातना
युरित्याद्युदात्तमित्यर्थः। सदेति। सर्वस्य सोऽन्यतरस्यां दीति सभावः। कदेति। किमः कः। एतर्हीति। एतेतौ रथोरित्येतादेशः॥ ८ ॥ अधुना प्रत्यय इति। निपातना
न्मध्योदात्तोऽयं। भाष्यमतं चेदं। वृत्तिकारस्त्वाह। इदमो अश्भावः। धुना च प्रत्यय इति। तत्र उङ्क्विदमित्यादिना विभक्तिस्वरः सचादेः परिस्यादेमेवमीतिह
रेदत्तः। दाबुचनमिति। तद श्चेत्येव सूत्रं पठनीयमिति भावः। एतस्मिन्काले एतर्हीति। एतदिति योगविभागादेतादेशः। सद्यः परुत्निपातनाद्विष

सि॰ को॰
टी॰ त॰
सु॰ न॰
७७

अत्र बलस्स्यतोऽस्वं भूता ख्याने त्यादि सौत्रप्रयोगो लिंगं। एतेन कथं भूतो व्याख्यातः। इत्थमिति। एतेनैरथोरिति इदमर्थात्रेशः एतदर्थ इति योगविभागादेतदोपि इना
देश इति भावः। दिक्शब्द। योगविभागः। थाहेतौ चच्छन्दसीत्युत्तरसूत्रे कि मएवानुवृत्तिर्यथा स्यादिदमो मा भूदिति। प्राग्दिशीयानां पूर्णोवधिः॥ दिग्देशकालेष्वि
ति। यथासंख्यमत्र नेष्यते। अस्वरितत्वात्। पुरःपुरस्तादिति। कथं तर्हि पश्यामि तावन्नितरतः पुरस्तश्च पश्चादिति भवभूतिः स्यात्पुरः पुरतोऽग्रतः इत्यमरः। पुरतः
प्रथमेवाये इति विश्वश्च। समानकालीनं पूर्वकालीनमित्यादिवत्प्रामादिकमेवेति बहवः। केचित्तु दक्षिणोत्तराभ्यां तसुच् विधिनैवेष्टसिद्धौ अतसुजित्यका
रोच्चारणमन्यतोपि विधानार्थं तेन पुरत इति सिध्यति। पुर अग्रगमने क्विपि पुरः वौरिति दीर्घस्तु न भवति भत्वात्। न चातसुचश्चित्वेप्यकारोच्चार्य लपसे आद्यु

प्राच्यां प्राच्याः प्राची वा दिक्। प्राक्। उदक्। एवं देशे काले च। उपर्युपरिष्टात्। ५।३।३१॥ अस्तातेर्विषये। ऊर्ध्वशब्दस्योपादेशः स्यात् रिल् रिष्टा
तिलौ च प्रत्ययौ। उपरि। उपरिष्टाद्वा वसति आगतो रमणीयं वा। पश्चात्। ५।३।३२॥ अपरस्य पश्चभावः आति च प्रत्यये अस्तातेर्विषये। उत्त
राधरदक्षिणादातिः। ५।३।३४॥ उत्तरात्। अधरात्। दक्षिणात्। एनबन्यतरस्यामदूरेऽपञ्चम्याः। ५।३।३५॥ उत्तरादिभ्य एनब्वा स्यादवध्यवधिमतोः सामीप्ये
पञ्चमीं विना। उत्तरेण। अधरेण। दक्षिणेन। पक्षे यथास्वं प्रत्ययाः। इह केचिदुत्तरादीननुवर्त्य दिक्शब्दमात्रादेनपमाहुः। पूर्वेण ग्रामम्। अप
रेण ग्रामम्। दक्षिणादाच्। ५।३।३६॥ अस्तातेर्विषये। दक्षिणस्यां दिशि अपञ्चम्या इत्येव। दक्षिणा दागतः॥ आहि च दूरे। ५।३।३७॥ दक्षिणादूरे आ
हिः स्यात् चादाच्। दक्षिणाहि। दक्षिणा। उत्तराच्च। ५।३।३८॥ उत्तराहि। उत्तरा॥ ॥ ८८ दात्तस्वार्थमिति वाच्यं। बहूनां प्रयोगानुरोधेनाप्र

न्यतोपि विधानार्थमिति कल्पनस्यैवं न्याय्यत्वादित्याहुः। यथासंख्यत्वानाश्रयणात् पुरस्ताद्वसति पुरस्तादागतः पुरस्ताद्रमणीयं। अधस्ताद्वसति अधस्तादागत इत्यादि सि
ध्यति॥ ८८॥ प्राच्यां प्राच्या इति। प्राच्यां दिशि वसति प्राग्वसति। प्राच्या दिशः आगतः प्रागागत इत्यादि योज्यं। पंचम्यंतं विनेति। नेह उत्तराद्ग्रामादागतः। अधरादागतः
उत्तरेणेत्यादि। वसति रमणीयं वा पक्षे यथास्वमिति। दक्षिणतः। उत्तरतः। अधः। अधस्तात्। उत्तरात्। अधरात्। दक्षिणात्।

संख्याया विधार्थे धा। विधाशब्दस्यार्थो विधार्थः। यद्यप्योदनप्रकारोपि विधाशब्देनोच्यते तथापीह न गृह्यते। तेन एकौदनो गौदनो वा भवति। इह द्विविधा यामिति वक्तव्ये अर्थ
ग्रहणस्य प्रयोजनं विधाशब्दो यत्रार्थे प्रसिद्धतरस्तत्रैव यथा स्यात् तेनादगृह्यार्थः प्रकार एव स च क्रियाविषयक एव गृह्यते अभिधानस्वभावान्नेतरः॥ क्रियाप्रकारे वर्तमाना
दिति। कथं तर्हि नवधा द्रव्यं बहुधा गुणा इत्यादि। अत्रापि त्यभ्रुता क्रिया प्रतीयते उपदिश्यत इति वा भवतीति वेति हरदत्तः। अधिकरणविचाले च। अधिकरणं द्रव्यं वि
चालनं विचालः अन्यथाकरणमिति जैनेन्द्रः। तच्चेह संख्यासन्निधानात्संख्यान्तरापादनमित्याचष्टे। द्रव्यस्येत्यादिना। संख्यान्तरापादने हि एकस्यानेकीकरणं

संख्याया विधार्थे धा। ५।३।४२॥ क्रियाप्रकारार्थे वर्तमानात्संख्यावाचकात्स्वार्थे धा स्यात्। चतुर्धा। पञ्चधा। अधिकरणविचाले च। ५।३।४३॥ द्र
व्यस्य संख्यान्तरापादने संख्याया धा स्यात्। एकं राशिं पञ्चधा कुरु। एकाद्धो ध्यमुञन्यतरस्याम्। ५।३।४४॥ ऐकध्यम्। एकधा। द्वित्र्योश्च धमुञ्।
५।३।४५॥ आभ्यां धा इत्यस्य धमुञ् स्याद्वा। द्वैधम्। द्विधा। त्रैधम्। त्रिधा। धमुञन्तात्स्वार्थे डदर्शनम्। पथि द्वैधानि तृणानि। एधाच्च। ५।३।४६॥
द्वेधा। त्रेधा। याप्ये पाशप्। ५।३।४७॥ कुत्सितो भिषक् भिषक्पाशः। पूरणाद्भागे तीयादन्। ५।३।४८॥ द्वितीयो भागो द्वितीयः। तृतीयः। स्वरे वि
शेषः। तीयादीकक् स्वार्थे वा वाच्यः। द्वैतीयीकः। द्वितीयः। तार्तीयीकः। तृतीयः। न विद्यायाः। द्वितीया। तृतीया। विद्येत्येव। प्रागेकादशभ्योऽछन्द
सि। ५।३।४९॥ पूरणप्रत्ययान्ताद्भागेऽन्। चतुर्थः। पञ्चमः। षष्ठाष्टमाभ्यां ञ च। ५।३।५०॥ अन्। षष्ठो भागः षाष्ठः। षष्ठः। अष्टमः। आष्टमः।
मानपश्वङ्गयोः कन्लुकौ च। ५।३।५१॥ षष्ठाष्टमशब्दाभ्यां क्रमेण कन् लुकौ स्तो माने पश्वङ्गे च वाच्ये। षष्ठको भागः मानं चेत्। अष्टमो भागः पशु
पश्वङ्गं चेत्। तस्य अनो वा लुक्। चकाराद्यथाप्राप्तम्। षष्ठः। षाष्ठः। अष्टमः। आष्टमः। महाविभाषया सिद्धे लुग्वचनं पूर्वत्र ञानौ नित्याविति ज्ञा

अनेकस्य वा एकीकरणं तत्राद्यउदाहरणम्। एकं राशिं पञ्चधेति। पञ्च राशीन् कुर्वित्यर्थः। द्वितीये तु। अनेकमेकधा कुर्वित्युदाहर्तव्यम्। इह क्रियाविषयकप्रकारो न
गम्यत इति सूत्रारम्भः। एकाद्धः। शब्दप्रधानत्वात्सर्वनामकार्याभावः। इह प्रकरणे एव सिद्धे पुनर्धाग्रहणं विधार्थे विहितस्यापि यथा स्यादनन्तरस्येति न्यायेनाधिक
रणविचाले विहितस्यैव हि माप्नोतीति वृत्तिपदमञ्जर्योः स्थितम्। एतेन स्वतन्त्र एव प्रत्ययोऽस्त्वित्याशङ्का परास्ता। ऐकध्यमिति। विधार्थे ऐकध्यं भुङ्क्ते। अधिकरणवि

चाखे तु ऐकध्यं राशिं कुर्विन्त्यादि ज्ञेयं। एवमग्रेपि द्वैधमित्यादौ बोध्यं। एधाच्च। द्वित्र्योः संबंधिनो धा प्रत्ययस्य एधा वा स्यात्। योगविभागो यथासंख्यनिरासार्थः। पाप्ये
पाशप्। कुत्सित इत्यर्थे विहितः स्तिङंतादपि प्रसंगात्। पूरणाद्भागे। पूरणार्थत्वात् तीयप्रत्ययः। पूरणशब्देनोक्तः। पूरणग्रहणं चोत्तरार्थं न त्वपूरणसीयप
प्रत्ययो भवति। मुखतीयः पार्श्वतीय इत्यत्र त्वनर्थकत्वान्नातिप्रसंगः। भाग इति पुंस्त्वं विवक्षितं तेन समानेप्यर्थे भक्तौ विवक्षितायां च तुर्थीपंचमीत्येव भवति।
प्रत्ययो भवति। मुखतीयः पार्श्वतीय इत्यत्र त्वनर्थकत्वान्नातिप्रसंगः॥ ॥ एकादाकिनिच्चा। असहायवाचिन एकशब्दादाकिनिच् स्यात्। कन्लुकावपि। आकिनि
नोगकादयस्य इत्यनि सति तु द्वापि च तुर्थापंचमेति प्रसज्येत॥ ॥एकादाकिनिच्चा। असहायवाचिन एकशब्दादाकिनिच् स्यात्। कन्लुकाविति। आकिनि
चः कनो वा पक्षे लुकः। तयोरेवानेन सूत्रेण विधानात्। असहायग्रहणं संज्ञाशब्दनिरासार्थं। अन्यथा प्रसिद्धत्वात् संख्याप्रकरणाच्च तस्यैव ग्रहणं स्यात्। इष्टापत्तौ
तु द्वित्वबहुत्वे च न स्यादेकाकिनौ एकाकिन इति। नहि द्वयोर्बहुषु वा एकसंख्यास्ति। असहायत्वं तु परस्परातिरिक्तसहायाभावेन द्वयोर्बहूनामपि भवतीति। इह अ

एकादाकिनिच्चासहाये। ५।३।५२। चात्कन्लुकौ। एकः। एकाकी। एककः। भूतपूर्वे चरट्। ५।३।५३। आढ्यो भूतपूर्वः। आढ्यचरः। षष्ठ्या
रूप्य च। ५।३।५४। भूतपूर्वे रूप्यः स्याच्चरट् च। कृष्णस्य भूतपूर्वो गौः कृष्णरूप्यः। कृष्णचरः। तसिलादिषु रूप्यस्यापरिगणितत्वा
न्न पुंवत्। शुभ्राया भूतपूर्वः शुभ्रारूप्यः। अतिशायने तमबिष्ठनौ। ५।३।५५। अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः। अयमेषामतिशये
नाढ्यः आढ्यतमः। लघुतमो लघिष्ठः।

किनिजेवायं वक्तव्यः सवर्णदीर्घेण सिद्धमिष्टं। यस्येति चेति लोपश्चाकारोच्चारणसामर्थ्यान्न भवतीत्यादि हरदत्त
ग्रंथे स्थितं। भूतपूर्वे। अत्र वर्तमानाच्चरट् स्यात्। गोष्ठात्। खञ्जित्यत्रैव नोक्तो। विशेषविहितेन खञ्चा चरटो वाधा मा भूदिति। सन्निधौ हि सामान्यविशेषभावः स्फुटी भवति।
यद्यपि दूरस्थस्यापि वाधोस्त्येव तथापि हि गौरवस्वीकारेण दूरे पाठसामर्थ्याद्वाधो नेति भावः। षष्ठ्या रूप्य च। भूतपूर्व इत्यनुवर्तते। तच्च यद्यपि पूर्वत्र ऊर्ध्वात्पातिपदिक
स्य विशेषणं तथापीह नतथा षष्ठ्यंतार्थविशेषणत्वात्तु दासीमस्य संबंधिनो गवादेः प्रधानत्वात् प्रधाने तरसन्निधौ च प्रधाने कार्यसंप्रत्ययः इत्युक्तत्वात् देतदाह
भूतपूर्वे रूप्यः स्यादिति। अतिशायने। अतिपूर्वाच्छेतेर्ल्युट्। अतिशयनमेवातिशायनं। असा देवनिपातनाद्दीर्घः। न तु सौत्रः तेन लोकेपि दीर्घः साधुः॥ आ
वाधकान्यपि तिपातनानि भवंति। तेन ह्रस्वोपि साधुः। यद्यपि केवलः शेतिः स्वपनेव र्तते तथाप्युपसर्ग प्रकर्षे प्रकर्षश्चात्र नाधिक्यं किंत्वभिभवः॥ ॥

पूर्वाह्णेतमामतयातिशेषे इति प्रयोगदर्शनात्। नचैवं प्रकर्षे तमविष्टनावित्यवकुतो न सूत्रितमिति शंक्यं। अतिशायनमिति निपातनोर्थमेव तथ्यं कृत्वात्। अति
मानप्रत्ययार्थी तथाहि प्रतिस्त्वोरतिशायनेन लघुतममिति स्यात्। प्रत्ययार्थस्य प्राधान्यात्। नापि प्रकृत्यर्थः। तथा हि सति प्रकर्षातिशयातिशय[...]दिष्य एव स्यात्मत्वा
ण्यादिष्फ। किंतु प्रकृत्यर्थविशेषणं प्रत्ययमुदाहृतकसरे तदाह। अतिशयविशिष्टत्यादि। अयमेषामिति द्व्यवयवे समुदाये यदा एकस्यातिशयो विवक्ष्यते तदा तर
वीयसुनावपवादो वक्ष्यते। तथा च परिशेषाद्बहूनां मध्ये यदा एकदेशस्य निर्द्धारणं सोऽस्य विषय इति भावः। आख्यातमिति। सुवंतात्तमप्। सुपो धात्विति लुक्॥ य
द्यपि ङ्याप्प्रातिपदिकादित्येवानुवर्त्तते तथापि सुवंतमपत्ययेव[...]व्यय[...]थाहि पूर्वाह्णेतरां पूर्वाह्णेतमामित्यादौ घकालतनेषु कालनाम्न इति सप्तम्या अलु
ग्विधानं कथमुपपद्यत॥ ❀ ॥ तिङश्च। अस्मादिष्ठन्नभ[...]त्यजादी गुणवचनादेवेति नियमादित्याशयनाह। तमप्यादिति। तरप्तमपौ घः। अस्मिन्नेवाति

तिङश्च।५।४।५६॥ तिङन्तादतिशाये द्योत्ये तमप्स्यात्॥ तरप्तमपौ घः।१।१।२२॥ एतौ घसंज्ञौ स्तः॥ किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे।५।४।११। कि
मएदन्तात्तिङोऽव्ययाच्च यो घस्तदन्तादामुस्स्यान्न तु द्रव्य[प्र]कर्षे। किन्तमां। प्राह्णेतमां। पचतितमां। उच्चैस्तमां। द्रव्यप्रकर्षे तु। उच्चैस्तमस्तरुः॥ द्विवचन
विभज्योपपदे तरबीयसुनौ।५।३।५७॥ द्वयोरेकस्यातिशये विभक्तव्ये चोपपदे सुप्तिङन्तादेतौ स्तः। पूर्वयोरपवादः। अयमनयोरतिशयेन लघुर्ल
घुतरः। लघीयान्। उदीच्याः प्राच्येभ्यः पटुतराः। पटीयांसः। अजादी गुणवचनादेव।५।३।५८॥ इष्ठन्नीयसुनौ गुणवचनादेव स्तः। नेह। पाचकतरः पा

शायनिकप्रकरणे ईयसुनादी घः पितौ घ इति वा वक्तव्ये प्रकरणान्तरे गुरु[...]करणमत्यन्तस्वार्थिकमपि तरपं ज्ञापयति। तेन अल्पाच्तरं लोपश्च बलवत्तर इत्यादि सिद्धं। अल्पाजेव
त्वल्याच्कं न त्वत्र द्वयोरेकस्यातिशयविवक्षायां तरप्। अन्यथा[...]केश[...]त्यादि सिद्धं वापि ग्रांसदं दुंभि वीणा इत्यादि न सिद्ध्येदित्याहुः। किमेत्। आमोरुकारो[...]दित्संज्ञेत
न्नर्हि पचतितरामित्यादौ ह्रस्वनद्यापरतिनुटि पचतितरामिति[...]तायस्येति लोपस्य परेण नुटा बाधात्। किंद्रां न तु निरनुबंधग्रहणेन सानुबंधस्येति परिभाषया नुड्धौ
नास्यग्रहणं द्विवचने विभज्योपपदे। द्वयोरर्थयोर्वचनं द्विवचनं[...]तोल्युट्कर्मणि षष्ठ्याः समासः। येमपदेन द्वावर्थावुच्येते तद्द्विवचनं विभक्तव्यं विभज्यं। ऋहलोरिति
ण्यत्निपातनात्तरपवादो यत् निपात्यते ण्यति तु चजोः कुघिण्ण्यतोरिति कुत्वेन विभा[...]यमितिस्यात्। विभाज्यशब्दस्य स्मृतिषु प्रयुक्तस्य साधुत्वं चिन्त्यमिति हरदत्तोक्तिश्चिन्त्या एयंतादच्चो यतिविभाज्यमि

वर्त्तमेवमदाह। बहोरित्यादिभूरादेश इत्यपि ज्ञातव्यं। भूयिष्ठ इति। इष्ठस्यादिलोपे कृते यिशब्द आगमः। यद्वालोपापवादो यकार आगमः इकार उच्चारणार्थः। पस्महूय मपीदेभाष्यारूढं। युवाल्पयोः ।युवेतिस्वरूपग्रहणं ननु युवाल्पयोस्था अल्पसाहचर्याद्ध्या रख्यालाच्च। अजादीरत्यनुवर्त्तनादजाद्योरेव परयोर्न तु तरतमपोरित्याशयेन व्याचष्ट इष्ठेयसोरिति॥ ॥ विन्मतोर्लुक्। स्रजिष्ठ इति विनोलुकि कृते भत्वात्स्य कार्याभावः। असादेवज्ञापकाद्गुणवचनत्वेपि विन्मतोरजादी भवतः प्रशंसायां रूपप्। स्वकृत्यर्थस्य परिपूर्णतेह प्रशंसा न तु स्तुतिः। तेनेहापि भवति। चोररूपोयं यस्स्लोरे पथजनेहरति गुप्तवस्त्वपहरणेन चौर्यं परिपूर्यते। पचतिरूपमिति। क्रियाप्रधानमाख्याते क्रियायाश्चासत्वरूपत्वेपि औत्सर्गिकमेकवचनं भवति। तेन पचतोरूपं पचन्तिरूपमित्यादि। इह प्रथममेव विभक्त्यन्तराणामप्राप्तेरिति वहंवाव

विन्मतोर्लुक्।५।३।६५।विनो मतुपश्च लुक् स्यादिष्ठेयसोः। अतिशयेन स्रग्वी स्रजिष्ठः। स्रजीयान्। अतिशयेन त्वग्वान् त्वचिष्ठः। त्वचीयान्। प्रशंसायां रूपप्।५।३।६६॥ सुबन्तात्तिङन्ताच्च। प्रशस्तः पटुः पटुरूपः। प्रशस्तं पचति पचतिरूपं। ईषदसमाप्तौ कल्पब्देश्यदेशीयरः।५।३।६७॥ ईषदूनो विद्वान् विद्वत्कल्पः। यशस्कल्पम्। यजुः कल्पम्। विद्वद्देश्यः। विद्वद्देशीयः। पचतिकल्पम्। विभाषा सुपो बहुच् पुरस्तात्तु।५।३।६८॥ ईषदसमाप्तिविशिष्टेर्थे सुबन्ताद्बहुज्वा स्यात्स च प्रागेव न तु परः। ईषदूनः पटुः। बहुपटुः। पटुकल्पः। सुपः किम्। पजतिकल्पम्। प्रकारवचने जातीयर्।५।३।६९॥ प्रकारवति चायम्। थालन्तु प्रकारमात्रे। पटुप्रकारः पटुजातीयः। प्रागिवात्कः।५।३।७०॥ इवे प्रतिकृतावित्यतः प्राक् काऽधिकारः। अव्ययसर्वनाम्नामकच् प्राक् टेः।५।३।७१॥ तिङश्चेत्यनुवर्त्तते॥ ॥ १९ सुतरसुपश्येत्यादियोगे कर्मणि द्वितीयाविमुलभात्कीवत्वंलोकात्।

एवं पचतिकल्पमित्यादावपि बोध्यौ विभाषा सुपः। सूत्रे सुप इति षष्ठ्यंतं। षष्ठ्यन्तसमर्थप्रत्ययेनेत्युक्तेः सुबन्तादिति। एतच्च पंचम्यंतमुक्तमेव। पुरस्ताच्छब्दपर्यायस्य प्राशिति शब्दस्य वृत्तौ प्रयुक्तत्वात्। प्रागित्यपकृष्यत इति तु मनोरमायां स्थितं। न च सूत्रस्थपुरस्ताच्छब्दसमानार्थकप्राक्शब्दयोगेपि षष्ठ्यन्तसर्थोति षष्ठी स्यादिति वाच्यं। अ॰।दितिसूत्रे च तरपरस्ताच्छब्दत्वेपि षष्ठ्यन्तसमर्थप्रत्ययेनेत्यतद्धाघनार्थे पृथग्ग्रहणमिति सिद्धान्तयित्वा प्राक् प्रत्ययग्रामादित्युदाहृतत्वात्। काशिकायां त्वत्रापि पुरस्ताच्छब्दः प्रयुक्तः सुबन्तादिति च प्रयुक्तं। तदसमंजसमिति मत्वा हरदत्तेन कथंचित्समर्थितात्पपलोपे पंचमी। एवंभूतं प्रकृतित्वेनाश्रित्येत्यर्थ इति॥ ॥

अर्थग्रहणमिह सर्वलोपार्थं अन्यथा आदेः परस्येत्यादेरेव स्यादित्यभिप्रेत्याह द्वितीयादच ऊर्ध्वं सर्वमिति। अजिनान्तस्येत्यतो लोप इत्यनुवर्तनादाह लुप्यत इति। नः। ठग्र
हणे पूर्वं इकादेशे कृते अजादावित्येव सिद्धत्वादत आह। ठको द्वितीयत्वादिति। वायुक इति। वायुशब्दात्परस्य दत्तशब्दस्य ठावस्थायामेव लोपे इसुसुक्तान्तादिति कः। किंच
पृथक् ठग्रहणस्य प्रयोजनान्तरमप्यस्ति। पदानुचित्रगुप्रभृतिभ्यष्ठच् तदोर्गनत्वात् कादेशप्राप्त्या प्रथममिकादेशस्यासंभवेनाजादिलक्षणो लोपो न स्यादिति तदर्थम
पि ठग्रहणेन ठावस्थायामेव [illegible] लोपे कादेशस्यासंभवादिकादेशे चित्रक इति रूपं सिध्यतीति बोध्यं चतुर्थादनजादौ चेति वक्ष्यमाणमेव श्लोकं भङ्क्त्वा व्याचष्टे। चतु
र्थादच ऊर्ध्वस्येति। अनजादाविति। हलादावित्यर्थः। अस्मिन् प्रकरणे इत्येव। लोपः पूर्वपदस्य चेति। ठाजादावनजादौ चेति बोध्यः। अप्रत्यये तथैवेत्येतद्व्याचष्टे। विना
पि प्रत्ययमिति। [illegible]ति। इलस्यलः। लोप इत्यर्थः स्तत्रादेः परस्येति इकारलोपो बोध्यः॥ ॥ प्राचामुपादेः। बह्वचो मनुष्येत्याद्यनुवर्तते। उपेन्द्रदत्त इति। ननु कृतसं

प्राचामुपादेरडज्वुचौ च। ५।३।८०॥ उपशब्दपूर्वात्प्रातिपदिकात्पूर्वविषये अडच् वुच् एतौ स्तः। चाद्यथाप्राप्तम्। प्राचांग्रहणं पूजार्थम्। अनुकम्पित उ
पेन्द्रदत्तः। उपडः। उपकः। उपिकः। उपियः। उपिलः। उपेन्द्रदत्तकः। षडुपाणिः। जातिनाम्नः कन्। ५।३।८१॥ मनुष्यनाम्न इत्येव। जातिशब्दो
यो मनुष्यनामधेयस्तस्मात्कन् स्यात्, इत्यनुकम्पायाम्। [illegible] सिंहकः। शरभकः। [illegible]। द्वितीयं संध्यक्षरं चेत्तदादेर्लोपो वक्तव्यः॥ कहोडः
कहिकः। एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः॥ वागाशीर्दत्तः॥ ॥ ११ ॥ घेरूपेन्द्रशब्दादेकाक्षरस्य पूर्वोत्तरयोग्रहणादुपादेरिति विधीय
मानौ प्रत्ययौ नाम्नः [illegible] नकारादेरेव स्यात्तत्र उपक उप[illegible] इति रूपे न स्याताम्। किं तु उपय उपड उपेयक इति रूपे स्यातामेवं घनिलचौ ठच् [illegible] एवं। तस्मादिहैव द्वि
तीयं संध्यक्षरं चेति [illegible] इत्याहुः प्रकारान्तरेण निर्वाहसंभवान्नोक्ता इत्याहि। आदुलोपे कृते द्वितीयं संध्यक्षरमित्यादिना अकारस्यापि लोपप्रस
क्त्या गुणात्पूर्वमेवाकर्तव्य [illegible] भाष्यप्रत्ययः। न च परिनिष्ठितत्वपरत्वेन समर्थग्रहणेन सौत्री[illegible]त्येवं परिभाषा बाधः शंक्यः। प्राग्दिश इति सूत्रे समर्थग्रह
णेन निवृत्तमित्युक्तत्वात् कृतसंधेरिति प्रागुक्तज्ञापकबलेन समर्थग्रहणं प्रत्याख्यानपक्षेपि ज्ञापकस्याविशेषपरत्वाश्रयणादिति। उपेन्द्रः उपगुरुपकर्त्रेत्यादि रूपडादी
नां पंचानां रूपाणां साम्येपि [illegible]बाधादिविवकरणादिना विशेषोऽध्यवसेयः। जातिनाम्नः। ये शब्दा जात्यन्तरे प्रसिद्धा मनुष्येषु नामत्वेन विनियुक्तास्त इहोदाहरणं द्वितीय

वेद्यो ऽश्वा। ननु तत्वं न्यूनतासा च प्रवृत्तिनिमित्तस्य तस्यासत्तेः। कश्चित्तु तत्तः चरितधर्मान्तराणां तत्र वत्स ... वयसश्च प्रथमस्य न्यूनत्वं नाम वयोन्तरप्राप्तिलक्षण
ह्रासित्वमिति। तदुक्तमुक्षा तारुण्यस्य तनुत्वं तृतीयं वयः प्राप्तः अश्वायाम ... श्वात्तुल्यत्वेऽश्वः अश्वत्वं च जातिः। तत्सहचरितस्याश्वायामनुत्पन्न धर्मस्य न्यूनत्वम
स्येति कतः। तथा चेदमित्यश्वाप्यश्वतरः। इति ऋषभो भारस्य वोढा तस्य तनुत्वं भारोद्वहने मन्दशक्तिता। तदाह ऋषभतरः। किं यत्तदो। कतरो वै स वृत्ति। गुणेन नि
र्द्धारणमिति। क्रिया। ... निर्द्धारणे ... तरो ध्यापकः। कतरो देवदत्तः स्यादित्येयं। ननु द्वयोरेकस्य निर्द्धारणे डतरच्चेद्भवति तर्हि कुत्र निरन्यतरो देवदत्तः। ययो
रन्यतरः ययोरन्यतर इति ... अत्राहुः। निर्द्धार्यमाणवाचिभ्य एवायं प्रत्ययोऽभिधानस्वाभाव्यात्। तेनात्र नातिप्रसंग इति एकस्येति किं। द्वयोरिति क
र्मणि षष्ठी मा भूत्। तथा हि सत्यस्मिन् सर्वकोदेवदत्तयज्ञदत्ता वित्यादेर्वक्ष्यते। वा बहूनां किं यत्तद इति वर्त्तते। जातिश्च परिप्रश्नश्चेति समाहारद्वन्द्वः। अत्र

वत्सोक्षा। ऋषभस्यश्चेत्तत्त्वे ॥ ५।३।९१ ॥ वत्सतरः। द्वितीयं वयः प्राप्तः। उक्षतरः। अश्वतरः। ऋषभतरः। प्रवृत्तिनिमित्ततनुत्व एवायम्। किं
यत्तदो निर्द्धारणे द्वयोरेकस्य डतरच् ॥ ५।३।९२ ॥ अन्यतरः। कतरो वैष्णवः। यतरः। ततरः। महाविभाषया। कः। यः। सः ॥ वा बहूनां जातिप
रिप्रश्ने डतमच् ॥ ५।३।९३ ॥ बहूनां मध्ये एकस्य निर्द्धारणे डतमच् वा स्यात्। जातिपरिप्रश्न इति प्रत्याख्यातमाकरे। कतमो भवतां कठः।
यतमः। ततमः। वाग्रहणमकजर्थम्। यकः। सकः। महाविभाषया। यः। सः। किमोऽस्मिन्विषये डतरजपि। कतरः। एकाच्च प्राचाम् ॥ ५।३।९४ ॥
इतरच्डतमचौ स्तः। अनयोः कतरो मैत्रः। एषां कतमः ॥ ॥ ९९ जाताविति सर्वेषां विशेषणं। षष्ठीसमासे तु गुणभूतस्य जा
तिग्रहणस्य निष्कृष्य संबन्धो न स्यात्। परिप्रश्नग्रहणं तु ... विशेषणं तच्च ... निवृत्त्यर्थं। तत्र जातिग्रहणं प्रायोभिप्रायं क्रियागुणसंज्ञाभिरपि नि
र्द्धारणे डतरच् ... तथा पूर्वमत्रे ... बहूनां निर्द्धारणेऽपि डतरच ... वार्त्तिकं। किमादीनां द्विवह्वर्थे प्रत्ययविधानादुपाध्यान
र्थक्यमिति। अत्र कैयटः। द्वयोरिति जातिपरिप्रश्न इति च न कर्त्तव्यमेतिनि भावः इति तदेतदाह। प्रत्याख्यातमाकर इति। कठ इति। कतमो भवतामध्यापकः शू
रो देवदत्तो वेत्यप्युदाहर्त्तव्यः। यकः सक इति। कक इति नु ... ससहितस्यापि किमः कप्रत्ययमादेशः इति व्याख्यातत्वात्। महाविभाषयेति। प्राग्दिश इति सूत्रे

समर्थप्रथमग्रहणयोर्निवृत्तावपि वाग्रहणमनुवर्तत इत्युक्तत्वादिति भावः। किंयत्तदः इति सूत्रे द्व्योरित्यस्य प्रत्याख्यानादाह। किमोस्मिन्निति। एकाच्च। प्राचां ग्रहणं पूजा
र्थं विकल्पोऽनुवर्तनार्थं वा॥ ॥ ॥ अवक्षेपणे कन्। कुत्सिते तु कः। स्वरविशेषः। येन इत्तर इति। अवक्षिप्यते येनेत्यवक्षेपणशब्दः करणे ल्युडन्त इति भावः। प्रागि
वीयानां पूर्णावधिः। अश्वक इति। अश्वशब्दोश्व एव वर्तते कन्प्रत्ययस्तु प्रतिकृतिरूपेस द्दृशास्तिनायं स्वार्थिक इत्येके। अन्ये तु सादृश्यनिबन्धनादभेदोपचारात् गौ
र्वाहीक इतिवदश्वशब्द एव प्रतिकृतौ वर्तते। प्रत्ययस्तु तस्यैवोपचारिकत्वस्य बोधक इत्याहुः। प्रतिकृतौ किं गौरिव यः तृणचर्मकाष्ठादिनिर्मितं प्रतिमापरपर्यायं वस्तु प्र

अवक्षेपणे कन्॥ ५। ३। ९५॥ व्याकरणेन गर्वितः। व्याकरणकः। येनेत्तरः कुत्स्यते न दिहोदाहरणमात्वतः कुत्सितन्तु कुत्सित इत्यस्य प्रागिवीयानां
पूर्णावधिः। इवे प्रतिकृतौ॥ ५। ३। ९६॥ कन्स्यात्। अश्व इव प्रतिकृतिः। अश्वकः। प्रतिकृतौ किम्। गौरिव गवयः। संज्ञायां च॥ ५। ३। ९७॥ इवार्थे क
न्स्यात्समुदायश्चेत्संज्ञा। अप्रतिकृत्यर्थमारंभः। अश्वसदृशस्य संज्ञा। अश्वकः। उष्ट्रकः। लुम्मनुष्ये॥ ५। ३। ९८॥ संज्ञायां विहितस्य कनो लुप्स्या
न्मनुष्ये वाच्ये। चंचा तृणमयः पुमान्। चंचेव मनुष्यश्चंचा। वर्धिका॥ जीविकार्थे चापण्ये॥ ५। ३। ९९॥ जीविकार्थं यदविक्रीयमाणं तस्मिन्वाच्ये
कनो लुप्स्यात्। वासुदेवः। शिवः। स्कंदः। देवलकानां जीविकार्थासु देवप्रतिकृतिष्विदम्। अपण्ये किम्। हस्तिकान्विक्रीणीते। देवपथादिभ्यश्च॥
॥ ५। ३। १००॥ कनो लुप्स्यात्॥ देवपथः। हंसपथः। आकृतिगणोयम्॥ वस्तेर्ढञ्॥ ५। ३। १०१॥ इवेत्यनुवर्तत एव। प्रतिकृतावितिनिवृत्तम्। वस्तिरिव
वास्तेयं। वास्तेयी॥ शिलाया ढः॥ ५। ३। १०२॥ शिलेव शिलेयम्। ॥ शिलाया इति योगविभागाड्ढञपीत्येके। शैलेयं। शाखादिभ्यो यः॥ ५। ३। १०३॥
शाखेव शाख्यः। मुख्यः। जघनमिव जघन्यः। अग्र्यः। शरण्यः। द्रव्यं च भव्ये॥ ५। ३। १०४॥ द्रव्यमयं ब्राह्मणः। कुशाग्राच्छः॥ ५। ३। १०५॥ कुशाग्र

तिकृतिः। गवयस्तु नैवं। समुदायश्चेत इति। प्रकृतिप्रत्ययसमुदायश्चेदश्वसदृशस्य संज्ञेत्यर्थः। चंचा वर्धिके इति। लुपि युक्तवद्भावात्स्त्रीलिंगता। वासुदेवः शिव इत्या
दि ॥ याः प्रतिमाः प्रतिगृह्य गृहाद्गृहं भिक्षमाणा अटंति ता एवमुच्यंते। देवलका अपि त एवमिक्षवोऽभिप्रेताः। यास्त्वायतनेषु प्रतिष्ठाप्यंते पूज्यंते च तासु नानुत्तरसूत्रेण लुप्
न्त्येके। अर्चासु पूजनार्थासु चित्रकर्मध्वजेषु च। इवे प्रतिकृतौ लोपः कनो देवपथादिष्विति। आर्चासु प्रतिमासु कीदृशीषु पूजनार्हासु गेहे ष्वायतनेषु वा याः पुं ॰ तेन।

छः स्यादिति। इवार्थ इति बोध्यं। पूगाञ्ञ इत्यतः प्रागिवेत्यधिकारात्। श्यस्त्रीश्यामेत्यादौ तु एक एव इवार्थः स च समासांतर्भूत इति छो न भवत्युक्तार्थानामप्रयोगात्। का
क तालीय इति। प्रकृतसूत्रादेव ज्ञापकादिवार्थे समासः सुप्सुपेति वा। उभयथापि विशेषसंज्ञाविनिर्मुक्तः स च छप्रत्ययविषय एवतेनेह स्वातंत्र्ये उपाध्यंतरयोगोति
ग्रहश्चनेत्याकरः। इहं काकतालेत्यादि॥ आगच्छतः काकस्य कस्मात्तालफलपतनम् यथा वधस्तथैवाकस्मिकचोरसमागमादेवदत्तवधः। एवमजाया आगच्छंत्या
कृपाणपतनात् यथा वधस्तत्र इदमपरमिति फलितोर्थः। अतर्कितोपनत इति। अत्रितितिगोपपन्नः यादृच्छिक इत्यर्थः। पूगाञ्ञ्यो। स्वरूपग्रहणं तु न भवति अग्राम
णीपूर्वादिति विचमानात्। पूर्वशब्दोत्र वयवचन। अग्रामणीपूर्वादिति किं। देवदत्तो ग्रामणीर्येषां ते देवदत्तकाः। स एषां ग्रामणीरिति कन्। अत्र समुदायः पूगवचनः। लो
हितध्वज्य इति। लोहितः ध्वजो यस्य संघस्य सः लोहितध्वजः। स एव लोहितध्वज्यः। व्रात च्फञोः उत्सेधजीवित्वं व्रातस्य पूगाद्विशेषः। उत्सेधः शरीरायासः। कौ

आहुस्त्रिगर्त्तषष्ठांस्तु कौण्डोपरथदाण्डकी। क्रौष्टुकिर्जालमानिश्च ब्रह्मगुप्तोऽथ जानकिः १ दामनीयः। दामनीयौ। दामनयः। औलपिः। औ
लपीयः। त्रिगर्त्तः। कौण्डोपरथीयः। दाण्डकीयः। पार्श्वादियौधेयादिभ्यामणञौ। ५। ३। ११७॥ आयुधजीविसङ्घवाचिभ्य एभ्यः क्रमादणञौ स्तः
स्वार्थे। पार्शवः। पार्शवौ। पार्शवाः। यौधेयः। यौधेयौ। यौधेयाः॥ ॥

११ जाथन्य इति। गोत्रे कुंजादिभ्य इति च्फञ्। दामन्यादित्रिगर्त्त षष्ठात्स
माहार्हद्वात्यं चमी। त्रिगर्त्तषष्ठेभ्य इति। येषामायुधजीविनां षडंतर्वर्गाः षष्ठवर्गस्तु त्रिगर्त्तस्तेभ्य इत्यर्थः। त्रिगर्त्तवर्गषष्ठकाः के इत्याकांक्षायामाह॥ ❁ ॥ आहुस्त्रिग
र्त्तषष्ठांश्चेति। अत्र जानुकपर्यस्त्रिगर्त्तवर्गः तेषु च त्रिगर्त्तषष्ठेषु प्रथमपंचमौ कौण्डोपरथब्राह्मणगुप्तशब्दौ शिवादिगणे तौ शेषास्तु पंच नामः केचित्तु अतद्धितांतमेव पंचमं
ब्रह्मगुप्तशब्दं पठंति। कौण्डोपरथीय इति। बहुवचनेतु कौण्डोपरथाः दाण्डकय इत्यादि। पार्शव इति। पर्शुरिति जनपदशब्दस्ततो यद्यपि मगधेत्यण बहुत्वे तद्राजस्यालु
क्। पुनस्संघविवक्षायामनेनाण्। अस्याप्यणो बहुत्वे तद्राजत्वाल्लुक्। तदाह। पर्शव इति। ननु पर्शुरिति योजनपदशब्दस्तस्मादेवानेन यस्वार्थेण् विधीयतामं पत्यवा
चिपर्शुशब्दात्संघविवक्षायामणेव यातु स्वार्थिकत्वं न सिध्येदिति चेदत्राहुः। केवलः पर्शुशब्द एव जनपदवाचीन त्वणंत इति जनपदवाचिनं स्वार्थेऽण्न विधीयते
किंतु अन्मगधेत्यण्णस्तद्राजस्य बहुष्वित्यादिना लुकि बहुपत्यवाचि पर्शुशब्दादेव स्वार्थे विधीयते स्वार्थश्चात्र संघ एव। न च पर्शुशब्दस्य संघवाचित्वं नेति शंक्यं ॥

यद्यपत्यवाचित्वे संघवाचित्व योध्यादि ति न काप्यनुपपत्तिरिति। योधेय इति। युध्यते सा युधा। युधेरिगुपधलक्षणः कः। युधाया अपत्यं द्यचइति ढक्। तदन्तात्संघविवक्षा यामनेनाञातेन यौधेय इति आयुधजीविसंघस्य क्रियतेऽवधिकं भवति। किं च यौधेयस्य कोलक्षणं वा यौधेयः संघो वा कललक्षणात्यन्त्रेणादण्। एवं यौधेयादिषु पठ्यन्ते। ततः पौरैकेयादयस्त्रिगर्तषष्ठैश्च योधेयाः जनपदमूलत्वं यौधेया इति। अत्रो लुगङ्गेणादनत्तं न वचनप्रामाण्याद्भर्गादिनानिषेधः शार्ङ्गरवाः स्त्रियाम वतन्निषेधात्॥ ॥ आभिजित्य इति। आभिजितशब्दाद् ण्यन्तात्। बत्राण्व विदभृत्यतिम्यो ऽस्मिन्निदं तेभ्यो वैदभृत शालावतशैखावतादिभ्यो यञ्॥ पादशतस्य संख्यादेः। पादशतस्य किमा द्वौ द्वौ माषौ ददाति। संख्यादेरिति किं पा दपं ददाति वीप्सायाम् इति। द्वौ पादौ ददाति। अनैमित्तिकत्वार्थमिति। निमित्तं भवानैमित्तिकः। अध्यात्मादित्वाट्ठञ् तद्धितार्थ इति समास इति। यद्यपि प्रकृत्युपाधिर्वी

अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ्॥ पा० ५।३।११८॥ अभिजिदादिभ्यः एतेभ्यः स्वार्थे यञ् स्यात्। अभिजि तः पुत्रः आभिजित्यः। वैदभृत्यः। शालावत्यः। शैखावत्यः। शामीवत्यः। और्णावत्यः। श्रौमत्यः। ञ्यादयस्तद्राजाः॥ पा० ५।३।११९॥ पूगात्र्यप इत्या रभ्य उक्ता एतत्संज्ञाः स्युः। तेनास्त्रियां बहुषु लुक्। लोहितध्वजाः। कपोतपाकाः। कौञ्जायनाः। ब्राध्नायना इत्यादि। पादशतस्य संख्यादेर्वीप्सा यां वुन् लोपश्च॥ पा० ५।४।१॥ लोपवचनमनैमित्तिकत्वार्थम्। अतोऽनस्यानिवृत्। पादः पत्। तद्धितार्थ इति समासे कृते प्रत्ययः। वुन्नन्तं स्त्रिया मेव। द्वौ द्वौ पादौ ददाति। द्विपदिकाम्। द्विशतिकाम्। पादशतग्रहणमनर्थकमन्यत्रापि दर्शनात्। द्विमोदकिकाम्। दण्डव्यवसर्गयोश्च॥ पा० ५।४।२॥ वुन् स्यात्। अवीप्सार्थमिदम्। द्वौ पादौ दण्डितः। द्विपदिकां व्यवसृजति ददातीत्यर्थः॥ ॥ ११ प्रातपद्यापिवुनाञ्चो ऽस्येतिं तद्धितार्थोम

वत्येवेतिभावः। ददाती ति। समर्पणमात्रमिह ददत्यर्थः। ननु पण्स्त्वत्पादनपर्यन्तं तथा त्वहि उत्तरसूत्रविषयत्वं स्यात्। केचित्तु व्यवसृजते र्दीर्णाः प्रयोगसत्त्येवं उत्तरसू त्रस्य प्रवृत्तिमाहुः। अन्यत्रापि दर्शनादिति। द्वौ द्वौ माषौ ददा पा ते त्वं न भिधानान्नातिप्रसंग इति भावः। दण्डव्यवसर्ग। दण्डनं दण्डः। दण्डेश्चुरादित्वं नाञ्चावेघञ्। अत्राप्यु दाहरणे तद्धितार्थ इति समासः। स्त्रीलिंगं च तद्धितार्थत्वं यदा प्र त्ययेऽवतद्धितार्थः स्वार्थिकत्वाहुनः। द्वौ पादौ दण्डित इत्यादेव वदतेनयज्ञदत्त इति शेषः। दण्डेः प्रधाने कर्म णि क्त इति यज्ञदत्तस्य प्रथमा द्वौ पादावित्यत्र द्विपदिकामित्यत्र च द्वितीया भवति दण्डिग्रहणार्थे इति द्विकर्मके षु क्तमा तथा च द्विपदिकाकर्मकग्रहणविषयी भूतो यज्ञदत्त

स्थूलादिभ्यः। प्रकारो भेदः सादृश्यं च उभयत्रापि यथासंभवं कन्। जातीयरोऽपवाद इति। तेनायमपि तद्वदेव प्रकारवति न तु प्रकारमात्र इत्युक्तं भवति। चंचद्बृहतोरिति। एता
वपि स्थूलादिष्वेव पठितव्याविति भावः। चंचत्क इति। चंचतेश्चलनकर्मा॥ चंचत्येव कश्चिच्चंचत्कः॥ एवं बृहद्विशेषो बृहत्कः। यद्वा अचंचन्न बृहन्नपि प्रभाविशेषाच्चंचन्नि
व बृहन्निव भासते विशेषाल्लक्ष्यते स चंचत्कः। बृहत्कः। सुरक इति। कण इति ह्रस्वः। चित्रकमिति। ईषच्छिन्नमित्यर्थः। क्तप्रकृतिवाच्यया क्रियया कृत्प्रत्ययवाच्यस्यस
धनस्य व्याप्तिरत्यंतगतिः सा कृत्स्ना। नसामिवचने। सामि अर्द्धं उच्यते येन तत्सामि वचनमिति व्युत्पत्त्या वचनग्रहणं पर्यायार्थमित्याह। सामिपर्याय इति। सामिकृत
मिति सामीति समासः अर्द्धकृतमिति। विशेषणसमासो बहुव्रीहिर्वा प्रकृते वेति। सामिवचनेनैवेत्यर्थः। ज्ञापयतीति। अयं भावः। नसामिवचन इत्यनेनानत्यंतगताव

स्थूलादिभ्यः प्रकारवचने कन्। ५।४।३॥ जातीयरोऽपवादः। स्थूलकः। अणुकः। चञ्चद्बृहतोरुपसंख्यानम्। चञ्चत्कः। बृहत्कः। सुरायाः
अहौ॥ सुरावर्णोऽहिः सुरकः। अनत्यन्तगतौ क्तात्। ५।४।४॥ छिन्नकम्। भिन्नकं। नसामिवचने। ५।४।५॥ सामिपर्याये उपपदे
क्तान्तात्कन्न। सामिकृतम्। अर्द्धकृतम्। अनत्यन्तगतेरिह प्रकृत्यैवाभिधानात्पूर्वेण कन्प्राप्तः। इदमेव निषेधसूत्रमत्यन्तस्वार्थिकमपि क
न्ज्ञापयति। बहुतरकम्। बृहत्या आच्छादने। ५।४।६॥ कन्स्यात्। द्वौ प्रावारोत्तरासङ्गौ समौ बृहतिका तथा। आच्छादने किम्। बृहती छन्दः। अ
षडक्षाशितङ्ग्वलङ्कर्मालम्पुरुषाध्युत्तरपदात्खः। ५।४।७॥ स्वार्थे। अषडक्षीणो मन्त्रः। द्वाभ्यामेव कृत इत्यर्थः। अशिता गावोऽस्मिन्निति आ
शितङ्गवीनमरण्यम्। निपातनात्पूर्वस्य मुम्। अलंकर्मीणः। अलम्पुरुषीणः।

न्तिकेनेन निषेधः सामिकृतादिभ्यस्तस्य प्राप्त्यभावात्तेभ्यो असमासे सामिपदे नैव अनत्यंतगतेर्द्योतनात्समासेऽप्युक्तां तत्प्राप्त्यभावाच्च। न च कृद्ग्रहणपरिभाषया समासस्य॥ ॥
क्तांतत्वमस्तीति शंक्यं सामिशब्दस्य गतित्वाभावात्। तस्मात्स्वार्थिक एव कन्निषिध्यत इति इदमेव निषेधवचनं क्वचित्स्वार्थिकं कनं ज्ञापयतीति। अषडक्षीण
इति। अविद्यमानानि षडक्षीणि यस्मिन्निति बहुव्रीहिः। अक्षिशब्दोऽत्र श्रोत्रेंद्रिये वर्त्तते। बहुव्रीहौ सक्थ्यक्ष्णोरिति षच्। तदंतादनेन खः। मंत्रो मंत्रणं। आशितंगवीनमि
ति। आङ्पूर्वादश्नातेराशितः कर्त्तरीति ज्ञापकात्कर्त्तरि क्तः। एवं तात्कर्मणि वा उभयथापि प्रभूततृणवत्समिति फलितोऽर्थः। अलंकर्मीण इति अलं कर्म अलं पुरुषेति पर्याद

रूढोऽपि बंधुशब्दः आप्तपर्यायः पुल्लिंगोऽस्ति तथापि स नेह गृह्यते। बंधुनीमिनपुंसकनिर्देशादिति भावः। सस्थानेनेत्यस्यैव व्याख्यानं तुल्येनेति पितृस्थानीय इति स्थानमत्र संबं
धविशेषः। पदमिति पस्य प्रसिद्धिः। पितुरिव स्थानमस्य पितृस्थानः पितृतुल्य इत्यर्थः। गोस्थानमिति। तिष्ठंत्यस्मिन्निति स्थानं देशः। इति करणो विवक्षार्थस्तेन तत्पुरुषो बहु
व्रीहिर्वा यत्तुल्यस्थानशब्दस्तस्माच्छो न भवति अनुगादिनः। प्रकृतिस्वरूपप्रदर्शनपरं चैतत्। न त्वयं केवलः प्रयोगार्हः ठकोनित्यत्वादिति हरदत्तः। सुप्यजाताविति णिनिः॥
॥ विसारिणो॥ पूर्ववदिति॥ णिनिः। हरदत्तस्तु सुप्यजातावितिणिनिरुपसर्गभिन्न एव सुप्युपपदे भवतीत्याशयेन पूर्वसूत्रेऽस्मिंश्च अत एव निपातनात् णिनिरित्या
हा तत्प्रयुक्तं सेवभूवेपजीविनां। अनुपायिसर्गः। नवचनीयाः प्रभवत्रानुजां विभिरित्यादिप्रयोगानुरोधेन उणस्तु सुप्युपपदेऽपि णिनेरवश्यस्वीकर्तव्यतया निपातनाश्रयण

विसारिणो मत्स्ये। ५।४।१६। अण् स्यात्। वैसारिणः। मत्स्ये इति किम्। विसारी देवदत्तः। संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्। ५।४।१७। अभ्यावृ
त्तिर्जन्म। क्रियाजन्मगणनवृत्तेः संख्याशब्दात्स्वार्थे कृत्वसुच् स्यात्। पञ्चकृत्वो भुङ्क्ते। संख्यायाः किम्। भूरिवारान् भुङ्क्ते। द्वित्रिचतुर्भ्यः सुच्। ५।४।१८
कृत्वसुचोऽपवादः। द्विर्भुङ्क्ते। त्रिः। रात्सस्य। चतुः। एकस्य सकृच्च। ५।४।१९। सकृदित्यादेशः स्यात् चात्सुच्। सकृद्भुङ्क्ते। संयोगान्तस्येति सुचो लोपः। न तु हल
ङ्यादिना। अभैत्सीदित्यत्र सिचः वसुचोऽपि तद्योगात्। विभाषा बहोर्धाऽविप्रकृष्टकाले। ५।४।२०। अविप्रकृष्टे आसन्नः। बहुधा। बहुकृत्वो वा दिवस
स्य भुङ्क्ते। आसन्नकाले किम्। बहुकृत्वो मासस्य भुङ्क्ते। तत्प्रकृतवचने मयट्। ५।४।२१। प्राचुर्येण प्रस्तुतं प्रकृतं तस्य वचनं प्रतिपादनम्। भावेऽधिक
रणे वा सुट्। आद्ये। प्रकृतमन्नं अन्नमयम्। अपूपमयम्। यवागूमयी। द्वितीये॥ ॥ १ स्वव्यर्थत्वात्। अणिनुण इत्यतो अनुवर्तनादाह। अण्स्यादितिवै

सारिण इति। [illegible] इति प्रतीतिभावः। संख्यायाः। अभ्यावृत्तिशब्देन यदि द्वितीयादिप्रवृत्तिर्गृह्यते तदा षट्कृत्वः प्रवृत्तौ पंचकृत्व इति स्यादतोऽत्र विवक्षितमर्थमाह। अभ्याव
त्तिर्जन्मेति। भूरिवारानिति। भूरिशब्दस्य लौकिकसंख्यावाचित्वेऽपि नेह ग्रहणं। बहुगणेति सूत्रे बहुग्रहणस्य नियमार्थत्वात्। अनियतसंख्यावाचिनां चेद्भवति बहोरेवेति निय
मशरीरमिति मनोरमा। बहुगणयोरेवेति नियमशरीरमित्यन्ये॥ वारशब्दस्य क्रियोत्पत्त्याधारकालवाचित्वात्कालाध्वनोरिति द्वितीयेति हरदत्तः। वारशब्दस्य कालवाचित्वे
भूरिशब्दोऽपि तत्समानाधिकरणत्वात्काल एव वर्तत इति कथमत्र प्रसंग इति चेत् दत्राहुः। कालवाचित्वेऽपि क्रियाभ्यावृत्तेरपि गम्यमानत्वात्प्रसंग इति। अभ्यावृत्तिगणने किं॥

ंचपाकाः स्वपाकाः इत्येवं क्रियामात्रगणनेमाभूत्। क्रियाग्रहणं किमर्थं। यावन्ता अभ्यावृत्तिः क्रियाया एव भवति सा ध्यात्वर्थविषयत्वात्तस्याः न द्रव्यगुणयोः तयोस्तु सिद्ध
स्वभावतया शब्दाभिधानात्। पुनःपुनर्दंडी पुनःपुनः स्थूल इत्यत्रापि गम्यमानाया भवतिक्रियाया एवाभ्यावृत्तिर्न तु द्रव्यगुणयोरिति चेन्नैवं। उत्तरार्थं क्रियाग्रहणस्या
वश्यकत्वात्। एकस्य सकृच्च। अभ्यावृत्तिरिति न संबध्यते। एकशब्देन त्वेकैव क्रियाव्यक्तिराख्यायते तस्यास्त्वावृत्तेरसंभवात्। क्रियाग्रहणमिहार्थमावश्यकमन्यथा आ
द्यातः संख्याः संख्येयवर्तिन इत्येको भुंक्ते इत्यत्रापि स्यादिति। इह साधु पचतीत्यादिवदेकं भुंक्ते इति प्रयोगे प्राप्ते सकृच्छब्दप्रयोगार्थमिदं सूत्रमिति कैयटः। एकः पाक इत्यत्र
तु अनभिधानान्नेति काशिका। संयोगांतस्येति। हल्ङ्यादिना सुलोप इति प्राचोमंथोः युक्त इत्याह। नन्विति। सौतिसौतिसाहचर्याद्धि मत्यय एव तत्र गृह्यत इत्यभिप्रेत्याह।
सिचरवेति। वृद्धधादिवसस्य भुंक्ते इति शेषत्वविवक्षायां षष्ठी। कृत्वोर्थप्रयोगे कालेऽधिकरण इत्यनेन न षष्ठीति हरदत्तोक्तिस्तु नादर्तव्या। शेषाधिकारबलेनाष्टसूत्र्यास्स
मासनिवृत्तिफलकतया तिङंतनोदाहरणमिति प्रागुक्तनिष्कर्षविरोधादित्याहुः। तत्प्रकृत प्राचुर्येण प्रस्तुतमिति। यद्यपि प्रकृतशब्दः प्रस्तुतमात्रे रूढः तथापि वच
नग्रहणादयं विशेषो लभ्यते वचनग्रह[illegible]हिपादशस्य प्रकृतत्वस्य लोके मयटावचनं प्रत्यायनं नत्र यथा स्यादित्येवमर्थं। आद्य इति। प्रथमान्तात्प्रकृते द्योत्ये प्रत्ययः स्वार्थिक
त्वात्प्रकृतितो लिंगं। अपूपमयमित्यपि [illegible] नियम्यते। प्रस्तुताः पूपाः पूपमयं क्वचित्स्वार्थिकाः प्रकृतितो लिंगवचनान्यतिवर्तन्ते। अस्मिन्पक्षे तद्ग्रहणं व्यर्थं। द्वितीये त्वाव
प्ययुक्तं प्रथमान्तादेव प्रत्ययः कर्मार्थः। द्वितीये इति। अस्मिन्पक्षे उच्यमाना प्रकृतेनाच प्रकृत्यर्थविशेषणं स्फुटोक्तमधिकरणं तु मयडर्थः। अंत एव विशेष्यनिघ्नतानरा

अन्नमयो यज्ञ इति। अन्नं भक्तसमुच्यते अस्मिन्नित्यर्थः। मौदकिकं शाष्कुलिकमिति। अचित्तहस्तिधेनोष्ठक्। आवसथ इति। उपसर्गे वसेरित्यथप्रत्ययः। निपातसमुदाय इति। उपदेशपारं पर्ये वर्त्तते वचनाद्वा प्रातिपदिकादेव प्रत्ययः। ऐतिह्यमिति हाय्ययमिति कोशः। भेषजमिति। भिषज्यतेः कं द्वादियगंतात्क्विप्। भिषजामिदं भेषजं। अस्मात्स्वार्थे निपातनादेकारः। पैतृदेवत्यमिति। पितरश्च ता देवताश्च पितृदेवताः पितृदेवताभ्य इदमिति विग्रहः। अर्घ्यमिति। मूल्ये पूजाविधावर्घ इत्यमरः। पूर्वोक्ता इति। नवपूतनप इव प्रत्यया इत्यर्थः। आग्नीध्रमिति। अग्नीधः शरणे रण् भं चेति भौविके धुक्युत्यादितं तत्र्वांतो दांतं ततः स्वार्थे ऽनेनाञ्। आयुदात्तत्वफलं। फलांतरमप्याह स्त्रियामिति।

अन्नमयो यज्ञः। अपूपमयं पर्व। समूहवच्च बहुषु। ५।४।२२॥ मूहिकाः प्रत्यया अतिदिश्यन्ते चाण्मयट्। मोदकाः प्रकृताः मौदकिकम्। मोदकमयं। शाष्कुलिकम्। शष्कुलीमयं। द्वितीये ऽर्थे। मौदकिको यज्ञः मोदकमयः। अनन्तावसथेतिहभेषजाञ्ञ्यः। ५।४।२३॥ अनन्त एवानन्त्यम्। आवसथ एवावसथ्यम्। इतिह इति निपातसमुदायः। ऐतिह्यं। भेषजमेव भैषज्यम्। देवतान्तात्तादर्थ्ये यत्। ५।४।२४॥ तदर्थ एव तादर्थ्यम्। स्वार्थे ष्यञ्। अग्निदेवतायै इदमग्निदेवत्यम्। पितृदेवत्यम्। पादार्घाभ्यां च। ५।४।२५॥ पादार्थमुदकम्पाद्यम्। अर्घ्यम्। नवस्य नू आदेशः त्नप्तनप्खाश्च प्रत्यया वक्तव्याः। नूत्नम्। नूतनम्। नवीनम्। नश्च पुराणे प्रात्॥ पुराणार्थे वर्त्तमानात्प्रशब्दान्नो वक्तव्यः। चात्पूर्वोक्ताः। प्रणम्। प्रत्नम्। प्रतनं। प्रीणं। भागरूपनामभ्यो धेयः॥ भागधेयः। भागधेयम्। रूपधेयम्। नामधेयम्। आग्नीध्रसाधारणादञ्। आग्नीध्रम्। साधारणम्। स्त्रियां ङीप्। आग्नीध्री। साधारणी। अतिथेर्ञ्यः। ५।४।२६॥ तादर्थ्य इत्येव। अतिथये इदमातिथ्यम्। देवात्तल्। ५।४।२७॥ देव एव देवता। अवेः कः। ५।४।२८॥ अविरेवाविकः॥ यावादिभ्यः कन्। ५।४।२९॥ याव एव यावकः। मणिकः। लोहितान्मणौ। ५।४।३०॥ लोहित एव मणिर्लोहितको मणिः॥

॥ ९ आग्नीध्रीति शालेति विशेष्यं। समानं धारणमस्याः साधारणी। अनेकं प्रत्यविशिष्टसंबंधा भूम्यादिः। पृषोदरादित्वात्समानस्य साभावः। विभाषाप्रकरणे दत्रभावेयाप्। आग्नीध्रा शाला। साधारणा भूमिः। नन्वत्र भाव पक्षे समानस्य साभावविरहे साधारण इत्येवस्यान्नत्वत्रादिवृद्धिरिति चेदत्राहुः। साधारणादञित्यत एव निपातनात्समानस्य साभावविधानाद्वा इष्टसिद्धिरिति। देवतेति तलंतं स्त्रियां ॥

वर्णे चानित्ये अनित्यके। लोहितं रुधिरं। लोहिता लाक्षा। अनित्यत्वमिह स्वसमानाधिकरणध्वंसप्रतियोगित्वं। अत एव रक्ते इत्युत्तरसूत्रं सार्थकं। लाक्षादिना रक्ते लौहित्य
स्य यावद्द्रव्यभावित्वात्तेन नित्यतया पूर्वेण सिद्धेः। लोहितक इति। कोपेन लोहितो यः पुरुषस्तस्मिन्नेव स्यात्। दृष्ट्वैकोपशान्तौ लोहितो न स्यादिति भवत्यत्रानित्यो वर्णः। प्राति
पदिकान्तद्विषा इति पक्षस्य प्रतिपदविधानमात्रेणापवादत्वमिति पक्षस्य चाश्रयणे वर्णादनुदात्तादित्यतः प्रागेव कनि कृते लोहितिकेति रूपं न स्यादित्याशंकायामाह॥
लिंगबाधनं चेति। लोहितादिभ्यपर्लक्षणं [illegible] निका [illegible] निकेत्यादेरपि संग्राह्यत्वात्। एवं तावद्विनारजि पक्षस्याति निरवकाशत्वमपवादत्वमिति पक्षस्य च मुख्यत्वात्तदा
श्रयणे तु वर्णादनुदात्तादित्यस्यानन्तरमेव कनः प्रवृत्तेः कनः प्रत्ययस्य पुल्लिंगे सावकाशतया निरवकाशत्वाभावाच्च वार्तिकमिदं न कर्तव्यं। अत एव ङ्याप्ग्रह

वर्णे चानित्ये ५।४।३१॥ लोहितकः कोपेन। लोहिता। लिङ्गबाधनं वा। लोहितिका लोहिनिका। रक्ते ५।४।३२॥ लाक्षादिना रक्ते यो लोहितशब्दस्तस्मात्कन् स्यात्। लि
ङ्गबाधनं वा। लोहितिका। लोहिनिका शाटी। कालाच्च ५।४।३३॥ वर्णे चानित्ये रक्ते इति द्वयमनुवर्तते। [illegible] कालकं मुखं वैलक्ष्येण। कालकः पटः। का
लिका शाटी॥ विनयादिभ्यष्ठक् ५।४।३४॥ विनय एव वैनयिकः। सामयिकः। उपायाद्ध्रस्वत्वं च। औपयिकः॥ वाचो व्याहृतार्थायाम् ५।४।३५॥ स
न्दिष्टार्थायां वाचि विद्यमानाद्वाक्शब्दात्स्वार्थे ठक् स्यात्। सन्देशवाग्वाचिकं स्यात्। तद्युक्तात्कर्मणोऽण् ५।४।३६॥ कर्मैव कार्मणम्। वाचिकं॥
श्रुत्वा क्रियमाणं कर्मेत्यर्थः। ओषधेरजातौ ५।४।३७॥ स्वार्थेऽण्। औषधं पिबति। अजातौ किम्। ओषधयः क्षेत्रे रूढाः। प्रज्ञादिभ्यश्च ५।४।३८
प्रज्ञ एव प्राज्ञः। प्राज्ञी स्त्री। दैवतः। बान्धवः॥ ॥ [illegible] पुंस्त्वर्थमिति स्त्रीपीति रूपं प्रबलमिति च मनोरमादौ [illegible]मिति दिक्। उपायेति। उपायशब्दष्ठकं
[illegible] त्यर्थः। अकस्मात् [illegible] नासमात्रे टिलोपः। आकस्मिकं। वाचः। व्याहृता। व्याहृतार्था यां किं। मधुरा वागिदं
वदतस्य। वाचिकं मितिं। अतिवर्तन्ते स्वार्थिका क्वचित्लिङ्गमिति नपुंसकत्वं। प्रज्ञ एवेति। प्रजानातीति प्रज्ञः। इगुपधज्ञेति कः। ततः स्वार्थेऽण् प्राज्ञः। प्राज्ञीति। टिड्ढेति ङी
प्। प्रज्ञावान् प्राज्ञः। [illegible] प्रज्ञाविद्या [illegible] यस्याः सा प्राज्ञा भवति। प्रज्ञाश्रद्धार्चाभ्यो णः इति णः॥ ॥

मृदाले कृत्। प्रत्ययस्थादित्येव सिद्धे इकारोच्चारणं प्रक्रियालाघवार्थं टापो लुक्यपि श्रवणार्थं च पंचभिर्मृत्तिकाभिः क्रीतः पंचमृत्तिकः पटः। सस्नौ। इह प्रशंसा॥ यां स्नवि
त्यस्यानंतरं व कन्येष्टभ्यां तिलत्राति लौ च छन्दसि। मृदः सस्रौ तिकं श्वेति वक्तुमुचितं। न चैवं सस्नाविति कन् प्रत्ययोपि प्रशंसायामेवेत्यु वगमसंगतित्वं॥ श्वेत्यत्र प्रशं
सायामिति निवृत्तमिति कल्पनायां मानाभावादिति वाच्यं। मृदः सस्नतिकं न इति वक्तव्ये तिकनः पृथक्करणस्यैव तत्र मानत्वात्॥ प्रशस्ता मृदिति। मृत्स्ना। मृत्तिका प्रशस्ता तु मृ
त्सा मृत्स्ना च मृत्तिके त्यमरः। नित्योयमिति। मृदित्येतावदुक्ते प्रशंसत्वानवगमाद्विभाषात्र नानुवर्त्तत इति सस्नावित्ययं विधिः। नित्य एव उत्तरसूत्रस्था॥ न्यतरस्यां ग्रहणात्तु
सुतरामिति भावः। वह्वल्पार्थात्॥ इह नीतिः। वहुभ्यो ददाति वहुशः। अल्पेभ्य अल्पशः। इत्याद्यपि वोध्यं। वह्वल्पार्थात् किं। गां ददाति। अश्वं ददाति॥ अर्थग्रहणात्पर्याये
भ्योपि शेषेभ्यश्च। भूरिशो ददातीति। त्रिशः। कुरकात्किं। वहूनां स्वामी अल्पानां स्वामी। मंगलवचनमिति। वहुशो ददा[illegible] दयिकेषु कर्मसु॥ अल्पशो ददात्यनिष्टे

मृदस्तिकन्॥५।४।३९॥ मृदेव मृत्तिका॥ सस्नौ प्रशंसायाम्॥५।४।४०॥ रूपपोऽपवादः। प्रशस्ता मृत्। मृत्सा। मृत्स्ना। उत्तरसूत्रेऽन्यतरस्यां ग्रहणान्नि
त्योयम्॥ वह्वल्पार्थाच्छस्कारकादन्यतरस्याम्॥५।४।४२॥ वहूनि ददाति वहुशः। अल्पानि अल्पशः। वहुशोऽर्थान्मङ्गलामङ्गलवचनम्॥ नेह।
वहूनि ददात्यनिष्टेषु। अल्पं ददात्याभ्युदयिकेषु। संख्यैकवचनाच्च वीप्सायाम्॥५।४।४३॥ द्वौ द्वौ ददाति द्विशः। माषं माषं माषशः। प्रस्थशः। प
रिमाणशब्दा वृत्तावेकार्था एवा संख्यैकवचनात् किम्

षु। आभ्युदयिकेषु वहुदानं अनिष्टेष्वल्पदानं च मंगलं। तद्विपरीत्येन दानं तु मंगलं न भवतीत्याशयेनाह
नेहेति। अनिष्टेष्विति। मघादिनिमित्तेषु दानेषु। आभ्युदयिकेष्विति। अभ्युदयप्रयोजनेष्वग्न्याधेयादिषु। मूलपुस्तके तु मंगल॥ मंगलवचनमिति प्रायेणपठ्यते
तत्रामंगलग्रहणं व्रत्येत्याहुः प्रामाणिकं चैतन्मंगलवचनमन्यत्रापि हि दृश्यते अयेनापोठमुक्तपतिनापत्रसेरल्पशइति। कारका॥ कत्वं तु समसनक्रियां प्रतिपंचम्याः क
र्मत्वान्तदभिधायित्वाच्चाल्पशब्दस्य तथा च व्याचक्षते अल्पापंचमीसमस्तदिति आचार्येणेति शेषः। परिमाणशब्दा इति। तथा चैकवचनग्रहणेन एकोर्थः। उच्यते
येनेत्यर्थः केन वृत्तावेकार्थता नियताः परिमाणशब्दा एव गृह्यंत इति भावः। माषं माषमिति। माषदानेत्युक्ते माषमात्रस्यापि ॥ रण्यादेर्दानेति प्रतीयते न तु माषाणामि
ति प्रतीतिरिति भवत्ययं वृत्तावेकार्थतानियतः। एवं प्रस्थादिरपि। घटादयस्तु नैवं। घटदानेत्युक्ते तु घटानां दानेत्यर्थस्यापि प्रतीयमानत्वादत एव च प्रत्युदाहरंति

सहस्रशः समेतानां पृथक्त्वं न विद्यत इति। नन्वत्र वीप्सास्ति नापि कारकत्वमिति चेदत्राहुः। सहस्रं सहस्रं ये समेतास्तेषामपि परिपृथक्त्वं नेत्यर्थः। तथा च समवाय्य
क्रियां प्रति कर्तृत्वं वीप्सां वाऽऽश्रित्यैवेति एतेन एकशः एकवचनोऽपि संज्ञाविषय इति व्याख्यातं। एकशब्दार्थस्यापि क्रियां प्रति कर्तृत्वात्। कृत्स्नतः प्रतीतिः प्रतिः प्रतिनिधि
प्रतिदानयोरिति कर्मप्रवचनीयसंज्ञायां प्रतिनिधिप्रतिदाने च यस्मादिति पंचमी। आद्यादिभ्य इति। तस्मादित उदात्तमद्ध ह्रस्वमित्यदत्त इत्यलि ग्रामो ग्रामत इति। एवम
ध्ययनेऽत्यराजयत अध्ययनत इत्याद्यपि बोध्यम्। अतिगृह्यत इति। अन्यानतिक्रमेण लोकैर्गृह्यत इत्यर्थः। फलितमाह। अन्याननतिक्रम्य वर्तत इति प्रवाहिका
त इति। प्रच्छर्दिकान्तः कुर्वित्याद्युदाहरणे प्रवाहिका वि सूचिका प्रच्छर्दिका तु वमनव्याधिः॥ ॥ कृभ्वस्तियोगे इति किं। अशुक्लः शुक्लो जायते। सं

कृभ्वस्तियोगे संपद्यकर्तरि च्विः ५।४।५०॥ अभूततद्भाव इति वक्तव्यम्॥ विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्तमानाद्विकारशब्दात् स्वार्थे च्विर्वा स्यात् करोत्यादि
भिर्योगे। अस्य च्वौ ७।४।३२॥ अवर्णस्य ईत्स्यात् च्वौ। वेर्लोपः। च्व्यन्तत्वादव्ययत्वं। अकृष्णः कृष्णः संपद्यते तं करोति कृष्णीकरोति। ब्रह्मीभवति।
गङ्गीस्यात्। अव्ययस्य च्वावीत्वं नेति वाच्यम्॥ दोषाभूतमहः। दिवाभूता रात्रिः। एतच्चाव्ययीभावश्चेति सूत्रे भाष्ये उक्तम्। क्यच्व्योश्च। ६।४।१५२
हलः परस्यापत्ययकारस्य लोपः स्यात्। क्ये च्वौ च परतः। गार्गीभवति। च्वौ च। ७।४।२६॥ च्वौ परे पूर्वस्य दीर्घः स्यात्। शुचीभवति। पटूस्यात्। अव्य
यस्य दीर्घत्वं नेति केचित्। तन्निर्मूलम्। स्वस्ति स्यादिति तु मह। विभाषया च्वेरभावात्सिद्धम्। स्वस्ती स्यादित्यपि पक्षे स्यादिति चेदस्तु यदि नेष्यते
तर्ह्यनभिधानात् च्विरेव नोत्पद्यत इत्यस्तु। रीङृतः। मात्रीकरोति। अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च। ५।४।५१॥ एषां लोपः स्यात् च्विश्च
अरूकरोति। उन्मनीस्यात्। उच्चक्षूकरोति॥ विचेतीकरोति॥ विरहीकरोति। विरजीकरोति॥

संपद्यकर्तरीति। संपद्यश्चासौ कर्ता चेति
विग्रहः। पाघ्राध्माधेट्दृशः इति विहितः शप्रत्ययोऽस्मादेव निपातनात् संपदोऽपि भवति। दिवादित्वात् श्यन्निति हरदत्तः। वक्तव्यमिति। वृत्तिकारास्तु अभूततद्भा
व इति सूत्रमध्ये प्रक्षिप्य च्व्यन्तत्वादिति तस्य निपातनत्वात् स्वरादिनिपातमव्ययमित्यनेनेत्यर्थः। गार्गीभवतीति। इह यञः ज्ञातं सुपितः च्विप्रत्यये कृते आपत्यस्य चेत्तद्धिते
नातीति य लोपो न भवति ईकारेण व्यवधानादिति बोध्यं। अरुर्मनश्च च्विश्चेति। पूर्वत्रासिद्धस्यापि च्वेरयमनुवादो लोपस्तु तत्सन्नियोगशिष्टत्वार्थः॥ ॥ ॥ ॥

विभाषासाति। विभाष्यते विकल्प्यते इति विभाषा गुरोश्च हलः इत्यकारप्रत्ययस्ततः टाप्। नत्विदम् अव्ययं द्वयोर्विभाषयोर्मध्ये पपयसत्तु। विभाषयेत्यादौ विभक्तेर्दर्शनात्॥
कृत्स्नमिति। सर्वावयवोपेतमित्यर्थः। अग्निसाद्भवति शस्त्रमिति। जातावेकवचनं सेर्वालि शस्त्राणीत्यर्थः। वंदेरमेवेति। देवान् वंदे देवत्रा वंदे देवेषु रमे देवत्रा रमे इ

विभाषा साति कार्त्स्न्ये। ५। ४। ५२॥ च्विविषये सातिर्वा स्यात्साकल्ये। सात्पदाद्योः। ८। ३। १११॥ सस्य षत्वं न स्यात्। दधि सिञ्चति। कृत्स्नं शस्त्रमग्निः सम्प
द्यतेऽग्निसाद्भवति। अग्नीभवति। महाविभाषया वाक्यमपि। कार्त्स्न्ये किम्। एकदेशेन शुक्लीभवति पटः। अभिविधौ सम्पदा च। ५। ४। ५३॥ सम्प
दा कृभ्वस्तिभिश्च योगे सातिर्वा स्याद्व्याप्तौ। पक्षे कृभ्वस्तियोगे च्विः। सम्पदा तु वाक्यमेव। अग्निसात्सम्पद्यते अग्निसाद्भवति शस्त्रं। अग्नीभवति। जल
सात्सम्पद्यते जलीभवति लवणम्। एकस्या व्यक्तेः सर्वावयवावच्छेदेनाऽन्यथाभावः कार्त्स्न्यम्। बहूनां व्यक्तीनां किञ्चिदवयवाऽवच्छेदेनान्यथात्वं व
भिविधिः। तदधीनवचने। ५। ४। ५४॥ सातिः स्यात्कृभ्वस्तिभिः सम्पदा च योगे। राजसात्करोति। राजसात्सम्पद्यते। राजाधीनमित्यर्थः। देये त्रा च। ५।
४। ५५॥ तदधीने देये त्रा स्यात्साति च कृञादियोगे। विप्राधीनं देयं करोति विप्रत्रा करोति। विप्रत्रा सम्पद्यते। पक्षे विप्रसात्करोति। देये किम्। राज
साद्भवति राष्ट्रम्॥ देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्। ५। ४। ५६॥ एभ्यो द्वितीयान्तेभ्यः सप्तम्यन्तेभ्यश्च त्रा स्यात्। देवत्रा वन्दे
रमेवा। बहुलोक्तेरन्यत्रापि। बहुत्रा जीवतो मनः। अव्यक्तानुकरणाद्द्व्यजवरार्धादनितौ डाच्। ५। ४। ५७॥ च अवरं न्यूनं न तु ततो न्यूनम
नेकाजिति यावत्। तादृशमर्धं यस्य तस्माड्डाच् स्यात्कृभ्वस्तिभिर्योगे। डाचि विवक्षिते द्वे बहुलम्। नित्यमाम्रेडिते [illegible] इति वक्तव्यम्॥ डाच्परं यदा
म्रेडितं तस्मिन्परे पूर्वपरयोर्वर्णयोः पररूपं स्यात्। इति तकारपकारयोः पकारः। पटपटाकरोति। अव्यक्तानुकरणात्किम्। दृषत्करोति। द्व्यज
वरार्धात्किम्। श्रत्करोति। अवरेति किम्। ॥ १ त्वर्थोऽत्र पर्यवसन्नः। एवं मनुष्यान् गच्छति। मनुष्यत्रा गच्छति। मनुष्येषु वसति। मनुष्यत्रा व
सति। पुरुषान्गच्छति। पुरुषत्रा गच्छति। पुरुषेषु वसति। पुरुषत्रा वसति। पुरुषशब्दो बहु पर्यायः। पुरून्गच्छति पुरुषु वसति वा पुरुत्रा। मर्त्यान्मर्त्येषु वा मर्त्यत्रा
डाचि द्वित्वं विवक्षितं इति। परस्य सम्यक्त्वस्यान्याश्रयः स्यात् डाचि [illegible] ते द्वित्वे सति द्व्यजवरार्धत्वात्तस्यां च सत्यां डाजिति भावः॥ ॥

स्वरट्स्वरटाकरोतीति। द्वित्वपररूपादि प्राग्वत्। द्व्यजवरार्द्धादित्युक्ते त्वत्र डाच् न स्यात्। न स्यत्राईस्य च किंतु स्य च। अनेकाच इत्येवेति। द्व्यजवरार्द्धादित्यपनीयेत्यर्थः
पटितीति। अव्यक्तानुकरणस्यात इतावितिपररूपं। नन्वत्र करोतिनायोगो दुर्लभ इति शब्देन व्यवधानात् तथा चानितावितिव्यर्थमिति चेदत्राहुः इति श

स्वरट्स्वरटाकरोति। त्रपट्त्रपटाकरोति। अनेकाच इत्येव सूत्रयितुमुचितम्। एवं हि डाचीति परस्य सम्येव द्वित्वं सुवचेत्यवधेयम्। अनितौ किम्
पटिति करोति। कृञो द्वितीयतृतीयशम्बबीजात्कृषौ। ५।४।५८॥ द्वितीयादिभ्यो डाच् स्यात् कृञ एव योगे कर्षणेऽर्थे। बहुलोक्तेरव्यक्तानुकरणादन्य
स्य डाचि न द्वित्वम्। द्वितीयं तृतीयं वा कर्षणं करोति। द्वितीयाकरोति। तृतीयाकरोति। शम्बशब्दः प्रतिलोमे। अनुलोमं कृष्टं क्षेत्रं पुनः प्रतिलोमं क
र्षति। शम्बाकरोति। बीजेन सह कर्षति। बीजाकरोति। संख्यायाश्च गुणान्तायाः। ५।४।५९॥ कृञो योगे कृषौ डाच् स्यात्। द्विगुणाकरोति क्षेत्र
म्। क्षेत्रकर्मकं द्विगुणं कर्षणं करोतीत्यर्थः। समयाच्च यापनायाम्। ५।४।६०॥ कृञो विति निवृत्तम्। कृञो योगे डाच् स्यात्। समयाकरोति
कालं यापयतीत्यर्थः। सपत्रनिष्पत्रादतिव्यथने। ५।४।६१॥ सपत्राकरोति मृगं। सपुङ्खशरप्रवेशेन सपत्रं करोतीत्यर्थः। निष्पत्राकरोति। स
पुङ्खस्य शरस्याऽपरपार्श्वे निर्गमनान्निःपत्रं करोतीत्यर्थः। अतिव्यथने किम्। सपत्रं निष्पत्रं वा करोति भूतलम्॥ निष्कुलान्निष्कोषणे। ५
।४।६२॥ निष्कुलाकरोति दाडिमम्। निर्गतं कुलमन्तरवयवानां समूहो यस्मादिति बहुव्रीहेर्डाच्। सुखप्रियादानुलोम्ये। ५।४।६३॥ सुखा
करोति। प्रियाकरोति गुरुम्। अनुकूलाचरणेनानन्दयतीत्यर्थः। दुःखात्प्रातिलोम्ये। ५।४।६४॥ दुःखाकरोति स्वामिनम्। पीडयतीत्यर्थः।
शूलात्पाके। ५।४।६५॥ शूलाकरोति मांसम्। शूलेन पचतीत्यर्थः। सत्यादशपथे। ५।४।६६॥ सत्याकरोति भाण्डं वणिक्। क्रेतव्यमिति तथ्यं
करोतीत्यर्थः। शपथे तु सत्यं करोति विप्रः। मद्रात्परिवापणे। ५।४।६७॥ मद्रशब्दो मङ्गलार्थः। परिवापणं मुण्डनम्। मद्राकरोति कुमारं मङ्गलमुण्ड
नेन संस्करोतीत्यर्थः। भद्राच्चेति वक्तव्यम्। भद्राकरोति। अर्थः प्राग्वत्। परिवापणे किम्। भद्रं करोति। मद्रं करोति॥ इति तद्धितप्रक्रिया समाप्ता॥

व्येन करोत्यर्थगतप्रकार एव परामृश्यते इत्येवं प्रकारेण करोतीति। तथा च पटशब्दस्यार्थद्वारा योगोऽस्त्येवेति। बीजेन सहेति। ननु बीजेन सह भूतलस्य कर्षणे बी

ज्ञानामपि के[illegible]प्रसंगाद्दिवक्षितार्थो न सिध्यतीति चेदत्राह ॥ तेन विषये वीजशब्दो वीजावापसहिते विलेखने वर्त्तते। तथा च वीजावापसहितावलेखनं
करोतीत्यर्थ इति। [illegible]आच्छ। कालं यापयतीत्यर्थ इति। कर्तव्यस्यावसरप्राप्तिस्समयस्तस्यातिक्रमणं यापने, वृत्तिग्रंथमुपादाय हरदत्त आह। अद्यमे
पारवं श्वः परश्वो वा अस्य समय इत्येवं बहुषु दिवसेषु य आह स एवमुच्यत इति। सपत्रनिष्पत्रात्। लक्ष्ये शराः पतंत्यनेनेति पत्रं। प्राणांपुरवगतो वहिः
सपत्रं निष्पत्रं वा करोतीति। पच्यादिषु [illegible]निनत्सहितं तद्रहितं [illegible]तियथासंभवमर्थः। निष्कुलान्निष्कोषणं। अंतरवयवानां वहिर्निष्कासनेन निष्कुलं
निष्कुलं करोति दाडिमं। शूलात्पाके। पाके किं। शूलं करोति कदन्नो। शूलमुदररोगः। सत्यादशपथे। सत्यं सुसाधु सत्यं तत्र साधुरिति प्राग्घितीयत्वाद[illegible]प्राप्ते अनृ
वानिपातनात्मयः। अंतोदात्तो यं। सत्येनोत्तमिता भूमिः। स्मृतं च स[illegible]मित्यत्र तथा दर्शनात्। सत्यं करोतीति भांडं रत्नादि द्रव्यजातं क्रेतव्यमिति [illegible]यैवतद्व्य
त्ययमिति वुध्वा परीक्षादिना सत्यंकारद्रव्यप्रदानेन च दृढं करोतीत्यर्थः। तथ्यमिति। तथैव तथ्यं। पादार्घाभ्यां चेति चकार[illegible]स्यानुक्तसमुच्चयार्थत्वात्स्वार्थे यत्
पारवाप्यमिति। कर्मव्यापारमात्रवाचिनो वपेर्हेतुमण्णिच्[illegible] इति हरदत्तः। कर्मव्यापारः फलं तस्य कर्मनिष्ठत्वात्[illegible]च फलमात्रवाचिन इत्यर्थः फलि
त इत्याहः। मंगलस्य मंडनेनेति चोलशीलादौ भद्रा चेति। भद्रादि पर्यग्रहणाद्विति व्याख्यानेन तु मंगलादिभ्योपि स्यात् इति बोध्यं॥ इति तद्धितप्रक्रिया ॥

सर्वस्य द्वे॥ सर्वशब्दस्य द्वे भवत इति विधिसूत्रशंका। किंतु नित्यवीप्सयोरित्येवमादीनां विधेयकार्यनिर्देशो न साकांक्षत्वात् स्वरितत्वाच्चाधिकारो
यं तदाह। इत्यधिकृत्येति। एतदर्थरूपमधिकृत्येत्यर्थः। स्वरूपग्रहणं तु न भवति नाम्रेडितस्यांत्यस्य तु वेति लिंगात्। स्वरूपग्रहणे हि सति द्विरुक्तसर्व
शब्दस्यैव परमाम्रेडितं स्यान्न तु द्विरुक्तस्याव्युत्पन्नानुकरणशब्दस्य परमिति नाम्रेडितस्येति पररूपनिषेधोंत्यस्य तकारस्य विकल्पविधिश्च कथं संगच्छेत
नेन नित्यवीप्सयोरित्यादौ परस्येति वक्ष्यमाणे पक्षस्य परस्यैव द्वित्वं विधीयते इति किमनेन सर्वस्येति ग्रहणेनेति चेदत्राहुः। स्वादिष्वितिपदसंज्ञामाश्रित्य
स्याभ्यामित्यादौ प्रकृतिभागमात्रस्य द्विर्वचनं स्यात् कृते तु सर्वस्येति ग्रहणे सर्वशब्दोऽवयवकार्त्स्न्ये वर्तते इति सर्वावयवोपेतस्य द्वित्वं न तु कश्चिदवयवो वर्ज्येत इ
त्यर्थलाभादिष्टसिद्धिरिति। इह द्वे इत्यस्य संख्यापेक्षायां शब्दरूपेण गृहीते शब्दानेकत्वे सति न संख्याविवक्षा स्थाने [illegible] यं स्थाने हि द्विर्वचनपक्षः। यदि तु उ
च्चारणसंख्येयं तदा स्थान्यादेशभावो न संभवति। निवृत्तिधर्मा हि स्थानी भवति सर्वं चेत् निवृत्तं कस्योच्चारणं स्यादतः सर्वस्येत्यध्याहृतोच्चारणे [illegible] पेक्षपाक

॥सर्वस्य द्वे॥८।१।१॥ इत्यधिकृत्य ॥ ॥

र्तृकर्मणोः कृतीति कर्मणि षष्ठी सर्वे हि कृत्वा रयेदिति फलितोऽर्थः सोयं हि द्वियोगो द्विर्वचनमिति पक्षः। ननु आद्यपक्षे स्थानिवद्भावेन समुदायस्यैव पदत्वं स्या
न्नत्ववयवयोस्तत्श्च पदकार्याणि न स्युः न चेष्टापत्तिः। अपचन्नपचन्नित्यत्र ङमुट् हृस्वान्नृहस्वानित्यत्र उदांतस्येति णत्वनिषेधः अग्नेः ग्ने इत्यत्र एङः पदां
तादिति पूर्वरूपत्वं च न सिध्येत्। किं चापदांतत्वप्रयुक्तकार्याणि स्युस्तद्यथा पयः पयः इत्यत्र सोपदादाविति सत्वं स्यात् पपीः पपीरित्यत्र लः ष इति षत्वं स्यात् आप
श्च कल्पकाम्येष्विति इति ग्रंथमवष्टभ्य कथंचित्सत्वषत्वपरिहारेप्यश्नीत अश्नीतेत्यत्र अतो गुण इति पररूपं स्यादिति चेदत्राहुः। यदि प्रत्यस्तमितावयवभेदः समु
दाय एक एवादेशः स्यात् द्वे इति वचनमनुपपन्नं स्यादतो द्वे इति वचनादेकस्य परस्य स्थाने द्वे पदे समुदिते युगपदादेशत्वेन विधीयेते। तत्र स्थानिवद्भावेन समु
दायस्य पदत्वं स्वत एव चावयवयोरपीति न कश्चिद्दोष इति। स्यादेतत्। द्विः प्रयोगपक्षे प्रत्येकं पदसंज्ञायां सिद्धायामपि समुदायस्य सा न सिध्यति। ततश्चैव
दतः प्रभृति पचतीत्यादौ तिङ्ङतिङः इति सर्वस्य पदस्य निघातो न सिध्यतीति चेदत्राहुः। पचति पचतीत्यादौ हि स एव धातुः प्रत्ययश्चात्र द्विः पठ्यते ततश्च य

एकं बहुव्रीहिवत् इत्यनुवर्तते। तच्चानुवादसमर्पकं तदाह। द्विरुक्त इति। तेनेति। यद्यप्येतौ बहुव्रीहौ विशिष्य न विहितौ तथापि न ... वत्तेर्वा नातिदिश्येते इति भावः। सुब्लोपपुंवद्भावाक्षिति। पूर्वपदप्रकृतिस्वरश्च बोध्यः। समुदायात्सु विति। तच्चैकवचनमेवेति अन्तरङ्गैकसंख्यावरुद्धात् द्विरुक्तार्थः संख्यान्तरेणाकांक्ष इति भागे ... त्वात् पूर्वभागे इतिन तूत्तरभागेपि। तथाहि द्विधात्र पुंवद्भावः सर्वनाम्नो वृत्तिमात्र इति वा स्त्रियाः पुंवदिति वा। तत्राद्यः पूर्वभागस्यैव भस्याढे तद्धिते ... पकादित्युक्त। द्वितीयस्तु समानाधिकरणे परे विधीयते। न चोत्तरभागस्य समानाधिकरणं परत्वमस्तीति भावः। अकच्प्रत्ययविधिप्रवइति। एकैकयेत्यैकएकयेति भवतीत्यर्थः। एकैकस्मै इति। ननु सुब्लोपपुंवद्भावावि बहुव्रीहौ सर्वनामसंज्ञाभावोपि दृष्ट इत्ययमपि बहुव्रीहिवद्भावेनातिदिश्यतां तथा च समायादेशोत्र दुर्लभ इति चेत् अत्राहुः। सुब्लोपपुंवद्भावावितसर्वनामसंज्ञाभावःश्रा

एकम्बहुव्रीहिवत्। ८।१।९॥ द्विरुक्त एकशब्दो बहुव्रीहिवत्स्यात्। तेन सुब्लोपपुम्वद्भावौ। एकैकमक्षरम्। इह द्वयोरपि सुपोर्लुकि कृते प्रकृति... बद्भावादेव प्रातिपदिका समुदायात्सुप्। एकैकस्या आहुत्या इह पूर्वभागे पुम्वद्भावादवग्रहे विशेषः। न बहुव्रीहावित्यत्र ... बहुव्रीहिग्रहणमत्य बहुव्रीहित्वाभावार्थम् तेनातिदिष्टबहुव्रीहौ सर्वनामतास्त्येवेति प्राञ्चः। वस्तुतस्तु भाष्यमते प्रत्याख्यातमेवतत् सूत्रमतोपि बहुव्रीहावित्यर्थः लौकिके विग्रहे निषेधकं न बहुव्रीहावितिहातिदेशशङ्कैव नास्ति। एकैकस्मै देहि। आबाधे च। ८।१।१०॥ पीडायां द्योत्यायां द्विरुक्तो बहुव्रीहिवच्च। गतगतः। विरहात्पीड्यमानस्य यमुक्तिः। बहुव्रीहिवद्भावात्सुब्लुक्। गतगता। इह पुम्वद्भावः॥ ॥

९ स्त्रेण न दृष्टः केंगु बहुव्रीहेर्गौणत्वात्सर्ववाचकत्वं न संभवतीति तद्भावोदृष्ट इति नेत्थमतिदिश्यते। न बहुव्रीहावितिशास्त्रं तु लौकिकवाक्ये निषेधकं तत्तु बहुव्रीहावित्युक्तत्वादिति। आबाधे चेति। इहेति बहुव्रीहिवद्भावादित्यनुषज्यते। तथा च स्त्रियाः पुंवदिति प्रवर्तते। न च द्विरुक्तस्य परमुत्तरपदं नेति वाच्यं। बहुव्रीहिवदित्यतिदेशबलेनैव उत्तरपदत्वस्यापि लाभात्। ननु बहुव्रीहेर्वद्भावे मान्तरपदत्वलाभे सति नने त्यत्र नलोपः कस्मान्न भवति। उच्यते। नलोपो नञ इत्यत्र उत्तरपदे इति वर्तते। नञ इति च कार्यिणो निर्देशः तत्र सा साक्षिष्ट कार्यित्वेन नञो निमित्तभावे बाध्यते। यथा मद्रह्रदो भद्रह्रद इति। अत्र रेफस्याचोरहाभ्यामिति द्वित्वप्रसंगे आकारे उक्तं नेमौ रहौ कार्यिणौ किंतु निमित्तमेतौ द्विर्वचनस्येति नन्वेवमपि धूर्धूः पं

करोतीत्यत्र वीप्सायां द्विर्वचनं अनेन तु द्विर्वचने सुक् स्यात्। नवनवां वनवायुभिरादरेदरेत्यत्र त्वनेनैव द्विर्वचनं न तु वीप्सायामिति पूर्वपक्षः कथं भीतभीत इव शीतमयूख
इति भारविः इव शब्देन सादृश्यस्योक्ततया इह प्रकारे द्वित्वायोगात्। सत्यं भीतेभ्यो भीत इति कथंचिद्व्याख्येयं तेनातिभीत इति फलितं आधिक्ये द्वे वाच्ये इति वार्तिकेन
भीतभीतादेर्द्वित्वमिति दुर्घटादिभिरुक्तं समाधानं नादर्तव्यं। तादृशस्य वार्तिकस्याप्रसिद्धत्वात्। अथ कथं खिन्नः खिन्नः शिखरिषु पदं न्यस्य गंतासि यत्र क्षीणः क्षीणः परिल
घु पयः स्रोतसां चोपयुज्येति मेघदूतः। पदार्थभेदस्याभावेन वीप्सार्थस्यासंभवादिति चेदत्राहुः। एकस्यापि विदावस्थासु स्वावस्थासु च भेदं परिकल्प्य वीप्सा बोध्ये
ति। अथ कथं मंदं मंदं नुदति पवनश्चानुकूलो यथा त्वामिति मेघः। वीप्सार्थस्यासंभवादनेनैव द्विर्वचने कृते मंदमंदमुदितः प्रययौ खमितिवत्तावत् स्यान्न इति चेत्स
त्यं स्वतो मंदगामिनं त्वां पवनो मंदं नुदतीति कथंचिद्व्याख्येयं। सिद्धस्य गतेश्चिंतनीयत्वात्। शुक्लशुक्लमित्यादि केवलगुणवाचिन उदाहरणमिति ध्वनयन्नाह [illegible]ति।
आनुपूर्व्ये इति। वीप्साभावादयमारंभः। मूले मूले इति। अग्रे अग्रे सूक्ष्मा इत्युदाहर्तव्यं। एकस्य वस्तुनो वेणुदंडादेरेकमेव मुख्यं मूलं इतरे ये भागास्तेषामपि सि।
को अग्रमूलव्यपदेशः। स्थौल्यसौक्ष्म्ये अपि नैकरूपे किं तर्हि यथा मूलमुपश्लिष्टेतरेषां स्थौल्यं यथा अग्रसौक्ष्म्यं तथानंतरे भागा इति वीप्साया असंभवः। मूले मूले पार्थिवि
टपिनामित्यत्र तु वीप्सायां द्विर्वचनमेतच्च हरदत्तग्रंथे स्पष्टं। न्यायसिद्ध इति। यावद्भिः शब्दैः संबोध्यार्थमवगच्छति तावतां प्रयोक्तव्यत्वादिति भावः। पौनःपुन्य इति
पुनः पुनर्भवितरि वर्तमानात् पुनः पुनः शब्दाभावे प्रत्ययः। लोटा सह समुच्चिनुयेति। नन्वत्र लोटा सह समुच्चिनुयथा द्विर्वचनं भवति तथा क्रियासमभिव्याहारे य[illegible]ह
समुच्चिते द्विर्वचने स्यात्। पापच्यते पापच्यते वा भूयते वा भूयते इति। अत्राहुः। लोट् क्रियासमभिव्याहारं व्यभिचरति समुच्चये प्रज्ञायमानत्वात्। ततश्च लोट् द्विर्वचनयोर
वर्णद्योतकत्वं न तु वैकस्येति युक्तं लोट्स्तस्य द्विर्वचनं। यङ् तु क्रियासमभिहारं न व्यभिचरतीति द्विर्वचनं विनैव तस्य द्योतकत्वं तेन न दंतस्य न द्विर्वचनमिति॥

सि·कौ· टी·त· सु·त· ६५

अन्योन्यमिति। नचात्र आम्भावेपि टाप् स्यादिति शंक्यं। बहुलग्रहणाट्टाबभाववत्नुपदमेव वक्ष्यमाणत्वात्। स्त्रीनपुंसकयोस्तु नीयादिषु पुंवेष्टदर्श्या चोद्यं यथा परिष्कृतं अन्यो-
ह। अत्र केचिदिति। वस्तुस्थितिमाह। अन्येत्विति। अतिप्रसंगादिति। तथाच एकशेषप्रतिबंधाद्विर्वचनस्यापि प्रवृत्तित्वमाश्रित्य तद्बलेन पुंवद्भावो न शंक्यः। तस्य वि-

परस्परादिस्सादृश्यमदृष्टपरस्परैरित्यादौ सोर्लुक् प्रामादिकः सर्वस्वा हलन्तत्वेन समाधेयम्। प्रकृतवार्त्तिकभाष्योदाहरणं स्त्रियामिति सूत्रे अन्योन्यसंश्रयं त्वेतदिति भाष्यं चात्र प्रमाणमिति। अ॰ प्रियसुखयोरन्यतरस्याम्। ८।१।१३॥ प्रियप्रियेण ददाति। प्रियेण वा। सुखसुखेन ददाति। सुखेन वा। द्विर्वचने कर्मधारयवद्भावात्तु पुब्लुकि तदेववचनम्। अतिप्रियमपि वस्तु नायासेन ददातीत्यर्थः॥ यथास्वे यथायथम्। ८।१।१४॥ यथास्वमिति वीप्सायामव्ययीभावः। यो य आत्मा यच्चात्मीयं तद्यथास्वम्। तस्मिन् यथाशब्दस्य द्वे क्लीबत्वं च निपात्यते। यं यं यथायथं ज्ञाता यथास्वभावमित्यर्थः। यथात्मीयमिति वा। द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु। ८।१।१५॥ द्विशब्दस्य द्विर्वचनं पूर्वपदस्याम्भावोऽत्वं चोत्तरपदस्य नपुंसकत्वं च निपात्यते एष्वर्थेषु। तत्र रहस्यं द्वन्द्वशब्दवाच्यम्। इतरे विषयभूताः। द्वन्द्वं मन्त्रयते रहस्यमित्यर्थः। मर्यादा स्थित्यनतिक्रमः। आचतुरं हीमे पशवो द्वन्द्वं मिथुनीयन्ति माता पुत्रेण मिथुनं गच्छति। पौत्रेण प्रपौत्रेणापीति मर्यादार्थः। व्युत्क्रमणं पृथगवस्थानम्। द्वन्द्वं व्युत्क्रान्ताः। द्विवर्गसम्बन्धेन पृथगवस्थिताः। द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति। द्वन्द्वं संकर्षणवासुदेवौ। अभिव्यक्तौ साहचर्येणेत्यर्थः। योगविभागादन्यत्रापि द्वन्द्वमिष्यते॥ इति द्विरुक्तप्रक्रिया॥ इति श्रीभट्टोजिदीक्षितविरचितायां सिद्धान्तकौमु-

ता। कारकं चेद्विजानीयाद्यां यां मन्येत सा भवेदित्यकथितसूत्रस्थ यां यामिति भाष्यप्रयोगविरोधाच्चेति भावः। नव्यास्तु यां यां प्रियः प्रैक्षतेत्यादि माघप्रयोगे सेति द्विर्व-
चनमयुक्तं। द्विरुक्तार्थस्य सत्वेन नैव परामर्ष्टुं शक्यत्वादत एव भाष्ये यां यां मन्येत सा भवेदित्येवोक्तमित्याहुः॥ ॥ सोर्लुक् प्राप्त इति। सुपः स्वादेशविधानस्यान्यत्र

...स्यरमित्यत्र [illegible] चरितार्थत्वादिभावः। योय आत्मेत्यादि। आत्मात्मीय[illegible]पिस्वभ्रस्त्ववाचकत्वात्। यथायथमिति। नलोकेत्यनेन कृद्योगषष्ठीनिषेधः। ज्ञातेत्यस्य त-
न्नित्रताः। योय आत्मेत्यर्थे विद्यमानयथायथशब्दस्यार्थमाह। यथास्वभावमिति। आत्मा। यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्मवर्ष्म चेत्यमरः। पूर्वपदस्येति। द्वि ओ द्वि ओ इति।
स्थिते [illegible] कर्मधारयवद्भावात्सुपलुकि कृते पूर्वपदावयवस्यैकारस्येत्यर्थः। अत्र पुनरपदस्येति। उत्तरपदावयवस्यैकारस्येत्यर्थः। नपुंसकत्वं चेति। चकारादेकवद्भावे ह्रस्वापवाधं
ने नातोमित्यमादेशे द्वंद्वमिति सिध्यति। रहस्यं द्वंद्वशब्दवाच्यमिति। द्वाभ्यां निर्वृत्ते रहस्ययोग इति द्विरवेत्यर्थः॥ द्वंद्वं मंत्रयते इति। द्वौ द्वौ भूत्वा मंत्रयेते इत्यर्थः। एवं हि तत्र
रहस्यं भवति। आचतुरमिति। आङ्मर्यादाभिविध्योरित्यव्ययीभावः। अव्ययीभावे शरत्प्रभृतिभ्य इति टच्। चतुःशब्दोत्र चतुर्णां पूरणे द्रष्टव्यः। आचतुर्थादित्यर्थः॥ द्वं-
द्वं यज्ञपात्राणीति। स्फ्यश्च कपालानि चेत्यादीनि पात्राणि। द्वंद्वं दयनक्ति। आसादयतीत्यर्थः। अभिव्यक्तौ साहचर्येणेत्यर्थ इति। अत्र द्वंद्वमित्यत्र स्वार्थे द्विर्वचनमेक-
वद्भावादिकं तु पूर्ववत्। अन्यत्रापीति। द्वंद्वं युद्धं वर्तते॥ इह वीप्सायां द्विर्वचनं। द्वयोर्द्वयोर्द्वंद्वमित्यर्थः। द्वंद्वानि सहते। शीतमुष्णमेकं द्वंद्वं सुखदुःखं चापरं क्षुत्पिपासा चापरं
इह स्वार्थे द्विर्वचनमेकवद्भावादि पूर्ववत्। बहुत्वं त्वेकशेषबलात्॥ ॥ सिद्धांतकौमुदीव्याख्यायां कृता तत्त्वबोधिनी समाप्तं तत्रपूर्वार्द्धं तेन तुष्यतु शंकरः॥
इति श्रीपरमहंसपरिव्राजकाचार्यवामनेंद्रस्वामिचरणारविंद[illegible]ज्ञानेंद्रसरस्वतीकृतौ सिद्धांतव्याख्यायां तत्त्वबोधिन्याख्यायां पूर्वार्द्धं समाप्तम्॥ ॥
॥ मिती माघवदी ११ रवीवासर सम्वत [illegible] २८

॥इतिश्रीसिद्धांतकौमुदीतत्वबोधिनीटीकासंयुक्तपूर्वार्द्धंसमाप्तम्॥